श्रीमुखम्

।।श्री शृङ्गेरी श्रीजगद्गुरुमहासंस्थानम्।।

श्रीमत्परमहंसपरिव्राजकाचार्य पदवाक्यप्रमाणपारावारपारीण यमनियमासनप्राणायाम-प्रत्याहारधारणाध्यानसमाध्यष्टाङ्गयोगानुष्ठाननिष्ठ तपश्चत्रवर्त्यनाद्यविच्छिन्न श्रीशङ्करचार्य गुरुपरम्पराप्राप्तषड्दर्शनस्थापनाचार्य व्याख्यानसिंहासनाधीश्वर सकलनिगमागमसारहृदय सांख्यत्रयप्रतिपादक वैदिकमार्गप्रवर्तक सर्वतन्त्रस्वतन्त्रादिराजधानीविद्यानगर महाराजधानी-कर्णाटकसिंहासनप्रतिष्ठापनाचार्य श्रीमद्राजाधिराजगुरुभूमण्डलाचार्य ऋष्यश्रृङ्गपुराधीश्वर-तुङ्गभद्रातीरवासिश्रीमद्विद्याशङ्करपादपद्माराधक श्रीजगद्गुरु श्रीचन्द्रशेखरभारतीस्वामि-गुरुकरकमलसञ्जात

।।श्रीजगद्गुरु श्रृङ्गेरी श्रीमदभिनवविद्यातीर्थस्वामिभिः।।

अस्मदत्यन्तप्रियशिष्य श्री पेरि सूर्यनारायणशास्त्रिविषये नारायणस्मरणपूर्वकं विरचिता आशिषस्समुल्लसन्तु।

"ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च" इति श्रुतिरेव वेदस्येव वेदाङ्गानामप्यध्ययनं विधत्ते। अत एव भगवता जैमिनिना साङ्गस्वशाखाध्ययनोत्तरकालिकत्वमेव वेदार्थविचाररूपमीमांसाया व्यवस्थापितं शास्त्रारम्भसूत्र इति विदन्त्येव तदभिज्ञाः। तत्र वेदाङ्गेष्वभ्यर्हिततमं व्याकरणमिति वैयाकरणास्संगिरन्ते। तच्च व्याकरणं भगवान् पाणिनिः अष्टाध्याय्यभिधया सूत्ररूपेण प्रणिनाय। तानि च सूत्राणि शेषावतारो भगवान् पतञ्जलिः बभाषे। तस्माच्च भाष्याब्धेः कानिचित् रत्नानि संगृह्य "वैयाकरणमतोन्मज्जन" नाम्ना कञ्चित् कारिकाग्रन्थं जग्रन्थ विद्वदग्रणीर्भट्टोजिदीक्षितः। भट्टोजिदीक्षितस्य सर्वमेव वैयाकरणकुल-

मधर्मणमित्यतिरोहितं समेषां विदुषाम्। ताश्च कारिकाः (सोदर सूनुः) कौण्डभट्टः स्वविरचिते वैयाकरणभूषणसाराभिधे ग्रन्थे व्याचख्यौ। स च ग्रन्थः दीक्षिताशयं विवृण्वन्नपि संक्षिप्ततया व्याख्यासापेक्षो दृश्यते। अतो भवन्तः तद्ग्रन्थस्योपरि "तत्त्वदर्शिनी" नाम्नीमनवद्यां व्याख्यां निरमिमतेति विदित्वा मोमुदीति नः स्वान्तम्। व्याख्यामिमां तत्र तत्र अवैक्षिमहि। व्याख्यान्तरापेक्षया अस्य वैशिष्ट्यं तु इदं व्याख्यावलोकनेनैव स्फूटीभवति। ग्रन्थेऽस्मिन् वैयाकरणमतं सम्यग्विवेचितम्। भवतां गहनं शास्त्रपाण्डित्यं विज्ञाय प्रसीदामो वयम्। आशास्महे च ग्रन्थोऽयं श्रीशारदाचन्द्रमौलीश्वरयोरकम्पानुकम्पापरम्परया वैयाकरणपाणिपल्लवभूषणं भूयात्, भवन्तश्च सुखमेधिषीरन्निति।।

श्रृङ्गगिरिः **इति नारायणस्मरणम्**

प्रमादीच मार्गशीर्षशुक्लद्वितीया - इन्दुवासरः

२६-११-१९७३

APPRECIATION

M. SESHA SAYI
Principal
Govt. M.R. Sanskrit College

Vijayanagaram-2
Date 1-10-70

I would like to convey my respectful regards to the reputed scholar Sri Peri Suryanarayana Sastry. for his valued services in the field of Sanskrit grammer. This "Tatva Darsini a brilliant commentary to the Bushana Sara" of Sri Kaunda Bhatta is his brain child. The hidden beauties of Bhushanasara have been unfolded here with a touch of magnetic genious and mature understanding. The style is simple and sweet and the treatment of the subject is Superb. The philosophy of Sri Kaunda Bhatta is gracefully presented.

Bhushanasara is an authoritative work on "Arthika Vyakaranam". The words, their meaning and their interrealation - Ship and the "Sphota" philosophy are best known through this branch of learning.

Kaunda Bhatta refers to many other systems of philosophy such as Nyaya. Vedanta and Mimamsa, discusses them thread bare and condemns them out right at some places, while establishing his own Philosophy, and it is not easy to comment upon such great works. They require a deep insight and an extensive knowledge of all the relevent branches. That is the reason why we find only

limited numbers of commentaries on the side for "Arthika Vyakaranam".

Sri Sastry had his education under eminent scholars like Mahamahopadhya Tata Subbaraya Sastry and Kalaprapoorna Sri Peri Venkateswara Sastry, and served as senior Lecturer in Vyakarana for a long time in the Maharaja Govt. Sanskrit College Vijayanagaram and these two factors, his rich education and best experience have given him all the intellectual energy to attempt such great things. His grand old gurus under reference have offered unriballed commentaries to the "Prakriya Vyakaranam" and their worthy desciple has offered this on Arthika Vyakaranam.

The Patronage of the Royal house of Vijayanagaram has been mainly responsible for the rise of all these Scholars and Sciences.

"Tatva Darsini" in an intellectual mirror that reflects the talent of this blessed Scholar. I am sure it will have its due recognition in the world of Scholars.

(Sd) M. Seshasayi

भूमिका

श्री गणाधिपतये नमः।

अद्यत्वे शब्दानां साधुत्वसम्पादकं पाणनीयमेवेति निश्चप्रचं सर्वैरवगम्यते। तदेवोपजीव्य बहुभिर्विद्वद्भिरनेकशो ग्रन्था निर्ममिरे। ते च प्रायः पदसाधुत्वासाधुत्वमुद्दिश्यैव भाष्यकारोक्तमनुसृत्य प्रमाणपरम्परा, असदुक्तिनिरासपूर्वकं स्वस्वसिद्धान्तानुसारेण व्यवस्थिताः।

लोके प्रायः श्रुतिपथमगतैरपि शब्दैः शाब्दबोधादर्शनादन्वयव्यतिरेकाभ्यां तत्तत्पदनिष्ठवृत्तिज्ञानस्य कारणत्वमवसीयते। सा च वृत्तिः कीदृशी केषु केषु पदेषु कियदर्थनिरूपिता? कस्य पदार्थस्य केन सम्बन्धेन कुत्रान्वयः? इत्यादि विचारजातमवतार्य वाक्यप्रमाणज्ञैस्तार्किकैः स्वस्वसिद्धान्तानुसरण्या बहवो ग्रन्था विरचिताः।

परन्तु पदशास्त्रज्ञानां निकाये वाक्यपदीयमपहाय न केऽपि तादृशा ग्रन्थाः पूर्वमासन्। दर्शनान्तरीयाः स्वस्वग्रन्थेषु स्वस्वमतनिरूपणावसरे शाब्दिकमतं प्रसङ्गादवतार्य निराचक्रुः। पाणिनीयसूत्राणामपार्थमकल्पयंश्च।

एवं स्थिते दर्शनान्तरीयैः क्रियमाणां, शब्दशास्त्रविहरिणीं हृदयोद्वेगकारिणी वैयाकरणानां न्यूनतामसहमानाः सर्वतन्त्रनिष्णाताः श्रीमन्तो भट्टोजिदीक्षिताः फणिभाष्याब्धेः शब्दकौस्तुभमुद्धृत्य तत्र सूत्रार्थनिर्णयावसरे प्रसङ्गवशाद्दर्शनान्तरीयाणां मतं तत्प्रदर्शितशाब्दिकमतखण्डनञ्च निराकृत्य शब्दशास्त्रसिद्धान्तान् प्रतिपादयामासुः।

तत्र विप्रकीर्णान् पदशास्त्रसिद्धान्तान् पाठकाः सुखेन नग्रहीषुरित्याकलय्य मतान्तरनिराकरणपरः काल्पनिकप्रकृतिप्रत्ययानामर्थनिरूपणपरः शब्दबोधनिरूपकः अन्ततः स्फोटसिद्धान्तप्रतिपादकः वैयाकरणमतोन्मज्जननामकः कारिकाग्रन्थस्तैः कृतः।

दीक्षितस्य ज्येष्ठभ्रातू रङ्गोजिभट्टस्य तनयेन सर्वतन्त्रस्वतन्त्रेण कौण्डभट्टेन दीक्षितीय-कारिकाग्रन्थस्य भूषणनामिका बृहती व्याख्या व्यरचि। तेनैव पण्डितेन पाठकसौकर्यमपेक्ष्य तत्संक्षिप्तरूपा भूषणसारः कृतः। स एवेदानीं सर्वस्मिन्नपि भूमण्डले पाठ्यत्वेन प्रचलति।

भूषणसारस्यास्योपरि विद्वद्भिर्विरचिताः व्याख्याः मुद्रितास्सन्ति।

१) दर्पणः - हरिवल्लभकृतः।

२) काशिका - हरिरामदीक्षितकृता।

३) परीक्षा - भैरवमिश्रकृता।

४) भूषणव्याख्या - कृष्णमित्रकृता।

५) सरला - नेने गोपालशास्त्रिनिर्मिता।

६) प्रभा - पञ्चोलि बालकृष्णकृता।

तत्र `दर्पणः' `काशिका' व्याख्याद्वयमेव स्वतन्त्रम्। बहुपदार्थप्रतिपादकञ्च। परीक्षा दर्पण प्रतिबिम्बम्। प्रभा उभयच्छायामनुकरोति। सरला लघुतमा। ततोऽपि लघुतामेति भूषणव्याख्या।

हरिवल्लभादिभिस्सिद्धान्तकौमुदी - प्रौढमनोरमा - शब्दरत्न - शब्दकोस्तुभ - वैयाकरणभूषण - महाभाष्य कैयटादिमूलग्रन्थाननवेक्ष्यैव स्वोत्प्रेक्षितार्थानुगुणमेता व्याख्याः व्यरच्यन्त। अतस्ताः व्याख्याः भूषणसारतत्त्वावबोधने असमर्था एवासन्। अमुमाशयं मदीयतत्त्वदर्शिन्यां बहुषु स्थलेषु न्यरूपयम्। मदीयव्याख्याया अवलोकने पाठका एव निरुक्तमर्थं स्पष्टं जानीयुः।

तथापि कानिचित् स्थलानि दर्शयामि।

"पिङ्गाक्ष्यादियौगिकानामपि" - ४६ तमे पृष्ठे
"अनुशासनानुरोधतौल्ये अर्धजरतीयमयुक्तमिति" - २४३
"कृत्वोऽर्थाः" - २२०
"फलं विक्लित्त्यादि" - १२
"व्यापारस्तु भावनाभिधा" - १९
"अपि च मीमासकानां कृतामिव" - ३६
"अपि चाख्यातार्थप्राधान्ये" - ६०
"लडाद्यन्ते भावनाया अवाच्यत्वं वदतः प्राभाकरादीन्" - ९३
"न चैवमेषां शक्यतावच्छेदकत्वे" - १०५
"किञ्च भावनाया अवाच्यत्वे" - ११३
"एवं सिध्यतु फलव्यापारयोर्वाच्यत्वम्" - १४७
"अस्त्यादावपि धर्म्यशे" - १८७
"व्यपेक्षावादस्यैव युक्तिभाष्यविरुद्धत्वात्" - ४६७
"आरोपमात्रमर्थः - विषयत्वन्तु संसर्गः" - ५५२
"अभावो वा तदर्थोऽस्तु" - ५६९
"वस्तुतः पदैः पदार्थबोधवत्" - ६६३

इत्यादि स्थलेषु भूषणसारग्रन्थार्थनिरूपणे व्याख्यातारस्समीचीनां रीतिं नाग्रहीषुः। ग्रन्थकृदनभिमतमार्गेणैव मूलमयोजयन्।

अहन्तु यथामति मूलग्रन्थानवलोक्य तत्साहाय्येन सारतत्त्वार्थमुपादर्शयम्। मदीयव्याख्यादर्शने निरुक्तार्थः इतोऽप्यधिकः व्याख्यातॄणां प्रमादः प्रत्यक्षीभवति।

मम तत्त्वदर्शनीमालोक्य सन्तुष्टान्तरङ्गाः श्री श्री श्री शृङ्गेरी शारदा पीठाधीश्वराः जगद्गुरु श्रीमदभिनवविद्यातीर्थमहास्वामिचरणाः नारायणस्मरणपूर्वकमाशिषो व्यतरन्। जगद्गुरूणां श्रीमुखमपि अत्र सविनयं निवेशयामि।

आङ्लभाषायां प्रशस्तिमारचयितृभ्यः श्रीमद्भ्यः श्रीमद्विजयनगर राजकीय महाराज संस्कृतकलाशालाध्यक्षेभ्यः मानाप्रगड शेषशायि, एम. ए. महोदयेभ्यः परश्शतानि नमांसि समर्पये।

मुद्रणविषये श्रममविगणय्यात्यन्तमुपकुर्वद्भ्यः (अजन्ता आर्ट् प्रिन्टर्स्) श्री चेरुवु शिवरामकृष्णशास्त्रिमहोदयेभ्यः सप्रश्रयं कृतज्ञतां निवेदयामि।

एवं विज्ञापयिता तत्त्वदर्शनीकारः वेङ्कटेश्वरपादाब्ज

सेवनावाप्तसन्मतिः पदवाक्यप्रमाणज्ञः

सूर्यनारायणसुधीः

श्लोकानुक्रमणिका

श्रीमद्भट्टोजिदीक्षितविरचित वैयाकरणमतोन्मज्जननामक-वैयाकरणसिद्धान्त-कारिकाद्यचरणानामकारादिवर्णानुक्रमणसूचिका -

आद्य चरण: -

अ

अत एव गवित्याह — अत्रार्धजरतीयं स्यात्
अभावो वा तदर्थोऽस्तु — अभेदश्चात्र संसर्ग:
अभेदैकत्वसंख्याया: — अविग्रहा गतादिस्था
अव्ययकृत इत्युक्ते: — अषष्ठ्यर्थबहुव्रीहौ
असाधुरनुमानेन — अस्त्यादावपि धर्म्यंशे

आ

आख्यातशब्दे भागाभ्याम् — आख्यातं तद्धितकृतो:
आश्रयोऽवधिरुद्देश्य:

इ

इन्द्रियाणां स्वविषये

उ

उत्सर्गोऽयं कर्मकर्तृ — उपेयप्रतिपत्त्यर्था

ए

एकं द्विकं त्रिकं चाथ

औ

औपाधिको वा भेदोऽस्तु

क

कथं कर्तुरवाच्यत्व — किं कार्यं पचनीयं
किं तूत्पादनमेवात: — कैश्चिद् व्यक्तय एद्यवास्या:
क्रीडायां ण स्तदस्य

घ

घटेनेत्यादिषु नहि

च

चकारादिनिषेधोऽथ

ज

जायन्ते तज्जन्यबोध

त

तथान्यत्र निपातेऽपि तथा यस्य च भावेन
तस्मात्करोतिर्धातोः स्याद्

द

द्योतकाः प्रादयो येन

ध

धात्वर्थत्वं क्रियात्वं चेत्

न

नञ् समासे चापरस्य प्राधान्यात् नञ्समासे चापरस्य द्योत्यं
नामार्थयोरभेदोऽपि निपातत्वं परेषां यत्
निपातानां वाचकत्वम् निर्वर्त्ये च विकार्ये च

प

पदार्थः सदृशान्वेति पर्यवस्यच्छाब्दबोधा
प्रदेय एव वा शक्तिः प्रयोगोपाधिमाश्रित्य

फ

फणिभाषित भाष्याब्धेः फलव्यापारयोरेक
फलव्यापारयोर्धातुः फलव्यापारयोस्तत्र

ब

बाह्यानां वृत्तिधर्माणाम्

भ

भाट्टास्तेऽपीत्थमेवाहुः भेदस्संसर्ग उभयम्
भेद्यभेदकसंबन्धो भौतपूर्व्यात्सोऽपि

य

यदि पक्षेऽपि वत्यर्थः

र

रदाभ्यां वाक्यभेदेन

ल

लक्षणादधुना चेत्तत् लक्ष्यानुरोधात्संख्यायाः

व

वर्तमाने परोक्षे श्वो वाक्यात्पदानामत्यन्तम्
वाक्यस्फोटोऽति निष्कर्षे विधेये भेदकं तन्त्रम्
व्यवस्थितेर्व्यवहृतेः व्यापारो भावना सैव

श

शब्दोऽपि यदि भेदेन शरैरुस्त्रैरिवोदीच्यान्

स

सत्यं यत्तत्र सा जातिः समासस्तु चतुर्धेति
सर्वानामाव्ययादीनाम् साध्यत्वेन क्रिया तत्र
सुपां सुपा तिङा नाम्ना संबोधनान्तं कृत्वोऽर्थाः
स्वरदैहर्याद्यपि ह्यन्ये

ह

हरेऽवेत्यादि दृष्ट्वा च ह्यो भूते प्रेरणादौ च

सूचना

१२६ पृष्ठे मूलग्रंथे ६ तम पंक्तौ

"त्वादिरूप सकर्मकत्वोच्छेदापत्तिः" इति वाक्यस्यानन्तरं
"न च कृदादौ सकर्मकत्वव्यवहारो भाक्त इति
नैयायिकोक्तं युक्तम्, व्यवहारस्य भाक्तत्वेऽपि कर्मणि
लकारासम्भवात्" इति वाक्यान्तरं योजनीयम्।

प्रकरणानुक्रमणिका

भूषणसारस्थ प्रकरणाना मनुक्रमणिका

मङ्गलाचरणम्	-	1
धात्वर्थनिर्णयः	-	9
लकारार्थनिर्णयः	-	187
सुबर्थनिर्णयः	-	210
नामार्थनिर्णयः	-	279
समासशक्तिनिर्णयः	-	301
शक्तिनिर्णयः	-	357
नञर्थनिर्णयः	-	374
निपातार्थनिर्णयः	-	389
त्वादिभावप्रत्ययार्थनिर्णयः	-	408
देवतादिप्रत्ययार्थनिर्णयः	-	421
अभेदैकत्वसंख्यानिर्णयः	-	425
संख्याविवक्षानिर्णयः	-	430
क्त्वाद्यर्थनिर्णयः	-	433
स्फोटनिर्णयः	-	443

श्री गणेशाय नमः

तत्त्वदर्शिनीव्याख्यया समुल्लसितः

वैयाकरणभूषणसारः

श्री लक्ष्मीरमणं नौमि गौरीरमणरूपिणम्।
स्फोटरूपं, यतः सर्वं जगदेतद्विवर्तते।। ।।१।।

तत्त्वदर्शिनी

श्रीमेधादक्षिणामूर्तिं वटमूलनिवासिनम्।
जगतः प्रकृतिं वन्दे मायिनं विभुमीश्वरम्।। ।।१।।

स्वतन्त्रभारतो देशो गान्धिना क्षमयाऽर्जितः।
नेहूबहदूरुशास्त्रिभ्यां लालितः परया मुदा।। ।।२।।

चैनाभिजनयोधानां जेता सङ्ग्राममूर्धसु।
इन्दिरागान्धिबाहुभ्यां पाल्यमानो निरीतिकम्।। ।।३।।

वेदशास्त्रपुराणानामाकरः शुभकर्मणाम्।
धर्मेण रक्षन् जयतु प्रजाः शास्त्राभिवर्धकः।। ।।४।।

श्रीमान् विजयतां P.L. शिवराममहोदयः।
विशाखमण्डलाध्यक्षो धृतिमान्नीतिमान्वशी।। ।।५।।

कौशिकान्वयसम्भूतो याजुषप्रक्रियारतः।
श्रीमत्काञ्चीकामकोटिसंयमीन्द्रप्रसादभाक्।। ।।६।।

विशाखशङ्करम‘ प्रतिष्ठाबद्धकङ्कणः।
श्रीमेधादक्षिणामूर्तिमन्त्रचिन्तनलब्धधीः।। ।।७।।

शङ्कराद्वैतसिद्धान्तलग्नचित्तो विचक्षणः।
सङ्गीतशास्त्रमर्मज्ञः साहित्याम्भोधिपारगः।। ।।८।।

वेदवेदाङ्गतत्त्वज्ञः सूर्याराधनतत्परः।
लक्ष्मीनरसप्पपुत्रोऽसावलिमेलम्मगर्भजः।। ।।९।।

सङ्गीतसुमहाविद्वद्विशालाक्षीप्रियाञ्चितः।
धीमताऽनन्तरामेण पुत्रवान् शुभलक्षणः।। ।।१०।।

शुभमाधुरीप्रियाञ्चितवामाङ्गः पुत्रपूरितोत्सङ्गः।
विजयनगराधिनाथो जयतु [1]श्रीविजयरामगजनाथः।। ।।११।।

अधीत्य फणिभाष्याब्धिं सुधीन्द्राद् [2]वेङ्कटेश्वरात्।
मञ्जूषाद्यार्थिकग्रन्थान् [3]सुब्रह्मण्यात्सुधीमणेः।। ।।१२।।

[4] लक्ष्मणात्सुहृदो न्यायं काणादं च सुविस्तृतम्।
[5]लक्ष्मीनारायणाच्छ्रीमच्छाङ्करं दर्शनं शुभम्।। ।।१३।।

गौतमान्वयसम्भूतः पेरिवंशाब्धिचन्द्रमाः।
सर्वेश्वरसुतो धीरः सोमदेव्यास्तु गर्भजः।। ।।१४।।

सोमदेवीसमाश्लिष्टवामाङ्गो बहुशास्त्रवित्।
गजेन्द्राद्विजयरामात्पालकात्प्रथमं, ततः।। ।।१५।।

आन्ध्रप्रभुत्वान्मर्यादापूर्वकं लब्धजीविकः।
श्रीप्रभुत्वमहाराजकलाशालाप्रपाठकाः।। ।।१६।।

1. श्री श्री श्री पूसपाटि विजयरामजगपतिः (तृतीयः) विजयनगरमहाराजः P.V.G इत्याख्यया प्रसिद्धः।
2. कलाप्रपूर्ण ब्रह्मश्री पेरि वेङ्कटेश्वरशास्त्रिगुरुपादाः शब्देन्दुशेखरगुरुप्रसादशेषकर्तारः पारिभाषेन्दुशेखर-नागेशगूढार्थदीपिकाकर्तारश्च श्री ताता सुब्रह्मण्यशास्त्रिणां प्रियच्छात्राः।
3. महामहोपाध्याय कलाप्रपूर्ण ब्रह्मश्री ताता सुब्रह्मण्यशास्त्रिगुरुचरणाः शब्देन्दुशेखरगुरुप्रसादकर्तारः शब्दरत्नचित्रप्रभायाः लघुटिप्पणीकर्तारश्च ब्रह्मश्री रुद्राभट्ल रामलक्ष्मणशास्त्रिणां प्रियशिष्याः।
4. ब्रह्मश्री कोल्लूरु लक्ष्मणमूर्तिशर्माणः न्यायमीमांसासाहित्यविद्याप्रवीणाः। ब्रह्मश्री कोल्लूरु सोमशेखरशास्त्रिणामन्तेवासिनः।
5. महामहोपाध्याय ब्रह्मश्री पेरि लक्ष्मीनारायणशास्त्रिगुरुचरणाः ब्रह्मश्री गुम्मुलूरु सङ्गमेशशास्त्रिणां शिष्याः।

जैमिनीये च काणादे पाणिनीये सुविस्तृते।
शब्दखण्डे बहुविधे कृतभूरिपरिश्रमः।। ।।१७।।

पदवाक्यप्रमाणज्ञः सूर्यनारायणः सुधीः।
पितरौ च गणाधीशं वागधिष्ठानदेवताम्।। ।।१८।।

पाणिन्यादीन् मुनिवरान् शब्दशास्त्रप्रवर्तकान्।
नागेशशेखरग्रन्थव्याख्यातारौ महाधियौ।। ।।१९।।

नत्वा गुरू सुब्रह्मण्यवेङ्कटेश्वरशास्त्रिणौ।
विमृश्य प्राक्तनीष्टीकाः प्रमादांस्तास्ववेक्ष्य च।। ।।२०।।

व्याख्यां भूषणसारस्य कुरुते तत्त्वदर्शिनीम्।
हरिवल्लभपञ्चोलिभैरवैर्हरिशास्त्रिणा।। ।।२१।।

कृष्णमित्रेण विदुषा नेने गोपालशास्त्रिणा।
व्याख्या निर्ममिरे बह्व्यः पदार्थप्रतिपादिकाः।। ।।२२।।

सारग्रन्थार्थजिज्ञासोः साहाय्यं ताः प्रकुर्वते।
प्रागगृह्णामहमपि पदार्थं तत एव हि।। ।।२३।।

स्वोत्प्रेक्षितार्थानुगुणं सारं ते किन्त्वयूयुजन्।
न तत्त्वमग्रहीषुस्ते मूलग्रन्थानवेक्षणात्।। ।।२४।।

मूलग्रन्थानवेक्ष्याहं सारतत्त्वं निरूपये।
श्रीमेधादक्षिणामूर्तेः पाणिन्यादेस्तथा गुरोः।। ।।२५।।

गणेशवाग्देवतयोः श्रीरामस्य दयानिधेः।
चिरं विजृम्भतां लोके कृपया तत्त्वदर्शिनी।। ।।२६।।

मनस्स्थतत्त्वार्थनिरूपणाभि -
निवेशसंजातकुतूहलेऽपि।
कर्तुं न जाने रचनां समर्था -
मतोऽभियाचे विबुधाँस्तदर्थम्।। ।।२७।।

व्यामूढानामिह तनुभृतां जाह्नवीतीर्थमेकं
विद्यातीर्थं प्रकृतिविमलं सद्विवेकोदयानाम्।
सर्वेषां तत्प्रथमसुखदं भारतीतीर्थमाहु -
स्तद्भावान्मे विपुलमनसो निर्णये शक्तिरस्तु।। ।।२८।।

वैयाकरणमते प्रकृतिप्रत्ययार्थप्रदर्शनपूर्वकं वाक्यवाक्यार्थनिर्णायकं श्रीभट्टोजिदीक्षतविरचित-"वैयाकरणमतोन्मज्जन" नामककारिकाग्रन्थव्याख्यारूपस्वविरचितवैयाकरणभूषणग्रन्थसाररूपं प्रकरणं भूषणसारनामकमारभमाणः श्रीकौण्डभट्टः प्रारिप्सितग्रन्थपरिसमाप्तिप्रचारप्रतिबन्धकदुरितप्रशमाय कृतं शिष्टाचारानुमितश्रुतिबोधितेतिकर्तव्यताकं समुचितलक्ष्मीरमणनतिरूपं मङ्गलं शिष्यशिक्षार्थमध्येतॄणाम् आनुषङ्गिकमङ्गलार्थं च निबध्नंश्चिकीर्षितं प्रतिजानीते - [श्री लक्ष्मीरमणमिति] श्रीः लोकोत्तरा कान्तिः, तया सहितं लक्ष्मीरमणं विष्णुम्। सशक्तिकस्य परमात्मनो जगत्कारणत्वादिकमिति सूचयितुं श्रीग्रहणम्। तथाच मायाशबलितं निर्गुणमात्मानमिति भावः। एतमेवार्थं सूचयंल्लक्ष्मीरमणं विशिनष्टि [गौरीरमणरूपिणमिति] गौरीरमणः शिवः, तस्य रूपमस्यास्तीति गौरीरमणरूपिणम्। गौरीरमणं स्वाभिन्नतया रूपयति ग्राहयति, तं गौरीरमणरूपिणम्। गौरीरमणाभिन्नमिति फलति। अनेन वैयाकरणानामद्वैतदर्शनानुयायित्वं दर्शयति। अद्वैतिन एव खलु शिवकेशवयोर-भेदमभिप्रयन्ति नेतरे। अत एव निर्गुणस्य मायोपहितत्वद्योतनाय लक्ष्मीगौरीग्रहणम्। पाणिनिरप्येतदाशयक एव। तादृशं हि तच्छास्त्रनिर्माणम्। पाणिनिः शिवप्रसादादक्षरसमाम्नायमधिगम्य तन्मूलकं शास्त्रं निर्माय तदन्ते आदरे द्विरुक्त्या 'अ अ' ८-४-६८ इति मङ्गलार्थं विष्णुं स्मरति, स्पष्टं चेदं तत्रैव सूत्र उद्द्योते। व्याकरणमुख्यसिद्धान्तरूपः स्फोटो निर्गुणब्रह्माभिन्न एवेत्याशयेन लक्ष्मीरमणं पुनर्विशिनष्टि [स्फोटरूपमिति] स्फोटाभिन्नमित्यर्थः। परावाग्रूपः स्फोटो निर्गुणाद्वयब्रह्मरूप इति वैयाकरणानां सिद्धान्तः। स्फोटस्य वासुदेवात्मकत्वं भगवता व्यासेन भागवते दशमस्कन्धे पञ्चाशीतितमेऽध्याये प्रतिपादितम् -

'दिशां त्वमवकाशोऽसि दिशः खं स्फोट आश्रय' इति।।

द्वादशस्कन्धेऽपि षष्ठेऽध्याये ३६ श्लोकादारभ्य ४६ श्लोकपर्यन्तं स्फोटतत्त्वं प्रतिपादितम्। हरिवंशेऽपि -

'अक्षराणामकारस्त्वं स्फोटस्त्वं वर्णसंश्रयः' इत्याह भगवान् व्यासः। एतदाशयेनैव विवर्तवादित्वं दर्शयति [यत इति] स्फोटाभिन्नाल्लक्ष्मीरमणादित्यर्थः। 'यतो वा इमानि भूतानि जायन्ते' इत्यत्रेव "जनिकर्तुः प्रकृतिः" २-४-३० इत्यपादानत्वे पञ्चम्यन्तात्तसिल्। तेन तस्यैवोपदानकारणत्वं श्रुतिसिद्धमनूद्यते। एतत् नामरूपात्मकं परिदृश्यमानम्। [विवर्तत इति] अतात्त्विकोऽन्यथाभावो विवर्तः। स्पष्टं चेदम् "अनादिनिधनम्" इत्याद्यकारिकायां हरिग्रन्थे 'तत्त्वादप्रच्युतस्य वस्तुनो भेदानुकारेणाऽसत्या-विभक्तान्यरूपोपग्राहिता विवर्तः। स्वप्नविषयप्रतिभासवत्' इत्यादिना। तत्त्वात् स्वस्वरूपात्। असत्यं

वस्तुनो बहिरसत्त्वात्, अविभक्त मधिष्टानेन। अन्यत् वैधर्म्योपलम्भात्। तादृशरूपोपग्राहिता तद्रूपप्रकारकज्ञानविशेष्यता। तदाह स्वप्नविषयेतीति तदर्थः। पयसो दधि न विवर्तः, तत्त्वात्प्रच्युतेः। स्वर्णादेः कुण्डलादि तु विवर्त एवेति बोध्यम्। एतेन श्रीलक्ष्मीरमणाभिन्नः स्फोटशब्दस्तदुपयोगि-प्रकृतिप्रत्ययार्थविचाराश्चात्र विषयस्तज्ज्ञानेन निर्गुणाद्वयब्रह्मभावरूपो मोक्षः प्रयोजनमिति विषयप्रयोजनरूपमनुबन्धद्वयं स्पष्टयति। तेन सकलदर्शनार्थज्ञानपूर्वकमहाभाष्य-गूढार्थज्ञानवानत्राधिकारी, प्रतिपाद्यप्रतिपादकभावरूपः सम्बन्धश्चार्थाल्लभ्यते।।

अशेषफलदातारं भवाब्धितरणे तरिम्।
शेषाशेषार्थलाभार्थं प्रार्थये शेषभूषणम्।। ।।२।।

मुक्तिसाधनज्ञानविषयीभूतरूपत्वेन वर्णयन् व्याकरणसिद्धान्तज्ञानाय तन्मूलभूतचतुर्दशसूत्रोपदेशकं भगवन्तं शिवं प्रार्थयते [अशेषेति] अशेषाणामैहिकामुष्मिकापवर्गपर्यन्तानां फलानां दातारमित्यर्थः। तृजन्तेन शेषषष्ठ्यन्तेन समासः [भवाब्धीति] भवः संसारः, स एव अब्धिः समुद्रः तस्य तरणे अतिक्रमणे तरिं नावम्। 'स्त्रियाँ नौस्तरणिस्तरिः' इत्यमरः। अपवर्गफलदातृत्वस्यानन्य-साधारणत्वद्योतनायेदं विशेषणम्। एतेन 'अशेषफल' इति विशेषणेन मुक्तिरूपफलस्यापि क्रोडीकृतत्त्वादेतद्वैयर्थ्य' मिति शङ्का परास्ता। तथा चानन्यसाध्यानेकदुःखसमूहसंसारनिवर्तकत्वेन प्रतिबन्धकदुरितनिवृत्तिः सुतरां ततो भविष्यति कैमुतिकन्यायादिति भावः। प्रार्थनाप्रयोजनमाविष्करोति-[शेषाशेषेति] शेषस्य शेषावतारस्य पतञ्जलेः ये अशेषाः अनवशिष्टाः, अर्थाः पतञ्जलिप्रणीत-योगसूत्रचरकसंहितामहाभाष्यपरमार्थसारग्रन्थप्रतिपादिताश्चित्तशरीरवाङ्मलापहारपूर्वकाद्वयब्रह्मानुभूतिरूपा अर्थास्तेषां प्राप्तये। [शेषभूषणमिति] शेषः अनन्तः, भूषणं प्रीतयेऽलङ्कारत्वेन भूषणं यस्य, तम्। तथा च योगभाष्यकारः 'प्रक्षीणक्लेशराशिर्विषमविषधरः प्रीतये यस्य नित्यम्' इति। शेषः भूषणं पर्यङ्कत्वेन यस्य, तं शेषभूषणं विष्णुमित्यपि प्रतीयते। तादृशशेषप्रणीतशास्त्राभ्यासेन चित्तशुद्धिद्वाराऽविद्यानिवृत्तौ शिवकेशवाभिन्नस्फोटरूपनिर्गुणब्रह्माभिन्नरूपं निःश्रेयसं सिद्ध्यतीत्याशयः। यद्यपि शेषाशेषार्थलाभः शेषप्रार्थनयापि लभ्यते, तथापि तादृशशेषमाद्रियेते शिवकेशवौ, तथाच तादृशशिवकेशवप्रार्थनयापि शेषाशेषार्थलाभः सेत्स्यत्यविरोधात्। अतो विशिष्टप्रार्थना युक्तैवेति बोध्यम्।। ।।२।।

पाणिन्यादिमुनीन् प्रणम्य पितरं रङ्गोजिभट्टाभिधं
द्वैतध्वान्तनिवारणैकफलिकां पुम्भाववाग्देवताम्।

डुण्ढिं गोतमजैमिनीयवचनव्याख्यातृभिर्दूषितान्
सिद्धान्तानुपपत्तिभिः प्रकटये तेषां वचो दूषये।। ।।३।।

शब्दशास्त्रे पाणिन्यादिमुनित्रयस्य प्राधान्यात्तन्नतिरूपं मङ्गलमाचरन् 'पितृदेवो भव' इति श्रुत्या पितुरपि देवतात्वेन पितरं, विघ्नध्वंसपूर्वकमङ्गलप्रदत्वेन गणेशं च नमति [पाणिन्यादीत्यादिना डुण्ढिमित्यन्तेन] आदिपदेन कात्यायनपतञ्जल्योर्ग्रहणम्। [रङ्गोजिभट्टाभिधमिति] रङ्गोजिभट्टनामकमित्यर्थः। रङ्गोजीत्येव नाम तस्य। भट्टः = चतुश्शास्त्राभिज्ञः। रङ्गोजिभट्टश्च भट्टोजिदीक्षितस्य ज्येष्ठो भ्राता। 'भट्टोजिदीक्षितमहं पितृव्यं नौमि सिद्धये' इति भूषणोक्तेः। पितरं विशिनष्टि [द्वैतेति] द्वाभ्यां जडत्वाजडत्वरूपविरुद्धधर्माभ्यामि तः = ज्ञातश्चैतन्यरूपो द्वीतः, तत्र भवं द्वैतं विषयतासम्बन्धे वर्तमानमज्ञानं भावरूपं मिथ्याज्ञानं तदेव ध्वान्तम्। यद्वा द्वाभ्यां प्रकाराभ्या मितं ज्ञातं द्वीतं, तस्य भावो द्वैतमिति व्युत्पत्त्या नामरूपे उच्येते। तदेव ध्वान्तम्। वस्तुतस्तु द्वैतं माध्वदर्शनं, तदेव ध्वान्तम्। द्वैतशब्देन तस्यैव बाहुल्येन व्यवहारात्। तथाचोक्तं भूषणग्रन्थसमाप्तौ-

"यश्चक्रे मुनिवर्यसूत्रविवृतिं सिद्धान्तभङ्गं तथा।
माध्वानां तमहं गुरूपमगुरुं रङ्गोजिभट्टं भजे"।। इति।

तस्य निवारणं निराकरणम्। आदिपदेन शुद्धनिर्गुणाद्वैतबोधस्य ग्रहणम्। एतदुभयं फलं यस्यास्ताम्। 'निवारणैकफलिकाम्' इति क्वचित्पाठः। द्वैतनिवारणमेवैकं मुख्यं फलं यस्या इति व्याख्येयम्। द्वैतनिवृत्तिरेव मोक्ष इति सिद्धान्तः। 'यथा चातिप्रसक्तस्यावच्छेदकत्वं साधु, तथोक्तमस्मत्पितृचरणैरद्वैतसारोद्धारे' "इत्यस्मत्पितृचरणैर्व्याख्यातम्" इति भूषणे लकारार्थनिर्णयोक्त्या 'अद्वैतसारोद्धारः' इत्यभिधाका वेदान्तसूत्रवृत्तिः कौण्डभट्टपित्रा रङ्गोजिभट्टेन रचितेत्यवसीयते। [पुम्भावेति] पुमान् भाव आकाररूपो यस्याः सा, पुम्भावा पुरुषाकृतिः। सा चासौ वाग्देवतेति कर्मधारयः। सरस्वतीरूप इत्यर्थः। डुण्ढिं डुण्ढिगणपतिम्। पाणिन्यादिमुनीन् पितरं डुण्ढिगणपतिं च प्रणम्येति योजना कार्या। ननु महाभाष्यकारैर्भर्तृहरिणा च स्फोटादिवैयाकरणसिद्धान्तानां निरूपितत्वेन कोऽवसरस्त्वद्ग्रन्थरचनाया इत्याशङ्काया माह। [गोतमेति] गोतमः न्यायसूत्रकर्ता। जैमिनिः पूर्वमीमांसासूत्रकर्ता। तयोरिमानि गोतमजैमिनीयानि। वचनशब्देन कर्मधारयः। तेषां व्याख्यातृभिः, दूषितान् दोषवत्त्वेन प्रदर्शितान्। व्याख्यातृग्रहणेन गोतमादिमुनीनां पाणिनिकात्यायनपतञ्जलीनां च पदार्थनिर्णयेऽविरोध एवेति सूच्यते। अत्राऽयं विवेकः - न्यायसूत्रभाष्यवार्तिककारा वैयाकरणाना मनुकूला एव। तैः स्फोटस्य कर्तृकर्मणोराख्यातवाच्यत्वस्य च स्वीकृतत्वात्। एष चार्थो बहुषु स्थलेषु

मञ्जूषायां दर्शितः। नव्यनैयायिका एव विप्रतिपन्नाः। अतस्तान् प्रत्येष यत्नः। मीमांसायां तु सूत्रकृज्जैमिनिरेव वैयाकरणानामनुकूलः। भाष्यवार्तिककारौ विप्रतिपन्नावेव। सूत्रारूढस्यापि स्फोटखण्डनस्य कर्तृकर्मणोराख्यातावाच्यत्वस्य च शबरस्वामिकुमारिलाभ्यां प्रतिपादितत्वात्। जैमिनेः कर्त्रधिकरणं भावार्थाधिकरणमित्यादिकं वैयाकरणसिद्धान्तरीत्यापि सुसङ्गमनीयमेव। एष चार्थो मञ्जूषायां बहुषु स्थलेषु प्रतिपादित एव। अस्माभिरपि तद्व्याख्याने स्पष्टतरं निरूपित - इति। सिद्धान्तान् वैयाकरणसिद्धान्तान्। उपपत्तिभिः साधकप्रमाणोपन्यासरूपाभिर्युक्तिभिः। प्रकटये स्पष्टीकुर्याम्। तेषां गोतमजैमिनीयवचनव्याख्यातृणाम्। [वच इति] जातावेकवचनम्। वचांसीत्यर्थः। तेषां वचांस्येव दूषयिष्यन्ते, जैमिनिसिद्धान्त स्त्वस्माभि रप्युपपादयिष्यत एवेत्याशयः। दूषये बाधकप्रमाणोपन्यासरूपाभिर्युक्तिभिरेव दूषये। तथाच नूतनतया सिद्धान्तप्रदर्शनाय न मत्प्रवृत्तिः, भाष्यकारादिभिरेव तेषां विशदीकृतत्वात्। किंतु तान् सिद्धान्तान् दर्शनान्तरीया विकल्पग्रस्तचित्ततया न सम्यगधिगन्तुमीशते, प्रत्युत दूषयन्ति च। अतस्तानेवोपपत्तिप्रदर्शनेन निपुणतरमुपपादयितुं 'परमतमप्रतिषिद्धमनुमतं भवति' इति न्यायानुसारेण परमतं खण्डयितुं च मत्प्रवृत्तिः। नहि स्वमतविरुद्धमतान्तरखण्डनं विना स्वमतसिद्धिरिति भावः। ।।३।।

प्रारिप्सितप्रतिबन्धकव्यूहोपशमनाय कृतं श्रीपतञ्जलिस्मरणरूपं मङ्गलं शिष्यशिक्षार्थं निबध्नंश्चिकीर्षितं प्रतिजानीते -

मूलकारिका

फणिभाषितभाष्याब्धेः शब्दकौस्तुभ उद्धृतः।
तत्र निर्णीत एवार्थः संक्षेपेणेह कथ्यते।। ।।१।।

।। उद्धृत इति।। अत्र अस्माभिरिति शेषः। "भाष्याब्धेः शब्दकौस्तुभ उद्धृत" इत्युक्तिस्तु शब्दकौस्तुभोक्तानामर्थानामाधुनिकोत्प्रेक्षितत्वनिरासाय। अन्यथा तन्मूलकस्यास्य ग्रन्थस्याप्याधुनिकोत्प्रेक्षितसारत्वापत्तौ पाणिनीयानामनुपादेयतापत्तेः। "तत्र निर्णीत" इत्युक्तिरितोऽप्यधिकं जिज्ञासुभिः शब्दकौस्तुभे द्रष्टव्यमिति ध्वनयितुम्।। ।।१।।

वैयाकरणमतोन्मज्जननामकं दीक्षितस्य कारिकाग्रन्थमवतारयति - [प्रारिप्सितेति] [पतञ्जलिस्मरणेति] शेषफण्यंशपतञ्जलिस्मरणेत्यर्थः। कारिकायां [फणिभाषितेति] फणिना पतञ्जलिना भाषितं यन्महाभाष्यं तदेवाब्धिः, तस्मात्। अगाधतया दुस्तरत्वेनामूल्यवस्तुसत्त्वेन च

भाष्यस्याब्धिसाम्यमवगन्तव्यम्। दीधितिदीपिताशः कौस्तुभो मणिरब्धेरम्भसां सारमयः। एष ग्रन्थोऽपि भाष्यार्थानां सारभूतः। कौस्तुभो मणिः देवदानवैर्मन्थानाचलेनोपकरणेनाब्धेरुद्धृतः। एष तु दीक्षितेन बुद्ध्योपकरणेन भाष्यादुद्धृत इति ग्रन्थस्य कौस्तुभसाम्यं ज्ञेयम्। कौस्तुभस्य प्रकृतग्रन्थस्य च भिन्नकर्तृकत्वे कुत्रापि विरुद्धार्थकथनभ्रमः पाठकानां जायेत, स मा भूदित्याशयेनोभयोरप्येककर्तृकत्वं व्यवस्थापयति - [अस्माभिरिति शेष इति] कारिकायाम् - [अर्थ इति] धात्वादिप्रकृतीनां तिङादिप्रत्ययानां चार्थः, अन्ततो व्याकरणसिद्धान्तभूतः स्फोटरूपोऽर्थश्चेत्यर्थः। ननु कौस्तुभेनैवार्थनिर्णयसम्भवात्किं प्रकृतग्रन्थकरणप्रयासेनेत्यत आह कारिकायां - [संक्षेपेणेति] अयं भावः - विस्तृतार्थस्य मुख्यांशकथनेन सूक्ष्मीकरणं संक्षेपः। तत्र तत्र विप्रकीर्णानामर्थानामेकत्र प्रदर्शनमपि संक्षेपः, एतद्रूपेण संक्षेपेणेत्यर्थः। शब्दकौस्तुभे पस्पशाह्निके तपरसूत्रादौ च स्फोटः सप्रपञ्चं निरूपितः, वृद्धिसंज्ञासूत्रे "तस्य भावस्त्वतलौ" इति सूत्रे च भावप्रत्ययार्थो विचारितः। "लः कर्मणि च भावे चाकर्मकेभ्यः" "भावे" "सार्वधातुके यक्" इत्यादिषु सूत्रेषु कौस्तुभे मनोरमायां च धात्वाख्यातार्थो भावे घञोऽर्थश्च प्रतिपादितः। कौस्तुभे मनोरमायां च "नञ्" सूत्रे अभावो नञर्थ इति परेषां मतं विस्तरेण निरस्य नञ आरोपितत्वार्थद्योतकत्वं व्यवस्थापितम्। एवमन्येष्वपि सूत्रेषु संदर्भवशेन तत्तदर्थनिरूपणं कौस्तुभे मनोरमायां च दीक्षितैः कृतम्। परंतु तेषामर्थानां तत्र तत्र विप्रकीर्णत्वाद्विपुलत्वाच्च ग्रहीतारस्तादृशपदार्थग्रहणे क्लिश्नन्ति। अतस्तेषां तादृशक्लेशप्रहाणायैतद्ग्रन्थकरणे दीक्षितानां प्रवृत्तिर्युक्तैवेति। कारिकायां शब्दकौस्तुभग्रहणं मनोरमाया अप्युपलक्षणम्। कारिकायाम् - [इहेति] वैयाकरणमतोन्मज्जननामकेऽस्मिन् कारिकारूपे ग्रन्थे इत्यर्थः। अस्य तन्नामकत्वं वैयाकरणमतोन्मज्जने दीक्षिताः - "सुपां सुपा" "आख्यातं तद्धितकृतोः" इत्यादिना मञ्जूषाव्याख्याने कलायां वैद्यनाथवचनेनावगम्यते। ननु शब्दकोस्तुभे निर्णीत एवार्थः संक्षेपेणेह कथ्यत इत्येव सामञ्जस्ये "भाष्याब्धेः शब्दकौस्तुभ उद्धृत" इत्युक्तिर्निष्फलेत्यत आह - [इत्युक्तिस्त्विति] [अन्यथेति] कौस्तुभोक्तानामर्थानामाधुनिकोत्प्रेक्षितत्वनिरासाकरण इत्यर्थः। [पाणिनीयानामिति] पाणिनिना प्रोक्तं पाणिनीयं तदध्येतॄणां तद्विदां चेत्यर्थः। ननु "तत्र निर्णीत एव" इत्युक्तिरधिकैवेत्यत आह। [तत्र निर्णीत इत्युक्तिरिति] [जिज्ञासुभिरिति] प्रकृतग्रन्थे युक्त्याऽर्थापत्त्या च स्फोटशब्दो निरूपितः। परन्तु तत्र भाष्यं प्रमाणतया नोपन्यस्तम्। एवं च स्फोटस्वीकारे भाष्यं प्रमाणमस्ति वा? नवा? वर्ण-पद-वाक्यभेदेन स्फोटभेदो भाष्यसम्मतो वा? नवा? इत्याद्यधिकं जिज्ञासुभिरित्यर्थः। [द्रष्टव्यमिति] अत्रेदं बोध्यम् - चतुस्सप्ततिकारिकाभिर्मतान्तरनिराकरणपूर्वकं वैयाकरणाभिमतपदार्था दीक्षितैर्निरूपिताः। तत्रैकादश कारिका हरिग्रन्थादुद्धृत्यात्र निहिताः। १४,

१५, १९, २२, ३५, ३७, ३८, ३९, ६८ "पदे न वर्णा विद्यन्ते", ७२ "अनेकव्यक्त्यभिव्यङ्ग्या", ७३ "सत्यासत्यौ तु यौ भागौ।" "अस्त्यादावपि धर्म्यंशे" १२ इति कारिका तन्त्रवार्त्तिकादुद्धृता। एतासां द्वादशकारिकाणामन्यत उद्धृत्यात्र सङ्ग्रथने दीक्षिताशयं तत्तत्कारिकाव्याख्यावसरे प्रदर्शयिष्यामः। ततोऽन्या द्विषष्टिकारिका दीक्षितनिर्मिता एवेति। एतेन "कथ्यत इति। हर्यादिनिबद्धकारिकाभिरिति शेषः" इति दर्पणोक्तमपास्तम्।। ।।१।।

प्रतिज्ञातमाहः -

फलव्यापारयोर्धातुराश्रये तु तिडः स्मृताः।
फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणम्।। ।।२।।

।।धातुरिति।। अत्र स्मृत इति वचनविपरिणामेनान्वयः। फलं विक्लित्त्यादि।

तत्रभवद्भिर्भाष्यकारादिभिः सप्रमाणमुपपादितान् श्रीभर्तृहरिगुरुचरणप्रभृतिभिरतितरां विशदीकृतानपि वैयाकरणाभिमतपदार्थान् विकल्पग्रस्तचित्तत्वाद्दर्शनान्तरीया न सम्यगधिगन्तुमीशते, दूषयन्ति च। अत स्तानेव निपुणतरमुपपादयन्नाह - मूले - [फलव्यापारयोरिति] प्रायशो वाक्यस्य सुप्तिङन्तसमुदायरूपत्वात् सुबन्तानां च प्रायः क्रियाविशेषणत्वाद्धातोश्च क्रियावाचकत्वेन पुरःस्फूर्तिकत्वादिच्छावशाद्वा प्रथमतो धात्वर्थनिरूपणमिति बोध्यम्। फलव्यापारयोरिति द्विवचननिर्देशेन फलविशिष्टव्यापार एकशक्त्यभ्युपगमे फलस्य पदार्थैकदेशतया तत्र द्वितीयान्तार्थस्यानन्वयापत्तिर्दोषः। फलव्यापारयोः साध्यसाधनभावस्तु संसर्गः। अतो जनकत्वांशे शक्तिं विनापि फलजनकत्वं व्यापारे सुलभम्। एकपदोपात्तयोरपि फलव्यापारयोः कृतीष्टसाधनत्वयोरेकाख्यातप्रत्ययोपात्तयोः कृतिवर्तमानत्वयोर्वा यथा परेषामन्वयस्तथाऽस्माकमपीति न कश्चिद्दोषः।

नागेशोपाध्यायास्तु - फलविशिष्टव्यापारे व्यापारविशिष्टफले च धातूनां शक्तिः। फलव्यापारयोः पृथक् शक्तिरिति तु न युक्तम्। उद्देश्यविधेयभावेनान्वयप्रयोजिकायाः पृथगुपस्थितेः सत्त्वेन फलव्यापारयोरुद्देश्यविधेयभावेनान्वयापत्तेः। तत्तच्छक्तिस्वीकारे कर्तृप्रत्ययसमभिव्याहारः कर्मप्रत्यय-समभिव्याहारश्च हेतुः। पृथक् शक्तिवादिनामपि तत्तत्समभिव्याहारस्य तत्तद्विशेष्यकबोधे कारणत्वं स्वीकार्यमेवेत्याद्यभिप्रयन्ति।

बालकृष्णशास्त्रिपञ्चोलिनः प्रभाकारास्तु - "यत्तु नव्येनोक्तम् - व्यापारविशेष्यकबोधं प्रति कर्तृप्रत्ययसमभिव्याहारः, फलविशेष्यकबोधं प्रति कर्मप्रत्ययसमभिव्याहारश्च कारणं पृथक् शक्तिवादिनापि वक्तव्यमिति, तन्न। प्राचीनमते कर्तृ-कर्मप्रत्ययोभयसमभिव्याहारे व्यापारविशेष्यकबोधस्यैव तत्सम्मतत्वेन

तादृशसमभिव्याहारस्य कारणत्वाकल्पनादिति वदन्ति। तच्चिन्त्यम्। पच्यते तण्डुलश्चैत्रेणेत्यादौ कर्मतिङ्समभिव्याहारेऽपि व्यापारविशेष्यकबोधस्यैव दीक्षितादिभिः स्वीकृतत्वेऽपि कर्मकृत्समभिव्याहारे पक्वस्तण्डुल इत्यादौ फलविशेष्यकबोधस्यैव स्वीकृतत्वेन तन्मतेऽपि तत्तद्विशेष्यकबोधे तत्तत्प्रत्ययसमभिव्याहारस्य कारणताया अवश्यकल्प्यत्वात्। तथाच कर्मसंज्ञासूत्रे कौस्तुभे दीक्षिताः - "फलभावनयोस्तु विशेष्यविशेषणभावो विपरीतः" इति। स्फुटीभविष्यति चेदमनुपदमेव फललक्षणनिरूपणावसरे। अत एव नागेशेन प्राचीनमते दोषप्रदर्शनावसरे "व्यापारविशेषणक-फलविशेष्यकबोधे कर्मप्रत्ययसमभिव्याहृतधातुजन्योपस्थितिः कारणम्" इति 'कर्मप्रत्यय' इति सामान्येनोक्तं, नतु 'तिङ्' इति विशिष्येत्यलम्। पदार्थैकदेशे फले द्वितीयान्तार्थस्यान्वयो नोपपद्यत इत्यादिकं सर्वमपि मदीये मञ्जूषाव्याख्याने नागेशभावप्रकाशे समाहितम्। तत्तु तत एवावधार्यम्।

यत्तु काशिकाकारा नागेशभट्टस्याशयं प्रदर्श्य - "फलव्यापारयोः" इति मूलमपि तदुभयसमुदाये शक्तिरिति तात्पर्यकं, नतु पृथक्शक्तितात्पर्यकम्। एवं च शाब्दबोध एकविशिष्टस्यैवापरस्य भानादुक्तविशिष्टद्वयेऽपि शक्तिर्मूललभ्यैवेत्याहुः। तन्न। "फलव्यापारयोः" इति मूलस्य पृथक् शक्तिवादपरतया भूषणे व्याख्यातत्वात्। अत एव तत्र नागेशस्य पर्यनुयोगोऽप्युपपद्यते। किञ्च मूलस्य तदभिप्रायकत्वे घटपदोपस्थाप्ययोर्घटघटत्वयोरिव फलव्यापारयोरन्वयस्यैवाप्रसक्त्या "फले प्रधानं व्यापारः" इति तयोर्विशेषणविशेष्यभावनिरूपणस्यासङ्गत्यापत्तेरिति दिक्।

"स्मृता" इत्यस्य वाचकत्वेनेति शेषः। [वचनविपरिणामेनेति] अन्यथा विशेष्यवाचकपदोत्तर-विभक्तितात्पर्यविषयसङ्ख्याविरुद्धसङ्ख्याया अविवक्षायां विशेष्यविशेषणवाचकपदयोः समानवचनकत्व-नियमात्प्रकृतेऽनन्वयापत्तिः स्पष्टैव। "वेदाः प्रमाणम्" इत्यादीनामसाधुत्ववारणाय 'विवक्षायाम्' इत्यन्तम्।

ननु यदुद्देशेन श्रुतेर्लोकतो वा प्रवृत्तिरवगता तत्त्वं फलत्वम्। तथा च हरिः -

"यस्यार्थस्य प्रसिद्ध्यर्थमारभ्यन्ते पचादयः।
तत्प्रधानं फलं तेषां न लाभादि प्रयोजनम्।।" इति।

"स्वरितञितः" १-३-७२ इति सूत्रे फलपदस्य प्रवृत्त्युद्देश्यमुख्यफल एव प्रसिद्धेश्च। तादृशं च फलं यजेः स्वर्गः। पचेश्च भोजनम्। तादृशस्य फलस्य धातुवाच्यत्वाभ्युपगमे तदाश्रयस्य कर्मत्वापत्तिः। विक्लित्त्याद्याश्रयस्य तत्त्वानापत्तिश्च। धातूनां सकर्मकत्वाकर्मकत्वविभागानुपपत्तिश्चेत्यत आह - [फलं विक्लित्त्यादीति] फलपदस्य लोके रूढ्या तादृशार्थबोधकत्वेऽप्यत्र पारिभाषिकार्थपरत्वमेवेत्याशयः।

तत्त्वं च कर्मकृत्प्रत्ययासमभिव्याहारे तद्धात्वर्थविशेषणत्वे सति तद्धात्वर्थत्वम्। चैत्रस्तण्डुलं पचतीत्यादौ विक्लित्त्यनुकूलव्यापारस्य धात्वर्थतया विक्लित्त्यादेरेव फलत्वं, न भोजनादेरित्यदोषः। तद्धात्वर्थविशेषणत्वं च तद्धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतावत्त्वम्। पचति चैत्र इत्यादौ पच्याद्यर्थव्यापारेऽतिप्रसङ्गवारणाय सत्यन्तम्। पश्य मृगो धावतीत्यादौ धावनस्य दृश्यर्थविशेषणतया दृशिफलत्ववारणाय सत्यन्ते तत्पदम्। अन्यथा धावनरूपदृशिफलाश्रयत्वेन मृगस्य कर्मत्वात्ततो द्वितीयापत्तिः। न च दर्शने धावनस्यान्वयात्प्रागेव मृगस्य धावनक्रियायामन्वया- दन्तरङ्गत्वाद्धावनक्रियाश्रयत्वेन मृगस्य कर्तृत्वात्तत्संज्ञया कर्मसंज्ञाया बाधान्न द्वितीयापत्तिरिति वाच्यम्। पक्त्वौदनो मया भुज्यत इत्यादाविव प्रधानानुरोधिकर्मत्वस्यैवान्तरङ्गकर्तृत्वबाधेन-प्रवृत्तेर्दुर्वारत्वात्। अन्तरङ्गादपि प्रधानकार्यबलवत्त्वस्य "हेतुमति च" ३-१-२६ इतिसूत्रस्थाकरसम्मतत्वात्। अत एव गमयति ग्रामं चैत्रमित्यादौ प्रयोज्यनिष्ठव्यापारस्य निरुक्तफललक्षणाक्रान्तत्वात्तदाश्रयस्य "कर्तुरीप्सिततम्" १-४-४९ इति सूत्रेणैव कर्मत्वसिद्ध्या गत्यादिसूत्रं नियमार्थम् - णिजर्थेनाप्यमानस्य यदि कर्मत्वं तर्हि गत्याद्यर्थकधातुयोग एवेति। तेन पाचयति चैत्रेण मैत्र इत्यादौ न प्रयोज्यस्य कर्मत्वमित्याद्याकरग्रन्थसङ्गतिः। चैत्रेण पक्कतण्डुल इत्यादौ चैत्रकर्तृकव्यापारजन्यविक्लित्त्याश्रयाभिन्नस्तण्डुल इति बोधोदयेन विशेष्यतया भासमानस्य विक्लित्त्यादेः फलत्वसिद्धये कर्मकृत्प्रत्ययासमभिव्याहार इति। तदसमभिव्याहृतस्थलीय धात्वर्थविशेषणत्वमादाय विक्लित्त्यादेः फलत्वनिर्वाहः स्पष्ट एव। न च फललक्षणे कर्तृप्रत्ययसमभिव्याहार इति विशेषणं दीयतां, तेन पक्कस्तण्डुल इत्यादौ विक्लित्त्यादेः फलत्वं सेत्स्यतीति वाच्यम्। कर्मकृत्प्रत्ययस्थले फलविशेष्यको बोधस्तद्भिन्नस्थले सर्वत्रापि व्यापारविशेष्यक एव बोध इत्यभिप्रयतां दीक्षितादीनां मते पक्कस्तण्डुल इत्यादौ विक्लित्त्यादेः फलत्वसिद्धेरेव तत्प्रयोजनस्य वक्तव्यतया तद्विशेषणस्यापि मदुक्तार्थ एव पर्यवसन्नत्वात्, व्यापकविशेषणोपादानस्य प्रकृत उपयोगाभावाच्च। कर्मतिङन्तेऽपि फलविशेष्यकमेव बोधमभ्युपगच्छतो नागेशस्य मते परं तद्विशेषणं शोभतां नाम। कर्मसंज्ञासूत्रे कौस्तुभे "गोदोहनी, पक्ता, पक्व इत्यादिकृदन्तानां नामार्थेऽभेदान्वयानुरोधादाधार एवार्थः, पलभावनयोस्तु विशेषणविशेष्यभावो विपरीतः" इति दीक्षितस्य वचनम्। कर्तृकर्मविभक्त्योराधार आधेयं वाऽर्थ इति व्यवस्थापनात्तुल्यन्यायात्कृतामप्याधार आधेयं वाऽर्थः स्यादत उक्तं - गोदोहनीत्यादि। नन्वेवं पक्कस्तण्डुल इत्यादिप्रयोगानुपपत्तिः विक्लित्त्यनुकूलव्यापाराश्रयाभेदस्य तण्डुलादौ बाधादत उक्तं - फलभावनयोस्तु विशेषणविशेष्यभावो विपरीतः - इति। तथाच फलस्य प्राधान्यात्तत्र व्यापारजन्यविक्लित्त्याश्रयाभिन्नस्तण्डुल इति बोधात्तत्प्रयोग उपपद्यत इति भावः। इदं च

कर्मकृदन्तविषयकमेव, न तु कर्मतिङन्तविषयकमपि। पच्यते तण्डुलश्चैत्रेणेत्यादौ पक्वस्तण्डुल इत्यादाविव तण्डुलादौ नामार्थेऽभेदान्वयस्याभावात्। चैत्रकर्तृकस्तण्डुलाश्रयविक्लित्त्यनुकूलो व्यापार इति तत्र बोधः। धातूपस्थाप्ययोरपि फलव्यापारयोः कर्मकृत्समभिव्याहारे विशेषणविशेष्यभावव्यत्यासः" इति "रामेण बाणेन हतो वाली" इत्युदाहरणे कारकप्रकरणे मनोरमायां स्पष्टमेवोक्तं दीक्षितेन। अत एव मनोरमायां प्रकृतग्रन्थे च कर्मतिङन्तेऽपि व्यापारविशेष्यक एव बोध उपवर्णित इत्यलम्।

यत्तु "तद्धात्वर्थजन्यत्वे सति तद्धात्वर्थत्वं फलत्वम्। जन्यत्वं च जन्यत्वप्रकारकप्रतीति-विषयत्वम्। तेन सत्तादौ न दोषः। गम्याद्यर्थव्यापारजन्यविभागादावति-प्रसङ्गवारणाय विशेष्यम्। तदर्थव्यापारेऽतिप्रसङ्गवारणाय च सत्यन्तम्" इति दर्पणकाराः।

तन्न। तावतापि गम्यर्थव्यापारे अतिप्रसङ्गस्यावारणात्। फलज्ञानपूर्वकं क्रियोत्पादनात्फलस्य ज्ञानद्वारा पूर्वकालवृत्तितया क्रियाजनकत्वेन गम्याद्यर्थव्यापारे तद्धात्वर्थजन्यत्वस्याव्याघातात्। अत एव फलस्य क्रियाजनकत्वरूपकारकत्वसत्त्वात्कर्मत्वमुक्तं सुबर्थवादे मञ्जूषायाम्। अतो मदुक्तरीत्या "तद्धात्वर्थविशेषणत्वे सति" इति विशेषणदाननैव गम्याद्यर्थव्यापारस्य फलत्वं वारणीयमिति बोध्यम्।

धात्वर्थनिर्णये मञ्जूषाकारास्तु - "तद्धात्वर्थजन्यत्वे सति कर्तृप्रत्ययसमभिव्याहारे तद्धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतावत्त्वं फलत्वम्। विभागजन्यसंयोगरूपे पतत्यर्थे विभागसंयोगयोः फलत्ववारणायोभयम्" इत्याहुः। तेषामयमाशयः - तत्र संयोगस्य प्रकारत्वाभावाद्विभागस्य तद्धात्वर्थजन्यत्वाभावाच्च न दोषः। तयोः पततिफलत्वे वृक्षात्पर्णं पततीत्यादौ वृक्षादीनां फलाश्रयत्वेन प्राप्तापादानत्वबाधनेन कर्मत्वापत्तिः। अत्र तयोः फलत्वाभावेऽपि विभागजन्यसंयोगस्य समुदितस्य फलत्वमस्त्येव। अकर्मकाणामपि फलभावनोभयवाचकतायाः सिद्धान्तितत्वेन तद्धात्वर्थजन्यत्वस्य तद्धात्वर्थविशेषणत्वस्य च तत्राबाधात्। "विभागजन्यसंयोगमात्रपरत्वे पतेरकर्मकत्वम्" इति धात्वर्थवादमञ्जूषायां मात्रपदेन तद्व्यधिकरणव्यापारस्य व्यवच्छेदो, न तत्समानाधिकरणस्य। अत एव फलावच्छिन्नव्यापारे धातोश्शक्तिरिति स्वसिद्धान्ते पतिप्रभृतीनां क्रियावाचित्व-निबन्धनधातुत्वसिद्धिः। व्यधिकरणव्यापारवाचकतायां तु पतेः सकर्मकत्वम्। यथा वृक्षत्पर्णं भूमिं पततीत्यादौ। अत एव नरकपतित इत्यादौ "द्वितीया श्रित" इत्यादिना पतितशब्देन द्वितीयासमासविधानं सङ्गच्छते - इति।

अत्र दर्पणकाराः - विभागजन्यसंयोगो न पतत्यर्थः। त्यजिपतत्योः पर्यायतापत्तेः। पत्लृ गताविति्यनुशासनात् गतिशब्दस्य गम्लृ गताविति्यादौ संयोगानुकूलव्यापार एव प्रसिद्धेश्च। फलावच्छिन्नव्यापारे व्यापारावच्छिन्नफले च धातोः शक्तिमङ्गीकुर्वतः स्वोक्तफलत्वानाक्रान्तस्य विभागस्य धात्वर्थानवच्छेदकत्वाच्च। विभागजन्यसंयोगस्य प्रत्यक्षत्वेन पूर्वापरीभूतानवयवकत्वेन च तदुभयार्थकस्य

पतेर्धातुत्वानापत्तेश्च। किन्त्वधोदेशसंयोगानुकूलो व्यापार एवार्थः, वृक्षात्पर्णं पततीत्यादौ तु विभाग एव पञ्चम्यर्थः, अवधित्वमात्रं वा। एवं चानुगतकर्मत्वानिरुक्तेश्चिन्त्यमिद - मिति धात्वर्थनिर्णय - सुबर्थनिर्णययोर्वदन्ति।

अत्रेयं चिन्ता - वृक्षात्पर्णं पततीत्यादौ वृक्षापादानकविभागजन्यसंयोग इत्यनुभवस्यापलापापत्तिः। वृक्षाद्विभजत इत्यादौ विभागस्य बोधावृत्तिप्रसङ्गश्च। तत्रापादानत्वस्यैव पञ्चम्यर्थत्वे तु किमर्धजरतीयेन। पतेर्धातुत्वं तु निरुक्तरीत्या बोध्यम्। किञ्च पत्लृ गतौ - पतति, ऋ गतौ - ऋच्छति, डीङ् विहायसा गतौ - डयते, स्रु गतौ - स्रवति, सृप्लृ गतौ - सर्पति, गम्लृ गतौ - गच्छति इत्यादौ सर्वत्रापि संयोगरूपार्थस्य भानात्संयोगवाचकगतिशब्देन तत्तद्धात्वर्थो निर्दिश्यते। स च यथायथमुत्तरदेशसंयोगरूपो विभागजन्यसंयोगरूप, ऊर्ध्वदेशसंयोगरूपोऽधोदेश-संयोगरूपश्च ग्राह्यः। एवं च पत्लृ गताविव्यनुशासनं पततेर्विभागजन्यसंयोगवाचकत्वे न बाधकम्। किं च त्वदुक्तरीत्या गतिशब्दस्योत्तरदेश-संयोगानुकूलव्यापारवाचकतया पतत्यादीनामपि तदर्थकतापत्तिः। तथाच ग्रामं गच्छतीत्यर्थे ग्रामं पतति डयते सर्पति ऋच्छति स्रवतीत्यादिप्रयोगापत्तिः। संयोगरूपफलाश्रयत्वेन वृक्षात्पर्णं पततीत्यादौ वृक्षादीनामपादनत्वबाधेन कर्मत्वापत्तिश्च। अतः पततेर्विभागजन्यसंयोगवाचकत्वस्यावश्याश्रयणीयतया तत्र विभागसंयोगयोः फलत्ववारणाय दलद्वयोपादानं मञ्जूषाकृतो युक्तमेव। प्रत्युत तत्र संयोगे भवदुक्तफललक्षणस्यातिव्याप्तिः, तद्वारणाय निरुक्तरीत्या गमिपच्याद्यर्थव्यापारेऽतिव्याप्तिवारणाय च तद्धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारताश्रयत्वस्य निवेशे पक्वस्तण्डुल इत्यादौ विक्लित्त्यादेः फलत्वानापत्तिः। 'कर्तृप्रत्ययसमभिव्याहारे' इति विशेषणदाने तु त्वल्लक्षणस्य मञ्जूषोक्तलक्षणतः को विशेषः? परन्तु अनुगतकर्मत्वानिरुक्तिरिति त्वदीया वाचोयुक्तिरेवावशिष्यत इति दिक्।

नन्वेवमपि विषयताया अजन्यत्ववादिमते घटं जानतीत्यादौ जानात्यर्थे विषयत्वे नागेशोक्तफललक्षणस्याव्याप्तिरेवेति चेत्सत्यम्। एतदभिप्रायेणैव 'कर्तृप्रत्ययसमभिव्याहारे तद्धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारताश्रयद्धात्वर्थत्वं फलत्वम्' इति जन्यत्वाघटितमेव तल्लक्षणमुक्तं सुबर्थवादे मञ्जूषायाम्। धात्वर्थवादोक्तफललक्षणं प्राचामनुरोधेन। स्पष्टं चेदं सुबर्थवादे कलायाम्। एवं च विषयताया जन्यत्वमस्तु, अजन्यत्वं वाऽस्तु। मतद्वयेऽपि तस्याः फलत्वनिर्वाहात्सुबर्थ-वादोक्तफललक्षण एव तात्पर्यं नागेशस्येत्यवसीयते। अत एव 'कर्तृगतप्रकृतधात्वर्थव्यापार-प्रयोज्यव्यापारव्यधिकरणफलाश्रयत्वेन कर्तुरुद्देश्यत्वं कर्मत्वम्' इति कर्मलक्षणे फले व्यापारप्रयोज्यत्वविशेषणदानं नागेशस्य स्वरसतः सङ्गच्छते। विवेचितश्चायमर्थोऽस्माभिर्मञ्जूषाव्याख्याने नागेशभावप्रकाशे।

काशिकाकारास्तु धात्वर्थवादमञ्जूषोक्तं जन्यत्वघटितं फललक्षणं प्रादर्शयन् - कर्तृप्रत्ययसमभिव्याहारे तद्धात्वर्थजन्यत्वे सति तद्धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतावत्त्व - मिति। परं त्विदं विषयताया अजन्यतावादे तत्राव्याप्तमेवेत्यलम्।

व्यापारस्तु भावनाभिधा साध्यत्वेनाभिधीयमाना क्रिया। उक्तञ्च वाक्यपदीये-

यावत्सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते।
आश्रितक्रमरूपत्वात्सा क्रियेत्यभिधीयते।। इति।

नच साध्यत्वेनाभिधाने मानाभावः। पचति - पाकः, करोति - कृतिरित्यादौ धात्वर्थावगमाविशेषेऽपि क्रियान्तराकाङ्क्षाऽनाकाङ्क्षयोर्दर्शनस्यैव मानत्वात्। तथाच क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकरूपं साध्यत्वम्। तद्रूपवत्त्वमसत्त्वभूतत्वम्। एतदेवादाय -

"असत्त्वभूतो भावश्च तिङ्पदैरभिधीयते" इति वाक्यपदीयमिति द्रष्टव्यम्।

ननु कोऽयं व्यापारः? न तावत्फलप्रयोजकक्रियात्वं व्यापारत्वम्। आत्माश्रयात्। क्रियात्वस्यैव तत्त्वात्। दण्डादिव्यापारस्यापि धात्वर्थत्वापत्तेश्च। नचेष्टापत्तिः। चैत्रो दण्डेन पचतीत्यादो दण्डस्य धातूपात्तव्यापाराश्रयत्वेन करणसंज्ञाबाधेन कर्तृत्वापत्तेः। 'आकडारादेका संज्ञा' इति नियमनात्। किं च यदि प्रयोजकत्वं जनकाजनकसाधारणं, तदा तण्डुलक्रयणादेरपि फलप्रयोजकक्रियात्वा-त्तद्दशायामपि देवदत्तादौ पचतीति प्रयोगापत्तिः। यत्तु 'बुद्धिविषयत्वोपलक्षिताधिश्रयणाद्यधः-श्रयणान्तेष्वपि शक्तिस्वीकारेण क्रयणादेः परम्परया फलजनकत्वेऽपि तदानीं पचतीति प्रयोगानापत्तेरिदमापादनमयुक्तम्' इति पञ्चोलिनः। तन्न। पचादीनामेतद्दशायामधिश्रयणाद्यधःश्रयणान्तेष्वेव व्यापारेषु शक्तिस्वीकारे मानाभावात्। प्रयोजकत्वं यदि साक्षाज्जनकत्वं, तदा चैत्रः पचतीत्यादौ कर्तृव्यापारस्य धात्वर्थत्वानापत्तिः, तस्य करणव्यापारद्वारैव फलजनकत्वात्। यदपि पञ्चोलिनः - "व्यापारसामान्यस्य लक्षणप्रसङ्गे धात्ववाच्यव्यापारेऽपि तल्लक्षणसत्वे दोषाभावात्" इति। तदपि न। व्यापारसामान्यस्यात्र लक्ष्यत्वेनाप्रक्रान्तत्वात्। 'फलव्यापारयोर्धातुः' इति धातुवाच्यव्यापारस्यैव लक्ष्यत्वेनाभिमतत्वाच्च। एतेन - तज्जन्यत्वे सति तज्जन्यजनकत्वं व्यापारत्वम्। तथाहि - पचति, पाक इत्युभयत्रापि कर्तृजन्यत्वस्य कर्तृजन्यविक्लित्तिजनकत्वस्य च सत्त्वेन लक्षणसमन्वयः' इति पञ्चोलिनामुक्तिरपि परास्ता। पाको भवति, पाको भविष्यतीत्यादौ पाकस्यैव कर्तृत्वस्थले पाकक्रियायां तल्लक्षणस्याव्याप्तेश्च। किञ्चैवं सति

साक्षाद्विक्लित्तिजनकान्तिमाग्निसंयोगदशायामेव पचतीति प्रयोगः स्यान्न त्वधिश्रयणादिदशायामपि। न च जनकत्वं जनकत्वेन प्रतीतत्वमतो नोक्तदोषः। जनकत्वेन प्रतीतत्वस्याधिश्रयणादावपि सत्त्वादिति वाच्यम्। तत्त्वेन प्रतीतिविषयस्य नियतरूपस्य कस्याप्यर्थस्याभावात्। अधिश्रयणादीनामन्तिमाग्नि-संयोगेनान्यथासिद्धतया विक्लित्त्यजनकत्वाच्च। अतो दुर्निरूप एवायं व्यापार इत्यत आह [व्यापारस्त्विति] धातुवाच्यो व्यापारस्त्वित्यर्थः। घञादिवाच्यस्तु सिद्धरूप एव। निरूपयिष्यते चेदमुपरिष्टात्। व्यापारः क्रियेत्येतावन्मात्रोक्तौ परिस्पन्दरूपार्थस्यैव प्रतीत्यापत्तौ तिष्ठति, भवति, पुत्रीयतीत्यादावव्याप्तिः। किञ्च क्रियादिपदाभिहितक्रियाया अपि धातुवाच्यव्यापारतौल्यापत्त्या धात्वर्थव्यापार इव तत्रापि कारकान्वयापत्तिः, तत्रेव धात्वर्थव्यापारे तदनापत्तिश्चेत्यत उक्तं [साध्यत्वेनाऽभिधीयमानेति] तेन रूपेण वाच्येत्यर्थः। तिष्ठतीत्यादौ प्रकृत्यर्थस्य साध्यत्वेन भानान्नाव्याप्तिः। पुत्रीयतीत्यादावपि शब्दशक्तिस्वभावात्प्रकृत्यर्थस्य साध्यत्वेन भानान्नाव्याप्तिः। अत एव 'व्याकरणस्य सूत्रं करोतीत्यादौ वाक्ये सम्बन्धेनान्वितस्यापि व्याकरणपदार्थस्य 'व्याकरणं सूत्रयति' इत्यादौ कर्मत्वम्। स्पष्टं चेदं "हेतुमति च" इति सूत्रे भाष्ये। क्रियादिपदाभिहितक्रियायास्तेन रूपेणाऽभानान्नातिव्याप्तिः। नन्वेवमपि धात्वर्थफले विक्लित्त्यादावतिव्याप्तिः, तस्य साध्यत्वेन भानात्क्रियात्वाच्चेत्यत उक्तम् - [भावनाभिधेति] भावनापरनामिकेत्यर्थः। उत्पत्त्यर्थकाद्भवतेर्ण्यन्तात् "ण्यासश्रन्थो युच्" इति भावे युचि भावनेति रूपं सिद्धम्। भवितुर्विक्लित्त्यादेर्भवनानुकूलः फूत्कारादिरेव भावनाशब्देनोच्यते। अतो नातिव्याप्तिः फले। एवं च भावनापरनामिका साध्यत्वेन रूपेण वाच्या च या क्रिया स व्यापार इति भावः।

यत्तु - भावनेति - उत्पत्त्यनुकूलो व्यापारः। उत्पत्त्यर्थकभूधातो र्ण्यन्तात् 'ण्यासश्रन्थ' इति युच् भावे। अभिधेति - अभिदधाति जनयति फलमित्यभिधा। साध्यत्वेन धातुनाभिधीयत इति वा अभिधा। तत्र प्रथमे 'आतश्चोपसर्गे' ३-१-२३६ इति कर्तरि कः। द्वितीये तेनैव सूत्रेण ३-३-२०६ कर्मण्यङ् प्रत्ययः। तथाच भावनाभिधापरनामिका साध्यत्वेनाभिधीयमाना क्रिया व्यापार इत्यर्थः' इति काशिकाकारास्तदनुसारिणः पञ्चोलिनश्च। तत्र प्रथमे उत्पत्त्यनुकूलव्यापाररूपा फलजनिका च या साध्यत्वेनाभिधीयमाना क्रिया स व्यापार इति, द्वितीये उत्पत्त्यनुकूलव्यापाररूपा साध्यत्वेन धातुनाभिधीयमाना साध्यत्वेनाभिधीयमाना या क्रिया स व्यापार इति तदुक्तरीत्या मूलार्थस्य पर्यवसन्नतयाऽसङ्गत्यापत्तेः। क्रियाया भावनाभिधापरनामकत्वस्य कुत्राप्यदर्शनाच्च। तस्या भावनापरनामकत्वस्यैव दृष्टत्वाच्च।

अत्रार्थे हरिग्रन्थं प्रमाणयति [उक्तं चेति] तृतीयकाण्डे क्रियासमुद्देशेऽयं ग्रन्थः। [यावदिति] शास्त्रीयक्रियाया लक्षणमिदम्। लोके क्रियापदेन परिस्पन्दरूप एवार्थो गृह्यते। शास्त्रे तु यः कश्चिदपि पदार्थः साध्यत्वेनोच्यते चेत् स शास्त्रकारैः क्रियेत्यभिधीयते। यावत्पदार्थमेव विवृणोति कारिकायां [सिद्धमसिद्धं वेति] सिद्धमपाक्षीदित्यादौ। असिद्धं पचति पक्ष्यतीत्यादौ। नामार्थस्यापि तत्त्वेन विवक्षायां कारकान्वययोग्यक्रियारूपत्वम्। अत एव व्याकरणं सूत्रयतीत्यादौ व्याकरणादेः सूत्रयत्यर्थनिरूपितकर्मत्वसिद्धिः। स्पष्टश्चायमर्थो वृत्तिवादे मञ्जूषायाम्। तत्र हेतुमाह [आश्रितक्रमरूपत्वादिति] आश्रितं क्रमरूपं यस्याः। पचतीत्यादौ क्रमेणोत्पन्नानां फूत्कारादीनां क्रमिकं रूपं समुदाये आश्रीयते = आरोप्यते। फूत्कारादीनां घटयति, सूत्रयति, पुत्रीयतीत्यादौ घटादीनां च कालगतपौर्वापर्यारोपेण क्रियात्वं निर्वाह्यम्। विधेयप्राधान्यात् 'सा' इति स्त्रीत्वम्। नचैवं धात्वर्थस्य गौणत्वापत्तिरिति वाच्यम्। तदतिरिक्तमुख्यार्थाप्रसिद्ध्या तस्य गौणत्वाभावात्। यस्य हि मुख्योऽन्योऽर्थोऽस्ति तत्रैवेदृशस्य गौणत्वात्। उक्तं च वाक्यपदीये

व्यवहारस्य सिद्धत्वान्नचेयं गुणकल्पना।
उपचारो हि मुख्यस्य सम्भवादवतिष्ठते।।इति।। ३ क्रिया १३

गोशब्दस्य सास्नादिमति मुख्यत्वात्तत्समानगुणे वाहीकादावुपचरितार्थवृत्तिरित्युच्यते। क्रियायास्तु समानकालाश्रिते पौर्वापर्यावयवाया अभावान्न मुख्यता क्वचित्। सर्वत्र पूर्वोत्तरावयवानां प्रक्रमरूपाध्यारोपादिति नोपचारार्थः कश्चित्। एवंविध एव क्रियाव्यवहारः प्रसिद्ध इति तद्व्याख्याने हेलाराजः। अभिधीयते व्यवह्रियते। फलस्यापि स्वजनकव्यापारगतपौर्वापर्यारोपेण साध्यत्वेन भानमविरुद्धम्। यद्वा 'यावत्सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते' इत्यनेन क्रियाशब्दस्य रूढिं प्रदर्श्य इदानीं यौगिकत्वमप्याह 'आश्रितेति' इति व्याख्येयम्। क्रियते अवयवानां क्रमेणोत्पत्त्येति क्रिया। स्पष्टश्चायमर्थो धात्वर्थवादे मञ्जूषायाम्। आद्यव्याख्यायां क्रियाशब्दे भावे शः, द्वितीयव्याख्यायां कर्मणीति विवेकः।

[नचेति]अस्य 'मानाभाव' इत्यत्रान्वयः। साध्यत्वेन तेन रूपेण। अभिधाने व्यापारस्य धातुनाभिधाने। [मानाभाव इति] अयं भावः - येन रूपेण शक्तिग्रहस्तेन रूपेण सोऽर्थस्तत्पदेनाभिधीयते, नान्येन रूपेण। घटादिपदानां घटत्वविशिष्टे शक्तिग्रहाद् घटत्वादिना रूपेण घटादयोऽभिधीयन्ते, न द्रव्यत्वादिना, तेन रूपेण शक्तिग्रहाभावात्। प्रकृतेऽपि धातोर्व्यापारत्वेन रूपेण शक्तिग्रहाद्व्यापारत्वेन रूपेण व्यापारोऽभिधीयते, विशेषरूपेण शक्तिकल्पने तु फूत्कारत्वादिना रूपेणाभिधीयेत, न तु

साध्यत्वेन रूपेण। तेन रूपेण शक्तिग्रहाभावात्। एवं च "साध्यत्वेनाभीधीयमाना" इत्युक्तिरयुक्तेति। समाधत्ते [पचतीति] [धात्वर्थावगमेति] तिङन्ते कृदन्ते च धात्वर्थस्य विक्लित्त्याद्यनुकूलफूत्कारादेरर्थस्यावगतौ विशेषाभावेऽपीत्यर्थः। [क्रियान्तरेति] अन्या क्रिया क्रियान्तरम्। आकाङ्क्षा अस्य अन्वयिनी का क्रियेतीच्छारूपा क्रियान्तरविषयिकाऽऽकाङ्क्षा। सा पाकः, कृतिरित्यादिकृदन्तोपस्थाप्यक्रियायां दृश्यते। पाक इत्यादिकृदन्तश्रवणे अभूत्, भविष्यति वेत्यादिरूपा क्रियान्तराकाङ्क्षाऽनुभूयते। पचति करोतीत्यादितिङन्तश्रवणे तादृशी क्रियान्तराकाङ्क्षा नानुभूयते। क्रियान्तरेत्यादेः 'शब्दान्तरसमभिव्याहाराभावे' इति शेषो बोध्यः। तेन कृष्णं नमेच्चेत्सुखं यायादित्यादौ तिङन्तोपस्थाप्यक्रियायाः क्रियान्तराकाङ्क्षासत्त्वेऽपि न क्षतिः। तत्र हि चेच्छब्दसमभिव्याहारप्रयुक्ता क्रियान्तराकाङ्क्षा। नचैवं पाक इत्यादावपि घञादिसमभिव्याहारवशाद्धात्वर्थस्यैव क्रियान्तराकाङ्क्षेति वाच्यम्। घञादेः स्वातन्त्र्येण सिद्धरूपभावनावाचकताया भाष्यसम्मततया निरुक्तकल्पनाया अप्रामाणिकत्वात्। तथाच शब्दान्तरसमभिव्याहाराभावे स्वसाध्यक्रियान्तराकाङ्क्षानुत्थापकज्ञानविषयत्वं साध्यत्वं, तादृशाकाङ्क्षोपकारकज्ञानविषयत्वं सिद्धत्वमिति लभ्यते। यद्यपि पाक इत्यादिकृदन्तेऽपि धात्वर्थस्य साध्यत्वेन भानमत एव ओदनस्य पाक इत्यादौ ओदनादेः कर्मत्वात्तत्र षष्ठी। वक्ष्यते चेदं 'साध्यत्वेन क्रिया तत्र' इति कारिकाव्याख्याने, तथापि प्रत्ययार्थस्य प्रधानतया 'प्रधानेन व्यपदेशा भवन्ति' इति न्यायेन पाक इत्यादौ क्रियायाः सिद्धत्वेन व्यपदेश इति बोध्यम्। [मानत्वादिति] तथाच यग्विधायके भाष्यम् - "अस्ति खल्वपि विशेषस्तिङभिहितस्य भावस्य कृदभिहितस्य च। कृदभिहितो भावो द्रव्यवद्भवति। द्रव्यं क्रियाभिनिर्वृत्तौ साधनत्वमुपैति। तद्वच्चास्य कृदभिहितस्य भवति - पाको वर्तत इति। तिङि क्रिया क्रियया समवायं न गच्छति - पचति पठतीति" इति। तिङन्तेनाभिहिता क्रिया क्रियया समवायं न गच्छति। कृदभिहिता तु क्रियान्तरेण समवायं गच्छतीति तदर्थः। भाष्ये समवायशब्दोऽन्वयपरः। स चाकाङ्क्षारूपो विवक्षितः। तथाच तिङन्तोपस्थाप्या क्रिया क्रियान्तरं नाकाङ्क्षते, कृदन्तोपस्थाप्या तु क्रियान्तरमाकाङ्क्षत इति तद्भाष्यार्थः पर्यवस्यति। भाष्ये "शब्दान्तरसमभिव्याहाराभावे सति" इति शेषो बोध्यः। एवंच क्रियायास्तद्रूपेण भानात्तद्रूपविशिष्टे धातोः शक्तिः स्वीकार्या। अतः क्रियायाः साध्यत्वेनाभिधाने न किञ्चिद्बाधकम्।

नान्विदमयुक्तम्। धातुतः क्रियान्तरानाकाङ्क्षित्वेन रूपेणाप्रतीतेस्तेन रूपेण वाच्यत्वस्याननुभवाच्च। किञ्च धातूपस्थाप्यभावनायाः क्रियान्तरानाकाङ्क्षित्वं कुत इति विभाव्यम्। धातूपस्थाप्यत्वनिबन्धनमेवेति, चेन्न। सति तस्या धातूपस्थाप्यत्वे क्रियानाकाङ्क्षित्वं, सति तस्यास्तत्त्वे धातूपस्थाप्यत्वमित्यन्योन्याश्रयापत्तौ

साध्यत्वेनाभिधानस्य विलयापत्तेः। साध्यत्वेनोपस्थापननिबन्धनमिति चेत्तर्हि तथान्वयविरोधिस्वतन्त्रमेव किञ्चिद्रूपं वक्तव्यमित्यतस्तद्रूपमाह [तथा चेति] क्रियायास्तत्त्वस्याऽऽनुभविकत्वे चेत्यर्थः। [अवच्छेदकरूपमिति] तच्चोत्पाद्यरूपम्। धात्वर्थनिष्ठक्रियान्तराकाङ्क्षानुत्थापकतायामवच्छेदकम् उत्पाद्यत्वम्। अतस्तेन रूपेण वाच्यत्वं नानुपपन्नम्। पचति पाकमुत्पादयतीति विवरणप्रतीतिरत्र मानम्। स्वयमुत्पाद्यतयावगतत्वेनासिद्धत्वा-दुत्पाद्यान्तराकाङ्क्षाभावात्। "क्रिया क्रियया समवायं न गच्छति" इति यग्विधायकसूत्रस्थं भाष्यमपि स्वरसतः सङ्गच्छते। नचैवं पचति भवतीत्यपि न स्यादिति वाच्यम्। उत्पाद्यमानस्यासिद्धस्यैव सर्वत्र भवने कर्तृत्वदर्शनेन तस्यात्रानुकूलत्वात्। अत एव पाको नश्यतीत्यर्थे पचति नश्यतीत्यादयो न प्रयोगाः। न चैवमप्यसिद्धस्य दर्शनकर्मत्वासम्भवात् "पश्य मृगो धावति" इत्यादौ धावनक्रियाया दर्शनकर्मत्वानापत्तिरिति वाच्यम्। "पिण्डीभूता न निदर्शयितुं शक्या" इति भाष्योक्त्या समूहस्यासिद्धतया दर्शनकर्मत्वासम्भवेऽपि अवयवक्रियाणां यथायथं सिद्धतया तत्त्वसम्भवात्। एवं च समुदाये कारकान्वयोपयोगि असिद्धत्वं प्रत्येकं दर्शनोपयोगिसिद्धत्वं चास्तीति न दोषः। विवेचयिष्यते चेदमुपरिष्टात्। एतेन "पचतिक्रिया भवतीत्यर्थके पचति भवतीत्यादौ, पश्य मृगो धावतीत्यादौ चोक्तसाध्यत्वलक्षणाव्याप्तिः" इति पञ्चोलिगुरूणां सभापतिशर्मणामुक्तिः परास्ता। उत्पाद्यस्य क्रियारूपार्थस्य, उत्पादकस्य कर्त्रादिकारकस्य च परस्पराकाङ्क्षासत्त्वात् कारकाणां साध्यक्रियायामेवान्वय इति कारकान्वयितावच्छेदकमपि उत्पाद्यत्वमेव। उक्तं च "साध्यत्वेन क्रिया तत्र" इति कारिकाव्याख्याने भूषणे - "उत्पाद्यत्वमेव कारकान्वियतावच्छेदकं, क्रियान्तराकाङ्क्षानुत्थापकं च" इति। अस्माद्भूषणग्रन्थाद् उत्पाद्यत्वक्रियान्तराकाङ्क्षानुत्थापक-तावच्छेदकशब्दयोरेकार्थत्वं स्पष्टमेवावभासते। अतः प्रकृतग्रन्थेऽपि क्रियान्तराकाङ्क्षानुत्थापक-तावच्छेदकमित्यत्रावच्छेदकमुत्पाद्यत्वमेव भवितुमर्हति। "असत्त्वभूता साध्यावस्था" इति प्रसिद्धव्यवहारोऽप्यत एव सङ्गच्छते। "क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकरूपं कारकान्वयितावच्छेदकरूपं वाऽसत्वभूतत्वम्" इति स्वीकारात्। तदेतदभिप्रेत्यैवाह- [तद्रूपवत्त्वमिति] तद्रूपमित्यर्थः। क्रियान्तरानाकाङ्क्षित्वस्यैव साध्यत्वे तु तद्व्यवहारानुपपत्तिरेव भिन्नविषयत्वादिति भावः। [एतदेवेति] निरुक्तासत्त्वभूतत्वमेवेत्यर्थः। हरिकारिकायां [तिङ्पदैरिति] पद्यतेऽनेनार्थ इति व्युत्पत्त्या पदशब्दः प्रत्ययपरः। तिङः पदानि प्रत्यया येभ्य इत्यतद्गुणबहुव्रीहिणा तिङ्पदशब्दो धातुपरः। तथा च तिङ्पदैः = धातुभिः असत्त्वभूत एव भावोऽभिधीयत इत्यर्थः। अयं च हरिग्रन्थः "क्रियाप्रधानमाख्यातम्" इति रूपप्सूत्रस्थभाष्यार्थप्रतिपादकः। अत्रेदं तत्त्वम् -

क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकरूपवत्त्वं न साध्यत्वलक्षणम्। क्रियाघटितत्वेनान्योन्याश्रयात्। किन्तु परिचायकम्। तल्लक्षणं तु निष्पाद्यत्वमेव। स्पष्टीकृतं चेदं भूवादिसूत्रे शब्देन्दुशेखरव्याख्याने गुरुप्रसादे श्रीमत्सुब्रह्मण्यशास्त्रिगुरुचरणैः - इति।

दर्पणकारास्तु - 'पर्यवसितार्थमाह - तथा च क्रियान्तरेति। यद्धर्मवत्ताज्ञाना-त्क्रियान्तराकाङ्क्षोदयस्तादृशज्ञाने प्रकारतयाऽवच्छेदकं यत् तत्सिद्धत्वम्। तद्भिन्नत्वं ज्ञाननिष्ठतादृशाकाङ्क्षोत्थापकत्वाभावावच्छेदकं वा साध्यत्वम्। वस्तुतस्तु सिद्धत्वज्ञाने साध्याकाङ्क्षावत्पच्याद्यर्थे साध्यतयाऽवगते 'किमस्य साधनम्?' इत्याकाङ्क्षोदयेन साधनाकाङ्क्षोत्थापकतावच्छेदकरूपवत्त्वमेव साध्यत्वम्। अत एव "एतदेवादाय" इत्यग्रिमग्रन्थसङ्गतिः। अन्यथा पचति भवतीत्यादौ पूर्वोक्तरूपाभावेन तदसङ्गतिः स्पष्टैव। "साधनं हि क्रियां निर्वर्तयति" इति "सुट्कात्पूर्वः" इति सूत्रस्थभाष्यमप्येतत्कल्पे मानम्' इत्याहुः। तच्चिन्त्यम्। तदुक्तकल्पान्तराशयस्य मदुक्तरीत्या मूलग्रन्थादेवाक्षरमर्यादया लाभात्। पच्याद्यर्थस्य साध्यतयावगतौ साधनाकाङ्क्षोत्थापकतावच्छेदकरूपवत्त्वज्ञानं, तादृशज्ञाने धात्वर्थस्य तत्त्वेनावगतिरित्यन्योन्याश्रयाच्च। पचति भवतीत्यादौ निरुक्तरीत्याऽसत्त्वभूतस्यापि पच्याद्यर्थस्य भवनकर्तृकत्वसम्भवेन तत्र क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकस्योत्पाद्यत्वस्य सत्त्वेन "एतदेवादाय" इत्यग्रिमग्रन्थस्य सुसङ्गतत्वाच्च। अतो हरिवल्लभस्य व्याख्या प्रमादभूयिष्ठैव।

परीक्षाकारास्तु "अवच्छेदकमुत्पाद्यत्वम्" इति व्याख्यायापि वस्तुतस्त्वित्यादिना "कारकान्वययोग्यतावच्छेदकरूपवत्त्वं साध्यत्वम्" इति कल्पान्तरमनुसस्रुः। तदतिरभसादिति प्रतिभाति। तत्र दर्पणग्रन्थप्रामाण्यधिय एव हेतुत्वमुत्प्रेक्षे।

काशिकाकारास्तु 'अनुत्थापकतावच्छेदकमिति तदुत्थितप्रतिबन्धकतया सिद्धजातिविशेषरूपमित्यर्थः। तद्रूपमिति - धातूपस्थितक्रियामात्रवृत्तिवैजात्यसिद्धौ लाघवात्तस्यैवासत्त्वरूपत्वं स्वीकर्तुं युक्तं, नतु लिङ्गाद्यनन्वयित्वादेः" इति मूलं व्याख्याय "वस्तुतस्तु साध्यत्वं निष्पाद्यत्वमेव, तेन रूपेण बोधस्यानुभवसिद्धत्वात्" इत्यादिना कल्पान्तरं लिलिखुः। तदप्ययुक्तमेव, मदुक्तरीत्या तदुक्तस्य वस्तुतस्त्वित्याद्यर्थस्य मूलत एव लाभसम्भवात्।

अत्रेयं स्थितिः - "साध्यत्वेन क्रिया तत्र" इत्यादिकारिकायां "साध्यत्वमसत्त्वभूतत्वं, तच्च लिङ्गाद्यनन्वयित्वम्" इत्यादि प्रदर्श्य धातूपस्थितक्रियाया लिङ्गाद्यनन्वयित्वं कारकत्वेनानन्वयित्वं क्रियान्तरानाकाङ्क्षित्वं च कुत इति विस्तरेण विमृश्य "साध्यत्वमुत्पाद्यत्वमेव" इति भूषणे

सिद्धान्तितं कौण्डभट्टेन। पश्य मृगो धावति, पचति भवतीत्यादावनुपपत्तिरपि आशङ्क्य परिहृता। "तस्मादुत्पाद्यत्वमेव क्रियायाः कारकत्वेनानन्वयितावच्छेदकं - क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकं च" इत्यादिना स्वसिद्धान्तनिष्कर्षश्च प्रदर्शितः। प्रकृतग्रन्थेऽपि स एव मार्गः प्रदर्शितः। "न च साध्यत्वेनाभिधाने मानाभावः" इत्याक्षिप्य "पचति - पाकः, करोति - कृतिरित्यादौ धात्वर्थावगमाविशेषेऽपि क्रियान्तरानाकाङ्क्षित्वं साध्यत्वमिति प्रदर्श्य तत्रानुपपत्तिपरिहारार्थं "तथा च क्रियान्तराकाङ्क्षानाकाङ्क्षयोर्दर्शनस्यैव मानत्वात्" इत्यनेन क्रियान्तरानाकाङ्क्षित्वं साध्यत्वमिति प्रदर्श्य तत्रानुपपत्तिपरिहारार्थं "तथा च क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकरूपवत्त्वं साध्यत्वं, तद्रूपवत्त्वमसत्त्वभूतत्वम्" इति स्वसिद्धान्तः प्रदर्शितः। मत्प्रदर्शितः प्रकृतग्रन्थसमन्वयो भूषणग्रन्थपरिशीलिनां सचेतसां विदुषां मनसि परिस्फुरत्येव। दर्पणकारादयः सर्वेऽपि मार्गमेनं परित्यज्य ग्रन्थमन्यार्थपरतया संयोज्य "वस्तुतस्तु साध्यत्वं निष्पाद्यत्वमेव" इत्यादिना प्रकृतग्रन्थकृदाशयभिन्नाशयस्फोरकं कल्पान्तरमन्वसरन्। तन्मुधैवेति न्यवेदयम्। तादृशभ्रमे तेषां भूषणकृन्नागेशभट्टयोः साध्यत्वस्वरूपनिर्णये आशयभेदधियं बीजमुत्प्रेक्षे। धात्वर्थवादमञ्जूषायाम् "अत्र केचित्" इत्यादिना - साध्यत्वं क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकं यद्वैजात्यं तद्रूपमित्युक्त्वा "वस्तुतस्तु साध्यत्वं निष्पाद्यत्वमेव, तद्रूपेणैव बोधः" इत्युक्तम्। "अत्र केचित्" इत्यादिर्भूषणकृदाशयप्रतिपादनपरः, वस्तुतस्त्वित्यादिर्नागेशसिद्धान्तप्रदर्शनपर इति दर्पण-काशिकाकारादीनामाशयो भवेत्। स एव तेषामत्र भ्रमबीजम्। विचार्यमाणे नात्र भूषणकृन्नागेशयोर्मतिभेदोऽस्ति। अत एव "वस्तुतस्तु साध्यत्वं निष्पाद्यत्वमेव" इत्येवोक्तं नागेशेन। अन्यथा "परे तु साध्यत्वं निष्पाद्यत्व मेव" इत्येव वदेन्नागेशः। तादृशी हि तस्य शैली। एतेन "भूषणकारादिमतमाह - केचिदिति, सिद्धान्तमाह - वस्तुत इति" इति भूषणकृन्नागेशयोर्मत-भेदप्रदर्शनपरतया धात्वर्थवादमञ्जूषां विवृण्वन्तः कलाकारा अपि परास्ताः। निरूपितं चेदं मदीये नागेशभावप्रकाशे मञ्जूषाव्याख्याने। एवं च प्रकृतग्रन्थार्थतत्त्वं हरिवल्लभादयो नाग्रहीषुरेव - इत्यलम्।

अयं च व्यापारः फूत्कारत्वाधःसन्तापनत्वयत्नत्वादितत्तद्रूपेण वाच्यः। पचतीत्यादौ तत्प्रकारबोधस्यानुभवसिद्धत्वात्। न च नानार्थतापत्तिः। तदादिन्यायेन बुद्धिविशेषादेः शक्यतावच्छेदकानामनुगमकस्य सत्त्वात्। आख्याते क्रियैकत्वव्यवस्थाप्यवच्छेदकबुद्धिविशेषैक्यमादायैव। उक्तं च वाक्यपदीये -

गुणभूतैरवयवैः समूहः क्रमजन्मनाम्।
बुद्ध्या प्रकल्पिताभेदः क्रियेति व्यपदिश्यते।। इति।।

ननु व्यापारपदेनात्मनिष्ठः कृतिरूपो यत्नः, शरीरनिष्ठः फूत्कारादिश्च ग्राह्यः। तद्वत्येव पचतीत्यादिव्यवहारात्। एवंचैतत्सर्वसाधारणस्य धर्मस्याभावाच्छक्यतावच्छेदकासम्भवेन कथं व्यापारस्य धातुशक्यत्वम्। नच सर्वसाधारणं व्यापारत्वमेव शक्यतावच्छेदकमस्त्विति वाच्यम्। पचतीत्यादितो व्यापारत्वेन रूपेण बोधाभावात्, फूत्कारत्वादिना बोधाच्च। येन रूपेण बोधस्तस्यैवावच्छेदकत्वात्। न च फूत्कारत्वादिकमेव शक्यतावच्छेदकमस्त्विति वाच्यम्। शक्यतावच्छेदकनानात्वेन पचादीनां नानार्थकतापत्तेरत आह - [अयं चेति] धातुवाच्यो व्यापारश्चेत्यर्थः। [यत्नत्वेति] एतेन फूत्कारादिव्यापारानुकूलः कृतिरूपो यत्न आख्यातवाच्य एव। तदतिरिक्तव्यापार एव धातुशक्य इति दर्शनान्तरीयोक्तमयुक्तं, तस्यापि धातुत एव लाभसम्भवादिति ध्वनयति [तत्तद्रूपेणेति] फूत्कारादीनां मध्ये यदा यो व्यापारो वक्तृबुद्धिस्थस्तदा स वाच्यो, नेतरः। यो धातुवाच्यस्तदाश्रयस्य कर्तृत्वम्। धात्ववाच्यव्यापारवतां करणादिसंज्ञा। अत एव काष्ठानि पचन्ति, काष्ठैः पचती त्यादिप्रयोगा उपपद्यन्ते। [तत्तत्प्रकारकेति] अत एव देवदत्तः पचतीत्युक्ते स फूत्कारादिमान्न वेति संदेहो नेति बोध्यम्। ननु व्यापारस्य तत्तद्रूपेण वाच्यत्वे शक्यतावच्छेदकनानात्वेन पचादीनां नानार्थकत्वव्यवहारापत्तिः। नचेष्टापत्तिः। अननुभवात्। फलांशमादाय नानार्थत्वमिष्टमेव स्यादित्याशयेन शङ्कते [नचेति] [नानार्थतापत्तिरिति] हर्यादिपदानामिव शक्यतावच्छेदकनानात्वेन तदापत्तिरित्यर्थः। समाधत्ते [तदादिन्यायेनेति] अयं भावः - घटादिपदानामपि व्यक्तिरूपशक्यार्थमादाय नानार्थत्ववारणाय शक्यार्थनानात्वेऽपि शक्यतावच्छेदकधर्मस्यैकत्वे शक्तेरेकत्वमेवेति प्रामाणिकः पन्थाः। एवमपि तदादिपदेभ्यो घटत्वपटत्वरघुत्वदिलीपत्वादिना बोधोदयेन शक्यतावच्छेदकानामपि नानात्वाच्छक्तेरेकत्वासम्भव एव तदवस्थः। नानार्थत्वं तु तत्र नानुभूयते। अतः शक्यतावच्छेदकनानात्वेऽपि तदनुगमकस्य धर्मस्यैकत्वे शक्तेरप्येकत्वमुररीकृतम्। अतस्तदादौ घटत्वपटत्वादीनामनुगमकस्य बुद्धिविशेषस्य स्वीकारान्न नानार्थत्वमिति सर्वैरप्यङ्गीकृतम्। तद्वत्प्रकृतेऽपि फूत्कारत्वादीनां नानात्वेऽपि तदनुगमकस्य बुद्धिविशेषस्य स्वीकारान्न नानार्थत्वापत्तिः। यथानुभवं व्यवस्था, अतो हर्यादीनां नानार्थत्वमेव। तथा च यथा शक्यतावच्छेदकैक्ये शक्तेरेकत्वं तथा शक्यतावच्छेदकानामनुगमकधर्मस्यैक्येऽपि शक्तेरेकत्वमिति न दोषः - इति। प्रकृते बुद्धिविषयत्वमुपलक्षणतया स्वीक्रियते। तथा च बुद्धिविशेषोपलक्षिततत्तद्धर्मावच्छिन्ने यथा तदादेः शक्तिः तद्वत् प्रकृतेऽपीति भावः। तदेतदाह [बुद्धिविशेषेति] फूत्कारादिविषयकबुद्धेरित्यर्थः।

बुद्धेः शक्यतावच्छेदकतावच्छेदकत्वं विषयतासम्बन्धेन बोध्यम्। बुद्धिविशेषस्य वृत्त्यनियामकतयाऽवच्छेदकत्वानङ्गीकारेणाह [आदेरिति] आदिपदेन बुद्धिविशेषविषयत्वतदवच्छेदकत्वयोर्ग्रहणम्। निरुक्तकल्पनाया आवश्यकतां दर्शयति [आख्यात इति] धाताविति्यर्थः। आख्यातपदं धातुपरमिति दीक्षितभूषणकृदादयः। "नियमतो जनकाकाङ्क्षं विभक्त्यन्तमाख्यातपदेनोच्यते। यथा पचति पपाच गच्छतीत्यादि। एधितव्यं भुक्त्वा कर्तुं पचतिरूपमेधामित्यादि नामरूपमाख्यात मेव" इति नागेशः। "तिङन्तमेवाऽऽख्यातपदेनोच्यते" इति न्यायवार्त्तिककारः। "आख्यातपदेन तिङ्प्रत्ययो गृह्यत" इति नव्यनैयायिकाः, मीमांसकाश्चेत्याख्यातपदार्थविषये मतभेदो विद्यते। दीक्षितनागेशावपि दर्शनान्तरीयवासनावशेन तिङ्प्रत्ययमाख्यातपदेन व्यवहरत एव - "आख्यातार्थसङ्ख्याप्रकारकबोधं प्रति" इत्यादौ। [क्रियैकत्वव्यवस्थेति] क्रियायामेकत्वव्यवहार इत्यर्थः। तथा च यग्विधायके रूपप्सूत्रे च भाष्यम् "एका क्रिया" इति। [अवच्छेदकबुद्धीति] फूत्कारत्वादीनां शक्यतावच्छेदकानामनुगमकः = उपलक्षणीभूतः यो बुद्धिविशेषस्तद्गतमेकत्वमित्यर्थः। [आदायैवेति] अस्य उपपाद्येति शेषो बोध्यः। अन्यथा फूत्कारदीनां नानात्वेन "एका क्रिया" इति भाष्यकारीयव्यवहारो नोपपद्यत एवेति भावः। हरिकारिकायां - क्रमजन्मनाम् क्रमेण पौर्वापर्येण जन्म उत्पत्तिर्येषां तेषां व्यापाराणां समूहः क्रियेति व्यवह्रियते, समूहस्य विशेषणं - [गुणभूतैरवयवैरिति] समूहं प्रति गुणभूतैरवयवैर्युक्त इत्यर्थः। एकत्वव्यवहारप्रयोजकं विशेषणं - [बुद्ध्येति] अभेदः एकत्वम्। आरोपितावच्छेदकबुद्धिगतैकत्ववानित्यर्थः।

धात्वर्थं निरूप्य तिङर्थमाह - आश्रये त्विति।। फलाश्रये व्यापाराश्रये चेत्यर्थः। फलाश्रयः कर्म, व्यापाराश्रयः कर्ता। तत्र फलव्यापारयोर्धातुलभ्यत्वान्न तिङस्तदंशे शक्तिः, अन्यलभ्यत्वात्। शक्यतावच्छेदकं चाश्रयत्वं तत्तच्छक्तिविशेषरूपमिति सुबर्थनिर्णये वक्ष्यते।

नन्वनयोराख्यातार्थत्वे किं मानम्। प्रतीतेर्लक्षणया आक्षेपात्, प्रथमान्तपदाद्वा सम्भवादिति चेत्। अत्रोच्यते - "लः कर्मणि च भावे चाकर्मकेभ्यः" इति सूत्रमेव मानम्। अत्र हि चकारात् "कर्तरि कृत्" इति सूत्रोक्तं कर्तरीत्यनुकृष्यते। बोधकतारूपां तिबादिशक्तिं तत्स्थानित्वेन कल्पिते लकारे प्रकल्प्य लकाराः कर्मणि कर्तरि चानेन विधीयन्ते। नकारविसर्गादिनिष्ठां कर्मकरणादिबोधकताशक्तिमादाय

शसादिविधानवत्। न च सूत्रे कर्तृकर्मपदे कर्तृत्वकर्मत्वपरे। तथा च कर्तृत्वं कृतिः, कर्मत्वं च फलमेवार्थोस्त्विति शङ्क्यम्। फलव्यापारयो र्धातुलभ्यत्वेन लकारस्य पुनस्तत्र शक्तिकल्पनाऽयोगात्।

धात्वर्थनिरूपणान्तरमवसरसङ्गत्या तिङर्थनिरूपणमित्याह [धात्वर्थं निरूप्येति] "कृतिमतः कर्तृत्वेन तत्र शक्तावनन्तकृतीनां शक्यतावच्छेदकत्वे गौरवापत्तिः" इति नैयायिकाद्युक्तमस्मन्मताज्ञानादिति ध्वनयन् स्वमतमाह - मूले - [आश्रये त्विति] तुशब्दो भिन्नक्रमः, तिङ इत्यस्मादनन्तरं योज्यः। तिङस्तु आश्रये वाचकत्वेन स्मृता इत्यर्थः। आश्रयस्याधेयसाकाङ्क्षत्वादाह [फलाश्रय इति] "कर्तुरीप्सिततमं कर्म" इति शास्त्रादाह [फलाश्रयः कर्मेति] "स्वतन्त्रः कर्ता" इति सूत्रादाह [व्यापाराश्रयः कर्तेति] नन्वेवं कृतिफलयोः शक्यतावच्छेदकत्वे गौरवापत्तिरत आह [तत्रेति] कर्तृकर्मशरीरघटकयोरित्यर्थः। तदंशे = फलव्यापारांशे। "अनन्यलभ्यः शब्दार्थः" इति न्यायादाह [अन्येति] धातुलभ्यत्वादित्यर्थः। नैयायिकोक्तगौरवदूषणस्य नावकाश इत्याह [शक्यतेति] [तत्तच्छक्तीति] कर्तृत्वकर्मत्वशक्तीत्यर्थः। तच्चाश्रयत्वमेव। तथाच कृतेः शक्यतावच्छेदकत्वाभावान्न गौरवमित्याशयः। सुबर्थनिर्णये = द्वितीयार्थनिरूपणावसरे। तच्चाश्रयत्वमखण्डोपाधिरूपमित्यस्मन्मत एव लाघवमिति भावः।

एवं परोद्भावितं शक्यतावच्छेदकगौरवरूपं बाधकमुद्धृत्य प्रथमान्तपदादेव कर्तृप्रतीतिसम्भवेनान्यलभ्यतया तत्र शक्तिकल्पनायोगात्कृतावेव तिङां शक्तिः स्वीकार्येति वदतां नैयायिकानां, भावनया कर्तुराक्षेपलभ्यत्वं वदतां मीमांसकानां च मतं दूषयितुं, स्वमतं मुनिसम्मतमिति दर्शयितुं चाशङ्कते [नन्विति] अनयोः आश्रयत्वेन रूपेण भासमानयोः कर्तृकर्मणोः। ननु गवाद्यर्थप्रतीतिर्गवादिपदानां तत्तदर्थशक्तिकल्पनायामिव पचतीत्युक्ते जायमाना कर्त्रादिप्रतीतिरेवाख्यातस्य तत्र शक्तिकल्पनायां मानं भवितुमर्हतीत्याशङ्क्य तत्प्रतीतेरप्यन्यथासिद्धतया न तस्याः शक्तिनियामकत्वमित्याह [प्रतीतेरिति] कर्त्रादिप्रतीतेरित्यर्थः। अस्य 'सम्भवात्' इत्यत्रान्वयः। ननु कैरुपायैः प्रतीतिः सम्भवतीत्यत आह [लक्षणयेत्यादि] तथा च लक्षणया आक्षेत्पात्प्रथमान्तपदाद्वेति त्रिभिरुपायैः कर्तृकर्मविषयिणी प्रतीतिः सम्भवतीति किमर्थं तत्र तिङां शक्तिरित्याशयः। अयमर्थः लाघवादाख्यातस्य कृतावेव शक्तिः, कर्तरि लक्षणा। न च कर्तरि लक्षणास्वीकारे मानाभाव इति वाच्यम्। पचतीत्युक्ते कीदृग्विध इति जायमानप्रश्नस्यैव मानत्वात्। नहि धर्मिज्ञानं विना धर्मविशेषप्रश्नो युज्यते। अतस्तादृशप्रश्नोपपादकधर्मिज्ञानार्थमाश्रयज्ञानमावश्यकम्। न च तन्मानसमेवास्त्विति वाच्यम्।

कर्तर्याख्यातार्थसङ्ख्यान्वयानुपपत्तेः। "नहि शाब्दमशाब्देनान्वेति" इति न्यायात्। पचतीत्येतावन्मात्रोक्तौ कर्तर्येकत्वसंशयापत्तेश्च। पचतीति पाचक इति कृदर्थविवरणाच्च। अतस्तत्र लक्षणैवोपगन्तव्येति। अत्र पक्षे वृत्तिद्वयकल्पनायां गौरवादाह [आक्षेपादिति] अयमाशयः - आख्यातवाच्या भावनैव। सा च कर्तारमाश्रयं विनाऽनुपपन्ना तामाक्षिपति। न च घटपदात्समवायेनोपस्थिताकाशस्य घटपदजन्यशाब्दबोधे भानवारणाय "शब्दोपस्थितपदार्थस्यैव शाब्दे भानम्" इति व्युत्पत्तेरवश्याश्रयणीयतया तद्विरोधाद्भावनाक्षिप्तकर्तुः कथं शाब्दबोधविषयत्वमिति वाच्यम्। आख्यातार्थभावनया कर्तृवाचकपदस्यैवाक्षेपात्, अनुपपत्तेस्तुल्यत्वात्। अर्थाक्षेपकस्यैव शब्दाक्षेपकत्वात्। यदाहुः "सर्वाख्यातेषु कर्त्रादेरिष्टा नैवाभिधेयता। या तु तेभ्यः प्रतीतिः सा संयोगान्तरतो भवेत्" इति। संयुज्यते फलमनेनेति व्युत्पत्त्या संयोगशब्दः कारणपरः। संयोगान्तरतः कारणान्तरादाक्षेपादिति तदर्थः - इति।

नन्विदमयुक्तम्। आख्यातवाच्यभावनायाः शब्दान्तरेण सम्बन्धाभावादाश्रय-बोधकशब्दाक्षेपकत्वासम्भवात्। अर्थेनार्थाक्षेपे तु तस्य शाब्दत्वानुपपत्तिरपरिहता स्यात्। नचाख्यातशब्देन कर्तृबोधकशब्दस्याक्षेपाददोष इति वाच्यम्। स्वार्थप्रतिपादनव्यग्रेणाख्यातशब्देन तादृशशब्दान्तराक्षेपासम्भवादत आह [प्रथमान्तपदादिति] चैत्रस्तण्डुलं पचति, चैत्रेण पच्यते तण्डुल इत्यादौ वैयाकरणमते तिङर्थत्वेनाभिमते कर्तृकर्मणी चैत्रस्तण्डुल इति प्रथमान्तपदाभ्यां प्रतीयेत इति भावः। वस्तुतस्तु पूर्वपूर्वमतेऽस्वरसोद्भावनेन नोत्तरोत्तरमतानुसरणम्। किन्तु तत्तन्मतप्रदर्शनाभिप्रायेण। अतो भाट्टमतानुसारेणाह - लक्षणयेति, प्राभाकरमतेनाह - आक्षेपादिति। नैयायिकमतेनाह - प्रथणान्तपदाद्वेति इति व्याख्येयम्। [लः कर्मणीति] सूत्रे 'ल' इति उच्चारणार्थाकारेण जातौ प्रथमैकवचनान्तम्। "लस्य" इत्येतत्स्वरसात्। "ल एतेषु साधनेषु यथा स्यात्" "यावदत्र लग्रहणम्" इति भाष्याच्च। [सूत्रमेवेति] एवशब्दोऽत्र प्रसिद्ध्यर्थकः। सर्वप्रसिद्धं पाणिनीयं सूत्रं प्रमाणमित्याशयः। ननु 'लः कर्मणि' इति सूत्रे कर्तृपदाभावात्कथं तत् कर्तुराख्यातार्थत्वे मानं स्यादत आह [अत्रेति] लः कर्मणीति सूत्र इत्यर्थः। [चकारादिति] लः कर्मणि चेति वाक्यं चकारार्थं विना न निष्पद्यत इति तेन तदनुवृत्तिरावश्यकी। यमर्थमादाय वाक्यार्थो निष्पद्यते स एव वाच्य इति कर्तुराख्यातवाच्यत्वं सूत्रलभ्यमेवेति भावः। अनुवृत्त्यर्थकचकारप्रत्याख्यानपरभाष्यमते तु अन्यत्रेवात्रापि स्वरितत्वप्रतिज्ञया तदनुवृत्तिः सिद्ध्यतीति बोध्यम्। नन्वनेन सूत्रेण लकाराणां धर्मिवाचकत्वं बोध्यते, न तिङाम्। अतो नेदं सूत्रं प्रकृतार्थसाधकम्। प्रत्युत "आश्रये तु तिङः स्मृताः" इति कारिकाभागः सूत्रविरुद्धः स्यादत आह [बोधकतेति] बोधकता शक्तिरिति शक्तिनिर्णये वक्ष्यते। तिबादिशक्तिं = तन्निष्ठां

शक्तिम्। तत्स्थानित्वेन = तिबादिस्थानित्वेन। कल्पिते = लाघवेन प्रक्रियानिर्वाहाय कल्पिते। प्रकल्प्य = आरोप्य। [कर्मणि कर्तरि चेति] लः कर्मणि चेति सूत्रे वाक्यद्वयं स्वीकार्यम्। लः कर्मणि चेत्येकं, भावे चाकर्मकेभ्य इति द्वितीयम्। आद्यं सकर्मकधातुविषयकम्। द्वितीयमकर्मकधातुविषयकम्। उभयत्रापि चकारेण कर्तरीत्यनुकृष्यते। तथा च लकाराः सकर्मकेभ्यः कर्मणि कर्तरि च स्युरकर्मकेभ्यो भावे कर्तरि चेति तत्सूत्रार्थः सिद्ध्यति। एवं च कर्तृकर्मणोस्तिङर्थत्वे तत्सूत्रं प्रमाणमिति भावः। ननु लकाराणां वास्तविक - कर्त्रादिबोधकत्वमेवास्तु। किमारोपितार्थबोधकत्वकल्पनेनेत्यतस्तत्र योग्यं दृष्टान्तमाह - [नकारेति] रामान्, रामैरित्यादौ नकारविसर्गादिभिरेव कर्मकरणाद्यर्थः प्रतीयते, नतु शस्भिसादिभिः, प्रयोगे तेषामश्रुतत्वात्। अतस्तत्रादेशेष्वेव कर्माद्यर्थबोधकत्वमस्तीत्यङ्गीकार्यम्। तथाचादेशनिष्ठार्थबोधकत्वं स्थानिष्वारोप्य शसादिर्विधीयत इत्यनिच्छतापि स्वीकार्यम्। आदेशैः स्मृतानां स्थानिनामेव वाचकत्वमिति पक्षस्तु स्फोटनिर्णये ग्रन्थकृता दूषयिष्यते। प्रकृतेऽपि सैव सरणिः। एवंच न केवलं लकारस्थल एव काल्पनिकार्थवत्त्वस्वीकारः, किन्तु स्थान्यादेशस्थले सर्वत्रापीति भावः।

लाघवैकशरणो नैयायिकश्शङ्कते [नचेति] अस्य "शङ्क्य" मित्यत्रान्वयः। [कर्तृकर्मपदे इति] द्विवचनान्तमिदम्। सूत्रे श्रुतं कर्मपदम् अनुवृत्तं कर्तृपदं चेत्यर्थः। [कर्तृत्वकर्मत्वपरे इति] अयं भावः - कर्तरि शक्तावनन्तकृतीनां शक्यतावच्छेदकत्वेऽननुगमः। तासां कृतित्वेनानुगमे च गौरवम्। अतः कृतावाख्यातस्य शक्तिः स्वीकार्या। कृतित्वं च जातिरूपं शक्यतावच्छेदकम्। तथाच वैयाकरणमते यच्छक्यतावच्छेदकतावच्छेदकं कृतित्वं तदस्माकं मते शक्यतावच्छेदकमेवेति लाघवं स्पष्टमेव। एतादृशलाघवानुरोधात् "लः कर्मणि" इत्यत्र कर्तृकर्मपदयोः "द्व्येकयोर्द्विवचनैकवचने" इति सूत्रे द्व्येकयोरिति पदस्येव भावप्रधाननिर्देशपरत्वमाश्रयणीयम्। निरुक्तरीत्याऽऽश्रयमात्रस्य शक्यतयाश्रयत्वस्याखण्डोपाधिरूपस्य शक्यतावच्छेदकतया न गौरवमिति न वक्तुं शक्यम्। एवमपि "लः कर्मणि च" इति सूत्रविरोधस्य दुष्परिहरत्वात्। न च सूत्रे कर्तृकर्मपदयोराश्रयमात्रार्थकत्वाददोष इति वाच्यम्। तथासति "स्वतन्त्रः कर्ता" इति सूत्रकृत्परिभाषाया वैयर्थ्यापत्तेः। स्वशास्त्रे यत्र कर्तृपदप्रयोगस्तत्रायमेवार्थो ग्राह्य इति ज्ञापयितुमेव परिभाषादरात्। स्वातन्त्र्यं च व्यापारान्तरानधीनव्यापारवत्त्वं, तच्च गुरुभूतमेव। इत्थं च "फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः" इति कारिकापि सूत्रविरुद्धैव। किं च कर्तृपदस्य लक्षणयैवाश्रयार्थकत्वं वाच्यम्। कृतिमत एव तस्य मुख्यार्थत्वात्। तथा च तदपेक्षया निरुक्तरीत्या कृतिपरत्वकल्पनमेव युक्तम्। क्रियाश्रयत्वस्याखण्डोपाधि-

रूपत्वे मानाभावः। आधारतारूपस्य तस्य स्वरूपसम्बन्धरूपत्वेनाननुगतत्वं चेति। विवक्षितमाह [तथाचेति] तयोस्तत्परत्वे चेत्यर्थः। [कर्तृत्वं कृतिरिति] व्यपेक्षावादिनां मते कर्तृपदजन्यबोधे कृतेरेव प्रकारतया भानेन तस्या एव तदुत्तरभावप्रत्ययार्थत्वमिति भावः। अर्थः =लः कर्मणीत्यादिसूत्रस्य। [शक्तिकल्पनायोगादिति] फलव्यापारयोर्धातुलभ्यतया व्यापारमध्ये कृतेरपि प्रविष्टतया धातुलभ्यत्वान्न तत्र तिङां शक्तिः। "अनन्यलभ्यः शब्दार्थः" इति न्यायात्। तथा च धातूपात्तव्यापाराश्रयस्यैव कर्तृत्वेन तद्घटकव्यापारांशस्य धातुत एव लाभादाश्रयमात्रस्यैव कर्तृपदार्थतया तत्रैव लविधिः पर्यवस्यति। "द्व्येकयोः" इत्यादिसूत्रे बहुवचनापत्तिभिया धर्मपरत्वस्वीकारेऽपि "लः कर्मणि" इत्यत्र तत्परत्वे मानाभावः। "स्वतन्त्रः कर्ता" इत्यत्रापि आश्रयमात्रमेव परिभाष्यते। स्फुटीभविष्यति चेदं सुबर्थनिर्णय इति बोध्यम्।

(मण्डनमिश्रमतखण्डनम्)

अथ दर्शनान्तरीयरीत्या व्यापारस्य धात्वर्थत्वाभावात्तत्र लकारविधिः स्यादिति चेत् तर्हि कृतामपि कर्तृकर्मादिवाचित्वं न सिद्ध्येत्। "कर्तरि कृत्" इति च "लः कर्मणि" इत्यनेन तुल्ययोगक्षेमम्।

(खण्डदेवमतखण्डनम्)

अपिच मीमांसकानां कृतामिवाख्यातानामपि कर्तृवाचित्वमस्तु। भावनाया एवाऽऽक्षेपेण कृदादिवत्प्रतीतिसम्भवे वाच्यत्वं माऽस्तु। तथासति प्राधान्यं तस्या न स्यादिति चेन्न। घटमानयेत्यादावाक्षिप्तव्यक्तेरपि प्राधान्यवदुपपत्तेः। पचतीत्यादौ 'पाकं करोति' इति भावनाया विवरणदर्शनाद्वाच्यत्वमिति चेत्, पाकानुकूलव्यापारवतः कर्तुरपि विवरणविषयत्वाविशेषात्। नच कर्तुर्विवरणं तात्पर्यार्थविवरणं पाकं करोतीत्यशब्दार्थकर्मत्वविवरणवद्, इतरेतरयोगद्वन्द्वे समुच्चयांशविवरणवद्वा, न तदर्थनिर्णायकमिति वाच्यम्। भावनायामपि तुल्यत्वात्।

लः कर्मणीत्यत्र कर्तृपदस्य धर्मपरत्वस्वीकारो युज्यत एव। मण्डनमिश्रमते व्यापारस्य धात्ववाच्यत्वेनान्यलभ्यत्वाभावात्तत्र लकारविधिः स्यादित्याशयेन शङ्कते - [अथेति] [दर्शनान्तरीयरीत्येति] मण्डनमतरीत्येत्यर्थः। [व्यापारस्येति] अत्र पञ्चोलिनः - "आख्यात-वाच्यस्येत्यर्थः। एतेन कस्यचिन्मीमांसकस्य मते व्यापारस्य धात्वर्थत्वेऽपि 'धात्वर्थत्वाभावात्' इत्युक्तिरसङ्गतेत्यपास्तम्। आख्यातार्थव्यापारस्य तन्मतेऽपि धात्वर्थभिन्नत्वादिति वदन्ति। व्यापारस्य धात्वर्थत्वेऽपि

तदनुकूलकृतिरूपयत्नस्य धात्ववाच्यत्वमिति तद्भावः स्यात्। परन्तु "व्यापारस्य धात्वर्थत्वाभावात्" इति ग्रन्थाक्षरस्वारस्यभङ्गापत्तिः। अतो मण्डनमिश्रमतावलम्बनेनैष ग्रन्थः प्रवृत्त इति वक्तुं युक्तम्। "विक्लित्त्यादिफलमात्रं धात्वर्थः। फूत्कारादिः सर्वोऽपि व्यापार आख्यातार्थ" इति तन्मतम्। अत एव "व्यापारस्य धात्वर्थत्वाभावात्" इति मूलं स्वरसतः सङ्गच्छते। यदपि पञ्चोलिनः - यद्वा फलमात्रं धात्वर्थः। फूत्कारादिव्यापार एवाख्यातार्थ इति भाट्टरहस्यमताभिप्रायेण "व्यापारस्य धात्वर्थत्वाभावात्" इत्युक्तिरिति। तदपि न। "फलमेव धात्वर्थः, फूत्कारादिव्यापारः सर्वोऽपि प्रत्ययार्थः" इत्यस्य "तत्र मण्डनमिश्रास्तावत्" इत्यादिना भाट्टरहस्ये मण्डनमतत्वेन प्रतिपादितत्वात्। 'फलानुकूलव्यापारो धात्वर्थः, तदनुकूला कृतिरूपा भावनाऽऽख्यातार्थः' इत्यस्यैव खण्डदेवेन स्वमतत्वेन भाट्टरहस्ये, भावार्थाधिकरणे मीमांसाकौस्तुभे च प्रदर्शितत्वाच्च। नव्यनैयायिकमतात् खण्डदेवमतस्य किं वैलक्षण्यमिति चेत्, वाक्ये आख्यातार्थकृतिरूपभावनाया मुख्यविशेष्यत्वं खण्डदेवमते, नैयायिकमते तु तस्या अन्याविशेषणीभूतप्रथमान्तार्थे आश्रयतासम्बन्धेन विशेषणत्वमिति गृहाण। तत्र अनन्यलभ्ये व्यापारे। [स्यादिति] तथा च "लः कर्मणि" इत्यादिसूत्रं कर्तृकर्मणोराख्यातार्थत्वे न मानमित्याशयः। प्रतिबन्द्या समाधत्ते [तर्हीति] [कृतामिति] पाचकः पक्वः, स्नानीयं चूर्णं, दानीयो विप्रः, उपाध्यायः, गोदोहनी स्थालीत्यादौ ण्वुल्निष्ठाप्रभृतीनां कृत्प्रत्ययानामित्यर्थः। [कर्त्रिति] पाचक इत्यादौ। [कर्मेति] पक्व इत्यादौ। आदिपदेन स्नानीयमित्यादौ करणसंप्रदानापादानाधिकरणानां ग्रहणम्। [न सिद्ध्येदिति] "लः कर्मणि च" इत्यादिसूत्र इव कृत्प्रकरणेऽपि कर्तृकर्मकरणादिपदानामपि भावप्रधाननिर्देशपरतया कर्तृत्वकर्मत्वादिपरतया ण्वुल्निष्ठाल्युड्घञादीनामपि कर्तृकर्मादिधर्मिवाचकत्वं न सिद्ध्येदित्यर्थः। तथाच तिङां कृतिरूपधर्मवाचकत्वं, ण्वुलादिकृत्प्रत्ययानां कर्त्रादिधर्मिवाचकत्वमिति त्वदीयव्यवस्थाया अनुपपत्तिरेव, कृत्तिङोर्वैषम्यस्याऽसिद्धेः। मन्मते तु कृत्तिङोरुभयोरपि धर्मिवाचकत्वमेवेति न काचिदनुपपत्तिरिति तात्पर्यम्। ननु "कर्तरि कृत्" इत्यादिशास्त्रेषु कर्त्रादिपदानां धर्मिवाचकत्वा-श्रयणान्नास्माकमनुपपत्तिरित्यत आह [कर्तरि कृदिति चेति] अयं भावः - "कर्तरि कृत्" इति सूत्रे कर्तृपदस्य धर्मिबोधकत्वे तत्सूत्रादेव 'लः कर्मणि' इत्यत्र कर्तृपदस्यानुवृत्ततयात्रापि धर्मिबोधकत्वमेव लभ्यते, अर्थाधिकारात्। "लः कर्मणि" इत्यत्रानुवृत्तस्य तस्य धर्मपरत्वं यदि स्वीक्रियते, तर्हि अर्थाधिकारानुरोधात् 'कर्तरि कृत्' इत्यत्रापि धर्मबोधकत्वमेव स्यात्, वैषम्यं तु दुरुपपादं, बीजाभावादिति। तदेतदाह [तुल्ययोगक्षेममिति] अलब्धलाभो योगः, लब्धस्य रक्षणं क्षेमम्। कर्तृपदस्य शक्त्या व्यापाराश्रयरूपोऽर्थो लब्ध आसीत्। तद्रक्षणरूपं क्षेमं यदि

"कर्तरि कृत्" इत्यत्र परिपाल्यते तर्हि "लः कर्मणि" इत्यत्रापि तदेव न्याय्यम्। कर्तृपदेन लब्धः कर्तृत्वरूपोऽर्थः, तल्लाभरूपो योगो यदि "लः कर्मणि" इत्यत्राऽऽश्रीयते, तर्हि "कर्तरि कृत्" इत्यत्राप्याश्रीयत एव। 'कर्तरि कृत्' इत्यत्र क्षेमस्य 'लः कर्मणि' इत्यत्र योगस्य चाऽऽश्रयणं निर्बीजमेवेति तदीयव्यवस्थानुपपत्तितादवस्थ्यमेवेत्याशयः।

ननु शास्त्रे क्वचिच्छब्दाधिकारोऽप्याश्रीयत एव। यथा - "प्रथमानिर्दिष्टं समास उपसर्जनम्" इत्यत्र समासशब्दस्तद्विधायकशास्त्रपरः। स एव "एकविभक्ति चापूर्वनिपाते" इत्यत्रानुवर्त्यमानः समासार्थविग्रहपरः संपद्यते। तद्वत्प्रकृतेऽपि शब्दाधिकाराश्रयणादिष्टार्थसिद्धिरिति चेन्न। तिङ्स्थले लकारेण कर्तुरवाच्यत्वे पचमान इत्यादौ लादेशे कृत्प्रत्ययेऽपि कर्तुर्वाच्यत्वानापत्तेः। युक्तेस्तुल्यत्वात्। लकारस्य वाचकस्योभयत्रैकत्वात्। न च शानजादौ "कर्तरि कृत्" इत्यस्य प्रवृत्त्येष्टसिद्धिरिति वाच्यम्। तत्र तस्याप्रवृत्तेः, स्थान्यर्थेन शानजादीनां नैराकाङ्क्ष्यात्। अन्यथा तस्य भावे घञादावपि प्रवृत्त्यापत्तेरिति दिक्।

अत्र खण्डदेवादयो मीमांसकाः - यत्रैकस्मादेव पदादनेकार्थप्रतीतिस्तत्रानेकशक्तिकल्पनायां गौरवादेकत्रैवार्थे शक्तिरपरत्र लक्षणेत्यवश्यमभ्युपगन्तव्यम्। तत्र कुत्रार्थे शक्तिः, कुत्र वा लक्षणा स्वीकार्येत्यत्र नियामकापेक्षायां लोके वेदे च प्रधानस्य गुणभूतार्थाक्षेपकत्वदर्शनात्प्रधानार्थे शक्तिस्तदपेक्षिते गुणभूते लक्षणेति स्वीकार्यम्। एवंच प्राधान्यमेव शक्तिनियामकमिति पर्यवस्यति। एवं स्थिते पचति पच्यत इत्यादितः कर्तृकर्मसङ्ख्याकाल-भावनारूपनानार्थप्रतीतौ "भावप्रधानमाख्यातम्" इति निरुक्तस्मृत्या भावनायाः प्राधान्यावगमात्तस्या एव तिङि वाच्यत्वं, तदपेक्षितयोर्गुणभूतयोः कर्तृकर्मणोस्तल्लक्ष्यत्वमिति आख्यातस्य भावनावाचकत्वं युज्यते। यत्र तु न तदाक्षेपकत्वशक्तिर्यथाऽऽख्याते एकत्वादौ तत्रानेकशक्तिकल्पनापि न दुष्यति। पाचकः, पक्व इत्यादौ कृदन्ते तु कृतिकर्तृकर्मादिरूपानेकार्थप्रतीतौ "सत्त्वप्रधानानि नामानि" इति स्मृत्या सत्त्वभूतस्य कर्त्रादेः प्राधान्यावगमात्तस्य वाच्यत्वम्। तदपेक्षिताया गुणभूताया भावनायास्तल्लक्ष्यत्वमिति कृतां कर्त्रादिवाचित्वं युज्यते। यदि तु तिङन्ते कृदन्त इव कर्तृकर्मणोरेव प्राधान्यं स्मर्येत तातस्तयोरेव तिङ्वाच्यत्वापत्तेर्भावनाया गुणभूतायास्तदपेक्षितायास्तल्लक्ष्यत्वात्तिङ्वाच्यत्वं न युज्येत। नैतदेवम्। भावनाया एव प्राधान्यस्मरणात्। एवं च निरुक्त प्रामाणिकव्यवस्थानुरोधेन कृत्तिङोर्वैषम्यं सूपपादमेवेति तदुपपत्तये "कर्तरि कृत्" इत्यत्र कर्तृपदस्य धर्मिवाचकत्वमनुवृत्तस्य तस्य धर्मवाचकत्वं च सूपपन्नमेवेति वदन्ति, तान्निराचष्टे - [अपि चेति] दर्पणकारास्तु - पूर्वसूत्रस्थकर्तृपदस्य धर्मिपरत्वेऽप्यत्रानुवृत्तस्य शब्दाधिकाराश्रयणेन

धर्मपरत्वसम्भवान्नोक्तदोषावकाशः। यदि च शब्दाधिकाराश्रयणं सत्येव गमके, प्रकृते च तदाश्रयणे मानाभाव इति विभाव्यते तदापि "शक्तिः कारकं, शक्तिमत्कारकम्" इति पक्षद्वयस्याप्याकरसिद्धतया तद्विकल्पस्य कृत्तिङोर्व्यवस्थितत्वाश्रयणादर्थाधिकाराश्रयणेऽपि अभिमतार्थलाभोऽक्षत एवेत्यत आह - अपि चेति। तथाच विकल्पव्यवस्थाया एवाप्रामाणिकत्वेनैकार्थपरतैव न्याय्येति भाव इति व्याचक्षते। तन्न। तदुपवर्णिताशयस्य प्रकृतग्रन्थे लेशतोऽप्यदर्शनात्। किञ्च "शक्तिः कारकम्" इति पक्षेऽपि शक्तिशक्तिमतोरभेदेनैव भानेन तिङामपि शक्तिमद्वाचकत्वस्यैव लाभेन त्वदुक्तरीत्या मीमांसकमते कृत्तिङोर्वैषम्यस्यालाभेनावतरणस्यासङ्गतत्वाच्चेत्यलम्।

[मीमांसकानामिति] अस्य मत इति शेषः। सर्वसम्मतत्वादाह [कृतामिवेति] कर्तृवाचित्वं कर्त्रादिवाचित्वम्। आदिना कर्मणो ग्रहणम्। तर्हि भावनाप्रतीतिः कथमत आह - [भावनाया एवेति] एवशब्देन कर्तृव्यवच्छेदः। [आक्षेपेणेति] लक्षणयेत्यर्थः। अत एवाख्यातार्थसङ्ख्यादीनामिव भावनाया अपि तज्जन्यबोधविषयत्वसिद्धिरिति बोध्यम्। कृदादिवत् सप्तम्यन्ताद्वतिः। [मास्त्विति] मीमांसकप्रदर्शितव्यवस्थाया अयुक्ततया वैपरीत्यमेव कुतो न स्यादित्याशयः। 'योऽर्थः प्रधानं तस्यैव वाच्यत्वमप्रधानस्य तु लक्ष्यत्वमेव' इति नियमं मीमांसको मनसि निधाय शङ्कते - [तथासतीति] आक्षेपलभ्यत्व इत्यर्थः। तस्याः लक्ष्याया भावनायाः। [न स्यादिति] "भावप्रधानमाख्यातम्" इति निरुक्तसिद्धं भावनायाः प्राधान्यं तस्या लक्ष्यत्वे नोपपद्यत इति तदुपपादनाय तस्या वाच्यत्वं स्वीकार्यं, न लक्ष्यत्वमिति शङ्कितुराशयः। प्राधान्यस्यैव शक्तिनियामकत्वे मीमांसकानामाकृत्यधिकरणं विरुणद्धीत्याशयेन समाधत्ते वैयाकरणः [घटमानयेत्यादाविति] [आक्षिप्तव्यक्तेरिति] मीमांसका हि घटादिपदानां लाघवाज्ञातौ शक्तिं नयनाद्यन्वयोपपत्तये व्यक्तौ लक्षणां व्यक्तेरेव लक्ष्यायाः प्राधान्यं चाऽऽकृत्यधिकरणे प्रत्यपीपदन्। तदेतदाह [प्राधान्यवदिति] [उपपत्तेरिति] वाच्येन कर्त्रा लक्षितभावनाया अपि प्राधान्योपपत्तेरित्यर्थः। एवं च लक्ष्याया अपि व्यक्तेः प्राधान्यस्य तव मते सत्त्वेन प्राधान्यानुरोधेन शक्तिकल्पनाऽयुक्ता। अन्यथा प्राधान्यानुरोधेन भावनाया वाच्यत्वाभ्युपगमे घटमानयेत्यादौ व्यक्तेरेव प्राधान्यानुरोधाद्वाच्यत्वापत्तावाकृत्यधिकरणोच्छेद इति भावः। स्पष्टं चेदं भूषणे। न चाख्याते कर्त्रादिना भावनाया आक्षेपो न युक्तः। कर्तृस्वरूपनिरूपकत्वेन साऽऽक्षिप्यत इति वाच्यसिद्ध्यङ्गत्वेन तस्या गुणभावस्य दुर्वारत्वात्। जात्या तु व्यक्तेराक्षेपो युक्तः। लोके परिच्छेद्यतयाऽवगता व्यक्तिस्तयैव जात्याऽऽक्षिप्यत इति न व्यक्तेर्गौणत्वमिति वाच्यम्। एतादृशविशेषस्याप्रयोजकत्वेन गुणत्वादावनियामकत्वात्। चैत्रः पचतीत्यादौ कर्तुरपि परिच्छेद्यतयाऽवगतत्वेन त्वद्रीत्या

जात्याक्षिप्तव्यक्तेरिव तस्य विशेष्यत्वापत्तेश्च। इदमपि स्पष्टं भूषणे। एवं च प्राधान्यस्यैव शक्तिनियामकत्वाश्रयणे आकृत्यधिकरणविरोधस्तस्य तदनियामकत्वे कृत्तिङोर्वैषम्यासिद्धिरिति सेयमुभयतस्पाशा रज्जुरित्याशयः।

मीमांसकः प्रकरान्तरेण पर्यनुयुङ्क्ते - [पचतीत्यादाविति] [पाकं करोतीति] पचतीत्यस्य पाकं करोतीति विवरणमिति सर्वसम्मतम्। तत्र पाकमिति धात्वर्थविवरणं, करोतीति तिङर्थविवरणम्। करोतिश्च भावनार्थकः। एवं च भावनार्थककरोतिनाऽऽख्यातविवरणाद्भावनायास्तदर्थत्वम्। एवं पाचक इत्यादेः पाककर्तेत्यादिविवरणात्कृतां कर्तृवाचकत्वमित्यतो वैषम्यं कृत्तिङोः सूपपादमेवेति शङ्कितुर्मीमांसकस्याशयः। येन विवरणेन 'पाकं करोति' इत्येवंरूपेण भावनायास्तिङ्वाच्यत्वं त्वमभिप्रैषि, तेनैव विवरणेन कर्तुरपि तिङ्वाच्यत्वं लभ्यत एवेत्याशयेन शाब्दिकः समाधत्ते [पाकानुकूलेत्यादिना] करोतीतिविवरणे कृञा भावनायास्तिङा कर्तुश्चोपपादानाद्विव्रियमाणस्यापि तद्बोधकत्वमिति भावः। तदेतदाह [कर्तुरपि विवरणविषयत्वाऽविशेषादिति] एवं च कर्तुरपि तादृशविवरणविषयत्वेन तादृशविवरणस्य "आख्यातवाच्यत्वं भावनाया एव" इत्यत्र न नियामकत्वमिति तात्पर्यम्। कर्तुरपि विववणविषयत्वादेव पचतीत्युक्ते कः, कीदृश इति प्रश्नो, देवदत्तो घनश्याम इत्युत्तरं च स्वरसतः सङ्गच्छते। निष्कर्षे तु करोतिर्धातोरेव विवरणं न तिङामिति वक्ष्यतीति ज्ञेयम्।

ननु पाकं करोतीति विवरणेन भावनापि विव्रियते, न केवलं कर्तैव। एवं चोभयोरपि विवरणविषयत्वेऽप्युभयोरपि प्राधान्यासम्भवेन "भावप्रधानमाख्यातम्" इति स्मृत्या भावनाया एव प्राधान्यावगमात्तस्या विवरणं शाब्दत्वाभिप्रायेण, अप्रधानस्य कर्तुर्विवरणं त्वर्थाभिप्रायेणेत्यवश्य-मभ्युपेयमित्यस्मत्पक्षसंसिद्धिरेवेत्याशयेन मीमांसकः पुनरपि प्रत्यवतिष्ठते [न चेति] [कर्तुर्विवरणमिति] तिङा कर्तुर्विवरणमित्यर्थः। [तात्पर्यार्थविवरणमिति] 'पचतीत्यतस्तिङर्थभावनाक्षिप्तकर्तृबोधो जायताम्' इतीच्छारूपतात्पर्यविषयीभूतार्थविवरणमित्यर्थः। अस्य "न तदर्थनिर्णायकम्" इत्यत्रान्वयः। कर्तुर्विवरणं नाख्यातशक्यार्थनिर्णायकमिति तदर्थः। अशक्यार्थस्य विवरणे भाने दृष्टान्तमाह - [पाकं करोतीत्यशब्दार्थकर्मत्वविवरणवदिति] पचतीत्यस्य विवरणं पाकं करोतीति। तत्र धात्वर्थः पाकः आख्यातार्थो भावना च विव्रियते। अशब्दार्थोऽपि कर्ता विव्रियते इत्यर्थः। ननु फलस्यापि व्यपदेशिवद्भावेन फलाश्रयत्वेन कर्मत्वात्कर्मप्रत्ययेन तद्विववरणं शब्दार्थविवरणमेवेत्यतो दृष्टान्तान्तरमाह [इतरेतरयोगद्वन्द्व इति] [समुच्चयांशेति] व्यपेक्षावादिनां मते धवखादिरावित्यादौ अशब्दार्थस्यापि समुच्चयांशस्य धवश्च खदिरश्चेति चकारद्वयेन विवरणवदित्यर्थः। समाहारद्वन्द्वे उत्तरपदलक्ष्यसमाहारस्य चशब्देन विवरणात्

"इतरेतरयोगद्वन्द्वे" इत्युपात्तम्। समुच्चयः परस्परनिरपेक्षस्यानेकस्य एकत्रान्वयरूपः अंशः प्रतिपाद्यः यस्य सः समुच्चयांशः चकारः समुच्चयांशवत् चकारार्थवत्, चकारार्थेतरेतरयोगवदित्यर्थः। यथाश्रुते समुच्चयेऽसामर्थ्यात् समासाप्राप्त्या मूलासङ्गतिः स्पष्टैव। चैत्रः पचतीत्यादौ कर्तरि आख्यातार्थसङ्ख्यान्वयानुरोधात् कर्तुर्वाच्यत्वस्यावश्यकत्वेन तेन भावना आक्षिप्यत इति भावनाविवरणमेव तात्पर्यार्थविवरणमित्यपि वक्तुं शक्यम्। न च लक्षिते कर्तरि सङ्ख्यान्वय इति वाच्यम्, विनिगमकाभावात्। आख्याते भावनायाः प्राधान्यं तु घटमानयेत्यादावाक्षिप्तव्यक्तेरिव सेत्स्यतीत्याशयेन वैयाकरणः समाधत्ते [भावनायामपि तुल्यत्वादिति] एवं च भावनाया अवाच्यत्वेन उक्तरीत्या विवरणोपपत्तेस्तस्या मीमांसकमतासाधकतया, लः कर्मणीत्यादिशास्त्रबलादाश्रयस्य तिङर्थत्वं दुर्निवारमिति बोध्यम्।

किञ्च 'पचति देवदत्तः' इत्यत्राऽभेदान्वयदर्शनात्तदनुरोधेन कर्तुर्वाच्यत्वमावश्यकम्, पक्ता देवदत्त इतिवत्। नचाभेदबोधे समानविभक्तिकत्वं नियामकम्, तच्चात्र नास्तीति वाच्यम्। 'सोमेन यजेत' 'स्तोकं पचति' 'राजपुरुषः' इत्यादावप्यभेदबोधानापत्तेः। न च लक्षणया कर्तुरुक्तत्वा-त्सामानाधिकरण्यम्, पिङ्गाक्ष्यादियौगिकानामपि द्रव्यवाचित्वानापत्तेः। एवं वैश्वदेवीत्यादितद्धितानामपि। "अनेकमन्यपदार्थे" "साऽस्य देवता" इत्यनुशासनेन पिङ्गे अक्षिणी यस्या, विश्वेदेवा देवता अस्येति विग्रहदर्शनात्प्रधानषष्ठ्यर्थ एवानुशासनलाभात्। तथाच "अरुणया पिङ्गाक्ष्यैकहायन्या सोमं क्रीणाति" इति वाक्ये द्रव्यानुक्तेरारुण्यस्य स्ववाक्योपात्तद्रव्य एवान्वयप्रतिपादकारुणाधिकरणोच्छेदापत्तिः। द्रव्यवाचकत्वसाधकमूलयुक्तेः सामानाधि-करण्यस्योक्तरीत्योपपत्तेरिति प्रपञ्चितं विस्तरेण बृहद्वैयाकरणभूषणे। तिङ इति - बोधकतारूपा शक्तिस्तिङ्क्ष्वेवेत्यभिप्रायेणेदम्।

ननु लाघवाद्भावना प्रत्ययवाच्या। न तु कर्ता, गौरवात्। तथा सति कृतामपि तथात्वं स्यादिति न शङ्क्यम्। देवदत्तः पक्तेत्यादौ देवदत्तादिनाभेदान्वयबोधस्याऽनुभवसिद्धत्वादित्यत आह - [किञ्चेति] इति काशिकाकाराः, तदनुसारिणः प्रभाकाराश्च।

वस्तुतस्त्वेवमवतरणीयम् - स्यादेतत्। पूर्वोक्तरीत्या प्राधान्यानुरोधेनाख्यातानां भावनावाचकत्वं कृतां च कर्त्रादिवाचकत्वमित्येव युक्तम्। यत्रान्यतरार्थप्राधान्यनियामकमस्ति तत्र प्राधान्यस्यैव शक्तिनियामकत्वम्। यत्र त्वन्यतरार्थप्राधान्यनियामकाभावः तत्राकृत्यधिकरणव्युत्पादित-लाघवस्यैव शक्तिनियामकत्वम्। अतो न घटादिपदप्रतिबन्ध्यपि। तत्र हि जातिव्यक्त्योरन्यतरस्य

प्राधान्यनियामकाभावेन लाघवाज्जातौ शक्तिः, व्यक्तौ लक्षणा च स्वीकार्या। किञ्च घटघटत्वयोरुभयोरप्यर्थयोर्विभक्त्युपात्तसङ्ख्यान्वययोगित्वरूपा सत्त्वताऽस्तीति तत्रोभयोरपि शब्दतः प्राधान्यम्। न च घटत्वविशिष्टो घट इति वैशिष्ट्यावगाह्येकबोधोदयेन तस्य व्यक्तिरूपार्थस्य प्राधान्यनियामकत्वमस्त्विति वाच्यम्। जातिव्यक्त्योरुभयोरपि क्रमिकत्वेन शक्तिलक्षणाजन्यबोधद्वयाङ्गीकारेण वैशिष्ट्यानवगाहनात् तस्य तन्नियामकत्वासम्भवात्। उक्तं चारुणाधिकरणे वार्त्तिककारैः "तृतीयादौ जातेरेव सङ्ख्याकारकान्वयः। अन्यत्र तु लक्षितव्यक्तेः, जातिव्यक्त्योश्च न वैशिष्ट्यावगाह्येको बोधः, किन्तु बोधद्वयं शक्तिलक्षणाजन्यम्" इति। एवं च घटादिपदे जातिव्यक्त्योरन्यतरस्य प्राधान्यनियामकाभावादाकृत्यधिकरणव्युत्पादितलाघवानुरोधेन जातौ शक्तिः, व्यक्तौ लक्षणेति समञ्जसमेव। 'पचति' 'पाचकः' इत्यादौ तु अन्यतरार्थप्राधान्यनियामकयोः "भावप्रधान माख्यातम्" 'सत्त्वप्रधानानि नामानि' इत्यनयोः सत्त्वेन प्राधान्यस्यैव शक्तिनियामकत्वे न किंचिद्बाधकमत आह [किञ्चेति] [अभेदान्वयेति] प्रथमान्तार्थस्य तिङर्थेनाभेदान्वयदर्शनादित्यर्थः। न चेदमसिद्धम्। अन्यस्मिन् पचति सति देवदत्तः पचतीत्यप्रयोगात्, विना हेतुं कर्तृवाच्यत्वभीत्यैवापलापायोगात्। [कर्तुरिति] इदमुपलक्षणं कर्मणोऽपि। 'पच्यते तण्डुलश्चैत्रेण' इत्यादावाख्यातस्य कर्मवाचकत्वं सामानाधिकरण्यादिति बोध्यम्। एवं च पक्ता देवदत्त इत्यादाविव पचति देवदत्त इत्यादावपि "युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः" २-४-१०५ "अस्मद्युत्तमः" १-४-१०७ "शेषे प्रथमः" १-४-१०८ इति सूत्रानुवादबोधितऋष्यनुभवसिद्धसामानाधिकरण्यानुरोधेन तिङां धर्मिवाचित्वमास्थेयमिति भावः। उभयसम्मतत्वेन "पक्ता देवदत्तः" इति दृष्टान्तत्वेनोपात्तम्। दृष्टान्ते कर्तुर्विशेष्यत्वं, दार्ष्टान्तिके विशेषणत्वमिति त्वन्यदेतत्। हेत्वसिद्धिं शङ्कते [नचेति] - समानविभक्तिकत्वं विशेष्यवाचकपदोत्तरविभक्तिसजातीयविभक्तिकत्वं विशेषणवाचकपदस्य नियामकं प्रयोजकम्। विभक्तिसाजात्यं च सुत्वौत्वजस्त्वादिना। तच्च = निरुक्तविभक्तिसाजात्यं च। अत्र = दार्ष्टान्तिके [नास्तीति] देवदत्त इत्यत्र विभक्तिः सुः, पचतीत्यत्र विभक्तिस्तिः। तयोः सुत्वादिसाजात्यं नास्तीत्यर्थः। [सोमेनेति] सोमपदस्य सोमवति लक्षणा, तस्य च धात्वर्थे यागेऽभेदेनान्वयः। सोमवता यागेनेष्टं भावयेदित्यर्थः। [स्तोकं पचतीति] स्तोकपदार्थस्य धात्वर्थेनाभेदान्वयः। [राजपुरुष इति] व्यपेक्षावादिनो मते राजपदं राजसम्बन्धिनि लाक्षणिकं, तस्य च पुरुषेऽभेदेनान्वयः, राजसम्बन्ध्यभिन्नः पुरुष इति बोधः। आद्यस्थलद्वये विभक्त्योः सजातीयत्वाभावप्रयुक्तो विशिष्टाभावः, अन्त्ये विशेष्याभावप्रयुक्तः स इति भेदः। आदिपदेन धान्येन धनीत्यादेर्ग्रहणम् [अभेदबोधानापत्तेरिति] इदमुपलक्षणमतिव्याप्तेरपि।

राज्ञः सुतस्य धनमित्यादौ सत्यपि समानविभक्तिकत्वेऽभेदबोधानुदयात्, भेदान्वयबोधाच्च। अतो न समानविभक्तिकत्वमभेदबोधे तन्त्रं, किन्तु विरुद्धविभक्तिराहित्यम्। तेन न निरुक्तस्थलेषु दोषः। चैत्रः पचतीत्यादौ च सुप्तिङोरविरोधादभेदबोधस्य निष्प्रत्यूहतया तदनुरोधेन तिङां धर्मिवाचकत्वं सेत्स्यति। "युष्मद्युपपदे" इत्यादिसूत्रबोधितं तिङ्सामानाधिकरण्यमेकधर्मिबोधकत्वरूपमेव। तिङर्थाभिन्नार्थत्वं हि तिङ्सामानाधिकरण्यमिति ज्ञेयम्। [न चेति] एकार्थबोधकत्वमेव सामानाधिकरण्यं भवदुक्तरीत्याऽस्तु, परं तु तत् सामानाधिकरण्यं लक्षितेन कर्त्रा भविष्यतीत्याशयः। लाघवात्प्राधान्यानुरोधाच्च भावनायामेवाख्यातस्य शक्तिः, कर्तरि तु लक्षणेति तद्भावः। [सामानाधिकरण्यमिति] तिङर्थेन युष्मदादेरेकधर्मिबोधकत्वरूपं सामानाधिकरण्यमित्यर्थः। भावनारूपेण तिङःशशक्यार्थेन युष्मदादेस्तदसम्भवेऽपि लक्ष्यार्थेन तत्सम्भव इति भावः। समाधत्ते - [पिङ्गाक्ष्यादीति] आदिपदेन एकहायनीत्यादेर्ग्रहणम् [यौगिकानामिति] "योगः प्रकृतिप्रत्ययार्थसम्बन्धः, अवयवनिष्ठवृत्तिर्वा। तेन तथा वा निर्वृत्ता यौगिकाः, तेषामित्यर्थः। 'तेन निर्वृत्तम्' इति 'कि साधु" इति पञ्चोलिनः। तन्न। चतुरर्थ्यन्तर्गतेन "तेन निर्वृत्तम्" (४-१-६८) इति सूत्रेण 'कोऽलाभात्, योगशब्दात्तद्विधायकाभावात्। तत्र "तदस्मिन्नस्तीति देशे तन्नाम्नि" (४-१-६७) इति पूर्वसूत्रात् 'देशे तन्नाम्नि' इत्यस्यानुवृत्तेश्च। न च "प्राग्वतेष्ठञ्" ५-१-१८ इत्यधिकारस्थेन "तेन निर्वृत्तम्" ५-१-७९ इति सूत्रेण 'यौगिक' शब्दसिद्धिरिति वाच्यम्। तेन 'ञो विधानेन ''कि साधु' इत्यस्याऽसङ्गतत्वात्। तत्सूत्रस्य कालाधिकारस्थत्वेन तेन योगशब्दात् 'ञो दुर्लभत्वाच्च। अतो यौगिकशब्दस्य साधुत्वमित्थं संपाद्यम्। योगः = अवयवशक्तिः "योगप्रमाणेच तदभावेऽदर्शनं स्यात्" (१-२-५५) इत्यादौ तथा दर्शनात्। योगं लब्धुं योग्यो भवतीति यौगिकः, "तदर्हति" (५-१-६३) इत्यार्हीयष्ठक्, यद्वा योगादागतः यौगिकः, "तत आगतः" (४-३-७४) इति शैषिकष्ठक्। वस्तुतस्तु योगाय प्रभवति यौगिकः, तस्मै प्रभवतीत्यनुवर्तमाने "योगाद्यच्च" ५-१-१०२ इति चात् 'ञ्।

[द्रव्यवाचित्वानापत्तेरिति] पिङ्गाक्षी गौरित्यादिसामानाधिकरण्यानुरोधेन यौगिकानां द्रव्यवाचित्वमास्थीयते, सामानाधिकरण्यस्य त्वदुक्तरीत्या पचति देवदत्त इत्यादाविव लक्षितेन द्रव्येणोपपन्नतया तद्वाचित्वानापत्तिरिति भावः। इष्टापत्तावरुणाधिकरणविरोध इत्यनुपदमेव वक्ष्यति। एवं गुणाधिकरणसिद्धान्तविरोधोऽपीति प्रतिपादयितुमाह [एवमिति] [वैश्वदेवीति] विश्वे देवा देवता अस्य वैश्वदेवी [इत्यादितद्धितानामिति] इत्यादिघटकतद्धितानामित्यर्थः। अत्रापि द्रव्यवाचित्वानापत्तेरित्यनुषज्यते। प्रत्युत सम्बन्धादिगुणवाचित्व एव साधकमुपलभ्यत इत्याह

[अनेकमन्यपदार्थे इति] [अनुशासनेनेति] अयमनुशासनशब्दः करणल्युडन्तः, अनुशिष्यतेऽनेनेत्यनुशासनं = शास्त्रं, तेन = शास्त्रेणेत्यर्थः। अस्य 'प्रधानषष्ठ्यर्थ एवानुशासनलाभात्' इत्यत्रान्वयः, द्वितीयोऽनुशासनशब्दो भावल्युडन्तः, अनुशिष्टिरनुशासनं साधुत्वमित्यर्थः। पिङ्गे अक्षिणी यस्या इति प्रधानषष्ठ्यर्थ एव समासादेः साधुत्वम्। तथा चारुणाधिकरणवार्त्तिकम् -

बहुव्रीहिः समासोऽयं मतुबर्थे विधीयते।
अस्याऽत्रेति च सम्बन्धे मत्वर्थीयः प्रवर्तते।। इति।।

अत एव सर्वेषां पदानामन्ते विग्रहवाक्ये 'यस्य' इत्यस्य प्रयोगः। तथा च 'अनेकमन्यपदार्थे' इति सूत्रे भाष्यम् - "सर्वपश्चाद्वर्तते अस्येति" इति। नन्वेतदनुशासनेन पिङ्गाक्ष्यादिपदानां द्रव्यवाचित्व एव साधुत्वं लभ्यते, तेन हि पिङ्गयोरक्ष्णोरियं, चित्राणां गवामयमित्यर्थे समासविधानात्, एष एव विग्रहः, वृत्तिविग्रहयोः समानार्थकत्वानुरोधादिति चेन्न। तादृशविग्रहस्य मुनिवचनविरुद्धत्वात्।"शेषो बहुव्रीहिः" त्रिकतः शेषः, कर्तृकर्मवचनेनाप्रथमायाः मत्वर्थे बहुव्रीहिः" इत्यादिवचनैः विग्रहे प्रथमान्तानामेव प्रवेशलाभात्, वृत्तिविग्रहयोस्समानार्थकत्वनियमस्तु विशेषणविशेष्यभावातिरिक्तविषयक इत्यादि विस्तरेण समासशक्तौ वक्ष्यति। तद्ध्वनयन् विग्रहं दर्शयति - [पिङ्गे अक्षिणी यस्या इत्यादिना] इति विग्रहेत्यादेः इत्येव विग्रहस्य शास्त्ररीत्या दर्शनादित्यर्थः। एवं यौगिकानां द्रव्यवाचित्वानापत्तिमुपपाद्य तत्रेष्टापत्तौ बाधकं दर्शयति - [तथाचेति] यौगिकानां द्रव्यवाचित्वानापत्तौ चेत्यर्थः। [इति वाक्य इति] इदं च ज्योतिष्टोमे श्रूयते। तत्र किमरुणिमा वाक्याद्भित्त्वा प्रकरणे सर्वद्रव्येषु निविशते? उत क्रीणातिना सम्बध्य तदङ्गमेकहायन्यां निविशते? इति संशय्य क्रीणातिना सम्बध्यमानस्तृतीयासंयोगात्करणकारकं स्यात्। गुणस्यामूर्तत्वात्क्रयरूपक्रियासाधनत्वासम्भवेन ततः पृथग्भूतोऽविशेषात्प्राकरणिकद्रव्यमात्रे निविशते। अरुणादिशब्दाश्च गुणवचना एवेति एकहायनीपिङ्गाक्षीपदयोर्द्रव्यवाचित्वं सिद्धवत्कृत्याऽऽरुण्यविषय एव पार्थक्येन पूर्वपक्षः कृतः। तयोर्बहुव्रीह्योरपि द्रव्यवाचित्वाभावेन, निरुक्तरीत्या सम्बन्धवाचितया, तस्याप्यमूर्ततया, क्रीणातौ करणत्वासम्भवेन, तदंशेऽपि पूर्वपक्षकरणध्रौव्ये तदकरणात् न्यूनत्वापत्त्या तदसङ्गतिः स्पष्टैव तयोर्द्रव्यवाचित्वाभावे इति बोध्यम्। तत एवं सिद्धान्तः कृतः - 'आरुण्यस्य स्ववाक्योपात्तद्रव्यद्वारा क्रयसाधनत्वम्, तच्च द्रव्यं सन्निहितत्वादेकहायन्येव, एकहायनी च गौरेव क्रमप्राप्तत्वात्, 'गवा ते क्रीणानि' इति मन्त्रलिङ्गात् - इति। पिङ्गाक्ष्येकहायनीत्यादिपदानां द्रव्यवाचित्वाभावेन आरुण्यस्य स्ववाक्योपात्तद्रव्यद्वारकं सम्बन्धकथनं सिद्धान्तोक्तं भज्येत। तदेतदाह [द्रव्यानुक्तेरिति] [उच्छेदापत्तिरिति] पूर्वपक्षसिद्धान्तयोर्निरुक्तरीत्या

निर्दलत्वादिति भावः। ननु एकहायनी गौरित्यादिसामानाधिकरण्यात्तत्सिद्धिरत आह [द्रव्यवाचित्वेति] उक्तरीत्या लक्षणया। अतस्तदधिकरणासांगत्यवारणाय यौगिकानां द्रव्यवाचित्वमावश्यकम्। तथा च मीमांसावार्तिककाराः-

"सर्वत्र यौगिकैः शब्दैः द्रव्यमेवाभिधीयते।
नहि सम्बन्धवाचित्वं सम्भवत्यतिगौरवात्"।। इति।।

एवं च आरुण्यस्य अरुणयेतिपदशक्यार्थस्य गुणरूपस्यारुण्यस्य स्ववाक्यमरुणापदघटितं वाक्यम् "अरुणया पिङ्गाक्ष्या" इत्यादिकम्। तस्मिन् उपात्तं यद्द्रव्यम् = एकहायनीपदशक्यं गोरूपं द्रव्यं, तत्रैवान्वयप्रतिपादकं यद् अरुणाधिकरणं तस्योच्छेदापत्तिरिति मूलार्थः। तत्र हेतुः 'द्रव्यानुक्तेः' इति। विषयः, संदेहः, सङ्गतिः, पूर्वपक्षः, सिद्धान्त इति पञ्चावयवमधिकरणम्। एवं गुणाधिकरणस्थसिद्धान्तस्यापि भङ्गः स्यात्। तत्रहि "तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा, वाजिभ्यो वाजिनम्" इत्यत्र वाजिशब्देन विश्वे देवा अभिधीयन्त इति तदनुवादेन वाजिगुणविधानादुभयरूपमेकमेव कर्मेति पूर्वपक्षे वैश्वदेव्यामिक्षेत्यत्र सम्बन्धस्य वाक्यीयत्वात्, श्रौतस्य प्राबल्यात्, श्रौतद्रव्येण निराकाङ्क्षत्वात् "इश्वदेव्यामिक्षेत्येतद्विहितयागानुवादेन वाजिनगुणविधानं न युज्यते। तस्मादत्र कर्मान्तरविधिः, "वाजिभ्यो वाजिनम्" इत्यनेन चापूर्वदेवताविधानमिति सिद्धान्तितम्। तद्धितस्य द्रव्यानभिधायकत्वे वाजिनामिक्षयोरुभयोरपि वाक्यविनियोज्यत्वसाम्यतादवस्थ्येन तदसङ्गतिः स्पष्टैव। तस्मात्तत्तदधिकरणोच्छेदापत्तेस्तव लक्षणया सामानाधिकरण्योपपादनमसङ्गतमेव। तदेतत्सर्वमभिप्रेत्याह [प्रपञ्चितमिति]

ननु सिद्धान्ते चित्रग्वादियौगिकानां कथं द्रव्यवाचित्वमिति चेदत्राहुः - संसर्गेऽन्यपदार्थे च शक्तिः कल्प्यते। "अनेकमन्यपदार्थे" इति शास्त्रबलात्, चित्रगुरित्यादौ स्वस्वामिभावादिसम्बन्धेन चित्रगोविशिष्टः समासार्थः। अन्ततस्तत्राश्रयः सम्बन्धश्चेत्युभयं समासार्थः। यद्वा संसर्गरूपो विभक्त्यर्थ एव बहुव्रीहिशक्यः, लिङ्गसङ्ख्याकार्यं तु गुणवचनवत् यद्द्रव्याश्रितोऽसौ सम्बन्धस्तल्लिङ्गसङ्ख्याभ्यां तस्य योगाङ्गीकारादुपपद्यते। एवं च समासेनाभिधीयमानः सम्बन्धः सम्बन्धितादात्म्येनैवाभिधीयते। पक्षद्वयमपीदं स्पष्टं भाष्ये। वैश्वदेवीत्यादौ देवताप्रदेययोर्भिन्नैव प्रत्ययस्य शक्तिः। विश्वदेवाभिन्नदेवतासम्बन्धीति बोधः। प्रदेयं च सम्बन्धित्वेनैव प्रत्ययार्थः। आमिक्षादिपदैश्च सम्बन्धित्वेन बुद्धस्यैव प्रदेयस्य विशेषः समर्प्यते। यद्वा देवतात्वं प्रदेयं च प्रत्ययार्थः। तत्र प्रदेये देवतात्वस्य

निरूपकतासम्बन्धेनान्वयः। विश्वदेववृत्तिदेवतात्वनिरूपकमिति बोधः। यद्वा प्रदेयमेव प्रत्ययार्थः। स्ववृत्तिदेवतात्वनिरूपकत्वसम्बन्धेन प्रकृत्यर्थस्य प्रत्ययार्थेऽन्वयः - इति ज्ञेयम्।

ननु 'लः कर्मणि' इत्याद्यनुशासनेन लकाराणामाश्रये शक्तिलाभात् 'आश्रये तु तिङः स्मृताः' इति मूलमयुक्तमत आह [बोधकतारूपेति] बोधकतैव शक्तिरिति शक्तिनिर्णये वक्ष्यति। सा च श्रूयमाणेषु तिङ्क्ष्वेव न लकारेषु। आदेशनिष्ठां शक्तिं लाघवेन प्रक्रियानिर्वाहाय कल्पितेषु लकारेष्वारोप्य "लः कर्मणि" इत्यनुशासनं प्रवृत्तमित्युक्तं प्राक्।

(वाक्यार्थनिरूपणम्)

पदार्थं निरूप्य वाक्यार्थं निरूपयति - फल इत्यादि। विक्लित्त्यादिफलं प्रति। तिङर्थः कर्तृकर्मसङ्ख्याकालाः। तत्र कर्तृकर्मणी फलव्यापारयोर्विशेषणे।

(सङ्ख्यान्वयनिरूपणम्)

सङ्ख्या कर्तृप्रत्यये कर्तरि, कर्मप्रत्यये कर्मणि, समानप्रत्ययोपात्तत्वात्। तथा चाख्यातार्थसङ्ख्याप्रकारकबोधं प्रति आख्यातजन्यकर्तृकर्मोपस्थितिर्हेतुरिति कार्यकारणभावः फलितः।

(सङ्ख्यान्वये न्यायमतखण्डनम्)

नैयायिकादीनामाख्यातार्थसङ्ख्यायाः प्रथमान्तार्थ एवान्वयादाख्यातार्थ-सङ्ख्याप्रकारकबोधे प्रथमान्तपदजन्योपस्थितिर्हेतुति कार्यकारणभावो वाच्यः। सोऽपि 'चन्द्र इव मुखं दृश्यते' 'देवदत्तो भुक्त्वा व्रजति' इत्यादौ चन्द्रक्त्वार्थयोराख्यातार्थानन्वयादितराविशेषणत्वघटित इत्यतिगौरवम्। इदमपि कर्तृकर्मणोराख्यातार्थत्वे मानमिति स्पष्टं भूषणे।

[वाक्यार्थमिति] पदार्थानां परस्परविशेष्यविशेषणभावरूपं वाक्यार्थमित्यर्थः। वैयाकरणमते स एव वाक्यार्थः, यद्यपि विभक्तिप्रकृत्यर्थगतविशेषणत्वमपि विभक्तिशक्यमेव, तथापि विशेष्यनिष्ठमितरपदार्थनिष्ठविशेषणतानिरूपितविशेष्यत्वं वाक्यार्थः। अयमत्र विवेकः - राज्ञः पुरुष इत्यादौ पुरुषत्वनिष्ठप्रकारतानिरूपितपुरुषनिष्ठविशेष्यत्वं पदार्थ एव, राजादिनिष्ठप्रकारतानिरूपित-पुरुषनिष्ठविशेष्यत्वं तु वाक्यार्थः। स्पष्टं चेदमर्थवत्सूत्रस्थभाष्ये।

"फले प्रधानम्" इति मूले सप्तम्या निरूपितत्वमर्थः, तच्च प्रधानपदार्थैकदेशे प्राधान्येऽन्वेति, तथाच फलनिरूपितप्राधान्यवान् व्यापार इति वाच्यार्थः। आर्थमाह [विक्लित्त्यादि फलं प्रतीति] अस्य कर्मकृदसमभिव्याहार इत्यादिः। तेन पक्वस्तण्डुल इत्यादौ व्यापारस्य फलिविशेषणत्वमेव, व्यापारजन्यविक्लित्त्याश्रयाभिन्नस्तण्डुल इति बोधः। "फले प्रधानं व्यापारः" इति मूलमपि तन्त्रेणोभयार्थपरम्। कर्मकृत्प्रत्ययसमभिव्याहारे फलेऽप्रधानं व्यापारः, अन्यत्र तु फले व्यापारः प्रधानमिति तदर्थः। स्पष्टा चेयं रीतिस्तिङर्थवादमञ्जूषाव्याख्याने कलायाम्। [कर्तृकर्मसङ्ख्याकाला इति] अत्र च "लः कर्मणि च भावे चाकर्मकेभ्यः" ३-४-६९ "द्व्येकयोर्द्विवचनैकवचने" १-४-२२ "बहुषु बहुवचनम्" २-४-२२ "वर्तमाने लट्" ३-२-२२३ इत्यादीनि सूत्राणि प्रमाणम्। तत्र तिङर्थकर्त्रादिमध्ये। [कर्तृकर्मणी इति] कर्तृप्रत्यये कर्ता व्यापारे निष्ठत्वसम्बन्धेन, कर्मप्रत्यये कर्म फले च विशेषणमित्यर्थः। सङ्ख्या तिङर्थसङ्ख्या। [कर्तरीति] कर्तरि विशेषणमित्यर्थः। यथा चैत्रः पचतीत्यादौ। कर्मप्रत्यये चैत्रेण पच्यते तण्डुल इत्यादौ। ननु सुबर्थसङ्ख्यायाः प्रकृत्यर्थेऽन्वयदर्शनात्तिङन्तेऽपि तथैव युक्तमत आह - [समानेति] धात्वर्थापेक्षया प्रत्यासत्त्यतिशयसत्त्वाप्रत्ययार्थे धर्मिण्येव प्रत्ययार्थसङ्ख्याया अन्वयो युक्तः। अत एव अनभिहितसूत्रे प्रातिपदिकार्थसूत्र अनुवृत्तमनभिहित इत्यन्यस्याऽसम्भवात्सङ्ख्याया एव विशेषणं स्यात्। तथा च "पचति देवदत्तः" इत्यत्र तिङा सङ्ख्याभिधानात्प्रथमा न स्यादित्यापादितं भाष्ये। "पचतीति कर्तुरेकत्वं तिङाभिहितमिति च कैयटः। परमते गुरुतरकार्यकारणभावकल्पनाप्रयुक्तं गौरवं प्रतिपिपादयिषुः प्रथमं स्वमते लघुभूतं तमाह - [तथाचेति] आख्यातार्थसङ्ख्यायास्तदर्थे धर्मिण्यन्वये चेत्यर्थः। [आख्यातार्थेति] समवायसम्बन्धेनाख्यातार्थसङ्ख्याप्रकारकबोधं प्रति तज्जन्यकर्तृविषयकोपस्थितिः कारणम्। आख्यातार्थसङ्ख्याप्रकारकबोधं प्रति तज्जन्यकर्मोपस्थितिः समवायेन कारणमित्याशयः। आख्यातार्थसङ्ख्याप्रकारकबोधे तिङर्थाश्रयोपस्थितिः कारणमित्येक एव कार्यकारणभाव इति लाघवमिति तत्त्वम्।

नैयायिकमतं दूषयति - [नैयायिकानामिति] [प्रथमान्तार्थ एवेति] स च चैत्रस्तण्डुलं पचतीति कर्त्राख्याते चैत्रः, चैत्रेण तण्डुलः पच्यत इति कर्माख्याते तण्डुलश्च। एवशब्दः सङ्ख्यायास्तिङर्थेऽन्वयासम्भवसूचनार्थः, तन्मते कृतेराख्यातार्थतया तत्र तदन्वयासम्भवः स्पष्ट एव। [अन्वयादिति] आश्रयतासम्बन्धेनान्वयादित्यर्थः। तन्मतसिद्धं कार्यकारणभावं दर्शयति - [आख्यातार्थेति] ननु स एव स्वीक्रियतामत आह - [सोऽपीति] अपिना तस्य सुतरां स्वानभिमतत्वं सूचयति। अस्य

घटित इत्यत्रान्वयः। [चन्द्र इव मुखं दृश्यत इति] आख्यातार्थसङ्ख्याया मुख इव चन्द्रेऽप्यन्वयः प्रसज्यते, तस्यापि प्रथमान्तपदोपस्थापितत्वात्। [देवदत्तो भुक्त्वा व्रजतीति] अत्र सङ्ख्यायाः क्त्वाप्रत्ययान्तार्थेऽपि अन्वयः प्रसज्यते। ततोऽपि प्रथमैकवचने तस्य "अव्ययादाप्सुपः" २-४-८२ इति लुकि प्रत्ययलक्षणेन प्रथमान्तत्वमक्षतम्। [इतराविशेषणत्वेति] प्रकृते चन्द्रस्येवार्थसादृश्ये प्रतियोगिताकत्वसंसर्गेण, क्त्वाप्रत्ययान्तार्थस्य व्रजनक्रियायामुत्तरकालिकत्वसंसर्गेण च विशेषणतया न तत्राख्यातार्थसङ्ख्यान्वयः, तथा च तन्मते आख्यातार्थसङ्ख्याप्रकारकबोधं प्रति अन्याविशेषणीभूतप्रथमान्तार्थोपस्थितिः कारणमिति कार्यकारणभावः फलति। 'चैत्रेण सुप्यते' इत्यादौ भावाख्याते धात्वर्थस्य, स्तोकं पचतीत्यादौ स्तोकादेः क्रियाविशेषणस्य चान्याविशेषणत्वात्तत्र सङ्ख्यान्वयवारणाय प्रथमान्तेति। तदीयकार्यकारणभावस्यान्याविशेषणत्वघटितत्वेनाधिकं गौरवमित्याह [अतिगौरवमिति] अस्माकं मते विशेष्यतासम्बन्धेनाख्यातार्थसङ्ख्याप्रकारकशाब्दबोधं प्रति आख्यातजन्याश्रयोपस्थितेर्हेतुत्वेन लाघवम्। त्वद्रीत्या प्रथमान्तपदजन्यज्ञानस्य हेतुत्वे तु तादृशाकाङ्क्षायाः पदद्वयघटितत्वेन गौरवं स्पष्टमेव। इतराविशेषणत्वघटितत्वेन सुतरां गौरवम्। किञ्च चैत्र! मैत्रो ग्रामं गच्छतीत्यादावन्याविशेषणीभूतप्रथमान्तार्थे सङ्ख्यान्वयवारणाय सम्बुद्ध्यन्तभिन्नत्वमपि प्रथमान्तविशेषणं देयम्। न च तथापि निस्तारः। चैत्र! गामानयेत्यादौ सम्बोधनार्थे सङ्ख्यान्वयानापत्तेः। तत्र त्वंपदाध्याहारे तु "भो ब्राह्मणाः! त्वं पच" इति प्रयोगापत्तिः। युष्मदर्थकर्तृसम्बुद्ध्योरेकसङ्ख्याकत्वनियमाश्रयणेन तद्वारणे तु व्युत्पत्त्यन्तरकल्पनापत्तिः। किं च चैत्र एव पचतीत्यादौ एवकारसमभिव्याहारे तदर्थान्ययोगव्यावृत्त्येकदेशभेदे विशेषणीभूतचैत्रादौ सङ्ख्यान्वयानुपपत्तिः, अन्यस्मिन् एवकारार्थभिन्नत्वेन विशेषणीये त्वतिगौरवम्। एवं कार्यकारणभावकल्पने लाघवगौरवोद्भावनस्य प्रयोजनं दर्शयतिः [इदमपीति] परमताभिमतकार्यकारणभावकल्पनापेक्षया स्वमते तत्कल्पने लाघवमपीत्यर्थः। [मानमिति] प्रमाणमित्यर्थः। भूषणे प्रकृतस्थले भूषणे।

(कालान्वयनिरूपणम्)

कालस्तु व्यापारे विशेषणम्। तथाहि - "वर्तमाने लट्" इत्यत्राधिकाराद्धातोरिति लब्धम्। तच्च धात्वर्थं वदत् प्राधान्याद्व्यापारमेव ग्राहयतीति तत्रैव तदन्वयः। न च सङ्ख्यावत् कर्तृकर्मणोरेवान्वयः शङ्क्यः, अतीतभावनाके कर्तरि पचतीत्यापत्तेः, अपाक्षीदित्यनापत्तेश्च। पाकानारम्भदशायां कर्तृसत्त्वे पक्ष्यतीत्यनापत्तेश्च।

(अप्पय्यदीक्षितमतखण्डनम्)

नापि फले तदन्वयः, फलानुत्पत्तिदशायां व्यापारसत्त्वे पचतीत्यनापत्तेः, पक्ष्यतीत्यापत्तेश्चेत्यवधेयम्।

न चाऽऽमवातजडीकृतकलेवरस्योत्थानानुकूलयत्नसत्त्वादुत्तिष्ठतीति प्रयोगापत्तिः, परयत्नस्याज्ञानादप्रयोगात्। किञ्चिच्चेष्टादिनाऽवगतौ च 'अयमुत्तिष्ठति, शक्त्यभावात् फलं तु न जायते' इति लोकप्रतीतेरिष्टत्वात्।

आख्यातार्थकर्त्रादीनामन्वयं व्यवस्थाप्य तदर्थकालस्याप्यन्वयं व्यवस्थापयति - [कालस्त्विति] अधिकारलब्धं धातुपदं न स्वरूपपरं, धातोर्वर्तमानत्वस्य तदानीमविवक्षितत्वात्, किन्तुर्थपरमित्याह - [तच्चेति] धातुपदं चेत्यर्थः। धातुपदस्यार्थपरत्वेऽपि तदर्थस्य फलस्य न ग्रहणं, किन्तु तदर्थव्यापारस्य। फलव्यापारयोर्मध्ये व्यापारस्य प्रधानत्वात्, प्रधानान्वयस्य न्याय्यत्वादित्याह [प्राधान्यादिति] एवशब्देन फलस्य व्यवच्छेदः। तत्रैव व्यापार एव, तदन्वयः कालान्वयः। समानप्रत्ययोपात्तत्वप्रत्यासत्त्या सङ्ख्याया इव कालस्यापि कर्तृकर्मणोरेवान्वयः स्यादित्याशयेन शङ्कते [न चेति] [कर्तृकर्मणोरेवेति] समानप्रत्ययोपात्तत्वादिति भावः। कर्त्रादावन्वये दोषमाह [अतीतेति] फलानुकूलव्यापारागमनानन्तरमपि कर्तुर्वर्तमानत्वादित्यर्थः। तत्रैवाव्याप्तिमाह - [अपाक्षीदिति] तत्रैव दोषान्तरमाह [पाकानारम्भेति]।

यत्तु "आख्यातार्थकालस्य धात्वर्थव्यापारान्वये आमवातजडीकृतकलेवरे उत्थानानुकूलव्यापारवति उत्तिष्ठतीति प्रयोगापत्तिः। उत्थानानुकूलव्यापारस्य वर्तमानत्वात्। अत आख्यातार्थकालस्य धात्वर्थफल एवान्वयः स्वीकार्य इति सिद्धान्तलेशसङ्ग्रहे अप्पय्यदीक्षिताः। तान्निराचष्टे - [नापि फल इति] फले कालान्वयस्वीकारे बाधकमाह - [फलेति] [आपत्तेश्चेति] फलस्य वर्तमानत्वादिति भावः। आख्यातार्थकालस्य व्यापारेऽन्वये अप्पय्यदीक्षितोक्तं बाधकमुद्धरति [न चेति] [आमवतेति] आमवातो रोगविशेषः तेन जडीकृतं स्तब्धीकृतं, कलेवरं शरीरं यस्य तस्येत्यर्थः। [उत्थानेति] उत्थानम् = ऊर्ध्वदेशसंयोगः, तदनुकूलयत्नरूपव्यापारस्य विद्यमानत्वेन तमादाय उत्तिष्ठतीति प्रयोगापत्तिः, फले कालान्वयस्वीकारे तु फलस्योत्थानस्याभावान्नायं दोष इति भावः। समाधत्ते [परयत्नस्येति] परः = आमवातजडीकृतकलेवरः। [अज्ञानादप्रयोगादिति] ज्ञानस्यैव बोधविषयप्रयोगे निमित्तत्वादिति भावः। ननु परकीययत्नस्याप्रत्यक्षत्वेऽपि अनुमानादिना तज्ज्ञानसम्भवात्तादृशप्रयोगो दुर्वार एवेत्याशङ्क्य इष्टापत्त्या परिहरति [किञ्चिच्चेष्टेति] आदिना तदीयलेखादिः। [इष्टत्वादिति] वस्तुतस्तु आमवातजडीकृतकलेवरीययत्नो नोत्थानानुकूलोऽपि तु तदुद्देश्यकः, अत एव यतत इत्येव प्रयोगः,

नतूत्तिष्ठतीति। अनुकूलताविशेषस्यैव फलव्यापारयोः संसर्गत्वाभ्युपगमात्। अत एव तण्डुलक्रयणादिदशायाम् 'अयं पचति' इति न प्रयोगः। तत्र पाकाय यतत इत्येव प्रयोगः। स्पष्टं चेदं भूषणे तिङर्थवादमञ्जूषायां चेति ज्ञेयम्।

यत्तु "फलव्यापारयोः साक्षाज्जन्यजनकभाव एव सबन्धः। तण्डुलक्रयणादीनां परम्परया विक्लित्तिजनकत्वेऽपि साक्षाज्जनकत्वाभावान्न तदानीं पचतीति प्रयोगापत्तिः। प्रकृते उत्थानानुकूलयत्नस्य सत्त्वेऽपि कर्तृनिष्ठशक्तिरूपसहकारिकारणाभावादुत्थानानुत्पादेऽपि साक्षादुत्थानजनकस्य यत्नस्य सत्वेनोत्तिष्ठतीति प्रयोगस्येष्टत्वमेवेति वल्लभपञ्चोलिनौ। तन्न। तद्दशायां तादृशप्रयोगे इष्टापत्तेः कर्तुमशक्यत्वात्, सर्वानुभवविरोधात्, फलव्यापारयोस्साक्षाज्जन्यजनकभावस्यैवसबन्धत्व-स्वीकारोऽप्ययुक्तः, फूत्कारादेर्विक्लित्तिरूपफलानुकूलत्वाभावप्रसङ्गात्। अतो भूषणाद्युक्तमेव युक्तमिति दिक्।

(तिङन्ते "प्रत्ययार्थः प्रधानम्" इत्यस्य त्यागः)

एवं च तिङर्थो विशेषणमेव। भावनैव प्रधानम्। यद्यपि प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थस्यैव प्राधान्यमन्यत्र दृष्टं, तथापि "भावप्रधानमाख्यातम्" "सत्त्वप्रधानानि नामानि" इति निरुक्ताद्भूवादिसूत्रस्थक्रियाप्राधान्यबोधकभाष्याद्धात्वर्थभावनाप्राधान्यमध्यवसीयते।

उपसंहरति - [एवंचेति] पूर्वोक्तयुक्तीनामवश्याश्रयणीयत्वे चेत्यर्थः। तिङर्थः कर्तृकर्मसङ्ख्याकालाः [विशेषणमेवेति] एवशब्देन विशेष्यत्वव्यवच्छेदः। [भावनैवेति] धात्वर्थव्यापार एवेत्यर्थः। एवशब्देन फलव्यवच्छेदः। कृदन्ते तु धात्वर्थप्रकारक एव बोधः, पक्व इत्यादिकर्मकृत्समभिव्याहारे फलव्यापारयोर्विशेष्यविशेषणभावो विपरीत इत्युक्तं प्राक्।

ननु "तिङर्थो विशेषणमेव" इत्ययुक्तम्। "प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थः प्रधानम्" इत्ति न्यायेन प्रत्ययार्थस्य प्राधान्यबोधनेन तद्विरोधा दित्याशङ्कते - [यद्यपीति] अन्यत्र पाचकः, औपगव इत्यादौ। [दृष्टमिति] तथाच प्रत्ययार्थापेक्षया प्रकृत्यर्थभावनायाः प्राधान्याभ्युपगमे तन्न्यायविरोध इति भावः। [भावप्रधानमाख्यातमिति] इदं हि नामख्यातोपसर्गनिपातानां चतुर्णां पदानां मध्ये आख्यातस्य लक्षणं, नामलक्षणं "सत्त्वप्रधानानि" इति। आख्यायते सर्वप्रधानीभूतोऽर्थोऽनेनेति व्युत्पत्त्या धातुराख्यातपदेनोच्यते। तथाच भावप्रधानबोधजनकत्वं धातोर्लक्षणम्। नचाख्यातपदेन धातोर्ग्रहणे "चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताः" इति निरुक्तविरोधः, धातुमात्रस्यापदत्वादिति वाच्यम्।

धात्वादिप्रकृतीनामेव तत्रोद्दिष्टत्वात्, धात्वादिप्रकृतिकं चतुर्विधं पदजातमिति तदर्थात्। अत एव "नामान्याख्यातजानी" त्युत्तरनिरुक्तसङ्गतिः। नामानि = प्रातिपदिकानि, आख्यातजानि = धातुजानीति तदर्थः। तर्हि तिङ्प्रत्ययजं, तिङन्तजं वा नाम सम्भाव्यते। किन्तु धातुजम्। अत एवैतत्समानार्थकं वाक्यम् "उणादयो बहुलम्" ३-३-२ इति सूत्रे भाष्ये पठ्यते "सर्वं नाम धातुजमाह निरुक्ते, व्याकरणे शकटस्य च तोकम्" इति। स्पष्टं चेदं" तस्मात्करोतिर्धातो" इति कारिकाव्याख्याने भूषणे। एतदर्थस्फोरणायैव प्रकृतानुपयुक्तमपि "नामान्याख्यातजानि" इति निरुक्तवचनमुपन्यस्तम्। एवं च तिङ्प्रत्यये दर्शनान्तरीयाणामाख्यातव्यवहारो निर्मूल एव। आख्यातपदेन पचति पचतिरूपम्, एधितव्यं, भुक्त्वा, भोक्तुं, पाचयाम्' इत्यादिप्रत्ययान्तं गृह्यत इति नागेशपण्डिताः। तदाशयस्तिङर्थवादमञ्जूषाव्याख्याने नागेशभावप्रकाशेऽस्माभिस्सविस्तरमुपपादितः। एतेन आख्यातं तिङन्तं, तिङर्थनिष्ठप्रकारतानिरूपितधात्वर्थनिष्ठविशेष्यताकबोधजनकम्' इति काशिका प्रकृतग्रन्थकर्त्रनभिमतत्वादुपेक्ष्यैव। तथाच भावप्रधानमाख्यातमिति निरुक्तेन धात्वर्थप्राधान्यलाभेन प्रत्ययार्थप्राधान्यबोधकस्मृतिस्तिङन्तातिरिक्तविषयकतया संकोच्यत इति भावः। [नामानीति] नमन्त्याख्यातशब्दे गुणभावेन, नमयन्ति वा स्वार्थं भावनां प्रतीति नामानि, तल्लक्षणं सत्त्वप्रधानानीति।

ननु "भावप्रधानमाख्यातम्" इति स्मृतिर्न सर्वात्मना भावस्य प्राधान्यं बोधयति। धात्वर्थफलापेक्षया भावस्य प्राधान्यबोधन एव तत्तात्पर्यात्। अत एव "सत्त्वप्रधानानि नामानि" इति शेषवचनविरोधो नेत्यत आह [भूवादीति] [भाष्यादिति] तत्रहि "भाववचनो धातुः" इति न्यासे "कथं ज्ञायते? भाववचनाः पचादय इति" इति प्रश्ने "यदेतेषां भवतिना सामानाधिकरण्यं, पचति भवति, पक्ष्यति भवति, अपाक्षीद्भवति" इत्युक्तम्। पचति भवतीत्यादेर्यत्कर्तृका पचिक्रिया तत्कर्तृका सत्तेति बोधः। एवं च पचत्यर्थभवत्यर्थयोरेकाधिकरणवृत्तित्वमेव पचतिभवत्योस्सामानाधिकरण्यमिति भवतिसामानाधिकरण्यात्पचादीनां भाववाचित्वमिति तदाशयः। ततः "पचादीनां धातुसंज्ञा न प्राप्नोति। यथा हि भवता क्रियावचने धातौ करोतिना पचादीनां सामानाधिकरण्यं निदर्शितं, न तथा भाववचने धातौ निदर्श्यते, करोतिः पचादीनां सर्वान् कालान्, सर्वान् पुरुषान्, सर्वाणि वचनानि चानुवर्तते, भवतिः पुनर्वर्तमानकालं चैकत्वं च" इति तन्न्यासे दूषणमभिहितम्। भवतिः पुनरिति प्रतीकमुपादाय "नहि भवति - भविष्यति पक्ष्यति, अभूदपाक्षीत्, भवतः पचतः, भवन्ति पचन्ति" इति कैयटः। क्रियावचनो धातुरिति लक्षणनिरूपणावसरे यथा किं करोति? पचति, किं कुर्वन्ति? पचन्ति - किमकार्षीत्? अपाक्षीत्, किं करिष्यति? पक्ष्यति इति करोतिसामानाधिकरण्यं पचादीनां निदर्शितम्।

तथा "भाववचनो धातुः" इति लक्षणनिरूपणावसरे 'पचन्ति भवन्ति, अपाक्षीदभूत्, अपचदभूत्' इति भवतिना सामानाधिकरण्यं पचादीनां न निदर्श्यते, किन्तु पचतौ भिन्नवचनाद्यन्तेऽपि पचति भवति, पचन्ति भवति, पक्ष्यति भवति, अपाक्षीद्भवति इति "भवति" इति भवतेरेकरूपत्वमेव निदर्श्यते। अतो भवतिना सामानाधिकरण्याभावात्पचादीनां भाववचनत्वाभावाद्धातुत्वानापत्तिरिति तद्भाष्याशयः। पचतिभवतीत्यादेर्यत्कर्तृका पाकक्रिया, तत्कर्तृका सत्तेति उक्तार्थोऽपि न, पचतीत्यनेनैव तत्कर्तुर्वर्तमानसत्त्वावगत्या भवतीत्यस्यानुपयोगात्। अतएव पक्ष्यति भविष्यति, अपाक्षीदभूदित्यादयो न प्रयोगाः, किंतु पक्ष्यति भवति, अपाक्षीद्भवतीत्यादय एव। न च पक्ष्यति भवतीत्यादयः कथं प्रयोगाः? भविष्यत्पाकादौ वर्तमानसत्त्वाश्रयत्वासम्भवादिति वाच्यम्। सत्कार्यवादे भूतभविष्यतोरपि सूक्ष्मावस्थामवलम्ब्य तत्सत्ताया वर्तमानत्वाक्षतेः। पचतीत्यादौ तिङन्ते प्रत्ययार्थकर्त्रादिविशेष्यक-बोधाभ्युपगमे यः पक्ष्यति स भविष्यतीत्यभिप्रायेण पक्ष्यति भविष्यतीत्यादिप्रयोगाणां दुर्वारतया, भवतिसामानाधिकरण्यसत्त्वात्पच्यादीनां भाववचनत्वे बाधकाभावेन "भाववचनो धातुः" इति न्यासे धातुत्वसिद्धौ बाधकाभावेन च "पचादीनां धातुसंज्ञा न प्राप्नोति" इति भाष्यमसङ्गतमेव स्यात्। "पक्ष्यति भविष्यतीति न निदर्श्यते" इति भाष्यमप्यसङ्गतं स्यात्। प्रत्ययार्थविशेषणकबोधाभ्युपगमे तु समनन्तरोक्तरीत्या पक्ष्यति भविष्यतीत्यादिप्रयोगवारणस्य सुशकतया, पचतिभवत्योर्वैयधिकरण्यात् पचादीनां भवतिना सामानाधिकरण्याभावाद्धातुत्वस्य दुर्निर्वचतया च तद्भाष्यसङ्गतिः स्पष्टैव।

दर्पणकारादयस्तु "का तर्हीयं वाचोयुक्तिः, पचति भवति, पचसि भवति, पक्ष्यति भवतीति, सैषा वाचोयुक्तिः, पचादयः क्रिया भवतिक्रियायाः कर्त्र्यो भवन्तीति। तेन चाहत्यैव पच्याद्यर्थक्रियाकर्तृकभवनक्रियायाः प्राधान्यं प्रतिपाद्यते। धात्वर्थक्रियाया आख्यातार्थविशेषणत्वोपगमे तु स्वस्वार्थावरुद्धत्वेन पदार्थान्तरे विशेषणतयान्वये नैराकाङ्क्ष्येण भवत्यर्थक्रियाया-माख्यातार्थविशेषणपचादिक्रियाणामन्वयासम्भवेन तद्विरोधोऽप्रतिरोध एव स्यादिति व्याचख्युः। तच्चिन्त्यम्। भवनस्याश्रयत्वेन पाकक्रियायां, तस्याश्च प्रत्ययार्थेऽन्वयोपगमेन भवनकर्तृभूतपाकक्रियाश्रय इति प्रत्ययार्थविशेष्यकबोधोपगमेऽपि पचिक्रियाया भवने कर्तृत्वस्य सूपपादतया तद्भाष्यविरोधाभावात्। अतस्तद्भाष्यं न प्रकृतार्थसाधकम्। अतो मदुक्तमेव युक्तम्।

[धात्वर्थभावनाप्राधान्यमिति] - भावनाग्रहणेन कर्तृकर्मणोर्व्यवच्छेदः, धात्वर्थग्रहणेन तिङर्थभावनाविशेष्यकबोधवादिमीमांसकमतव्यवच्छेदः। अतः फलव्यापारौ धातुवाच्यौ, कर्तृकर्मसङ्ख्याकालास्तिङ्वाच्याः, तत्रापि व्यापारविशेष्यक एव बोधः, न फलविशेष्यको नापि

प्रत्ययार्थविशेष्यकः। "प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थः प्रधानम्" इत्युत्सर्गः। स च "भावप्रधानमाख्यातम्" इति निरुक्तस्मृतिबलाद्, भूवादिसूत्रस्थपूर्वोक्तभाष्याच्च तिङन्ते परित्यज्यते इति ग्रन्थकर्तुराशयः। भावना तिङर्थ इति दर्शनान्तरीयमतनिराकरणेन कर्तृकर्मणोस्तिङर्थत्वे साधितेऽपि "प्रत्ययार्थविशेष्यक एव बोधः किं न स्यात्" इत्याशङ्का जायेत, सापि "यद्यपि" इत्यादिना प्रदर्श्य निराकृतेति बोध्यम्। अध्यवसीयते = निश्चीयते।

(तिङर्थकर्तृविशेष्यकबोधवादिमतखण्डनम्)

अपिचाख्यातार्थप्राधान्ये तस्य देवदत्तादिभिः सममभेदान्वयात्प्रथमान्तस्य प्राधान्यापत्तिः। तथाच 'पश्य मृगो धावति' इत्यत्र भाष्यसिद्धैकवाक्यता न स्यात्। प्रथमान्तमृगस्य धावनक्रियाविशेष्यस्य दृशिक्रियायां कर्मत्वापत्तौ द्वितीयापत्तेः। नचैवमप्रथमासामानाधिकरण्याच्छतृप्रसङ्गः, एवमपि द्वितीयाया दुर्वारत्वेन 'पश्य मृग' इत्यादि वाक्यस्यैवासम्भवापत्तेः। न च पश्येत्यत्र तमिति कर्माध्याहार्यम्। वाक्यभेदप्रसङ्गात्। उत्कटधावनक्रियाविशेषस्यैव दर्शनकर्मतयान्वयस्य प्रतिपिपादयिषितत्वा, दध्याहारेऽनन्वयापत्तेश्च।

ननु भूवादिसूत्रस्थभाष्यस्यानेकाख्यातघटितवाक्यविषयकतया चारितार्थ्यसम्भवादेकाख्यातघटित-वाक्यस्थले तिङर्थकर्तृकर्मणोः प्रकृत्यर्थापेक्षया विशेष्यत्वस्वीकारे न किञ्चिद्बाधक मित्यतः प्रत्ययार्थकर्तृकर्मविशेष्यकबोधाभ्युपगमे दोषान्तरमाह [अपि चेति] दर्पणकारास्त्वेव मवतारयन्ति। ननु भावप्रधानमाख्यातमिति निरुक्तेन तिङन्ते भावनापरपर्यायभावप्राधान्यं प्रतिपाद्यते, सा च नैयायिकमते कर्त्राख्याते कर्तृत्वं = कृतिः, कर्माख्याते कर्मत्वं = फलम्। तन्निरूपिताश्रयत्वं वा, तैः सङ्ख्याकालातिरिक्ताख्यातार्थस्य भावनापदव्यपदेश्यत्वाभ्युपगमात्, कृत्यादिरूपभावनाया आख्यातार्थत्वे मानं तु भूवादिसूत्रस्थं "पचतिशब्दमपहाय पठतीत्युक्ते कश्चिच्छब्दो हीयते, कश्चिदुपजायते कश्चिदन्वयी, पच्छब्दो हीयते, पठ्शब्द उपजायते अतिशब्दश्चान्वयी, अर्थोऽपि कश्चिद्धीयते, कश्चिदुपजायते, कश्चिदन्वयी, विक्लित्तिर्हीयते, पठिक्रियोपजायते, कर्तृत्वमेकत्वं चान्वयि" इति भाष्यम्।

किञ्च "भावप्रधानमाख्यातम्" इति निरुक्तं तद्भाष्यस्वरसात्सकलकारकसङ्ख्याविशिष्टभावनाया धातुवाच्यत्वमाश्रित्य प्रवृत्तम् (तदयुक्तम्) न चास्त्वयमेवाश्यः, वाचकताकल्पोक्तकार्यकारणभावाकल्पन-प्रयुक्तलाघवस्योपोद्बलकत्वादिति वाच्यम्। यत् तादृशमतं प्रक्रियादशायां चक्षुश्श्रुत्युक्ति-

विश्वस्तैरप्याश्रयितुमशक्यं, प्रागेव तु प्रकृतिप्रत्ययार्थविवेचनचतुरैराक्षपादैः। तथाहि - कारकविशिष्टक्रियाया धात्वर्थत्वे "लः कर्मणि" इति विधिवैयर्थ्यापत्तिः। न च तस्य द्योतकत्वप्रतिपादकता, शानजादेरपि तथात्वापत्त्या तत्रापि कर्त्रादीनां क्रियाविशेषणतया भानापत्तेः।

किञ्च कर्तृकर्मणोः पदार्थैकदेशतया तत्र देवदत्तादीनामन्वयासम्भवः "पदार्थः पदार्थेन" इति व्युत्पत्तेः। तदन्वयाभ्युपगमेऽपि धात्वर्थेऽभेदेन विशेषणतया स्तोकादिवन्नपुंसकत्वापत्तिश्च। अपि च क्रियाविशेषणतयोपस्थितस्य कर्तुर्विशेषणाकाङ्क्षाविरहात् पचतीत्युक्ते 'कः'? कीदृक्? इति प्रश्नानुपपत्तिः। वक्ष्यति ग्रन्थकृत् "न हि गुणभूतः कर्ता निषेधं स्वाङ्गत्वेन ग्रहीतुमलम्" इति। अत एवैतत्प्रामाण्यात् "प्रत्ययवाच्यत्वं कर्तुः, धात्वर्थविशेषणत्वं च" इति गर्जन्तः परास्ताः, प्रत्ययस्य द्योतकतायामेव तन्नियमस्य दर्शितत्वात्, प्रत्ययार्थप्राधान्यस्यैव ततो लाभाच्च।

किं च "प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वम्" इति सिद्धविभक्त्यर्थसङ्ख्याप्रकारकबोधं प्रति विशेष्यतया प्रकृतिजन्योपस्थितेर्हेतुत्वस्य कर्त्रादावभावेन सङ्ख्यान्वयासम्भवः। आख्यातार्थसङ्ख्याप्रकारकबोधे आख्यातार्थकर्तृकर्मोपस्थितेर्हेतुत्वकल्पनमप्याग्रहमूलकमेव, पदार्थयोराधाराधेयभावेनान्वये विभिन्नपदजन्योपस्थितेस्तन्त्रत्वात्। विभक्त्यर्थकर्तुर्लिङ्गानन्वयिनोऽद्रव्यतया तत्र सङ्ख्यान्वयासम्भवात्। "गुणानां च परार्थत्वात्" इति न्यायाच्च। मन्मतेऽयोग्यतया तस्याः स्वप्रकृत्यर्थानन्वयेऽपि प्रकृत्यर्थान्वयनियमोऽक्षत एव 'अणुरपि विशेषोऽध्यवसायकर' इति न्यायात्।

किञ्चाख्यातस्य कर्त्रर्थकत्वे राजसम्बन्धिपुरुषाभिन्नकर्तृकं गमनमित्यभिप्रायेण राज्ञः पुरुषो गच्छतीतिवत् स्वस्वामिभावादिसम्बन्धेन राज्ञः कर्तृत्वेन विवक्षया राजा पुरुषो गच्छतीति प्रयोगापत्तिः। न च तत्र षष्ठीप्रसक्तिः, तदर्थस्य प्रातिपदिकार्थविशेष्यतया विवक्षायामेव तत्प्रसरात्।

पचति भवतीत्यादौ पाकानुकूलाख्यातार्थकृतौ भावनाश्रयत्वरूपभवतीति-तिङन्तार्थभावनान्वयोपगमेन, पाकविशिष्टकृतौ भवनकर्तृत्वेऽवगते तद्विशेषणपच्यर्थक्रियायामपि तल्लाभात्। "पचादयः क्रिया भवतिक्रियायाः कर्त्र्यो भवन्ति" इति भाष्यस्थादिपदस्य हेतुपरतया तेन व्यापारार्थकपचादिशब्दस्य समासे पच्याद्यर्थहेतवः क्रियाः कृत्यात्मकव्यापारा भवनक्रियानिरूपितकर्तृत्ववत्यो भवन्तीत्यर्थस्य तस्माल्लाभाद्वा तादृशैकवाक्यत्वस्यास्माभिरभ्युपगमान्न भूवादिसूत्रस्थभाष्यविरोधोऽपि। इदं चाख्यातार्थकृतिमुख्यविशेष्यकबोधमभिप्रेत्योक्तम्। वस्तुतस्तु चैत्रः पचति भवतीत्यादौ प्रथमान्तार्थमुख्यविशेष्यकबोधाभ्युपगमेऽपि नैकवाक्यताक्षतिः। भवनकर्तृत्वान्विताया एव पाकविषयभावनायाश्चैत्रांशे प्रकारतया भानसम्भवादित्यरुचेराह "अपि चेति" इति।

अत्रेदं चिन्त्यम्। "भावप्रधानमाख्यातम्" इति निरुक्तवचनस्य तदुक्ताशयकत्वे "प्रत्ययार्थः प्रधानम्" इत्यनेनैवाऽऽख्यातार्थकृतिप्राधान्यस्य सिद्धतया निरुक्तवचनस्य वैयर्थ्यापत्तिः, भावाख्याते तस्याव्याप्तिश्च, तत्र प्रत्ययस्य कृत्यर्थकत्वाभावात्। "तिङ्भ्यामेकं द्रव्यमभिधीयते" इति "गत्यर्थे लोट्" ८-२-५२ इतिसूत्रस्थ "कर्तृवाचिनि सार्वधातुके शब्भवति, सुपां कर्मादयोऽप्यर्थाः सङ्ख्याचैव तथा तिङामिति यग्विधायकसूत्रस्थ, "प्रधाने कर्तरि लादयो विधीयन्ते" इति "सहयुक्तेऽप्रधाने" २-३-२९ इत्याद्यनेकसूत्रस्थभाष्यविरोधेन "कर्तृत्वमन्क्रिय" इति भूवादिसूत्रस्थभाष्यस्यैकदेश्युक्तितया न तद्बलेन तिङां कृतिवाचकत्वलाभः। प्रत्युत "यत्ने पचिना कथ्यमाने" इति कर्तृसंज्ञासूत्रस्थभाष्यात्कृतेर्धातुवाच्यत्वमेव लभ्यते।

'भावप्रधानमाख्यातम्' इति निरुक्तं कारकसङ्ख्याविशिष्टभावनाबोधकत्वं धातो राश्रित्यैव प्रवृत्तम्। युक्तं चैतत्। तिङां कर्त्राद्यर्थद्योतकत्वस्यैव चक्षुश्श्रुतिसम्मतत्वात्, तथाच "बहुषु बहुवचनम्" इति सूत्रे चक्षुश्श्रुतिवचनं "तिङोऽविशेषेण धातुमात्राद्विधीयन्ते" इति। निरूपयिष्यते चेदं विस्तरेण निपातार्थनिर्णये। चैत्रेण सुप्यत इत्यादौ तिङामसत्त्वभूतभावनाबोधकतया तत्स्थानिलकारस्य तदर्थकत्वेऽपि "आस्यमाने शय्यमाने च गत" इत्यादौ शानचि सत्त्वभूतभावप्रतीत्या तत्स्थानिलकारस्य तदर्थकत्वाय 'लः कर्मणि' इतिसूत्रे 'भावे' इत्यस्यावृत्त्या अर्थद्वयबोधकत्ववत् तत्सूत्रे कर्तरीत्यादेरप्यावृत्त्या कर्त्रादौ वर्तमानाद्धातोर्लकाराः, कर्त्रादौ वाच्ये च लकारा इत्यर्थद्वयस्वीकारेण तिविषयलकाराणां द्योतकत्वेऽपि शत्रादिविषयाणां वाचकतालाभेन शत्राद्यन्ते कर्त्रादीनां क्रियाविशेष्यतया भानमपि सुलभमेव। लः कर्मणीत्यत्रार्थद्वयस्य लक्ष्यानुरोधेन व्यवस्थितत्वाश्रयणादभीष्टार्थसिद्धिः। स्पष्टं चेदं "बहुषु बहुवचनम्" इति सूत्रे भाष्यप्रदीपोद्द्योते।

पचति देवदत्त इत्यादौ सामान्यरूपेण कर्तुराख्यातार्थतया सामान्यार्थस्य च नियमेन विशेषाकाङ्क्षासत्वात्तद्बलेन क्रियाविशेषणीभूततिङर्थकर्त्रादौ देवदत्तादेर्विशेषणतयान्वयोऽप्युपपद्यते। यथा नियताकाङ्क्षावशादेव 'चैत्रेण गतो ग्रामः' इत्यादौ विशेषणीभूतक्रियादौ कारकान्वयस्तद्वत्। अत एव कः? कीदृक्? इत्यादिप्रश्नोऽप्युपपद्यते। आख्यातार्थकर्तुर्निषेधांशे आकाङ्क्षाविरहात् "नहि गुणभूतः कर्ता निषेधं स्वाङ्गत्वेन ग्रहीतुमलम्" इति वक्ष्यमाणग्रन्थकृदुक्तिसङ्गतिः। इदं च देवदत्तादीनां तिङर्थकर्तर्यभेदान्वय इति वादिनां मते, तेषां धात्वर्थक्रिययैवाभेदान्वय इति वादिनां मते न काप्यनुपपत्तिः। स्पष्टं चेदं सुबर्थवादे मञ्जूषायाम्। देवदत्तादिपदानां स्तोकं पचतीत्यादौ स्तोकादीनामिव नपुंसकत्वं तु नापाद्यम्, क्रियाविशेषणानां नपुंसकत्वमिति नियोगाभावात्, विक्लित्त्यादिफलस्यापि

व्यपदेशिवद्भावेन फलाश्रयत्वेन कर्मत्वातत्सामानाधिकरण्यात्स्तोकादिभ्योऽपि "कटं भीष्मं कुरु" इत्यादौ भीष्मादिभ्य इव द्वितीया, फलाश्रयत्वादेरिव तत्सामानाधिकरण्यस्यापि तत्तद्विभक्त्युत्पत्तौ नियामकत्वाभ्युपगमात्, किञ्च क्रियाविशेषणानामित्यत्र क्रियापदेन फलस्यैव ग्रहणेन व्यापारविशेषणेभ्यो न द्वितीया, किञ्च क्रियाविशेषणानां नपुंसकत्वमित्युद्घोषः "सामान्ये नपुंसकम्" इति मुनिवचनार्थसिद्धः, नापूर्वः, मुनिवचनस्यानियतलिङ्गविषयत्वेन देवदत्तादौ न तत्प्रवृत्तिः। अत एव आद्यपाकानुकूलक्रियेत्यर्थे - आदिं पचतीति प्रयोगोपपत्तिः। आदिशब्दो हि नित्यं पुमान्। स्पष्टं चेदं तत्पुरुषप्रकरणे शब्देन्दुशेखरे। अत एव 'हतशायिकाः शय्यन्ते' इति यग्विधायके भाष्यप्रयोग उपपद्यते। "हतशायिका इति क्रियाविशेषणं, तच्च स्त्रीलिङ्गं प्रथमाबहुवचनान्तं च" इति तत्रैवोद्द्योते स्फुटमेतत्। हतशायिका इत्यत्र क्लीबत्वं तु न, क्तिन्नधिकारस्थण्वुलः स्त्रीत्वस्य सत्त्वेन "सामान्ये नपुंसकम्" इत्यस्याप्राप्तेः।

किञ्च तण्डुलं पचतीत्यनुरोधेन प्रत्ययानां स्वप्रकृत्यर्थान्वितस्वार्थबोधकत्वकल्पनावत्, कटं भीष्मं करोतीत्यादौ "विशिष्टं कर्म" इति अनभिहितसूत्रस्थभाष्योक्तपक्षे कर्मप्रत्ययस्य भीष्मपदार्थान्वितस्वप्रकृत्यर्थान्वितस्वार्थबोधकत्वनिर्वाहाय तद्भाष्यप्रामाण्येन प्रत्ययानां विशेषणविशिष्टप्रकृत्यर्थान्वितस्वार्थबोधकत्वकल्पनावत्, पपाचेत्यादौ षाष्ठद्विर्वचनस्थले पूर्वखण्डस्यैव प्रकृतित्वम्, अर्थवत्त्वं तूत्तरखण्डस्यैवेति "एकाचो द्वे प्रथमस्य" ६-२-२ इति सूत्रस्थभाष्यसम्मततया तत्प्रामाण्येन प्रत्ययनां प्रकृतिकर्मकद्विरुच्चारणविषयार्थान्वितस्वार्थबोधकत्वकल्पनावच्च व्युत्पत्तीनामनुभवानुरोधितया चैत्रः पचतीत्यादौ "कर्तुरेकत्वस्याभिधानात्प्रथमा न प्राप्नोति" इत्यनभिहितसूत्रस्थभाष्यप्रामाण्येन च प्रत्ययानां स्वार्थान्वितस्वार्थबोधकत्वस्यापि कल्पनादाख्यातार्थसङ्ख्यायास्तदर्थकर्तृकर्मणोरन्वयोऽपि नानुपपन्नः। अत एव कृतीष्टसाधनत्वयोः कृतिवर्तमानत्वयोश्च परस्परमन्वयः परेषामुपपद्यते। प्रत्युताऽऽख्यातार्थसङ्ख्यायाः प्रथमान्तार्थेऽन्वयाभ्युपगम एव निष्प्रामाणिकः, आख्यातार्थसङ्ख्यायाः समानप्रत्ययोपात्तकर्त्रादावन्वय-स्वीकारापेक्षया विभिन्नप्रथमान्तार्थेऽन्वयस्वीकारोऽत्यन्तमनुचित इति स्पष्टमेव प्राज्ञानाम्।

किञ्च स्वस्वामिभावसम्बन्धेन राजविशिष्टपुरुषाभिन्नकर्तृकं गमनमिति बोधतात्पर्येण राजा पुरुषो गच्छतीति प्रयोगापत्तिरपि न युक्ता, तत्सम्बन्धे राजपदात् षष्ठ्या एव नियमेन प्रवृत्तेः। नच तदर्थस्य प्रातिपदिकार्थविशेष्यतया विवक्षायामेव तत्प्राप्तिरिति सम्यक्। षष्ठ्यर्थस्य सांसर्गिकविषयतयैव भानस्य महाभाष्यकारसम्मततया तादृशविवक्षाया एवासम्भवात्। अत एव "षष्ठी शेषे" इति सूत्रे

भाष्ये "राज्ञः पुरुष इत्यत्र राजा विशेषणं पुरषो विशेष्यः" इत्युक्तम्। अन्यथा सम्बन्धं विशेषणतया विशेष्यतया वा भगवान् भाष्यकारो ब्रूयात्। निपातातिरिक्तनामार्थयोर्भेदेन साक्षादन्वयस्याव्युत्पन्नत्वाच्च न तादृशप्रयोगापत्तिः। प्रातिपदिकार्थप्रकारकोऽभेदातिरिक्तसंसर्गकशाब्दबोधः प्रत्ययनिपातान्यतरार्थविशेष्यक एवोत्पद्यते, नान्यविशेष्यक इति यावत्। कथमन्यथा निरुक्तसम्बन्धेन राजविशिष्टः पुरुषो गमनानुकूलकृतिमानिति बोधतात्पर्येण राजा पुरुषो गच्छतीति प्रयोगापत्तिस्त्वयापि वार्येत।

किञ्च पचति भवतीत्यत्र भूवादिसूत्रस्थभाष्यसम्मतैकवाक्यताया आख्यातस्य कृतिवाचकत्वाश्रयणेन समर्थनमप्यसङ्गतम्। तथाहि - भूवादिसूत्रे भाष्ये "भाववचनो धातुः" इति न्यासे "विप्रतिषिद्धानां धातुसंज्ञा न प्राप्नोति। भेदः, छेदः। अन्यो हि भावः, अन्यो ह्यभावः। आतश्चान्यो भावः, अन्योभावः। योऽहि यस्य भावमिच्छति, स न तस्याभावम्। यस्य चाभावं, न तस्य भावम्" इति दूषणमभिहितम्। घटादेर्नाशो भेदशब्देन, रज्ज्वादेर्नाशश्छेदशब्देन च गृह्यते, शब्दशक्तिस्वभावात्। तथाच विनाशकाले सत्ताया अभावाद्विनाशेन सत्तायाः सामानाधिकरण्याभावेन भिदादीनां भवतिसामानाधिकरण्याभावाद्धातुत्वानापत्तिरिति तद्भाष्याशयः। त्वदुक्तरीत्याश्रयणे हि 'घटं चैत्रो भिनत्ति भवति' इत्यादौ भिनत्त्यर्थानुकूलकृत्यादेर्भवतिसामानाधिकरण्यसत्त्वाद्धातुत्वसिद्धे-र्निष्प्रत्यूहतया तद्दूषणाभिधानं भगवतोऽसङ्गतं स्यात्। किञ्च 'चैत्रः पचते' इत्यादौ तिङर्थस्यापि सत्तया सामानाधिकरण्याद्भवतिसामानाधिकरण्यमादाय 'ते' इत्यस्यापि धातुत्वापत्तिं भगवान् दद्यात्। प्रकृतभाष्यविरोधादपि "कर्तृत्वमन्वयि" इति प्रकृतसूत्रस्थभाष्यमनभिहितसूत्रस्थं भाष्यं चैकदेश्युक्तिरेवेति तद्बलेन कृतेराख्यातार्थत्वं प्रत्याशा न कार्या। किञ्चोक्तरीत्या शेते इत्यादौ कर्तृतिङोऽपि धातुत्वापत्तेः सुवचतया 'भाववचने धातौ तदर्थप्रत्ययप्रतिषेधः शिश्ये' इति विशिष्य भावतिङि निरुक्तन्यासे दूषणप्रदर्शनं वार्त्तिककृतोऽसङ्गतं स्यात्। प्रत्ययस्य धातुत्वे 'आदेच उपदेशेऽशिति' इति आत्वापत्तिर्दोषः। तद्धि वार्त्तिकरीत्या धातुत्वनिमित्तकमनैमित्तकं च, शिति तु प्रतिषिध्यते। "एकारोच्चारणं तु यदा कर्तृकर्मणोर्लकारस्तदर्थम्" इति कैयटग्रन्थोऽपि तव विरुणद्धि। वृक्षादिप्रातिपदिकानां भाववचनत्वाभावादेव धातुत्वाप्रसक्त्या धातुपाठो नाश्रयणीय इत्यभिप्रैति "भाववचनो धातुः" इति न्यासकृत्। अतो गणे पाठाभावेन 'प्रत्ययस्य न धातुत्वम्' इति वक्तु मशक्यम्। स्पष्टं चेदं तत्रैव प्रदीपोद्योतयोः। किञ्च पचति भवति, पश्य मृगो धावतीत्यादौ पदैकवाक्यतयाऽन्वयमनभ्युपगच्छतां न्यायविदां मते शुद्धधात्वर्थयोः परस्परमन्वयसमर्थनाय दर्पणकाराणां क्लेशो मुधैवेत्यलं पल्लवितेन।

[आख्यातार्थप्राधान्य इति] - आख्यातार्थस्य धर्मिणः कर्त्रादेः प्रकृत्यर्थापेक्षया प्रधानत्व इत्यर्थः। तस्य = तिङर्थस्य कर्त्रादेः। [अभेदान्वयादिति] - तिङ्प्रत्ययात् कर्तुः सामान्यरूपेणोपस्थित्या, सामान्यस्य च "निर्विशेषं न सामान्यम्" इति न्यायेन नियमेन विशेषाकाङ्क्षासत्त्वेन तस्य योग्यताबलेन तत्समर्पकप्रथमान्तार्थस्यापेक्षासत्त्वेन तस्य तत्राभेदान्वयो वाच्य इति भावः। प्रथमान्तस्य = तदर्थस्य। [प्राधान्यापत्तिरिति] तथाच कर्तुराख्यातार्थत्वेऽपि तद्विशेष्यकः प्रकृत्यर्थव्यापारप्रकारको बोधो न स्वीकार्यः, किन्तु प्रकृत्यर्थविशेष्यकः, प्रत्ययार्थप्रकारक एव बोधः स्वीकार्यः। अन्यथा निरुक्तरीत्या वाक्ये प्रथमान्तार्थस्य प्राधान्यापत्तिरिति भावः। एवं "प्रत्ययार्थः प्रधानम्" इति व्युत्पत्तिपरित्यगेन एककर्तृको विक्लित्त्यनुकूलो व्यापार इति प्रकृत्यर्थविशेष्यकबोधस्वीकारेऽपि तादृशव्यापारस्य प्रथमान्तार्थे विशेषणत्वं किं न स्यात्। "भावप्रधानमाख्यातम्" इत्यादिस्मृतिविरोधोऽपि न, प्रत्ययार्थप्रकारकबोधस्वीकारेण तदनुग्रहसम्भवात्" इति केषाञ्चिद्वादिनामाशयोऽप्यपरिग्राह्य एव। तन्मते एककर्तृविशिष्टक्रियाश्रयो देवदत्त इति बोधस्य पर्यवसन्नतया तस्यानुभवविरुद्धत्वात्। ध्वनितश्चायमर्थः "प्रथमान्तार्थस्य प्राधान्यापत्तिः" इति वदता ग्रन्थकृता। अन्यथा प्रत्ययार्थप्रकारकबोधस्वीकारेण प्रथमान्तार्थस्य प्राधान्यापत्तिवारणेऽपि तादृशप्रकृत्यर्थस्य प्रथमान्तार्थे विशेषणत्वस्वीकारे तदापत्तिवारणासम्भवेन तदसङ्गतिः स्पष्टैव। एतेन "अभेदान्वयादिति - इदं च तन्मतेऽपि कर्ताऽऽख्यातवाच्य इति स्वीयवासनानुसारेण। नैयायिकमते तु कृतेराख्यातार्थतया तस्या आश्रयत्वेनैव प्रथमान्तार्थेऽन्वयात्" इति व्याकुर्वन्तो दर्पणकारास्तदनुसारिणः प्रभाकाराः परीक्षाकाराश्च परास्ताः। आख्यातार्थः कर्तेति वैयाकरणमतमवलम्ब्यैवास्य ग्रन्थस्य प्रवृत्तत्वात्। पूर्वग्रन्थेन फलव्यापारयोर्धातुवाच्यत्वे कर्तृकर्मणोस्तिङ्वाच्यत्वे प्रकृत्यर्थे प्रत्ययार्थस्य विशेषणत्वे च प्रतिपादिते, तत्र "प्रत्ययार्थः प्रधानम्" इति न्यायावलम्बेन प्रत्ययार्थकर्तृविशेष्यक एव बोधः किं न स्यादिति विप्रतिपन्नानामाशयस्यैव निराकरणीयत्वेन प्रस्तुतत्वात्। स्पष्टा चेयं रीतिः कारकप्रकरणे मनोरमाशब्दरत्नयोस्तिङर्थवादे मञ्जूषायां च। नैयायिकमतं तु "एवञ्च भावनाप्रकारकबोधे प्रथमान्तपदजन्योपस्थितिः कारणमिति नैयायिकोक्तं नादरणीयम्" इति समनन्तरग्रन्थेन निराक्रियत इत्यलम्।

तिङर्थकर्तृविशेष्यकबोधस्वीकारे अपचदोदनं देवदत्तः, पश्येत्यर्थे अपचदोदनं देवदत्तं, पश्येति प्रयोगः शतृविधायके भाष्यकैयटयोरापादितः। यद्यपि प्रथमान्तरङ्गा, तथापि प्रधानानुरोधिनी द्वितीयैव भवतीति तदाशयः। तदनुसारेण तत्पक्षे दोषमाह [तथाचेति] प्रत्ययार्थधर्मिविशेष्यकबोधाभ्युपगम इत्यर्थः। [पश्य मृगो धावतीति] नायं भाष्यकारीयः प्रयोगः, किन्तु भाष्यकारीयव्यवहारमूलको हरेः

प्रयोगः। 'क्रियापि कृत्रिमं कर्म' इति संप्रदानसंज्ञासूत्रस्थं 'कर्तरि कर्मव्यतीहारे' इति सूत्रस्थं च भाष्यमेतादृशवाक्यस्वीकारे मानम्। 'अपचदोदनं देवदत्तः पश्येति शतृविधायकस्थाकरसिद्धेत्यर्थः। [एकवाक्यतेति] प्रकृत्यर्थमुख्यविशेष्यकबोधवादिमते एकमृगाभिन्नाश्रयिका या वर्तमाना धावनक्रिया तत्कर्मकं यदिष्टसाधनीभूतं दर्शनं तदनुकूला त्वत्कर्तृका क्रियेति रीत्या पदैकवाक्यता सिद्ध्यति। प्रकृत्यर्थप्रकारकप्रत्ययार्थविशेष्यकबोधस्वीकारे तु धावनक्रियाश्रयाभिन्नो मृगः, दर्शनानुकूलक्रियाश्रयाभिन्नस्त्वमिति बोधस्य स्वीकर्तव्यतया क्रिययोः परस्परमन्वयालाभेन भाष्यसम्मतपदैकवाक्यताया अनुपपत्तिः स्पष्टैव। एवं प्रत्ययार्थप्रकारकबोधस्वीकारेऽपि प्रकृत्यर्थस्याऽऽश्रयतासम्बन्धेन प्रथमान्तार्थेऽन्वयोपगमे भाष्यसम्मतपदैकवाक्यतयाऽन्वयो नोपपद्यत एव। नच पचति भवतीत्यत्र भवनकर्तृभूतपाकक्रियाश्रय इति निरुक्तबोधस्वीकारवद् दर्शनकर्मभूतधावनिक्रयाश्रयाभिन्न इति बोधस्वीकारादेकवाक्यतोपपत्तिरिति वाच्यम्। पचति भवतीत्यत्र पाकक्रियाया एव कर्तृत्वेन तदतिरिक्तस्य कर्तुरभावेन भवनस्यान्याविशेषणत्वेन तस्य पाकक्रियायामन्वये बाधकाभावेन तथा बोधस्वीकारेऽपि प्रकृते युष्मदर्थरूपप्रत्ययार्थकर्तरि गुणीभूतस्य दर्शनस्य धावनक्रियायामन्वयायोगेनाभिमतबोधस्य दुरुपपादत्वात्। पाककर्तृकभवनकर्मकं दर्शनमिति बोधतात्पर्येण पचति भवति पश्येति प्रयोगे तु तत्रापि दर्शनस्य कर्तृविशेषणतयाऽन्यत्रान्वेतुमयोग्यतया दर्शनकर्मभूतभवनकर्तृकपाकक्रियाश्रय इति बोधो दुरुपपाद एव। "बहुष्वपि तिङन्तेषु साकाङ्क्षेष्वेकवाक्यता" इति हरिग्रन्थबलात्तिङन्तत्रयघटितं वाक्यमपि साध्वेव। एवं च त्वद्रीत्या विशेष्यस्य मृगादेः कारकत्वेन गुणभूतायामपि दर्शनक्रियायामन्वयस्य वाच्यतया दृशिफलाश्रयत्वेन तस्य कर्मत्वात्ततः प्रथमाबाधनेन द्वितीयापत्तिर्दोषः। तदेतदभिप्रेत्याह [प्रथमान्तमृगस्येति] तदर्थमृगस्येत्यर्थः। [धावनक्रियाविशेष्यस्येति] तत्क्रियां प्रति तदाश्रयाभिन्नत्वेन प्रधानस्येत्यर्थः। [द्वितीयापत्तेरिति] तथाचैकवाक्यतावार्ता दूरापास्ता। तादृशवाक्यमेव न सिद्ध्यतीति मूल एव कु'ार इति भावः। न तन्मात्रकृतैव तदसिद्धिः, किं त्वन्यकृतापीति दर्शयितुं शङ्कते [नचेति] एवं मृगपदस्य द्वितीयान्तत्वे। [शतृप्रसङ्ग इति] धावुधातोर्विहितस्य लटः स्थाने तिङं बाधित्वा "लटः शतृशानचावप्रथमासमानाधिकरणे" इति शत्रादेशप्रसङ्ग इत्यर्थः। वाऽसरूपन्यायेन तु न तिङः, लादेशेषु तदभावस्य भाष्ये स्पष्टत्वात्। समाधत्ते [एवमपीति] शतुरापत्तावपीत्यर्थः। द्वितीयायाः = मृगपदोत्तरं द्वितीयायाः। [असम्भवापत्तेरिति] 'अपचदोदनं देवदत्तः, पश्य', 'अपाक्षीद्देवदत्तः पश्य' इत्यादौ तु द्वितीयापत्तिरेव दोषः, न शतुरापत्तिः। एवं च शतरीव तिङ्यपि त्वन्मते प्रत्ययार्थप्राधान्येन

क्रियान्तरावेशात्तन्निरूपितकर्मत्वमादाय ततो द्वितीया दुर्वारा स्यात्। अत स्तिङन्ते प्रत्ययार्थकर्तुर्न प्राधान्यमास्थेयम्। किन्तु प्रकृत्यर्थविशेषणत्वमेव तस्य स्वीकार्यम्। प्रत्ययार्थस्य विशेषणत्वे तु तस्य प्रकृत्यर्थं प्रति गुणभूततया, एकत्र विशेषणत्वेनान्वितस्य कारकस्यान्यत्र तथान्वयायोगात् कर्तृत्वाद्यतिरिक्तानभिहितशक्त्यन्तरावेशाभावेन नियमेन प्रथमान्तेनैव सामानाधिकरण्यान्न शतृप्रसङ्गो, नापि द्वितीयाप्रसङ्ग इति ध्येयम्। ननु यत्तच्छब्दयोरध्याहारेण यो धावति मृगस्तं पश्येत्यर्थाश्रयणान्न द्वितीयापत्तिरित्याशयेन शङ्कते [नचेति] समाधत्ते [वाक्यभेदेति] पदैकवाक्यताया भाष्यकाराभिमताया असिद्धिरित्याशयः। अध्याहारे मृगपदाद् द्वितीयावारणेऽपि भाष्यव्याकोपो दुष्परिहर एवेति भावः। यदभिप्रायेणायं प्रयोगस्तदसिद्धिरपीत्याह [उत्कटेति] [प्रतिपिपादयिषितत्वादिति] अन्यथा धावन्तं मृगं पश्येत्येव प्रयुञ्जीतेति भावः। वाक्यभेदेनान्वयोऽपि न सिद्ध्यतीत्याह - [अध्याहार इति] [अनन्वयापत्तेरिति] "न हि शाब्दमशाब्देनान्वेति" इति न्यायादिति भावः। प्रकृत्यर्थस्य विशेष्यत्वे तु पश्य मृगो धावतीत्यादौ भाष्यकारसम्मतस्य क्रिययोः परस्परमन्वयस्योपपन्नतया तत्पक्ष एव युक्तः। एवं चोपदर्शितभाष्याद्यनुरोधेन "प्रधानं प्रत्ययार्थः" इति न्यायस्य तिङन्ते परित्यागेन प्रकृत्यर्थस्यैव विशेष्यत्वमास्थेयम्। किं च प्रत्ययार्थस्य विशेष्यत्वे तस्यानन्वयापत्तिः, आख्यातार्थप्रथमान्तार्थयोरभेदेनान्वयाङ्गीकारे तु 'पक्ता गच्छतीतिवत्, 'पचतिकल्पं गच्छति' इत्यापत्तिः, ईषदसमाप्तपाककर्ता गच्छतीत्यन्वयसम्भवात्। किं च पचतिकल्पं, पचतः कल्पं, पचन्तिकल्पमित्यपि न स्यात्। सुबर्थसङ्ख्यायाः प्रकृत्यर्थे प्रधाने कर्त्रर्थे वान्वयाद् द्वित्वबहुत्वाभ्यां कल्पबन्ताद् द्विवचनाद्यापत्तेः, आचार्यकल्पौ, आचार्यकल्पा इतिवत्। सिद्धान्ते तु भावनायाः सङ्ख्यान्वयायोग्यतया तत्र सङ्ख्याया अप्रतीत्या औत्सर्गिकमेकवचनमेव प्रवर्तत इति न दोषः। स्पष्टं चेदं भूषणे।

(प्रथमान्तार्थमुख्यविशेष्यकबोधवादिनैयायिकमतखण्डनम्)

एवं च भावनाप्रकारकबोधे प्रथमान्तपदजन्योपस्थितिः कारणमिति नैयायिकोक्तं नादरणीयम्।

एवं वैयाकरणमते तिङां धर्मिवाचकत्वेऽपि प्रकृत्यर्थापेक्षया प्रत्ययार्थस्यैव प्राधान्यमास्थेयं, "प्रत्ययार्थः प्रधानम्" इति न्यायपरित्यागेन प्रकृत्यर्थस्य प्राधान्यपरिग्रहेपि, तस्याश्रयतासम्बन्धेन प्रथमान्तार्थविशेषणत्वमेवेति केषाञ्चिदाशयं च दूषयित्वा, इदानीं नैयायिकमतं दूषयति - [एवं चेति] धात्वर्थव्यापारस्य मुख्यविशेष्यत्वानभ्युपगमे पश्य मृगो धावतीत्यादौ भाष्यसम्मतपदैकवाक्यताया

अनुपपत्तिदार्ढ्ये चेत्यर्थः। अयमत्र नैयायिकानामभ्युपगमः - फलानुकूलो व्यापारो धात्वर्थः, तदनुकूला कृतिराख्यातार्थः। तस्याश्चाश्रयतासम्बन्धेनान्या-विशेषणीभूतप्रथमान्तार्थेऽन्वयः। स च चैत्रस्तण्डुलं पचतीत्यादौ कर्तरि लकारे चैत्रादिः, पच्यते तण्डुलश्चैत्रेणेत्यादौ कर्मणि लकारे तण्डुलादिश्च। तथाच कर्तृलकारस्थले विक्लित्त्यनुकूलव्यापारानुकूलकृतिमांश्चैत्र इति बोधः, कर्मणि लकारे कृतिस्तृतीयार्थः, तत्र प्रकृत्यर्थस्य समवेतत्वसम्बन्धेनान्वयः, तस्याश्च जन्यतासम्बन्धेन धात्वर्थव्यापारे, तस्य च तेनैव सम्बन्धेन फले, तस्य च निरूपितत्वसम्बन्धेनाख्यातार्थाश्रयत्वे, तस्य च प्रथमान्तार्थेऽन्वयः। तथा च चैत्रसमवेतकृतिजन्यव्यापारजन्यफलनिरूपिताश्रयतावांस्तण्डुल इति बोधः। भावे लकारे तु तिङ्प्रत्ययः साधुत्वार्थकः। तथाच चैत्रेण सुप्यत इत्यादौ चैत्रकर्तृकः स्वाप इति धात्वर्थविशेष्यक एव बोध इति। पश्य मृगो धावतीत्यादौ भाष्यसम्मतपदैकवाक्यतयान्वयानुपपत्तितादवस्थ्यसाम्यान्नैयायिकोक्तमपि नादरणीयमेवेति प्रकृतग्रन्थाशयः। दर्पणकारादयस्तु "अपिचाख्यातार्थप्राधान्ये" इत्यादिः सर्वोऽपि ग्रन्थो नैयायिकमतनिराकरणपर इत्याशेरते। ते तु प्रकृतग्रन्थार्थतत्त्वं नाग्रहीषुरेवेत्यलम्।

[भावनेति] सङ्ख्याकालातिरिक्तः सर्वोऽपि तिङर्थस्तन्मते भावनापदेन व्यपदिश्यते। तथाच कर्तरि लकारे कृतिः, कर्मणि लकारे आश्रयत्वं च भावनापदेन गृह्यते। स्थलद्वयेऽपि तन्मते बोधाकारः समनन्तरमेवास्माभिः प्रदर्शित एव। [उपस्थितिरिति] अन्याविशेषणीभूतप्रथमान्त-पदोपस्थितिरित्यर्थः। आख्यातार्थसङ्ख्यायास्तादृशप्रथमान्तपदोपस्थितेऽन्वयात्समानपदोपात्तत्वा-त्कृतेरपि तत्रैवान्वयौचित्यादिति भावः। [नैयायिकोक्तमिति] नैयायिकोक्तमपीत्यर्थः। यद्वा "एवंच" इत्यत्र चकारोऽप्यर्थको भिन्नक्रमः। 'नैयायिकोक्तम्' इत्यत्र योज्यः। एवं प्रत्ययार्थस्य कर्तुः प्रकृत्यर्थापेक्षया प्राधान्यवादिनां मतमिव, नैयायिकोक्तं च = नैयायिकोक्तमपि, नादरणीयं, पश्य मृग इत्यत्रोद्भावितदोषतादवस्थ्यसाम्यादिति व्याख्येयम्।

यत्तु "चैत्रस्तण्डुलं पचतीत्यादावाख्यातार्थभावनाप्रकारक एव बोधः। पश्य मृगो धावतीत्यत्र भाष्यरीत्या पदैकवाक्यतयाऽन्वयनिर्वाहाय प्रथमान्तार्थापेक्षयाऽऽख्यातार्थकृतेर्विशेष्यत्वं स्वीकृत्य तस्याश्च कर्मतासम्बन्धेन दर्शनेऽन्वयः स्वीक्रियते। वैयाकरणमत उक्तस्थलीयैकवाक्यतानिर्वाहाय धात्वर्थभावनाप्रकारकबोधे धात्वर्थभावनोपस्थितेर्हेतुत्वकल्पनावत् कर्मतासम्बन्धेन तिङर्थभावनाप्रकारकबोधे धातुजन्यभावनोपस्थिते र्हेतुत्वं कल्प्यते। तथाचाधेयतासम्बन्धेन मृगविशिष्टधावनानुकूलकृतेः कर्मतया दृश्यर्थेऽन्वये मृगनिष्ठा या धावनानुकूला कृतिस्तत्कर्मकदर्शनाश्रयस्त्वमिति वाक्यार्थबोधः। देवदत्तः पचति भवतीत्यादावेकवाक्यतानुरोधात्प्रथमान्तार्थकर्तृप्रकारकबोधे तिङर्थभावनोपस्थितेरपि हेतुत्वं

कल्प्यते। प्रथमान्तार्थकर्तृविशिष्टा पाककृतिर्वर्तमानभावनाश्रयिकेति बोधः। एवं च "प्रकृतिप्रत्ययाविति न्यायाविरोधेनैव भाष्यकारोक्तपदैकवाक्यता न्यायनयेऽपि सूपपादेति "अत्रेदमाभाति" इत्यादिना दर्पणकाराः।

तन्न। कृतेराख्यातार्थत्वाश्रयणेन भाष्यसम्मतपदैकवाक्यताया उपपादनस्यायुक्तताया अस्माभिस्तन्मतखण्डनावसरे निरूपितत्वात्। अत एव पचति भवतीत्यत्र दर्पणप्रदर्शितरीत्या अन्वयस्यायुक्तत्वं न पृथग्विविच्य वक्तव्यम्। पाककृतेः प्रत्ययार्थस्य भावनान्वयस्य भाष्यकारानभिमतत्वात्। "पचादयः क्रिया भवतिक्रियायाः कर्त्र्यो भवन्ति" इति हि भूवादिसूत्रे भाष्यम्। किञ्च सर्वथा नैयायिकासम्मतस्य भाष्यकारसम्मतपदैकवाक्यतयाऽन्वयस्य तन्मतावलम्बेन यथाकथंचित्समर्थनप्रकारो दर्पणकाराणामनुचित एव। नच पश्य मृगो धावतीत्यत्र तमित्यध्याहारेण वाक्यभेदः, पाको भवतीत्यर्थे "पचति भवति" इति प्रयोगाभावश्चेष्ट एवेति तत्समर्थनप्रयासो वैयाकरणानामप्यनुचित एवेति वाच्यम्। पदैकवाक्यतयाऽन्वयसम्भवेऽध्याहारेण वाक्यभेदस्वीकारे गौरवान्मानाभावाच्च। पचति भवतीतिप्रयोगस्य मुनिसम्मतत्वेन त्वदीयानिच्छामात्रस्याऽ-किञ्चित्करत्वाच्च।

किञ्चाऽऽख्यातार्थकृतिप्रकारकः प्रथमान्तार्थविशेष्यकः शाब्दबोधो नोपपद्यते, तण्डुलं पचतीत्यादौ प्रथमान्तपदाभावात्। पण्डिताश्चैत्र इत्यादौ क्रियामुख्यविशेष्यकबोधस्तु "अस्तिर्भवन्तीपरोऽप्रयुज्यमानोऽप्यस्ति" इत्यनभिहितसूत्रस्थभाष्यप्रामाण्येनान्ततोऽस्तीत्यस्य क्रियापदस्य सत्त्वान्नानुपपन्नः। तण्डुलं पचतीत्यादौ प्रथमान्तपदाध्याहारस्तु तव न प्रमाणपदवीमधिरोहति। किञ्चैकत्वाभाववन्तौ पाककर्तारौ चैत्राविति प्रयोगस्य साधुत्ववारणाय "यन्निष्ठेऽर्थे या विभक्तिरनुशिष्टा, तदर्थस्य तत्रैवान्वयः" इति व्युत्पत्तेरावश्यकतया न पचति चैत्र इत्यादितः पाकानुकूलकृत्यभावबोधो नोपपद्यते। प्रथमान्तार्थनिष्ठकृत्यादेस्तव मते प्रत्ययार्थतया तस्या नञर्थान्वयायोगात्।

किञ्च पूर्वमीमांसका अपि भावनामुख्यविशेष्यकमेव बोधमुपवर्णयन्ति। तथाच जैमिनेः सूत्रं "तद्भूतानां क्रियार्थेन समाम्नायोऽर्थस्य तन्निमित्तत्वात्" इति। "धातुसम्बन्धे प्रत्ययाः" इति पाणिनेः सूत्रमपि भावनामुख्यविशेष्यकमेव बोधमुपोद्बलयति। मीमांसका भावनायाः प्रत्ययवाच्यतां स्वीकुर्वन्तीत्यन्यत्। न ह्येवं प्रथमान्तार्थविशेष्यकबोधस्वीकारे गोतमानुभवोऽस्ति। प्रत्युत "क्रियाकालयोगाभिधायि आख्यातं, धात्वर्थमात्रं च कालाभिधानविशिष्टम्" इति पञ्चमे न्यायभाष्योक्त्या, "विशेषणविशेष्यभावस्यैकविषयत्वाद्यदि गोशब्दस्य तिष्ठतिशब्दस्य चैकमभिधेयं भवति, ततो

विशेषणविशेष्यभावापन्नयोर्गोशब्दतिष्ठतिशब्दयोः सामानाधिकरण्यं युज्यते नान्यथा" इति "जात्याकृतिव्यक्तयस्तु पदार्थः" इति गोतमसूत्रे न्यायवार्तिककारोक्त्या च कारकस्य तिङ्प्रत्ययार्थत्वं विशेषणत्वं च स्पष्टमेवोक्तम्। अत ऋष्यनुभवविरुद्ध एवायं नव्यनैयायिकानुभवः। तथा च -

कृतिरेव तिङर्थ इष्यते प्रथमान्तार्थविशेष्यकश्च बोधः।
इति तर्कमतं त्वयुक्तमेव स्मृतिशास्त्रार्थविरोधदर्शनात्।।

इति बोध्यमित्यलम्।

(स्वसिद्धान्ते बोधस्वरूपनिरूपणम्)

क्तिन्त्वाख्यातार्थकर्तृप्रकारकबोधे धातुजन्योपस्थिति र्भावनात्वावच्छिन्न-विषयतया हेतुरिति कार्यकारणभावो द्रष्टव्यः। भावनाप्रकारकबोधं प्रति तु कृज्जन्योपस्थितिवद्धात्वर्थभावनोपस्थितिरपि हेतुः, पश्य मृगो धावति, पचति भवतीत्याद्यनुरोधादिति दिक्।

इत्थं च पचतीत्यत्र एकाश्रयिका पाकानुकूला भावना, पच्यत इत्यत्र एकाश्रयिका या विक्लित्तिस्तदनुकूला भावनेति बोधः। देवदत्तादिपदप्रयोगे तु आख्यातार्थकर्त्रादिभिस्तदर्थस्याभेदान्वयः। घटो नश्यतीत्यत्रापि घटाभिन्नाश्रयको नाशानुकूलो व्यापार इति बोधः। स च व्यापारः प्रतियोगित्वविशिष्टनाशसामग्री-समवधानम्। अत एव तस्यां सत्यां नश्यतीति, तदत्यये नष्ट इति, तद्भावित्वे नङ्क्ष्यतीति प्रयोगः। देवदत्तो जानातीच्छतीत्यादौ च देवदत्ताभिन्नाश्रयको ज्ञानेच्छाद्यनुकूलो वर्तमानो व्यापार इति बोधः। स चान्तत आश्रयतैवेति रीत्योह्यम्।। ।।२।।

एवं प्रथमान्तार्थविशेष्यकबोधवादिनां मतं दूषयित्वा स्वसिद्धान्तनिष्कर्षमाह - [किन्त्विति] - कर्तृग्रहणं कर्मणोऽप्युपलक्षणम्। फलांशमादाय व्यभिचारवारणायोपस्थितिविशेष्यतां विशिनष्टि [भावनात्वेति] [द्रष्टव्य इनि] ननु क्रियाविशेष्यकबोधाभ्युपगमे चैत्रः पचतीत्यादितश्चैत्रः पाकभावनावान् नवा इति संशयानुत्पादस्यानिर्वाहः। किञ्च चैत्रः पचतीत्यादौ पाकत्वावच्छेदेन चैत्राश्रयकत्वस्य बाधेन पाकत्वसामानाधिकरण्येनैव तदन्वयो वाच्यः। तथा च तस्मिन् पचत्यपि चैत्रो न पचतीति प्रयोगापत्तिः। न च नञ्समभिव्याहारे पाकत्वावच्छेदेन, तदसमभिव्याहारे तत्सामानाधिकरण्येन चान्वयाभ्युपगमान्न दोष इति वाच्यम्। प्रतियोग्यभावान्वयस्य तुल्ययोगक्षेमत्वव्यवस्थापनेन

नञ्सत्त्वासत्त्वाभ्यां प्रकारभेदाश्रयणासम्भवात्। किञ्च न पचति चैत्र इत्यादितश्चैत्रकर्तृकपाकाभाव इति नञर्थाभावविशेष्यकबोधस्यैव जायमानत्वेन त्वत्सिद्धान्तभङ्गः। किञ्च चैत्रः पचति चैत्रो न पचतीत्यादितो जायमानज्ञानानां परस्परं प्रतिबन्ध्यप्रतिबन्धकभावानिर्वाहः। निर्धर्मिकज्ञानानां परस्परं प्रतिबन्ध्यप्रतिबन्धकत्वाभावात्। नहि घटवद्भूतलं घटाभाववद्भूतलमित्यत्रेव घटः घटाभाव इति ज्ञानयोः प्रतिबन्ध्यप्रतिबन्धकभावोऽस्ति। चैत्रकर्तृकपाकभावना चैत्रकर्तृकपाकभावनाभाव इति ज्ञानयोर्निर्धर्मिकयोस्तदनिर्वाहः स्पष्ट एव। प्रथमान्तार्थमुख्यविशेष्यकबोधवादिनां तु न काप्यनुपपत्तिः। अतः क्रियामुख्यविशेष्यकबोधाभ्युपगमो न युक्त एवेति चेत्। न। तुल्यवित्तिवेद्यतया पाकभावनावान्, नवेति संशयस्य निरासात्। यास्कभाष्यकारादिवचनबलेन प्रतियोग्यभावौ तुल्ययोगक्षेमाविति व्युत्पत्तेः संकोचकल्पनाच्च। सर्वत्र नञ आरोपितत्वद्योतकत्वस्य "नञ्" सूत्रस्थभाष्यसम्मततया, द्योत्यार्थस्य विशेषणताया एव "हेतुमति च" इति सूत्रस्थाकरसम्मततया न पचति चैत्र इत्यादितश्चैत्रकर्तृकाऽऽरोपिता पाकक्रियेति क्रियामुख्यविशेष्यकबोधस्यैवाभ्युपगमाच्च। अत एव "न कलञ्जं भक्षयेत्" इत्यादौ नानुपपत्तिः। अन्यथा कलञ्जभक्षणाभावः प्रेरणाविषय इति बोधे प्रत्ययानां स्वप्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तिभङ्गः। आरोपितत्वस्य नञर्थत्वे तु आरोपितकलञ्जभक्षणं प्रेरणाविषय इति बोधलाभेन न तद्व्युत्पत्तिभङ्गः। स्पष्टं चेदं निपातार्थवादे मञ्जूषायाम्। अभावबोधस्त्वार्थ इति त्वन्यत्। आरोपितार्थविषयकबोधमादायैव ज्ञानानां प्रतिबन्ध्यप्रतिबन्धकत्वनिर्वाहो बोध्यः। वस्तुतस्तु ज्ञानानां परस्परं प्रतिबन्ध्यप्रतिबन्धकत्वं नास्त्येव, यत्र ज्ञानेऽप्रामाण्यनिश्चयस्तस्य न प्रवर्तकत्वनिवर्तकत्वे इति स्वीकारादोषः। न च चैत्रः पचतीत्यादौ आख्यातार्थाश्रयस्य क्रियायामाधेयतासम्बन्धेनान्वयो वाच्यः, स च न सम्भवति, आधेयतासम्बन्धस्य वृत्त्यनियामकतयाऽभावप्रतियोगितानवच्छेदकत्वादिति वाच्यम्। द्रव्यं गच्छति, नाऽभावमित्यादिप्रयोगानुरोधेन वृत्त्यनियामकसम्बन्धस्याप्यभाव-प्रतियोगितावच्छेदकत्वस्वीकारात्। एवं च धात्वर्थभावनामुख्यविशेष्यकशाब्दबोधस्वीकारे न किञ्चिद्बाधकम्। किञ्च प्रथमान्तार्थमुख्यविशेष्यकशाब्दबोधवादिनां मते रागिणः कलञ्जभक्षणवर्तमानतादशायां चैत्रः कीदृश इति प्रश्ने इष्टोत्पत्तिनान्तरीयककलञ्जभक्षण-दुःखाधिकदुःखजनककलञ्जभक्षणवानित्युत्तरवत् "न कलञ्जं भक्षयेत्" इत्युत्तरं वक्तुरसम्बद्धप्रलापित्वानापत्तिः, धर्मिविशेष्यकप्रश्ने धर्मिविशेष्यकस्य समाधानस्यात्रानुकूलत्वात्। भावनाविशेष्यकबोधवादिनां मते इच्छायाः प्रवर्तनाया वा स्वज्ञानविशेषजन्यानुमितिसंपादितप्रवृत्तिसामग्र्यभावकालिकाभावप्रतियोगित्वसम्बन्धेन कृतावन्वयान्न तदापत्तिरिति वैषम्यम्। किञ्च चैत्रः कीदृश इति प्रश्नस्य "न कलञ्जं भक्षयेत्" इति नैवोत्तरं भवितुमर्हति, प्रथमान्तार्थमुख्यविशेष्यकत्वाभावात्। कीदृशी कृतिरिति प्रश्नस्यापि नेदमुत्तरम्,

लिङ्गधर्मितावच्छेदकप्रश्ने तदनालिङ्गितोत्तरस्यासम्बद्धत्वात्। अत एव कीदृशी कृतिरिति प्रश्नस्यापि चैत्रः पचति, चैत्रो न पचतीत्यादि नैवोत्तरम्, लिङ्गानालिङ्गितत्वात्। अतः प्रथमान्तार्थमुख्यविशेष्यकत्वे तादृशोत्तरस्यासम्बद्धत्वानापत्तिरनुद्धृतैव स्यात्। स्पष्टं चेदं भाट्टरहस्ये।

तस्माद्भावनामुख्यविशेष्यकशाब्दबोधस्वीकारेबाधकाभावात्, प्रथमान्तार्थमुख्य-विशेष्यकशाब्दबोधस्वीकारे बाधकबाहुल्यसत्त्वाच्च भावनामुख्यविशेष्यकशाब्दबोधस्वीकार एव ज्यायानित्यादि विस्तरेण निरूपितं नागेशभावप्रकाशे मञ्जूषाव्याख्याने।

ननु धात्वर्थव्यापारस्य कृदर्थविशेषणत्वं, न तु तिङ्विशेषणत्वमित्यनुभवानुरोधेन धात्वर्थभावनाप्रकारकशाब्दबुद्धित्वावच्छिन्नं प्रति विशेष्यतया कृज्जन्योपस्थितेः कारणत्वमिति कार्यकारणभावस्यावश्यकतया पचति भवति, पश्य मृगो धावतीत्यादौ कारणाभावाद्व्यापारप्रकारकशाब्दबोधानुपपत्तिरेवेत्यत आह [भावनाप्रकारकेति] [कृज्जन्येति] पाचक इत्यादितः पाकानुकूलव्यापाराश्रय इति प्रत्ययार्थविशेष्यकबोधोत्पत्त्या तादृशकार्यकारणभावः स्वीक्रियते, तद्वदिति भावः। तत्स्वीकारे मानं दर्शयति - [पश्येति] - "क्रियापि कृत्रिमं कर्म" "पचादयः क्रिया भवतिक्रियायाः कर्त्र्यो भवन्ति" इति भाष्यमेव तादृशकार्यकारणभावस्वीकारे मानमिति भावः।

ननु "क्रिया क्रियया समवायं न गच्छति, पचति पठतीति" इति यग्विधायकसूत्रस्थभाष्योक्त्या क्रियानिरूपितकर्मादिसंज्ञासमानाधिकरणशक्तिभिः क्रिया सम्बन्धं न गच्छतीत्यर्थिकया क्रियायाः क्रियान्तरे कारकत्वेनान्वयायोगात्पश्य मृगो धावतीत्यादिप्रयोगस्यैवासम्भवात्तदनुरोधेन निरुक्तकार्यकारणभावस्वीकारो मुधैवेति चेत्।

न। आख्यातार्थवाच्यक्रियायाः कर्तृकर्मातिरिक्तकारकभावेन क्रियान्तरे नान्वय इत्याशकतया यग्विधायकसूत्रस्थभाष्यस्य पश्य मृगो धावति, पचति भवतीत्यादौ पाकधावनयोः कर्तृकर्मभावेनान्वये बाधकाभावात्। अत एव पूर्वोक्तसंप्रदानसंज्ञासूत्रस्थधातुसंज्ञासूत्रस्थभाष्यविरोधो न। पाको भवतीत्यर्थे पचति भवतीतिवत्। धावनं पश्येत्यर्थे धावति पश्येतिवच्च 'पाकेन वैरं कृतं' 'पाकाय कालो नीतः' इत्यर्थे पचति वैरं कृतं, पचति कालो नीत इत्यादेरप्रयोगात् करणत्वोद्देश्यत्वादिना क्रियायाः क्रियान्तरे नान्वयः। कर्तृत्वकर्मत्वाभ्यामन्वये न किञ्चिद्बाधकम्। तत्र च क्रियायाः कर्तृत्वं भवनाद्यर्थ एव। अत एव पाको नश्यतीत्यर्थे पचति नश्यतीत्यादयो न प्रयोगाः। कर्मत्वं तु सर्वत्र क्रियायाम्। अत्र च शब्दशक्तिस्वभाव एव बीजम्। स्पष्टं चेदं "साध्यत्वेन क्रिया तत्र" इति कारिकाव्याख्याने भूषणे। तदेतन्मनसि निधायाह [दिगिति] उक्त एव तदर्थः।

एवं प्रकृतिप्रत्ययार्थं तत्र विशेषणविशेष्यभावं च प्रदर्श्य, केवलतिङन्तप्रयोगे बोधाकारं दर्शयति [इत्थं चेति] आख्यातार्थप्रकारकबोधं प्रतीत्यादिकार्यकारणभावस्वीकारेण प्रत्ययार्थस्य विशेषणत्वसमर्थने चेत्यर्थः। [भावनेति] कर्तृतिङ्समभिव्याहार इव कर्मतिङ्समभिव्याहारेऽपि धात्वर्थभावनाविशेष्यक एव बोधः। "भावप्रधानमाख्यातम्" इति निरुक्तवचनानुरोधात्, व्युत्पत्त्यन्तरकल्पने मानाभावादित्याशयेन कर्मतिङन्तेऽपि भावनाविशेष्यकमेव बोधं दर्शयति [पच्यत इत्यत्रेति] पक्वस्तण्डुल इत्यादौ कर्मकृदन्ते तु फलव्यापारयोर्विशेषण-विशेष्यभावव्यत्यासस्वीकारा द्धातुतः फलविशेष्यक एव बोधः, अन्यथा तण्डुलादिना सामानाधिकरण्यानापत्तिः। तत्र हि व्यापारजन्यविक्लित्त्याश्रयाभिन्न इति हि बोधः। निरूपितं चैतत्प्राक्।

(भावाख्याते बोधनिर्णयः)

भावाख्याते तु भावनैव प्रधानम्, प्रत्ययस्तु प्रकृत्यर्थानुवादक एव। तिङन्नूद्यमानाया असत्त्वभूतक्रियायाः सत्त्वार्थकयुष्मदादिसामानाधिकरण्याभावात्प्रथमपुरुष एव। अत एव सङ्ख्यासम्बन्धाभावान्न द्विवचनबहुवचने। किन्त्वौत्सर्गिकमेकवचनमेव। यथा चैत्रेण चैत्राभ्यां वा सुप्यते इत्यादौ। चैत्रकर्तृकः स्वापः, द्वित्वविशिष्टचैत्रकर्तृकः स्वाप इति बोधः। उष्ट्रासिका आस्यन्ते, हतशायिकाः शय्यन्त इत्यादौ भावाख्याते भाष्यप्रयोगाद्बहुवचनम्। अयं च प्रयोगो यग्विधायके भाष्य इति भूषणकृदादयः।

यग्विधायके दीक्षितस्त्वेवमभिप्रैति - उष्ट्रासिका आस्यन्ते, हतशायिकाः शय्यन्त इत्यत्रोष्ट्राणामनेकप्रकारयुक्तान्यासनानि, तादृशानि दैवदत्तादिकर्तृकाण्यासनानि। यादृशानि हतानामनेकप्रकारयुक्तानि शयनानि तादृशानि देवदत्तादिकर्तृकाणि शयनानीत्यर्थः। अत्र स्त्र्यधिकारे धात्वर्थनिर्देशे ण्वुल्। उष्ट्राणां ह्यासिकाः स्वरूपत एव विलक्षणाः। हताश्चोत्ताना अवताना विकीर्णकेशा विस्रास्तावस्त्रा नानाप्रकारं शेरते। तत्साम्यादाख्यातवाच्यस्यापि भावस्य स्वरूपकृतस्वगतभेदावभासाद्बहुवचनम्। इवशब्दप्रयोगमन्तरेणापि इवार्थावगतिर्भवति। "परत्र परशब्दः प्रयुक्तः" इति न्यायात् इति। कौस्तुभे "तत्साम्यादाख्यातवाच्यस्यापि भावस्य स्वगतभेदावभासाद्बहुवचनं भवत्येव" इति दीक्षितोक्त्या "आश्रयाणामुष्ट्राणां भेदादनेकप्रकारयुक्तान्यासनानि भिन्नानि तत्साम्याच्चाख्यातवाच्यभावभेदादास्यन्त इति बहुवचनम्" इति यग्विधायकसूत्रस्थकैयटोक्त्या च भावे लकारेऽपि यत्र भावभेदे गमकं तत्र बहुवचनं भवत्येव। यथा - प्रकृते उपमानबहुत्वेनोपमेयेऽपि तत्प्रतीतेः। अन्यथोपमाने बहुत्वोपादानं व्यर्थं स्यात्। न ह्येकासने तावत्साम्यसम्भवस्तत्प्रतिपादने फलं चास्ति। भावभेदे गमकाभावे तु औत्सर्गिकमेकवचनमेवेति लभ्यते।

मञ्जूषाकारास्तु हतशायिकाश्शय्यन्ते उष्ट्रासिका आस्यन्त इत्यत्र कैयटकौस्तुभोक्तरीतिमनुवदन्तः चैत्रेण शय्यत इत्यादावेकवचनस्योत्पत्तौ विभिन्नां रीतिमाश्रयन्ति। तथाहि - "एका क्रिया" "भावः पुनरेक एव" इति रूपप्सूत्रस्थयग्विधायकसूत्रस्थभाष्यप्रामाण्यात् क्रियायामेकत्वसत्त्वेन तदादाय भावे लकार एकवचनम्। औत्सर्गिकैकवचनं तु न प्रवर्तते। तद्धि सत्येव गमके प्रवर्तते। यथा - अव्ययेभ्यस्तदुत्पत्तौ "अव्ययादाप्सुपः" इति सूत्रं गमकम्। नान्यत्र, एकवचनमिति महासंज्ञाकरणात्। प्रकृते तु न तदुत्पत्तौ गमकमस्ति। अत एव ङ्याप्सूत्रस्थं भाष्यं सङ्गच्छते। तत्र हि प्रातिपदिकाधिकाराभावे तिङन्तेभ्यः स्वाद्युत्पत्तिमाशङ्क्य "एकत्वादीनामुक्तत्वान्न" इति समाहितम्। अन्यथौत्सर्गिकैकवचनस्य ततो दुर्वारतया तदसङ्गतिः स्पष्टैव। हतशायिकाः शय्यन्त इत्यादौ धात्वर्थभावगतबहुत्वमादाय बहुवचनम्। पचतः, पचन्ति, पच्येते, पच्यन्ते इत्यादौ कर्तृकर्मलकारेऽपि स्वोत्तरप्रत्ययवाच्यसाधनगतद्वित्वबहुत्वयोः प्रकृत्यर्थक्रियायामारोपात्तद्गतारोपितद्वित्व-बहुत्वनिमित्तके द्विवचनबहुवचने प्रवर्तेते। पचति, पच्यत इत्यत्र तु क्रियागतैकत्वमादायैवैकवचनम्। आख्यातार्थसङ्ख्याया धात्वर्थक्रियायामेवान्वयः। कस्यैकत्वे इत्याद्याकाङ्क्षायां प्रकृत्यर्थस्यैवोपस्थितत्वात्तत्रैव तदन्वयस्यौचित्यात्। अत्रार्थे समनन्तरोदाहृतं ङ्व्याप्सूत्रस्थं भाष्यमपि मानम्। अन्यथा साधनगतसङ्ख्यायास्तिङोक्तावपि प्रकृत्यर्थक्रियागतसङ्ख्याया अनुक्त्या तद्बोधनाय तिङन्तात्सुपो दुर्वारतया तद्भाष्यासङ्गतिः स्पष्टैव। उक्तं च हरिणा -

"एकत्वेऽपि क्रियाख्याते साधनाश्रयसङ्ख्यया।
भिद्यते, नतु लिङ्गाख्यो भेदस्तत्र तदाश्रयः।। इति।

अत्र हेलाराजः - "एकपदोपात्तकर्तृकर्मलक्षणसाधनाधारकद्वित्वबहुत्वाभ्यां पचतः पचन्ति पच्येते पच्यन्त इति क्रिया विशेष्यते। तेन हि द्विबहुसाधनसाध्यत्वं प्रतीयते क्रियायाः। एवं तद्गतलिङ्गयोगो न, शब्दार्थप्रतीतेः स्वाभाविकत्वेन युक्त्यगम्यत्वात्। अत एव देवदत्तः पचतीति द्रव्येण क्रियायाः सामानाधिकरण्यम्" - इति। तथा "सम्बन्धाज्ञायभेदोऽयम्" इति हरिकारिकाप्रतीक मुपादाय "यथा - आख्याते प्रत्ययवाच्यकारकभेदे तत्सम्बन्धाद्धात्वर्थक्रियाया अपि भेदः प्रतीयते। यथा - पचतः पचन्ति" इति पुञ्जराजः - इति।

दर्पणकारास्तु - औत्सर्गिकैकवचनस्य समयपरिपालनार्थकतया तत्र गमकाकाङ्क्षाया अभावेन "गमके सत्येव" इत्युक्तिर्व्यर्था। यदपि गमकतया ङ्याप्सूत्रस्थभाष्योपन्यसनं, तत्तथैव। तथाहि - ङ्याप्सूत्राभावे तिङन्तात्सुबुत्पत्तिशङ्का प्रत्ययार्थसाधनगतसङ्ख्यामादाय, प्रकृत्यर्थगतसङ्ख्यामादाय वा

वक्तव्या। तत्र प्रकृत्यर्थस्यासत्त्वरूपतया सङ्ख्यान्वयायोगात् कारकगतसङ्ख्यामादायैव प्रसक्ता। सा तिङोक्तत्वादित्यनेन निराक्रियते। समयपरिपालनस्य तिङैव कृतत्वात्तदप्राप्त्यैव तन्निराकरणस्याप्रसक्तेः। "सुप्तिङन्तं पदम्" "तिङ्ङतिङः" इत्यादिस्वारस्यादुक्तार्थज्ञापनापेक्षया तिङन्तादौत्सर्गिकैक-वचनाभावस्यैव तेन ज्ञापयितुमुचितत्वाच्च, "एका च क्रिया" इति भाष्यमपि न क्रियाया मेकत्वं बोधयति, किन्तु सङ्ख्यासामान्याभावमेव। कथमन्यथा साधारणैकवचनेनैव उपपत्तौ वचनारम्भसार्थक्यम्। किञ्चोपमाने बहुत्वोपादानसामर्थ्येनेति वदता कारके द्वित्वाद्युपादानसामर्थ्येनेत्युक्तप्रायम्। एवं च हतशायिका इत्यत्रोपमाने बहुत्वोपपादकबहुवचनवत् प्रकृते कारके कस्यचिद् द्वित्वाद्युपपादकस्याभावात्तदारोपासम्भवः। भावाख्याते स्वोत्तरतिङ्वाच्यकारकाप्रसिद्ध्या द्विवचनाद्यसम्भवश्च। कस्यैकत्वे इत्याकाङ्क्षायां योग्यजिज्ञास्यसम्बन्धिन्या एवौचित्यात् क्रियाया असत्त्वेन परिच्छेदकाकाङ्क्षाया एवासम्भवेन तत्र तदन्वयोक्तेः पराहतत्वाच्च। किञ्च "एकत्वेऽपि" इति वाक्यपदीयस्यापि क्रियाया एकत्वेऽपि सङ्ख्यासामान्याभाववत्त्वेऽपि, क्वचित्सा कर्तृकर्मादिबाहुल्येन नानेव प्रतीयत इत्यर्थान्न तद्विरोधोऽपि। ततः शब्दमर्यादया धात्वर्थे तिङर्थसङ्ख्यान्वय इत्यर्थस्यालाभाच्च। अत एव कैयटादिभिस्तिङर्थसङ्ख्यायाः कारक एवान्वयः स्वीकृतः। एवं च भाष्यकारप्रयोगादन्यत्र भावाख्याते द्विवचनाद्यसाध्वेव - इति वदन्ति।

अत्रेदं चिन्त्यम्। द्विबह्वोर्द्विवचनैकवचने। एकवचनमित्येकग्रहणराहित्येन पृथग्योगारम्भेऽपि एकं वक्तीत्येकवचनमिति महासंज्ञाकरणवैयर्थ्यान्न सार्वत्रिकं सङ्ख्यानपेक्षमेकवचनं, किन्तु गमकाधीनमेव। किञ्च यथा न्यायनये गुणत्वाद् द्रव्यगताया एव सङ्ख्याया आरोपेण गुणादौ द्वित्वादिव्यवहारस्तथा साधनगतसङ्ख्याया आरोपेण क्रियायां द्वित्वादिव्यवहार उपपद्यते। किञ्च तिङन्तार्थक्रियाया अपि किमादिभिः परामर्शात्सुखमित्यादिभिर्विशेषितत्वाच्च द्रव्यत्वेन तत्र सङ्ख्यान्वये बाधकाभावः। अत एव "द्रव्यवादिनाऽऽख्यातार्थोऽपि द्रव्यमिति स्वीकार" इति हेलाराजः। क्रियायां तदयोग्यत्वव्यवहारस्तु अनारोपितसर्वसङ्ख्याश्रयत्वेन बोध्यः। एवं च कारकगतायास्तिङोक्तावपि क्रियागतायास्तस्या अनुक्ततया प्रातिपदिकाधिकाराभावे तिङन्तात्तदापत्तिर्दुर्वारा। अतस्तस्याः प्रकृत्यर्थक्रियायामेवान्वयो वाच्यः। किञ्च दर्पणोक्तरीत्या क्रियायां सङ्ख्याभावात् "विभक्त्यर्थकर्तुर्लिङ्गानन्वयिनोऽद्रव्यतया तत्र सङ्ख्यान्वयायोगात्" इति "अपि चाख्यातार्थप्राधान्ये" इत्यादिसमनन्तरगतग्रन्थावतरणस्थस्वोक्तरीत्या प्रत्ययार्थस्याऽद्रव्यतया तत्र सङ्ख्यान्वयाभावाच्च यद्गतसङ्ख्यामादाय तिङन्ताद्भाष्यकृतः सुबुत्पत्तिशङ्केति त एव प्रष्टव्याः। किञ्च प्रातिपदिकाधिकाराभावे प्रकृतेः परः प्रत्यय इत्यर्थलाभेन अन्यानभिहितसङ्ख्याकारकबोधकतावच्छेदकावच्छिन्नत्वस्यैव प्रकृतित्वेन, त्वद्रीत्या तिङो

धात्वर्थक्रियागतसङ्ख्याबोधकत्वेन, सुपां च प्रकृत्यर्थविशेष्यगतसङ्ख्याबोधकत्वेन च निरुक्तप्रकृतित्वस्य तिङन्ते सत्त्वे बाधकाभावेन "न केवला प्रकृतिः" इति नियमपरिपालनस्य त्वदुक्तरीत्या पचिधातोरुत्पन्नतिङा कर्तुमशक्यतया तिङन्तादौत्सर्गिकैकवचनस्य दुर्वारतया तद्भाष्यासङ्गतिर्दुष्परिहरैव। अतस्तद्भाष्यमौत्सर्गिकैकवचनस्य गमके सत्येव प्रवृत्तौ मानं भवितुमर्हत्येव। एवं च "सुप्तिङन्तम्" इत्यादिसूत्राणामपि निरुक्तार्थज्ञापकत्वमेव युक्तम्। किञ्च "एका क्रिया" इति भाष्यं क्रियायामाकाश इव एकत्वसत्त्वमवगमयति, न सङ्ख्यासामान्याभावम्। अत एव "न द्वित्वादिमती" इति तदुत्तरभाष्यं स्वरसतः सङ्गच्छते। अतएव "यद्येका कथं द्विवचनादि, पचतः पचन्ति" इति द्विवचनाद्यनुत्पत्तिशङ्का भगवतः सङ्गच्छते। अन्यथा तद्भाष्यस्य क्रियायां सङ्ख्यासामान्याभावतात्पर्यकत्वे एकवचनांशेऽपि तच्छङ्काकरणध्रौव्ये तदकरणस्य द्विवचनाद्यंश एव पार्थक्येन तत्करणस्य च निर्दलतापत्तिः स्पष्टैव। अत एव "कर्मानेकं भावः पुनरेक एव" इति यग्विधायके भाष्ये एवकारेण क्रियायामेकत्वं ध्वनितं सङ्गच्छते। एवं च क्रियायां स्वाभाविकमेकत्वमादाय भावे लकारे एकवचनं न त्वौत्सर्गिकम्। अत एवाव्ययेभ्यः सङ्ख्याद्यभावाद्वचनाद्यनुत्पत्तिमाशङ्क्यैव औत्सर्गिकमेकवचनमुक्तं भाष्ये, नतु भावार्थेभ्योऽपि तदनुत्पत्तिमाशङ्क्य। साधारणैकवचनेनैवोपपत्तौ वचनारम्भोऽप्यव्ययार्थ एव। किञ्च हतशायिकाः शय्यन्त इत्यत्र तिङ्वाच्यकारकगतसङ्ख्याया अभावेऽपि उपमाने बहुत्वोपादानात्तत्सामर्थ्याच्छयनक्रियायां बहुत्वावगत्या तद्गतं बहुत्वमादाय बहुवचनम्। किञ्च पूर्वोक्तरीत्या क्रियायां सङ्ख्यासत्त्वात् कस्यैकत्व इत्याकाङ्क्षायां प्रकृत्यर्थान्वय एव युक्तः। "द्व्येकयाः" इत्यादीनां "लः कर्मणि" इत्यादिना एकवाक्यतापि "लकाराः कर्मादौ भवन्ति, तेषां स्थाने एकत्वादौ तिबादयो भवन्ति" इत्येवंरूपा। अतो न कर्मादिगतैकत्वादौ तिङां विधानमिति न कर्मादौ तिङर्थसङ्ख्याया अन्वयः। पचतीत्यादिजन्यबोधोत्तरं जायमानस्य सर्वसिद्धैकत्वादिवैशिष्ट्येन जिज्ञास्यकारकबोधकस्य 'कः कौ' इत्यादिप्रश्नस्य तु न मानत्वमारोपमूलतया कर्तुरप्येकत्वावगत्या तयैव तत्सिद्धेः। हरिग्रन्थस्य चायमर्थः - क्रिया आख्याते एकत्वेऽपि एकत्वसत्त्वेऽपि, साधनाश्रयसङ्ख्यया भिद्यते आरोपितसङ्ख्या भवति। तदाश्रयः साधनसम्बद्धः, लिङ्गाख्यो भेदस्तु तत्र = क्रियायां, न। आरोप्यत इति शेषः। एवंच स्पष्टमेव साधनगतसङ्ख्यायाः क्रियायामारोपोऽनेन लभ्यते। किञ्च "नानेव प्रतीयते" इति दर्पणकारोक्तिरपि अस्मत्पक्षमेवोपोद्बलयति। यतो द्वित्वादेः क्रियायां स्वतोऽभावेपि आरोप्यते तदित्यस्माभिरभ्युपगम्यते। एवं च सङ्ख्यायाः क्रियायामन्वये न किञ्चिद्बाधकम्। अत एव पचति भवतीत्यादौ तिङर्थसङ्ख्याया भवतिक्रियायामन्वयः सङ्गच्छते। कर्त्रादौ सङ्ख्यान्वयवादिनां त्वत्र सङ्ख्यान्वयो दुरुपपाद एवेत्यलम्।

देवदत्तादिपदप्रयोगे बोधप्रकारं दर्शयति [देवदत्तादीति] आदिना तण्डुल इत्यादेर्ग्रहणम्। कर्त्रादिभिरित्यत्रादिपदेन पच्यते तण्डुलश्चैत्रेणेत्यादौ तिङर्थकर्मणो ग्रहणम्। तदर्थस्य = प्रथमान्तार्थस्य। [अभेदान्वय इति] अभेदबोधे समानविभक्तिकत्वं तन्त्रमिति तु पूर्वं दूषितमेव। एवं सकर्मकधातुप्रयोगे बोधप्रक्रियामुक्त्वा अकर्मकधातूनां केवलफलवाचित्वस्वीकारो नैयायिकानामयुक्त इति सूचयंस्तत्र बोधप्रकारमाह [घटो नश्यतीति] [नाशानुकूल इति] नाशः फलं, तदनुकूलो व्यापारश्च धात्वर्थ इति भावः। ननु चिरविनष्टेऽपि घटे नश्यतीति प्रयोगापत्तिः, नाशस्य नित्यत्वात्। नष्ट इति भूते प्रयोगानापत्तिश्चेत्यत आह [स च व्यापार इति] - नाशानुकूलो व्यापारश्चेत्यर्थः। ननु अन्यप्रतियोगिकनाशसामग्रीसमवधानेऽपि घटो नश्यतीति प्रयोगापत्तिरत आह [प्रतियोगित्वेति] स्वप्रतियोगित्वेत्यर्थः। [विशिष्टेति] स्वं घटादिः, तत्र स्वरूपसम्बन्धेन नाशप्रतियोगिता। सामानाधिकरण्यसम्बन्धेन तद्विशिष्टा या दण्डाद्यभिघातरूपा सामग्री, तस्याः समवधानं स्थितिः। तथा च प्रतियोगितासमानाधिकरणव्यापारो नशेरर्थः। स च व्यापारः, प्रतियोगितासम्बन्धेन। नाशरूपं फलं च घटे वर्तते इति नशेरकर्मकत्वमिति बोध्यम्। तादृशव्यापारार्थकत्वे फलं दर्शयति [अत एवेति] सामग्र्यां सत्यां वर्तमानकालावच्छिन्नायाम्। सामग्रीरूपव्यापारे धात्वर्थे तिङर्थकारकान्वयस्वीकारेण व्यापारगतवर्तमानत्वमादाय नश्यतीति, तद्भावित्वे नङ्क्ष्यतीति, तदत्यये ननाशेति च प्रयोगा उपपद्यन्ते। नशधातोस्तादृशव्यापारार्थकत्वाभावे तद्विलक्षणप्रयोगानुपपत्तिः स्पष्टैव। एवं च सर्वदा नश्यतीति प्रयोगापत्तिर्नेत्याशयः। सविषयकधातूनां जानात्यादीनां केवलज्ञानादिव्यापारार्थकत्वं नैयायिकोक्तमयुक्तमिति सूचयंस्तत्समभिव्याहारे बोधं दर्शयति [देवदत्तो जानातीति] "आदिना इच्छते र्ग्रहणम्। जानातीत्यादावित्येव पाठः" इति दर्पणकृत्। बहुषु पुस्तकेषु "देवदत्तो जानातीच्छतीत्यादौ च" इत्येव पाठो दृश्यते। तत्रादिपदेन करोतेर्ग्रहणम्। [व्यापार इति] सचाऽऽत्ममनःसंयोगरूप एव। तदनुसन्धानाभावे त्वाह - [आश्रयतैवेति] क्रियात्वं निर्वाह्यम्। एवंच घटं जानातीत्यत्रख्यातस्याश्रयत्वे घटमित्यत्र द्वितीयाया विषयत्वे च लक्षणा, घटविषयकज्ञानाश्रय इति बोध इति नैयायिकोक्तमयुक्तमेवेति बोध्यम्। आकाशोऽस्तीत्यादौ चैकाकाशाश्रयकः स्वस्वरूपधारणानुकूलो व्यापार इति बोध इत्यादि बोध्यम्। तदाह [ऊह्यमिति]-

नन्वाख्यातस्य कर्तृकर्मशक्तत्वे पचतीत्यत्रोभयबोधापत्तिः। कर्तृमात्रबोधवत् कर्ममात्रस्यापि बोधापत्तिरित्यतस्तात्पर्यग्राहकमाह -

फलव्यापारयोस्तत्र फले तङ्यक्चिणादयः।
व्यापारे शप्श्नमाद्यास्तु द्योतयन्त्याश्रयान्वयम्।। ।।३।।

तङादयः फल आश्रयान्वयं द्योतयन्ति, फलान्वय्याश्रयस्य कर्मत्वात्। तद्द्योतकाः = कर्मद्योतकाः। व्यापारान्वय्याश्रयस्य कर्तृत्वात् तद्द्योतकाः = कर्तृद्योतका इति समुदायार्थः। द्योतयन्ति = तात्पर्यं ग्राहयन्ति।

[उभयबोधापत्तिरिति] चैत्रस्तण्डुलं पचति, चैत्रेण पच्यते तण्डुल इत्यादावाख्यातात्कर्तृ-कर्मरूपार्थद्वयबोधापत्तिः। "आश्रये तु तिङः स्मृताः" इत्यनेन तिङ्मात्रस्याश्रय-मात्रार्थकत्वबोधनलाभादिति भावः। ननु पच्यमान इत्यत्र कर्मणि यक्, कर्तरि लकार इत्यस्त्वित्याशङ्क्य "प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतः, न चास्ति सम्भवो, यदेकस्याः प्रकृतेर्द्वयोर्नानार्थयोर्युगपत्सहायीभावः स्यात्" इति "सार्वधातुके यक्" इति सूत्रे भाष्ये उक्तम्। विरुद्धार्थयोर्विकरणलकारयोः प्रकृतेर्विशिष्टार्थप्रतिपादने साहाय्यकाभावात्परस्परानुपकारादप्रयोग एव। प्रकृतिप्रत्ययौ प्रतीयमानमर्थं सह ब्रूतः एकोपस्थितिविषयीकुरुतः, न भेदेनेति तद्भाष्यार्थः। एवं च विरुद्धार्थकप्रत्ययद्वयात्प्रकृतेः साहाय्यासम्भवे सुतरां कर्तृकर्मरूपविरुद्धार्थकैकप्रत्ययात्प्रकृतेर्विशिष्टार्थप्रतिपादने साहाय्यासम्भवात्तादृशप्रयोगस्यासम्भव एव। तथाचाख्यातात्पारिशेष्यादेकार्थविषयक एव बोधो जायत इत्यतो दोषान्तरमाह [कर्तृमात्रबोधवदिति] विरोधादुभयबोधाभावेऽपि पचतीत्यत्र कर्तृमात्रबोधो जायत इति कुतो नियमः। शक्त्यविशेषात्कर्ममात्रबोधः कुतो न जायते। एवं पच्यते तण्डुलश्चैत्रेणेत्यत्र कर्तृमात्रबोधः किं न स्यात्, कर्ममात्रबोध इति कुतो निश्चय इत्याशयः। [तात्पर्यग्राहकमिति] कर्तृमात्रबोधे कर्ममात्रबोधे च तात्पर्यग्राहकमित्यर्थः।

यत्तु - "सकृदुच्चरितः शब्दस्सकृदर्थं गमयति" इति व्युत्पत्तेर्नैकदाऽर्थद्वयबोधोऽत आह - कर्ममात्रेति" इति दर्पणकाराः, तन्न। सकृदुच्चरितः शब्द एकमर्थं बोधयतीत्यर्थस्य तन्न्यायतोऽलाभात्। "क्रियाभ्यावृत्तिगणने" इत्यधिकारे एकशब्दात् सुच्। तस्य सकृदादेशश्चेत्यर्थकेन "एकस्य सकृच्च" ५-४-५९ इति सूत्रेण निष्पन्नस्य सकृच्छब्दस्योक्तार्थकत्वाभावात्। एकवारमिति हि तदर्थः। अत एव तस्य साधुत्वम्। सकृदर्थमेकमर्थमित्यर्थस्वीकारे तु क्रियायोगाभावात् "एकस्य सकृच्च" इत्यस्याप्राप्त्या तस्यासाधुत्वं स्पष्टमेव। अत एकवारमुच्चरितश्शब्दः अर्थम् सकृत् एकवारमेव, गमयति = प्रतीतिं जनयतीति तन्न्यायस्यार्थो वाच्यः। सा च प्रतीतिरेकार्थविषया अनेकार्थविषया वेत्यन्यदेतत्। "गङ्गायां मीनघोषौ स्तः" इत्यादावनेकार्थस्य युगपदुपस्थितेः। स्पष्टं चेदमेकशेषप्रकरणे मञ्जूषायाम्। अतः प्रकृतन्यायोपष्टम्भेनैकदाऽर्थद्वयबोधापत्तिवारणं दर्पणकाराणामसङ्गतमेव। एतेन ननु सकृदुच्चरितन्यायविरोधोऽत आह - "कर्तृमात्रेति" इति पञ्चोलिनोऽपि परास्ताः।

मूले - [तत्रेति] आख्यातार्थशरीरघटकयोरित्यर्थः। [फलव्यापारयो रिति] - तयोर्मध्य इत्यर्थः। "फलव्यापारयोर्धातुः" इति कारिकाग्रन्थेन फलं व्यापारश्च धात्वर्थः, कर्तृकर्मरूपो धर्मः प्रत्ययार्थः। तस्य च कारकस्य धात्वर्थे विशेषणत्वमित्यर्थो निरूपितः। परंतु प्रत्ययार्थस्य धर्मिणः फले कुत्रान्वयः? कुत्र च व्यापारेऽन्वय इति सन्देहे तन्निवर्तनाय तात्पर्यग्राहकप्रदर्शनपरः "फलव्यापारयोस्तत्र" इति प्रकृतकारिकाग्रन्थः। एतेन "उपोद्धातसङ्गत्या शबादीनां द्योतकतां निरूपयितुमाहनन्विति" इति वदन्ते दर्पणकाराः, "पचतीत्यादिपरिनिष्ठितघटको धातु" स्ततो विहिता लडादयस्तेषामर्थाः संक्षेपत उक्ताः। उपोद्धातसङ्गत्या तन्निमित्तकविकरणानां तु द्योतकत्वमित्याह "नन्वाख्यातस्येत्यादिना" इति विवृण्वन्तो भैरवमिश्राश्च परास्ताः। मूलस्य तदाशयकत्वे "तङ्यक्चिणादयः" इत्यत्र तङ्ग्रहणविरोधाच्च। किञ्च तदुक्तरीत्याऽर्थनैरपेक्ष्येण लकारमात्रनिमित्तकस्यादीनामसङ्ग्रहापत्तेश्च। विकरणानां कर्त्राद्यर्थकत्वे प्रमाणाभावाच्च। नच भावकर्मणोरर्थयोर्यग् भवति सार्वधातुके परे, कर्त्रर्थे शब् भवति सार्वधातुके परे इत्यर्थाश्रयणाद्विकरणानां तदर्थकत्वसिद्धिरिति वाच्यम्। भावकर्मकर्तारस्तिङर्थाः स्युः? उत विकरणार्था इति विचार्य विकरणार्थत्वपक्षनिराकरणेन तिङर्थत्वपक्षस्यैव यग्विधायके भाष्यकृता सिद्धान्तितत्वेन "सार्वधातुके यक्" "कर्तरि शप्" इत्यादीनां निरुक्तार्थकत्वायोगात्। तद्भाष्येण भावकर्मवाचिनि सार्वधातुके परे यग्भवति, कर्तृवाचिनि सार्वधातुके परे शब् भवतीत्येव तदर्थलाभाच्च। अव्याप्त्यतिव्याप्तिवारणाय विकरणविधौ निमित्तकोटौ कर्त्राद्यर्थनिवेशस्यावश्यकत्वाच्च। एतेन "अत एव कर्तरि शप्" इत्यादौ कर्त्रादिग्रहणं चरितार्थम्। अन्यथा "लः कर्मणि" इत्येतद्विहितलादेशैरेव कर्त्रादिबोधेनान्यलभ्यत्वात्तद्वैयर्थ्यं स्पष्टमेव" इति दर्पणोक्तमपास्तम्। विकरणार्था इति पक्षे विकरणद्योत्या अपीत्यर्थः। क्वचित्तत्साहाय्येनार्थप्रतीतेस्तेषामर्थवत्त्वव्यवहारः। सिद्धान्ते विकरणाः साधुत्वमात्रार्थाः। स्पष्टं चेदं तिङर्थवादे मञ्जूषायाम्। नच "कर्तरि शप्" इति कर्तृग्रहणं व्यर्थम्। भावकर्मणोर्यका बाधादिति वाच्यम्। "दिवादिभ्यः श्यन्" इत्यादावनुवृत्त्यर्थं तस्यावश्यकत्वात्। अन्यथाऽपवादविप्रतिषेधेन भावकर्मणोरपि दिवादिभ्यः श्यन्नादयः प्रवर्तेरन्, यक् तु पुरस्तादपवादन्यायेन शप एव बाधकः स्यादिति दिक्।

ननु कर्मद्योतकास्तङादय इति व्यावहारः कथमत आह [फलान्वयीति] फलान्वयी य आश्रयस्तस्येत्यर्थः। तङादयस्तिङर्थाश्रयस्य फलेऽन्वयं द्योतयन्तीत्युक्तौ यत्र तङादयस्तत्राश्रयः कर्मरूप इति लक्ष्यत इति न दोष इति भावः। ।।३।।

नन्वेवं "क्रमादमुं नारद इत्यबोधि स" इत्यादौ पच्यते ओदनः स्वयमेवेत्यादौ च व्यभिचारः। कर्मणः कर्तृत्वविवक्षायां कर्तरि लकारे सति "कर्मवत्कर्मणा तुल्यक्रियः" इत्यतिदेशेन यगात्मनेपदचिण्चिण्वदिटामतिदेशाद्यगादिसत्त्वेऽपि कर्तुरेव बोधात्। व्यापार एवाश्रयान्वयाच्च। अबोधीत्यत्रापि बुध्यतेः कर्तरि लुङ्, च्लिः, तस्य दीपजनेति चिण्, "चिणो लुक्" इति तस्य लुगिति साधनादित्याशङ्कायामाह -

उत्सर्गोऽयं कर्मकर्तृविषयादौ विपर्ययात्।
तस्माद्यथोचितं ज्ञेयं द्योतकत्वं यथागमम्।। ।।४।।

कर्मकर्तृविषयादौ - पच्यते ओदनः स्वयमेवेत्यादौ। अत्र ह्योकौदनाभिन्नाश्रयकः पाकानुकूलो व्यापार इति बोधः। क्रमादिति आदिपदग्राह्यम्। अत्र सामान्यविशेषज्ञानपूर्वक एकनारदविषयकज्ञानानुकूलः कृष्णाभिन्नाश्रयकोऽतीतो व्यापार इति बोधः। यथोचितमिति सकर्मकधातुसमभिव्याहृतभावसाधारणविधिविधेयचिण्यगादि कर्मद्योतकमिति भावः। ।।४।।

[एवमिति] - तङादीनां फले आश्रयान्वये तात्पर्यग्राहकत्व इत्यर्थः। [व्यभिचार इति] यगादीनामन्वये शबादीनां व्यतिरेके चेत्यर्थः। पच्यते तण्डुलः स्वयमेवेत्यादौ यगादिसत्त्वेऽपि फल आश्रयान्वयाभावात्, शबाद्यभावेऽपि व्यापार आश्रयान्वयाच्चेति भावः। तदेवोपपादयति - कर्मण इत्यादिना। [कर्तरि लकार इति] कर्मणः कर्तृत्वविवक्षायां प्रायेण धातूनामकर्मकतया भावे कर्तरि च ततो लकारा उत्पद्यन्ते। पच्यते ओदनेनेत्यादिरूपाणि भावे लकारे भवन्ति। कर्तरि लकारे प्रकृततात्पर्यग्राहकस्य व्यभिचार इत्याशयः। कर्तरि लकारे सति कर्मवद्भावेन यगादिसत्त्वेऽपि कर्तुरेव बोधादिति योजना कार्या। च्लिः = "च्लि लुङि" इत्यनेन। तस्य = च्लेः स्थाने। तस्य = आत्मनेपदप्रथमपुरुषैकवचनस्य तशब्दस्य। कारिकायाम् - अयं = तङादे र्निरुक्ततात्पर्यग्राहकत्वरूपोऽर्थः। उत्सर्गः प्रायिकः। न सार्वत्रिक इति यावत्। कर्मकर्तरि व्यापार एवाश्रयान्वय इति स्पष्टयितुं बोधं दर्शयति - [अत्र हीति] [आदिपदेति] "कर्मकर्तृविषयादौ" इति कारिकाघटकादिपदेत्यर्थः। कारिकायां [यथोचितमिति] अननुगतमेव द्योतकत्वं तङादेः, तत्तद्वचनानुसारेण तत्तद्व्यवस्थेत्याशय इति भूषणे स्थितम्। भूषणे "वस्तुतस्तु" इत्यादिनोक्तमनुगतप्रकारमाह [सकर्मकेति] पच्यते तण्डुलः स्वयमेवेत्यादौ यगादीनामकर्मकधातुसमभिव्याहृतत्वान्नात्र कर्मण आख्यातार्थत्वम्। अबोधीत्यादौ कर्मणस्तद्वारणायाह [भावसाधारणेति] इदं च विधिविशेषणम्। "सार्वधातुके यक्" "चिण् भावकर्मणोः" इति विधिविहितेत्यर्थः। अबोधीत्यत्र "दीपजन" इत्यादिना चिणो विधानमिति न दोषः। ।।४।।

एवं सूचीकटाहन्यायेन सोपपत्तिकं वाक्यार्थमुपवर्ण्य, "फलव्यापारयोः" इति प्रतिज्ञातं धातोर्व्यापारवाचित्वं लडाद्यन्ते भावनाया अवाच्यत्वं वदतः प्राभाकरादीन् प्रति व्यवस्थापयति -

व्यापारो भावना सैवोत्पादना सैव च क्रिया।
कृञोऽकर्मकतापत्ते र्नहि यत्नोऽर्थ इष्यते।। ।।५।।

पचति - पाकमुत्पादयति पाकानुकूला भावना तादृश्युत्पादनेत्यादि-विवरणाद्विव्रियमाणस्यापि तद्वाचकतेति भावः। व्यापारपदं फूत्कारादीनामयत्नानामपि फूत्कारत्वादिरूपेण वाच्यतां ध्वनयितुमुक्तम्। अत एव पचतीत्यत्राधस्सन्तापनत्व-फूत्कारत्वचुल्ल्युपरिधारणत्वयत्नत्वादिभिर्बोधः सर्वसिद्धः।

ननु पूर्वग्रन्थेन सोपपत्तिको वाक्यार्थो निरूपितः। तत्किमपरमवशिष्यते। यदर्थमुत्तरो ग्रन्थ आरभ्येत, इत्यत उत्तरग्रन्थेन सङ्गतिं दर्शयन्नाह [एवमिति] [सूचीकटाहन्यायेनेति] अयं भावः - यथा सूचीकटाहयोः करणे नियुक्तः कार्मिको लाघवात्प्रथमं सूचीं निर्माय अनन्तरं बहुलायाससाध्ये कटाहकरणे प्रवर्तते, तथा निरसनीयाल्पवादिविप्रतिपत्तिकत्वेन सुप्रतिपाद्यतया च लघुभूतं वाक्यार्थं निरूप्य, ततो निरसनीयबहुवादिविप्रतिपत्तिकतया दुरूहतया च गुरुभूतं पदार्थं निरूपयति। यद्यपि वाक्यार्थज्ञानस्य निश्चितपदार्थज्ञानपूर्वकत्वात्प्रथमं पदार्थनिर्णय एव कार्यस्तथापि पदार्थनिर्णयांशे वादिविप्रतिपत्तिकोलाहलेन तद्व्यामोहे पदार्थव्यामोह एव स्यात्। अतो भट्टोजिदीक्षितः प्रथमं स्वमतसिद्धं वाक्यार्थं प्रदर्श्य ततः पदार्थनिर्णयाय प्रयतते। दृश्यते चैतादृशी रीतिः प्राचीनग्रन्थेष्वपि। यथा - भगवान् श्रीवेदव्यासः "अथातो ब्रह्मजिज्ञासा" "जन्माद्यस्य यतः" "शास्त्रयोनित्वात्" "तत्तु समन्वयात्" इति प्राथमिकचतुस्सूत्र्या स्वाभिमतं निर्गुणाद्वयवादं प्रथमं प्रदर्श्य, "ईक्षतेर्नाऽशब्दम्" इत्यादिना कापिलादिमतान्तरनिराकरणाय प्रावर्तत। एवं च मतान्तरनिराकरणेन "फल व्यापारयोः" इति प्रतिज्ञातार्थनिर्वहणाय "व्यापारो भावना" इत्याद्युत्तरो ग्रन्थः। नहि स्वमतविरुद्धमतनिराकरणं विना स्वमतसिद्धिः, "परमतमप्रतिषिद्धमनुमतं भवति" इति न्यायात् - इति। सोपपत्तिकं = महाभाष्यादिप्रमाणोपबृंहितम्। वाक्यार्थम् = सर्वात्मना धात्वर्थभावनामुख्यविशेष्यकबोधरूपम्। उपवर्ण्य "फलव्यापारयोः" इत्यादिकारिकाग्रन्थेनोपवर्ण्य। [व्यापारेति] अत्र व्यापारपदेन शरीरनिष्ठः फूत्कारादि, रात्मनिष्ठः कृतिरूपो यत्नश्च सर्वोपि गृह्यते। यद्यपि "फलव्यापारयोर्धातुः" इत्यत्र फलमपि धातुवाच्यत्वेन

प्रतिज्ञातं, तथापि फलस्य धातुवाच्यत्वे प्राचीननैयायिका एव विप्रतिपन्नाः, ते च तन्नवीनैरेव प्रतिसमाहिताः। अतस्तदंशेऽस्माभिर्नातीव यत्नः कर्तव्यः। यदि तु - ज्ञाकृञादीनां केवलज्ञानयत्नादिक्रियामात्रवाचित्वं सर्वेऽपि नैयायिकाः स्वीकृत्य तेषां फलवाचित्वं नाभ्युपगच्छन्ति। अतः फलांशेऽपि प्रयतितव्यमेवास्माभिः, अत एव "कृञो ऽकर्मकतापत्तेः" इत्यादिना जानातिकरोतीत्यादेः फलवाचित्वव्यवस्थापनं सङ्गच्छते इत्युच्यते, तर्हि व्यापारपदं फलस्याप्युलक्षणमिति बोध्यम्।

ननु "आश्रये तु तिङः स्मृताः" इति प्रतिज्ञार्थनिर्वहणस्याकरणे दीक्षितस्याशयः को वा स्यात्। दृश्यन्ते हि तदंशेऽपि विप्रतिपन्ना बहवः, इति चेदत्रेदं तस्याकूतम् - फूत्काररूपः कृतिरूपश्च यावान् व्यापारस्तस्य नैयायिकादिमतनिराकरणेन धात्वर्थत्वे निर्णीते परिशेषन्यायादाश्रयस्य तिङर्थत्वं सेत्स्यति। अतस्तदर्थं न पृथक् प्रयतितव्यम् - इति। नहि कृतिरूपव्यापारस्य धातुवाच्यत्वमङ्गीकुर्वाणस्तस्य तिङ्वाच्यत्वमिच्छति। अत एव "आश्रये तु तिङः स्मृताः" इति दीक्षितग्रन्थे 'तु' शब्दः सार्थकः। स च तिङ इत्यस्मादनन्तरं योज्यः। तिङस्तु फलव्यापारयोराश्रये स्मृता इति तदर्थः। सकलविधव्यापारस्य फलस्य च धातुलभ्यतया पारिशेष्यात् तिङामाश्रये शक्तिर्लभ्यते। अत्र च "लः कर्मणि" इत्यादिसूत्रमेवानुकूलस्तर्कः। अन्यथा 'तु' शब्दो व्यर्थ एव स्यात्। मन्दप्रज्ञानामेषोऽर्थस्तर्कितुमशक्य इत्याशयेन तु कौण्डभट्टेन "आश्रये तु तिङः स्मृताः" इति दीक्षितग्रन्थार्थो मतान्तरनिराकरणपुरस्सरं विस्तरेण प्रदर्शित इति मम प्रतिभाति। अत्र युक्तमुत्पश्यन्तु सुधियः। [वाचित्वमिति] अस्य "प्राभाकरादीन् प्रति व्यवस्थापयति" इत्यत्रान्वयः। [लडाद्यन्त इति] इदं च तद्गुणबहुव्रीहिणा प्रत्ययान्तपरम्। पचतीत्यादिलडाद्यन्तस्थल इत्यर्थः। प्रकृतिभागे प्रत्ययभागे वेत्याशयः। [प्राभाकरेति] ते हि कार्याभिधायिलिङादीनामेव कार्यविशेषणीभूतकृतिरूपा भावना वाच्या। तदतिरिक्ताख्यातस्य न भावना वाच्या। प्रकृत्यर्थफलेनाक्षेपेण, संसर्गमर्यादया वा तत्प्रतीतिसम्भवात्। फलमात्रं धात्वर्थः। आख्यातार्थस्तु कालः सङ्ख्या चेति प्रतिपन्नाः। उक्तं च प्रकरणपञ्चिकायां प्राभाकरशिष्येण शालिकनाथेन - "येऽपि सर्वाख्यातानामेव भावनाभिधानमाहुस्तेषामपि मतमस्मभ्यं न रोचते। नहि कार्यानभिधायिषु भावनाभिधाने प्रमाणमस्ति" इति। यस्तु देवदत्त ओदनं पचतीत्यादौ वृद्धव्यवहार एव प्रकृत्यर्थातिरिक्ते प्रयत्ने प्रयोगादाख्यातानां तदर्थकतामाह, स एवं शिक्षयितव्यः - वत्स! किं न वेत्सि, अनन्यलभ्यः शब्दार्थ इति। प्रकृत्यर्थाक्षेपेणापि यत्नप्रतीत्युपपत्ते र्न शक्यते तद्वाचितामाश्रयितुमिति। ननु प्राभाकरा अपि भावनावाचकतां कथमाख्यातप्रत्ययस्येच्छन्ति, उच्यते। न सर्वाख्यातानां भावनावाचकत्वमभ्युपेमः, किन्तु कार्याभिधायिनो लिङादयः कार्यस्यान्यानभिधानात्कृत्यभिधायिन इष्यन्ते" इति च।

शास्त्रदीपिकायां वाजिपेयाधिकरणे पार्थसारथिमिश्रैरपि प्राभाकरमतमेवमुपन्यस्तम् - "ये तु कार्याभिधायिनामेव भावनाभिधेयत्वं, न सर्वाख्यातानामाहुस्तेषां काष्ठैः पचतीत्यादौ भावनाऽभावाद्धात्वर्थेनैव कारकाणां सम्बन्धात्क्रियारूपत्वं धात्वर्थस्याभ्युपगन्तव्यम्। अतश्च स्वरूपेणैव धात्वर्थः कारकसम्बन्धमर्हतीति विनैवाऽऽवृत्त्या यज्यभिहितेनैव रूपेण साध्यसाधनाभ्यां सम्बध्यत इत्यधिकरणमिदमनुपपन्नं स्यात्।" इति। "तेषां मते कार्याभिधायिलिङादीनामेव कार्यविशेषणीभूतकृतिरूपभावनावाचित्वम्। लडादिप्रत्ययानां तु भावनावाचित्वं नास्ति। तेषां कार्याभिधायित्वाभावात्। किंतु सङ्ख्यामात्रवाचित्वम्" इति तद्व्याख्याने मयूखमालिकायां सोमनाथः।

शब्दशक्तिप्रकाशे आख्यातप्रकरणे जगदीशेनापि प्राभाकरमतमेवमुट्टङ्कितम् - "ननु कृत्यादिकं नाख्यातार्थः। किंतु कालः सङ्ख्या च। तयोः प्रकारान्तरालभ्यत्वात्। चैत्रः पचति रथो गच्छतीत्यादौ धात्वर्थपाकगत्यादेः कृतिमत्त्वाश्रयत्वसम्बन्धेन चैत्रादौ प्रकारत्वादिति प्राभाकराः" इति।

परीक्षाकारास्तु "कृत्यादिकं नाऽऽख्यातार्थः, तद्विषयकशाब्दबोधस्य विवादग्रस्तत्वात्। किन्तु कालः सङ्ख्या च, अनन्यलभ्यत्वात्। चैत्रः पचति रथो गच्छतीत्यादौ धात्वर्थपाकगत्यादेः स्वजनककृतिमत्त्वाश्रयत्वादिसंसर्गेण प्रथमान्तार्थेऽन्वयः। तस्य चाख्यातार्थभावनायामन्वयः। भावनाविशेष्यकश्च शाब्दबोधः" इति प्राभाकरमतमुपन्यास्यन्। तन्न युक्तम् - एतादृशप्राभाकरमतस्य क्वाप्यनुपलभ्भात्। मत्प्रदर्शितप्रामाणिकग्रन्थविरुद्धत्वाच्च। "तस्य चाख्यातार्थभावनायामन्वयः" इत्यस्य "कृत्यादिकं नाख्यातार्थः" इत्युपक्रमविरुद्धत्वाच्च। प्राभाकरमते तत्प्रकारकबोधस्य विवादग्रस्तत्वेऽपि तद्विषयकबोधस्य तत्त्वाभावाच्च। तत्प्रदर्शितप्राभाकरमतखण्डनपरतया मूलस्य तैरव्याख्यातत्वाच्च, तत्प्रदर्शितप्राभाकरमते मूलोक्तदोषाणामलग्नकतया तस्याशक्यत्वाच्च। एतेन "फलमेव धात्वर्थः। पुरुषप्रवृत्तिरूपा आर्थी भावना चाख्यातार्थः। वर्तमानत्वादिकं तु भावनायामेवान्वेति। करोतीत्यत्रोत्पत्तिरूपं फलं धातुवाच्यम्। तदनुकूलो यत्नश्चाख्यातवाच्य इति प्राभाकराः" इति पञ्चोलिनोऽपि परस्ताः।

कृष्णमित्रास्तु - "प्राभाकरादीन् प्रतीति - तन्मते फलानुकूलो व्यापारो धात्वर्थः। कृतिरूपा भावनाऽऽख्यातार्थः। सापि लिङादीनामेव वाच्या। तथाहि - भावना नाम प्रवृत्त्यनुकूलो व्यापारः। प्रवर्तकत्वं च लिङ्लोट्तव्यानामेवेति भावः" इति वदन्ति। एतादृशं प्राभाकरमतं शब्दचिन्तामणावाख्यातवादशिरोमणौ समन्वयसूत्रे भामत्यां च यद्यपि समुपलभ्यते, तथापि नैतत्प्रकृतग्रन्थकृतः खण्डनीयत्वेन दृष्टिपतितम्। अत एव तन्मतखण्डनावसरे घटो भवतीत्यादौ घटादीनामकर्तृत्वापादनं स्वार्थव्यापारव्यधिकरणफलवाचित्वरूपसकर्मकत्वासम्भवप्रदर्शनं च ग्रन्थकृतः

सङ्गच्छते। अन्यथा धात्वर्थव्यापारमादाय प्राभाकरमतेऽपि कर्तृत्वसकर्मकत्वनिर्वहणोपपत्तौ तदसङ्गतिः स्पष्टैव। किञ्च "व्यापारस्यावाच्यत्वे फलमात्रमर्थ इति फलित" मिति वक्ष्यमाणप्रकृतग्रन्थोऽपि कृष्णमित्रप्रदर्शितप्राभाकरमते आनुकूल्यं न भजेत। मदुक्तरीत्यैव प्राभाकरमतस्य भूषणे प्रदर्शितत्वाच्च। कृष्णमित्रप्रदर्शितं प्राभाकरमतं तु तिङर्थवादे मञ्जूषायां दूषितम्। इयमत्र वस्तुस्थितिः - प्रामाणिकग्रन्थपर्यालोचनया प्राभाकरमतमाख्यातार्थविषये द्विविधमुपलभ्यते - शालिकनाथपार्थसारथिसोमनाथजगदीशैः प्रदर्शितमेकम्। गङ्गेशोपाध्यायरघुनाथवाचस्पतिमिश्रैः प्रदर्शितं द्वितीयम्। तत्र प्राथमिकमेव प्रकृतग्रन्थकृतः खण्डनीयत्वेन दृष्टिपतितम्। द्वैतीयीकं तु मञ्जूषायां नागेशेन खण्डितम्। प्राथमिकस्य प्राभाकरमतस्य भूषणकृता निरस्तत्वाद् द्वैतीयीकमेव निरसनीयममंस्त नागेशोपाध्याय इति प्रतिभाति। प्रतिपादितं चेदं नागेशभावप्रकाशे मञ्जूषाव्याख्यानेऽस्माभिः - इति। एवंच प्रकृतग्रन्थव्याख्यायां खण्डनीयत्वेन द्वैतीयीकप्राभाकरमतप्रदर्शनं कृष्णमित्राणामयुक्तमेवेति बोध्यम्।

यत्तु - "लडाद्यन्त इति - अतद्गुणबहुव्रीहिणा धातुपरम्। तथाच यजेत पचेतेत्यादौ यज्यादिधाताविवत्यर्थः" इति दर्पणकाराः। तन्न, प्राभाकरैः प्रत्ययस्यापि भावनावाचित्वानभ्युपगमात्। न च यजेतेति लिङन्तप्रदर्शनात्प्राभाकरैस्तत्राख्यातस्य भावनावाचकत्वाभ्युपगमेऽपि धातोस्तद्वाचकत्वानभ्युपगमाद्दर्पणोक्तं युक्तमेवेति वाच्यम्। कार्याभधायिलिङादिवैदिक-शब्दार्थविचारस्यात्राप्रस्तुतत्वात्। तिङन्तस्थलमात्रे भावनाया वाच्यत्वावश्यकत्वप्रतिपादनायैव प्रकृतग्रन्थकृतः प्रवृत्तेश्च "लडाद्यन्ते" इति लड्ग्रहणस्वारस्यभङ्गापत्तेश्चेति दिक्।

काशिकाकारास्तु - "भावनाया अवाच्यत्वमिति - तस्या धातुवाच्यत्वे प्राधान्यानुपपत्त्या तदवाच्यत्वमित्यर्थः। व्यापाररूपभावनाया अवाच्यत्वमेवेत्यर्थ इति वा" इति व्याचख्युः, तत्राद्यं प्राभाकररीत्या, अन्त्यं नैयायिकरीत्येत्याभाति। न भावना धातुवाच्या, तस्या धातुवाच्यत्वे "प्रकृतिप्रत्ययौ" इति न्यायेनाप्राधान्यापत्तेः, अतस्तस्याः प्रत्ययवाच्यत्वमेवेत्याद्यव्याख्याशयः। परंतु निरुक्तप्रामाणिकग्रन्थविरुद्धत्वाच्चिन्त्यमिदम्। प्रकृतिभागे प्रत्ययभागे वा यत्किञ्चिद्रूपाया अपि भावनाया अवाच्यत्वमित्येतादृशप्राभाकरमतस्यैवात्र ग्रन्थे प्रदर्श्य खण्डनीयत्वेनाभिमतत्वात्। अन्त्यव्याख्या तु युक्तैवेति बोध्यम्।

प्राभाकरादीनित्यादिपदेन नैयायिकसङ्ग्रहः। तेहि - कृतिरेव वाच्या लाघवात्। न व्यापारो गौरवादिति वदन्ति। एतादृशनैयायिकमतमेवात्र निराक्रियमाणत्वेन ग्रन्थकृतोऽभिमतम्। स्पष्टश्चायमर्थो विस्तरेण भूषणे।

यत्तु - "आदीनिति - आदिपदेन प्राचीननैयायिकादिपरिग्रहः। तन्मते हि मीमांसकमत इव फलं धात्वर्थः। कृतिराख्यातार्थः" इति प्रभाकाराः पञ्चोलिनः। तन्न। व्यापारो धात्वर्थः, फलं कर्म प्रत्ययार्थ इत्येव प्राचीननैयायिकैरङ्गीकारात्, एतादृशप्राचीननैयायिकाशयस्यैव प्रकृतग्रन्थेऽनुपदमेव निराक्रियमाणत्वात्।

यदपि - "प्राभाकरादीनित्यादिपदेन नैयायिकसङ्ग्रहः। यद्यपि व्यापारो धात्वर्थत्वेन नैयायिकसम्मतस्तथापि नासौ तन्मते भावना पदव्यपदेशश्च" - इति दर्पणकाराः, परीक्षाकाराश्च। तदपि न, कृतिरेव वाच्या, लाघवात्। न व्यापारः, गौरवादिति नैयायिकाशयस्यैव प्रकृतसंदर्भे निराक्रियमाणत्वात्। क्रियारूपार्थस्य तिङन्ते वाच्यत्वस्वीकारस्यावश्यकत्वे तस्य केन रूपेण वाच्यत्वमिति मीमांसायां 'कृतित्वेन रूपेण वाच्यत्वं स्वीकार्यं, न तु व्यापारत्वेन रूपेणा' इति नैयायिकाशयस्यैवात्र निराचिकीर्षितत्वाच्च। तस्य धातुवाच्यत्वमुत प्रत्ययवाच्यत्व? मिति विचारस्य प्रकृतसंदर्भे ग्रन्थकृद्दृष्ट्यविषयत्वाच्चेति दिक्।

[व्यवस्थापयतीति] प्रकृतिभागे प्रत्ययभागे वा लडाद्यन्तस्थले यत्किञ्चिद्रूपाया अपि भावनाया वाच्यत्वं नेति वदतः प्राभाकरान् प्रति, कृतिरूपभावनाया एव वाच्यत्वं, न व्यापाररूपभावनाया इति वदतो नैयायिकान् प्रति च "फलव्यापारयोः" इति प्रतिज्ञातमर्थं व्यवस्थापयतीति निर्गलितोऽर्थः। तत्रायं विवेकः - कृतिरेव वाच्या, न व्यापार इति नैयायिकमतं "व्यापारो भावना सैवोत्पादना सैव च क्रिया" इति पूर्वार्धेन, प्राभाकरमतं "कृञोऽकर्मकतापत्ते र्नहि यत्नोऽर्थ इष्यते" इत्युत्तरार्धेन च निराक्रियते। व्यापारः प्रत्ययवाच्यः? उत प्रकृतिवाच्यः? इत्यंशस्तु नैवात्र निर्धार्यते। स तु "तस्मात्करोतिर्धातोः स्यात्" इत्यादिना ग्रन्थेन (व्यापारस्य प्रत्ययवाच्यत्वमिति मतनिराकरणपूर्वकं प्रकृतिवाच्यत्वमेवेति रीत्या) निर्धार्यते। उपपादयिष्यते चेदमुपरिष्टाद् - इति। 'कृतिरेव वाच्या, न व्यापारः' इति नैयायिकमतं "व्यापारो भावना सैवोत्पादना सैव च क्रिया" इति कारिकापूर्वार्धेन निराक्रियते। तथाहि - व्यापार इत्यादीनि पदानि पचति = पाकानुकूलो व्यापारः, पाकानुकूला भावना तादृश्युत्पादना, तादृशी क्रिया, गच्छति = गमनानुकूलो व्यापारः, गमनानुकूला भावना, तादृश्युत्पादना, तादृशी क्रियेत्यादिविवरणस्वरूपस्फोरकाणि। तत्र विवरणे व्यापारस्य भावनादेश्च भानाद् विवरणविव्रियमाणयोः समानार्थकत्वनियमाद् विव्रियमाणेऽपि तद्भानमावश्यकम्। अन्यथा विवरणस्य शक्तिग्राहकत्वं वृद्धोक्तं भज्येत। एवं च निरुक्तविवरणबलाद्व्यापारस्य कृत्यादेश्च पचतीत्यादाववश्यं वाच्यत्वलाभात् 'कृतिरेव वाच्या न व्यापारः' इति नैयायिकोक्तमयुक्तमेव। कृतेर्वाच्यत्वे नास्माकं

विप्रतिपत्तिः, किन्तु तन्मात्रस्य वाच्यत्वे। व्यापारस्य, कृतेः, उत्पादनायाः, क्रियायाश्च वाच्यत्वं वयमभ्युपेमः। एतदर्थस्फोरणायैव कारिकायामनेकविवरणप्रतिपादनाय व्यापारः, भावना, उत्पादना, क्रियेत्यनेकपदोपादानम्। उक्तं च भूषणेऽपि - "कृतित्वमपि शक्यतावच्छेदकम्। तेन रूपेणापि बोधात्। तथा फूत्कारत्वादिकमपि। अत एव तत्तद्रूपेण शक्तिरित्युक्तम्। वक्ष्यते च। एवं च "व्यापारो भावना" इति पूर्वोक्तमपि व्यापारोऽपि वाच्य इत्यभिप्रायकम्। नतु कृतित्वं नावच्छेदकमिति भ्रमितव्यम्" इति। प्रकृतग्रन्थेऽपि वक्ष्यते - "अथवा व्यापारो भावनेत्यर्धेन व्यापारस्य वाच्यत्वं प्रसाध्य" इति। अतः कारिकायां व्यापारः भावना उत्पादना क्रियेति पदानि प्रत्येकं पचतीत्यादेस्तत्तद्विवरणस्वरूपस्फोरकाण्येव। व्यापारः, भावना, तादृशी उत्पादना, तादृशी क्रियेति विवरणदर्शनाद्विव्रियमाणस्यापि तद्वाचकतेति कारिकापूर्वार्धस्यार्थः। अतो निरुक्तार्थसिद्धिरित्याशयेन निरुक्तविवरणपरतया मूलं व्याचष्टे - [पचति - पाकमुत्पादयतीति] पचतीत्यस्य विवरणं - पाकमुत्पादयतीतीत्याशयः। तस्यैव विवरणान्तरं दर्शयति [पाकानुकूला भावनेति] कारिकायां 'सैव' इत्यस्य तादृशीत्यर्थ इत्याशयेन तस्यैव विवरणान्तरं दर्शयति [तादृश्युत्पादनेति] एतदभिप्रायेणैव विवरणान्तरं दर्शयति कारिकायां [सैव च क्रियेति] तादृशी क्रिया पाकानुकूला क्रियेति तात्पर्यम्। एवं गच्छति = गमनानुकूला उत्पदनेत्यादीनि विवरणानि बोध्यानि। सर्वसङ्ग्राहकतया व्यापार इत्यादीन्युपात्तानि कारिकायाम्। [इत्यादीति] आदिशब्देन पाकानुकूलो व्यापार इत्यादेर्ग्रहणम्। [विवरणादिति] पाकानुकूलो व्यापारः, पाकानूकूला भावनेत्यादिना पचतीत्यादेर्विवरणादित्यर्थः। [विव्रियमाणस्यापि] - पचतीत्यादेरपि। [तद्वाचकतेति] विवरणविव्रियमाणयोः समानार्थकत्वानुरोधेन व्यापारादिवाचकतेत्यर्थः। [इति भाव इति] "व्यापारो भावना" इत्यादिकारिकापूर्वार्धस्य प्रदर्शितो भाव इत्यर्थः, ननूत्पादनापदस्योत्पत्त्यनुकूलव्यापारार्थकतया तेनैव व्यापारस्यापि सङ्ग्रहात्कारिकायां पुनरपि व्यापारपदोपादानं व्यर्थमित्यत आह [व्यापारपदं चेति] व्यापारपदानुपादाने भावनोत्पादनादिपदानां दर्शनान्तरीयवासनावशेन कृतिरूपार्थमात्रवाचित्वग्रहेण "तावन्मात्रस्यैव वाच्यत्वं न व्यापारस्य" इति पाठका भ्राम्येयुः, तन्मा भूदिति विशिष्य कारिकायां प्रथमत एव व्यापारपदोपादानमिति भावः। तदेतदभिप्रेत्याह [फूत्कारादीनामिति] [अयत्नानामिति] - कृतिभिन्नानामपीत्यर्थः। आन्तरचेष्टाविशेषः कृतिरात्मधर्मः, शरीरादिनिष्ठाः फूत्कारादय इति तद्भेदो बोध्यः। [फूत्कारत्वादिरूपेणेति] व्यापारस्य वाच्यत्वे लब्धे तस्य तत्तद्रूपेणैव वाच्यत्वमित्याशयः। तत्तद्रूपेण वाच्यत्वलाभस्त्वधस्तान्निरूपित एव। एवं च व्यापारस्य वाच्यत्वसमर्थन एव तात्पर्यमिति ज्ञेयम्। ध्वनयितुं = स्पष्टं बोधयितुम्। उक्तं

= कारिकायामुपात्तम्। [अत एवेति] व्यापारस्य वाच्यत्वलाभादेवेत्यर्थः। [सर्वसिद्ध इति] सर्वानुभवसिद्ध इत्यर्थः। कृतेरेव वाच्यत्वाभ्युपगमे तु फूत्कारत्वाधस्सन्तापनत्वादिना बोधस्य सर्वानुभवसिद्धस्यासिद्धिप्रसङ्ग एव। न च लक्षणया तद्बोधः, अनुपपत्तिप्रतिसन्धानं विनापि तद्बोधादिति भावः।

यत्तु "अत्र मीमांसकाः। धातुना सिद्धो भावो दानयागादिरुच्यते। तद्गतं साध्यत्वं त्वाख्यातेनोच्यते इत्याख्यातार्थो भावनेति यत्न एव भावना। सा चेयं सर्वाख्यातवाच्याऽर्थभावनेत्युच्यत इति वदन्ति। तान् दूषयति - व्यापारो भावनेति। धात्वर्थस्य सिद्धरूपत्वाभावाद्व्यापार एव भावनेति भावः" इति कृष्णमित्राः। तन्न। तदुपवर्णिताशयस्य प्रकृतग्रन्थे लेशतोऽप्यदर्शनात्। मदुक्तार्थस्यैव भूषणग्रन्थपर्यालोचनया लाभाच्च। "सैवोत्पादना सैव च क्रिया" इति ग्रन्थभागस्यानुपयोगापत्तेश्चेति दिक्।

यत्तु व्यापारो भावनेति पूर्वार्धेन यो "गुणभूतैरवयवैः" इत्याद्युक्तलक्षणलक्षितोऽर्थ-स्तद्वाचकव्यापारपदं भावनादिपदैर्विव्रियते। विव्रियमाणस्य विवरणसमानार्थकत्वेन धातोर्भावनावाचकत्वसिद्धिरित्यर्थः। तत्रोद्देश्यविधेययोरैक्यमापादयतः सर्वनाम्नः पर्यायेणान्यतर-लिङ्गकत्वस्य 'शैत्यं हि यत्सा प्रकृतिर्जलस्य' इत्यादिषु बहुषु स्थलेषु दर्शनान्न 'सा' इति स्त्रीलिङ्गनिर्देशानुपपत्तिः, पुँल्लिङ्गत्वेऽपि "सोऽचि लोपे चेत्" ६-१-१३४ इति लोपेन साधुत्वाच्च। भावनैव वाऽस्तु तत्पदपरामृश्येति दर्पणकृत्। तस्यायं भावः - व्यापारपदविवरणं भावनेति, तेन भावनाया व्यापाराभिन्नत्वात्, व्यापारस्य धातुवाच्यतया व्यापाराभिन्नभावनाया अपि धातुवाच्यत्वलाभ इति, परन्तु चिन्त्यमिदम्। 'व्यापारो भावना' इति विवरणेन भावनाया व्यापाराभेदप्रतीतिलाभेन स्वाभिमतस्य भावनाया धातुवाच्यत्वस्य सिद्धत्वेन "सैवोत्पादना सैव च क्रिया" इति ग्रन्थभागस्य वैयर्थ्यप्रसङ्गात्, उत्पादनादिपदैर्व्यापारपदविवरणे प्रयोजनाभावात्। न च व्यापारे उत्पादन - क्रिययोरभेदभानलाभाय तदुपादानम्। अत एव तयोरपि धातुवाच्यत्वसिद्धिरिति वाच्यम्। भावनापदविवरणपरं सैवोत्पादना सैव च क्रिया' इत्येतत् इत्याशयकस्य "भावनैव वाऽस्तु तत्पदपरामृश्या" इति त्वदुक्तस्याऽसङ्गत्यापत्तेः। भावनापदस्य उत्पादनादिपदैर्विवरणेऽत्यन्तमनुपयोगस्य स्पष्टत्वात्। व्यापारः, भावना, उत्पादना, क्रिया इति चत्वार्यपि पदानि तत्तद्विवरणस्फोरकाणीति मदुक्तरीत्या तु "सर्वेषामपि वाच्यत्वं, न कृतेरेव" इत्येतदर्थबोधनाय तदुपादानस्याऽऽवश्यकत्वं स्पष्टमेव। किञ्च "व्यापारो भावनेति पूर्वोक्तमपि व्यापारोऽपि वाच्य इत्यभिप्रायकम्" इति भूषणग्रन्थविरोधः, "व्यापारो भावनेत्यर्धेन व्यापारस्य वाच्यत्वं प्रसाध्य" इति वक्ष्यमाणप्रकृतग्रन्थविरोधश्च, व्यापारो भावनेति भागो व्यापारस्य वाच्यत्वप्रतिपादक इति तद्ग्रन्थाभ्यां स्पष्टं प्रतीतेः। व्यापारपदं भावनादिपदैर्विव्रियत इति दर्पणोक्तरीत्या व्यापारस्य वाच्यताया "व्यापारो

भावना" इत्यर्धेनाऽलाभेन तद्विरोधः स्पष्ट एव। अतो मदुक्तमार्गेण व्यापारः, भावनेत्यादीनि तत्तद्विवरणस्वरूपस्फोरकाण्येव, नतु भावनादिपदानि व्यापारपदविवरणपराणि, नापि पर्यायत्वेन प्रयुक्तानि। एवं च "कस्यचित्कश्चिच्छब्दः प्रसिद्ध इत्यनेकपर्यायोपादानम्। अथवा चेतनाचेतनसाधारणफूत्कारयत्नादीनां धातुवाच्यत्वक्रियात्वबोधनार्थं तत्" इति काशिकाकारास्तदनुसारिणः प्रभाकाराश्चोपेक्ष्या एव, तदुक्ताशयस्य मूलतोऽलाभात्।

यत्तु प्रभाकाराः पञ्चोलिनः "ननु न हि क्रियापदं व्यापारपर्यायभूतम्। यत्नमात्रार्थककृधातुना निष्पन्नत्वेन यत्नमात्रार्थकत्वादित्याशङ्कायामाह - कृञोऽकर्मकतेति - इति। तन्न। "कृञोऽकर्मकता" इति कारिकार्धस्य पञ्चोलिवर्णिताशयकतया भूषणे सारे चाव्याख्यातत्वात्, तदीयावतरणस्याऽतिफल्गुत्वाच्च। व्यापारो भावना उत्पादना क्रियेत्यर्थकवचनकरणेनैव व्यापारो भावना इतिवत् व्यापार उत्पादना, व्यापारः क्रियेत्यर्थलाभेनाभीष्टसिद्धौ कारिकायां "सैव" "सैव च" इति शब्दोपादानं व्यर्थमेव स्यात्, दर्पणादिसर्वव्याख्यानेष्वप्येष दोषो बोध्यः। मद्रीत्यातु तदुपादानं 'तादृशी उत्पादना तादृशी क्रिया' इति अर्थलाभायोपयुज्यते।

ग्रन्थतत्त्वदर्शिनस्तु "व्यापारो भावना सैवोत्पादना सैव च क्रिया" इति कारिकार्धे तन्त्रमाश्रीयते। एकस्योक्तोऽर्थः - व्यापारः, भावना इत्यादीनि पदानि तत्तद्विग्रहस्फोरकाणीति। द्वितीय इत्थं योजना कार्या - "फलव्यापारयोर्धातुः" इत्यत्र निर्दिष्टं व्यापारं लक्षयति - व्यापार इत्यादिना। चशब्दो व्यापारपदोत्तरं योज्यः। व्यापारश्च फलव्यापारयोरित्यत्र निर्दिष्टो व्यापारस्तु क्रिया इति लक्षणम्। व्यापारः क्रियेत्येतावन्मात्रोक्तौ क्रियादिपदाभिहितक्रियाया अपि धातुवाच्यव्यापाररूपक्रियात्वापत्तिरतः क्रियां विशिनष्टि - उत्पादना सैवेति - सा व्यापारः क्रियेति लक्षणघटका क्रिया, उत्पादना एव उत्पाद्यत्वेनाभिधीयमानैव, साध्यत्वेनाभिधीयमानेति यावत्। क्रियादिपदाभिहितक्रियायाः सिद्धत्वेनाभिधीयमानत्वान्न तत्राऽतिव्याप्तिरित्यर्थः। अत एव च 'तिष्ठति' 'भवति' 'पुत्रीयति' इत्यादौ नाव्याप्तिरपि , अन्यथा परिस्पन्दरूपक्रियात्वाभानात्तत्र "व्यापारः क्रिया" इति लक्षणस्याव्याप्तिः स्पष्टैव। नन्वेवमपि धातुवाच्यफले विक्लित्त्यादावतिव्याप्तिः, तस्य साध्यत्वेन भानात्क्रियात्वाच्चेत्यत उक्तं - भावना सैवेति - सा क्रिया, भावनैव भावनापरनामिकैव, भावना च भवितुर्विक्लित्त्यादेर्भवनानुकूलः फूत्कारादिरेवेति न फलेऽतिव्याप्तिः। एवशब्दो भिन्नक्रमः। एवं च भावनापरनामिकैव, उत्पाद्यत्वेन रूपेणाभिधीयमानैव च या क्रिया स व्यापार इति पर्यवस्यति। एनमर्थमादायैव "व्यापारस्तु भावनाभिधा साध्यत्वेनाभिधीयमाना क्रिया" इति "फलव्यापारयोः" इति व्यापारोऽत्र ग्रन्थे लक्षितः। यद्वा

व्यापारः क्रियेति लक्षणम्। व्यापारं विशिनष्टि- भावना सैवेति - तच्छब्देन व्यापारस्य ग्रहणम्। "सोऽचि लोपे चेत्पादपूरणम्" ६-१-१३४ इत्यनेन सोर्लोपे "सैष दाशरथी रामः" इत्यस्येव "भावना सैव" इत्यस्य साधुत्वम्। स एव = व्यापार एव। भावना = भावनाभिधः। पुनरपि व्यापारं विशिनष्टि - उत्पादना सैव चेति - स एव व्यापार एव, उत्पादना च उत्पाद्यत्वेन साध्यत्वेनाभिधीयमानश्च। एवं च भावनाभिधः साध्यत्वेनाभिधीयमानो व्यापारः क्रियेति पर्यवस्यति। अत्र तन्त्राश्रयणे भूषणग्रन्थोऽनुकूलः। तत्र हि "फलव्यापारयोः" इति कारिकाघटकव्यापारपदार्थपरिशोधनावसरे "भावनाभिधः साध्यत्वेनाभिधीयमानो व्यापारविशेषः क्रिया। उक्तं च वाक्यपदीये - यावत्सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते। आश्रितक्रमरूपत्वात्सा क्रियेत्यभिधीयते" इति। वक्ष्यति ग्रन्थकारोऽपि "व्यापारो भावना सैवोत्पादना सैव च क्रियेति" इत्युक्तम्। "यावत्सिद्धम्" इत्यादिहरिकारिकापूर्वार्धाशय "उत्पादना सैव" इत्यनेन, "आश्रितक्रमरूपत्वात्" इति हरिकारिकापदार्थः "भावना सैव" इत्यनेन च विवृतः। एवं च पाकानुकूलो व्यापारः, पाकानुकूला भावना, तादृशी उत्पादना, तादृशी क्रियेति विवरणस्फोरणेन पचतीत्यत्र व्यापाररूपभावनाया अपि वाच्यत्वसमर्थनेन "कृतिरेव वाच्या, न व्यापारः" इति नैयायिकमतनिराकरणाय, भूवादिसूत्रस्थभाष्यार्थप्रतिपादकयावत्सिद्धमसिद्धं वेत्यादिहरिग्रन्थार्थविशदीकरणाय चार्थद्वयप्रतिपिपादयिषया तन्त्रेण "व्यापारो भावना सैवोत्पादना सैव च क्रिया" इति कारिकार्धो निरमायि श्रीभट्टोजिदीक्षितैः। (१) भावनाभिधः साध्यत्वेनाभिधीयमानो व्यापारविशेषः क्रिया। उक्तं च वाक्यपदीये "यावत्सिद्धमसिद्धं वा" इति। वक्ष्यति ग्रन्थकारोऽपि "व्यापारो भावना सैवोत्पादना सैव च स्मृता" इति। (२) एवं च व्यापारो भावनेति पूर्वोक्तमपि व्यापारोऽपि वाच्य इत्यभिप्रायकम्" इति भूषणग्रन्थभागौ व्यापारो भावनेत्यादिकारिकार्धे तन्त्राश्रयणे मानम्। उत्तरार्धेऽपि तन्त्राश्रयणमिति अत्रैव ग्रन्थे स्फुटीभविष्यति। एवं च संपूर्णकारिका तन्त्रेणोच्चरितेत्ति। यदपि दर्पणकाराः - ननु सम्भवेदेवं, धातोर्व्यापारार्थकत्वे, तत्रैव किं मानमित्याशङ्क्य कृञा धातुविवरणं मानं दर्शयति - सारे पचति पाकमुत्पादयतीति - इति तदपि न। व्यापारस्य धातुवाच्यत्वसाधकस्य विवरणस्य प्रकृतस्थलेऽभावात्। कृञा विवरणस्याप्यभावाच्च, किञ्च पाकं करोतीत्यस्यैव तद्रीत्या प्रदर्शनीयतया, पाकमुत्पादयति, पाकानुकूला भावना, तादृश्युत्पादनेति ग्रन्थस्य व्यापारस्य धातुवाच्यत्वासाधकस्याऽनुल्लेखनीयतापत्तिः। न च भावनोत्पादनापदयो-रुत्पत्त्यनुकूलव्यापारार्थकतया "पाकानुकूला भावना, तादृश्युत्पादना" इति विवरणाभ्यां व्यापारस्य धातुवाच्यत्वलाभ इति वाच्यम्। तद्विवरणेन व्यापारस्य वाच्यत्वलाभेऽपि धातुवाच्यत्वालाभात्। अत्र च व्यापारादेर्वाच्यत्वसमर्थन एव ग्रन्थकृतस्संरम्भः, नतु तत्तदर्थस्य तत्तद्धागवाच्यत्वसमर्थने। तत्तु "तस्मात्करोतिर्धातोः स्यात्"

इत्यत्र करिष्यते। अत एव "व्यापारो न वाच्यः, कृतिरेव वाच्या" इति नैयायिकमते फलस्यैव धातुवाच्यत्वलाभेऽपि तन्मते प्रकृतसंदर्भे दोषानुद्धाटनं सारकृतः सङ्गच्छते। किञ्च "व्यापारो भावना" इत्यादिना भावनादिपदैर्व्यापारपदविवरणेन व्यापारस्य भावनात्वलाभेन, कृञा विवरणेन व्यापारस्य धातुवाच्यतया व्यापाराभिन्नभावनाया अपि धातुवाच्यत्वसिद्धिः' इति प्रयासवैफल्यम्, पचतीत्यस्य पाकानुकूला भावनेति विवरणेनैव साक्षाद्भावनाया धातुवाच्यत्वसिद्धेर्निष्प्रत्यूहत्वात्। एतेन "ननु धातोर्व्यापारार्थकत्वे मानाभाव इति चेद्, विवरणस्यैव मानत्वादित्याह - पाकमिति - इति प्रभापि परास्ता।

यदपि दर्पणकाराः - ननु "या क्रिया भावना सैवोत्पादनापि च सा स्मृता" इत्युक्तेऽपि क्रियाया भावनात्वलाभे किमिति व्यापारपदोपादानमत आह - व्यापारपदं चेति। तथाच व्याप्रियते अनेनेति करणव्युत्पन्नेन भावव्युत्पन्नेन वा व्यापारपदेन फलानुकूलयावतामधिश्रयणादीनां भावनात्वलाभाय तदुपादानम्। क्रियापदेन तु कृतिपदवद्यत्नमात्रार्थकत्वस्यापि सम्भवेन तन्मात्रस्यैव तद्विवरणेन भावनात्वलाभः स्यादिति भावः। अत एवेति। तत्तद्रूपेण फूत्कारादीनां धातुवाच्यत्वादेवेत्यर्थः" इति। तदपि न। 'कृतिरेव वाच्या, न व्यापारः' इति नैयायिकमतनिराकरणेन व्यापारोऽपि वाच्य इत्यर्थप्रतिपादनाय "व्यापारो भावना" इत्यादिग्रन्थस्य प्रवृत्ततया व्यापार पदाभावे तादृशार्थस्यालाभापत्तेः। दर्पणोक्तरीत्यापि व्यापारपदस्य भावनादिपदैर्विवरणार्थं तस्यावश्यकत्वेन "किमिति व्यापारपदोपादानम्" इति शङ्काया अयुक्तत्वाच्च, अन्यथा व्यापारस्य धातुवाच्यत्वसाधनेऽपि व्यापारे भावनाऽभेदस्याप्रतीत्या भावनाया धातुवाच्यत्वस्यासिद्धेश्च, या क्रिया भावना सैवोत्पादनापि च सा स्मृतेत्युक्ते क्रियाया भावनात्वलाभसंपादनस्योपयोगाभावाच्च, व्यापारपदमधिश्रयणादीनां भावनात्वलाभाय" इति समाधानाशयोऽप्ययुक्तः, "व्यापारपदं फूत्कारादीनामयत्नानामपि तत्तद्रूपेण वाच्यतां ध्वनयितुमुक्तम्" इति ग्रन्थात् फूत्काराधिश्रयणादीनां भावनात्वलाभरूपार्थस्यालाभात्, "तत्तद्रूपेण" इत्यस्याऽनन्वयापत्तेश्च, "अत एव" इत्यस्य दर्पणव्याख्यारीत्या "फूत्कारादीनां भावनात्वलाभादेव" इत्यर्थस्यैव लाभेन "फूत्कारादीनां तत्तद्रूपेण धातुवाच्यत्वोपगमाय" इत्यर्थकथनाऽयोगाच्चेत्यलम्।

नचैवमेषां शक्यतावच्छेदकत्वे गौरवापत्त्या कृतित्वमेव तदवच्छेदकं वाच्यम्। रथो गच्छति जानातीच्छतीत्यादौ च व्यापारत्वादिप्रकारको बोधो लक्षणयेति नैयायिकरीतिः साध्वी। शक्यतावच्छेदकत्वस्यापि लक्ष्यतावच्छेदकत्ववद्रुरुणि सम्भवात्। तयोर्वैषम्ये बीजाभावात्।

न च पचति पाकं करोति इति यत्नार्थककरोतिना विवरणाद्यत्र एवार्थ इति वाच्यम्। रथो गमनं करोति, बीजादिनाऽङ्कुरः कृत इति दर्शनात् कृञो यत्नार्थकताया असिद्धेः।

"कृतिरेव वाच्या, न व्यापारः" इति वादी नैयायिकः शङ्कते - [न चेति] अस्य "साध्वी" त्यत्रान्वयः।

यत्तु "यद्रीत्या नैयायिकैर्व्यापारत्वस्याऽऽख्यातशक्यतावच्छेदकत्वं निरस्य कृतित्वस्य तद्व्यवस्थापितं, तद्रीत्यैव धातोः कृतित्वमात्रं शक्यतावच्छेदकं भविष्यतीति तटस्थाशङ्कां निराकरोति - नचेति" इति दर्पणकारादयः। तदयुक्तम्। कृतिरेव वाच्या न व्यापार इति मतखण्डनपरतया पूर्वग्रन्थस्य तैरव्याख्यातत्वेन, भावनाया व्यापाराभिन्नतया व्यापारस्य च धातुवाच्यतया भावनाया धातुवाच्यत्वमित्यर्थप्रतिपादनपरतया व्याख्यातत्वेन पूर्वग्रन्थेन सह 'न च' इत्यादिपूर्वपक्षग्रन्थस्यालग्नकतया, अरुन्तुदत्वेन गत्यन्तराभावेन तटस्थाशङ्कापरतया तैर्व्याख्यातत्वेन तदाशयस्य ग्रन्थकर्त्रनभिमतत्वात्। मदुक्तरीत्या व्याख्याने तु शर्करादिकं क्षीरेणेव, जतु काष्ठेनेव "न च" इत्यादिपूर्वपक्षग्रन्थः पूर्वग्रन्थेन सम्बध्नाति, मदुक्ताशय एव भूषणे दृश्यते। अत्र च सहृदयास्तत्त्वदर्शिनः प्रमाणम्।

एवं = व्यापारस्यापि वाच्यत्वाभ्युपगमे [शक्यतावच्छेदकत्वे इति] व्यापारस्य तत्तद्रूपेण वाच्यत्वस्वीकारेण फूत्कारत्वादीनां शक्यतावच्छेदकत्व इत्यर्थः। [गौरवापत्त्येति] तेषां नानात्वेनाननुगतत्वेन च गौरवमिति भावः। व्यापारत्वं तु न शक्यतावच्छेदकं, तेन रूपेणाबोधात्, तस्योपाधिरूपत्वेन तत्त्वे गौरवाच्च। [कृतित्वमेवेति] तत्तु जातिरूपमिति लाघवमित्याशयः। एवशब्देन व्यापारत्वफूत्कारत्वादेर्व्यावृत्तिः। [तदवच्छेदकं] विव्रियमाणशक्यतावच्छेदकम्। [वाच्यमिति] एवं च व्यापारो वाच्य इति मतं न सम्यगेवेति भावः। स्पष्टश्चायमाशयो भूषणे। क्रियारूपार्थस्य वाच्यत्वस्वीकारे अवच्छेदको धर्मः कः? व्यापारत्वम्? उत कृतित्वम्? इति विमृश्य व्यापारत्वमप्यवच्छेदको धर्मः, कृतित्वमपीति निर्णेतुमेव ग्रन्थकृतः प्रवृत्तिः, तत्र "कृतित्वमेवावच्छेदको धर्मः" इति विप्रतिपन्ना नैयायिकाः प्रतिसमाधीयन्ते। तद्धर्मावच्छिन्नः "प्रकृतिवाच्यः? उत प्रत्ययवाच्यः?" इत्यंशस्तु नात्र ग्रन्थकृतो दृक्पथमारूढः। स तु "तस्मात्करोतिर्धातोः स्यात्" इत्यत्र निर्णेष्यते।

एनमंशं प्राङ्न्यवेदिषम्। अत एवत्र सन्दर्भे धात्वाख्यातशब्दवार्ता न श्रूयते। अत एव च "एवं सिद्ध्यतु फलव्यापारयो र्वाच्यत्वम्। किन्त्वाख्यातवाच्यैव सा भावना, न धातोः" इति वक्ष्यमाणः "तस्मात्करोतिः" इति कारिकावतरणग्रन्थोऽपि स्वरसतः सङ्गच्छते। अन्यथा "अत्रैव तन्निर्णयः

क्रियते" इति स्वीकारे तद्ग्रन्थस्यानुत्थितिरेव स्यात्। अधिकं तत्रैव वक्ष्यते। एवं च "तदवच्छेदकं" इति प्रकृतग्रन्थस्य "विव्रियमाणशक्यतावच्छेदक" मित्येवार्थः कार्यः, सच विव्रियमाणः प्रकृतिरूपः प्रत्ययरूपो वेतित्वन्यदेतत्। एतेन "तदवच्छेदकमिति। धातुशक्यतावच्छेदकमित्यर्थः" इति वदन्तः प्रभादर्पणकारादयः, महता प्रबन्धेन "आख्यातशक्यतावच्छेदकम्" इति व्याकुर्वन्तः काशिकाकाराश्च परास्ताः। नन्वेवं कथं रथो गच्छतीति प्रयोगः? अचेतने कृत्याश्रयत्वस्य बाधादत आह - [रथो गच्छतीति] चस्त्वर्थे। लाघवात्कृतिरेव शक्या, रथो गच्छतीत्यादौ तु व्यापारे लक्षणा, तस्य च प्रथमान्तार्थे आश्रयतासम्बन्धेनान्वयः, गमनानुकूलव्यापाराश्रयो रथ इति बोध इति भावः। इदं च व्यापारे लक्षणाश्रयणं प्राचीननैयायिकरीत्या, वस्तुतस्तु व्यापारे लक्षणाश्रयणं न युक्तम्। यदा चैत्रो रथं नोदयति, तेन च रथे गमनं जातं तदा रथनिष्ठगमनानुकूलनोदनरूपव्यापारवति चैत्रादौ गच्छतीति प्रयोगापत्तेः। अत आश्रयत्वे लक्षणा आश्रयणीया, निश्चले गमनाश्रयत्वस्याभावान्न गच्छतीति प्रयोगापत्तिरिति दीधितिकृतः। ननु व्यापारस्य गमनविशिष्टव्यापारनिरूपिताश्रयत्वसम्बन्धेन प्रथमान्तार्थेऽन्वयोपगमान्निश्चले निरुक्तसम्बन्धेन व्यापारस्याभावात्तादृशप्रयोगाप्रसक्तेर्व्यापारे लक्षणाश्रयणं प्राचीनानां युक्तमेवेत्याशङ्क्य प्राचीनमते दोषान्तरं सूचयन्नाह [जानातीति] चैत्रो जानातीत्यादौ चेतने चैत्रादौ ज्ञानानुकूलव्यापाराप्रतीत्या व्यापारे लक्षणाश्रयणायोगादाश्रयत्व एव लक्षणाया अवश्यश्रयणीयतया तेनैव सर्वत्रापि निर्वाहा"ापारे लक्षणाश्रयणं न युक्तम्। चैत्रो जानातीत्यत्र ज्ञानाश्रयश्चैत्र इति बोध इति भावः। ननु चक्षुर्जानातीत्यादौ ज्ञानानुकूलव्यापारः प्रतीयत एव, अन्यथा चक्षुषः करणत्वमेव न स्यात्, व्यापारनियतत्वात्करणत्वस्येत्यत आह [आदाविति] तेन विद्यत इत्यस्य सङ्ग्रहः। घटत्वं विद्यत इत्यादौ कालसम्बन्धित्वं विदेरर्थः। तस्य चानुकूलव्यापारो न कश्चिद् घटत्वादौ सम्भवतीत्याश्रयत्व एव लक्षणा स्वीकार्या। एवं वर्णो नश्यतीत्यादौ प्रतियोगित्वे लक्षणा, यद्यपि प्रतियोगितासम्बन्धेनाऽऽश्रयत्वमेवार्थस्तत्रापि सम्भवति, तथापि प्रतियोगितात्वप्रकारेणैवानुभवस्य सर्वसिद्धतयाऽऽश्रयत्वपरित्यागः। जानातीत्यत्राऽऽश्रयत्वं समवायेनावच्छेदकतया च बोध्यम्। तेन आत्मनि चैत्रादिशरीरे च जानातीति प्रयोगः, घटादौ जानातीति प्रयोगाभावश्च सिद्धः। गत्यादेराश्रयत्वं च सामवायेनैव ग्राह्यम्। तेन येन केनचित्सबन्धेनाऽऽश्रयत्वमादाय नातिप्रसङ्गः। विस्तरस्तु आख्यातवादशिरोमणौ तद्व्याख्याने मथुरानाथरहस्ये च द्रष्टव्यः। व्यापारत्वादीत्यादिपदेनाऽऽश्रयत्वप्रतियोगित्वयोः सङ्ग्रहः। [नैयायिकरीतिरिति] कृत्यादिः प्रकृत्यर्थः, उत प्रत्ययार्थः? इति प्रकृतेऽनिरूपणात् शक्यतावच्छेदकं कृतित्वमेव स्यात्, उत व्यापारत्वादिकमपि? इत्येवात्र विचारणात्। तत्प्रसङ्गेन आख्यातार्थविचारावसरे

नैयायिकोक्तार्थस्यात्र प्रदर्शितत्वात् रीतिपदोपादानम्। वस्तुतस्तु नैयायिकग्रन्थेषु शक्यतावच्छेदकलाघवगौरविचारपूर्वकं कृतेः शक्यत्वव्यवस्थापनात्तन्मार्गनिराकरणायात्र ग्रन्थकृतः प्रवृत्ततया तन्मार्गप्रतिपादनाय 'रीति' पदोपादानम्। न हि सादृश्यप्रतिपिपादयिषायामेव रीतिपदोपादानमिति नियमः "तस्मात्करोतिः" इति कारिका व्याख्याने "सम्बन्धमात्रमुक्तं च" इत्यादि भाट्टवार्त्तिकं प्रदर्श्य "इति भाट्टरीतिर्युक्ता" इत्यादिव्यवहारस्यात्र ग्रन्थ एव सत्त्वात्। "न च" इत्यादिपूर्वपक्षग्रन्थं तटस्थाशङ्कापरतया विवृण्वन्तो दर्पणकारा एतद्रीतिपदं स्वाभिप्रायावलम्बं मन्यन्ते। तत्त्वसङ्गतमेव।

[लक्ष्यतावच्छेदकत्ववदिति] षष्ठ्यन्ताद्वितिः। व्यापारे लक्षणाश्रयणे गुरुभूतस्य व्यापारत्वस्य लक्ष्यतावच्छेदकत्ववत्, तस्य शक्यतावच्छेदकत्वस्वीकारे गौरवाभाव इत्यर्थः। यद्वा यद्रूपेण लघुगुरुरूपानादरेण लक्षणा गृह्यते तद्रूपं लक्ष्यतावच्छेदकम्। तथा गङ्गायां घोष इत्यादौ गङ्गातीरत्वेन ग्रहे गङ्गातीरत्वादौ स्वीकारस्तथा शक्यतावच्छेदकत्वस्यापि गुरुधर्मे स्वीकारे बाधकाभाव इत्याशयः। यद्वा चैत्रः पचतीत्यादौ सामानाधिकरण्यनिर्वाहाय कर्तर्याख्यातस्य लक्षणा स्वीक्रियते नैयायिकैः। तत्र कृतेर्लक्ष्यतावच्छेदकत्ववदस्मन्मते शक्यतावच्छेदकत्वं तस्या निराबाधमित्याशयः। [गुरुणि] गुरुणि धर्मरूपे। ननु कारणतावच्छेदकत्ववत् प्रतियोगितावच्छेदकत्ववच्च शक्यतावच्छेदकत्वं स्वरूपसबन्धविशेषः, स च सम्भवति लघो गुरौ न कल्प्यते। लक्ष्यतावच्छेदकत्वं तु न स्वरूपसम्बन्धविशेष इति तस्य गुरावपि सम्भव इत्यदोष इत्यत आह [तयोरिति] शक्यतावच्छेदकत्व-लक्ष्यतावच्छेदकत्वयोरित्यर्थः। [वैषम्य इति] शक्यतावच्छेदकत्वस्य न गुरौ धर्मे सम्भवः, लक्ष्यतावच्छेदकत्वस्य तु तत्र सम्भवः इत्येवंरूपे वैषम्य इत्यर्थः। [बीजाभावादिति] शक्तिलक्षणयोरुभयोरपि पदतदर्थसम्बन्धघटितत्वेन साम्याद्वैषम्ये बीजाभाव इत्यर्थः। अयं भावः। स्वरूपसम्बन्धो यदि तत्तत्स्वरूपं, तदा गुरुधर्मस्वरूपाणामपि सत्त्वात्तद्वारणासम्भवः, स्वरूपसम्बन्धो यद्यतिरिक्तस्तर्हि शक्यतावच्छेदकत्ववल्लक्ष्यतावच्छेदकत्वमपि स्वरूपसम्बन्ध एवेति सुवचतया कथं गुरुधर्मेषु तत्स्वीकारः, वृत्तिज्ञानकार्यतावच्छेदकत्वस्योभयत्रापि तुल्यत्वात्। किञ्च गुरुधर्मेष्ववच्छेदकत्वास्वीकर्त्रा तत्र तदभावः स्वीकार्यः, तद्वरमवच्छेदकत्वस्वीकार एव, भावकल्पनायां लाघवात्। वस्तुतस्तु तादृशस्वरूपसम्बन्धस्यातिरिक्तस्य स्वीकारे मानाभावः, अत एव "अवच्छेदकत्वमन्यूनानतिरिक्तवृत्तित्वम्" इति प्रामाणिकाः, तदपि गुरुधर्मे निर्बाधमिति। विस्तरस्तु भूषणतोऽवगन्तव्यः। आश्रयत्वे लक्षणेति नव्यमतेऽपि तस्य सम्बन्धनिरूपकभेदा[1]द एवेति तस्यापि लक्ष्यतावच्छेदकत्वासम्भव एवेति बोध्यम्। एवं शक्यतावच्छेदकलाघवोपष्टम्भेन पर्यवतिष्ठमानो नैयायिकः पराहतः।

पचतीत्यस्य पाकं करोतीति कृञा विवरणदर्शनात् "कृतिरेव वाच्या न व्यापारः" इति पुनरपि पर्यनुयुञ्जानस्य नैयायिकस्याऽऽशयमनूद्य दूषयति [न चेति]। [यत्नार्थकेति] न चात्र मानाभावः। क्रियाजन्यत्वप्रतिसन्धानाविशेषेऽपि यत्नजन्यत्वाजन्यत्वप्रतिसन्धानाद् घटाङ्कुरयोः कृताकृतव्यवहारस्यैव मानत्वात्। क्रियायाः कृञर्थत्वे तु क्रियाजन्यत्वस्यैव तादृशव्यवहारविषयतावच्छेदकतया तज्जन्यत्वप्रतिसन्धानदशायां यत्नाजन्यत्वप्रतिसन्धानादकृतव्यवहारानुपपत्तिः स्पष्टैव। तथाच "घटः कृतः" "अङ्कुरो न कृतः" इति विलक्षणप्रतीत्युपपत्तये कृञो यत्नार्थकत्वमास्थेयम्। स्पष्टमधिकमाख्यातावादशिरोमणितद्रहस्ययोः। [यत्न एवेति] एवशब्देन व्यापारव्यवच्छेदः। [अर्थ इति] विव्रियमाणार्थ इत्यर्थः। "यत्न एवाख्यातार्थः" इति पाठोऽत्र समुपलभ्यते, स त्वपपाठः। 'कृतिरेव वाच्या' न व्यापारः, इति नैयायिकाशय एवात्र निराक्रियते, यत्नादिः प्रकृतिवाच्यः, प्रत्ययवाच्यो वेति विचारोऽत्र ग्रन्थकृता न क्रियत इत्यसकृदावेदनात्। अन्यथा 'कृतिरेव वाच्या' इति वादिनो नैयायिकास्तस्याः प्रत्ययवाच्यत्वमेवाद्रियन्त इति लाभेन, तस्य च ग्रन्थकर्तुः कैण्डभट्टस्यानभिमतत्वात्तन्मते दोषोद्घाटनध्रौव्ये, तदकरणे निर्दलता पत्तेः। अन्ततो व्यापारादिकः प्रकृतिवाच्य इति वैयाकरणाः, प्रत्यय वाच्य इति नैयायिकाश्च ब्रुवते, नतु स्वप्नेऽपि वैपरीत्येन, इति इति वदन्तः काशिकाकाराः, तटस्थाशङ्काग्रन्थाभिप्रायेण "आख्यातार्थ" इति पाठोऽयुक्त इत्युक्त्वा "अर्थः धात्वर्थः" इति व्याकुर्वन्तो दर्पणकारादयः "अत्र यत्न एव धात्वर्थः" इति वा पाठः साधुः, "आख्यातार्थ" इति त्वसङ्गतः, धात्वर्थस्यैव प्रकृतत्वात्" इति दर्पणकाराद्याशयं स्पष्टं विवृण्वन्तः प्रभाकाराश्च परास्ताः। [रथो गमनं करोतीति] रथो गच्छतीत्यस्य विवरणमिदम्। [बीजादिनाऽङ्कुरः कृत इति] अयं कृञ्घटितः स्वतन्त्रः प्रयोगः। [इति दर्शनादिति] इत्युप्यचेतने कृञा विवरणस्य स्वतन्त्रप्रयोगस्य च दर्शनादित्यर्थः। [यत्नार्थकताया इति] यत्नमात्रार्थकताया इत्यर्थः। एवं च 'घटः कृतः' 'अङ्कुरो न कृतः' इति विलक्षणप्रतीत्यन्यथानुपपत्त्या यत्नार्थकत्वं, "रथो गच्छति रथो गमनं करोति" इति विवरणस्य 'बीजादिनाङ्कुरः कृतः' इति स्वतन्त्र प्रयोगस्य चाचेतनेऽपि दर्शना"पारार्थकत्वं च कृञोऽवश्यं स्वीकार्य मेवेति तद्विवरणादपि यत्नव्यापारायोरुभयोरपि वाच्यत्वालाभा दस्मत्पक्षसंसिद्धिरेव, कृतिरूपयत्नस्यैव वाच्यत्वमित्यत्र प्रबलप्रमाणाभावादिति भावः।

प्रभादर्पणकारादयस्तु - "रथादावचेतने यत्नस्य बाधेन तादृशप्रयोगानुपपत्त्या न कृञो यत्नार्थकत्वमपितु व्यापारार्थकत्वमेव, कृञो व्यापारे प्रयोगप्राचुर्येण तत्रैव शक्ति र्न्याय्या" इति व्याचक्षते। तन्न। 'घटः कृतः' 'अङ्कुरो न कृतः' इति विलक्षणप्रतीत्यनुपपादनात्, किञ्च ग्रन्थकृतो न कृञो यत्नार्थकत्वे विप्रतिपत्तिः, किन्तु तन्मात्रार्थकत्वे। उक्तं च भूषणे "तस्माद्यत्नत्वमेव

वाच्यतावच्छेदकमित्यत्र मानाभावः। न च कर्तृजन्यत्वाजन्यत्वप्रतिसन्धानाद् घटाङ्कुरयोः कृताकृतव्यवहारानुपपत्तिरेव मानम्, 'बीजादिना अङ्कुरः कृतः' इत्यत्रापि व्यवहारदर्शनात्, रथो गमनं करोतीति विवरणस्याचतनेऽपि दर्शनाच्च इति। "व्यापारोऽपि वाच्य इत्यभिप्रायकं, न तु कृतित्वं नावच्छेदकमिति भ्रमितव्यम्" इति भूषणग्रन्थोऽपि पूर्वमुदाहृतो न विस्मर्तव्य इत्यलम्। ["यत्नार्थकताया असिद्धेरिति"] इतिशब्दघटितः पाठः क्वचित्पुस्तके दृश्यते। तत्र इतिशब्दः "व्यापारो भावना सैवोत्पादना सैव च क्रिया" इति कारिकापूर्वभागव्याख्यासमाप्त्यर्थकः।

अत्रेदं बोध्यम्। वैयाकरणमते धातोर्व्यापारवाचित्वस्वीकारावसरे पचति पाकं करोतीति व्यापारसामान्यार्थककृञा विवरणेऽपि पचादीनां फूत्कारादौ फूत्कारत्वादिनैव शक्तिः स्वीकार्या, न तु व्यापारत्वेन। विवरणं तु सामान्यविशेषार्थबोधकत्वात्करोतिपचत्यो रुपपद्यते। तथाच भूवादिसूत्रे कैयटः - "किं करोति? पचति" इति सामान्यविशेषभावेन सामानाधिकरण्यात् क्रियाविशेषवचनाः पचादयः प्रतीयन्ते" इति। अत एव किं करोति? पचतीति प्रश्नोत्तरभावसङ्गतिः, अन्यथा क्रियासामान्यबोधककरोतघटितप्रश्ने क्रियासामान्यबोधकस्य पचतीत्यस्यानुत्तरतापत्तिः स्पष्टैव। अत एव पचतीत्युक्ते अधस्सन्तापनत्वफूत्कारत्वादिना तत्तद्रूपेण बोधस्सर्वानुभवसिद्ध उपपद्यते। न च पचादीनातत्तद्रूपावच्छन्ने लक्षणस्वीकारेण तदुपपत्तिरिति वाच्यम्। अनुपपत्तिप्रतिसंधानं विनापि तद्बोधात्। अत एव भूषणेऽत्र ग्रन्थे च तत्तद्रूपेण फूत्कारादीनां शक्यत्वं प्रतिपादितम्। अत एव नानार्थत्वापत्तिशङ्का - तत्समाधानपरतद्ग्रन्थसङ्गतिः। न च वाक्यार्थप्रदर्शनावसरे विक्लित्त्यनुकूलो व्यापारः, ज्ञानानुकूलो व्यापार इति व्यापारसामान्यार्थकव्यापारपदोपादानेन व्यापारत्वेनैव शक्तिः स्वीक्रियत इति वाच्यम्। सर्वेषामपि फूत्कारादिव्यापाराणां विक्लित्त्यनुकूलतया तदुपादानात्। विक्लित्त्यनुकूलः फूत्कार इति विशेषबोधकफूत्कारादिपदोपादाने हि फूत्कारस्यैव विक्लित्त्यनुकूलत्वम्, नान्यस्येति भ्राम्येत्। तन्निरासार्थं व्यापारपदोपादानम्। एवं च "व्यापारसामान्यार्थककृञ्विवरणादिभिर्वैयाकरणनयेऽपि व्यापारत्वेनैव धातूनां शक्तिः, विशेषरूपेण बोधस्तु लक्षणया" इति वदन्तो दर्पणकारादयः उपेक्ष्या एव। किञ्चैवं सर्वकारकनिष्ठव्यापाराणामपि व्यापारत्वेन रूपेण धातूपात्ततया तदुपात्तव्यापाराश्रयत्वेन एकस्मिन्नेव प्रयोगे सर्वेषामपि कारकाणां कर्तृत्वापत्तिः। किञ्चैवं "कारके" २-४-२३ इति सूत्रस्थभाष्यविरोधः। तत्र हि "अधिश्रयणोदकासेचनतण्डुलावपनैधोपकर्षणादिक्रियाः कुर्वन्नेव देवदत्तः 'पचतीत्युच्यते, तत्र पचिर्वर्तते। द्रोणं पचति, स्थाली पचति। सम्भवनक्रियां धारणक्रियां च कुर्वती स्थाली पचतीत्युच्यते तत्र पचिर्वर्तते" इत्याद्युक्तम्। तत्र = अधिश्रयणादावित्यर्थ इति कैयटः। अतो दर्पणोक्तमयुक्तमेवेत्यलम्।

किञ्च भावनाया अवाच्यत्वे कर्मत्वं दुर्वचम्। धात्वर्थफलाश्रयत्वस्य तत्त्वे घटं भावयतीत्यत्रेव घटो भवतीत्यत्रापि द्वितीया स्यात्। न चात्र घटस्य कर्तृत्वेन तत्संज्ञया कर्मसंज्ञाया बाधान्न द्वितीयेति वाच्यम्। अनुगतकर्तृत्वस्य त्वन्मते दुर्वचत्वेन घटस्याकर्तृत्वात्। कृत्याश्रयत्वस्य कारकचक्रप्रयोक्तृत्वस्य वा घटादावभावात्। धात्वर्थानुकूलव्यापाराश्रयत्वस्य च कारकमात्रातिव्यापकत्वात्।

अपि च भावनाया अवाच्यत्वे धातूनां सकर्मकत्वाकर्मकत्वविभाग उच्छिन्नः स्यात्। स्वार्थफलव्यधिकरणव्यापारवाचकत्वं स्वार्थव्यापारव्यधिकरणफलवाचकत्वं वा सकर्मकत्वं भावनाया वाच्यत्वमन्तरेणासम्भवि। अन्यतमत्वं तत्त्वमिति चेन्न। एकस्यैवार्थभेदेन सकर्मकत्वाकर्मकत्वदर्शनात्। तदेतदभिसन्धायाह - कृञ इति। अयं भावः - व्यापारस्यावाच्यत्वपक्षे फलमात्रमर्थ इति फलितम्। तथाच करोतीत्यादौ यत्नप्रतीतेस्तन्मात्रं वाच्यमभ्युपेयम्। तथाच 'यती प्रयत्ने' इतिवत् फलस्थानीययत्न वाच्यकत्वाविशेषादकर्मकतापत्तिरुक्तरीत्या दुर्वारा - इति। तथाच 'नहि यत्न' इत्यत्र फलस्थानीयत्वेनेति शेषः। सर्वेषामप्यकर्मकता सकर्मकता वा स्यादिति भावः।

स्यादेतत्। कार्याभिधायिलिङादीनामेव भावना वाच्या, तदतिरिक्ते पचतीत्यादिलडाद्यन्तस्थले प्रकृतिभागे प्रत्ययभागे वा भावना वाच्यैव न, फलमात्रं धात्वर्थः, तस्य चैत्रः पचति, रथो गच्छतीत्यादौ स्वजनककृतिमत्त्वाश्रयत्वादिसंसर्गेण प्रथमान्तार्थेऽन्वयः। निरुक्तसम्बन्धेन विक्लित्तिमांश्चैत्रः, गमनाश्रयो रथ इति बोधः। न च नामार्थधात्वर्थयोर्भेदेन साक्षादन्वयस्याव्युत्पन्नतया नेदं युक्तमिति वाच्यम्। मैत्रः पच्यते तण्डुल इत्यादितो मैत्रादेः कर्तृत्वेन, तण्डुलः पचति चैत्र इत्यादितस्तण्डुलादेः कर्मत्वादिना संसर्गेण पाकदावनन्वयेन 'नामार्थस्य धात्वर्थे धर्मिणि साक्षा'देनान्वयस्याव्युत्पन्नत्वेऽपि धात्वर्थस्य नामार्थे धर्मिणि साक्षा'देनान्वये बाधकाभावात्। न चैवं 'ज्ञानं चैत्रः' इत्यादावपि धात्वर्थस्य ज्ञानादेराश्रयतासंसर्गेण चैत्रादावन्वयसम्भवात्तस्याप्यन्वितार्थबोधकतया साधुत्वापत्तिरिति वाच्यम्। तत्र ज्ञानादिपदस्य बुद्ध्यर्थकनामतया तदर्थस्य समानाधिकरणनामान्तरार्थे भेदेनान्वयस्याव्युत्पन्नत्वादेवादोषात्। पचति=पाकं करोतीति यत्नार्थककरोतिना विवरणं तु संसर्गलब्धमर्थमादायोपपन्नम्। कृतिप्रकारकबोधस्तु मानस एवौत्तरकालिकः। आख्यातार्थस्तु कालः सङ्ख्या च। न च तयोरपि संसर्गलभ्यत्वम्। तत्प्रकारकबोधस्यैवानुभवसिद्धत्वात्। कारकान्वयस्तु धात्वर्थ एव। एवं च भावनाया वाच्यत्वस्यैवाभावात् क्व कृतित्वेन व्यापारत्वेन वा रूपेण वाच्यत्वे

विवादः? कथं वा धात्वाख्यातार्थत्वविवादः? इति प्राभाकराः, तान्निराकर्तुं "कृञोऽकर्मकतापत्तेः" इति मूलमवतारयति [किञ्चेति] स्पष्टश्चायमर्थो विस्तरेण भूषणे। एवं च "लडाद्यन्ते भावनाया अवाच्यत्वं वदतः प्राभाकरादीन् प्रति व्यवस्थापयति" इत्यवतरणोट्टङ्कितप्राभाकरमतनिराकरणपरोऽयं ग्रन्थः। "व्यापारो भावना" इत्यादिपूर्वार्धस्तु अवतरणस्थादिशब्दगृहीतनैयायिकमतनिराकरणपरतया व्याख्यात इति बोध्यम्।

कृष्णामित्रास्तु "नैयायिकान्निरस्य प्रकृतोपयोगितया मण्डनमतं निराकरोति - किञ्चेति - तन्मते फलमात्रस्य धात्वर्थतया आख्यातार्थो भावना" इति वदन्ति। भैरवमिश्रास्तु "पचति पाकमुत्पादयति पाकानुकूला भावनेति विवरणाद्विव्रियमाणस्यापि तद्वाचकतेति भावः" इति पूर्वग्रन्थमेव प्राभाकरमतनिराकरणपरतया, इमं ग्रन्थं "व्यापारः प्रत्ययार्थः" इति मतखण्डनपरतया च व्याकुर्वन्ति, पूर्वग्रन्थ एव नैयायिकनिराकरणपरोऽपि' इति मिश्राणामाशयः। इत्थं हि पूर्वस्तद्ग्रन्थः "विव्रियमाणस्य = धातोः, तद्वाचकता = भावनावाचकता, एतेनोभयमतं खण्डित - मिति। उभयमतमित्यस्य नैयायिक - प्राभाकरोभयमतमित्यर्थः। अत्र हि "अवाच्यत्वे = धात्ववाचत्वे" इति तदीयो ग्रन्थः। धात्ववाच्यत्व इत्युक्त्या प्रत्ययवाच्यत्व इत्याशयो व्यज्यते।

दर्पणकारा अपि फलं धात्वर्थः, व्यापारः प्रत्ययार्थ इति मतखण्डनपरतयैव इमं ग्रन्थं व्याचख्युः। इत्थं हि तदीया ग्रन्थभागाः - "अवाच्यत्वे = धात्वशक्यत्वे" "ननु घटो भवतीत्यादौ कृत्याश्रयत्वरूपकर्तृत्वबाधेऽपि धात्वर्थफलान्विताख्यातार्थव्यापाराश्रयत्वरूपकर्तृत्वात्" "असम्भवीति - एवं च व्यापारवाचकत्वं धातोरावश्यकमिति भावः" इत्यादयः।

अत्रेदं चिन्त्यम्। व्यापारः प्रत्ययार्थ इति मतनिराकरणपरतया ग्रन्थ मिमं व्याकुर्वतां कृष्णमित्रादीनां सर्वेषामपि "किञ्च भावनाया अवाच्यत्वे घटं भावयतीत्यत्रेव घटो भवतीत्यत्रापि द्वितीया स्यात्" इति प्रकृतग्रन्थेन "किञ्च भावनायास्तिङर्थत्वे घटं भावयतीत्यत्रेव घटो भवतीत्यत्रापि द्वितीया स्यात्" इति वक्ष्यमाण "किं कार्यम्" इत्यादिकारिकाव्याख्यानस्थग्रन्थस्य पौनरुक्त्यापत्तिर्दुर्वारा। किञ्च "धात्वर्थानुकूलव्यापारश्रयस्य कर्तृत्वे" इति ग्रन्थतो धात्वर्थफलानुकूलाख्यातार्थव्यापाराश्रयत्वं कर्तृत्वमित्यर्थस्य तद्रीत्या लाभेन 'पाचयति विष्णुमित्रेण देवदत्तः' इत्यादौ प्रयोज्यस्याकर्तृत्वापादनस्यात्रैव प्रदर्शयितव्ये तदकरणेन ग्रन्थकृतो निर्दलतापत्तिः, किञ्च आख्यातार्थव्यापारव्यधिकरण-फलवाचित्वरूपसकर्मकत्वस्यात्रापि सुवचतया तदसम्भवप्रदर्शनासङ्गत्यापत्तिश्च। अस्मद्रीत्या तु प्रकृतिभागे प्रत्ययभागे वा लडाद्यन्तस्थले भावनाया अवाच्यत्वं वदतां प्राभाकराणां मतनिराकरणपर एष ग्रन्थः।

भावनाया वाच्यत्वलाभेऽपि प्रत्ययवाच्यैव सा भावनेति मण्डनमतनिराकरणपरो वक्ष्यमाणो ग्रन्थ इति न पौनरुक्त्यापत्तिः। भावनायाः सुतरामवाच्यत्ववादिमिते यो दोषः स भावनाया आख्यातवाच्यत्ववादिमतेऽपि दुर्वार इत्याशयेनात्र प्रदर्शितो दोषस्तत्रापि प्रदर्शयिष्यते। एतदभिप्रायेणैव "किञ्च भावनाया अवाच्यत्वे घटं भावयतीत्यत्रेव घटो भवतीत्यत्रापि द्वितीया स्यात्, किञ्च भावनायास्तिङर्थत्वे घटं भावयतीत्यत्रेव घटो भवतीत्यत्रापि द्वितीया स्यात्" इति समानदोषप्रदर्शकयोरुभयोरपि ग्रन्थयोः "भावनाया अवाच्यत्वे" "भावनायास्तिङर्थत्वे" इति निरसनीयविभिन्नमतस्फोरकशब्दप्रयोगो ग्रन्थकृतः स्वरसतः सङ्गच्छते। अन्यथोभयत्राप्यैकरूप्येण "अवाच्यत्वे" इति "तिङर्थत्वे" इति वा ब्रूयात्। अत एव च "एवं सिद्ध्यतु फलव्यापरयोर्वाच्यत्वं, किन्त्वाख्यातवाच्यैव सा भावना न धातोः" इति मण्डनमिश्रानुयायिशङ्काग्रन्थोऽपि यथाश्रुतमेव स्वरसतः सङ्गच्छते। किञ्च अवतरणोट्टङ्कितप्राभाकरमतस्य तद्रीत्यात्रानिराकृतत्वेन ग्रन्थस्य न्यूनतापत्तिर्दोषः।

यत्तु - ननु व्यापारशक्तत्वे यत्नजन्यत्वाजन्यत्वप्रतिसंधानदशायां 'घटः कृतः' 'अङ्कुरो न कृतः' इति व्यवहारानुपपत्तिः। तदुक्तमाचार्यैः "कृताकृतविभागेन कर्तृरूपव्यवस्थया। यत्न एव कृतिः पूर्वा परस्मिन् सैव भावना" इति। इत्यत आह - किञ्च भावनाया इति - अवाच्यत्वे=व्यापाररूपभावनाया धातोस्तिङश्चाऽवाच्यत्वे" इति काशिकाकाराः व्यापाररूपभावनाया अवाच्यत्ववादिमतनिराकरणपरतया पूर्वग्रन्थशेषतया (एकग्रन्थतया) व्याचख्युः। तन्न। कारिकाभागद्वयस्य अस्मदुक्तरीत्या मतद्वयनिराकरणपरतया भूषणे स्पष्टं व्याख्यातत्वेन तद्विरोधात्। अवतरणसूचितप्राभाकरमतस्य काशिकारीत्यात्रानिराकृतत्वेन मूलस्य न्यूनतापत्तेश्च। किञ्चैवं संपूर्णकारिकाग्रन्थस्य व्यापारस्य वाच्यत्वसाधकतया "व्यापारो भावनेत्यर्धेन व्यापारस्य वाच्यत्वं प्रसाध्य" इत्यनुपदवक्ष्यमाणग्रन्थासङ्गतिश्च, तेन कारिकापूर्वभागमात्रस्य व्यापारस्य वाच्यत्वसमर्थकताप्रतीतेः। किञ्च "नच पचति पाकं करोतीति यत्नार्थककरोतिना विवरणात्" इति पूर्वपक्षाशय एवात्रावतरणे काशिकाकारैः प्रदर्श्यते, स च पूर्वपक्षग्रन्थोऽपि एतदाशयक इति तैर्व्याख्यातश्च। सचाशयः "रथो गमनं करोति" इत्यादिना मूल एव निराकृतः। अतः काशिकाकाराणामवतरणग्रन्थोऽप्यसङ्गत एव। किञ्च तद्रीत्या 'फलं धात्वर्थः, कृतिराख्यातार्थः, व्यापारस्तु न कस्यापि वाच्यः' इति नैयायिकमतस्य, व्यापारस्य वाच्यत्वसमर्थनेन निराकृतत्वे, "कृतिराख्यातार्थः" इत्यंशस्यात्रानिराकृतत्वेन तस्या आख्यातार्थत्वे परिशेषा"पारस्य धातुवाच्यत्वलाभेन, प्राचीननैयायिकमतनिराकरणेन "फलव्यापारौ धात्वर्थः, कृतिराख्यातार्थः" इति नव्यनैयायिकमतमेवात्र वैयाकरणेन कौण्डभट्टेन ग्रन्थकृता निरूपितं स्यादिति विपरीतार्थप्रतीत्यापत्तिः।

किञ्च तदुक्तरीत्या व्यापारस्य धातुवाच्यत्वस्याऽऽवश्यकतया "एवं सिद्ध्यतु फलव्यापारयो र्वाच्यत्वं, किन्त्वाख्यातवाच्यैव सा भावना" इति वक्ष्यमाणग्रन्थासङ्गतिः। अत्र व्यापारस्य धातुवाच्यताया निर्धारितत्वेन पूर्वपक्षस्यैवासम्भवात्। "पूर्वोक्तयुक्तिभिः फलव्यापारयोर्वाच्यत्वे साधिते "आख्यातवाच्यैव भावना" इति मण्डनमतं निराकरोति" इति तत्रत्यतदीयग्रन्थासङ्गतिश्चेत्यलम्। [भावनाया अवाच्यत्व इति] - कृति - व्यापारादिरूपाया भावनाया लडाद्यन्ते प्रकृतिभागे प्रत्ययभागे वा वाच्यत्वाभाव इत्यर्थः। 'अवाच्यत्वे' इत्यस्मादनन्तरं "कर्मत्वं दुर्वचम्। धात्वर्थाश्रयत्वस्य तत्त्वे" इत्यर्थको ग्रन्थस्त्रुटित इत्याभाति। अन्यथा निरुक्तप्राभाकरमते कर्मत्वस्य दुर्वचत्वेन "घटो भवतीत्यत्रापि द्वितीया स्यात्" इति द्वितीयापादनायोगाद्यथाश्रुतग्रन्थासङ्गतिः स्पष्टैव। भूषणग्रन्थोऽप्यत्रानुकूलः। तत्र हि "कर्मणा सहितत्वं सकर्मकत्वम्। तदभावापत्तेरित्यर्थः। अस्मिन् मते कर्मत्वस्य दुर्वचत्वात्। न च धात्वर्थाश्रयत्वं कर्मत्वम्। तथा सति तण्डुलं पचति, घटं भावयतीत्यत्रेव घटो भवतीत्यत्रापि घटस्य कर्मत्वं दुर्वारमिति द्वितीया स्यात्" इत्युक्तम्।

कारिकायाम् "अकर्मकतापत्तेः" इत्यस्य सकर्मकत्वानापत्तेरित्यर्थः। सकर्मकत्वं च कर्मणा सहितत्वम्। प्राभाकरमते कर्मत्वस्य दुर्निर्वचतया तत्सहितत्वरूपसकर्मकत्वानापत्तिर्दोषः, तमेनमुपपादयितुं प्रथमं तन्मते कर्मत्वस्य दुर्वचत्वमाह [कर्मत्वं दुर्वचमिति] लडाद्यन्तस्थले प्रकृतिभागे प्रत्ययभागे वा यत्किञ्चिद्रूपभावनाया अवाच्यत्वं वदतां प्राभाकराणां मते कर्मत्वं दुर्वचमित्यर्थः। तथा च कर्मणा सहितत्वरूपसकर्मकत्वानापत्तिस्तन्मत इति तात्पर्यम्। ननु तन्मते धात्वर्थफलाश्रयत्वमेव कर्मत्वमस्त्वत आह [धात्वर्थाश्रयत्वस्येति] तदर्थफलाश्रयत्वस्येत्यर्थः। तत्त्वे = कर्मत्वे। तद्दूषयति [घटं भावयतीत्यत्रेवेति] इदं च सकर्मकधातूपक्षणम्। तण्डुलं पचति, घटं भावयतीत्यादौ सकर्मकधातुस्थल इवेत्यर्थः। [घटो भवतीत्यत्रापीति] अकर्मकधातुस्थलेऽपि धातूपात्तफलाश्रयस्य कर्मत्वं दुर्वारम्। चैत्रोऽस्ति, चैत्रो भवतीत्यादौ चेतनस्य चैत्रादेस्तदीयकर्तृसंज्ञया कर्मसंज्ञाया बाधसम्भवाददोषं मत्वाचेतने दोषतादवस्थ्याभिप्रायेण "घटो भवति" इति घटपदोपादानम्। [द्वितीया स्यादिति] कर्मत्वस्य दुर्वारतया द्वितीया स्यादित्यर्थः। स्वाशयं प्रकटयितुं शङ्कते [न चेति] अत्र = भवतीत्यादावकर्मकस्थले। [कर्तृत्वादिति] "स्वतन्त्रः कर्ता" २-४-५४ इति कर्तृसंज्ञासूत्रे चेतनाचेतनविभागाभावेनाचेतनस्य घटादेरपि स्वतन्त्रतया विवक्षणात्कर्तृत्वादित्यर्थः। ततः किमायातम्? अत आह - [तत्संज्ञयेति] तदीयकर्तृसंज्ञयेत्यर्थः। कर्मसंज्ञायाः घटादेः प्रसक्तकर्मसंज्ञायाः बाधादिति वैयाकरणानामिवास्माकमपि "आकडारादेका संज्ञा" १-४-१ इति नियमस्वीकारादित्याशयः। [न द्वितीयेति] तदुत्पत्तिप्रयोजककर्मसंज्ञाया अभावात्, तत्तद्विभक्त्युत्पत्तौ तत्तत्संज्ञाया एव नियामकत्वादिति भावः। [अनु गतकर्तृत्वस्येति]

शास्त्रानुगतकर्तृत्वस्येत्यर्थः। "स्वतन्त्रः कर्ता" २-४-५४ इति सूत्रे चेतनाचेतनविभागाभावेऽपि स्वतन्त्रपदेन धात्वर्थव्यापाराश्रयस्य ग्रहणेन त्वन्मते घटादीनां कर्तृत्वाभाव इति चैत्रस्तण्डुलं पचतीत्यादौ चैत्रादेरपि तत्त्वाभाव इत्याशयः। त्वन्मते भावनाया अवाच्यत्वं वदतस्तव मते। [दुर्वचत्वादिति] तथाच घटस्य निरुक्तरीत्या कर्मत्वस्य दुर्वारतया द्वितीयापत्तिः। अतः कर्मत्वं दुर्वचमेव तव मते। एवं च कर्मणा सहितत्वं सकर्मकत्वमिति रीत्या पचादीनां सकर्मकत्वानापत्तिस्तदवस्थैवेति भावः। कर्तृपदस्य योगार्थाश्रयणेनाह [कृत्याश्रयत्वस्येति] कृतिवाचिनः करोतेस्तृच आश्रयार्थकतया एतदर्थलाभः। कृतेरवाच्यत्वेऽपि वस्तुतस्तदाश्रयस्य कर्तृत्वमाश्रीयत इति भावः। ननु स्वतन्त्रः कर्तेति सूत्रे स्वतन्त्रत्वं न धात्वर्थव्यापाराश्रयत्वरूपं, स्वतन्त्रपदस्य तत्रापरिभाषणात्। किन्तु इतरानधीनत्वं स्वतन्त्रत्वमिति माधवाचार्यमतमाश्रित्याह [कारकचक्रप्रयोक्तृत्वस्येति] कारकाणां चक्रं समूहः, तस्य प्रयोक्तृत्वं कर्तृत्वम्। स्वतन्त्रपदेन अन्यानधीनव्यापारवत्त्वं ग्राह्यम्। तेन कारकान्तरव्यापारो यदधीनः, स स्वतन्त्रः, तद्वत्त्वं च प्रवर्तकत्वादिना। तथा च तद्धात्वर्थीयकारकसमुदायप्रवर्तकत्वमिति पर्यवसन्नमिति भावः। उभयमप्यचेतनेऽव्याप्तमित्याह [घटादावभावादिति कृत्याश्रयत्वस्य कारक चक्रप्रयोक्तृत्वस्य च प्राणिधर्मतया घटादावचेतने तदभावादित्यर्थः। प्रकारान्तरेण कर्तृत्वं निर्वक्तुमारभते [धात्वर्थानुकूलव्यापारश्रयत्वस्येति] धातोरर्थः फलं, तदनुकूलस्यावाच्यस्यापि व्यापारस्य वस्तुतो य आश्रयस्तस्य कर्तृत्वम्। तच्चाचेतनेऽपि सम्भवतीति भावः। तदेतद्दूषयति [कारकमात्रातिव्यापकत्वादिति] मात्रपदं कृत्स्नार्थकम्। सर्वकारकनिष्ठव्यापाराणां धात्वर्थफलानुकूलतया तदाश्रयत्वात्सर्वेषामपि कारकाणामेकस्मिन्नेव प्रयोगे कर्तृत्वापत्तेरित्यर्थः। वैयाकरणमते तु न दोषः। यन्निष्ठो व्यापारो धात्वर्थतया विवक्ष्यते, तदेव कारकं कर्तृसंज्ञम्। नहि सर्वकारकनिष्ठव्यापारा युगपद्धात्वर्थतया विवक्ष्यन्ते। स्पष्टं चेदं "कारके" १-४-५४ इति सूत्रे भाष्ये। प्राभाकरमते तु नैवं वक्तुं पार्यते। तन्मते व्यापारस्य वाच्यत्वस्यैवाभावात्। कर्तृत्वस्य दुर्वचत्वप्रतिपादनेन "अवाच्यत्वे" इति ग्रन्थादनन्तरं "कर्मत्वं दुर्वचम्, धात्वर्थाश्रयत्वस्य तत्त्वे" इति पाठो ग्रन्थकृत्सम्मतः। स च पाठः कालवशाद्भ्रष्ट इत्यनुमीयते। अत्र च द्वितीयापादनमेवानुकूलस्तर्कः, अन्यथा कर्तृत्वस्य दुर्वचत्वे कर्तुरीप्सिततमस्यैव कर्मतया तदप्रसिद्ध्या तत्र द्वितीयापादनासम्भवः स्पष्ट एव। एवं च प्राभाकरमते पचादीनां कर्मणा सहितत्वं सकर्मकत्वमिति रीत्या सकर्मकत्वानापत्तिर्दोषः।

एवं कर्मणा सहितत्वं सकर्मकत्वमिति योगार्थाश्रयणेन प्राभाकरमते सकर्मकत्वानापत्तिं प्रदर्श्य, रूढ्यर्थाश्रयेण तन्मते तां तदर्शयति [अपि चेति] केषांचिद्धातूनां सकर्मकत्वसिद्धावन्येषाम्

अकर्मकत्वस्यार्थलभ्यतया सकर्मकत्वाकर्मकत्वविभागः सिद्ध्यति। प्राभाकरमते स नोपपद्यत इत्याह [सकर्मकत्वेत्यादिना] उच्छेदं दर्शयितुं सिद्धान्ते सकर्मकत्वं रूढ्यर्थाश्रयणेन निरूपयति [स्वार्थफलेति] स्वं धातुः व्यापारे फलवैयधिकरण्यं च फलतावच्छेदकसम्बन्धेन ग्राह्यम्। तेन सकर्मकाणां कालिकादिसम्बन्धेन फलसानाधिकरणव्यापारवाचित्वेऽपि, अकर्मकाणां सम्बन्धान्तरेण फलव्यधिकरणव्यापारवाचित्वेऽपि न दोषः। विनिगमकाभावादाह [स्वार्थव्यापारेति] एतादृशं सकर्मकत्वं सिद्धान्ते स्वीक्रियते, इदं च लक्षणारूपमेव, न त्ववयवशक्तिलभ्यम्। [असम्भवीति] तन्मते व्यापारस्य वाच्यत्वाभावेन तद्घटितसकर्मकलक्षणानाक्रान्ततया पचादीनां सकर्मकत्वानापत्त्या दोषतादवस्थ्यं स्पष्टमेव। प्रकारान्तरेण सकर्मकत्वं प्राभाकरः प्रदर्शयति [अन्यतमत्वं तत्त्वमिति] अयं भावः। भवन्मतेऽपि सर्वेषा मपि धातूनां यत्किञ्चित्फलव्यधिकरणव्यापारवाचित्वात्सकर्मकत्वापत्तिवारणाय फले "स्वार्थेति विशेषणं दीयते। तत्र स्वत्वस्याननु गततयानुगतसकर्मत्कवासम्भवेन सकर्मकत्वेनाभिमता यावन्तो धातवस्तावदन्यतमत्वं तत्त्वमिति वाच्यम्। तादृशसकर्मकत्वं च व्यापारस्य वाच्यत्वमस्वीकुर्वतां मतेऽपि सुवचं निराबाधं चेति। तद्दूषयति [एकस्यैवेति] एकानुपूर्वीकस्यैवेत्यर्थः, तेन नदी वहति, भारं वहति इति वाक्यद्वयघटकवहधातुव्यक्त्योरुच्चारणभेदेनार्थभेदेन च परस्परं भेदेऽपि न क्षतिः। अर्थभेदेऽपि शब्दाभेद इति मते वा इदम्। [दर्शनादिति] तथा च लक्षणाननुगम इष्ट एव, अन्यतमत्वं तत्त्वमिति स्वीकारे तु सर्वत्रैवार्थे सकर्मकत्वापत्तिर्दोषः। वस्तुतस्तु "ऋतौ स्वदारान् गच्छेत्" "स्वपितृभ्यः श्राद्धं दद्यात्" इत्यादौ स्वत्वदारत्वपितृत्वादेरननुगतत्वेऽपि विशिष्यानतिरिक्तार्थबोधकत्ववत् प्रकृतेऽप्यनतिप्रसक्तार्थबोधकत्वं स्वशब्दस्येति न दोषः। स्पष्टं चेदं भूषणे। तद् = कर्मणा सहितत्वं सकर्मकत्वं तदनापत्तिरिति प्रथमोक्तम्, एतद् = स्वार्थफलव्यधिकरणव्यापारवाचित्वरूप-सकर्मकत्वानापत्तिरिति प्रकृतं च। अभिसन्धाय = ऐकरूप्येण मनसि कृत्वा। ननु "कृञोऽकर्मकतापत्तेः" इत्यस्य कृञो यत्नार्थकत्वनिरासकस्य कथमुक्तार्थाभिसधायकत्वमित्याशङ्क्याभिसन्धानप्रकारं दर्शयति [अयं भाव इति] व्यापारावाच्यत्वपक्षे = प्रकृतिभागे प्रत्ययभागे वा व्यापारस्य = सकलविधव्यापारस्यावाच्यत्वमिति प्राभाकरमते [फलमात्रमिति] मात्रशब्देन कृतिरूपभावनाया व्यापाररूपभावनायाश्च व्यवच्छेदः। एवार्थकमात्रशब्देन मयूरव्यंसकादित्वात्समासः। [अर्थ इति] धात्वर्थ इत्यर्थः फलितं = निष्पन्नम्। फल निष्पत्ताविति धातोर्निष्ठायां फलितमिति रूपम्। तथाच = फलमात्रस्य वाच्यत्वे च । [तन्मात्रमिति] मात्रपदेन यत्नव्यधिकरणोत्पत्त्यादेर्व्यावृत्तिः। कृञो यत्नार्थकत्वं प्राभाकराणामपीष्टमेव। वाच्यं = करोतिवाच्यम्। भावनारूपो यो यत्नः स फलरूप एव। न तु

त"धिकरण इत्याशयः। तथा च = करोतेर्यत्नार्थकत्वे च। [यती प्रयत्ने इतिवदिति] अयं च व्यतिरेकेण दृष्टान्तः। [फलस्थानीयेति] तत्स्थानापन्नेत्यर्थः, कारिकायां कृञ इत्यस्य यत्नार्थकतायामिति शेषः। अन्यथा वायुर्विकुरुते, सैन्धवा विकुर्वते इत्यादावकर्मकत्वदर्शनाद्यथाश्रुतेऽसङ्गत्यापत्तेः। स्पष्टं चेदं भूषणे। [अकर्मकतापत्तिरिति] सकर्मकतानापत्तिरित्यर्थः। अन्यथा फलमात्रस्य धात्वर्थत्वनये स्वार्थफलसमानाधकरणव्यापारवाचित्वरूपाकर्मकत्वापादनस्यासम्भवेन यथाश्रुतेऽसगत्या पत्तेः, स्पष्टं चेदं भूषणे। उक्तरीत्या = स्वार्थफलव्यधिकरणव्यापारवाचित्वं सकर्मकत्वमित्युक्तरीत्या। एवं च स्वार्थफलेत्यादिसकर्मकत्वं यथा यततेर्न भवति, तथा यत्नार्थकतायां करोतेरपि न स्यादित्यर्थः।

यत्तु "उक्तरीत्या = उक्तप्रायरीत्या, सकर्मकधातुभिन्नत्वमित्याकारयेत्यर्थः। यथाश्रुते धातोर्व्यापारवाचकत्वे स्वार्थफलसमानाधिकरणव्यापारवाचकत्वरूपाकर्मकत्वापादानस्यासम्भवद् उक्तिकतापत्तेः" इति दर्पणकाराः। तन्न। सकर्मकस्याप्येकस्य धातोरभावात्तुल्ययुक्त्या 'अकर्मकधातुभिन्नत्वं सकर्मकत्वम्' इत्यस्याप्यापत्तावन्योन्याश्रयापत्तेः। सकर्मकरूपप्रतियोग्यप्रसिद्ध्या तदुक्तार्थापादानस्याप्यसम्भवाच्च। न च नयत्यादिद्विकर्मकाणां संयोगाद्यनुकूलाजानिष्ठक्रियात्मक-फलार्थकत्वस्य धातोः फलमात्रार्थकत्ववादिनाप्यभ्युपगमादजानिष्ठक्रियायाः संयोगरूप-फलजनकत्वाल्लोकप्रसिद्धेश्च व्यापारत्वात्तदर्थकधातून् ण्यन्तधातून् वोपादायैव कथञ्चित्प्रतियोगिप्रसिद्धिरिति दर्पणोक्तं युक्तम्। प्राभाकारमते नयत्यादौ अजानिष्ठक्रियाया अपि संसर्गलभ्यतया संयोगमात्रस्यैव तद्वाच्यतया ण्यन्तेऽपि गमयतीत्यादौ संयोगमात्रस्यैव वाच्यतया तदनुकूलव्यापारानुकूलव्यापारस्य संसर्गलभ्यतया तेषामपि सकर्मकत्वाभावात्प्रतियोग्यप्रसिद्धितादवस्थ्यात्। प्राभाकरमते व्यापारगन्धस्य संसर्गबललभ्यत्वस्वीकारात्। अत एव "सकर्मकत्वं भावनाया वाच्यत्वमन्तरेणासम्भवि" इति तदसम्भवप्रदर्शनं ग्रन्थकृतः सङ्गच्छते। अन्यथा नयत्यादौ ण्यन्तधातौ वा सकर्मकत्वसम्भवात्पचत्यादौ तल्लक्षणस्याव्याप्तिमेव ग्रन्थकृत्प्रदर्शयेत्। किञ्च "कथञ्चित्प्रसिद्धिसम्भवा" इति वदतो दर्पणकारस्यापि न स्वोक्तार्थे दृढतरो विश्वासः। अतः उक्तरीत्या = स्वार्थव्यापारव्यधिकरणफलवाचकत्वमित्युक्तरीत्या, अकर्मकतापत्तिः = सकर्मकतानापत्तिरिति मदुक्तव्याख्यैवोचिता भूषणानुगृहीता च। एतेन दर्पणानुसारिणः पञ्चोलिप्रभृतयः परास्ताः। ननु यद्धातूच्चारणे कर्माकाङ्क्षा नियता स सकर्मकः, अन्योऽकर्मक इत्याश्रीयते। पचादीनां केवलफलवाचित्वेऽपि नियतकर्माकाङ्क्षासत्त्वात्सकर्मकत्वं निराबाधम्। करोतियतत्योः पर्यायत्वेऽपि करोतेस्सकर्मकत्वं, यततेरकर्मकत्वं च सेत्स्यति। आकाङ्क्षायाः शब्दविशेषधर्मतया करोतेस्तत्साकाङ्क्षत्वस्य, यततेस्तदभावस्य च सत्त्वात्। यथा

कर्मत्वादिपदोपस्थाप्यकर्मत्वादेरानयनादिक्रियाकाङ्क्षित्वाभावेऽपि द्वितीयाद्युपस्थाप्यस्य तस्य तदाकाङ्क्षित्वं, तद्वत्। एवमेकस्यैव धातोरर्थान्तरे सकर्मकत्वमर्थान्तरेऽकर्मकत्वं चोपपद्यते। तत्तदर्थप्रतिपादकत्वरूपधर्मपुरस्कारेण कर्माकाङ्क्षित्व - तदनाकाङ्क्षित्वयोर्वक्तुं शक्यत्वात्। यथा ग्रथधातोर्ग्रथमानार्थकस्य ग्रथ्ययानव्यापारवाचित्वेऽकर्मकत्वं, ग्रन्थितव्यापारवाचित्वे सकर्मकत्वं चेति चेन्न। गच्छति पततीत्यादौ कर्माकाङ्क्षाविरहेणाव्याप्तेः। तत्र 'कुत्र' इत्येवाकाङ्क्षासत्त्वात्। भावनाया अवाच्यत्ववादिनां मते कर्मत्वस्य दुर्निर्वचतया तदाकाङ्क्षावत्त्वरूपसकर्मकत्वस्यासम्भवाच्च। न च द्वितीयान्तपदोपस्थाप्यत्वं कर्मत्वमस्त्विति वाच्यम्। स्तोकं भवतीत्यादेरपि सत्त्वेनातिव्याप्तेः। न च सकर्मकधात्वर्थाश्रयत्वं कर्मत्वम्। अन्योन्याश्रयेण सकर्मकत्वादेर्दुर्ग्रहत्वापत्तेरित्यलम्।

ननु भावनाया अवाच्यत्ववादिमतखण्डनाय प्रवृत्तस्य भवतः 'नहि यत्नोऽर्थ इष्यते' इत्युक्तिर्व्याहतेत्यत आह [तथाचेति] फलव्यधिकरणभावनास्थानीययत्नवाचित्वं त्विष्टमेवेति भावः। ननु भावनाया अवाच्यत्ववादिमते धातुमात्रस्य सकर्मकत्वानापत्तिसम्भवात्। 'कृञ' इति विशेषोक्तिरयुक्तेत्यत आह [कृञ इतीति] सर्वेषामपि = सर्वेषामपि धातूनाम्। [अकर्मकतेति] सकर्मकत्वाभावः स्यात्, फलमात्रस्य धात्वर्थत्ववादिप्राभाकरमते सर्वेषामपि धातूनां सकर्मकत्वभावः स्यात्। अस्त्यादीनां सकर्मकत्वाभाव इष्ट एवेति चेत्, शास्त्रे तेषामकर्मकपदेनैव व्यवहारदर्शनेन तद्विरोधो दुष्परिहरः, शास्त्रे सकर्मकाकर्मकोभयव्यवहारानुपपत्तिश्चेति भावः। [सकर्मकता वेति] प्राभाकरमते पचादीनां सकर्मकत्वसम्पादनाय फलवाचित्वं सकर्मकत्वमित्याश्रयणेऽस्त्यादीनामपि फलवाचित्वात्सर्वेषामपि धातूनां सकर्मकतैव स्यात्, शास्त्रे "उदश्वरः सकर्मकात्" २-३-५३ "अकर्मकाच्च" २-३-३५ "लः कर्मणि च भावेचाकर्मकेभ्यः" ३-४-६९ इत्यादिना धातूनां द्वैराश्येन निर्देशो नोपपद्येत। भावनाया वाच्यत्वोपगमे तु निरुक्तरीत्या तद्विभाग उपपद्यते। एवं च फलमात्रं धात्वर्थः, लडाद्यन्ते प्रकृतिभागे प्रत्ययभागे वा यत्किञ्चिद्रूपाया अपि भावनाया वाच्यत्वमेव न, कालः सङ्ख्या चाख्यातार्थः, कृत्युद्देश्यत्वरूपकार्यत्वबोधकानां लिङादीनामेव भावना वाच्येति प्राभाकरमतमयुक्तमेवेति सिद्धम्।

यत्तु "वस्तुतस्तूक्तयुक्त्या धातोर्व्यापारवाचित्वसिद्धिस्तदैव स्यात्। यदि स्वार्थफलेत्यादिसकर्मकलक्षणं सकर्मकधातुसाधारणं स्यात्, तदेव न, अध्याद्युपसृष्टशीङादिष्वव्याप्तेः। तस्माद् भ्वादीनां धातुत्वानापत्तिर्दोषः। मैत्रेण पाचयतीत्यादौ मैत्रादेः कर्तृत्वानापत्तिश्च तथा। अत एव "निवृत्तप्रेषणाद्धातोः प्राकृतेऽर्थे णिजिष्यते" इत्याद्युपपत्तिः" इति दर्पणकाराः। तन्न। कर्मणा सहितत्वं सकर्मकत्वमिति योगसिद्धार्थाश्रयणेन सकर्मकलक्षणस्य अध्याद्युपसृष्टशीङादिष्वव्याप्तेरभावात्।

स्वार्थव्यापारव्यधिकरणफलवाचित्वं सकर्मकत्वं, कर्मणा सहितत्वं सकर्मकत्वमिति द्वेधा सकर्मकत्वनिर्वचनस्य भूषणे ग्रन्थकृता दर्शितत्वात्। द्विविधमपि निर्वचनमत्रापि प्रदर्शितम्। तथैव "किं च भावनाया अवाच्यत्वे" "अपि च भावनाया अवाच्यत्वे" इति भूषणसारग्रन्थभागौ मया व्याख्यातौ। किञ्च प्राभाकरमते धातुवाच्यफल एव कारकाणामन्वयेन कारकान्वयित्वरूपक्रियात्वस्य धातुशक्यतावच्छेदकतया क्रियावाचित्वनिबन्धनधातुत्वसिद्धेर्भ्वादिप्रत्यूहत्वाच्च। चैत्रः पचतीत्यादावपि अनुगतकर्तृत्वासम्भवेन दर्पणकाराणां ण्यन्तधातुपर्यन्तानुधावनस्य व्यर्थत्वाच्च। न च प्रकृतग्रन्थः "आख्यातार्थे व्यापारः" इति मीमांसकमतनिराकरणपरः, तन्मते चैत्रः पचतीत्यादावाख्यातार्थव्यापाराश्रयत्वेन कर्तृत्वस्य सिद्धत्वात्तादृशशुद्धधातुस्थलं विहाय दर्पणकारैर्ण्यन्तानुधावनं कृतं प्रयोज्यस्य आख्यातार्थव्यापारानाश्रयत्वेन कर्तृत्वाभावस्य स्पष्टत्वादिति वाच्यम्। प्रयोज्यस्य तया रीत्या कर्तृत्वासिद्धेः "किं कार्यं पचनीयं च" इत्यदिकारिकाव्याख्याने मण्डनमतनिराकरणावसरे ग्रन्थकृतैव प्रदर्शयिष्यमाणत्वात्। "लडाद्यन्ते प्रकृतिभागे प्रत्ययभागे वा यत्किञ्चिद्रूपापि भावना न वाच्या" इति प्राभाकरमतनिराकरणपरतया प्रकृतग्रन्थस्यात्र संदर्भे तादृशाशयवर्णनस्यान्याय्यत्वाच्चेति दिक्।

अथवा "व्यापारो भावना" इत्यर्धेन व्यापारस्य वाच्यत्वं प्रसाध्य फलांशस्यापि तत्साधयन् नैयायिकाभ्युपगतं जानाति - करोत्यादेः केवलज्ञानयत्नादिक्रियामात्रवाचित्वं दूषयति [कृञ इति] अयं भावः - फलांशस्यावाच्यत्वे व्यापार एव धात्वर्थः स्यात्। तथा च स्वार्थफलव्यधिकरणव्यापारवाचित्वादिरूपसकर्मकत्वोच्छेदापत्तिः। नहि तीरपदस्य गङ्गायां भाक्तत्वेऽपि तेन स्नानादिकार्यं कर्तुं शक्यम्। एवं च "न हि यत्नः" इत्यत्र यत्नमात्रमित्यर्थः।। ।।५।।

ननु "कृञोऽकर्मकतापत्तेर्नहि यत्नोऽर्थ इष्यते" इति कारिकार्धस्य प्राभाकरमतनिराकरणपरतया योजनमयुक्तम्। "व्यापारो भावना" इत्यादिकारिकाभागस्य पाकानुकूलो व्यापोरः, पाकानुकूला भावना इत्यादिविवरणस्फोरणेन व्यापारादीनां वाच्यत्वसमर्थनपरतया तेनैव ग्रन्थेन प्राभाकरमतस्यापि दत्तोत्तरत्वात्। नच "पाकानुकूलो व्यापारः पाकं करोति, पाकानुकूला भावना" इत्यादिविवरणं संसर्गलब्धमर्थमादायोपपन्नमिति न तेन विवरणेन व्यापारादीनां वाच्यत्वलाभ इति वाच्यम्। यजेत पचेतेत्यादावपि भावनायाः संसर्गलभ्यत्वापत्तौ तत्रापि प्राभाकरमते भावनाया वाच्यत्वानापत्तेः। पचतीत्यादौ कालसङ्ख्ययोरपि संसर्गलभ्यतया वाच्यत्वानापत्तेश्च। न च प्रकारतया भानानुरोधेन

कालसङ्ख्ययोराख्यातवाच्यत्वमिति वाच्यम्। न प्राभाकराणामनुभव एव वस्तुनः सिद्ध्यसिद्ध्योः प्रमाणम्। किन्तु सकलसाधारणानुभवः। तादृशश्चानुभवो व्यापारादिप्रकारकोऽपीति तस्यापि वाच्यत्वे बाधकाभावात्। एवं च "व्यापारो भावना" इत्यादिकारिकापूर्वभागेनैव कृतिरेव वाच्या, न व्यापार इति नैयायिकमतं, लडाद्यते प्रकृतिभागे प्रत्ययभागे वा यत्किञ्चिद्रूपापि भावना वाच्यैव नेति प्राभाकरमतं च निराक्रियते। अतः "कृञोऽकर्मकतापत्तेः" इति ग्रन्थो न प्राभाकरमतनिराकरणपर इत्याशयवान् "कृञोऽकर्मकतापत्तेः" इति मूलमन्यार्थपरतया व्याचष्टे [अथवेति]

यत्तु "ननु कृञोऽकर्मकतापत्तेः" इति ग्रन्थो न मीमांसकमतनिराकरणपरः, तस्य "तस्मात्करोतिः" इत्यादिना निराकरिष्यमाणत्वात्। तैः कृञो यत्नार्थकताया अनभ्युपगमाच्च। नापि नैयायिकमतनिराकरणपरः, नैयायिकैः फलव्यापारयोरुभयोरपि धातुवाच्यत्वाभ्युपगमात्। किञ्चैतद्ग्रन्थस्य धातुमात्रस्य व्यापारार्थकत्वसाधकत्वे "धातोरकर्मकतापत्तेः फलमात्रार्थता न हि" इत्येव ब्रूयात्। नतु "कृञः" इति, इत्यपरितोषान्मूलमन्यार्थपरतयावतारयति - अथवेति - इति दर्पणकाराः, तन्न। निरुक्तरीत्या "कृञोऽकर्मकतापत्तेः" इत्यादिग्रन्थस्य प्राभाकरमतनिराकरणपरतया तदुक्तविकल्पानामनवकाशात्। व्यापारः प्रत्ययार्थः फलमात्रं धात्वर्थ इति मण्डनमतनिराकरणपरेण "तस्मात्करोतिः" इत्यादिग्रन्थेन प्राभाकरमतनिराकरणपरप्रकृतग्रन्थस्य गतार्थयितुं शक्यत्वाच्च। भाट्टरहस्यादौ खण्डदेवादिभः कृञो यत्नार्थकत्वाभ्युपगमाच्च। नव्यनैयायिकैरिव नव्यमीमांसकैरपि धातोः फलव्यापारोभयवाचकत्वाभ्युपगमाच्च। सर्वेषामपि धातूनां कृञः प्रधानतया सर्वेषामपि वादिनां कृञर्थनिर्णये विभिन्नाभिप्रायकतया तत्र मतान्तरनिराकरणेन स्वसिद्धान्तप्रदर्शनस्यावश्यकतया च "कृञोऽ कर्मकतापत्तेः" इति कृञ्घटितसूत्रणस्यात्यन्तमुपयुक्तत्वाच्च, "अथवा" इत्यादिना प्रदर्शिते व्याख्यानान्तरेऽपि कारिकायां कृञ्ग्रहणवैयर्थ्यापादनस्यापरिहृतत्वाच्च। द्वितीयपक्षे धातुमात्रस्य फलवाचित्वसिद्धेर्भूषणसम्मतत्वात्, अतो वल्लभोक्तिर्नादर्तव्येवेत्यलम्।

अर्धेन = व्यापारो भावनेत्यादिकारिकार्धेन [व्यापारस्येति] सकलव्यापारस्येत्यर्थः। कृतिरूपार्थस्य फूत्काररूपार्थस्य चेति भावः [प्रसाध्येति] "व्यापारो भावना" इत्यादिपूर्वार्धस्य पाकानुकूलो व्यापारः, पाकानूकूला भावनेत्यादिविवरणस्फोरणेन सर्वेषामपि वाच्यत्वप्रसाधकतया व्यापारमात्रस्य वाच्यत्वलाभः। एवं च "कृतिरेव वाच्या, न व्यापारः, इति नैयायिकमतखण्डनपरेण "व्यापारो भावना" इत्यादिकारिकार्धेनैव "यत्किञ्चिद्रूपापि भावा वाच्यैव न" इति प्राभाकरमतमपि निराकृतं भवतीति ग्रन्थकर्तुर्निगूढाशयः।

यत्तु "प्रसाध्येति पूर्वार्धस्य विवरणपरतया व्याख्यानादिति भावः" इति दर्पणकाराः। तन्न। व्यापारस्य भावनात्वलाभाय व्यापारपदस्य भावनादिपदैर्विवरणपरतया तैर्व्याख्यातेन पूर्वार्धेन तद्रीत्या तद्ग्रन्थेन व्यापारस्य वाच्यत्वालाभात्। "पचति पाकमुत्पादयति, पाकानुकूला भावना" इति भूषणसारग्रन्थस्यैव व्यापारस्य धातुवाच्यत्वसाधकतया तैर्व्याख्यातत्वात्, तद्ग्रन्थस्यापि व्यापारस्य धातुवाच्यत्वप्रतिपादकत्वासम्भवेन दर्पणस्यायुक्तताया अस्माभिः प्राक् प्रतिपादितत्वाच्च।

[साधयन्निति] अत्र "लक्षणहेत्वोः क्रियायाः" ३-२-१२६ इति हेतौ शतृप्रत्ययः। फलांशस्य वाच्यत्वे यो हेतुः, तद्धेतुकं ज्ञाकृञादीनां क्रियामात्रवाचित्वदूषणमिति समुदायार्थः। "व्यापारमात्रं धात्वर्थः, फलं कर्मप्रत्ययार्थः" इति जरन्नैयायिकमतं यया हेतूक्त्या नव्यनैयायिकैर्निराकृत्य फलस्यापि धातुवाच्यत्वं साध्यते, तयैव ज्ञाकृञादेरपि फलवाचित्वस्य दुर्वारतया जानात्यादीनां ज्ञानादिक्रियामात्रवाचित्वं सर्वनैयायिकाभ्युपगतमयुक्तमेवेति भावः। [नैयायिकेति] सर्वनैयायिकेत्यर्थः। [केवलयत्नेत्यादि] केवलमात्रोभयपदोपादानेन जानात्यादेर्धातोः सर्वेऽपि नैयायिकाः फलावाचित्वं नाभ्युपयन्ति, तदुत्तरकर्मप्रत्ययस्यापि फलवाचित्वं नाङ्गीकुर्वत इति द्योतयति। ननु कृञः फलावाचकत्वे कथमकर्मकत्वमत आह [अयं भाव इति]

यत्तु "फलावाचकत्वेऽपि फलव्यधिकरणव्यापारवाचित्वं सकर्मकत्वं कृञोदेरप्यक्षतमेव, उत्पत्त्यादिरूपफलव्यधिकरणयत्नाद्यात्मकव्यापारवाचकत्वादित्याशङ्क्याह 'अयं भावः' इति काशिकाकाराः, तदनुसारिणः पञ्चोलिनश्च। तन्न। सर्वेषामपि धातूनां यत्किञ्चित्फलव्यधिकरण-व्यापारवाचित्वात्सकर्मकत्ववारणाय फले स्वार्थेति विशेषणस्याऽऽवश्यकत्वात्। यदपि पञ्चोलिनः "यद्वा द्वितीयाद्यर्थफलान्वय्यर्थकत्वं सकर्मकत्वं, द्वितीयादीनामेव फलार्थकत्वाददोष इत्यत आह 'अयं भावः' इति" तदपि न। घटं करोति, घटं जानाति, इत्यादौ सविषयकस्थले द्वितीयाया अपि नैयायिकैः फलवाचित्वानङ्गीकारात्। तत्र द्वितीयाया विषयत्वे लक्षणेति हि तेषामभ्युपगमः।

ननु धातोर्व्यापारमात्रवाचित्ववादिनां मते स्वार्थफलसमानाधिकरणव्यापारवाचित्व-रूपाकर्मकत्वापादानमसम्भवीत्याशङ्क्य आह [तथा चेति] धातोर्व्यापारमात्रार्थकत्वे चेत्यर्थः। कारिकायाम् "अकर्मकतापत्तेः" इत्यस्य सकर्मकत्वानापत्तेरित्यर्थान्नोक्तदोषः। तद् ध्वनयन्नाह [स्वार्थफलेत्यादिना] इदं च सकर्मकपदस्य रूढ्यर्थाभिप्रायेण। योगार्थाश्रयेण तु कर्मणा सहितत्वं सकर्मकत्वमिति लभ्यते। तदेतदाह [आदीति] [सकर्मकत्वोच्छेदामतिरिति] रूढ्यर्थाश्रयणे धातोर्व्यापारवाचित्वेऽपि स्वार्थफलवाचित्वाभावात्। योगार्थपक्षे घटं करोतीत्यादौ घटादेः कर्मत्वस्य दुर्वचत्वेन

तत्सहितत्वरूपार्थावाचित्वात् सकर्मकत्वोच्छेदापत्तिर्दोषः। तथा च "उदश्वरः सकर्मकात्" १-२-५३ इत्यादीनि शास्त्राणि व्याकुप्येयुः। ननु प्रत्ययार्थफलव्यधिकरणव्यापारवाचित्वमेव सकर्मकत्वमस्तु। प्रत्ययार्थफलाश्रयत्वमेव कर्मत्वमतो न कश्चिद्दोष इति चेन्न। घटं भावयति, एधयतीत्यादिण्यन्तसकर्मकेषु तत्कर्मणि चाव्याप्तेः। तत्र फलस्यान्वयव्यतिरेकाभ्यां धातुलभ्यत्वेनान्यलभ्यत्वात्।

अयं च कारिकाभागो धातुमात्रस्य फलवाचकत्वसमर्थनपरः, नतु जानात्यादिसविषयकधातूनामेव। अत एव एत'ागव्याख्यावसरे "उपलक्षणं" चेतत् कृञ इति धातुसामान्यस्य। उक्तवक्ष्यमाणयुक्तिभिः सर्वेषामेवोभयवाचकवात्। "तस्मात्फलव्यापारयोरिति प्रतिज्ञातफलवाचकत्वसमर्थनायैव कृञोऽकर्मकतापत्तेरिति ग्रन्थ इति विभावयामः" इत्यादिभूषणग्रन्थसङ्गतिरिति बोध्यम्।

यत्तु "वस्तुतस्तु व्यापारो भावना सैव" इति पूर्वार्धमेव विवरणप्रदर्शनेन धातोः फलव्यापारोभयार्थत्वसाधकम्। तथाहि धातोर्व्यापारार्थकत्वेऽसिद्धे भावनादिपदैर्व्यापारपदविवरणमात्रान्न तस्य तावत्सिद्धिरिति स्फुटमेव। अतः पचति = पाकं करोति, पाकभावना, तादृश्युत्पादनेत्यादिविवरणपरतैव तस्य वाच्या, व्याख्यातं च तथैव सारकृता। तथाच व्यापारार्थककृञेव विक्लित्त्याद्यर्थकपाकादिपदेनापि विवरणादुभयोरपि धातुवाच्यत्वसिद्धिः। तत्र जानात्यादौ फलांशे विप्रतिपन्नं नैयायिकं प्रति उक्तार्थोपष्टम्भकतया "कृञो ऽकर्मकतापत्तेः" इत्याद्युक्तम्। धातुमात्रे व्यापारावाचकत्वं वदन्तं मीमांसकं प्रति तु तदुपपादकतयैव "तस्मात्करोतिः" इत्यादि। यद्यपि व्यापारांशे विप्रतिपन्नं प्रत्यपि "कृञ" इत्याद्युपष्टम्भकं, तथापि विवरणस्यैवाऽऽख्यातपरतया, सकर्मकत्वस्य व्यापारार्थकत्वं विनाऽप्यन्यथासिद्धावु'ाितायां तद्ग्रन्थस्याऽऽवश्यकत्वात्" इति दर्पणकाराः।

तन्न। पूर्वार्धे व्यापारः भावनेत्यादिव्यापारबोधकपदानां सत्त्वाद्व्यापारस्य तेन वाच्यत्वलाभेऽपि फलबोधकपाकादिपदानामभावात्तेन फलस्य वाच्यत्वालाभात्। तदुक्तरीत्या तद्ग्रन्थस्य भावनादिपदै र्व्यापारपविवरणपरतया तेन व्यापारस्यापि वाच्यत्वालाभाच्च। अत एव तत्सारग्रन्थो व्यापारस्य धातुवाच्यत्वप्रतिपादनपरतया तैर्व्याख्यातः। कारिकाग्रन्थो व्यापारस्य भावनाऽभेदप्रतिपादकः। सारग्रन्थस्तु व्यापारस्य धातुवाच्यत्वसाधक इति तेषामाशयः।

किञ्च "व्यापारपदं भावनादिपदैर्विव्रियते, तेन विव्रियमाणस्य विवरणसमानार्थकतया धातोर्भावनावाचकत्वसिद्धिः" इति कारिकाग्रन्थस्य भावनादिपदैर्व्यापारपदविवरणपरतया, "ननु सम्भवेदेवं, धातोर्व्यापारार्थकत्वे। तत्र च किं मानमित्याशङ्क्य कृञा धातुविवरणं मानं दर्शयति - सारे - पचति पाकं करोति इति" इतिसारग्रन्थस्य कृञा विवरणेन धातोर्व्यापारवाचित्वसाधकपरतया च स्वयं

व्याख्यातत्वेन तद्रीत्या व्यापारो भावनेति कारिकाग्रन्थस्य यथाश्रुते सङ्गतत्वेन तस्य "पचति पाकं करोति, पाकभावना, तादृश्युत्पादनेति पाकादिपदेनापि विवरणपरत्वकल्पनाया अनावश्यकत्वाच्च। यदि तु "पूर्वव्याख्यानमाश्रित्य, नवीना एषा व्याख्या कल्प्यत" इत्युच्यते, तदा व्यापारस्य भावनात्वालाभप्रसङ्गः। तथा च त्वदुक्ता धातोर्भावनावाचित्वसिद्धिर्हीयेत, सर्वथापि "व्यापारो भावना" इत्येतावतैव सिद्धे "सैवोत्पादना सैव च क्रिया" इति ग्रन्थभागस्य त्वन्मते व्यर्थतापत्तिर्दुष्परिहरा। सर्वेषामपि तत्तद्रूपेण भानसिद्ध्ये तदुपादानमिति तु वक्तुमशक्यम्। तव ग्रन्थे तथाऽलेखनात्।

किञ्च "व्यापारो भावना" इति कारिकाग्रन्थः "कृतिरेव वाच्या, न व्यापरः" इति नैयायिकमतनिराकरणेन व्यापारस्यापि वाच्यत्वं प्रतिपादयति। तथा "पचतीत्यादिलडाद्यन्तस्ले प्रकृतिभागे प्रत्ययभागे वा भावनाया वाच्यत्वमेव न" इति प्राभाकरमतनिराकरणेन तस्या वाच्यत्वं प्रतिपादयति, नतु व्यापारादेर्धातुप्रत्ययान्यतरवाचित्वं समर्थयति, तत्समर्थनपरस्तु "तस्मात्करोतिर्धातोः स्यात्" इत्यादिरुत्तरो ग्रन्थः। अत एव "एवं सिद्ध्यतु फलव्यापारयोर्वाच्यत्वं, किन्त्वाख्यातवाच्यैव सा भावना" इति "तस्मात्करोतिः" इत्यादि कारिकावतरणग्रन्थसङ्गतिः। निरूपितं चैतत्प्राक्, निरूपयिष्यते च। एवं स्थिते वस्तुतत्त्वे "व्यापारार्थककृञेव विक्लित्त्याद्यर्थकपाकादिपदेनापि विवरणादुभयोरपि वाच्यत्वसिद्धिः, ... यद्यपि व्यापारांशे विप्रतिपन्नं प्रत्यपि कृञ इत्याद्युपष्टम्भकं .... तद्ग्रन्थस्यावश्यकत्वात्" इति दर्पणोक्तिश्चिन्त्यैव। किञ्चास्य ग्रन्थस्य फलव्यापारयोरुभयोरपि धातुवाच्यत्वसाधकपरत्वे पाकं करोति पचतीत्यादिरीत्या फलार्थकपाकादिपदप्रयोगेणापि तन्निरूपणे कर्तव्ये तदकरणे निर्दलतापत्तिः। किञ्च "तस्मात्करोतिर्धातोः स्यात्" इत्यादिकारिकाग्रन्थस्य पचति = पाकं करोति, पक्कवान् = पाकं कृतवानित्यादिना धात्वर्थविवरणपरत्वात्तेनैव सर्ववादिनिराकरणेन फलव्यापारयोरुभयोरपि धातुवाच्यत्वप्रतिपादनसम्भवेन "व्यापारो भावना" इत्यादिग्रन्थस्य वैयार्थ्यापत्तेश्च। किञ्च तदुक्तरीत्या पाकादिपदैर्विवरणात्फलस्य सकलधातुवाच्यत्वसिद्धौ, तेनैव जानात्यादेरपि फलवाचकतालाभेन "कृञोऽकर्मकतापत्तेः" इति कारिकाभागस्य वैयर्थ्यापत्तेश्च, पाकमित्यादिविवरणं केवलपच्यादिविषयकमेव, नतु जानात्यादिविषयकमपीति तु शपथमात्रनिर्णेयम्। किञ्च पचति पाकं करोतीति प्रकृतिभूतकृञा विवरणाद्धातोरेव व्यापारवाचित्वं, न प्रत्ययस्येति स्पष्टमेव लाभेनानेनैव मीमांसकमतस्यापि दत्तोत्तरत्वेन "तस्मात्करोतिः" इत्यस्यानावश्यकत्वापत्तेश्चेत्यलम्।

"भाक्तस्तु जानात्यादेः सकर्मकत्वव्यवहारः" इत्याख्यातवादशिरोमणिग्रन्थं निराचष्टे [न चेति] [कृञादाविति] आदिपदेन जानात्यादेर्ग्रहणम्। "व्यापारमात्रं धात्वर्थः, फलं कर्मप्रत्ययार्थः" इति

जरन्नैयायिकाः, तदयुक्तम्। फलव्यापारौ धात्वर्थः, तदनुकूला कृतिराख्यातार्थ इति नव्याः, सर्वेऽपि नैयायिका जानातिकरोत्यादेर्ज्ञानादिक्रियामात्रं वाच्यं, फलं न वाच्यं, नापि कर्मप्रत्ययार्थः फलम्। विषयत्वमेव तदर्थः, जानात्यादेः कर्मनिमित्तककार्यलाभाय भाक्तं सकर्मकत्वमिति ब्रुवते। एतेन "नैयायिकोक्तमिति प्राचीननैयायिकोक्तमित्यर्थः। नव्यनैयायिकैः फलव्यापारयोरुभयोरपि धातुवाच्यत्वस्वीकारात्" इति पञ्चोलिनः परास्ताः।

तद्दूषयति [व्यवहारस्येति] कृञ्धातुस्सकर्मक इति व्यवहारस्येत्यर्थः। भाक्तत्वेऽपि = लक्षणया निर्वाहेऽपि। [लकारासम्भवादिति] क्रियते घटश्चैत्रेण, ज्ञायते घटश्चैत्रेणेत्यादौ कर्मार्थे लकारासम्भवादित्यर्थः। "वस्तुतः सकर्मकत्वाभावात्, फलावच्छिन्नव्यापारबोधकादेव कर्मणि प्रत्ययः" इति तैरेवाभ्युपगमादिति भावः। स्पष्टं चेदं भूषणे।

यत्तु "गौणमुख्यन्यायादिति भाव" इति काशिकाकाराः। "मुख्यसकर्मकत्वमादाय शास्त्रस्य चारितार्थ्ये गौणे तद्व्यापारे मानाभाव इति भावः" इति दर्पणकाराः। मुख्यकर्मत्वाभावात् गौणमुख्यन्यायेन प्रधानाप्रधानयोरिति न्यायेन च तादृशकर्मणः लः कर्मणीत्यादिसूत्रेऽग्रहणात्" इति बालकृष्णशास्त्रिणः, "मुख्ये कर्मणि पच्यते तण्डुल इत्यादौ लः कर्मणीत्यस्य चरितार्थत्वात्" इति परीक्षाकाराश्च, तन्न। लविधौ गौणमुख्यविभागाभावस्याऽऽकरे स्पष्टत्वात्। अत एव "गौणे कर्मणि दुह्यादेः" इत्यादिसङ्गतिरिति ध्येयम्। एतेन "भाक्तराजपदव्यवहार्येण पुरोहितादिना तदीयकार्यप्रवर्तनान्महॅतश्चन्द्रमा इत्यादावात्ववारणायाश्रितगौणमुख्यायस्य विशिष्यार्थोपस्थापकविशिष्टरूपोपादानपुरस्सर-पदकार्यविषयकत्वस्यान्यत्र व्यवस्थापनाच्च नात्र तद्विषयतेत्यन्ये" इति दर्पणोक्तिः परास्ता।

अत्र लौकिकं दृष्टान्तमाह [नहीति] "तीरपदस्य गङ्गायां भाक्तत्वेऽपि" इति पाठः। तीरपदस्य प्रवाहरूपार्थे लाक्षणिकत्वेऽपि इति तदर्थः, तेन = तीरपदलक्ष्यप्रवाहरूपार्थेन। [शक्यमिति] इतीति शेषः, इतिशब्दो द्वितीयव्याख्यासमाप्त्यर्थकः, वस्तुतस्तु सदुदककरणकं स्नानपानादिकार्यं तीरपदलक्षितप्रवाहरूपार्थेन कर्तुं न शक्यम्, तद्वदत्रापि कर्मणि लकारादिप्रवृत्तिरूपं कार्यं न शक्यमिति तात्पर्यम्। अत्र पक्षे "नहि यत्नः" इति मूलं योजयति [एवं चेति] धातूनां व्यापारमात्रार्थकत्वे सकर्मकत्वानापत्तौ चेत्यर्थः। ।।५।।

अत एवाह -

किन्तूत्पादनमेवातः कर्मवत् स्याद्यगाद्यपि।
कर्मकर्तर्यन्यथा तु न भवेत्तद् दृशेरिव।। ।।६।।

उत्पादनम् = उत्पत्तिरूपफलसहितं यत्नादि कृञर्थ इत्यर्थः। फलस्य वाच्यत्वे युक्त्यन्तरमाह [अत इत्यादि] यतः कृञो यत्नमात्रमर्थो नेष्यते, अतः। [कर्मवत्स्यादिति] पदेन "कर्मवत्कर्मणा तुल्यक्रियः" ३-२-८७ इति सूत्रं लक्ष्यते। अयमर्थः - यत एवास्योत्पादनार्थकता, अतः पच्यते ओदनः स्वयमेवेतिवत् क्रियते घटः स्वयमेवेति यगादयोऽप्युपपद्यन्ते। अन्यथा यत्नस्य कर्मनिष्ठत्वाभावात् तन्न स्यात्। यथा दृश्यते घटः स्वयमेवेति न। दर्शनस्य घटावृत्तित्वात्। तथा यत्नस्यापीति तथा प्रयोगानापत्तेरिति।। ।।६।।

[अत एवेति] कृञोऽकर्मकतापत्तेरित्यस्य प्राभाकरमतनिराकरणपरत्वेऽत एवेत्यस्य फलस्थानीययत्नवाचित्वे सकर्मकत्वानापत्तेरेवेत्यर्थः। तद्ग्रन्थभागस्य फलस्य वाच्यत्वप्रसाधकत्वे यत्नमात्रार्थकतायां सकर्मकत्वानापत्तेरेवेत्यर्थः।

कारिकायां [किन्त्विति] कृञोऽकर्कतापत्तेर्नहि यत्नोऽर्थ इष्यते किन्तूत्पादनमेवाऽर्थ इति योजना कार्या। किन्तूत्पादनमेवेत्येकं वाक्यम्। अत्र "कृञोऽर्थ" इत्यनुषज्यते। ननु यत्नार्थकत्व इवात्रापि सकर्मकत्वानापत्तिरेव, उत्पादनस्योत्पत्तिरूपतया उत्पद्यत इत्यस्येव अकर्मकतापत्तेरत उत्पादनशब्दार्थमाह [उत्पादनम् = मुत्पत्तिरूपफलसहितमिति] उत्पत्तिरूपफलव्यधिकरणयत्नादव्यापारः कृञोऽर्थ इत्यर्थः। तेनोत्पत्तिरूपधात्वर्थफलाश्रयत्वेन घटादीनां कर्मतया तत्सहितत्वरूपस्य, स्वार्थफलव्यधिकरणव्यापारवाचित्वरूपस्य च सकर्मकत्वस्य करोतेरक्षतत्वेन क्रियते घटश्चैत्रेणेत्यादौ कर्मणि लकारसिद्धिरिति भावः।

अत इत्यस्य पूर्वोक्तार्थहेतुपरत्वभ्रमवारणायाह [युक्त्यन्तरमाहेति] पूर्वत्र सकर्मकत्वानापत्तिर्हेतुः। अत्र तु कर्मवद्भावनापत्तिरिति विशेषः। अत इत्यस्य साकाङ्क्षत्वादाह [यत इति] कारिकायां शास्त्रातिदेशपक्षाभिप्रायेणाह [कर्मवदिति] तत्पदघटितं "कर्मवत्कर्मणा तुल्यक्रियः" ३-२-८७ इति सूत्रं स्यादित्यर्थः। तत्पक्षेऽतिदेशशास्त्रेण निमित्तान्यतिदिश्यन्ते। प्रधानकार्याणि तु तत्तच्छास्त्रैरेवेति भावः। एतदभिप्रायेणैव "सूत्रं लक्ष्यते" इति भूषणसारे उक्तम्। एतत्पक्षे "कर्मवत्" इत्यस्य "यगाद्यपि" इत्यत्र नान्वयः। प्रधानभूतकार्यातिदेशपक्षाभिप्रयेणाह कारिकायां [यगाद्यपीति] तत्पक्षे प्रधानकार्याण्यतिदेशशास्त्रेणैवेति भावः। पूर्वस्मिन् पक्षे निमित्तातिदेशेऽपि प्रधानकार्यस्य तत्तच्छास्त्रप्रवृत्त्यपेक्षिततया शास्त्रद्वयव्यापार आवश्यकः, प्रधानकार्यातिदेशे तु एकस्यैव व्यापार इति लाघवम्। द्वितीयपक्षे लाघवसद्भावेऽपि प्रथमपक्ष एव भाष्यसम्मत इत्यन्यत्र विस्तरः। कार्यातिदेशपक्षे

कर्मवदित्यस्य "यगाद्यपि" इत्यत्रान्ययः। तथाच पक्षभेदाभिप्रायेण "कर्मवत्स्याद्यगाद्यपि" इत्यत्र वाक्यद्वयं बोध्यम्। एवंच शास्त्रातिदेशपक्षे कर्मकर्तरि कर्मवत् = तत्पदघटितं "कर्मवत्कर्मणातुल्यक्रियः" इति सूत्रं स्यादित्यर्थः। कार्यातिदेशपक्षे तु तत्र "कर्मवत् = कर्मवत्कर्मणा तुल्यक्रियः" इति सूत्रेण यगाद्यपि = यगात्मनेपदचिण्चिण्वदिङ्रूपं कार्यमपि स्यादित्यर्थः। अत एव कारिकायां "कर्मवत्" इति सामान्येनोपत्तम्। एवं व्याख्यान एव कारिकायाम् "अपि" ग्रहणं सङ्गच्छते। अन्यथा "कर्मवत्स्याद्यगाद्यपि" इत्यस्यैकवाक्यत्वे यगाद्यतिरिक्तस्य सङ्ग्राह्यस्यार्थस्याऽभावात्तद्वैयर्थ्यं स्पष्टमेव। पूर्वग्रन्थे कृञो यत्नमात्रार्थकत्वप्रतिषेधेन उत्पादनार्थकत्वं व्यवस्थापितम्। नहि तत्र किञ्चत्कार्यं प्रतिपादितम्। अतः पूर्वोक्तार्थ समुच्चायकत्वमपि "अपि" शब्दस्य न घटते। अतो मदुक्तिरेव युक्ता।

मूले "कर्मवत्" इत्यस्य "स्यात्" इत्यत्रैवान्वयः शास्त्रातिदेशपक्षे, न तु "यगाद्यपि" इत्यत्रेति सूचयितुं स्यादित्यन्तं प्रतीकं धत्ते [कर्मवत्स्यादितीति] अन्यथा कर्मवदित्येव ध्रियेत। अत एव कृष्णमित्रेण "सूत्रं लक्ष्यत इति ग्रन्थः सूत्रप्रवृत्तिर्लक्ष्यत इत्यर्थः" इति व्याख्यातः। तेन कर्मवदित्यस्य स्यादित्यत्रैवान्वयः, नतु यगादीत्यत्रेति स्पष्टमेव प्रतीयते। [पदेनेति] कर्मवत्पदेनेत्यर्थः। [सूत्रं लक्ष्यत इति] अनेनात्र व्याख्याने कर्मवदित्यस्य कर्म इवेति, कर्मणीव इति वा नार्थ इति सूचयति। एवं च कर्मवत्स्यादितीति प्रतीकधारणं "पदेन सूत्रं लक्ष्यते" इत्येष एव कौण्डभट्टस्य विवरणग्रन्थ इति ज्ञेयम्।

एतेन १. स्यादित्यन्तं प्रतीकधारणमित्यजानानाः कर्मवत्स्यादिति पदेनेति सर्वोऽपि ग्रन्थः कौण्डभट्टीय इत्यभिप्रयन्तः, २. "ननु कर्मवत्स्याद्यगाद्यपीति मूलस्य कर्मवत् यगाद्यपि स्यादित्यर्थो लभ्यते, स च बाधितोऽविवक्षितश्चेत्यत आह - कर्मवत्स्यादिति पदेनेति सूत्रं लक्ष्यत इति सूत्रविहितं लक्ष्यत इत्यर्थः। यथाश्रुते कर्मवत्पदात् स्वघटितत्वेन लक्षणया सूत्रोपस्थितावपि तस्य यगादीत्यनेनानन्वयापत्तेः। एतद्बोधनायैव स्यादिति लक्ष्यकोटावुपात्तम्" इति व्याकुर्वन्तो दर्पणकाराः, ३. "ननु वचनाभावात् कर्मकर्तरि कर्मवत्स्याद्यगाद्यपीति मूलमनुपपन्नमित्यत आह "कर्मवत्स्यादिति पदेनेति" सूत्रं लक्ष्यत इति सूत्रविहितमित्यर्थः। अन्यथा यगादीत्यनेनानन्वयापत्तेः। कार्यातिदेश पक्षे तत्सूत्रविहित्वं यगादेः, शास्त्रातिदेशपक्षे तु परम्परयेति बोध्यम्" इति वदन्तः काशिकाकाराः, ४. "यद्वा कर्मवदिति "कर्मवत्कर्मणा तुल्यक्रिय" इति सूत्रैकदेशानुकरणम्। तच्च कर्मवत्कर्मणा तुल्यक्रिय इति सूत्रविहिते लाक्षणिकम्। सूत्रे लक्षणायामप्यनन्वयापत्तेः। तथाच मूले "सूत्रं लक्ष्यते" इत्यस्य सूत्रविहितं लक्ष्यत इत्यर्थः। तस्य यगादीत्यत्रान्वयः" इति व्याचक्षाणाः प्रभाकाराः, ५. "सूत्रं लक्ष्यत

इति सूत्रविहितं लक्ष्यत इत्यर्थः" इति विवृण्वन्तः परीक्षाकाराश्च परास्ताः। "कर्मवत्स्यात्" इत्यस्यापदत्वेन तद्रीत्या "पदेन सूत्रं लक्ष्यते" इति मूलस्यासङ्गत्यापत्तेश्च। "कर्मवत्स्यादिति पदेन" इत्यस्य कर्मवत्स्यादिति समुदायघटकेन पदेन = कर्मवत्पदेनेत्यर्थविवक्षणे गैरवम्। लक्षणास्वीकारापत्तिश्च। किञ्च सूत्रं लक्ष्यते = सूत्रविहितं लक्ष्यत इत्यर्थस्वीकारेऽतिगौरवम्। तदस्वीकारेऽपि यथा श्रुतेऽन्वयोऽस्माभिः प्रदर्शित एव। किञ्चानेकत्र लक्षणास्वीकारेण संयोजने मूलग्रन्थस्य विसंष्ठुलतापत्तिः। किञ्चैवं कारिकायाम् 'अपि' ग्रहणस्य वैयर्थ्यं दुष्परिहरम्। शास्त्रातिदेशकार्यातिदेशपक्षौ स्पृशन्तोऽपि काशिकाकारा मूलं न सम्यग् व्याख्यातुमीशते, तन्मतेऽपि कारिकायाम् "अपि" ग्रहणस्य फलं न निरूपितं स्यात्, तैरपि सूत्रपदस्य तद्विहिते लक्षणाश्रयणेन "कर्मवत्स्याद्यगाद्यपि" इत्यस्यैकवाक्यताया एव स्वीकृतत्वात्।

यत्तु पञ्चोलिनः कर्मवत् = कर्मणि इवेत्यर्थे सप्तम्यन्ताद्वतिः, कर्मणि प्रत्यये यथा यगादिर्भवति तथा कर्मर्तर्यपि यगादिः स्यादित्यर्थः - इति। तत्तु समीचीनमेव। परं तु तत्र किञ्चिद्विचार्यमस्ति, यत् "किन्तूत्पादनम्" इति कारिका भूषणे द्वेधा व्याख्याता। प्रथमव्याख्यायां कर्मवत्पदं सूत्रलक्षकं, द्वितीयव्याख्यायां कर्मणीव = कर्मवदित्यर्थकम्। अपिशब्दो भिन्नक्रमः। कर्मवत् = कर्मणि प्रत्यय इव कर्मकर्तर्यपि यगादि स्यादित्यर्थः। भूषणसारे द्वितीयव्याख्या न प्रादर्शि। व्याख्याद्वयसूचनमकृत्वा भूषणप्रदर्शितद्वितीयव्याख्याशयप्रदर्शने प्रभाकाराणामौचिती कियतीति, द्वितीयव्याख्या च मयानुपदमेव भूषणानुसारेण प्रदर्शयिष्यते। यदि तु प्रभायां "यद्वा" शब्दस्तत्सूचक इत्युच्यते, तर्हि पञ्चोलिनो युक्ताभिधायिन एव।

एवं "यतः कृञो यत्रमात्रमर्थो नेष्यत, अतः कर्मवत्स्यादिति पदेन "कर्मवत्कर्मणा तुल्यक्रिय" ३-२-८७ इति सूत्रं लक्ष्यते" इति ग्रन्थेन "अतः कर्मवत्स्यात्" इति कारिकाभागः शास्त्रातिदेशपक्षाश्रयणेन व्याख्यातः। तत्र सूत्रं लक्ष्यते। ततश्च "सार्वधातुके यक्" ३-२-६७ इत्यनेन यक्, "भावकर्मणोः" २-३-२३ इत्य नेनात्मनेपदं, "चिण् भावकर्मणोः" ३-२-६६ इति चिण्, "स्यसिच्सीयुट्तासिषु भावकर्मणोः" ६-४-६२ रित्यादिना चिण्वदिट् च स्युरिति भावः।

इदानीं कार्यातिदेशपक्षाश्रयणेन "यगाद्यपि" इति कारिकाभागं व्याचष्टे [अयमर्थ इति] अस्य = कृञः, उत्पादनार्थकता = उत्पत्तिरूपफलानुकूलव्यापारार्थकता [पच्यते ओदनः स्वयमेवेति] अयमर्थः। विक्लित्तिरूपं फलं, तदनुकूलः फूत्कारादिर्व्यापारश्च पचेरर्थः। तत्र फलाश्रयत्वेन ओदनादेः कर्मत्वं, व्यापारश्रयत्वेन चैत्रादेः कर्तृत्वं च स्यात्। चैत्र ओदनं पचतीति प्रयोगः सम्पद्यते। सौकर्यद्योतनाय चैत्रनिष्ठव्यापारस्य धात्वर्थत्वेनाविवक्षायामोदननिष्ठव्यापारस्य प्रधानधात्वर्थत्वेन विवक्षायामोदनस्य

कर्तृत्वं सिद्ध्यति। अनया रीत्या कर्ता ओदनः कर्मकर्तेत्युच्यते। तेन एककर्मका धातवोऽकर्मका भवन्ति। ततश्च तेभ्यो भावे कर्तरि च लकारा उत्पद्यन्ते। भावे "पच्यते ओदनेन" इति प्रयोगः। कर्तरि लकारे तु "कर्मवत्कर्मणा तुल्यक्रियः" इत्यतिदेशः प्रवर्तते। तत्र सूत्रे क्रियायाः कर्मणा साधनेन तुल्यत्वासम्भवात्कर्मशब्दस्तत्स्थक्रियालक्षकः "मञ्चाः क्रोशन्ति" इतिवत्। तुल्यक्रिय इति बहुव्रीहिः, "कर्तरि शप्" ३-२-६८ इत्यतोऽनुवृत्तं "कर्तरि" इत्येतत् प्रथमया विपरिणम्यते। तेन कर्मस्थया क्रियया तुल्यक्रियः कर्ता कर्मवत् स्यादिति तदर्थो लभ्यते। एकरूपयोरपि क्रिययोः कर्तृकर्मावस्थाभेदेनौपाधिकभेदारोपेण तुल्यत्वमुपद्यम्। कर्मसंज्ञक इत्यर्थशङ्कावारणाय सूत्रे वतिप्रत्ययः। कर्मसंज्ञक इत्यर्थस्वीकारो हि सकर्मकत्वात् "पच्यते ओदनेन" इति भावे लो न स्यात्। एवं च प्रकृतातिदेशेन यगात्मनेपदे भवतः। "पच्यते ओदनः स्वयमेव" इति प्रयोगः कर्मकर्तर्युपपद्यते। ओदनः स्वयमेव विक्लिद्यत इत्यर्थः। एवम् "अपाचि ओदनः स्वयमेव" "अपाचिषाताम्" "अपाचिषत" इत्यादि रूपसिद्धिर्बोध्या। "पच्यते ओदनः स्वयमेवेतिवत्" इत्यादिग्रन्थस्य पच्यते ओदनः इति प्रयोग इव क्रियते घटः स्वयमेवेति प्रयोगेऽपि यगादयोऽप्युपपद्यन्त इत्यर्थः। [क्रियते घटः स्वयमेवेति] घटं करोति चैत्रः इति प्रयोगे कृञ उत्पत्तिव्यधिकरणव्यापारवाचित्वे व्यापारश्रयत्वेन चैत्रस्य कर्तृत्वम्। उत्पत्तिरूपफलाश्रयत्वेन घटस्य कर्मत्वं च सिद्ध्यति। घटनिष्ठव्यापारस्यैव कृञर्थत्वे तस्य कर्तृत्वे प्रकृतातिदेशेन यगात्मनेपदयोः "क्रियते घटः स्वयमेव" इति प्रयोग उपपद्यते। कर्मकर्तरि लादेशेन कर्तुरभिधानात्प्रथमा बोध्या। एवं करिष्यते घटः अकारि अकारिषाताम् अकारिषत इत्यादौ चिण्वदिट्, चिण्, अत्मनेपदं चेति प्रकृतातिदेशसिद्ध्यर्थं कृञ उत्पादनार्थकता स्वीकार्या। यत्नमात्रार्थकत्वे यत्नस्य घटावृत्तितयातिदेशाप्रवृत्तिः स्पष्टैव।

ननु "आत्मानमात्मना वेत्सि सृजस्यात्मानमात्मना" इत्यादाविव औपाधिकभेदमाश्रित्य 'स्वयम्' इत्यस्यात्मनेत्यर्थात्कर्तृत्वेन ओदनस्य कर्मत्वान्मुख्ये कर्मण्येव लकारोऽस्तु, किं "कर्मवत्कर्मणा तुल्यक्रियः" इत्यतिदेशेनेति चेन्न। स्वयंपदराहित्येनापि पच्यते तण्डुलः भिद्यते काष्ठम् क्रियते घट इत्यादिप्रयोगाणां दर्शनेन तन्निर्वाहार्थं कर्मवदतिदेशस्याऽऽवश्यकत्वात्। निवृत्तप्रेषणतायां साध्वसिश्छिनत्ति, काष्ठानि पचन्ति, स्थाली पचति इतिवत् प्रकृतातिदेशाभावे पचत्योदन इत्यस्यापत्तेश्च। किञ्च 'कर्मवत्कर्मणा तुल्य क्रियः' इति सूत्रं प्रत्याचक्षाणेन "न दुहस्नुनमां यक्चिणौ" ३-१-८९ इति प्रतिषेध आरभ्यते, नवा? आद्ये शुद्धं कर्मैवास्य विषयः स्यात्। तथाच दुह्यते गौर्गोपेन इत्यादि न सिद्ध्येत्, दुग्धे गौर्गोपेन इत्यादि च स्यात्। द्वितीये तु नमते दण्डः इत्यादि न स्यात्। कर्मणि यक्प्रसङ्गात्। कर्तरि तङो

दुर्लभत्वाच्च। अतः "कर्मवत्कर्मणा तुल्यक्रियः" इत्यतिदेशसूत्रमावश्यकमेव। क्वचित् पच्यते ओदनः स्वयमेव क्रियते घटः स्वयमेव इत्यादौ 'स्वयमेव' इति प्रयुज्यते, यथा प्रकृतग्रन्थे। तत्तु निरुक्तप्रयोगे ओदनघटाद्यतिरिक्तकर्त्रन्तराभावप्रदर्शनपरमिति दिक्।

[यगादयोऽपीति] नच कार्यातिदेशेऽपि "अतिदिश्यमानकार्याणामुत्पत्तिदेश एव देशः" इति भाष्यसम्मतपक्षे परत्वाच्छप्परस्मैपदे एव स्यातां, न तु यगात्मनेपदे इति वाच्यम्। "न दुहस्नुनमां यक्चिणौ" ३-१-८९ "कुषिरजोः प्राचां श्यन् परस्मैपदं च" ३-१-९० इत्याद्यारम्भसामर्थ्येन परमपि शबादिकं बाधित्वा यगात्मनेपदयोरेवातिदेशात्।

एवं कार्यातिदेशपक्षे "यगाद्यपि कर्मकर्तरि" इति भागो व्याख्यातः। "किन्तूत्पादनमेव" इति भागः कृञर्थप्रदर्शनपरः। कृञ उत्पादनार्थकत्वे युक्त्यन्तरबोधकः। "अतः कर्मवत् स्यात् यगाद्यपि कर्म कर्तरि" इत्येष भागः। तत्र च शास्त्रातिदेशे "कर्मवदिति" "यगाद्यपि" इति तु कार्यातिदेशे इति विवेकः। विपक्षे बाधकप्रदर्शनपरः। "अन्यथा तु न भवेत्तत्" इत्यंशस्तत्र दृष्टान्तबोधकः। "दृशेरिव" इतीति विषयविभागोऽवगन्तव्यः।

[अन्यथात्विति] इदं च शास्त्र - कार्यातिदेशयोरुभयोरपि पक्षयोः कृञ उत्पादनार्थकत्वाभावे बाधकप्रदर्शनपरम्। [कर्मनिष्ठत्वाभावादिति] कृञो यत्नमात्रार्थकत्वे तस्य घटादिकर्मनिष्ठत्वाभावादित्यर्थः। तत् = शास्त्रातिदेशे कर्मवत्कर्मणा तुल्यक्रिय इति शास्त्रं कार्यातिदेशे यगादि। [न स्यादिति] कर्मस्थया क्रियया तुल्यक्रियस्य कर्तुस्तद्विधानादिति भावः। उपपादयति [यथेति]। [घटावृत्तित्वादिति] घटमात्रवृत्तित्वाभावादित्यर्थः। [तथाप्रयोगेति] क्रियते घटः स्वयमेवेति प्रयोगेत्यर्थः।

नन्वकर्मकत्वात्कर्मणि लो न स्यात्, कर्मकर्तरि यगादि च न स्यात्। भवतेरिव इत्येव वक्तव्ये "दृशेरिव" इति सकर्मकधातुप्रदर्शनमनावश्यकमिति चेत्, कारिकाग्रन्थ एवं व्याख्येयः। ननु ज्ञाकृञादेरपि ज्ञानादिरेव व्यापारोऽर्थः, तादृशव्यापारजन्या ज्ञानादिविषयैतदुभयातिरुक्ता विषयतैव फलम्। तादृशविषयतायाः सत्त्वे 'विषयो घट' इत्यादिविलक्षणप्रतीतिरेव मानम्। पदार्थभेदे च विलक्षणप्रतीतेरेव मानत्वात्। अन्यथा घटपटादिभेदोऽपि न सिद्ध्येत्। स्पष्टं चेदं सुबर्थनिर्णये भूषणे। एवं च प्रयत्नरूपव्यापारव्यधिकरणविषयतारूपफलवाचकतया सकर्मकत्वस्य निष्प्रत्यूहतया, तदनुरोधेन कुञ उत्पादनार्थकत्वाभ्युपगमो वृथैवेत्याशङ्क्याह अत इति। यत उत्पत्तिरपि कृञोऽर्थः, अत एवेत्यर्थः। कारिकाया मपिर्भिन्नक्रमः। कर्मकर्तर्यपि यगादिकं स्यादित्यर्थः। अन्यथा = उत्पत्त्यवाचकत्वे, दृष्टान्तमाह - दृशेरिवेति। एवं च निरुक्तरीत्या सर्मकत्वाद् 'दृश्यते घट श्चैत्रेण' इतिवत् क्रियते घटः

चैत्रेणेति कर्मणि लकारसम्भवेऽपि दृशेरिव कर्मकर्तरि यगात्मनेपदादिकं न स्यात्, यत्नस्य कर्मावृत्तित्वात्। उत्पत्तिवाचकत्वे तु कर्मकर्तर्यपि तत्सिद्धिः। एवं चोत्पत्तिमात्रमपि न कृञोऽर्थः, किन्तु त"धिकरणव्यापारोऽपि। स्पष्टा चेयमपि व्याख्या भूषणे। ।।६।।

नन्वेवं कृञादेरिव जानातीत्यादेरपि विषयावच्छिन्नावरणभङ्गादि-फलवाचित्वमावश्यकम्। अन्यथा सकर्मकतानापत्तेः। तथाच ज्ञायते घटः स्वयमेवेति किं न स्यात्। एवं ग्रामो गम्यते स्वयमेवेत्याद्यपीत्याशङ्कां मनसि कृत्वाह -

निर्वर्त्ये च विकार्ये च कर्मवद्भाव इष्यते।
न तु प्राप्ये कर्मणीति सिद्धान्तोऽत्र व्यवस्थितः।। ।।७।।

ईप्सितं कर्म त्रिविधं - निर्वर्त्यं विकार्यं प्राप्यं च। तत्राद्ययोः कर्मवद्भावो, नान्त्ये। प्राप्यत्वं च क्रियाकृतविशेषानुपलभ्यमानत्वमिति सुबर्थनिर्णये वक्ष्यते। नह्ययं घटः केनाचिद् दृष्टो ग्रामोऽयं केनचिद्गतइति शक्यं कर्मदर्शनेनावगन्तुम्। घटं करोतीति निर्वर्त्ये, सोमं सुनोतीति विकार्ये च तज्ज्ञातुं शक्यमिति न तत् प्राप्यम्। तथा घटादेर्दृश्यादौ प्राप्यकर्मत्वान्नातिप्रसङ्ग इति भावः।

धातूनां फलावाचकत्वे त्यजिगम्योः पर्यायतापत्तिः। क्रियावाचकत्वाविशेषात्। फलस्योपलक्षणत्वेऽप्येकक्रियाया एव पूर्वदेशविभागोत्तरदेशसंयोगजनकत्वादुक्तदोषतादवस्थ्यमित्यपि वदन्ति। तस्मादावश्यकं सकर्मकाणां फलवाचकत्वम्। अकर्मकाणां तु तन्निर्विवादमेव। भू सत्तायामित्याद्यनुशासनाच्च। अत एव "द्व्यर्थः पचिः" इति भाष्यं सङ्गच्छत इति दिक्। ।।७।।

ननु नैयायिकप्राभाकरमतखण्डनाय प्रवृत्तस्य भवतः "निर्वर्त्ये च विकार्ये च" इत्यादिकथनस्य कः प्रसङ्गः? इत्याशङ्क्या सङ्गतिं दर्शयति [नन्विति] परमते "अतः कर्मवत्सायद्यगाद्यपि। कर्मकर्तर्यन्यथातु न भवेत्तद्वृशेरिव" इति ग्रन्थेन दोषः प्रदर्शितः। तत्प्रसङ्गेन स्वमतप्रसक्तदोषवारणाय "निर्वर्त्ये च" इत्यादिकारिकाग्रन्थ इत्याशयः। एवं चात्रापवाद एव सङ्गतिरिति बोध्यम्।

[एवमिति] कर्मवद्भावानुरोधेन करोतेरुत्पत्तिरूपफलवाचकत्वस्वीकारेण सकर्मकत्वाभ्युपगम इत्यर्थः। [विषयावच्छिन्नेति] अयमर्थः - जानात्यादेः सकर्मकत्वनिर्वाहाय फलव्यापारोभयार्थकत्वं स्वीकार्यम्। तत्र फलमावरणभङ्गरूपम्। घटादिप्रत्यक्षस्थलेऽन्तःकरणं चक्षुरादिद्वारा घटादिविषयदेशं गत्वा विषयाकारेण परिणमति। विषयाकारपरिणाम एवान्तःकरणस्य वृत्तिरिति कथ्यते। तथाच

वृत्त्याऽऽवरणभङ्गो जायते। आध्यासिकतादात्म्यसम्बन्धेन विषयघटाद्यवच्छिन्नं यच्चैतन्यं, तस्यावरकमज्ञां, तन्निष्ठा याऽऽवरणशक्तिः सैवावरणमित्युच्यते। तस्यावरणस्य निरुक्तज्ञानपदव्यवहर्तव्यवृत्त्या भङ्गो (नाशो) जायते। स एवावरणभङ्गः फलम्। ज्ञानं च व्यापारः। आदिपदेन विषयतादेर्ग्रहणम् - इति [अन्यथेति] फलव्यापारोभयार्थकत्वानङ्गीकारे इत्यर्थः। [सकर्मकत्वानापत्तेरिति] तथा च ज्ञायते घटश्चैत्रेणेत्यादौ कर्मणि लकाराद्यसिद्धिरिति भावः। [तथाचेति] व्यापारव्यधिकरणफलावाचकत्वे चेत्यर्थः। [किं न स्यादिति] सकर्मकत्वमेव कर्मवद्भावप्रयोजकमिति शङ्कितुराशयः। तद् ध्वनयन्नाह [एवमिति] तथा च "किन्तूत्पादनम्" इत्यादिकारिकायां "दृशेरिव" इति दृष्टान्तकथनमसङ्गतम्, तत्रापि निरुक्तरीत्या कर्मवद्भावस्य दुर्वारत्वादिति निगूढाशयः। अत एव "तथा च घटादेर्दृश्यादौ प्राप्यकर्मत्वान्नोक्तातिप्रसङ्गः" इत्युपसंहारसङ्गतिः। [मनसि कृत्वेति] मनसि निधायेत्यर्थः। "लिखितपुस्तके मनसि कृत्येति पाठः" इति पञ्चोलिनः, "अनत्याधान उरसिमनसी" २-४-७५ इति गतिसंज्ञापक्षे, "कुगतिप्रादयः" २-२-२८ इति गतिसमासे क्त्वो ल्यबादेशे 'मनसि कृत्य' इति, गतित्वाभावे मनसि कृत्वा" इति व्यस्तरूपं च साध्वेव। उभयत्रापि मनसि निधायेत्येवार्थः। "ईदृशं मनसिकृत्य विरोधं नैषधेन समशायि चिराय" नै ५-८० इति श्रीहर्षपद्यं मल्लिनाथोऽप्येवं व्याचख्यौ।

यत्तु "मनसि कृत्वेति - अभ्युपगम्येत्यर्थः। तथाच यथाशङ्का तथैवोत्तरमिति ध्वनितम्" इति भैरवपञ्चोलिनौ, तन्न। अत्र शङ्कोत्तरयोर्भिन्नाकारत्वात्, जानात्यादौ कर्मवद्भावापादनं शङ्काविषयः, कर्मवद्भाववारणमुत्तरस्य विषय इति भेदस्य सुस्पष्टत्वात। मनसिकृत्येत्यस्य निश्चित्य = अभ्युपगम्येत्याद्यर्थकत्वे नास्माकं विप्रतिपत्तिः। प्रकृते सोऽर्थो न ग्राह्यः, किन्तु मनसि निधायेत्यर्थो ग्राह्य इति प्रति पादयामः।

कारिकायां [सिद्धान्तोऽत्र व्यवस्थित इति] अत्र = कर्मवद्भावविषये, सिद्धान्तः = वैयाकरणानामेतादृशः सिद्धान्तः, व्यवस्थितः = नियमितः, न त्वव्यवस्थितः। तामेव सिद्धान्तव्यवस्थामाह - निर्वर्त्ये च विकार्ये च" इत्यादिना। नतु प्राप्ये कर्मणीत्यन्तेन। इष्यते = भाष्यकारैः। एवं च "अत्र = कर्मवत्कर्मणा तुल्यक्रियः" ३-२-८७ इति सूत्रे भाष्ये इति हरिवल्लभोक्तिर्नातीवादर्तव्या। "सिद्धान्तो हि व्यवस्थितः" इति लिखितपुस्तके पाठः। 'हि' इत्यस्य यत इत्यर्थकत्वेन कारणप्रदर्शकतयाऽयमेव पाठो युक्त" इति पञ्चोलिनः। भूषणेऽपि 'हि' शब्दघटित एव प्राप्ते दृश्यते।

[ईप्सितं कर्मेति] "कर्तुरीप्सिततमं कर्म" इति सूत्रविहितं कर्मेत्यर्थः। तत्र = ईप्सितकर्मत्रयमध्ये, आद्ययोः = निर्वर्त्यविकार्यकर्मणोः। अन्त्ये = प्राप्ये कर्मणि। [क्रियाकृतेति]

तत्कृतविशेषवैशिष्ट्येनोपलभ्यमानत्वमित्यर्थः। आद्ययोर्लक्षणं सुबर्थनिर्णये वक्ष्यते। दृश्यादौ घटादीनां प्राप्यकर्मत्वमुपपादयति [नहीत्यादिना] [अवगन्तुमिति] निर्वर्त्यविकार्ययोः कर्मवद्भावः, न प्राप्ये इत्यत्र च "कर्मवत्कर्मणा तुल्यक्रियः" इति 'कर्मणा' इति पदं प्रमाणम्। तद्धि 'साध्वसिश्छिनत्ति' 'स्थाली पचति' इत्यादौ करणाधिकरणयोः कर्मवद्भाववारणाय कृतम्। करणत्वाद्यवस्थायां वस्तुतः सन्नप्यसिस्थाल्योर्व्यापारो न धातूपात्तः। प्रकृतसूत्रे "धातोरेकाचो हलादेः क्रियासमभिहारे यङ्" ६-२-११ इत्यतो धातोरित्यनुवर्त्य धातोर्वाच्यया क्रियया तुल्यक्रियः कर्ता कर्मवादित्यर्थो लभ्यते। तेन करणाधिकरणयोः कर्तुः कर्मवद्भावाप्रसक्त्या कर्मणेत्येतत्सामर्थ्यात् दृश्यमानकर्मनिष्ठविशेषप्रयोजनक-कर्मस्थक्रिया लक्ष्यते। तादृशी च क्रिया निर्वर्त्यविकार्ययोरेव, न प्राप्ये। तेन प्राप्ये कर्मणि कर्तुर्न कर्मवद्भाव इति बोध्यम्। उपसंहरति [तथाचेति]।

धातूनां फलवाचकत्वे दर्शनान्तरीयां युक्तिमाह [धातूनामिति]। [क्रियावाचकत्वाविशेषादिति]। एकजातीयक्रियावाचकत्वाविशेषादित्यर्थः। ननु फलस्योपलक्षणत्वाभ्युपगमान्नोक्तदोष इत्यत आह [फलस्येति] [उपलक्षणत्व इति] एतदेव फलस्योपलक्षणत्वं, यत् स्वसम्बन्धिनां सर्वेषां व्यापाराणां स्वरूपतः शक्तिग्रहविषयत्वं संपाद्य स्वयं शक्तिग्रहाविषयत्वं, बोधाविषयत्वं चेति। एवं च गमेः क्रियाबोधे संयोगस्य, त्यजेः क्रियाबोधे विभागस्य चोपलक्षणत्वान्न तयोः पर्यायतापत्तिरिति भावः। [जनकत्वादिति] तथाच संयोगविभागयोस्त्यजिगमिव्यापारजन्यत्वाविशेषाद्गम्यर्थव्यापारे संयोग एवोपलक्षमं, न विभागः, त्यज्यर्थव्यापारे च विभाग एवोपलक्षणं, न संयोग इत्यत्र विनिगमकाभावादुभयस्योपलक्षणत्व उक्तापत्तिरिति भावः। न च लक्षणया फलविशिष्टबोधान्न दोषः। लक्षणया विलक्षणबोधजननेऽपि शक्त्याविलक्षणबोधजननसम्भवेनातिप्रसङ्गस्य दुर्वारत्वात्। न च ग्रामं गच्छतीत्यादौ द्वितीयार्थसंयोगादिरूपफलान्वयित्वस्यैव विनिगमकत्वाद्गमनक्रियायां संयोगस्यैवोपलक्षणत्वं न विभागस्येति वाच्यम्। अनेकप्रत्ययानां फलार्थकत्वकल्पनायां, तत्तत्समभिव्याहारस्य कारणत्वफलनायां, द्वितीयार्थफलान्वयित्वस्य विनिगमकत्वकल्पनायां चातिगौरवात्। द्वितीयायाः संयोगरूपफलवाचकत्वे विभागरूपफलावाचकत्वे च विनिगमकाभावाच्च। कर्मकर्तृप्रयोगानुरोधेन फलस्य धातुवाच्यत्वावश्यकत्वाच्च। स्पष्टं चेदं भूषणे। उपसंहरति [तस्मादिति] सकर्मकत्वाद्यनुरोधादित्यर्थः। सकर्मकाणामित्युक्त्याऽकर्मकाणां तदनावश्यकत्वभ्रमः स्यादत आह [अकर्मकाणामिति] तत् = फलावाचकत्वम्, [निर्विवादमेवेति]। अस्त्यादितः स्थित्यादिफलस्य सर्वानुभवसिद्धत्वादिति भावः। [अशासनादिति] वृद्धव्यवहारादित्यर्थः। स्वोक्तार्थे भाष्यं प्रमाणयति [अत एवेति] धातूनां फलव्यापारोभयवाचकत्वाभ्युपगमादेवेत्यर्थः। "र्थः = फलव्यापारोभयार्थकः। पचिः = पचधातुः।

[भाष्यमिति] इदं च "कारके" २-३-१३ इति सूत्रे स्थितम्। न च व्यापारद्वयार्थकः पचिरिति तद्भाष्यार्थ इति वाच्यम्। तण्डुलानोदनं पचतीत्यत तण्डुलानां विकार्यकर्मत्वस्य, ओदनस्य निर्वर्त्यकर्मत्वस्य च भाष्याकारैरुपपादितस्य धातोः फलवाचकत्वेऽसम्भवापत्तेः। एकस्यैव व्यापारस्य फलद्वयं प्रति हेतुत्वसम्भवे व्यापारद्वयार्थकत्ववर्णनस्यासम्भवाच्च। किञ्च धातूनां फलावाचकत्वे प्रत्ययार्थफलव्याधिकरणव्यापारवाचित्वं सकर्मकत्वं, प्रत्ययार्थफलाश्रयत्वं च कर्मत्वमिति वक्तव्यम्। तच्च घटं भावयति एधयतीत्यादिण्यन्तसकर्मकेषु तत्कर्मणि चाव्याप्तम्। तत्र फलस्यान्वयव्यतिरेकाभ्यां धातुलभ्यत्वेनान्यलभ्यतया मानाभावाद्गौरवाच्च प्रत्ययार्थत्वासम्भवात्। तदेतदभिप्रेत्याह [दिगिति] ।। ।।७।।

एवं सिद्ध्यतु फलव्यापारयोर्वाच्यत्वम्। किन्तु आख्यातवाच्यैव सा भावना, न धातोः। प्राधान्येन प्रतीयमानस्य व्यापारस्य धात्वर्थतायाः "प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थस्य प्राधान्यम्" इति न्यायविरुद्धत्वात्, "तदागमे हि तद् दृश्यते" इति न्यायविरुद्धत्वाच्च।

एवञ्च स्वयुक्ताख्यातार्थव्यापारव्यधिकरणफलवाचकत्वं सकर्मकत्वम्। आख्यातार्थव्यापारश्रयत्वञ्च कर्तृत्वमित्यादि वदन्तं मीमांसकम्मन्यं प्रत्याह -

तस्मात्करोतिर्धातोः स्याद्वाच्याख्यानं न त्वसौ तिङाम्।
पक्कवान् कृतवान् पाकं किं कृतं पक्कमित्यपि।। ।।८।।

तस्मात् = अभिप्रायस्थहेतोः। स चेत्थम् - फलमात्रस्य धात्वर्थत्वे ग्रामो गमनवान् इति प्रतीत्यापत्तिः। संयोगाश्रयत्वात्। फलानुत्पाददशायां व्यापारसत्त्वे पाको भवतीत्यनापत्तिः, व्यापारविगमे फलसत्त्वे पाको विद्यते इत्यापत्तिश्च। यत्तु भावप्रत्ययस्य घञादेरनुकूलव्यापारवाचकत्वान्नानुपपत्तिरिति। तन्न। कर्त्राख्यातवत् "कर्तरि कृत्" इत्यत एव तद्विधानलाभे भावे विधायकानुशासनबैयर्थ्यापत्तेः तद्विरोधापत्तेश्च।

अथ व्यापारोऽपि धात्वर्थ इत्यभ्युपेयमिति चेत् तर्हि धातुत एव सकलव्यापारलाभसम्भवेनाख्यातस्य पृथक् शक्तिकल्पने गौरवम् - इति। पचतीत्यस्य पाकं करोतीति विवरणात्मा करोतिर्धातोरेव व्याख्यानं = विवरणम्। अतस्तदपि नाख्यातार्थत्वसाधकमिति भावः।।

ननूक्तयुक्तिभिः फलव्यापारयोर्वाच्यत्वसिद्धावपि "फलव्यापारयोर्धातुः" इति त्वदीयप्रतिज्ञाहानिरेव। प्राधान्यादियुक्तिभिर्व्यापारस्य प्रत्ययवाच्यत्वौचित्यात्। अत एव धातोः फलव्यापारोभयवाचित्वे नानार्थतापत्तिरपि परास्तेति मण्डनमिश्रमतानुयाय्याशङ्कासमाधानपरतया "तस्मात्करोतिः" इत्यादि मूलमवतारयति [एवमिति] निरुक्तप्रकारेणेत्यर्थः। एवं च लडाद्यन्ते भावना वाच्यैव न किन्त्वाक्षेपलभ्या संसर्गलभ्या वेति प्राभाकरमतनिराकरणपरे। "व्यापारो भावना" इत्यादिर्ग्रन्थो भावनाया वाच्यत्वलाभेऽपि तस्याः प्रत्ययवाच्यत्वमेव, न धातुवाच्यत्वमिति मण्डनमिश्रमतनिराकरणपरः। "तस्मात्करोतिः" इत्यादिकारिकाचतुष्टयरूप उत्तरो ग्रन्थ इति विवेकः। फलस्य वाच्यत्वं सिद्ध्यत्वित्युक्तिर्ज्ञाकृञादि-सविषयकधातुविषयिकैव। अन्यत्र फलस्य वाच्यत्वांशे विप्रतिपत्तेरभावात्। फलस्य धातुवाच्यत्वमित्यत्रैव प्राचीननैयायिकानां विप्रतिपन्नत्वात् फलं कर्मप्रत्ययार्थ इति तैरभ्युपगमात्।

यतु - ननु "व्यापारो भावना सैव" इत्युक्तविवरणेन न व्यापारस्य धात्वर्थतानिर्णयः। पचति = पाकं करोतीति विवरणेनाख्यातार्थताया अपि वक्तुं शक्यत्वादिति मीमांसकाशङ्कासमाधानपरतया मूलमवतारयति एवमितीत्यादिना - इति दर्पणकाराः।

तन्न। पचति = पाकं करोतीति विवरणेन व्यापरस्य धातुवाच्यत्वसाधनपरतया "व्यापारो भावना" इति ग्रन्थस्य तैरव्याख्यातत्वात्, व्यापारो नामेत्यादिरीत्या व्यापारस्य भावनात्वलाभसाधनपरतयैव तैर्व्याख्यातत्वात्। पाकानुकूलो व्यापारः पाकानुकूला भावना पाकानुकूलोत्पादनेत्यादिरीत्या व्यापारादिघटितविवरणस्फोरणेन व्यापारादीनां सर्वेषामपि वाच्यत्वसमर्थनपरत्वाच्च तद्ग्रन्थस्य, निरूपितं चैतत्प्राक्।

यदपि "वाच्यत्वमिति - तिङन्तजन्यबोधविषयत्वमित्यर्थः। तथा च पाकानुकूला भावनेत्यादिविवरणेनापि पचतीत्यस्य पाकानुकूलभावानबोधकत्वमस्त्वित्यर्थः। यथाश्रुते विवरणेन धातोर्भावनावाचकत्वनिर्णये "किन्त्वाख्यातवाच्यैव सा" इत्युत्तरग्रन्थासङ्गते" रिति दर्पणकाराः।

तदपि न। पचति = पाकमुत्पादयति। पाकानुकूला भावना' इत्यादिग्रन्थस्य विवरणेन भावनाया वाच्यत्वमात्रसाधकतया तस्याः प्रकृतिप्रत्ययान्यतरवाच्यत्वाप्रतिपादकतया "किन्त्वाख्यातवाच्यैव सा" इत्युत्तरग्रन्थस्य यथाश्रुतेऽसङ्गतेरभावात्। पचति = पाकमुत्पादयतीत्यादिः पूर्वो ग्रन्थो विवरणेन धातोर्भावनावाच्यत्वप्रसाधक इति दर्पणकाराणां भ्रम एव प्रकृतग्रन्थस्य यथाश्रुतस्यसङ्गततया भाने हेतुरिति दिक्।

[सा भावनेति] विवरणादिबलेन वाच्यत्वपदवीमधिरोपिता भावनेत्यर्थः। आख्यातवाच्यैवेत्यस्य तिङ्प्रत्ययवाच्यैवेत्यर्थः। एवशब्दव्यावर्त्यं दर्शयति [न धातोरिति] तथा च "फलव्यापारयोर्धातुः" इति त्वदीयप्रतिज्ञाभङ्ग इति भावः। धात्ववाच्यत्वे हेतुमाह [प्राधान्येनेति] भावनाया वाच्यत्वं वयमप्यभ्युपेमः, परं तु तस्याः प्रकृतिवाच्यत्वमुत प्रत्ययवाच्यत्वम्? इति जिज्ञासायामुभयसम्मतभावनाप्राधान्यानुरोधेन प्रत्ययवाच्यत्वपक्ष एव युक्तः। भावनाप्राधान्यं तु "प्रधानोपसर्जने प्रत्ययप्रकृत्यर्थौ" इति पूर्वाचार्यवचनमूलकम्। एवं च भावनाया धातुवाच्यत्वस्वीकारे तद्वचनविरोधः, तत्प्राधान्यानिर्वाहश्च स्पष्ट एव, तस्याः प्रत्ययवाच्यत्वे तु न काप्यनुपपत्तिरिति मण्डनमतानुयायिनामाशयः। पूर्वाचार्यवचनमर्थतो दर्शयति [प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थस्य प्राधान्यमिति] अत्रैकवचनेन प्रकृत्यर्थापेक्षया प्रत्ययार्थस्य तदर्थत्वसामानाधिकरण्येन प्राधान्यं बोध्यते, न तदवच्छेदेन। तेन सुबर्थलिङ्गसङ्ख्यादेः प्रकृत्यर्थविशेषणत्वेऽपि न क्षतिः। वस्तुतस्तदर्थलिङ्गसङ्ख्यादेस्समानाभिधानश्रुत्या प्रत्ययार्थविशेषणत्वमेव प्रकृत्यर्थस्य प्रत्ययार्थलिङ्गसङ्ख्यादेश्च परिच्छेद्यपरिच्छेदकभावेनान्वयस्तु प्राश्चात्य बोधविषय एव। स्पष्टं चेदं मीमांसकग्रन्थेषु। एतेन "प्रकृतिप्रत्ययावित्यस्य सुबर्थलिङ्गसङ्ख्यादौ व्यभिचारादाह तदागमे हीति" इत्यवतारयन्तो दर्पणकाराः परास्ताः। अत एव मवतरणीयम्। ननु भावप्रधान माख्यातमिति विशेषस्मृत्यनुरोधेन प्रत्ययार्थः प्रधानमिति सामान्यस्मृतेः सुबर्थविषयकत्वमेवोचितम्। न चाख्यातपदेन तिङ्प्रत्ययस्यैवाभिधानाद्विशेषस्मृतिरप्यस्मत्पक्षमेवोपोद्बलयतीति वाच्यम्। आख्यातपदेन धातुरेवोच्यत इति प्राक् प्रतिपादनात्। भवदुक्तरीत्या प्रत्ययार्थः प्रधानमित्यनेनैव तिङर्थप्राधान्यावगमसम्भवेन भावप्रधानमित्यस्य वैयर्थ्यापत्तेश्चेत्यतो भावनाया धातुवाच्यत्वे दोषान्तरमाह [तदागमे हीत्यादिना] अत्रायमर्थः - ननु "पशुना यजेत" इत्यादौ तृतीयाप्रत्ययार्थस्यैकत्वस्य पशुविशेषणत्वेन यागाङ्गत्वाभावात्तदभावेऽपि यागावैगुण्यात् तदविविक्षितमेव स्यात्। तथाच बहुपशुकरणकोऽपि यागः स्यादित्यर्थकेन "तत्रैकत्वमयज्ञाङ्गमर्थस्य गुणभूतत्वात्" ४-२-२२ इति सूत्रेणः पूर्वपक्षे "शब्दवत्तूपलभ्यते तदागमे हि तद्दृश्यते तस्य ज्ञानं यथाऽन्येषाम्" ४-२-२५ इति जैमिनेस्सिद्धान्तसूत्रम्। तुशब्देन पूर्वपक्षो व्यावर्त्यते। शब्दवत् = शब्दवाच्यं यथा भवति तथोपलभ्यते। हि = यतः, तदागमे = तस्यैकवचनस्यागमे, तद् = एकत्वं दृश्यते। अतः तस्य = एकत्वस्य, ज्ञानं = यागाङ्गत्वज्ञानम्, यथाऽन्येषां = विशेषणानां पशुत्वलौहित्यादीनामपीति सिद्धान्तसूत्रार्थः। विशिष्टस्य श्रुत्याऽङ्गत्वबोधनेन पशुत्वादिविशेषणवैकल्य इव तद्विशेषणस्यैकत्वस्य वैकल्येऽपि विशिष्टस्याननुष्ठनात्तद्वैगुण्योपपत्तिरिति

भावः। अत्रैकत्वस्य शब्दवाच्यत्वे "तदागमे हि तद्दृश्यते" इत्यन्वयः प्रदर्शितः। तेन च तदभावे तदभावरूपो व्यतिरेकोऽर्थात्सिद्धिः। अनया रीत्या सर्वत्रापि तत्तदर्थस्य तत्तच्छब्दवाच्यत्वं सिद्ध्यति। अन्वयव्यतिरेकप्रतिपादकोऽयं "तदागमेहीति न्यायः" इति।

[विरुद्धत्वादिति] पचतीत्यादावाख्यातागमे भावनायाः प्रतीत्या, पाक इत्यादावाख्याताभावे भावनाया अप्रतीत्या च भावनाया आख्यातवाच्यत्वलाभेन, तस्या धातुवाच्यत्वस्वीकारेऽन्वयव्यतिरेकाभ्यां शब्दादर्थावगतिबोधकतन्न्यायविरोधः स्पष्ट एवेति भावः।

यत्तु "तदागमेहीति - इदं च यः प्रधानं स प्रत्ययार्थ इति न्यायाकार इत्यभिप्रेत्य। तन्मूलसूत्रालोचने तु यः प्रत्ययार्थः, स प्रधानमिति लभ्यते, पशुना यजेतेत्यादौ प्रत्ययार्थमादाय न्यायावताराद्यः प्रत्ययार्थ इति भागस्य न्यायघटकत्वम्" इति दर्पणकाराः।

तन्न। तेन न्यायेन तत्तच्छब्दस्यान्वयव्यतिरेकाभ्यां तत्तदर्थबोधकताया एव लाभात्। प्रत्ययार्थस्य प्राधान्यमित्यंशस्य लेशतोऽपि सूत्रतोऽलाभाच्च। तदुक्तरीत्या तेनैव प्रत्ययार्थप्राधान्यलाभेन "प्रत्ययार्थस्य प्राधान्यम्" इत्यस्य वैयर्थ्यापत्तेश्च। न च तत्सिद्धार्थानुवादक एवायं न्याय इति वाच्यम्। मूले तयोः पार्थक्येनोपादानस्यासङ्गत्यापत्तेः। प्रकृतिप्रत्ययाविति न्यायस्य सङ्ख्यादौ व्यभिचारमाशङ्क्याह तदागमे हीति इति तदुक्तेर्व्याहतत्वाच्च। एतेन "प्रधानप्रत्ययार्थ" इति नियमस्य पाणिनिनानादृतत्वेऽपि, यो यः प्रत्ययार्थस्स प्रधान मित्यर्थस्य "तदागमे हि" इति सूचतया जैमिनिनाऽऽदृतस्यादुष्टत्वादाख्यातार्थतयैव भावनायाः प्राधान्यम्। टाबादीनां द्योतकतया सङ्ख्या वाचकत्वेऽपि प्रत्ययजन्योपस्थितौ सङ्ख्याद्यवृत्तित्वस्य विशेषणाच्चोक्तकार्यकारणभावस्य निर्दुष्टत्वमित्यन्ये" इति वक्ष्यमाणा तदुक्तिरपि परास्ता।

ननु "अन्वयव्यतिरेकभ्यां निष्कृष्टेऽर्थे नियम्यते" इत्यन्वयव्यतिरेकैकशरणत्वात् निष्कृष्टार्थविषयकशक्तिनियमस्य, धातुव्यतिरेकेणाख्याताभावात्तदागमन्यायात्मकान्वयव्यितिरेकाभ्यां कथमाख्यातस्य भावनावाचकत्वसिद्धिरिति चेन्न। धात्वपरित्यागेऽपि प्रत्ययश्रवणकाले धातुश्रवणाभावेऽपि भावनाप्रतीतेर्धातुश्रवणकाले च प्रत्ययश्रवणाभावे तदप्रतीतेश्च "शब्दवत्तूपलभ्यते तदागमे हि तद् दृश्यते" इति चतुर्थन्यायेन तन्निर्णयात्। उक्तं च भट्टपादैः "प्रत्ययश्रुतिवेलायां भावनात्माऽवगम्यते। न हि केवलमेतावेवान्वयव्यतिरेकौ, यौ परस्परपरित्यागेन लक्ष्येते" इति। स्पष्टं चैतद् द्वितीये न्यायसुधायाम्।

फलमात्रस्य धातुवाच्यत्वमभ्युपगम्य व्यापारस्य संसर्गलभ्यत्वं वदतां प्राभाकराणां, धातूनां व्यापारमात्रार्थकत्वमभ्यपगच्छतां नैयायिकानां च मते सकर्मकत्वादेर्दुर्वचत्वेऽपि

फलव्यापारयोर्धात्वाख्यातवाच्यत्वमभ्युपेयुषामस्माकं मते नैव तदनुपपत्तिरित्याह [एवं चेति] फलव्यापारयोर्धात्वाख्यातवाच्यत्वाभ्युपगमे चेत्यर्थः। एवं च स व्यापारो वैयाकरणमते धातुवाच्यः, अस्मन्मते त्वाख्यातवाच्य इत्येतावानेव भेदः। व्यवहारनिर्वाहस्तूभयोरपि तुल्य एवेति भावः। [स्वयुक्तेति] स्वं = धातुः भवत्यादेः पच्यादिसंपृक्ताख्यातार्थव्यापारव्यधिकरणफलवाचकत्वात्सकर्मकतापत्तिवारणाय स्वयुक्तेत्याख्यातविशेषणम्। स्पष्टमधिकमन्यत्र। [व्यधिकरणेति] नचैवं ज्ञाकृञादेस्सकर्मकत्वानापत्तिः, धात्वर्थयत्नज्ञानादिव्यधिकरणव्यापारस्य देवदत्तादौ बाधादिति वाच्यम्। फलतावच्छेदकविषयतासम्बन्धेन यत्नाद्यनधिकरणवृत्तित्वरूपस्य व्यधिकरणत्वस्य तदाश्रयत्वरूपे व्यापारे सत्त्वात्। अन्यथा यथाश्रुते सकर्मकाणामपि कालिकादिसम्बन्धेनाख्यातार्थव्यापारसमानाधिकरणफलवाचित्वेन, अकर्मकाणां च सम्बन्धान्तरेण व्यधिकरणफलवाचित्वेन बहूपप्लवापत्तेः। कर्तृत्वं निर्वक्ति [आख्यातार्थव्यापारेति] एवं च घटो भवतीत्यादौ घटादेराख्यातार्थव्यापाराश्रयत्वनिबन्धनकर्तृत्वस्यापि नानुपपत्तिरिति भावः। [इत्यादीति] आदिपदेन प्रत्ययार्थव्यापारव्यधिकरणधात्वर्थफलाश्रयत्वं कर्मत्वमित्यादेर्ग्रहणम्। मीमांसकम्मन्यं = मण्डनमतानुयायिनम्।

पूर्वं हेतोरनिरुक्तेराह [अभिप्रायस्थेति] तमेव विशदयति [सचेत्यादिना गौरवमितीत्यन्तेन] [प्रयोगापत्तिरिति] ग्रामस्संयोगवानितिवद् ग्रामो गमनवानिति प्रयोगापत्तिः। ग्रामस्य धात्वर्थसंयोगरूप फलाश्रयत्वात्। व्यापारस्यापि धातुवाच्यतायां तु नेयमापत्तिः, ग्रामस्य संयोगाश्रयत्वेऽपि तदनुकूलव्यापाराश्रयत्वाभावात्। मण्डनमते तु वाचकस्याख्यातस्याभावान्निरुक्तापत्तिः सुस्थैव। नच फलानुकूलव्यापारस्य धात्वर्थत्वनये फलस्यैकदेशत्वात्तत्र पदार्थान्तरान्वयासम्भवात्तादृशप्रयोगवारणेऽपि फलव्यापारयोर्भिन्नशक्तिवादिनये तादृशप्रयोगापत्तिरनिवारितैवेति वाच्यम्। एकप्रकृत्युपात्तत्वेनान्तरङ्गत्वात्फलव्यापारयोः परस्परमन्वयानन्तरमेव पदार्थान्तरान्वयस्वीकारेण व्यापारानन्विते फलमात्रे ग्रामादिपदार्थान्तरान्वयासम्भवात्। एवं मण्डनमते गमनजन्य संयोगाश्रयो ग्राम इति प्रयोगस्यानुपपत्तिः। संयोगरूपफलस्य गमनपदार्थतया तस्य तज्जन्यत्वाभावात्। गमनं न स्पन्द इत्यादीनां साधुत्वापत्तिरिति तन्मते दोषः। स्पन्दभेदस्य गमनपदार्थसंयोगे सत्त्वात्। [अनापत्तिरिति] धातोर्व्यापारावाचकत्वनये विक्लित्तिमात्रं पाकपदार्थः स्यात्। पाको भवतीत्यतश्च पाककर्तृका सत्तेति बोधेन तत्र फलानुत्पत्तिदशायां व्यापारसत्त्वेऽपि फलकर्तृकसत्ताया अवर्तमानत्वात्तदानापत्तिरित्यर्थः। व्यापारविगमे = व्यापारनाशे। [आपत्तिरिति] फलानुकूलव्यापारनाशेऽपि फलस्य वर्तमानत्वात्तत्कर्तृकसत्तामादाय तादृशप्रयोगस्य प्रामाण्यापत्तिरित्यर्थः। न च धातोर्व्यापारवाचित्वाभावनये

फलानुत्पाददशायां व्यापारसत्त्वे पचतीति प्रयोगानुपपत्तिः, व्यापारापगमे फलसत्त्वे पचतीति प्रयोगापत्तिश्च कुतो नोद्भावितेति वाच्यम्। प्रत्ययार्थकालस्य समानाभिधानश्रुत्या प्रत्ययोपात्तव्यापार एवान्वयस्वीकारेण तदसम्भवात्। अतः कृदन्तस्थलमादायैव दोषोद्भावनमिति बोध्यम्।

मीमासंकोक्तमेतद्दूषणोद्धारप्रकारं निराकरोति [यत्त्विति] धात्वर्थप्रत्ययार्थयोरनुकूलत्वं संसर्ग इति स्फोरयितुमनुकूलपदोपादानम्। "अनुकूलत्वोत्कीर्तनमन्विताभिधानवादिनां मतमेतदिति सूचयितुम्" इति दर्पणोक्तं तु न युक्तम्। तन्मतप्रदर्शनस्य प्रकृतानुपयोगेनानुकूलपदोपादानस्य तदभिप्रायकत्वायोगात्। अन्यथा "पाकानुकूला भावना, नाशानुकूलो व्यापारः, ज्ञानेच्छाद्यनुकूलो व्यापारः" इत्यादावप्यनुकूलपदोपादानस्य तदभिप्रायकत्वकल्पनापत्तेः। [नानुपपत्तिरिति] भावविहितघञाद्यर्थव्यापारस्य गमनानुकूलस्य ग्रामादावभावान्न ग्रामो गमनवानिति प्रयोगापत्तिः। फलानुकूलप्रत्ययार्थव्यापारस्य भवने कर्तृतयान्वयात्फलानुत्पाददशायां व्यापारसत्त्वे तादृशभवनमादाय पाको भवतीति प्रयोगोपपत्तिः। व्यापारनाशे फलसत्तायां तादृशव्यापारकर्तृकसत्ताया अभावान्न पाको विद्यत इत्यापत्तिः। गमनजन्यसंयोगाश्रयो ग्राम इति प्रयोगोऽपि ल्युडर्थव्यापारमादाय सूपपदाः। अतः फलं धात्वर्थः। व्यापारः प्रत्ययार्थ इति मते न काप्यनुपपत्तिरिति भावः। [कर्तरि कृदित्यत एवेति] भावघञादीनामपि व्यापारवाचकत्वस्वीकारे "कर्तरि कृत्" ३-४-६७ इति सूत्रेणैव व्यापारार्थकघञादिविधानसम्भवात् तद्विधायकानां "भावे" ३-३-२८ इत्यादीनां वैयर्थ्यापत्तिः। अतस्तेषां व्यापारार्थकत्वकल्पनं न युक्तमिति भावः। ननु "कर्तरि कृत्" इति सूत्रेण प्रत्ययानां धर्मिणि शक्तिर्बोध्यते, नतु धर्मे व्यापारे इति कथं तत्सूत्रेण तद्विधानलाभोऽत उक्तं [कर्त्राख्यातवदिति] "लः कर्मणि च भावे चाकर्मकेभ्यः" ३-४-६९ इति सूत्रविहितस्य कर्तृप्रत्ययस्य भवद्भिर्व्यापारार्थकत्वमङ्गीकृतं, तद्वदत्रापि कर्तरि घञादिविधाने तेषां व्यापारार्थकत्वं सेत्स्यति। तयोर्वैषम्ये बीजाभावात्। [तद्विरोधापत्तेश्चेति] चो हेतौ, यतस्तद्विरोधोऽतस्तद्वैयर्थ्यम्। एवमुक्तिर्वैचित्र्याय। यद्वा "तद्विरोधा पत्तेश्च" इत्यस्य तदीयग्रन्थविरेधापत्तेश्चेत्यर्थः। अयमाशयः पूर्वोक्तदोषपरिहारलोभेन भावप्रत्ययानां व्यापारार्थकत्वस्वीकार "भावप्रत्ययानां प्रयोगसाधुतामात्रार्थकत्वम्" इति तदीयग्रन्थविरोधापत्तिरित्यर्थः। काशिकाकारास्तु "तद्भाष्यविरोधापत्तेश्च" इति पाठमाश्रित्य न केवलं तद्विरोधः, अपितु भाष्यविरोधोऽपीत्याह - तद्भाष्येति- घञादेरप्यसत्त्वभूतकारकान्वययोग्यव्यापारार्थकत्वे "भावे" इति सूत्रस्थभाष्यविरधापत्तेरित्यर्थः। तत्रहि "सत्त्वभूतो भावो घञादेरर्थः" इति प्रतिपादितमिति व्याचख्युः। किञ्च घञ्ल्युडादीनां

तादृशव्यापारार्थकत्वमाश्रित्य ग्रामो ग्रमनवानिति प्रयोगवारणेऽपि तदसमभिव्याहारेण गम्यर्थवान् ग्राम इति प्रयोगापत्तिर्दुर्वारा, गम्यर्थजन्यसंयोगाश्रयो ग्राम इति प्रयोगोऽपि दुरुपपादः स्यादित्यपि बोद्धव्यम्।

ननु फलमात्रं न धात्वर्थः, किन्तु व्यापारोऽपि, आख्यातार्थस्तु धात्वर्थव्यापारानुकूलो व्यापारः, कृतिर्वा। भावे घञादिस्तु धात्वर्थानुवादक एवेति न प्रागुक्तदोषावकाश इति नव्यमीमांसकमतमाक्षिपति [अथेति]। [व्यापारोऽपीति] अपिना फलम्। [धात्वर्थ इति] आख्यातार्थस्तु पार्थसारथिमतरीत्या व्यापारः, खण्डदेवरीत्या कृतिः। एवं च फलानुकूलो व्यापारो धात्वर्थः, तदनुकूलव्यापारः, कृतिर्वाख्यातार्थ इति भावः। नव्यमीमांसकमतं निराकरोति [तर्हीति]। [सकलव्यापारोति] व्यापारे धातोश्शक्त्यभ्युपगमे देहनिष्ठफूत्कारादिव्यापारस्य, आत्मनिष्ठयत्नस्य च सर्वस्यापि विक्लित्त्यनुकूलतया व्यापारत्वाविशेषाद्धात्वर्थव्यापारेणैव लाभसम्भवादाख्यातस्य पृथग्यत्ने शक्तिकल्पनायां गौरवमित्याशयः। पृथक् = धात्वर्थव्यापारे शक्ति स्वीकारपूर्वकं पार्थक्येन, शक्तिकल्पने = व्यापारे यत्ने वा शक्तिकल्पने। [गौरवमिति] अतो नव्योक्तिरपि दुष्टैवेति भावः।

अत्रेदं बोध्यम् - पूर्वमीमांसका हेतुत्रयात् प्रत्यवतिष्ठन्ते।

(१) प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतस्तयोः प्रत्ययार्थः प्रधानमिति न्यायः।

(२) "तदागमे हि तद् दृश्यते" इति चातुर्थन्यायः।

(३) पचति = पाकं करोतीति विवरणम्। पचतीत्यत्र प्रकृति भागः पाकशब्देन प्रत्ययभागः करोतिना च विब्रियते, करोतिर्व्यापारार्थको, यत्नार्थको वा।

एतद्धेतुत्रयं व्यापारस्य धातुवाच्यत्वस्वीकारे विरुणद्धीति तदाशयः।

तत्र व्यापारस्य धात्ववाच्यत्वे दोषप्रदर्शनपूर्वकं करोतिर्धातो रेव विवरणमिति "तस्मात्करोतिर्धातोः स्याद्व्याख्यानम्" इति कारिकाभागेन दर्शयति। "प्रत्ययार्थः प्रधानम्" इति न्यायो "नत्वसौ तिङाम्, पक्कवान् = कृतवान् पाकम्" इति कारिकाभागेन निराक्रियते। तद्धेतुन्यायः, करोतिना विवरणं चातिव्याप्तिप्रदर्शनेन "किं कृतं पक्कमित्यपि" इति भागेन दूष्यते। व्यापारस्यावश्यं धातुवाच्यत्वस्वीकारे हेतुवचनं "तस्मात्" इति। हेतोः पूर्वमनुपादानाद् बुद्धिस्थोऽभिप्रायो ग्राह्यः। स च "स चेत्थम्" इत्यादिना सारे निरूपितः। "कर्मवत्स्याद्यगाद्यपि, कर्मकर्तर्यन्यथा तु न भवे तद्वृशिरिव" इति पूर्वकारिकया प्रतिपादितोऽर्थः प्रकृतकारिकाघटकेन "तस्माम्" इत्यनेन परिग्रहीतुं सुशक एव। प्राभाकरमत इव मण्डनमतेऽपि कर्मस्थक्रियात्वाभवेन क्रियते घटः स्वयमेवेत्यादौ कर्मकर्तरि यगाद्यनापत्तेः,

ज्ञायते घटः स्वयमेवेत्यापत्तेर्वा स्पष्टत्वात्। अत एव भूषणे मण्डनमतनिराकरणावसरे एष एव दोषः प्रथमतः प्रादर्शि। मण्डनप्राभाकरमतयोरुभयोरपि धातोः फलमात्रवाचित्वस्य समानत्वात्। अत एव "तस्मात् = अभिप्रायस्थहेतोः, स चेत्थम्" इत्यादिना प्रकृतग्रन्थे प्रदर्शितो मण्डनमतनिराकरणप्रकारः प्राभाकरमतखण्डनावसरेऽपि भूषणे प्रतिपादितः। परन्तु प्राभाकरमते व्यापारः प्रकृतेः प्रत्यस्य वा वाच्य एव न भवति। मण्डनमते व्यापारः प्रत्ययवाच्य इति विशेषः। मतद्वयस्थाप्ययुक्तत्वप्रतिपादनेन फलव्यापारयोरुभयोरपि धातुवाच्यत्वप्रतिपादनाय ग्रन्थकृतः प्रवृत्तिः। प्रकृतेः प्रत्ययस्य वा व्यापारो वाच्य एव नेत्यभिप्रयतां प्राभाकरणां मतनिराकरणपरः पूर्वो ग्रन्थः। व्यापारस्य वाच्यत्वं सिद्ध्यतु, परन्तु तस्य प्रत्ययवाच्यत्वमेव, न धातुवाच्यत्वमिति प्रतिपादयतां मण्डनमतानुयायिनां मतनिराकरणपरः प्रकृतो ग्रन्थः। धातोः फलात्रवाचित्वस्योभयेषामपि तुल्यतया तत्खण्डनावसरे तुल्यदोषप्रदर्शनं ग्रन्थकृतः सङ्गच्छते। अत एव प्राभाकरमतनिराकरणावसरे प्रदर्शितः "किञ्च भावनाया अवाच्यत्वे घटं भावयतीत्यत्रेव घटो भवतीत्यत्रापि द्वितीया स्यात्" इति दोषो मण्डनमतनिराकरणावसरेऽपि "किञ्च भावनायास्तिङर्थत्वे घटं भावयतीत्यत्रेव घटो भवतीत्यत्रापि द्वितीया स्यात्" इत्यादिना ग्रन्थकृता प्रदर्शयिष्यते इत्यावेदितमस्माभिः। एतादृशं विषयविभागमगृह्णन्तो दर्पणकारादयः पूर्वग्रन्थं व्यापारस्याख्यातवाच्यत्वमभ्युपेयुषां मतनिराकरणपरतया व्याख्याय, "एवं सिद्ध्यतु फलव्यायापारयोर्वाच्यत्वं किन्त्वाख्यातवाच्यैव सा भावना न धातोरिति प्रकृतग्रन्थस्य पुनरुक्तत्वभिया यथाश्रुतेऽसङ्गतिं मन्वानाः प्रकारान्तिरेण भावं व्यवृण्वन्। तदत्यन्तमसङ्गतमेवेति प्राक् प्रत्यपादयाम। ते हि दर्पणकारादयो भूषणसारस्य तत्त्वं नाग्रहीषुः। यथा चैतत्तथा बहुषु ग्रन्थस्थलेषु न्यवेदिष्म, निवेदयिष्यामश्चेति।

'तस्माम्' इत्यस्यार्थमुपवर्ण्य प्रकृते योजयति [पचतीत्यस्येति] विवरणात्मा = विवरणरूपः। करोतिः = कृञ् धातुः। धातोरिति सावधारण इत्याशयेनाह [धातोरेवेति] व्याख्यानपदं विवृणोति [विवरणमिति] एवं च पचति = पाकं करोतीति विवरणं सर्व सम्मतं, तत्र करोतिः प्रत्ययार्थविवरणपर इति मीमांसकाः। तदयुक्तं, व्यापारस्य धात्ववाच्यत्वे दोषाणां प्रदर्शितत्वात्। अतो व्यापारो धातुवाच्य एवेत्यवश्यमङ्गीकार्यम्। तस्मात् करोतिर्धातोरेव विवरणमित्येष्टव्यमिति भावः। तदाह [अत इति] तदपि = करोतिना विवरणमपि। [साधकमिति] व्यापारस्य नाख्यातार्थत्वसाधकमित्यर्थः। अत एव भूवादिसूत्रस्थं भाष्यं सङ्गच्छते। तत्र हि "क्रियावचनो धातुः" इति न्यासे "कथं पुनर्ज्ञायते क्रियावचनाः पचादयः?" इति प्रश्ने "यदेतेषां करोतिना सामानाधिकरण्यं - किं करोति? पचति, किं करिष्यति?

पक्ष्यति, किमकार्षीत्? अपाक्षीत् इति" इत्युक्तम्। पचादीनां क्रियावाचित्वे करोतिना सामानाधिकरण्यस्य हेतुत्वेनोपपादानात्करोतिना विवरणमपि धातोरेवेति स्पष्टमेव। न च किं करोति? पचतीति भाष्येऽपि तिङर्थ एव करोतिना प्रदर्श्यत इति वाच्यम्। कथं ज्ञायते क्रियावचनाः पचादयः? इति पचादीनां क्रियावाचित्वे किं प्रमाणमिति शङ्कायां तत्समानभूतस्यास्य भाष्यस्य निरुक्तार्थकत्वायोगात्। किं करोतीत्यस्य च यत्करोति तत्किमिति व्यापारविशषविषयप्रश्नोऽर्थः। एवं च यन्निष्ठतया प्रश्नविषयक्रियायाः करोतिशब्दवाच्यायाः प्रतीतिस्तन्निष्ठतयैवोत्तरभूतपचतिशब्दवाच्यक्रियायाः प्रतीतिरिति पचतिकरोत्योः सामान्यविशेषभावेन सामानाधिकरण्यम्। तत्र क्रियाप्रश्नजनकजिज्ञासायास्तद्विषयोत्तरेणैव निरासात्पचादीनां क्रियावाचित्वं, तन्निबन्धनं धातुत्वं च विशेषभावेन सहप्रयोगापत्तिरिति वाच्यम्। केवलस्य धतोः प्रयोगाभावेन तिङ्योगे तदर्थपुनरुक्तताभयेन तथा प्रयोगाभावात्। यत्र तु नेदृशं बाधकं, तत्रैधाञ्चक्रे इत्यादि प्रयुज्यत एव। एवं च किं करोति? पचतीत्यादिभाष्यबलेन करोतिर्धातोरेव विवरणमित्यनिच्छताप्यङ्गीकर्तव्यतया पचति = पाकं करोतीति विवरणेऽपि सामान्यविशेषभावेन धात्वर्थ एव पाकमित्यनेन करोतिना च विव्रियत इति बोद्धव्यम्। "विभज्य सेनां परमार्थकर्मा सेनापतींश्चापि पुरन्दरोऽथ। नियोजयामास स शत्रुसैन्ये करोतिरर्थेष्विव सर्वधातून्" इति भट्टिरपि करोतिर्धातोरेव विवरणमित्यभिप्रैतीति दिक्। अतः = कृञो धात्वर्थविवरणपरत्वात्, तदपि = कृञा विवरणमपि, साधकमिति = व्यापारस्येति शेषः। [भाव इति] तस्मात्करोतिर्धातोः स्याद्व्याख्यानम्" इति मूलाशय इत्यर्थः। नच पचति = पाकं करोतीति विवरणात्कृतेः पाकात्पृधक्करणेन तस्या धात्वर्थे सङ्ग्रहानुपपत्तेस्तिङ्वाच्यत्वमिति मीमांसकनव्योक्तं युक्तम्। एकपदोपात्तानामर्थानामेकेनैव पदेन विवरणं कार्यमिति नियमाभावात्। अन्यथा तवाख्यातार्थसङ्ख्याकालकृतीनां मध्ये कृतेः कृधातुना, सङ्ख्यादेस्तदुत्तरतिङा च विवरणस्यासङ्गत्यापत्तेः। प्रत्युत प्रकृतिभूतकृञा विवरणात्पचतीत्यत्रापि तस्याः प्रकृत्यर्थत्वस्यैव युक्तत्वाच्च। किञ्चानेकार्थस्य धातोर्भेदेनार्थे कथ्यमाने यजेतेत्यादौ यागेनेति विशेषरूपं करणात्मना निष्कृष्टम्। अन्यस्तु भावनारूपः सामान्यभूतः शब्दान्तरेण भावयेदित्यनेन कथ्यते। एवं पचतीत्यत्र विक्लित्त्यनुकूलव्यापाररूपो विशेषार्थः पाकमिति कर्मात्मना निष्कृष्टः। कृतिरूपः सामान्यार्थः करोतिना शब्दान्तरेण कथ्यत इत्यदोषः। स्पष्टमधिकमन्यत्र।

मीमांसकोक्तं बाधकमुद्धरंस्तन्मतं दूषयति - नत्वित्यादिना। नासौ तिङां व्याख्यानम्, पक्कवानित्यादावनन्वयापत्तेः। अयं भावः - "प्रकृतिप्रत्ययौ सहार्थं ब्रूतस्तयोः प्रत्ययार्थस्य प्राधान्यम्" इत्यत्र हि विशेष्य तया प्रकृत्यर्थप्रकारकबोधं प्रति तदुत्तरप्रत्ययजन्योपस्थिति र्हेतुरिति कार्यकारणभावः

फलितः। तथा च पक्कवा नित्यत्र पाकः कर्मकारकं, क्तवतुप्रत्ययार्थः कर्तृकारकम्। तयोश्चारुणाधिकरणोक्तरीत्या वक्ष्यमाणास्मद्रीत्या चान्वयासम्भव इति प्रकृतिप्रत्ययार्थयोरन्वयनियमस्यैवाभावे क्व प्राधान्यबोधक उक्तकार्यकारणभावः। न च -

सम्बन्धमात्रमुक्तं च श्रुत्या धात्वर्थभावयोः।
तदेकांशनिवेशे तु व्यापारोऽस्या न विद्यते।।

इति भट्टपादोक्तरीत्या सम्बन्धसामान्येन कारकाणामन्वयः शङ्क्यः, योग्यताविरहात्। क्रियात्वमेव हि कारकान्वयितावच्छेदकमिति वक्ष्यते। तदेतदाविष्कर्तुं विरणेन धात्वर्थक्तवत्वर्थयोः कर्मत्वकर्तृत्वे दर्शयति - [कृतवान् पाकमिति]

वस्तुतः "प्रत्ययार्थः प्रधानम्" इत्यस्य यः प्रधानं स प्रत्ययार्थ एवेति वा, यः प्रत्ययार्थ स प्रधानमेवेति वा नार्थः, अजा, अश्वा, छागीत्यत्र प्रत्ययार्थस्त्रीत्वस्यैव प्राधान्यापत्तेः, छाग्यादेरनापत्तेश्च। किन्तूत्सर्गोऽयम्। विशेष्यत्वादिना बोधस्तु व्युत्पत्त्यनुरोधात्। अत एव नैयायिकानां प्रथमान्तविशेष्यक एव बोधः। लक्षणायामालङ्कारिकाणां शक्यतावच्छेदकप्रकारक एव बोधो, न नैयायिकादीनाम्। घटः कर्मत्वमानयनं कृतिरित्यादौ विपर्ययेणापि व्युत्पन्नानां नैयायिकनव्यादीनां बोधो, न तद्व्युत्पत्तिरहितानाम्। अन्येषां तन्निराकाङ्क्षमेवेत्यादिकं सङ्गच्छते।

अत एव "प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वात्" २-१-५३ इत्याह भगवान् पाणिनिः। प्रधानं प्रत्ययार्थ इति वचनं न कार्यम्। अर्थस्य = अर्थावबोधस्य, अन्यप्रमाणत्वात् = व्युत्पत्त्यनुसारित्वादिति हि तदर्थः। एवं सत्यपि नियामकापेक्षणे च "भावप्रधानमाख्यातम्" इति वचनमेव गृह्यतामिति सुधीभिरूह्यम्।

"तदागमे हि" इति न्यायो विवरणं चातिव्याप्त मित्याह [किं कृतं पक्कमिति] कृञा विवरणं प्रतीतिश्च पक्कमित्यत्रापीति तत्रापि भावना वाच्या स्यादिति भावः। नन्वस्तु तिङ इव कृतामपि भावना वाच्येत्यत आह [अपीति] तथा चोभयसाधारणेन तत्प्रीतेरुभयसाधारणो धातुरेव वाचक इति भावः। भवद्रीत्या प्रत्ययार्थत्वात् प्राधान्यापत्तिश्चेति द्रष्टव्यम्।। ।।८।।

नन्विदमसङ्गतम्। कृञा विवरणेन व्यापारस्य धातुवाच्यत्वस्वीकारे तस्य प्राधान्यानापत्तेः, अप्राधान्यापत्तेश्च, नचेष्टापत्तिः। व्यापारप्राधान्यस्योभयवादिसम्मतत्वात्। धातुवाच्यस्य प्राधान्यनियामकस्य कस्याप्यभावात्। अतः करोतिनाख्यातमेव विब्रियते। अत्र च प्रत्ययार्थप्राधान्यस्मृतिरेवानुकूलस्तर्कः - इति मीमांसकाशङ्कासमाधानपरं "नत्वसौ तिङाम्, पक्कवान् कृतवान् पाकम्" इति मूलमवतारयति

[मीमांसकोक्तमिति] एतेन - "करोतिर्धातोः स्याद्व्याख्यानम्" इति ग्रन्थेन करोतिर्धातोरेव विवरणमित्युक्ते तत एव "करोतिस्तिङां न व्याख्यानम्" इत्यर्थस्य लाभात् मूले "नत्वसौ तिङाम्" इति ग्रन्थोऽधिकः - इत्याशङ्का परास्ता। अस्य तच्छेषत्वाभावात्। असौ = करोतिः। व्याख्यानं = विवरणम्। [अनन्वयापत्तेरिति] व्यापारस्य प्राधान्यं तस्य प्रत्ययवाच्यत्वाधीनम्। प्रत्ययवाच्यस्य प्राधान्यं प्रत्ययार्थः प्रधानमिति न्यायमूलकमिति मीमांसका मन्यन्ते। तन्न युक्तं, पक्कवानित्यादौ प्रकृत्यर्थ - प्रत्ययार्थयोरन्वयासम्भवेन प्रत्ययार्थस्य प्राधान्यनियमनस्यैवासङ्गतत्वादिति ग्रन्थकृदाशयः। तदेतदुपपादयति - [अयं भाव इत्यादिना वक्ष्यत इत्यन्तेन] [सहार्थं ब्रूत इति] प्रकृतिप्रत्ययौ अर्थं सह ब्रूतः = एकोपस्थितिविषयीकुरुतः। न भेदेन, तत्र च प्रकृत्यर्थापेक्षया प्रत्ययार्थस्य = प्रत्ययजन्यबोधविशेष्यस्य प्राधान्यमिति तन्न्यायार्थः। तादृशव्युत्पत्तिसिद्धकार्यकारणभावं दर्शयति [विशेष्य तयेति] ततः किमायतम्? अत आह [तथाचेति] निरुक्तार्थस्वीकारे चेत्यर्थः। [पक्कवानिति] पच धातोः क्तवतुप्रत्यये "पचो वः" ८-२-५२ इति निष्ठातकारस्य वकारे तद्रूपम्। स च प्रत्ययः "कर्तरि कृत्" ३-४-६७ इति सूत्रेण कर्त्रर्थे भवति। विक्लित्त्यनुकूलभूतकालिकव्यापाराश्रय इति ततो बोधो जायते, परं तु तत्र तयोरन्वयो नोपपद्यत इति दर्शयितुमाह [पाक इति]। [कर्मकारकमिति] धात्वर्थफलस्य व्यपदेशिवद्भावेन फलाश्रयत्वात्। फलबुद्धिपूर्वकमेव क्रियोत्पादनात्तस्य क्रियाजनकत्वरूपकारकत्वाच्च कर्मकारकत्वमित्यर्थः। [कर्तृकारकमिति] "कर्तरि कृत्" इत्यधिकारे तद्विधानादित्यर्थः। तयोः = कर्म - कर्तृकारकयोः। [अरुणाधिकरणेति] तत्र हि "अरुणया पिङ्गाक्ष्यैकहायन्या सोमं क्रीणाति" इति वाक्येरुणयेत्यादितृतीयान्तार्थानां परस्परं नान्वयः, क्रियापेक्षाणां तेषां परस्परान्वयौपरियकाकाङ्क्षाविरहात्। किन्तु सर्वेषां क्रियायामेवान्वयः। तेषां परस्परपरिच्छेद्यपरिच्छेदकभावेनान्वयस्तु पाश्चात्यबोधविषयक एवेत्युक्तम्। [अस्मद्रीत्येति] क्रियात्वमेव कारकान्वयितावच्छेदकमिति सुबर्थनिर्णये वक्ष्यमाणास्मद्रीत्येत्यर्थः। [अन्वयासम्भव इति] वैयाकरणमते तु वृत्तौ विशिष्टशक्तिस्वीकारात् व्युत्पत्तीनां भिन्नोपस्थितिविषयत्वान्न दोषः। [क्वेति] सति प्रकृत्यर्थप्रत्ययार्थयोरन्वयनियमे तत्र कस्यार्थस्य प्राधान्यं, कस्याप्राधान्यमिति जिज्ञासायां निरुक्तकार्यकारणभावोऽवसर मासादयेत्। स एव नास्ति, तदभावे निष्प्रयोजनक एवायं कार्यकारणभाव इति भावः।

प्रकारान्तरेण तयोरन्वयनियममाशङ्क्य निराकरोति [न चेति]। [सम्बन्धमात्रमिति] श्रुत्या = ज्योतिष्टोमेन यजेतेत्यादौ "यजेत" इति श्रुत्या। धात्वर्थभावयोः = धात्वर्थयाग - भावनयोः।

सम्बन्धमात्रं + च = सम्बन्धमात्रमेव। उक्तं = प्रतिपादितम्। यागसम्बन्धिनी भावनेति। तदेकांशनिवेशे तु = तयोर्यागभावनयोः एकांशनिवेशे क्रियाकारकभावरूपसम्बन्धविशेषबोधने तु। अस्याः = श्रुतेः। व्यापारः = अभिधारूपो व्यापारः। नैव विद्यते = यागकरणिका भावनेति विशेषरूपेण तयोर्नान्वय इति तदर्थः। एवं च तत्र यागसम्बन्धिनी भावनेत्येव बोधः। नतु यागकरणिका भावनेति। तद्वत्प्रकृतेऽपि पाकसम्बन्धी कर्तेति सामान्यत एव बोधः। विशेषरूपेण बोध एव क्रियाया अपेक्षेत्यन्वयस्तयोरुपपद्यत एवेति भावः। सम्बन्धसामान्येन = पाकसम्बन्धी कर्तेति रीत्या। कारकाणां = प्रयोगबाहुल्येन बहुवचनम्। [अन्वय इति] तथाच निरुक्तकार्यकारणभावस्यावश्यकत्वं स्पष्ट मेवेति भावः।

[योग्यताविरहादिति] कारकाणां परस्परमन्वये योग्यता नास्ति। शक्तिग्रहानन्तरं पदार्थोपस्थितौ तेषां परस्परमन्वये योग्यताप्यपेक्ष्यते। प्रकृते तदभावात्सामान्यरूपेणापि न प्रकृत्यर्थप्रत्ययार्थयोरन्वय इति भावः।

ननु एकपदार्थेऽपरपदार्थसम्बन्धो योग्यता। सा च शाब्दबोधे कारणम्। "तत्पदार्थे तत्पदार्थत्वं योग्यता" इत्यस्याप्ययमेवार्थः। अन्यथा स्वस्मिन् स्वाधिकरणकत्वाभावात्तज्ज्ञानस्य शाब्दबोधे हेतुत्वाभावेनानुपयुक्तता स्पष्टैव। प्रकृते च तादृशी योग्यतास्त्येवेत्यत आह [अन्वयप्रयोजकरूपवत्त्वस्येति] एकपदार्थेऽपरपदार्थसम्बन्धमात्रं न योग्यता, अपरपदार्थसम्बन्धप्रयोजकरूपवत्त्वं सेति स्वीकार्यम्। अन्यथा घटेन जलमाहरेत्यादौ जलाहरणे घटकरणत्वस्य सत्त्वात्तस्मिन् सुषिरघटस्यापि करणत्वेनान्वयापत्तिः। मन्मते तु सच्छिद्रेतरघटस्य जलाहरणान्वयप्रयोजकत्वेन तादृशघटे तादृशाहरणान्वयाप्रयोजकत्वमिति न च्छिद्रघटस्य तदन्वयापत्तिरिति भावः। ननु घटेन जलमाहरेत्यत्र घटे छिद्रेतरघटत्ववत्प्रकृते किं कारकान्वयितावच्छेदकम्? यदभावात्पक्कवानित्यत्र प्रकृत्यर्थप्रत्ययार्थयोरनन्वयापत्तिरु'ाव्यतेऽत आह [क्रियात्वमेवेति] पक्कवानित्यत्रोभयोरपि कारकत्वेन योग्यताविरहान्न सामान्यरूपेणाप्यन्वयः सम्भवति। ज्योतिष्टोमेन यजेतेत्यत्र तु प्रात्ययार्थभावनायां कारकान्वयितावच्छेदकतायाः सत्त्वेन तत्र प्रकृत्यर्थस्यान्वये बाधकाभावः स्पष्ट एव। क्रियात्वमेवेत्येवशब्देन क्रियाव्यतिरिक्तस्य कर्त्रादेर्व्यावृत्तिः। नचात्र मानाभावः। "कारके" २-३-१३ इत्यधिकृत्य कर्त्रादिकारकाणां व्युत्पादनेन करोति कर्तृकर्मादिव्यपदेशानिति व्युत्पत्त्या कारकशब्दस्य क्रियापरत्वेनाग्रिमेष्वपादानादिसंज्ञाविधायकेषु क्रियार्थके कारकशब्दानुवृत्त्या क्रियान्वयिनामेव कर्त्रादिसंज्ञाविधानस्यैव मानत्वात्। स्पष्टं चेदं भाष्ये। तदाह [वक्ष्यत इति] "कारकं प्रथमो वतिः" इति कारिकाव्याख्यावसरे वक्ष्यत इत्यर्थः।

तदेतत् = समनन्तरोक्तं विषयजातम्। आविष्कर्तुम् = प्रकटीकर्तुम्। धात्वर्थक्तवत्वर्थयोः = पक्कवानित्यत्र। कर्मत्वकर्तृत्वे = द्वितीयाद्विवचनान्तमेतत्। [दर्शयतीति] एवंच पक्कवानित्यस्य विवरणं "पाकं कृतवानिति, तेन च प्रकृत्यर्थप्रत्ययार्थयोः कर्मत्वकर्तृत्वलाभेन निरुक्तरीत्या तयोरनन्वयेन, तत्र प्रत्ययार्थप्राधान्यनियामककार्यकारणभावस्यासिद्धिरेवेति भावः। एतेन "पक्कवान् कृतवान् पाकम्" इति प्रकृतानुपयुक्तं किं च पक्कवानित्यनेन "कृतवान् पाक" मिति पुनरुक्तं स्यादित्याशङ्का परास्ता।

वस्तुतस्तु "स्त्रियाम्" ४-२-३ इति सूत्रस्थाकरप्रामाण्येन प्रत्ययार्थप्राधान्यस्मृतेरौत्सर्गिकतया तद्बलेन प्रत्ययार्थस्य प्राधान्यानिर्वाहात्तल्लोभेन व्यापारस्य प्रत्ययार्थत्वस्वीकारो मीमांसकानां मुधैव। तत्र हि भाष्ये स्त्रीत्वस्य प्रत्ययार्थत्वपक्षे तस्य प्राधान्यात्तत्रैकत्वस्यैव सत्त्वेन स्त्रीप्रत्ययान्तादेकवचनमेव स्यात्, कुमार्यौ कुमार्य इति द्विवचनबहुवचने न स्यातामित्याशङ्क्य, गुणवचनदृष्टान्तेन प्रत्ययवाच्यस्यापि स्त्रीत्वस्य प्रकृत्यर्थविशेषणत्वाश्रयणेन समाहितम्। प्रत्ययार्थोऽपि स्त्रीत्वं प्रकृत्यर्थे विशेषणम्। प्रत्ययार्थः प्रधानमिति तूत्सर्गः इति समाधानभाष्याशयमाविश्चाकार कैयटः। तथाचैतद्भाष्यार्थप्रतिपादिका हरेः कारिका यथा - "सोऽयमित्यभिसम्बन्धादाश्रयं प्रतिपद्यते। स्त्रीत्वंस्वभावसिद्धो वा गुणभावविपर्ययः" इति। द्रव्यस्य गुणभावविपर्ययः = गुणभावस्य वैपरीत्यं, स्वभावसिद्ध एवेति तदर्थः। अत्र हेलाराजः "द्रव्यस्य प्राधान्यम्। नहि सर्वत्र प्रत्ययार्थः प्रधानम्" इतीत्याशयेनाह [वस्तुस्तित्त्वति] यत्तु "कृदर्थकर्त्राक्षिप्तभावनायां पाकादीनामन्वयसम्भवान्नोक्तदूषणमत आह" इति दर्पणकाराः प्रभाकारा, परीक्षाकाराश्च। तन्न। "कृदन्तस्थले कर्त्रा भावनाया आक्षेपो न युक्तः। तिङन्तस्थलेऽपि तथात्वापत्त्या त्वन्मते भावनाया वाच्यत्वासम्भवात्" इत्यादिना मूल एव तदाशयस्य दूषितत्वेन तदुत्थापनस्यायुक्तत्वात्।

द्वितीये व्यभिचारं दर्शयति [अजेति]। [प्रत्ययार्थस्त्रीत्वस्येति] तद्वाच्यस्त्रीत्वस्येत्यर्थः। टाबादीनां द्योतकतापक्षे स्त्रीत्वस्य विशेषणत्वलाभेऽपि वाचकतापक्षे प्रत्ययार्थप्राधान्यस्मृत्यनुरोधेन स्त्रीत्वस्य तदलाभेन प्राधान्यापत्तिरिति भावः। [प्राधान्यापत्तेरिति] न चेष्टापत्तिः, अजेत्यादौ स्त्रीत्वविशेष्यकबोधस्य कस्याप्याननुभावात्, तस्यैकत्वेन अजे, अजा इत्यादौ द्विवचनबहुवचनयोरनापत्तेश्च। स्पष्टं चेदं स्त्रियामिति सूत्रे भाष्यकैयटयोः। न च जातिव्यक्त्योरभेदस्वीकारादनुपपत्तिपरिहारसम्भवात्स्त्रीत्वविशेष्यकबोध इष्ट एवेति वाच्यम्। आकृत्यधिकरणोच्छेदापत्तेः। प्रपञ्चितं चेदं "एकं द्विकं त्रिकं चापि" इत्यादकारिकाव्याख्याने भूषणे। प्रथमार्थे व्यभिचारं दर्शयति [छाग्यादेरिति] तस्याप्रत्ययार्थत्वेन प्राधान्यानापत्तिरित्यर्थः। हरिकैयटाभ्यां प्रदर्शितं भाष्यार्थमाह [किन्तूत्सर्गोऽयमिति] "प्रत्ययार्थः प्रधानम्" इति न्यायः प्रायिक इत्यर्थः। एवं चैतदवलम्बेन व्यापारस्य प्रत्ययवाच्यत्वस्वीकारो मुधैवेत्याशयः।

"स्त्रियाम्" ४-१-३ इति सूत्रस्थं भाष्यं नागेशेनान्यथा व्याख्यातम्। तदीयोऽभिप्रायो मञ्जूषाव्याख्याने नागेशभावप्रकाशेऽस्माभिर्विस्तरेण निरूपितः। स च तत एवावगन्तव्यः।

तर्हि विशेष्यत्वादिना बोधो निर्निबन्धन एव, नेत्याह [विशेष्यत्वादिनेति] [व्युत्पत्त्यनुरोधादिति] व्युत्पत्तिः = कार्यकारणभावः। बोधो व्युत्पत्त्यनुसारी, न तु बोधानुसारिणी व्युत्पत्तिः। स्पष्टं चेदं "कस्माद्वाक्यात्कीदृशो बोधो जायते?" इति प्रश्ने "यो यथा व्युत्पन्नस्तस्य तादृगेवेति स्थितिः" इत्यादिना अपादानसंज्ञासूत्रे कौस्तुभे। तथाच

व्युत्पत्तिरेव विशेष्यत्वादिना बोधे नियामिकेति तथा युत्पन्नस्य मीमांसकस्य तव प्रत्ययार्थविशेष्यक एव बोधो, नान्येषामिति भावनाया धातुवाच्यत्वेऽपि न प्राधान्यानुपत्तिरिति भावः। तदेव विशदयति [अत एवेति] बोधस्य व्युत्पत्त्यनुसारित्वादेवेत्यर्थः। [प्रथमान्तविशेष्यक इति] अन्याविशेषणीभूतप्रथमान्तार्थविशेष्यक इत्यर्थः। कालादिव्यातिरिक्ताख्यातार्थप्रकारकबोधं प्रति अन्याविशेषणीभूतप्रथमान्तपदजन्योपस्थितिर्हेतुरिति व्युत्पत्तेः नैयायिकैराश्रितत्वेन तद्विशेष्यक एव बोधः। तादृशव्युत्प्रत्तिमनभ्युपगम्य "निपातोपसर्गप्रातिपदिकातिरिक्तशब्दगम्यो यस्सुबुपात्तलिङ्गसङ्ख्यातिरिक्तोऽर्थस्तत्प्रकारकशाब्दबुद्धित्वाविच्छिन्नं प्रति लिङ्गानन्वयिभावनाविशेष्यता सम्बन्धेन पदजन्योपस्थितिः कारणम्" इति व्युत्पत्तिमभ्युपगच्छतां मीमांसकानाम् "आख्यातार्थभावनाविशेष्यक एव बोधः। निरुक्तव्युत्पत्तिद्वयमनङ्गीकृत्य "आख्यातार्थप्रकारकशाब्दबुद्धित्वावच्छिन्नं प्रति विशेष्यतया धातुजन्योपस्थितेर्हेतुत्वं स्वीकुर्वतां पाणिनीयानां धात्वर्थविशेष्यक एव बोध इति व्युत्पत्तिरेव विशेष्यत्वादिना बोधे नियामिकेति तात्पर्यम्।

न केवलमाख्यातस्थल एवैषा गतिः। किन्त्वन्यत्रापीत्याह [लक्षणायामिति] [शक्यतावच्छेदकप्रकारक इति] अत एव गङ्गायां घोष इत्यादौ लक्ष्यार्थस्य तीरस्य शक्यार्थप्रवाहत्वेन रूपेण भानाद्व्यञ्जनया तीरे गङ्गागतशैत्यपावनत्वादिप्रतीतिसिद्धिः। अन्यथा गङ्गातीरे घोष इति वाक्यजन्यबोधाल्लाक्षणिकपदजन्यबोधस्य न कोऽपि विशेषः स्यादित्यालङ्कारिकसमयः। [न नैयायिकादीनामिति] लाक्षणिकेभ्यो लक्ष्यार्थस्य न शक्यतावच्छेदकरूपेण भानम्। अपितु लक्ष्यतावच्छेदकरूपेणैव। अत एव - "कचतस्त्रस्यति वदनं वदनात्कचमण्डलं त्रसति। मध्याद् बिभेति नयनं नयनादधरस्समुद्विजति" इत्यादौ लक्ष्यार्थस्य राहुत्वेनैव बोधात् त्रासहेतुत्वं, कचत्वेन बोधस्य तत्त्वाभावः स्पष्ट एवेति नैयायिका मन्यन्ते। [घटः कर्मत्वमिति] घटमानयेत्यत्र नैयायिकमते घटप्रातपदिकार्थो घटः, तदुत्तरद्वितीयायाः कर्मत्वमर्थः। आनयेत्यत्र आङ्पूर्वकनीधातोरानयनमर्थः।

आख्यातस्य कृतिरर्थः। तदर्थोपस्थितेर्घटकर्मकानयनानुकूला कृतिरिति बोधो जायते। घटः कर्मत्वमानयनमिति तदर्थोपस्थापकस्वतन्त्रपदप्रयोगेऽपि घटकर्मकानयनानुकूला कृतिरिति बोधो जायत एव। नहि घटमानयेति वाक्यघटकपदजन्यार्थोपस्थित्यपेक्षया घटः कर्मत्वमानयनमिति वाक्यघटपदजन्यार्थोपस्थितेः किञ्चिद्वैलक्षण्यमनुभूयत इति भावः। [विपर्ययेणेति] व्याकरणेन ययाऽऽनुपूर्व्या प्रकृतिप्रत्यया अनुशिष्टास्तदानुपूर्वीकपदजन्यपदार्थोपस्थितेरेव शाब्दबोधौपयिकत्वमिति प्रामाणिकानामभ्युपगमः, तद्विपर्ययेणेत्यर्थः। एवं च "अम् + घटः" इत्यतोऽपि घटकर्मकमिति खण्डबोध उत्पद्यत एव। एत एव विपरीतव्युत्पन्ना इति कथ्यन्ते। तद्व्युत्पत्तिरहितानेवोद्दिश्याह [अन्येषामिति] तत् = घटः कर्मत्वमानयनं कृतिरिति पदसमुदायरूपं तत्। [निराकाङ्क्षमेवेति] घटकर्मकमितिबोधे न यथाकथञ्चित्तदर्थोपस्थापकपदान्यपेक्ष्यन्ते। किन्तु कर्मत्वादिविशेष्यकघटादिप्रकारक-भेदान्वयबोधेऽव्यवहितोत्तरवर्तितासम्बधेन घटादिपदेऽम्पदवत्त्वरूपाकाङ्क्षाऽपेक्ष्यते। उक्तं च आकाङ्क्षावादे गङ्गेशोपाध्यायैः - नामविभक्तिधात्वाख्यातक्रियाकारकपदानामन्वयबोधे तान्येव पदानि समर्थानि, नतु तदर्थकानि पदानतराणि। अग्निः करणत्वम् ओदनः कर्मता, पाकः कृतिरिष्टसाधनमित्यादिपदेभ्यः। अग्निनौदनं पचेत्यत्रेवान्वयाबोधात् इति। द्वितीयादिविभक्त्यर्थः कर्मत्वादिः क्रिया न्वययोग्यः, नतु कर्मत्वादिपदोपात्तः एवं क्रियाविषयेऽपीति तदाशयः। [इत्यादिकमिति] आदिपदेन सुप्यते चैत्रेणेत्यादौ भावाख्यातस्थले नैयायिकमीमांसकयोर्व्युत्पत्त्यनुसारेण जातबोधस्य परिग्रहः। तत्र तिङ्प्रत्ययः साधुत्वमात्रार्थक एव। चैत्रकर्तृकः स्वाप इति धात्वर्थस्वापविशेष्यक एव बोध इति नैयायिका मन्यन्ते। आख्यातस्य भावो वाच्य एव आख्यातार्थविशेष्यक एव बोध इति मीमांसका अभिप्रयन्ति।

[सङ्गच्छत इति] सर्वत्रापि तत्तद्वचनैरेव व्यवस्थास्वीकारेऽनुपपत्तिरेव, तद्बोधकवचनानामभावात्। अतस्तत्तद्व्युत्पत्तिरेव शरणमिति स्वीकार्यम्। सैव च गतिर्विशेष्यत्वादिना बोधांशेऽपीति भावः।

स्वोक्तार्थे मुनिसम्मतिं दर्शयति [अत एवेति] विशेष्यत्वादिना बोधस्य व्युत्पत्त्यनुसारित्वादेवेत्यर्थः। सूत्रार्थमाह [प्रधानं प्रत्ययार्थ इति वचनमिति] तदर्थकं वचनमित्यर्थः। "प्रधनोपसर्जने प्रत्ययप्रकृर्यर्थौ" इति पूर्वाचार्यवचनमित्यर्थः। अत्र "तदशिष्यं संज्ञाप्रमाणत्वात्" २-२-५३ इति सूत्रादशिष्यमित्यनुवर्तते। तदर्थमाह [न कार्यमिति] अत्र "नेत्यनुवर्त्य" इति पाठमाश्रित्य नेत्यर्थकमशिष्यमित्यनुवर्त्य इति पञ्चोलिनो व्याकुर्वते। बहुषु पुस्तकेषु स पाठो नोपलभ्यत एव। "अशिष्यमित्यनुवर्त्य" इत्येव भूषणे पाठः। तदर्थः = पाणिनिसूत्रार्थः। [एवं सत्यपीति] मीमांसकमतोपष्टम्भकप्रत्ययार्थप्राधान्य-

स्मृतेरव्याप्त्यादिदुष्टत्वेऽपीत्यर्थः। [नियामकापेक्षायामिति] मीमांसकमतोपपादकनियमस्याप्रयोजकत्वेऽपि वैयाकरणमतोपपादकापेक्षायामित्यर्थः। मीमांसकमतं निर्युक्तिकं भवतु। भवन्मतोपपादकं किमित्याशयः। [भावप्रधानमाख्यातमिति] अत्राख्यातपदं धातुमात्रपरमिति प्रकृतसन्दर्भ एव भूषणे प्रपञ्चितम्।

"किं कृतं पक्कमित्यपि" इति मूलमवतारयित [तदागमेहीति] विवरणं = पाकं करोतीति कृञाऽऽख्यातार्थविवरणम्। [अतिव्याप्तमिति] "नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम्" २-१-६९ इति नपुंसकैककशेषः। अतिव्याप्तश्च, अतिव्याप्तं च = अतिव्याप्तम्। [पक्कमित्यत्रापीति] किं कृतम्? इति प्रश्नस्योत्तरं पक्कमिति व्यापारार्थककृञ्घटितस्य किं कृतमिति प्रश्नस्योत्तरभूते पक्कमिति वाक्येऽपि व्यापारप्रतीतिरावश्यकी, अन्यथा प्रश्नवाक्यस्य साकाङ्क्षतयाऽप्रामाण्यापत्तेः, पक्कमित्यस्यानुत्तरत्वापत्तेश्च। एवं चात्राख्याताभावेऽपि भावनाप्रतीतेस्तदागमन्यायातिव्याप्तिः स्पष्टैव। एवं विवरणस्याप्यत्रातिव्याप्तिरेव मीमांसकमते।

कारिकायामपिग्रहणं सफलयति [नन्विति]। [कृतामपीति] तेन तदागमन्याय-विवरणयोर्नातिव्याप्तिरिति भावः। तथाच = कृतामपि भावनावाचित्वे। उभयसाधारण्येन = तिङ्कृदन्तोभयसाधारण्येन। तत्प्रतीतेः = भावनाप्रतीतेः। [प्राधान्यापत्तिरिति] कृत्प्रत्यये भावनायाः प्राधान्यापत्तिरिति भावः। नचेष्टापत्तिः, "सत्त्वप्रधानानि नामानि" इति स्मृतिविरोधात्।

नतु कृतां कर्तृभावनोभयवाचित्वेऽपि कस्यार्थस्य प्राधान्यमित्यत्र नियामकापेक्षायां सत्त्वप्रधानानि नामानीति स्मृत्या कर्तुरेव प्राधान्यं सेत्स्यतीत्यत आह [चेति] पक्कः, पक्कवान्, पचति, पक्ष्यतीत्यादौ फूत्कारादिव्यापारे अनेकप्रत्ययानां शक्तिकल्पनापेक्षया तादृशानुपूर्व्याः शक्तावच्छेदकनानात्वकल्पनापेक्षया च एकस्य पचित्वस्य शक्तावच्छेदकत्वकल्पनायां च लाघवं स्पष्टमेवेयि भावः। ।।८।।

साधकान्तर माह -

किं कार्यं पचनीयं चेत्यादि दृष्टं हि कृत्स्वपि।
किञ्च क्रियावाचकतां विना धातुत्व मेव न।। ।।९।।

कार्यमित्यत्र "ऋहलोर्ण्यत्" ३-२-२८४ इति कर्मणि ण्यत्। पचनीयमित्यादौ चानीयर्। आदिना ज्योतिष्टोमयाजीत्यादौ करणे उपपदे कर्तरि णिनिः। एते च क्रियायोगमन्तरेणासन्तस्तद्वाच्यतां बोधयन्ति, विना क्रियां कारकत्वासम्भवेन तद्वाचकप्रत्ययस्याप्यसम्भवात्।

न च गम्यमानक्रियामादाय कारकयोग इति भाट्टरीतिर्युक्ता, आख्यातेऽपि तथात्वापत्तौ तत्रापि भावनाया वाच्यत्वासिद्ध्यापत्तेः।

अथ लिङ्गसङ्ख्यान्वयानुरोधात् कर्तृवाच्यत्वमावश्यकमिति तेनाक्षेपाठावनाप्रत्ययः स्यादिति मतम्, तर्हि सङ्ख्यान्वयोपपत्तये आख्यातेऽपि कर्ता वाच्यः स्यात्। पक्ववानित्यादौ कालकारकान्वयानुरोधाद्भावनाया अपि वाच्यत्वस्यावश्यकत्वाच्चेति भावः।

अपिना हेत्वन्तरसमुच्चयः। तथाहि - नखैर्भिन्नो नखभिन्नः। हरिणा त्रातो हरित्रात इत्यादौ "कर्तृकरणे कृता बहुलम्" १-२-३२ इति समासो न स्यात्। पुरुषो राज्ञो भार्या देवदत्तस्येतिविदसामार्थ्यात्।

न चाध्याहृतक्रियामादाय सामर्थ्यं वाच्यं, दध्योदनो गुडधाना इत्यादिवत्। अन्यथा तत्रापि "अन्नेन व्यञ्जनम्" "भक्ष्येण मिश्रीकरणम्" इति समासो न स्यादिति वाच्यम्। तत्र विध्यानर्थक्यादगत्या तथा स्वीकारेऽपि हरिकृतमित्यादौ साक्षाद्धात्वर्थान्वयेनोपपद्यमानस्य "कर्तृकरणे" इत्यस्याक्षेपेण परस्परासम्बन्धे प्रवृत्त्ययोगात्।

नचैकक्रियान्वायित्वमेव सामर्थ्यमिति शङ्क्यम्। असूर्यम्पश्या इत्यादेरसमर्थसमासत्वानापत्तेः। इष्टापत्तौ कृतः सर्वो मृत्तिकयेत्यत्र कृतसर्वमृत्तिक इत्यापत्तेः। नचात्र समासविधायकाभावः। "सह सुपा" इत्यस्य सत्त्वात्। अन्यथाऽसमर्थसमासोऽपि विधायकाभावान्न स्यात् - इति।

[साधकान्तरमिति] व्यापारस्य धात्वर्थत्वे साधकान्तरमाहेत्यर्थः। मूले [किं कार्यमिति] पूर्वकारिकायां "किं कृतं पक्व मित्यपि" इति प्रश्नोत्तररूपविवरणेन व्यापारस्य धातुवाच्यत्वं साधितं तत्प्रसङ्गेनात्रापि "किं कार्यम्" इति किंशब्द उपक्रान्तः। नत्वस्य प्रकृतार्थसाधने उपयोग इति बोद्धव्यम्।

[कर्मणीति] "तयोरेव कृत्यक्तखलार्थाः" ३-४-७० इत्यनेन कर्मणि नियमनादित्यर्थः। [पचनीयमिति] "तव्यत्तव्यानीयरः" ३-२-९६ इत्यनेन तयोरेवेति नियमनेन कर्मणि वाच्ये अनीयर् प्रत्ययः। आदिना = पचनीयं चेत्यादीति कारिकाघटकेनादिपदेन। [ज्योतिष्टोमयाजीति] ज्योतिष्टोमेन इष्टवानिति विग्रहः। [कर्तरि णिनिरिति] "करणे यजः" ३-२-८५ इति सूत्रेण भूते करण उपपदे

कर्तरि वाच्ये णिनिरित्यर्थः। सर्वधातूनां भावनापरपर्याये व्यापारे शक्तिः। पचित्वयजित्वादिनारूपेण तु पाकयज्ञादिक्रियाविशेषे शक्तिरिति भूवादिसूत्रस्थकौस्तुभोक्तरीत्या यज्यर्थयागस्य समानप्रकृत्युपात्तभावनां प्रति करणत्वेन तत्समानाधिकरणस्य ज्योतिष्टोमादेरपि "कटोऽपि कर्मभीष्मादयोऽपि" इत्यनभिहितसूत्रस्थभाष्योक्तरीत्या करणतया तदुपपादनिमित्तको णिनिस्सुलभ इति ध्येयम्।

[एते चेति] निरुपपदकास्सोदपदकाश्च कृत्प्रत्यया इत्यर्थः। एवं स्नानीयं चूर्णमिति करणे, गोघ्नोऽतिथि रित्यत्र संप्रदाने, उपाध्याय इत्यत्राऽपादाने, गोदोहनी स्थालीत्यादा वधिकरणे च कृत्प्रत्यया दृष्टाः। एवं कुम्भकारः, पूर्वसरः, शय्योत्थायं धावति, गिरिशः इत्यादौ कर्माद्युपपदकाश्च कृत्प्रत्यया विहिताः। क्रियायोगम् = क्रियासम्बन्धम्। असन्तः = असम्भवन्तः। तद्वाच्यतां = स्वोपपादकक्रियावाच्यताम्। बोधयन्ति = पारिशेष्याद्धातोरेव क्रियाया वाच्यतां बोधयन्ति। असम्भवमेवोपपादयति [विना क्रियामिति]। [कारकत्वासम्भवेनेति] क्रियान्वयित्वस्यैव कारकत्वादिति भावः। [तद्वाचकेति] कारकत्वव्याप्यकर्मत्वादिनिमित्तकप्रत्ययोत्पत्त्यसम्भवादित्यर्थः। सोमयाजीत्यादौ "करणे यजः" ३-३-८५ इत्यादिना प्रत्यासत्त्या समर्थपरिभाषणेन च यज्यर्थनिरूपितकरण उपपदे यज्यर्थकर्तरि णिन्यादेर्विधानेन सोमादीनां करणत्वाद्यनापत्त्या तदर्थनिरूपितकर्तृत्वाद्यसम्भवेन च प्रत्ययविधानमेव धातोरन्यथानुपपत्त्या व्यापारवाचित्वं गमयतीति भावः।

[नचेति] अस्य युक्तेत्यत्रान्वयः। [गम्यमानेति] कार्यम्, कुम्भकारः, सोमयाजीत्यादीनां पदानां क्रियासम्बन्धं विना संपूर्णार्थप्रतिपादकत्वादर्शनेनान्ततोऽस्तिक्रियायाः सत्त्वात्तत्क्रियायोगमादाय कृत्प्रत्ययोपपत्तिरिति भावः। कारकयोगः = कारकसंज्ञाव्याप्यकर्तृकर्माद्यर्थकप्रत्ययोत्पत्तिः। यद्वा गम्यमानक्रियामित्यस्य कृदन्ते कर्त्रादिना भावनाया आक्षेपात्तादृगाक्षिप्तक्रियामित्यर्थः। नचाक्षिप्तक्रियामादाय कर्त्राद्यवगत्या तद्बोधकप्रत्ययविधानम्। विहितप्रत्ययार्थकर्त्रा च क्रियाया आक्षेप इत्यन्योन्याश्रयापत्तिरिति वाच्यम्। प्रत्ययविधानान्यथानुपपत्त्या भाविन्याः क्रियाया बुद्धिस्थत्वकरणेनादोषात्। समाधत्ते [आख्यातेऽपीति] तथात्वापत्तौ = भावनाया आक्षेपलभ्यत्वापत्तौ। तत्रापि = आख्यातेऽपि [वाच्यत्वासिद्धीति] त्वन्मते भावनायास्तिङ्वाच्यत्वं, तया च कर्तुराक्षेप्यत्वं व्यवस्थापितं, त'ज्येत। कृदन्त इव कर्तुरेव तिङ्वाच्यत्वं, कर्त्रा च भावनाया आक्षेप्यत्वमित्यपि सुवचत्वात्। [आपत्तेरिति] न च तवेष्टापत्तिः, त्वदीयसिद्धान्तभङ्गापत्तेः।

[अथेति] अस्य मतमित्यत्रान्वयः। [अन्वयानुरोधादिति] लिङ्गसङ्ख्ययोः सत्त्वभूतार्थ एवान्वयादिति भावः। कर्तुः = कर्त्रादेः। वाच्यत्वं = कृत्प्रत्यय इति शेषः। इति = इति हेतोः। तेन = कर्त्रादिना।

भावनाप्रत्ययः = तद्बोधः। समाधत्ते [तर्हीति] तिङन्ते लिङ्गाभावादाह [सङ्ख्यान्वयेति] [कर्ता वाच्यः स्यादिति] नचाख्याते भावनयाक्षिप्ते कर्तरि सङ्ख्यान्वयः स्यादिति वाच्यम्। कृदन्तेऽपि तथात्वापत्तेः। कालबोधककृत्प्रत्येषु दोषमाह [पक्कवानिति] अत्र निष्ठाया भूताधिकारे विधानात्कालस्य भानम्। कालान्वयानुरोधात् तव मते कृतोऽपि भावनावाचित्वापत्तिः। इत्यादावित्यादिपदेन शतृशानजादीनां ग्रहणम्। तथा विशिष्य विधानाभावेऽपि ण्वुल्तृज्भ्यां वर्तमानकालो भासते। स्पष्टं चेदं तत्रैव भाष्ये। तत्रापि भावना वाच्या स्यात्। मन्मते व्यापारं धातुवाच्यमादाय कृद्विधानमुपपद्यत इति भावः।

कारिकायामपिग्रहणफलं दर्शयति [अपिनेति] कृत्स्वपीत्यत्रापिशब्देनेत्यर्थः। [समासो न स्यादिति] अयं भावः - प्रत्यासत्त्या समर्थपरिभाषणेन च यद्धातुप्रकृतिककृदन्तेन समासो विधित्सितस्तद्धात्वर्थनिरूपितकर्तृकर्मबोधकतृतीयान्तकृदन्तेन समस्यत इति "कर्तृकरणे कृता बहुलम्" इति सूत्रेण लाभात्। धातोर्व्यापारावाचित्ववादिनां मते निरुक्तोदाहरणयोर्नखानां हरेश्च तद्धात्वर्थकर्तृकर्मत्वाभावेन तेषां परस्परमनन्वयेन सामर्थ्याभावात्समासानापत्तिः। यथा पुरुषो राज्ञः, भार्या देवदत्तस्येत्यत्र राजपदार्थस्य पुरुषपदार्थेन, भार्यापदार्थस्य देवदत्तपदार्थेन च सममन्वयानुभवदशायां भार्याराजपदार्थयोः परस्परमनन्वयात्सामार्थ्याभावात्समासो न, तद्वत्प्रकृतेऽपि। व्यापारस्य धातुवाच्यत्वे तु भिदिधातुवाच्यव्यापारनिरूपितकरणत्वस्य नखेषु सत्त्वात्तेषां धात्वर्थेऽन्वयात्सामर्थ्यसत्त्वात्समासनिर्वाहः स्पष्ट एव। नखकरणकद्विधाभवनाश्रयाभिन्नो हिरण्यकशिपुरिति ततो बोधः। हरित्रात इत्यत्र हरिकर्तृकव्यापारजन्याभयाश्रयाभिन्नो भक्त इति बोधः। कर्मकृत्समभिव्याहारे दीक्षितादीनां मतेऽपि फलविशेष्यकबोधस्यैव स्वीकारात् - इति। [असामर्थ्यादिति] परस्परमन्वयाभावादित्यर्थः।

[नचेति] अस्य द्वितीये 'वाच्यम्' इत्यत्रान्वयः। [अध्याहृतक्रियामिति] कृत्वेत्यध्याहारेण हरिणा कृत्वा त्रातः, नखैः कृत्वा भिन्न इत्यादिरीत्या सामर्थ्यं सुवचमिति भावः। [सामर्थ्यमिति] क्रियाध्याहारेण परम्परयान्वयसत्त्वात्सामर्थ्यमित्यर्थः। [वाच्यमिति] अतो न समासानुपपत्तिरिति भावः। क्रियाध्याहारेण सामर्थ्योपवर्णनेन समासस्वीकारे दृष्टान्तमाह [दध्योदन इति] अन्यथा = अध्याहृतक्रियामादाय परम्परयाऽन्वये सामर्थ्यास्वीकार इत्यर्थः। [न स्यादिति] दध्योदन इत्यत्रोपसेकक्रियां, गुडधाना इत्यत्र मिश्रणक्रियामादाय च सामर्थ्यमुपपाद्य समासः स्वीक्रियते। अन्यथा समासानापत्तिरित्यर्थः।

तत्र = दध्योदनादौ। [विध्यानर्थक्यादिति] अन्नेन, भक्ष्येण च व्यञ्जनमिश्रीकरणयोः समासविधाने तस्य कृञ्घटितपदेऽप्रवृत्त्या समासविध्यानर्थक्यादित्यर्थः। तथा स्वीकारेऽपि = क्रियाध्याहारेण परम्परासम्बन्धेन सामर्थ्योपपादनेऽपि। [हरिकृतमिति] धातोर्व्यापारावाचित्ववादिनापि

करोतेर्व्यापारवाचित्वस्वीकारेण तन्निरूपितकर्तृत्वादेर्हर्यादौ सत्त्वेन तत्रैकार्थीभावसत्त्वेन समासप्रवृत्त्या सूत्रस्य वैयर्थ्याभावेन परम्परासम्बन्धे "कर्तृकरणे कृता बहुलम्" इत्यस्य प्रवृत्त्ययोगादिति भावः।

[एकक्रियान्वयित्वमेवेति] एकस्यां क्रियायामन्वयित्वमेव सामर्थ्यम्। तेन परस्परमन्वयं विनापि सामर्थ्यसिद्धिः। नखभिन्न इत्यादौ नखैः कृत्वा भिन्न इत्यर्थे, नखैर्भिन्नः कृत इत्यर्थे वा नख-भिन्नपदार्थयोः कृञर्थव्यापारेऽन्वयेन सामर्थ्यं निराबाधमित्याशयः। [असूर्यम्पश्या इति]। "असूर्यललाटयोर्दृशितपोः" ३-२-३६ इति सूत्रेण असूर्यशब्द उपपदे दृशिधातोः खश्। "कर्तरि शप्" ३-२-६८ इति शप्। "पाघ्राध्मा" ७-३-७८ इत्यादिना दृशिधातोः पश्यादेशः। "अरुर्द्विषदजन्तस्य मुम्" ६-३-६७ इति मुमागमः। सूर्यं न पश्यन्तीत्यर्थः। गु"ापरं चेदं। एवं हि नाम गु"ा भवन्ति, यदपरिहार्यदर्शनं सूर्यमपि न पश्यन्तीति। तेन सत्यपि सूर्यदर्शने असूर्यम्पश्या राजदारा इति प्रयोगो न विरुध्यते। यदा तु न सूर्यं पश्यन्तीति विग्रहाश्रयणेन सूर्यदर्शनाभावमात्रं विवक्षितं, तदान भवत्येव खश् प्रत्ययः। अनभिधानादिति हरदत्तग्रन्थे स्पष्टम्। [असमर्थसमासत्वानापत्तेरिति] असूर्यम्पश्या इत्यादौ नञर्थस्य दृश्यर्थ एवान्वयेन सूर्यशब्दार्थेनानन्वयात्सामर्थ्याभावादसूर्यशब्दोऽसमर्थसमासः। स्पष्टं चेदं भाष्ये। एकक्रियान्वयित्वरूपसामर्थ्यस्य समर्थसूत्रप्रवृत्तिप्रयोजकत्वाभ्युपगमे नञ्सूर्यशब्दार्थयोरुभयोरपि दृशक्रियायामेवान्वयात्समर्थसमासत्वमेव तेषां स्यादिति तेषामसमर्थसमासत्वप्रतिपादनं भाष्यकृतोऽसङ्गतमेव स्यादिति भावः। [कृतः सर्वो मृत्तिकयेति] सर्वः मृत्तिकया कृत इति तदर्थः। [आपत्तेरिति] तस्य साधुत्वापत्तेरित्यर्थः। असूर्यम्पश्या इत्यादीनां तु असूर्यशब्दे उपपदे खश्विधानाज्ज्ञापकात्साधुत्वमिति बोध्यम्। [सत्त्वादिति] सह सुपेति सूत्रमधिकारो लक्षणं च, यस्य समासो विशिष्य नोक्तस्तत्रानेन समास इत्यङ्गीकारादित्यर्थः।

किञ्च भावनायास्तिङर्थत्वे भावयति घटमितिवद्भवति घटमित्यपि स्यात्। धात्वर्थफलाश्रयत्वरूपकर्मत्वसत्त्वात्। नचाख्यातार्थव्यापाराश्रयत्वेन कर्तृत्वात्तत्संज्ञया कर्मसंज्ञाया बाधान्न द्वितीयेति वाच्यम्। आख्यातार्थव्यापाराश्रयस्य कर्तृत्वे पाचयति देवदत्तो विष्णुमित्रेणेत्यत्र विष्णुमित्रस्याकर्तृत्वापत्तौ तृतीयानापत्तेः। ग्रामं गमयति देवदत्तो विष्णुमित्रमित्यत्र विष्णुमित्रस्याकर्तृत्वापत्तौ ग्रामस्य गमिकर्मत्वानापत्तेश्च। तथा च ग्रामाय गमयति देवदत्तो विष्णुमित्यपि न स्यात्। "गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि" इति गत्यर्थकर्मण्येव चतुर्थीविधानात्। एतेन णिजन्ते आख्यातार्थ उभयं तदाश्रयत्वाद्देवदत्तयज्ञदत्तयोः कर्तृतेत्यपास्तम्।

किञ्च तस्मिन् प्रयोगे य आख्यातार्थ इत्यस्यावश्यकत्वेनाख्यातशून्ये देवदत्तः पक्तेत्यादौ देवदत्तस्याकर्तृत्वापत्तेरिति दिक्।

सूत्रानुपपत्तिमपि मानत्वेन प्रदर्शयन्नुक्तार्थस्य स्वोत्प्रेक्षितत्वं निरस्यति [किञ्चेति] धातुसज्ञाविधायकं "भूवादयो धातवः" इति सूत्रम्। तत्र भूश्च वाश्चेति द्वन्द्वः। आदिशब्दयोर्व्यवस्थाप्रकारवाचिनोरेकशेषः। आदिश्च आदिश्च आदी, ततो भूवौ आदी येषां ते भूवादयः। तथा च भूप्रभृतयो वासदृशा धातव इत्यर्थः। तच्च क्रियावाचकत्वेन। तथा च क्रियावाचकत्वे सति भ्वादिगणपठितत्वं धातुत्वं पर्यवसन्नम्। अत्र क्रियावाचित्वमात्रोक्तौ वर्जनादिरूपक्रियावाचके हिरुक् नानेत्यादावतिव्या"रिति भ्वादिगणपठितत्वमुक्तम्।। ।।९।।

फलमात्रं धात्वर्थः, व्यापारस्तु प्रकृतिभागे प्रत्ययभागे वा वाच्य एव नेति प्राभाकरमत इव, फलमात्रं धात्वर्थः, व्यापार आख्यातार्थ इति मण्डनमिश्रमतेऽपि घटं भावयतीतिवद् घटो भवतीत्यत्रापि द्वितीया स्यादिति दूषणापत्तिर्दुर्वारेति, तामेव दर्शयति [किञ्चेति] "किञ्च भावनाया अवाच्यत्वे घटं भावयतीत्यत्रेव घटो भवतीत्यत्रापि द्वितीया स्यात्" इत्यादि "कृञोऽकर्मकतापत्तेः" इति मूलावतरणग्रन्थं फलं धात्वर्थः, व्यापारः प्रत्ययार्थ इति मतखण्डनपरतया व्याकुर्वतां दर्पणकारादीनाम्। तेन ग्रन्थेनास्य ग्रन्थस्य पौनरुक्त्यापत्तिः कथं वार्येतेति त एव प्रष्टव्याः। प्राभाकरमताद्वैलक्षण्यं दर्शयति [तिङर्थत्वे इति]। प्राभाकरास्तु भावनायास्तिङर्थत्वमपि नेच्छन्ति। ते हि भावनायास्सङ्गर्गलभ्यत्वमभिप्रयन्ति। [धात्वर्थफलेति] व्यापारस्य धात्ववाच्यत्ववादिनो मते उत्पत्तेरेव भूधात्वर्थतया तद्रूपफलाश्रयत्वेन कर्मत्वापत्तिरित्यर्थः। ननु प्राभाकरमते कर्तृसंज्ञाया दुर्वचत्वेन तत्संज्ञया कर्मसंज्ञाया बाधायोगाद् द्वितीयाया दुर्वारत्वेऽप्यस्मन्मते व्यापारस्य प्रत्ययार्थतया तद्व्यापाराश्रयत्वरूपकर्तृसंज्ञायाः सुवचतया तया कर्मत्वबाधनान्न दोष इत्याशयेन शङ्कते [नचेति] तत्संज्ञया = कर्तृसंज्ञया। [अकर्तृत्वापत्ताविति] प्रयोज्यस्याख्यातार्थव्यापारानाश्रयत्वेनाकर्तृत्वापत्तिरित्यर्थः। [तृतीयानापत्तिः] = कर्तरि तदनापत्तिः। नच विष्णुमित्रस्याकर्तृत्वेऽपि तद्वाचकपदोत्तरं करण एव तृतीयास्त्विति वाच्यम्। तस्य पाककर्तृत्वेन भानस्यापलापापत्तेः। विष्णुमित्रस्याकर्तृत्वे देवदत्तस्याहेतुत्वापत्तौ णिचोऽनुत्पत्तिप्रसङ्गाच्च। "हेतुमिति च" ३-२-१६ इति शास्त्रेण कर्तुः प्रयोजकस्यैव हेतुसंज्ञाविधानात्। वैयाकरणमते तु णिच्प्रकृत्यर्थव्यापाराश्रयत्वेन कर्तृत्वनिर्वाहः स्पष्ट एव।

ननु णिच्समभिव्याहृताख्यातस्य व्यापारद्वयार्थकत्वं स्वीक्रियते। तेन प्रयोज्यप्रयोजकयोरुभयोरपि तदाश्रयत्वेन कर्तृत्वनिर्वाहोऽत आह [ग्रामं गमयतीति] [विष्णुमित्रस्याकर्तृत्वापत्ताविति] प्रकृतगम्यर्थव्यापारानाश्रयत्वेन गमिकर्तृत्वानापत्ताविति्यर्थः। ननु आख्यातार्थव्यापाराश्रयत्वेन कर्तृत्वं सेत्स्यतीति चेन्न। तद्व्यापारस्य गम्यर्थत्वाभावात्। ननु गम्यर्थव्यापाराश्रयत्वेनैव विष्णुमित्रस्य कर्तृत्वं वाच्यमिति कोऽयं निर्बन्धोऽत आह [ग्रामस्य गमिकर्मत्वानापत्तेश्चेति] "कर्तुरीप्सिततमं कर्म" १-४-४९ इत्यनेन प्रकृतधात्वर्थव्यापारजन्यफलाश्रयस्यैव कर्मसंज्ञाविधानेन विष्णुमित्रस्य गमिव्यापारानाश्रयत्वेनाकर्तृत्वे ग्रामस्य गमिकर्मत्वानापत्तिरित्यर्थः। ननु ग्रामस्य गमिकर्मत्वमेव स्वीकार्यमिति निर्बन्धोऽपि किमर्थोऽत आह [तथाचेति]। ग्रामस्य गमिकर्मत्वानापत्तौ चेत्यर्थः। [ग्रामाय गमयतीति] णिजर्थकर्मत्वे द्वितीयासिद्धावपि गमिकर्मत्वाभावेन ग्रामाच्चतुर्थ्यप्राप्तिर्दोषः। हेतुमाह [गत्यर्थकर्मणीति]। [चततुर्थीविधानादिति] प्राधान्येनावश्यकत्वद्योतनाय चतुर्थीग्रहणम्।

[एतेनेति] ग्रामस्य गमिकर्मत्वानिर्वाहदोषेण। णिजन्ते = तत्समभिव्याहारे। उभयं = प्रयोजकव्यापारः, प्रयोज्यव्यापारश्च। [अपास्तमिति] एवं च णिजाख्यातयोर्व्यापारद्वयार्थकत्वस्वीकारोऽपि निरुक्तदोषेण निराकृत एवेति बोध्यम्।

ननु चतुर्थीविभक्तिमन्यथा संसाध्य "गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि" २-३-११ इति सूत्रस्य भाष्ये प्रत्याख्यातत्वेन ग्रामस्य गमिकर्मत्वाभावेऽपि न दोषः। तथाहि - "किमर्थं पुनरिदमुच्यते? चतुर्थी यथा स्यात्। ....चतुर्थ्यपि सिद्धा। कथम्? संप्रदान इत्येव। न सिद्ध्यति। कर्मणा यमभिप्रैति स संप्रदान मित्युच्यते। क्रियया चासौ ग्राममभिप्रैति। कया क्रियया, ग्रमिक्रियया। क्रियाग्रहणमपि तत्र चोद्यते" इति भाष्यम्। एवं च पत्ये शेते इतिवद् ग्रामाय गमयतीति चतुर्थ्यपि सिद्ध्यतीत्यत आह [किञ्चेति]

यत्तु "णिजाख्यातान्यतरार्थव्यापाराश्रयत्वं कर्तृत्वमिति परिष्कारेण प्रयोज्यस्यापि कर्तृत्वनिर्वाहान्नेदं दूषणमत आह - किञ्चेतीति दर्पण काराः। तन्न। एवमिपि ग्रामस्य गमिकर्मत्वानुपपादनतादवस्थ्यात्। नच णिजर्थव्यापाराश्रयत्वेन कर्तुर्देवदत्तस्येप्सिततमत्वेन ग्रामस्य गमिकर्मत्वोपपत्तिरिति वाच्यम्। "कर्तुरीप्सिततममित्यनेन प्रकृतिकर्तृनिष्ठव्यापारजन्यफलाश्रयस्यैव कर्मत्वविधानात्" इति तदीयग्रन्थासङ्गत्यापत्तेः। प्रयोज्यव्यापारस्य णिजर्थत्वाभावेन तस्य कर्तृत्वानिर्वाहाच्च।

[तस्मिन् प्रयोग इति] क्वचित्प्रयोगे काष्ठादेः करणत्वं, क्वचित्प्रयोगे कर्तृत्वमिति व्यवस्थोपपत्त्यर्थं "तस्मिन् प्रयोगे" इत्याद्यावश्यकमिति भावः।

[दिगिति] तदर्थस्तु - भावनायाः प्रत्ययार्थत्वे फलप्रकारकानु कूलतासंसर्गकव्यापारविशेष्यक-शाब्दबुद्धित्वावच्छिन्नं प्रति धात्वाख्यातघटितानुपूर्व्या धातुकृद्घटितानुपूर्व्याश्च हेतुत्वं वाच्यम्। तत्र परस्परव्यभिचारवारणायाव्यवहितोत्तरत्वघटितत्वेऽनन्तकार्यकारणभावकल्पनापत्तिः। मम तु धात्वानुपूर्व्या एकस्या एव कारणत्वमिति लाघवम्। किञ्च पचतीत्यतः फूत्कारप्रतीतेः सर्वत्रापि तिङ्प्रत्ययात्तदापत्तिवारणाय तत्तद्धातुसमभिव्याहारस्य कारणताकल्पनायामतीव गौरवम्। "तद्धेतोरेव तत्त्वे किं तेन?" इति न्यायेन धातोरेव व्यापारवाचकताकल्पनायां लाघवं च। किञ्चैवं "समानकर्तृकयोः पूर्वकाले" ३-३-१५८ इति सूत्रासङ्गतिः। समानकर्तृकयोः क्रिययोः पूर्वकाल वृत्तिक्रियायां वर्तमानाद्धातोः क्त्वात्प्रत्ययः स्यादिति तदर्थः। व्यापारस्य धात्ववाच्यत्वे तदसङ्गतिः स्पष्टैवेति "किञ्च क्रिया" इत्यादि मूलमवतारयति [सूत्रानुपपत्तिरिति] मानत्वेन = व्यापारस्य धातुवाच्यत्वे प्रमाणत्वेन। [स्वोत्प्रेक्षितत्वमिति] स्वेनाभ्यूहितत्वमित्यर्थः। तथासति पाणिनीयानामनुपादेयतापत्तिरिति तात्पर्यम्। ननु भूरादिर्येषामिति विग्रहे यणापत्त्या भूवादय इति निर्देशानुपपत्तिः, किञ्च धातोः क्रियावाचित्वं न सूत्रारूढमत आह [तत्रेति] भूवादिसूत्र इत्यर्थः। तच्च = सादृश्यं च। [प्रकारवाचिनोरिति] न चात्र मानाभावः। देवदत्तादय आढ्या अभिरूपतराः पक्षवन्त इत्युक्ते देवदत्तप्रकारा इत्यर्थप्रतीतेरेव मानत्वात्। स्पष्टं चेदं भाष्ये। अत्र = धातुलक्षणे। [हिरुगिति] ननु हिरुगर्थस्य कारकान्वयितावच्छेदकधर्मवत्त्वस्याभावान्न दोषः। एवं नानाशब्दार्थेऽपीत्यत आह [आदाविति] शिश्य इति भावतिङन्त आदिशब्दो ग्राह्यः। अत्र समुदायस्य धातुत्वापत्तिर्दोषः। ।।९।।

तावन्मात्रोक्तौ चाह -

सर्वनामाव्ययादीनां यावादीनां प्रसङ्गतः।
नहि तत्पाठमात्रेण युक्तमित्याकरे स्फुटम्।। ।।१०।।

गणपठितत्वमात्रोक्तौ सर्वनामाव्ययानामपि धातुत्वं स्यात्। तथा च याः पश्यसीत्यादौ "आतो धातोः" ६-४-१४० इत्याकारलोपापत्तिः। ननु लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणान्न सर्वनाम्नो ग्रहणं, तस्य लाक्षणिकत्वादित्यत आह - वेत्यादि - अव्यये 'वा' इत्यादावतिप्रसङ्गः। तादृशस्यैव गणे पाठेन निर्णयासम्भवात्। तथा च विकल्पार्थको वातीति प्रयोगः स्यादिति भावः। न च गति गन्धनार्थनिर्देशो नियामकः। तस्य "अर्थानादेशनात्" इति भाष्यपर्यालोचनयाऽऽधुनिकत्वलाभात्।। ।।१०।।

[तावन्मात्रोक्ताविति] भ्वादिगणपठितत्वमात्रोक्तावित्यर्थः। नचैवं भूवादिसूत्रे वाग्रहणं व्यर्थं स्यादिति वाच्यम्। "भूवादीनां वाकारोऽयं मङ्गलार्थः" इति वार्त्तिककारैस्तत्फलस्योक्तत्वात्।

[लोपापत्तिरिति] नच धातुत्वेनाप्रातिपदिकत्वा द्विभक्त्यनुत्पत्तिरेव कुतो नापादितेति वाच्यम्। यच्छब्दस्य गणे पाठाभावेन धातुसंज्ञाया अप्राप्यया विभक्तिप्रवृत्तेरव्याघातात्। विभक्त्युत्पत्त्यनन्तरं त्यदाद्यत्वे स्त्रियामन्तरङ्गत्वाट्टापि निष्पन्नस्य "या+अस्" इत्यत्र घटकस्य गणपठितत्वाविशेषाद्धातुत्वे "आतो धातोः" ६-४-१४० इत्याकारलोपापत्तिः। या इत्यस्य द्वितीयान्तत्वसूचनाय "पश्यसि" इत्युपात्तम्। [न सर्वनाम्नो ग्रहणमिति] निरुक्तरीत्या 'यद्' इत्यस्मात् 'या' इत्यस्य निष्पत्त्या लाक्षणिकत्वान्न धातुत्वम्। प्रापणार्थकस्य या इत्यस्य प्रतिपदोक्तत्वेन तस्यैव धातुत्वम्। परिभाषायां लक्षणशब्दो लाक्षणिकपरः, उपचारात्। प्रतिपदोक्तत्वं च स्वीयोद्देश्यतावच्छेदकज्ञानायोपयुज्यमानानुपूर्वीमत्पदघटित-शास्त्रविधेयत्वरूपम्। ततोऽन्यत्वं च लाक्षणिकत्वम्। ननु "निपातस्यनर्थकस्य प्रातिपदिकत्वम्" इति वार्त्तिकमनर्थकपदरहितं पाठ्यताम्। तथाच तेनैव वेत्यस्य प्रातिपदिकत्वं सिद्ध्यत्येवेत्यत आह मूले [आदीति] तेन दिवित्यव्युत्पन्नस्य धातुत्वापत्तिर्दोषो बोद्धव्यः। तथाचाधातुरिति प्रतिषेधात्प्रातिपदिकत्वानापत्तिः। न च त्रसिगृधिधृषिक्षिपेः क्रुः" ३-१-२४० इति विहितस्य क्रुप्रत्ययस्य धातुत्वापत्तिरेव कुतो न दत्ता? नचेष्टापत्तिः। "अचि श्नुधातुभ्रुवाम्" ६-४-७७ इत्यादिनोवङापत्तेरिति वाच्यम्। तत्सूत्रे श्नुप्रत्ययग्रहणेन प्रत्ययस्य नोवङादेशः इति ज्ञापनात्। [प्रयोगः स्यादिति] यदि तु भावनाबोधकादेव लादयो भवन्ति प्रकृते, सत्यपि धातुत्वे वाशब्दात्तादृशभावनाया अभानान्न लादय इति विभाव्यते तदा वाशब्दस्य धातुत्वेऽधातुरिति प्रतिषेधात्प्रातिपदिकत्वाभावेन सुबनापत्तिर्दोषः। अत एव भाष्ये "धातोरिति तव्यदादयः प्रसज्यन्ते" इत्याशङ्क्य "तव्यदादयस्साधने विधीयन्ते। साधनं च क्रियायाः, क्रियाऽभावात्साधनाभावः, साधनाभावात्सत्यामपि धातुसंज्ञायां बाह्यक्रियापेक्षे कर्मणि द्वितीया भवति। एवं तव्यदादयोऽपि स्युः" इति पूर्वपक्षाशयम् "अन्तरङ्गधातुवाच्यक्रियापक्षे साधने तव्यदादयः सावकाशा बाह्यक्रियापेक्षे साधने नोत्पद्यन्ते" इत्युभयपक्षाशयं च कैयट आहेति बोध्यम्।

[गतिगन्धनेति] "वा गतिगन्धनयोः" इति धातुपाठेऽर्थनिर्देशस्य तदर्थकवाशब्दस्यैव धातुसंज्ञायां नियामकत्वाश्रयणेन विकल्पार्थकस्य वाशब्दस्य न तत्त्वमिति भावः। समाधत्ते [तस्येति] अर्थनिर्देशस्येत्यर्थः। [अर्थानादेशनादिति] अर्थस्याकथनादित्यर्थः। इदं भाष्यं समर्थसूत्रस्थम्। यथा "अचतुरविचतुर" ५-४-७७ इत्यादौ। "अनेकमन्यपदार्थे" २-१-२४ "चार्थे द्वन्द्वः" २-१-२९

इत्यादौ लाघवेनान्वाख्यानाय निमित्तत्वेनार्था गृह्यन्ते। चार्थे यः स द्वन्द्वः, अन्यपदार्थे यः स बहुव्रीहिरिति। तत्र हि भाष्ये "को हि नाम समर्थो धातुप्रातिपदिकप्रत्ययनिपातानामर्थानादेष्टुम्" मित्या दिना महता प्रबन्धेन शास्त्रेऽर्थानादेशनं समर्थितम्। [आधुनिकत्वलाभादिति] भीमसेनादयो ह्यर्थं निदिदिशुः। पाणिनिस्तु भ्वेधस्पर्ध - इत्याद्येवापाठीदित्यैतिह्यम्। किञ्चाभियुक्तैरपि कृतोऽर्थनिर्देशो नार्थान्तरनिवृत्तिपरः, सुखमनुभवतीत्यादौ भ्वादीनां धातुत्वानापत्तेः - यदाहुः

क्रियावाचित्वमाख्यातुमेकैकोऽर्थः प्रदर्श्यते।
प्रयोगतोऽनुसर्तव्या अनेकार्था हि धातवः।। इति।

अत एव खुर्द गुर्द गुद क्रीडायामेवेत्येवकारः पठ्यते। "श्लिष आलिङ्गने" ३-१-४६ इत्यादीनि सूत्राण्यपीह ज्ञापकानि। तस्माद् 'वा' इत्यस्य निपातस्य धातुत्वापत्तिवारणाय धातुलक्षणे क्रियावाचकत्वे सतीत्यावश्यकम्। एवं च व्यापारस्य धात्ववाच्यत्वे पचादीनां तद्वाचित्वनिबन्धनं धातुत्वं मण्डनमते न सिद्ध्येत्। अतो भूवादिसूत्रमेवास्माकमनुकूलस्तर्क इति भावः।। ।।१०।।

नन्वस्तु क्रियावाचकत्वे सति गणपठितत्वं धातुत्वम्, क्रिया च धात्वर्थ एव, न व्यापार इत्याशङ्क्य समाधत्ते -

धात्वर्थत्वं क्रियात्वं चेद्धातुत्वं च क्रियार्थता।
अन्योन्यसंश्रयः स्पष्टस्तस्मादस्तु यथाकरम्।।११।।

यदि क्रियात्वं धात्वर्थत्वमेव तर्हि धातुत्वग्रहे तदर्थत्वरूपक्रियात्वग्रहः, क्रियात्वग्रहे तदवच्छिन्नवाचकत्वघटितधातुत्वग्रह इत्यन्योन्याश्रय इति ग्रहपदं पूरयित्वा व्याख्येयम्। यथाश्रुते चान्योन्याश्रयस्योत्पत्तौ ज्ञप्तौ वा प्रतिबन्धकत्वाभ्युपगमेनासङ्गत्यापत्तेः। न चान्यतमत्वं धातुत्वम्, "भूवादयः" इत्यस्य वैयर्थ्यापत्तेरित्यभिप्रेत्याह [अस्त्विति] व्यापारसन्तानः क्रिया। तद्वाचकत्वे सति गणपठितत्वमित्यर्थः। ननु सत्तादीन् फलांशानन्यतमत्वेनादाय तद्वाचकत्वे सति गणपठितत्वं लक्षणमुच्यताम्। धात्वर्थत्वात्तेषां क्रियाशब्देन व्यवहारो भाष्यादौ कृतोऽप्युपपत्स्यत इति चेन्ना अन्यतममध्ये विकल्पयतीति प्रयोगानुसारात् प्रवेशावश्यकत्वेन तदर्थके (वा) इत्यव्यये उक्तरीत्या गणपठितत्व-सत्त्वेनातिव्याप्तेरिति।। ।।११।।

[नन्विति] अयमाशयः - धात्वर्थः फलमात्रमेव। धातुलक्षणं क्रियावाचकत्वे सति भ्वादिगणपठितत्वमित्येवास्तु। परं तु क्रियत इति क्रियेति व्युत्पत्त्या क्रियाशब्देन फलमभिधीयते।

नतु त्वदभिमतो व्यापारः। सतु तिङर्थ एव। एवं च फलस्यापि क्रियारूपत्वेन तन्मात्रवाचिनामपि पचादीनां क्रियावाचित्वनिबन्धनधातुसंज्ञाया निराबाधतया न तदनुरोधेन धातूनां व्यापारवाचकतासिद्धिरिति। [क्रिया चेति]। धातुलक्षणघटकक्रिया चेत्यर्थः। [धात्वर्थ एवेति] क्रियते = निष्पाद्यत इत्यर्थकक्रियाशब्देन धात्वर्थफलमेवाभिधीयत इत्याशयः। तदाह [न व्यापार इति]। धातुलक्षणनिविष्टा क्रिया न व्यापार इत्यर्थः। आशङ्कां = मण्डनमतानुयायिनामाशङ्काम्। धातुत्वग्रहे = धातुत्वज्ञाने। [तदर्थेति] धात्वर्थेत्यर्थः। [तदविच्छिन्नेति] क्रियात्वावच्छिन्नेत्यर्थः। ग्रहपदपूरणेन व्याख्याने बीजमाह [यथाश्रुत इति]। [ज्ञप्तौवेति] वाशब्दश्चार्थे। अन्योन्याश्रयस्य परस्परस्मादुत्पत्तौ ग्रहे च प्रतिबन्धकत्वमभ्युपेयते। नहि देवदत्तयज्ञदत्तयोः परस्परमादुत्पत्तिस्सम्भवति। नवा इत्पदार्थहल्पदार्थज्ञानयोः परस्परं कारणत्वमुपपद्यते। कार्याव्यवहितपूर्ववर्तिन एव कारणत्वेनोभयत्र तत्त्वासम्भव एव तस्य दूषकताबीजम्। [असङ्गत्यापत्तेरिति] क्रियात्वस्य क्रियात्वावच्छिन्नवाचकताघटितधातुत्वस्य च स्थितौ न कश्चिद्दोषः। नहि देवदत्तयज्ञदत्तयोः स्थितौ दोषः इति यथाश्रुतेऽन्योन्याश्रयदोषप्रदर्शनासङ्गतेरित्यर्थः। [नचेति] धात्वर्थः क्रियेत्यत्र निविष्टं धातुत्वं न क्रियावाचकताघटितं येनान्योन्याश्रयः स्यात्। किन्तु यावन्तो धातुपदव्यवहार्यास्तावदन्यतमत्वं तत्त्वम्। अतो नान्योन्याश्रय इति भावः। समाधत्ते [भूवादय इत्यस्येति]। [वैयर्थ्यापत्तेरिति] तादृशधातुत्वावच्छिन्नमादायैव लडाद्युत्पत्त्युपपत्तौ भूवादिसूत्रस्य वैयर्थ्यापत्तेरित्यर्थः। ननु त्वन्मतेऽपि क्रिया धात्वर्थ इत्यविवादम्। तथाच क्रियावाचको धातुः। धात्वर्थश्च क्रियेपि तद्विषयकज्ञानयोः परस्पराश्रयस्तदवस्थ एवेत्यत आह [व्यापारसन्तानः क्रियेति]। [इत्यर्थ इति] अतो नान्योन्याश्रय इति भावः। अस्मन्मतेऽपि नान्योन्याश्रय इत्याशङ्कते [नन्विति] अन्यतमत्वेन = तद्भिन्नभिन्नत्वरूपेणेत्यर्थः। तद्वाचकत्वे सति = सत्ताद्यन्यतमफलवाचकत्वे सति। एवं लक्षणेऽन्योन्याश्रयो न, नापि भूवादिसूत्रवैयर्थ्यमिति भावः। [लक्षणमिति] भूवादिसूत्रजन्यवाक्यार्थबोधरूपं लक्षणमित्यर्थः। नन्वेवं धात्वर्थस्य क्रियात्वेन व्यवहारो भाष्यकारादीनामनुपपन्नः स्यादत आह [धात्वर्थत्वादिति]। तेषां = फलानाम्। [भाष्येति] भूवादिसूत्र इत्यर्थः। आदिना वृत्त्यादिसङ्ग्रहः। [उपपत्स्यत इति] क्रियत इति क्रियेति व्युत्पत्त्या क्रियाशब्देन फलस्यापि ग्रहणेन तद्व्यवहारोपपत्तिरित्यर्थः। "गौणो व्यवहार इत्याशयः" इति काशिकोक्तं तु न युक्तम्। तन्मते फलस्यैव धात्वर्थतया तदतिरिक्तमुख्यार्थाभावेन तस्य तत्त्वे मानाभावात्। तदर्थके = विकल्पार्थके उद्देश्यतावच्छेदकावच्छेदेन पाक्षिकसमभिव्याहृतार्थप्रतियोगिकाभावो विकल्पः। यथा 'दीर्घात्' ६-१-७५ 'पदान्ताद्वा ६-१-७६' इत्यादिः। उक्तरीत्या = तादृशस्यैव गणे पाठेन निर्णयासम्भवादित्युक्तरीत्यातिव्याप्तेः = धातुलक्षणस्यातिव्याप्तेः।

इयं च कारिका "केचित्तु" इत्यादिना भूषणे प्रकारान्तरेण व्याख्याता। तथाहि - मीमांसको वैयाकरणं प्रति दोषमाह - धात्वर्थत्वमिति। धात्वर्थत्वं क्रियात्वं यदि ब्रूयास्तदाऽन्योन्याश्रयः स्पष्ट इत्यर्थः। तस्मादिति - आख्यातार्थः क्रियेत्यध्याहारः। एनं मीमांसकानामाक्षेपं वैयाकरणः समाधत्ते - अस्तु यथाकरम्" इति। व्यापारसन्तानः क्रिया। तद्वाचको धातुरित्यर्थः। तथाच नान्योन्याश्रयः" इति। वस्तुतस्तु न क्रियावाचकत्वे सति गणपठितत्वं लडादिप्रयोजकम्। क्रियात्वस्यैकस्याभावेनाननुगमात्। किन्तुसंज्ञाविशेषः। संज्ञाशब्दानां जातिवाचित्वपक्षे जातिविशेषो वा तन्नियामकः। भूवादिसूत्रं च तत्परिचायकम्। तत्रोक्ताग्रिमकारिकाभिः परिचायकस्याव्याप्त्यतिव्याप्ती विचार्येते। तत्रापि क्रियाशब्दस्य साध्यत्वेनाभिधीयानव्यापार एव साङ्केतिकशक्तेः स एव सूत्रे वाशब्दसूचनया गृह्यत इति न सूत्रं धातोः क्रियार्थत्वसाधनायाभिहितम्। किन्तूक्तयुक्तिभिः साधितार्थस्य स्वोत्प्रेक्षितत्वनिराससूचनायेति तत्त्वम्। "सूत्रानुपपत्तिमपि मानत्वेन प्रदर्शयन् उक्तार्थस्य स्वोत्प्रेक्षितत्वं निरस्यति" इत्यवतरणेन चैतमर्थं प्रकृतग्रन्थेऽपि सूचयतीति बोध्यम्।

नन्वस्यैव धातुत्वे अस्तीत्यादौ क्रियाप्रतीत्यभावादस्त्यादीनां तदवाचकानामधातुत्वप्रसङ्ग इत्यत आह -

अस्त्यादावपि धर्म्यंशे भाव्येऽस्त्येव हि भावना।
अन्यत्राशेषभावात्तु सा तथा न प्रकाशते।। ।।१२।।

अस्त्यादौ = अस भुवीत्यादौ। धर्म्यंशे = धर्मिभागे। भाव्ये = भाव्यत्वेन विवक्षिते। अस्त्येव = प्रतीयत एव। अयमर्थः - "स ततो गतो वा वा?" इति प्रश्ने महता प्रयत्नेन 'अस्ती' ति प्रयोगे सत्तारूपफलानुकूला भावना प्रतीयत एव। उत्पत्त्यादिबोधने तु सुतराम्।

"रोहितो लोहितादासीद् धुन्धुस्तस्य सुतोऽभवत्" इत्यादिदर्शनात्। किञ्चात्र भावनाविरहे लडादिव्यवस्था न स्यात्। तस्या एव वर्तमानत्वादिविवक्षाया तद्विधानात्।

"क्रियाभेदाय कालस्तु सङ्ख्या सर्वस्य भेदिका" इति वाक्यपदीयात् - इति।

नन्वेवमस्तीत्यत्र स्पष्टं कुतो न बुद्ध्यत इत्यत आह [अन्यत्रेति] अशेषभावात् = भावनायाः फलसमानाधिकरणत्वात्। तथा च भावनायाः फलसामानाधिकरण्यं तत्स्पष्टत्वे दोष इति भावः।

नन्वेवं किं करोतीति प्रश्ने पचतीत्युत्तरस्येवास्तीत्युत्तरमपि स्यादिति चेदिष्टापत्तेः। आसन्नविनाशं कञ्चिदुद्दिश्य किं करोतीति प्रश्ने पचतीत्युत्तरस्येव अस्तीत्युत्तरस्य सर्वसम्मतत्वात्। इतरत्र तु सुस्थतया निश्चिते किं करोतीति प्रश्नः पाकादिविशेषगोचर एवेत्यवधारणादस्तीति नोत्तरमिति।। ।।१२।।

भावनाया धातुवाच्यत्वमभ्युपगच्छतां वैयाकरणानां मते मीमांसकैरुद्भावितं दोषान्तरमुद्धर्तुमुत्तरग्रन्थमवतारयति [नन्विति]। [अस्यैवेति] क्रियावाचकस्यैवेत्यर्थः। धातुत्वे = धातुसंज्ञायाम्। इत्यादावित्यादिपदेन भवतिविद्यतीत्यादीनां ग्रहणम्। [प्रतीत्यभावादिति] अस्तीत्यादितस्तत्तत्कालसम्बन्धरूपसत्ताया एव प्रतीतिः, नतु क्रियायाः। अत एव किं करोतीति प्रश्ने पचतीत्यादिवदस्तीति नोतरम्। एवं चाकर्मकाणां फलमात्रवाचिनां भवदुक्तरीत्या धातुत्वानापत्तिरिति तात्पर्यम्। तदाह [तदवाचकानामिति] क्रियाया अवाचकानामित्यर्थः। [अधातुत्वप्रसङ्ग इति] अत एव "क्रियावचनो धातुः" इति न्यासे "अस्ति भवति विद्यतीनां धातुसंज्ञा वक्तव्या" इति भूवादिसूत्रे भाष्य उक्तम्।

मूले - अस्त्यादावित्यत्र विभक्त्यन्तप्रतिरूपकाव्ययस्य ग्रहणं स्यादिति भ्रमवारणाय तद्व्याचष्टे [अस्त्यादौ = अस् भुवीत्यादाविति] धर्म्यंश इत्यत्र अंशशब्दो भागपर इति व्याचष्टे [धर्मिभाग इति] फल इत्यर्थः। धर्मः = फलं, तदस्यास्तीति धर्मी मत्वर्थीय इनिः, कर्तेत्यर्थः, अकर्मकधातुस्थले फलरूपधावर्त्थाश्रयस्यैव कर्तृत्वात्। तथा च धर्मिणि = कर्तरि। भागे =प्रकारतया भासमानेऽर्थे फल इति यावत्, धर्मिणो धर्मघटितत्वेन फले धर्म्यंशव्यवहारः। फलस्य भाव्यत्वमेव कथम्? विवादग्रस्तत्वादत आह - [भाव्यत्वेन विवक्षित इति] साध्यत्वेन विवक्षित इत्यर्थः। सर्वोऽपि यः कश्चित्पदार्थो भाव्यत्वेन विवक्षितः स क्रियारूपो भवति। यथा पुत्रमिच्छति = पुत्रीयति। कविरिवाचरति = कवयति। न इवाचरति = नतीत्यादौ। अत्र च शब्दशक्तिस्वभाव एव बीजम्। अत एव प्रकृत्यर्थस्यापि साध्यत्वेन भानात् व्याकरणस्य सूत्रं करोतीति वाक्ये सम्बन्धेनान्वितस्यापि व्याकरणस्य "व्याकरणं सूत्रयति" इत्यादौ कर्मत्वम्। अत्र च "हेतुमति च" ३-१-२६ इति सूत्रस्थं भाष्यं प्रमाणम्। तत्र हि "इह व्याकरणस्य सूत्रं करोतीति वाक्ये षष्ठी, व्याकरणं सूत्रयतीति वृत्तौ द्वितीया, केनैतदेवं भवति? योऽसौ सूत्रव्याकरणयोरभि सम्बन्धः, स उत्पन्ने प्रत्यये निवर्तते। अस्ति च करोतेर्व्याकरणेन सामर्थ्यम्" इत्युक्तम्। एवं स्थिते धातुत्वेनाभिमतानामस्त्यादीनां फलभागस्य सत्तादेर्भाव्यत्वेन विवक्षायां क्रियात्वस्वीकारे बाधकाभावः स्पष्ट एवेति बोध्यम्। [प्रतीयत एवेति] तथा च क्रियावाचित्वमव्याहतमिति

भावः। एतदेव स्पष्टयति - [अयमर्थ इति] अयमभिप्राय इत्यर्थः। [इति प्रश्न इति] अनेन भाव्यजिज्ञासा ध्वनिता। [भावना प्रतीयत एवेति] सा च जिज्ञासा भाव्यस्य बोधेनैव निवर्तन इति भावना प्रतीयत एवेत्यर्थः। [उत्पत्त्यादीति] आदिपदेन पराभवादेर्ग्रहणम्। उत्पत्त्यर्थकत्वे मानं दर्शयति [रोहित इति] वाल्मीकिरामायणे बालकाण्डे सीताविवाहसमये राजवंशवर्णनमिदम्। "नान्तरेण क्रियां भूतभविष्यद्वर्तमानकाला व्यज्यन्ते। अस्त्यादिभिरपि भूतभविष्यद्वर्तमानकाला व्यज्यन्ते" इति पूर्वोक्तशङ्कासमाधानपरभूवादिसूत्रस्थभाष्यार्थमभिसन्धायाह [किञ्चेति] अत्र = अस्त्यादौ। भावनाविरहे = भावनाया अभाने लडादिव्यवस्था = वर्तमाने लट्, भूते लुङ्, भविष्यति लृडित्यादिकालविशेषबोधक-प्रत्ययव्यवस्था। ननु फलस्य वर्तमानत्वादिविवक्षया तद्वचवस्थोपपत्तिरत आह [तस्या एवेति] क्रियाया एवेत्यर्थः। एवशब्देन फलव्यवच्छेदः। फले कालान्वये दोषाणां प्राक् प्रतिपादितत्वेन तत्र न तदन्वय इति भावः। [तद्विधानादिति] घट इत्युक्ते कालानवगमेन अस्ति, भविष्यति, अभूदित्युक्ते कालविशेषावगमेन च साध्यस्यैवार्थस्य कालेन योगादस्तीत्यादीनां तद्योग्यक्रयावाचित्वमवसेयम्। नचाख्यातार्थव्यापारमादाय तद्वचवस्थोपपत्तिरिति वाच्यम्। वर्तमाने लडित्यादिविधिविधेयप्रत्ययार्थस्य स्वोद्देश्यतावच्छेदककोटौ निवेशासम्भवादिति भावः। निरुक्तभूवादिसूत्रस्थभाष्यार्थप्रतिपादिकां हरिकारिकामाह - [क्रियाभेदायेति] क्रियापरिच्छेदायेत्यर्थः। (वाक्य ३ काण्डे ९ कालसमुद्देशे २) कालस्य क्रियामात्रपरिच्छेदकत्वा दिति भावः। प्रसङ्गादुक्तं "सङ्ख्या सर्वस्य भेदिका" इति, भेदिका = परिच्छेदिका। "दिष्टिप्रस्थसुवर्णादि मूर्तभेदाय कल्पते" इति एतत्पूर्वार्धम्। दिष्टिप्रस्थादिकं मूर्तिमद्वस्तुपरिच्छेदकं परिमाणम्। अमूर्तक्रियायास्तु कालः परिच्छेदकः प्रमाणम्। द्वौ घटौ, द्वे क्रिये, द्वौ हस्तौ, चत्वारः प्रस्थाः इति तदाशयः। [वाक्यपदीयादिति] इदं च पूर्वोक्तभूवादिसूत्रस्थभाष्यव्याख्यानरूपम्।

कारिकोत्तरार्थमवतारयति [नन्वेवमिति] अस्त्यादीनां क्रियावाचित्वाभ्युपगम इत्यर्थः। [कुतो न बुद्ध्यत इति] एवं च बोधाविषयत्वात्तस्या धात्ववाच्यत्वमेव स्यादित्याशयः। स्पष्टमनवबोधे भावनायाः फलसमानाधिकरण्यं हेतुः, न त्ववाच्यत्वमित्युत्तरयति [अन्यत्रेतीति] अन्यत्र = अकर्मकधातौ। "कारिकायामशेषभावादिति पदं भावप्रधननिर्देशपरमित्याशयेनाह [फलसमानाधिकरणत्वादिति] अनेन सामानाधिकरण्याभावेन सकर्मकधातौ भावनायाः स्पष्टं भानेन, तत्र धातोस्तद्वाचिताया निरपवादत्वेन, अकर्मकस्थले तदभाने प्रतिबन्धकान्तरमन्यदस्तीति लाभेन। सामानाधिकरण्यमेव प्रतिबन्धकं कल्प्यत इति सूचयति। अशेषभावादित्यनेन फलसमानाधिकरणत्वादित्यर्थलाभः कथमिति चेदित्थम् -

भवत्यस्मिन्निति व्युत्पत्त्या भावशब्दोऽधिकरणघञन्तोऽधिकरणवाची, शेषः = फलव्याप्त्यतिरिक्तः = फलानधिकरणम्। एवं च शेषः = फलानधिकरणं, भावः = अधिकरणं यस्यास्सा - शेषभावा = फलासमानाधिकरणा, सा न भवतीत्यशेषभावा = फलसमानाधिकरणा। तथाच अशेषभावादित्यस्य भावप्रधाननिर्देशेन फलसमानाधिकरणत्वादित्यर्थः। यद्वा भावशब्दो भावघञन्तो भवनार्थकः, अशेषण = कात्स्न्येन, भावः = भवनं, अशेषभावः - तस्मात्, अशेषभावात्। भावनायाः फलेन सहान्यूनानतिरिक्तवृत्तित्वादिति यावत्। एवं प्रकृतार्थलाभः स्पष्ट एव। न च फलसमानाधिकरण्यस्य सकर्मकगम्यादिधात्वर्थस्थलेऽपि सत्त्वात्तत्रापि भावनाप्रतीतिर्नस्यादिति वाच्यम्। भावनानधिकरणावृत्तिफलसामानाधिकरण्यं भावनानिष्ठं स्वरूपतो भावनाप्रतिबन्धकं, न तु तज्ज्ञानापेक्षया। तथाच गम्यादिस्थले संयोगस्य भावनानधिकरणग्रामवृत्तित्वान्न तत्समानाधिकरण्यं भावनाप्रतीतिं स्थगयतीत्यदोषात्। तत्स्पष्टत्वे = भावनाप्रतीतेः स्पष्टत्वे स्पष्टत्वं च प्रतीतौ फलप्रतीत्यनभिभूतत्वम्।

किं करोतीति प्रश्ने पचतीतिवदस्तीति प्रतिवचनाभावादस्त्यादीनां न क्रियावाचित्वमिति भूवादिसूत्रस्थपूर्वपक्षाभिप्रायेण शङ्कते [नन्विति]। एवम् = अकर्मकाणामपि व्यापारार्थकत्वे। [उत्तरमपि स्यादिति] तदभावादस्त्यादेर्न क्रियावाचित्वमिति भावः। इत्युत्तरमित्यत्र इति = इत्यस्य, उत्तरम् = उत्तरत्वमित्यर्थः कार्यः। दृष्टान्तानुरोधात्। "अथवा नान्यत्पृष्टे नान्यादाख्येयम्। तेन न भविष्यति - किं करोति? अस्तीति" इति तत्समाधानपरभाष्यमवलम्ब्योत्तरयति [इष्टापत्तेरिति] तदेव विवृणोति [आसन्नविनाशमिति] नन्वेवमन्यत्रापि किं करोतीति प्रश्नेऽस्तीति कुतो नोत्तरमत आह [इतरत्रत्विति]। [नोत्तरमिति] निर्ज्ञातायां सत्तायां किं करोतीति प्रश्नासम्भवादस्तीति प्रतिवचनाभावः, नतु क्रियात्वाभावादिति बोद्धव्यम्। किञ्च व्यत्यनुषते इत्यत्र "कर्तरि कर्मव्यतिहारे" १-३-१४ इत्यात्मनेपददर्शनात्तस्य क्रियावाचकत्वम्। कर्मव्यतिहारश्च तत्र क्रिया व्यतिव्याहार इति "उपसर्गप्रादुर्भ्याम्" ८-३-८७ इत्यादिसूत्रे भाष्ये स्पष्टम्।

अत्रेदं बोद्धव्यम्। "अस्त्यादावपि" इत्यादिकारिका न दीक्षितस्य कृतिः, किन्त्वियं भावार्थाधिकरणे भट्टपादानां कृतिः। एवं च भट्टकारिका दीक्षितेन स्वग्रन्थे ग्रथितेत्यवम्यते। अस्त्यादीनां क्रियावाचित्वं प्रकृते साधनीयम्। तच्च भट्टैर्विचारितम्। तथाहि - भावार्थाधिकरणे धातूत्तरवर्तिन आख्यातस्य धात्वर्थव्यतिरिक्तभावनावाचित्वं व्यवस्थापितम्। यद्यपि सा भावना धात्वर्थः, उत प्रत्ययार्थ इति मीमांसासूत्रभाष्यकाराभ्यां विचार्य न निरूपितम्। यजेत दद्यादित्यादिसमुदायाद्भावनाप्रतीतिरित्येव ताभ्यामुररीकृतम्। तथापि शास्त्रे तावद्भावनायाः प्रत्ययार्थत्वव्यवहार एव। प्रत्ययश्रुतिवेलायां

भावनात्माऽवगम्यते। अत एव तस्याः सर्वात्मना प्राधान्यसिद्धिः। प्रत्ययार्थः प्रधानमिति न्यायात्। एवं च यत्र भावना प्रतीयते तत्र तस्याः प्रत्ययवाच्यत्वमेवोचितम्, नतु धातुवाच्यत्वम्। यत्र तु आख्यातान्न भावनाप्रतीतिः यथा भवति, अस्ति, विद्यत इत्यादौ, तत्रायं विचार एव नास्ति। एवञ्चाऽस्त्यादिपराख्यातस्य भावनावाचित्वं नास्त्येवेति भट्टपादैः सिद्धान्तितम्। अनन्तरम्।

अस्त्यादावपि कर्त्रंशे भाव्येऽस्त्येव हि भावना।
अन्यत्राऽशेषभावात्तु सा तथा न प्रकाशते।।

इति कारिकया प्रौढ्या भट्टपादैरस्त्याद्युत्तराख्यातस्यापि भावनावाचित्वं प्रतिपादितम्। अयमाशयः। घटो भवतीत्यादावपि मृदादय एव घटादिरूपेण परिणमन्ते। तत्र पूर्वापरीभूतस्य घटस्य कर्तुरनेकेऽवयवा अनुभूयमाना दृश्यन्ते। तत्र पूर्वपूर्वावयवाभावका उत्तर उत्तरेऽवयवा भाव्याश्च भवन्ति। एवं च भाव्यभावकसम्बन्धाद्भावना प्रतीयत एव। कमित्याकाङ्क्षायामन्यस्याभावा'वनमित्येव सम्बध्यते। केनेति करणाकाङ्क्षायां स्वभवनमिति सम्बन्ध्यते। कथंभावाकाङ्क्षायां पूर्वापरीभूतावयवोत्पत्तिः सम्बध्यते। कारिकायामंशशब्दोऽवयवपरः। भाव्य इति तद्विशेषणम्। अन्यत्रेत्यस्य कर्तुरुत्तरावयवेष्वित्यर्थः। अशेषभावादित्यस्य कर्तुः पूर्वावयवैर्भेदानवगमादित्यर्थः। तथाच घटो भवतीत्यादौ कर्तुर्घटस्य योंऽशः = अवयवो भाव्यः, तत्र कर्त्रंशमवयवं प्रति भावनाऽस्त्येव। नन्वेवं करोतिना सामानाधिकरण्यं भवत्यादेः कुतो नेत्यत उत्तरार्धमाह [अन्यत्रेति] कर्तुरन्यत्रावयवेष्वशेषभावात् = अन्यावयवैर्भेदानवगमात्। सा = भावना। तथा = करोत्यादिवत्। न प्रकाशते = स्पष्टं न प्रतीयते। यद्यपि पूर्वेऽवयवाः परानवयवान् कुर्वन्तीति करोत्यर्थः प्रतीयत एव। तथापि स्पष्टं न प्रतीयते - इति। अत इयं भट्टपादानां भावार्थाधिकरणे कारिका। अत एव दीक्षिताः -

"अपरेऽप्याहुः - अस्त्यादावपि .... भावना .... सा तथा च प्रकाशते" इतीति भूवादिसूत्रे कौस्तुभे प्राहुः।

भट्टकारिकायाः स्वग्रन्थे ग्रथने दीक्षितानामयमाशयः - कारिकायाः कर्तृपदघटितत्वे घटो भवतीत्यादौ प्रथमभावविकारे कर्तुर्घटस्यांशकल्पनया निर्वाहेऽपि घटोऽस्तीत्यादौ द्वितीयभावविकारे कर्तुर्घटस्यांशकल्पनाऽयोगा त्सत्ताया अकर्तृत्वात् कर्तृपदं प्रकृतार्थसाधकं न स्यात्। अतः कारिकायां कर्तृपदं धर्मिण उपलक्षणमिति व्याख्येयम्। आद्ये धर्मी घटः, द्वितीये सत्ता। तेन सत्ताया अकर्तृत्वेऽपि न क्षतिः। अतः कारिका कर्तृपदपरित्यागेन तत्स्थाने धर्मपदनिवेशनेन कार्या। किञ्च प्रौढवादेनैव अस्त्यादौ भावनाप्रतीर्न समर्थनीया। किन्तु सिद्धान्तमार्गेणापीत्याशयेन दीक्षितैस्सिद्धान्तऋजुमार्गे सा

कारिका निबद्धा। किञ्चास्त्यादौ भावना न प्रतीयत एवेति भाट्टी रीतिर्नयुक्ता। तदप्रतीतौ तिङ एवानुत्पत्त्यापत्तेः। भावनाया एव तत्तत्कालवृत्तित्वे तद्विधानात्। एतेन "यत्र भावना प्रतीयते, तत्रैव भावनायाः प्रत्ययवाच्यत्वमुत प्रकृतिवाच्यत्वमिति विचारः नान्यत्र। यथा अस्त्यादादौ इति तदीयसिद्धान्तोऽपि परास्तः।

किञ्च प्रौढ्याऽस्त्याद्युत्तराख्यातस्य भावनाभिधायित्वे या कारिका प्रोक्ता, सैवास्त्यादिधातूनामेव भावनावाचित्वसाधिका स्यात्। साप्यस्मन्मते समन्वेतुं सुशकैव। तदुक्तार्थिका तु न सा कारिकेत्याशयेन दीक्षितैः सा कारिका स्वग्रन्थे सङ्ग्रथिता।

न च "अस्त्यादावपि" इत्यादिकारिका भट्टैः सिद्धान्तरीत्यैवोक्तेति वाच्यम्। "प्रौढ्याऽस्त्याद्युत्तराख्यातस्य भावनाबोधनायाह" इति भट्टकारिकाग्रन्थस्य न्यायसुधायां भट्टसोमेश्वरेणावतारितत्वात्। किञ्च वाक्यार्थविचारार्थमेव मीमांसाशास्त्रस्य प्रवृत्त्या पदार्थविचारस्य तत्रानुचितत्वात्पदार्थविचारप्रवृत्तव्याकरणशास्त्रनिर्णीतपदार्थस्यान्यथाकरणे भट्टानां प्रौढेरेव निमित्तत्वाच्च। तं विनापि जैमिनिवाक्यार्थानुपपत्त्यभावाच्च। इत्थं हि भावार्थाधिकरणे जैमिनीयं सूत्रं "भावार्था कर्मशब्दास्तेभ्यः क्रिया प्रतीयेतैष ह्यर्थो विधीयते" इति। कर्मशब्दाः = यजेत, दद्यात् जुहुयादित्यादयः। ते भावार्थाः = प्राधान्येन क्रियार्थाः। "क्रियाप्रधानमाख्यातम्" "भावप्रधानमाख्यातम्" इति स्मृतेः। अतस्तेभ्यः क्रियाप्राधान्येन प्रतीयेत हि, प्राधान्यादेव, एषोऽर्थः = क्रियारूपः। सर्वत्र विधीयते, न नामार्थः। तस्याश्च शीघ्रनाशित्वाद् द्वारमपूर्वं स्वीकार्यमिति तत्सूत्रार्थः। न ह्यनेन सूत्रेण भावनायाः प्रत्ययार्थत्वं, न धात्वर्थत्वमित्यर्थः स्पृश्यते। अत एव सूत्रकृता जैमिनिना "भावार्थाः कर्मशब्दाः" इति सामानाधिकरण्यमेवाश्रितम्। भट्टपादास्तु प्रौढिवादेनैव प्राधान्यादियुक्तिभिर्भावनायाः पत्ययार्थत्वमुत्सूत्रमेवोक्तवन्तः। जैमिनीयं सूत्रं तु वैयाकरणानामेवानुकूलम्। अस्त्यादिधातूनामेव भावनावाचित्वे भूवादिसूत्रं, तत्रत्यं पातञ्जलभाष्यं च प्रागेवोदाहृतम्। अतश्च ऋषीणामेकवाक्यता सिद्ध्यति। अत एव कौण्डभट्टेन "गोतमजैमिनीयवचनव्याख्यातृभिर्दूषितान्" इत्युक्तम्। "तेषां वचो दूषये" इति च प्रतिज्ञातमित्यलम्। ।।१२।।

नन्वेयं भावनायाः फलनियतत्वात् फलाश्रयस्य च कर्मत्वात् सर्वेषां क्रियावाचकत्वे सकर्मकतापत्तिरित्यत आह -

फलव्यापारयोरेकनिष्ठतायामकर्मकः।
धातुस्तयोर्धर्मिभेदे सकर्मक उदाहृतः।। ।।१३।।

एकनिष्ठतायाम् - एकमात्रनिष्ठतायाम्। भिन्नाधिकरणावृत्तितायामिति यावत्। तेन गम्यादौ फलस्य कर्तृनिष्ठत्वेऽपि नातिव्याप्तिः। अकर्मकः यथा - भ्वादिः। तयोः = फलव्यापारयोः। आश्रयभेदे सकर्मक इत्यर्थः। उक्तं च वाक्यपदीये -

आत्मानमात्मना बिभ्रदस्तीति व्यपदिश्यते।
अन्तर्भावाच्च तेनासौ कर्मणा न सकर्मकः।। इति।

[बिभ्रदिति] तेन स्वधारणानुकूलो व्यापारोऽत्रापि गम्यत इति भावः। तेन = कर्मणा, सकर्मकत्वं तु न, अन्तर्भावात् = फलांशेन सामानाधिकरण्यसत्त्वादित्यर्थः।

आत्मानं जानाति इच्छतीत्यादौ च द्वावात्मानौ - शरीरात्मा अन्तरात्मा च। तत्रान्तरात्मा तत्कर्म करोति, येन शरीरात्मा सुखदुःखे अनुभवतीति "कर्मवत्कर्मणा" ३-२-८७ इति सूत्रीयभाष्योक्तरीत्या भिन्नाधिकरणनिष्ठता मादाय सकर्मकत्वमित्यवधेयम्।। ।।१३।।

मीमांसकैरुद्भावितं दोषान्तरमुद्धरति [नन्विति] एवम् = अकर्मकाणामपि व्यापारार्थकत्वे। फलनियतत्वात् = फलव्याप्यत्वात्। [कर्मत्वादिति] "कर्तुरीप्सिततमं कर्म" १-४-४९ इति सूत्रेण फलाश्रयस्य कर्मसंज्ञाविधानादित्यर्थः। [सकर्मकतापत्तिरिति] न चेष्टापत्तिः। शास्त्रे सकर्मकाकर्मभेदेन कार्यविधानस्यासङ्गत्यापत्तेः। मूले धातुरित्यन्तमेकं वाक्यम्। ननु फलव्यापारयोरेकनिष्ठताया अकर्मकत्वप्रयोजकत्वे गम्यादीनामप्यकर्मकतापत्तिः। उत्तरदेशसंयोगरूपफलस्य तदनुकूलव्यापारस्य च चैत्रनिष्ठत्वादत आह [एकमात्रनिष्ठतायामिति] तत्त्वं च एकेतरावृत्तित्वे सति एकवृत्तित्वम्। तत्र प्रयोजनाभावाद्विशेष्यांशमपहाय फलितार्थमाह - [भिन्नाधिकरणेति] तथा च गम्यादेर्देवदत्तरूपव्यापाराधिकरणभिन्नग्रामादिवृत्तिसंयोगादिरूप फलवाचकतया नाकर्मकतापत्तिरिति भावः। तेन = उक्तार्थविवक्षणेन। फलस्य = संयोगादेः। [नातिव्याप्तिरिति] अकर्मत्वस्य नातिव्याप्तिरित्यर्थः। धर्मिभेद इत्यस्य विवरणम् [आश्रयभेद इति] वाक्यपदीये, तृतीयकाण्डे सम्बन्धसमुद्देशे ४७ आत्मानमात्मनेत्यादि। षड्भावविकारेषु जन्मोत्तरकालभावितमस्तित्वमनेन प्रतिपाद्यते। आत्मनाऽऽत्मानं धारयतीत्यस्तेरर्थः। तथाच निरुक्तकारः। "अस्तीत्युत्पन्नस्याऽऽत्मधारणमुच्यते" इति। आत्मना आत्मानं, बिभ्रत् = धारयंश्चैत्रादिः, अस्तीति व्यपदिश्यते = व्यवह्रियते। व्यतिरिक्तकर्तृप्रतिषेधार्थम् "आत्मना" इति वचनम्। आत्मरूपेण कर्मणाऽस्तेस्सकर्मकत्वापत्तिरत उक्तम्। "अन्तर्भावाच्चेति" चशब्दो भिन्नक्रमस्त्वर्थकः। असौ = असधातुः, तदर्थो वा, तेन + कर्मणा = आत्मरूपेण कर्मणा।

सकर्मकः + च = सकर्मकस्तु, न = न भवति। तत्र हेतुः - अन्तर्भावादिति - अन्तर्भावः = पृथगभानम्, तच्च पदान्तरबोध्यस्यार्थस्य प्रकृतपदार्थत्वेन एकाधिकरणवृत्तित्वेन वा। आद्योदाहरणं - मासमास्ते। मास मासनेन व्याप्नोतीत्यर्थः। व्याप्नोतिपदार्थस्य व्यापनस्य प्रकृताऽऽसधात्वर्थत्वेन विवक्षणेन पृथगभानम्। व्याप्तिरूपफलाश्रयत्वेन मासस्य कर्मत्वम्। अन्तर्भूतव्यापने आसनमात्रे आसधातोर्वृत्तौ तु न कर्मत्वं, किन्त्वधिकरणत्वात्सप्तम्येव - कटे आस्ते। द्वितीयोदाहरणं चैत्रोऽस्ति। आत्मधारणानुकूलो व्यापारोऽस्तेरर्थः। आत्मधारणरूपफलस्य भावनासामानाधिकरण्यात्पृथगभानम्। मासमास्ते इत्यादौ धात्वर्थाद्बहिर्भूतः कर्मार्थो विद्यते। तस्य व्याप्त्याश्रयत्वम्। अस्तीत्यत्र तु आत्मरूपं कर्मापि धात्वर्थज'रनिलीनम्। अतोऽत्र बहिर्भूतस्यार्थस्याभावान्न कर्मत्वम्। अत्र हि क्रियाकारकसंसर्गपर्यन्तो दीर्घो धात्वर्थः। एवं चैकाधिकरणवृत्तित्वेन पृथगभानरूपमन्तर्भावमाश्रित्य हरिग्रन्थं योजयति [अन्तर्भावात् = फलांशेन सामानाधिकरण्यसत्त्वादित्यर्थ इति] कारिकायां चशब्दो भिन्नक्रमस्त्वर्थक इत्याशयेनोक्तम् [सकर्मकत्वं नेति] एवं च फलसमानाधिकरणव्यापारवाचित्वमकर्मकत्वमिति लक्षणम् "अन्तर्भावाच्च" इति कारिकया प्रतिपाद्यते। हेलाराजस्याप्ययमेवाशयः। धात्वर्थेन कर्मणोपसङ्ग्रहादकर्मकोऽयं धात्वर्थः" इति तदीयो ग्रन्थः। एतल्लक्षणसिद्धमर्थमेव

धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसङ्ग्रहात्।
प्रसिद्धेरविवाक्षातः कर्मणोऽकर्मिका क्रिया।। इति।

विशेषरूपेण चतुर्धा हरिर्व्यभजत। धातोरर्थान्तरे वृत्त्याऽकर्मकत्वस्योदाहरणं 'नदी वहति - प्रापणार्थस्य वहतेरर्थान्तरे स्यन्दने वृत्तिः। "स्यन्दनं = क्रियाविशेषस्तदनुकूलो व्यापारो वेगादिस्तयोरेकत्र सत्त्वाप्राप्तापि कर्मसंज्ञा परया कर्तृसंज्ञया बाध्यत इत्यकर्मक एव" इति आत्मनेपदशेखरव्याख्याने भैरवमिश्रा अप्येवमेवाभिप्रयन्ति। एवं चतुर्भिरपि प्रकारैरकर्मकव्यपदेशाश्शास्त्रे भवन्ति। एषामन्येऽपि प्रकारास्सम्भवन्तीति हरिरेवाह

भेदाय एते चत्वारः सामान्येन प्रदर्शिताः।
ते निमित्तादिभेदेन भिद्यन्ते बहुधा पुनः।। (३ काण्डे कर्माधिकारे ८८ श्लो) इति।

नदी वहतीत्यत्र स्यन्दनस्य जलस्रुतिरूपस्य नद्यात्मभूतत्वादिति वदन् हेलाराजोऽप्यस्माकमनुकूल एव। एवं च हरिहेलाराजाभिमतमेवार्थं कौण्डभट्टः प्रादर्शयत् अन्तर्भावात् = फलांशेन सामानाधिकरण्यादित्यर्थः इति। "अन्तर्भावात् = अस्त्यर्थेन क्रोडीकृतत्वात्" इति भूषणग्रन्थस्याप्ययमेवार्थ इति दिक्।

एतेन "अन्तर्भावादिति - धात्वर्थतावच्छेदककोटिप्रविष्टत्वादित्यर्थः। पृथगुपस्थितयोरेवान्वय-नियमात् कर्मसंज्ञाकार्थान्वय्यर्थकत्वरूपसकर्मकत्वस्य तत्रानवकाशादिति भावः। स्वोक्तलक्षणानुसारेण सारकृ"ाचष्टे - फलांशेनेति" इति दर्पणकारास्तदनुसारिणः पञ्चोलिनश्च परास्ताः।

यदपि दर्पणकाराः "आत्मरूपकर्मणा सकर्मकत्वं कुतो नेत्याकाङ्क्षायामेतत्समाधानस्योदक्षरत्व-दोषदुष्टस्य योग्यत्वं सुधीभिर्विभावनीयम्" इति। अत्रेयं विभावना। मासमास्ते इत्यादौ धातो व्यापनार्थकत्वं वैविवक्षिकम्। अस्ति चैत्र इत्यत्र तु स्वधारणार्थकत्वं नियतम्। आस्ते इत्यादौ धात्वर्थात्पृथक् कर्माहों भासादिः प्रयुज्यते। अस्तीत्यत्रतु न तथा। एवं च "अन्तर्भावाच्च तेनासौ कर्मणा न सकर्मकः" इति हरिग्रन्थः कौण्डभट्टप्रदर्शितार्थमत्यन्तमुपष्टभ्नाति। हरिग्रन्थस्योत्तरभाग एव प्रकृतार्थसाधकः। भूषणेऽपि "अन्तर्भावाच्च तेनासौ कर्मणा न सकर्मकः" इत्येतावानेव हरिग्रन्थ उदाहारि। "तेन = आत्मानमात्मनेति पूर्वार्धेनाक्तकर्मणा, असौ = अस्तिः। सकर्मको न" इति च व्याख्यायि। एवं स्थिते हरिकारिकायां तेन, असौ इति सर्वनामद्वयेन परामर्शयितव्योऽर्थः स्पष्टं झटिति न बुद्धावारोहति। अतस्तत्प्रदर्शनाय "आत्मानमात्मना बिभ्रदस्तीति व्यपदिश्यते" इति कारिकापूर्वार्धोऽप्युदाहृतः प्रकृतग्रन्थे। तेन च प्रतिपिपादयिषितोऽर्थः प्रतिपत्तृणां मनसि पदमादधाति। एतदर्थमेव संपूर्णकारिका लिखिता, व्याख्याता च। अस्तेः फलव्यापारोभयार्थकत्वसमर्थनायात्र हरिग्रन्थो नोपन्यस्तः। तस्यार्थस्य प्रागेव निर्धारितत्वात्। किन्त्वात्मधारणमप्यस्तेरर्थ इति सूचनाय "स्वधारणानुकूलो व्यापारोऽत्रापि गम्यते" इति कौण्डभट्टेन प्रदर्शितम्। अस्तेः सकर्मकत्वापत्तिरेवात्र परिहार्या। एवं स्थिते कस्य वा ग्रन्थस्योदक्षरत्वदोषः संक्रामति? न तावत् हरिकारिकापूर्वार्धस्य, तदावश्यकत्वस्य प्रदर्शितत्त्वात् नापि भूषणसारग्रन्थस्य। लेशतोऽपि तस्य तत्त्वासम्भवात्। यदितु अधिकाक्षरत्वं न उदक्षरत्वमपितु अक्षरमर्यादातिक्रमणमुदक्षरत्वम्। प्रकृते धात्वर्थतावच्छेदककोटिप्रविष्टत्वादित्यर्थकस्य "अन्तर्भावात्" इति हरिग्रन्थस्याक्षरमर्यादालब्धार्थातिक्रमेण "फलेन सामानाधिकरण्यसत्त्वात्" इति कौण्डभट्टस्यार्थान्तरकरणमेवोदक्षरत्वमित्युच्यते, तदपि न युज्यते। हरिहेलाराजसम्मतार्थस्यैव भट्टेन प्रतिपादित्वात्। निरूपितं चैतत्प्राक्। किञ्च पृथगुपस्थितयोरेवान्वयनियमात्कर्मसंज्ञकार्थान्वय्यर्थकत्वरूप-सकर्मकत्वस्य तत्रानवकाशादित्यर्थः। सारग्रन्थाल्लभ्यत एव। तथाहि - "कृञोऽकर्मकतापत्तेः" इति कारिकाव्याख्याने कर्मणा सहितत्वं सकर्मकत्वमित्युक्तं भूषणे। कर्मणा सहितत्वं च तदन्वय्यर्थकत्वमेव, धात्वर्थान्वययोग्यः कर्मूणोऽर्थश्च धात्वर्थाद्बहिर्भूत एव सम्भवति। एवं च यत्र भावनायाः फलांशेन सामानाधिकरण्यं, तत्र धात्वर्थान्वययोग्यबहिष्पदार्थस्यासम्भवात्सकर्मकत्वस्याप्रसक्त्याऽकर्मकत्वं

निराबाधमेव। मासमास्ते इत्यादौ तु कालादिभिन्नत्वविशेषणस्योभयेषामप्यावश्कत्वान्न दोषः। एवं च "उदक्षरत्वे" इति वाचोयुक्तिरेवावशिष्यत इत्यलम्।

ननु फलव्यापारयोरेकनिष्ठताया अकर्मकताप्रयोजकत्वे आत्मानं जानातीत्यादौ तेषामप्यकर्मकतापत्तिः। ज्ञानादिरूपफलस्य तदनुकूलात्मनस्संयोगरूपव्यापारस्य चैकचैत्रनिष्ठत्वात्। तथाच तस्य सकर्मकतानोपत्तिरित्याशङ्क्य शरीरावच्छिन्न आत्मा एकः, अन्तः करणावच्छिन्न आत्माऽन्यः। एवं ज्ञाता एकः, ज्ञेयोऽन्यः। तयोश्च ज्ञातुर्व्यापाराश्रयत्वेन, ज्ञेयस्य फलाश्रयत्वेन च फलव्यापारयोरेकाधिकरणवृत्तित्वाभावान्न दोष इति समाधत्ते [आत्मां जानाति इच्छतीति]। [इत्यादाविति] आदिपदेन स्वं जानाति, चैत्रोऽहं स्वात्मानं जानामि, आत्मानमात्मना वेत्सि, आत्मानमात्मा हन्तीत्यादेर्ग्रहणम्। इदं च "भिन्नाधिकरणनिष्ठता" मित्यत्रान्वेति। आत्मभेदे भाष्यं प्रमाणयति [द्वावात्मानाविति] अद्वैतवादे पारमार्थिकसत्यत्वं निर्गुणाद्वयब्रह्मण एव। भेदस्याऽऽविद्यकतया तन्निवृत्तिपर्यन्तं सत्यत्वं = व्यावहारिकसत्यत्वमूरीक्रियते। एवं चाविद्यादशायामात्मभेदस्य वास्तवतया फलव्यापारयोर्भिन्नात्मनिष्ठत्वान्न जानात्यादीनामकर्मकतापत्तिरिति तात्पर्यम्। शरीरात्मा = शरीररूप आत्मा। अन्नमयकोश इति यावत्। "अहं काणः" इत्यादिव्यवहारेण शरीरेऽपि लोकानामात्मत्वप्रत्ययाच्छरीरात्मेति न विरुद्धम्।

आत्मद्वयसत्त्वे प्रमाणं दर्शयति भाष्ये [अन्तरात्मेति] हृदयपुण्डरीकान्तर्वर्ति-चिद्रूपान्तःकरणोपाधिकः पुरुषो जीवः। सांख्यमते तु अन्तरात्मा = अन्तःकरणमेव। तन्मते तस्यैव कर्तृत्वसम्भवात्। पुरुषस्य पुष्करपलाशवन्निर्लेपत्वेन कर्तृत्वाद्यनाश्रयत्वात्। नैयायिकादीनां तु मते पुरुषस्य =जीवस्य कर्तृत्वात्स एवान्तरात्मेति विवेकः। कर्म = धर्माधर्मरूपम्। [करोतीति] अन्तरात्मा धर्माधर्मादिकर्ता। शरीरात्मनि कर्तृत्वस्य लौकिकैरप्यनभ्युपगमादिति भावः। येन = धर्माधर्मादिना। शरीरात्मा = शरीररूप आत्मा। [सुखदुःखे अनुभवतीति] अयं धर्माधर्मरूपं यत्पूर्वसञ्चितं कर्म तत्फलं पादादिसौष्ठवाद्यनुभवति, "पूर्वकृतं कर्म मामाधिरूपेण बाधते" इति च लौकिकव्यवहारादिति भावः। शरीरस्याचेतनत्वात्सुखदुःखहेतुभ्यां शरीरं सम्बध्यत इति भाष्यं व्याख्येयम्। एतावता फलव्यापारयोर्भिन्नाधिकरणत्वनिर्वाह इत्याशयेन कौण्डभट्टेनैतावदेव भाष्यमुदाहृतम्। एतदुत्तरं "शरीरात्मा तत्कर्म करोति येनान्तरात्मा सुखदुःखे अनुभवति" इति भाष्य उक्तम्। शरीरात्मा, सुखदुःखजनकं चेष्टादिरूपं कर्म करोति येन = तत्कृतेन कर्मणा। अन्तरात्मा सुखदुःखे = स्वर्गनरकरूपे अनुभवतीति भाष्यार्थः। एवं च वस्तुत एवात्राऽऽत्मभेदो नत्वेकस्यैव कर्तृत्वं कर्मत्वं चेति भावः।

द्वितीये "णेरणौ" १-३-६७ इति सूत्रेऽपि भाष्ये स्पष्टमिदम्। तत्रैव भाष्यं कैयटादिभिर्व्याख्यातम्। [भिन्नाधिकरणवृत्तितामिति] फलव्यापारयोर्भिन्नाधिकरणवृत्तितामित्यर्थः। नचैवं चैत्रश्चैत्रं गच्छतीति प्रयोगापत्तिः। तत्रपि शरीरप्रदेशान्तरावच्छिन्नात्मादिकल्पनोपपत्तेः। इतरथा चैत्रो मैत्रं गच्छतीति प्रयोगस्याप्यनापत्तेरिति वाच्यम्। ऋष्यनुभवसिद्धस्यात्मभेदस्य प्रामाणिकतया तस्य प्रयोगव्यवस्थापकत्वेऽप्यस्मदाद्यनुभवमात्रसिद्धस्य भेदस्याप्रामाणिकतया तस्य तत्त्वे मानाभावात्। एतेन "आकडारादेका संज्ञा" इति नियमेन परया कर्तृसंज्ञाया बाधान्न चैत्रश्चैत्रं गच्छतीति प्रयोग इत्ययुक्तम्। स्वं जानामि, स्वात्मानं जानामि, आत्मानमात्मना वे स्ता त्यादावेकसंज्ञावरोधेऽपि संज्ञान्तरप्रयुक्तकार्यदर्शनात्। नच शरीरमनोरूपावच्छेदकभेदमादाय तत्रासाङ्कर्योपपादनम्। तथात्वे स्वपदप्रयोगानुपपत्तेः। चैत्र श्चैत्रं गच्छतीति शरीरप्रदेशान्तरावच्छिन्नात्मभेदकल्पनोपपत्तेश्च। इतरथा चैत्रो मैत्रं गच्छतीति प्रयोगस्याप्यनापत्तेः" इति खण्डदेवाद्युक्तमपास्तम्। आत्मभेदस्य मुनिवचनसिद्धत्वे तदीयानिच्छामात्रस्याकिञ्चित्करत्वाच्च। देशकालभेदेऽपि चैत्रीयधर्माधर्मयोः स्वस्मिन्नेव फलजनकत्वेन चैत्रे भेदकल्पनाया अयुक्तत्वाच्च। अत एव चैत्रमैत्रयोर्नैकत्वापादनावकाश इति चैत्रो मैत्रं गच्छतीति प्रयोगोऽपि निराबाध इत्यलम्।। ।।१३।।

नन्वसत्त्वभूतक्रियाया धात्वर्थत्वे पाक इत्यत्रापि तत्प्रत्ययापत्तिः। न चेष्टापत्तिः। "कृदभिहितो भावो द्रव्यवत् प्रकाशते" इति भाष्यविरोधादित्यत आह -

आख्यातशब्दे भागाभ्यां साध्यसाधनरूपता।
प्रकल्पिता यथा शास्त्रे स घञादिष्वपि क्रमः।। ।।१४।।

आख्यातशब्दे = पश्य मृगो धावतीत्यादौ। भागाभ्यां = तिङन्ताभ्याम्। प्रकृतिप्रत्ययभागाभ्यामिति विवरणकारोक्तमपव्याख्यानम्। पचतीत्यत्रापि भागद्वयसत्त्वात्। साध्यसाधनरूपता यथाक्रमं ग्राह्या। साध्यत्वं क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकरूपवत्त्वम्। साधनत्वं कारकत्वेनान्वयित्वम्। [स घञादिष्वपीति] प्रकृत्या साध्यावस्था, प्रत्ययेन साधनावस्था।

इयान् परं विशेषः - घञाद्युपस्थाप्या लिङ्गसङ्ख्यान्वयिनी, कारकान्वयिनी च। आख्यातान्तोपात्ता तु नैवं, तथापि कारकत्वेनान्वयित्वमात्रेण दृष्टान्तदार्ष्टान्तिकतेत्यवधेयम्।

नच घञन्ते धातुना तथाभिधाने मानाभावः, ओदनस्य पाक इति कर्मषष्ठ्या मानत्वात्। नचाध्याहततिङन्तक्रयान्वयात् षष्ठी, "कर्तृकर्मणोः कृति" इति कृदन्तेन योग एव तद्विधानात्। "न लोकाव्ययनिष्ठाखलर्थ तृनाम्" इति लादेशयोगे षष्ठीनिषेधाच्च। एवंरीत्या काष्ठैः पाकः इत्याद्यपीष्टमेव।

एवं फलांशोऽपि धातुनाऽसत्त्वावस्थापन्न एवोच्यते। अत एव स्तोक्तं पचतीतिवत् स्तोक्तं पाक इत्युपपद्यत इति। ।।१४।।

भावनाया धातुवाच्यत्वे मीमांसकोक्तं दोषान्तरमिष्टापत्त्या परिहरति [नन्वित्यादिना] [पाक इत्यत्रापीति] मीमांसकमते तिङभावान्न भावनायाः प्रतीत्यापत्तिः। वैयाकरणमते तु वाचकस्य धातुभागस्य सत्त्वाद्भावनायाः प्रतीत्यापत्तिरित्याशयः। तत्प्रत्ययापत्तिः = असत्त्वभूतक्रियाबोधापत्तिः। [कृदभिहितो भावो द्रव्यवदिति] कृदन्ते भिन्नपदवाच्यसाधनादिकृतभेदेन भावस्य भेदावगमाद् द्विवचनबहुवचनानि भवन्ति। पाकौ पाकाः। तिङन्ते तु न तथा। अत एकवचनमेव आस्यते भवद्भिः। अत्र तयोर्वैषम्ये बीजं प्रतिपादयतीदं भाष्यम्। "अस्ति खल्वपि विशेषस्तिङभिहितस्य भावस्य कृदभिहितस्य च। कृदभिहितो भावो द्रव्यवद्भवति" इति तत्र भाष्य उक्तम्। द्रव्यत्वेन प्रसिद्धो यो घटादिस्तद्वत् कृद्वाच्योऽयं भावो भवति।

लिङ्गसङ्ख्यासाधनसम्बन्धप्रतिपत्त्येति तद्भाष्यार्थः। [भाष्येति] इदं च "सार्वाधातुके यक्" ३-१-६७ इत्यादिसूत्रेषु। [विरोधादिति] कृदन्ते लिङ्गसङ्ख्यान्वययोग्यसत्त्वरूपेण भानस्य तद्भाष्यतो लाभेन, तत्र भावनाया असत्त्वरूपेण भानस्वीकारे तद्भाष्यविरोधः स्पष्ट एवेति भावः।

यत्तु "अमृतरसप्रस्यन्दिमाध्वीकभूः" इति कुसुमाञ्जलिश्लोके अमृतस्य रसे, रस्यमानममृतमिति यावत्, इति व्याख्याय तत्रोपष्टम्भकत्वेन "कृदभिहितो भावो द्रव्यवत्प्रकाशते" इति वर्धमानेनोपन्यस्तं, तदतिरभसात्। तथाहि - रस इति न भावे कृत्प्रत्ययः। रस्यमान इति विवरणेन सह विरोधात्। यदपि "द्रव्यवदित्यस्य द्रव्यविशेष्यिकां प्रतीतिं जनयतीत्यर्थवर्णनं तदपि निर्मूलमनुशासनविरुद्धं च। किञ्च रसशब्दस्य द्रव्यपरत्वे कर्मधारये तस्य पूर्वनिपातापत्तिः। रथन्तरादिवद्रसशब्दस्य रूढत्वाच्च। किञ्च सर्वत्र भावप्रत्ययान्ते द्रव्यबोधकतापत्तौ कर्मणि प्रत्ययविधानेनैवोपपत्तौ भावे प्रत्ययविधानस्य वैयर्थ्यापत्तिश्चेति दिक्।

नच "वस्तूपलक्षणं यत्र सर्वानाम प्रयुज्यते। द्रव्यमित्युच्यते सोऽर्थो भेद्यत्वेन विवक्षितः" इति हर्युक्तदिशा क्रियाया अपि द्रव्यत्वेन भेदाभावादुपमानोपमेयभावाप्रतीत्या वतिरनुपपन्न इति वाच्यम्। प्रसिद्ध्यप्रसिद्ध्यपेक्ष उपमानोपमेयभाव इत्यदोषात्। एवं चासत्त्वभूतभावनाया धातुवाच्यत्वे पाक इत्यादावपि तत्प्रतीत्यापत्तिर्दोषः। इष्टापत्तौ "कृदभिहितो भावो द्रव्यवत्प्रकाशते" इति यग्विधायकसूत्रस्थमुनिवचनविरोध इति पूर्वपक्ष्याशयः।

आह = "सार्वधातुके यक्" ३-१-६७ "भावे" ३-१-६८ इति सूत्रस्थभाष्यार्थप्रतिपादक-हरिकारिकाभ्यामाह। पाक इत्यादौ कृदन्ते धातुना भावनाभिधाने जैमिनीयाः प्रतिघटन्ते, घञादिभावप्रत्ययेन धात्वर्थविलक्षणभावाभिधाने नव्यनैयायिकादयो विरुन्धन्ति, एतादृशे महति प्रतिघटने महात्मनां वचनमुदाहृत्यैव परमतविदलनेन स्वमतं प्रतिष्ठापनीयमित्याशयेन भट्टोजिदीक्षिताः द्वे हरिकारिके इमे स्वग्रन्थे कठोपनिषदो "न जायते म्रियते वा" "हन्ता चेन्मन्यते हन्तुम्" इत्यादिश्रुतवाक्यद्वयं भगवद्गीतायां वेदव्यासा इव उपनिबबन्धुरिति प्रतिभाति। किञ्च स्वप्रतिपाद्यं प्रकृतमर्थमेव इमे हरिकारिके स्पष्टं विशदीकुर्वाते इत्यतोऽपि दीक्षिता अविकृतमेव हरिग्रन्थमानिन्युः।

आख्याते शब्दौ यस्मिंस्तदाख्यातशब्दं, तस्मिन्। तिङन्तद्वयघटितं वाक्यमन्यपदार्थः। आख्याते इत्येव वक्तव्ये शब्दग्रहणमेव बहुव्रीहिस्वीकारे मानम्। इत्याशयेनाह [आख्यातशब्दे = पश्य मृगो धावतीत्यादाविति] अत्रार्थे भागशब्दार्थमाह [तिङन्ताभ्यामिति] तथाच पचतीत्यत्रापि भागद्वयेन साध्यसाधनरूपक्रियाप्रतीत्यापत्तिरित्याशयः। अत्र च क्रियाया एव भागाभ्यां यथाक्रमं साध्यत्वेन साधनत्वेन च भानमित्ययमर्थो विवक्षितः। "स घञादिष्वपि" इत्युपमेयानुरोधात्। अत एव "मृगो धावति पश्येति साध्यसाधन रूपता" इत्युनुपदमेवोपन्यस्तं हरिणा। "सदृशतरोदाहरणमाह" इत्यवतारितं च हेलाराजेन। यदितु एकेन भागेन साध्यत्वेन, अपरेण सिद्धत्वेन भानमित्येवार्थो विवक्षितः, स च भासमानोऽर्थः क्रियारूप एवेति तु नियमो नेति विभाव्यते, तदा "प्रकृतिप्रत्ययाभ्याम्" इति व्याख्यानं सम्यगेवेति त्वन्यदेतत्।

मूले [प्रकल्पितेति] आख्यातशब्दे = पश्य मृगो धावतीत्यादौ। भागाभ्यां साध्यसाधनवर्तिता। यथा, शास्त्रे = संप्रदानसंज्ञासूत्रे भाष्ये। तत्र हि "क्रियापि कृत्रिमं कर्म क्रियापि क्रियया ईप्सिता भवति" इत्यक्तम्। प्रकल्पिता = अन्वयव्यतिरेकाभ्यां कल्पिता। अनेन पदस्फोटस्य वाक्यस्फोटस्य वा वास्तवत्वं ध्वनयति। घञादावपि = घञादिभावप्रत्ययेऽपि। स + क्रमः = भागभ्यां साध्यसाधनरूपेण भानरूपः क्रमः। प्रकल्पित इति लिङ्गविपरिणामेनान्वयः कार्यः। "सार्वधातुके यक्" ३-१-६७ "भावे" ३-२-१८ "अकर्तरि च कारके संज्ञायाम्"

३-३-२९ "कर्तरि कृत्" ३-४-६७ इति सूत्रेषु भाष्ये शास्त्रे स क्रमः कल्पित इति योजना। एकपदोपात्ते एकवाक्योपात्ते वाऽर्थेऽन्वयव्यतिरेकवशेन शास्त्रेऽपोद्धारकल्पनायां प्रकृतिप्रत्ययविभागेन पदविभागेन वाऽर्थविभागश्शक्यक्रियः। लोके त्वखण्ड एव शब्दोऽखण्डार्थस्य वाचकः। स्पष्टं चेदं हेलाराजीये।

एतेन "लोके यथा पश्य मृगो धावतीत्यादौ भागाभ्यां साध्यसाधनवर्तिता = वृत्तिः प्रकल्पिता, तथा शास्त्रे स एव क्रमो घञादिभावप्रत्ययेष्वपि" इति पञ्चोलिनः परास्ताः। उक्तरीत्योभयोरपि शास्त्रीयत्वस्यैव लाभात्।

अनुत्थापकतावच्छेदकरूपवत्त्वं = निष्पाद्यत्वरूपम्। निरूपितं चैतत्प्राक्। [प्रकृत्या साध्यावस्था प्रत्ययेन साधनावस्थेति] अयं भावः। "अस्ति खल्वपि विशेषस्तिङभिहितस्य भावस्य, कृदभिहितस्य च, कृदभिहितो भावो द्रव्यव'वति" इति यग्विधायकसूत्रस्थभाष्येण भावाख्यातप्रत्ययवत् न भावघञादिः प्रकृत्यर्थभावनानुवादकः, किन्तु, सिद्धत्वधर्माक्रान्तरूप इति स्पष्टं प्रतीयते। एतदेवादाय "अन्यः स भावो बाह्यः प्रकृत्यर्थात्" इति "अकर्तरिच कारके संज्ञायाम्" ३-३-१९ "कर्तरि कृत्" ३-४-६७ इति सूत्रयोर्भाष्ये उक्तम्। "क्रिया क्रियया समवायं न गच्छति - पचति पठ ति" इति यग्विधायकसूत्रस्यभाष्येण धात्वर्थक्रियायाः साध्यत्वरूपेण भानमिति लभ्यते। तथाच प्रकृत्या साध्यत्वरूपधर्माक्रान्ता, घञादिप्रत्ययेन सिद्धत्वरूपधर्माक्रान्ता च क्रिया भासते। नात्र रूपद्वयेन क्रियाद्वयं भासत इति भ्रमितव्यम्। एक एवार्थो वाचकभेदेन धर्मद्वयाक्रान्तो भासते। पच्याद्यर्थे साध्यत्वविशिष्टतत्तत्क्रियात्वरूपविशेषाः, सिद्धत्वाख्यं सामान्यं च वर्तन्ते। तत्र तादृशविशेषसत्त्वेऽपि यत्सामान्यं तत् प्रत्ययार्थत्वेन निर्दिश्यते। तदेव सामान्यं धातूनामनेकार्थत्वाद् घञन्तभूधातुवाच्यं "भावे" इति सूत्रे भावशब्देन गृह्यते। एवं च पच्याद्यर्थफूत्कारादिविशेषा धातुना विशेषणतया साध्यत्वेन, तदर्थं तद्विशेषगतं भावरूपं सामान्यं प्रत्ययेन विशेष्यतया सिद्धत्वेन च रूपेणोच्यते। यथा एकस्यैवाऽऽचार्यत्वं मातुलत्वं च सम्बन्धिभेदात्तथा एकस्मिन्नेव पाकादिषु साध्यत्वविशिष्टतत्तत्क्रियात्वरूप-विशेषरूपता भावशब्दावाच्यं सामान्यं चास्त्येव। तत्राचार्यत्वं मातुलत्वं च यथा निरूपकभेदाद्भिन्नं तथा प्रकृतेऽपि प्रकृतिप्रत्ययरूपवाचकभेदात्कारकनिरूपितं साध्यत्वं, क्रियान्तरनिरूपितं सिद्धत्वं च भासते। सिद्धत्वेन भासमानस्य विशेष्यतासिद्धये घञादेर्वाचकत्वमेवाऽऽस्थेयं, नतु द्योतकत्वम्। एतदेवाभिप्रेत्य "सिद्धावस्थापन्नो धात्वर्थो भावः। तत्र वाच्ये धातोर्घञ् स्यात्, पाकः पाकौ" इत्युक्तं सिद्धान्तकौमुद्यां दीक्षितैः। एवं च सिद्धत्वसाध्यत्वोभयधर्मविशिष्टो धात्वर्थः पाकादिपदार्थ इति

लभ्यते। "सिद्धत्वरूपो धर्मश्च घञ्द्योत्यः" इति भावकर्मप्रकरणस्थशब्दरत्नग्रन्थस्तु मतान्तरपरतया योज्यः। एवं च कृदन्ते धातुनाऽसत्त्वभूतभावनाभिधानापत्तिरिष्टापत्त्या समाहितेति बोध्यम्।

नन्वनयोर्लिङ्गसङ्ख्यान्वयित्वान्वयित्वेन वैषम्यात्कथं दृष्टान्तदार्ष्टान्तिकभावोऽत आह [इयानिति] यत्किञ्चिद्धर्मसाम्येन सादृश्यविवक्षया न दोष इत्याह [तथापीति]। [कारकत्वेनेति] कर्तृकर्मान्यतरकारकत्वेनेत्यर्थः। यथा - पाको भवति, पश्य मृगो धावतीत्यादौ। तेन पाकेन वैरं कृतमित्यर्थे पचति वैरं कृतमित्यादयो न प्रयोगाः। उपपादितं चैतत्प्राक्।

[नचेति] मीमांसकानामाशङ्का। भावनाबोधकाख्यातप्रत्ययाभावः शङ्काबीजम्। तत्रैव तद्भानमिति तेषामभिमानः। तथाभिधाने - भावनाया असत्त्वरूपेणाभिधाने। [मानाभाव इति] अयं भावः। सर्वाण्यपि कारकाणि आख्यातोपात्तभावनायमेवान्वियन्ति। धात्वर्थोऽपि साध्यत्वेन करणत्वेन वा तत्रैवान्वेति। अत एव सर्वत्राप्याख्यातप्रत्ययो नित्यसकर्मकः धातूनां मध्ये तु केचिदकर्मकाः यथा भूप्रभृतयः। केचित्सकर्मकाः यथा गमिप्रभृतयः। भवति, गच्छतीत्यादौ सर्वत्राप्याख्यातं तु नित्यं सकर्मकमेव। कारकाणि धात्वर्थेऽन्वेतुं नार्हन्त्येव। अतः कृदन्तस्थले काष्ठादीनां कारकत्वं नैव घटते। अतः काष्ठकरणकः पाक इत्यर्थे काष्ठैः पचतीत्येव साधु, नतु काष्ठैः पाक इति। एवं स्थिते धातुभागेनासत्त्वभावनाभिधाने न प्रमाणं, नापि प्रयोजनम् - इति।

समाधत्ते [ओदनस्य पाक इत्यादाविति] ओदनं पचतीत्यादाविव ओदनस्य पाक इत्यादिकृदन्तेऽपि ओदनादेः कारकत्वं, तत्पूर्वकं कर्मत्वादिकं च महाभाष्यकारादिभिरङ्गीक्रियते। आख्यातस्य भावनावाचित्वस्यैवासिद्धतया क्व तन्मूलकः "कारकाणामाख्यातार्थभावनायामेवान्वयः" इति नियमः। अतो भावनापि धात्वर्थ एव। कारकस्यापि तत्रैवान्वयः। अन्यथा साध्यावस्थापन्नार्थ एव कारकान्वयनियमेन धातुना तादृशार्थानाभिधाने ओदनादेस्तत्राऽन्वेतुमयोग्यतया कारकत्वाभावात्तत्पूर्वककर्मत्वादीनामनापत्तौ तदुपपादनपरभाष्यकारीव्यवहारो व्याकुप्येत। अतस्तिङ्समभिव्याहार इव कृत्समभिव्याहारेऽपि धात्वर्थनिरूपितं कारकत्वं तद्विशेषः कर्मत्वादिकं चौदनादेरङ्गीकार्यमेव। तथा च ओदनकर्मकः पाक इति बोध इति बोध्यम्। [कर्मषष्ठ्या इति] ओदनादेः कर्मत्वे "कर्तृकर्मणोः कृति" २-३-६५ इति कर्मत्वशक्तिमति षष्ठी। इयं च द्वितीयापवादः। एवं च कर्तृकर्मणोः कृतीति ऋष्यनुभवसिद्धकर्मषष्ठ्यनुरोधेन निरुक्तकल्पना स्वीक्रियत इति भावः। [मानत्वादिति] कृदन्ते ओदनादेर्न कारकत्वमिति मीमांसकानुभवस्तु ऋष्यनुभवविरुद्धत्वान्न परिग्राह्य एव। एवं चौदनस्य पाक इत्यादौ कर्मषष्ठ्यसिद्धिस्तन्मते दोष एव। अतस्तत्सिद्धिरपि प्रयोजनं संपद्यत इति भावः।

पुनरपि मीमांसकः पर्यनुयुङ्क्ते - ओदनस्य पाक इत्यादौ न धात्वर्थे कारकान्वयः। धात्वर्थे कारकान्वयस्याव्युत्पन्नत्वात्। अतो भवतीति तिङन्तमध्याहृत्य तिङर्थभावनायामेव ओदनादेरन्वयः कार्यः। आख्यातार्थभावनायाः करोत्यर्थतया तद्वदेव सकर्मकत्वात्। अत एवाकर्मकधातुस्थलेऽपि आख्यातोपात्तभावनायास्सकर्मकत्वव्यवहारः। यदि तु आख्यातस्य सकर्मकत्वेऽपि धातोरकर्मकतया ओदनादेर्नाद्वितीयादिकं तत्तु धात्वर्थकर्मण्येवेति विभाव्यते, तर्हि निर्वर्त्यत इत्यादिसकर्मकधातुप्रकृतिकतिङन्तमध्याहार्यम्। ओदनादेः प्रथमतो भावनायां कर्मत्वेनान्वयेऽपि पार्ष्ठिकं धावर्थेऽपि कर्मत्वम्। अत एव तेषां धातूनां सकर्मकत्वोपपत्तिः। अतो विना तिङन्तं द्वितीयादिकारकविभक्तिरसाध्वी एवेति। तद्दूषयति [नचेति]। [कृदन्तेन योग एवेति] सूत्रे कृद्ग्रहणेन तद्योग एव षष्ठीविधानादध्याहृततिङन्तप्रतिपाद्यभावनायामन्वये तदसिद्धिरेव। एवशब्देन तिङन्तयोगो व्यवच्छिद्यते।

ननु तिङन्ताध्याहारेऽपि पार्ष्ठिकेऽन्वये धात्वर्थसम्बन्धस्यापि स्वीकारान्न दोषः। स च धात्वर्थः क्वचित् घञ्प्रत्यर्थरूपोऽपीति च तस्याः कृद्योगित्वव्याघातोऽत आह [न लोकेति]। [निषेधाच्चेति] एवं चौदनस्य पाक इत्यादौ षष्ठी कर्मण्येव वाच्या। सा च कृद्योगनिमित्तिकेति तदुपपत्तये धातोरसत्त्वावस्थापन्नक्रियार्थकत्वमास्थेयम्। एतेन "घञन्ते शेषलक्षणा षष्ठी, न कारकषष्ठी तदर्थस्यापि अध्याहृतास्तिरूपप्रधानक्रियायामन्वयः परम्परासम्बन्धेन। नच कृद्योगनिमित्तकषष्ठीविधानस्य वैयर्थ्यापत्तिरिति वाच्यम्। तस्य तृजादिकृद्विषयत्वेनाप्युपपत्तेः" इति मीमांसकैकदेशिमतमपि परास्तम्। कर्मत्वेन बोधस्यानुभवसिद्धस्यापलापापत्तेश्च।

इदानीं श्रृङ्गग्राहिकया मीमांसकैरापादिते प्रयोगे इष्टापत्तिं दर्शयति [एवं रीत्येति] भाष्यसम्मतप्रयोगोपपत्तये आदृतया अनया रीत्येत्यर्थः। तिङन्तपदानध्याहारेऽपि काष्ठानां करणत्वमनुभूयते। तच्च पाकापेक्षमेव। काष्ठकरणकः पाक इति बोधः। भावना धातुवाच्यैव नाख्यातवाच्या, नच वैयाकरणैरप्यस्तीत्यध्याह्रियत एवेति वाच्यम्। अध्याहारेऽपि पाकपदर्थस्यैव तत्र कर्तृत्वं, नतु तत्रौदनादेरन्वयः। तस्य पाकेनैव सम्बन्ध इति वैलक्षण्यसत्त्वेनादोषात्। किञ्चाख्यातस्य नित्यसकर्मकत्वमपि नानुभाविकम्। सकर्मकपदे धातोरेवान्यपदार्थतया प्रसिद्धेश्चेति व्यर्था तत्कल्पना। किञ्च "ओदनस्य पाक इत्यादौ घञैव कृतिविशिष्टपाकस्य स्वातन्त्र्येण शक्तितल्लक्षणाभ्यां कृतिपाकयोर्वाऽभिधानेन कृतौ कारकान्वयः। एवं चौदनादेः कृदर्थकृतावेवान्वयः। नतु धात्वर्थे, नापि प्रधानतिङन्तार्थक्रियायाम्। पाकानुकूलकृतिसाध्यः पाक इति च बोधः" इति खण्डदेवेन नूतनः पन्था आदृतः, सोऽपि मुनिवचनविरुद्धतया तन्मतानुसारिभिर्नादर्तव्य इत्यलम्।

नन्वोदनस्य पाक इत्यादौ धातुनाऽसत्त्वभावनाभिधानात्तन्निरूपितकारकत्वस्यौदनादौ सत्त्वेऽपि कर्मत्वासिद्धिर्दोषः। तत्प्रयोजकरूपवत्त्वस्य धात्वर्थे विक्लित्त्यादावभावात् असत्त्वरूपेणोस्थित एव तदन्वयनियमादत आह [एवमिति] व्यापारवदित्यर्थः। फलांशः = विक्लित्त्यादिः। [उच्यत इति] एवं च धातूपात्तभावनानिरूपितकारकत्वस्य तज्जन्यविक्लित्त्यादिरूपफलाश्रयत्वेन कर्मत्वस्य चौदनादेर्नराबाधतया निरुक्तव्यवस्था प्रमाणपदवीमधिरोहत एव। अतश्च तिङन्तस्थल इव घञाद्यन्तस्थलेऽपि कारकत्वं, तद्व्याप्यकर्मत्वादिकं चावश्यमभ्युपेयमेवेति भावः। "प्रकृत्या साध्यावस्था" इति सारग्रन्थस्य प्रकृतिभागेन धातुना साध्यावस्थापन्ना फलरूपा व्यापाररूपा च क्रियाभिधीयत इत्यर्थः कार्यः। अत एव "साध्यत्वेन क्रिया तत्र" इति समनन्तरकारिकायां फलव्यापारोभयसाधारण्येन साध्यत्वलाभाय "क्रिया" इति साधारणशब्दनिर्देश इत्यवधेयम्।

धातुना फलव्यापारयोरुभयोरपि साध्यत्वेनाभिधाने मूर्धाभिषिक्तं प्रयोजनं दर्शयति [अत एवेति] तेन रूपेणोभयोरपि भानादेवेत्यर्थः। [स्तोकं पचतीति] स्तोकाभिन्नः पाक इति बोधः। अस्य प्रयोगस्य सर्वसम्मतत्वाद् दृष्टान्तत्वेनोपादानम्। [स्तोकं पाक इति] अत्र च दारुणाध्यापक इति "पूजनात्पूजितम्" इति सूत्रस्थभाष्योदाहरणं मानम्। दारुणं यथा भवति तथाध्यापक इति तदर्थः। [उपपद्यत इति] अयं भावः। ओदनस्य पाक इत्यादौ पाकपदार्थेऽन्वय ओदनस्य, यद्वा अध्याहृततिङन्तप्रतिपाद्यभावनायामोदनस्यान्वयः, यद्वा ओदनस्येति न कर्मषष्ठ्यन्त, किन्तु शेषषष्ठ्यन्तम्। यद्वा घञर्थकृतावोदनस्यान्वयः, अतः कृदन्ते धातुना साध्यत्वेन रूपेण, क्रिया नाभिधीयत इति वक्तुं पार्यते। अत्र तु नान्या गति स्तोकाद्यर्थस्य पच्यर्थान्वय एवस्तोकादिशब्देभ्यो द्वितीया सिद्ध्यतिस्तोकं पाक इति। तथा हि - अत्र स्तोकाभिन्नविक्लित्त्यनुकूलो व्यापार इति बोधः, एवं शोभनं पाकः मृदु पाक इत्यादावपि। अत्र स्तोक-शोभन-मृद्वादेरध्याहृततिङन्तप्रतिपाद्यक्रियायां कृदर्थे वा नान्वयः। किन्तु विक्लित्तिरूपे पच्यर्थफलांशे, तथैवानुभवात्। अन्यत्रान्वये द्वितीयाया असिद्धिः स्पष्टैव। नच स्तोकाद्यर्थस्य फलांशेऽन्वयेऽपि ततः कथं द्वितीयेति वाच्यम्। फलस्यापि व्यपदेशिवद्भावेन फलाश्रयत्वेन कर्मत्वात्तत्समानाधिकरणस्तोकादेरपि तत्त्वेन द्वितीयायाः सिद्धत्वात्। यद्वा धात्वर्थभावनां प्रति फलांशस्य कर्मतया तद्वाचकस्याप्रातिपदिकत्वापत्तौ द्वितीयाया अप्रवृत्तावपि तत्समानाधिकरणस्तोकादिपदाद् द्वितीयाप्रवृत्तेस्सुलभत्वात्। नच फलस्य क्रियाजनकत्वाभावेनाकारकत्वात्कथं कर्मत्वमिति वाच्यम्। तस्यापि क्रियाजनकत्वात्। तज्ज्ञानपूर्वकक्रियोत्पादनात्। एवं च ज्ञानगतजनकत्वस्य तद्विषयफले आरोपेण फलस्य कारकत्वनिर्वाहः स्पष्ट एव। अत्र साध्यस्वभावक्रियाजनकस्यैव कारकत्वेन फलस्य

तन्निर्वाहाय व्यापारस्य साध्यत्वेन भानमाश्रयणीयम्। तथा स्तोकाद्यर्थस्य धात्वर्थे फले साध्यत्वेनोपस्थिते सामानाधिकरण्येनान्वय एव नियमतस्तत्र द्वितीया सिद्ध्यति, नान्यथेति फलस्यापि साध्यत्वेन भानमास्थेयम्। व्यापारस्य साध्यत्वेनाभाने फलस्य कारकत्वं, तद्वाच्यकर्मत्वं च न सिद्ध्यति। फलस्य साध्यत्वेनाभाने तत्र स्तोकादेरन्वयो न सम्भवतीति स्पष्टमेव। अतस्तदुपपत्त्यर्थंकृदन्तेऽपि धातोरसत्त्वभूतफलव्यापार-वाचित्वमावश्यकमेव। अतस्तिङन्तस्थल एवासत्त्वभावनायाः प्रतीतिर्नान्यत्रेति वक्तुमशक्यम्। अत एव कारकाणामाख्यातार्थभावनायामेवान्वय इति मीमांसकसमयोऽप्ययुक्त इति।

यत्तु - अन्ये तु "ओजस्सहोऽम्भसा वर्तते" इत्यधिकारे "तत्प्रत्यनुपूर्वमीपलोमकूलम्" ४-४-२८ इति सूत्रे द्वितीयान्ततच्छब्दग्रहणं ज्ञापकं - "क्रियाविशेषणाद् द्वितीया" इत्यर्थस्य, नतु स्तोकाद्यर्थस्य कर्मत्वमपीत्याहुः" इति दर्पणकारास्तदनुसारिणः पञ्चोलिप्रभृतयश्च। तन्न। तत्सूत्रे तच्छब्दस्य द्वितीयान्तत्वाभावात्। 'वर्तते' इत्यस्याकर्मकतया तत्त्वायोगात्। अत एव "क्रियाविशेषणत्वान्नपुंसकत्वं प्रथमान्तत्वं च युक्तम्" इति तद्धितशेखरे नागेशेनोक्तम्। "तदिति द्वितीयान्तम्" इति वृत्तिपदमञ्जरीकाराशयस्त्वयुक्त एव। विस्तरेण निरूपयिष्यते चेदं सुबर्थनिर्णये।। ।।१४।।

एतदेव स्पष्टयति -

साध्यत्वेन क्रिया तत्र धातुरूपनिबन्धना।

सिद्धभावस्तु यस्तस्याः स घञादिनिबन्धनः।। ।।१५।।

नच घञादिभिः सिद्धत्वेनाभिधाने मानाभावः। पाक इत्युक्ते भवति नष्टो वेत्याद्याकाङ्क्षोत्थापनस्यैव मानत्वात्, धातूपस्थाप्यक्रियायां तदसम्भवस्योक्तत्वात्। स्तोकः पाक इत्यनापत्तेश्च। तस्माद्धात्वर्थान्वये स्तोकादिशब्देभ्यो द्वितीया घञर्थान्वये प्रथमा पुँलिङ्गता चेति - तत्सिद्धये घञादेः शक्तिरुपेया। एतेन घञादेः प्रयोगसाधुतामात्रमिति नैयायिकनव्योक्त मपास्तम्।

नच घञन्तशक्त्युपस्थाप्यान्वये स्तोकः पाक इति भवतीति वाच्यम्। घञन्तानुपूर्व्याः शक्तावच्छेदकत्वे गौर वादनुशासनाच्च घञादेरेव तथाशक्तिस्वीकारादिति दिक्।

एवञ्च घञ् शक्त्यभिप्रायेण "कृदभिहित" इति भाष्य, मतो न तद्विरोध इति भावः।। ।।१५।।

[एतदेवेति] प्रकृत्या साध्यावस्था, घञादिना प्रत्ययेन साधनावस्थेत्यर्थस्वरूपमेवेत्यर्थः। कारिकायां - तत्र = पाकादिशब्दे। साध्यत्वेन प्रतीयमाना क्रिया धातुरूपनिमित्तिका। तस्याः = क्रियायाः। यः सिद्धभावः स घञादिनिमित्तक इति भावः। प्रकृत्या साध्यत्वेनाभिधाने मानमुपदर्श्य प्रत्ययेन सिद्धत्वेनाभिधाने मानं दर्शयितुमाशङ्कते [न चेति] अस्य मानाभाव इत्यत्रान्वयः। घञादिः प्रयोगसाधुत्वमात्रार्थक इति दर्शनान्तरीयवासनावतोऽयं पूर्वपक्षः। समाधत्ते [पाक इति] ननु धातूपात्तभावनामादाय तन्निर्वाहोऽत आह - [धातूपस्थाप्यायामिति]। [उक्तत्वादिति] क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकरूपवत्त्वं साध्यत्वमित्यादिनेत्यर्थः। साधकान्तर माह [स्तोकः पाक इति] यत्तु "तेन रूपेणोपस्थितेः पश्य मृगो धावतीत्यादौ व्यभिचरितत्वादाह - स्तोकः पाक इति" इति दर्पणकाराः। तत्त्वसङ्गतमिति प्रागेव निरूपितम्। [अनापत्तेश्चेति] स्तोकाद्यर्थस्य धात्वर्थफलेऽन्वये फलस्य कर्मत्वात्तत्समानाधिकरणस्यापि तत्त्वाद् द्वितीया भवति। धात्वर्थव्यापारान्वये स्तोकः पाक इति भवति। व्यापारस्याकर्मतया ततो द्वितीयाया अप्राप्तेः। एतादृशविषयविभागाय व्यापारस्य द्वेधा भानमावश्यकमिति भावः। नच धात्वर्थव्यापारान्वयेनैव स्तोकः पाक इत्यादेः सिद्धतया घञः सिद्धावस्थापन्नभावनावाचित्वे फलाभाव इति वाच्यम्। धात्वर्थव्यापारान्वये तद्व्यापारस्य घञर्थव्यापारविशेषणतया विशेष्यतया भासमानव्यापारमादायैव लिङ्गस्य प्रवृत्त्या घञन्तस्य पुंस्त्वतया तल्लिङ्गस्यैव स्तोकादेरपि प्रवृत्तेः फलत्वात्। अन्यथा व्यापारान्वये स्तोकं पचतीति तिङन्तस्थल इवात्रापि स्तोकादेर्नपुंसकत्वापत्तेः। अत एव स्तोका पक्तिरित्यादौ विशेष्यानुरोधात् स्तोकादेः स्त्रीत्वमपि सिद्ध्यति। एतेन "घञ्वाच्यो भावः प्राधानम्" इति ग्रन्था व्याख्याताः। उक्तं च "कर्तरि कृत्" इति सूत्रे भाष्ये "घञादिवाच्यो भावो बाह्यः प्रकृत्यर्थात्" इति बोध्यम्। तदेतदभिप्रेत्याह [तस्मादिति] धात्वर्थान्वये = तदर्थफलान्वये। [घञर्थान्वये इति] धात्वर्थव्यापारस्य विशेषणतया घञर्थमुखप्रेक्षित्वाभिप्रायेणेदम्। स्तोकादेस्तु धात्वर्थव्यापारान्वय एवेति भावः। इदं च घञन्तस्थलाभिप्रायेण। व्यापारान्वये तिङन्तसमभिव्याहारे स्तोकं पचतीति नपुंसकतैवेति बोध्यम्।

[प्रथमेति] पञ्चोलिनस्तु "वस्तुतस्तु तत्प्रत्यनुपूर्वम्" इति ज्ञापकसिद्धेन "क्रियाविशेषणाद् द्वितीया" इति वचनेन साध्यभूतव्यापारान्वयेऽपि द्वितीयैवेति वदन्ति। तत्तु वस्तुतत्त्वनानवबोधनिबन्धनम्, दर्पणग्रन्थप्रामाण्यमूलकं च। न वस्तुतत्त्वनिमित्तकमित्युपेक्ष्यमेव। विवेचयिष्यते चेदं विस्तरेण सुबर्थनिर्णये।

कातन्त्रपरिशिष्टकाराद्युक्तिं खण्डयति [न चेति]। [घञन्तशक्तीति] स्तोकादेर्धात्वर्थव्यापारान्वयेऽपि प्रधानभूतघञर्थमुखप्रेक्षित्वस्यावश्यिकतया तत्कल्पनापेक्षया समुदायशक्त्युपस्थाप्यव्यापारान्वयमादाय

तदुपपत्तिस्वीकारे लाघवमित्याशयः। ननु वैयाकरणमतेऽपि विशिष्टशक्तिस्वीकारात्तदानुपूर्व्याः शक्तावच्छेदकत्वकल्पनस्यावश्यकतया गौरवं समानमेवेत्यत आह [अनुशासनाच्चेति] अवयवशक्तिग्राहकात् "भावे" इत्यनुशासनादित्यर्थः। [तथा शक्तीति] सिद्धावस्थापन्नभावशक्तीत्यर्थः। [दिगिति] एतदर्थस्तु "अनापत्तेश्च" इति प्रतीके प्रदर्शित एव।

उपसंहरति [एवञ्चेति] ओदनस्य पाक इत्यादौ कर्मषष्ठ्यनुरोधेन कृदन्तस्थलेऽपि धातुनाऽसत्त्वभूतभावनाप्रतीतेरावश्यकत्वे चेत्यर्थः। तदु'ावितभाष्यविरोधं परिहरति [घञ्शक्तीति] एवं च धातुनाऽसत्त्वावस्थापन्नभावनाभिधाने न काचिदनुपपत्तिरिति भावः। ।।१५।।

ननु कारकाणां भवनान्वयनियम एव पाक इत्यादावपि कर्मषष्ठ्यनुसारेण भावनाया वाच्यत्वं सिद्ध्येत्। स एव कुत इत्याशङ्कां समाधत्ते -

सम्बोधनान्तं कृत्वोऽर्थाः कारकं प्रथमो वतिः।
धातुसम्बन्धाधिकारनिष्पन्नमसमस्तनञ्।। ।।१६।।
तथा यस्य च भावेन षष्ठी चेत्युदितं द्वयम्।
साधुत्वमष्टकस्यास्य क्रिययैवावधार्यताम्।।।।१७।।

सम्बोधनान्तस्य क्रियायामन्वयः। 'त्वं ब्रूहि देवदत्त' इत्यादौ निघातानुरोधात्। "समानवाक्ये निघातयुष्मदस्मदा देशाः" इत्यनेन समानवाक्य एव तद्विधानात्। उक्तञ्च वाक्यपदीये -

सम्बोधनपदं यच्च तत् क्रियायां विशेषणम्।
व्रजानि देवदत्तेति निघातोत्र तथा सति।। इति।

पचति भवति देवदत्त इत्यादौ तु सूत्रभाष्यरीत्यैकवाक्यतासत्त्वात्स्यादेव निघातः। "तिङतिङः" ७-१-२८ इति सूत्रयता तिङन्तानामप्येकवाक्यतास्वीकारात्। "एकतिङ् वाक्यम्" इति वदतां वार्त्तिककाराणां मते परं न।

वस्तुतस्तु 'एकतिङ्विशेष्यकं वाक्यम्' इति तदभिप्रायस्य हेलाराजीये वैयाकरणभूषणेऽस्माभिश्च प्रतिपादितत्वात्तन्मतेऽपि भवत्येवेत्यवधेयम्।

कृत्वोऽर्थाः - "सङ्ख्याया: क्रियाभ्यावृत्तिगणने कृत्वसुच्" ५-४-१७ इति क्रियायोगे तत्साधुत्वोक्तेः। क्रियाया अभ्यावृत्तिः = पुनः पुनर्जन्म, तस्मिन् द्योत्ये इति तदर्थात्।

कारकम् - "कारके" इत्यधिकृत्य तेषां व्युत्पादनात्। कारकशब्दो हि क्रियापरः। करोति कर्तृकर्मादिव्यपदेशानिति व्युत्पत्तेः। तथाचाग्रिमेष्वपादानादिसंज्ञाविधिषु क्रियार्थककारकशब्दानुवृत्त्या क्रियान्वयिनामेव संज्ञेति भाष्ये स्पष्टम्।

ननु ओदनस्य पाक इत्यादौ कर्मषष्ठ्यनुसारेण घञन्ते धातुनाऽसत्त्वभावनोपस्थितिरङ्गीक्रियते। तच्च कारकाणां भावनान्वयसिद्ध्यधीनमिति स एव प्रथमं निरूपणीयः। तच्च नोपपद्यते। कारकाणां धात्वर्थफलान्वये बाधकाभावेन भावनान्वयनियमासिद्धेरिति मण्डनमतानुयायिनामाशङ्कासमाधानपरतया मूलमवतारयति [नन्विति] स एव = कारकाणां भावनान्वयनियम एव। [कृत इति] तेषां फलान्वयेनैवोपपन्नतया भावनान्वयनियमो न घटत इत्याशयः। कारकाणां भावनान्वय इत्येतदेव प्रकृतं, तथापि क्रियान्वयिप्रस्तावादन्येषां सम्बोधनादीनामपि प्रसङ्गादुपन्यासः कृत इति बोध्यम्। सम्बोधनान्तमित्याद्यष्टकस्य क्रिययैवान्वये साधुत्वमित्यवधार्यतामिति प्रकृतकारिकाद्वयस्य समुदितोऽर्थः। [सम्बोधनान्तस्येति] तदर्थस्येत्यर्थः। [निघातानुरोधादिति] - "आमन्त्रितस्य च" ८-२-१९ इति सूत्रविहितानुदात्तानुरोधादित्यर्थः। पदात्परस्यापादादिस्थस्य सर्वस्यामन्त्रितस्यानुदात्तं स्यादिति तत्सूत्रार्थः। निघातसिद्धेः सम्बोधनान्तार्थस्य क्रियान्वयप्रयोज्यत्वमुपपादयति [समानवाक्य इति] "समर्थः पदविधिः" २-१-१ "अनुदात्तं पदमेकवर्ज्यम्" ८-२-१८ इति सूत्रयोः कात्यायनवचनमिदम्। समानशब्द एकपर्यायः। "आख्यातं साव्ययकारकविशेषणं वाक्यम्" "एकतिङ्वाक्यम्" इत्येवंविधलक्षणलक्षिते एकवाक्ये एते विधयो वक्तव्याः" इति वाक्यार्थः। [तन्नियमादिति] निघातादिनियमादित्यर्थः। तथा च भाष्यकृतः "समानवाक्य" इति प्रकृत्य निघातयुष्मदस्मदादेशा वक्तव्याः। किं प्रयोजनम्? नानावाक्येषु मा भूवन्निति। अयं दण्डो, हरानेन। ओदनं पच, तव भविष्यति। ओदनं पच, मम भविष्यति" इति। सम्बोधनान्तार्थस्य क्रियायामनन्वये "त्वं ब्रूहि देवदत्त!" इत्यादावेकवाक्यताया अभावात् "समानवाक्य" इति प्रकृत्य विहितस्यामन्त्रितस्वरस्यानुपपन्नतया तद्विधानान्यथानुपपत्त्या सम्बोधनान्तार्थस्य क्रियायामन्वयोऽनुमीयत इति भावः। उक्तार्थे हरिं प्रमाणयति [उक्तञ्चेति] वाक्यपदीये = द्वितीयकाण्डे पञ्चमी कारिका। यत् सम्बोधनपदं, तत्तु स्वार्थद्वारा धातूपस्थाप्यभावनारूपक्रियायां, विशेषणं = व्यधिकरणविशेषणम्, उदाहरणे देवदत्तस्य व्रजनक्रियायाश्च नास्ति सामानाधिकरण्यम्। तथा सति = निरुक्तरीत्या विशेषणत्वे च। व्रजानि देवदत्त + इति अत्र = एतादृशे स्थले। निघातः = "आमन्त्रितस्य च" ८-१-१९ इति आष्टमिकनिघातः। सिद्ध्यतीति शेषः। आख्यातस्य सविशेषणत्वाद्वाक्यलक्षणसद्भावात्प्रवर्तत एव निघातः। अन्यथा देवदत्तेत्येतत्पदं नाव्ययं, नापि

कारकं, नापि तद्विशेषणमिति वाक्यलक्षणानाक्रान्तत्वान्निघाताप्रवृत्तिः स्पष्टैव। देवदत्त! व्रजानीति तु नोदाहरणमर्हति। "आमन्त्रितं पूर्वमविद्यमानवत्" ८-१-७२ इत्यामन्त्रितस्याविद्यमानवद्भावान्निघाता-प्रवृत्तेरिति हरिग्रन्थाशयः।

केचित् सम्बोधनविभक्तेरनुवाद्यविषयतयाऽनुवाद्यस्य विधेये साकाङ्क्षत्वाद्विधेयस्य च क्रियारूपत्वात्तस्य तत्रैवान्वय इत्यर्थसिद्धमेवैतन्नापूर्वम्। हे देवदत्त! त्वं सुन्दर इत्यादौ गुणोऽपि विधेय इतिचेत्तत्रापि क्रियाकाङ्क्षाशान्तये क्रियापदस्याध्याहार्यतया तत्रैवान्वय इति वदन्ति। स्पष्टं चेदं भूषणे।

नन्वेवमपि पचति भवति देवदत्त! इत्यादौ निघातासिद्धिः, सुप्तिङन्तचयो वाक्यमिति लौकिकवाक्यत्वसत्त्वेऽपि "एकतिङ् वाक्यम्" इति पारिभाषिकवाक्यत्वाभावादित्याशङ्क्य तादृशवार्त्तिकरीत्या निघाताप्रवृत्तावपि सूत्रभाष्यमते तत्प्रवृत्तिसिद्धिरित्याह [पचति भवतीति] आदिपदेन पश्य मृगो धावति देवदत्त! ईक्षस्व, हतशायिकाः शय्यन्ते देवदत्त! इत्यादेर्ग्रहणम्। निङन्तद्वयघटिते एकवाक्यत्वे सूत्रकारसम्मतिमाह [तिङतिङ इति] सूत्रयता = अतिङ इति निषेधघटितं सूत्रयता। [स्वीकारादिति] पूर्वोक्ते पचति भवति देवदत्त! इत्यादावेकवाक्यत्वाभावे "अतिङ" इत्यस्य वैयर्थ्यं स्पष्टमेवेति तेन तस्य तदभिमतत्वं सूच्यत इति भावः। "पचादयः क्रिया भवतिक्रियायाः कर्त्र्यो भवन्ति" इति भाष्यकृता स्पष्टमेव प्रतिपादितम्। तथाच हरिः -

बहुष्वपि तिङन्तेषु साकाङ्क्षेष्वेकवाक्यता।
तिङन्तेभ्यो निघातस्य पर्युदासस्तथाऽर्थवान् इति।। (वाक्य २-८४०)

इदंच लौकिकैकवाक्यत्वमाश्रित्य पश्य मृगो धावतीत्यादौ दोषवारणाय "अतिङ" इति प्रतिषेधं कृतवतः सूत्रकृतो मतमाश्रित्योक्तम्। समानवाक्याधिकारस्थं पारिभाषिकम् "एकतिङ्" इति वाक्यं चाश्रित्य अतिङ्ग्रहणं प्रत्याचक्षाणस्य कात्यायनस्य मतेनाह [एकतिङिति] वदतां = पारिभाषिकं वाक्यलक्षणं वदताम्। एकतिङ्ग्रहणं समानवाक्याधिकारस्याप्युपलक्षणम्।

वस्तुतस्तु सूत्रवार्त्तिकयोर्न मतभेद इत्याह [वस्तुतस्त्विति]। एकतिङवशेष्यकम् = एकतिङन्तार्थविशेष्यकम्। तदभिप्रायस्य = एकतिङिति सूत्रयतः कात्यायनस्य योऽभिप्रायस्तस्य। [हेलराजीय इति]

तिङन्तान्तरयुक्तेषु युक्तयुक्तेषु वा पुनः।
मृगः पश्यत यातीति भेदाभेदौ न तिष्ठतः।। (द्वितीयकाण्डे ४८८)

इति कारिकायां हेलाराजः "वार्त्तिककारस्याप्येकतिङित्यत्रैकतिङ्त्वं प्रधानतिङन्तापेक्षया प्रतिपाद्यमानं सूत्रकारमतानुगुण्यं भजत एवेत्यनयोर्नास्ति मतभेदः" इति।

[अस्माभिरिति] अनेन भूषणतत्सारग्रन्थयोर्निर्माता कौण्डभट्ट एवेति स्पष्टमेव लभ्यते। एतेन कादम्बरीतत्सङ्ग्रहयोरिव भुषणतत्सारयोर्भिन्नकर्तृकत्वमित्यभिप्रयन्तः केचन परास्ताः। तन्मतेऽपि = वार्त्तिककारमतेऽपि। [भवत्येवेति] पचति भवति देवदत्त! इत्यादावाष्टमिकनिघातो भवत्येवेत्यर्थः। अतो न मतभेद इति तात्पर्यम्।

यत्तु "हेलाराजीय इति - बहुष्वपि तिङन्तेषु .... प्रतिषेधस्तथार्थवान्" (वाक्य - २-४८२ श्लो) इति वाक्यपदीयव्याख्यावसर इति शेषः" इति दर्पणकाराः। तन्न। एतत्कारिकाव्याख्याने हेलाराजेन तथाऽनुक्तेः। "तिङन्तान्तरयुक्तेषु" २-४८८ इत्यादिहरिकारिकाव्याख्यावसर एव तेन तथोक्तेश्च। प्रदर्शितं चैतत्समनन्तरमेव।

द्वितीयं व्याचष्टे [कृत्वोऽर्था इति] कृत्वः = कृत्वसुचः, योऽर्थः = क्रियाभ्यावृत्तिगणनं, स येषां ते = कृत्वोऽर्थाः। "सङ्ख्याया: क्रियाभ्यावृत्तिगणने कृत्वसुच्" ५-४-१७ "द्वित्रिचतुर्भ्यः सुच्" ५-४-१८ "एकस्य सकृच्च" ५-४-२० "विभाषा बहोर्धाऽविप्रकृष्टकाले" ५-८-२२ इति सूत्रैर्विहिताः कृत्वसुच्, सुच्, धा इत्येते त्रयः कृत्वोऽर्थप्रत्ययाः। अत एव कारिकायां "कृत्वोऽर्था" इति बहुवचनम्। अत एव "तद्धितश्चासर्वविभक्तिः" २-१-३८ इति सूत्रे "कृत्वोऽर्था" इति भाष्यप्रतीके "कृत्वसुच् सुच् धा" इति कैयटः। तत्रैव सूत्रे "कृत्वोऽर्था" इति कौमुदीप्रतीके "कृत्वसुच् सुज्धाः" इति शब्देन्दुशेखरे नागेशः। सुच्धाप्रत्ययय्योस्सङ्ग्रहाय "कृत्वोऽर्था" इत्यर्थग्रहणम्।

पञ्चोलिनस्तु "कृत्वोऽर्था इति - कृत्वसुच्, सुञ्च द्वावेव कृत्वोर्थप्रत्ययौ, बहुवचनं तु लक्ष्यबहुत्वाभिप्रायेण" इति वदन्ति। तत्तु मूल ग्रन्थानवेक्षणमूलकत्वाच्चिन्त्यमेव।

पञ्चकृत्वो भुङ्क्ते, द्विर्भुङ्क्ते, त्रिः, चतुः, सकृत्, बहुधा बहुकत्वो वा दिवसस्य भुङ्क्ते इति कृत्वोऽर्थप्रत्ययोदाहरणानि।

[सङ्ख्याया: क्रियाभ्यावृत्तिगणन इति] क्रियाभ्यावृत्तिगणने वर्तमानेभ्यः सख्याशब्देभ्यः स्वार्थे कृत्वसुच् स्यादिति सूत्रार्थः। [इति] = इत्यादिचतुस्सूत्र्या। क्रियायोगे = स्वसमभिव्याहृत-धातूपस्थाप्यक्रियासम्बन्धे। तत्साधुत्वोक्तेः = तेषां कृत्वसुजादीनां त्रयाणां साधुत्वोक्तेः। क्रियाभ्यावृत्तिगणने द्योत्ये विधीयमानानां तत्रैवान्वयस्य शास्त्रतो लाभादित्यर्थः। पञ्चकृत्वो भुङ्क्ते इत्यादौ पञ्चसङ्ख्योत्पत्तिका भुजिक्रियेति बोधः।

ननु पुनः पुनरावृत्तिः क्रियायाः क्रियाभ्यावृत्तिः। तद्गणने वर्तमानात्सङ्ख्याशब्दात् कृत्वसुच् स्यादिति सूत्रार्थे उपाय एव अभ्युपाय इतिवदावृत्तिरेव अभ्यावृत्तिरित्यर्थेन आवृत्तिशब्दस्य द्वितीयादिप्रवृत्तावेव रूढत्वेन, आद्यायाः क्रियाप्रवृत्तेरभ्यावृत्तित्वाभावात् षट्कृत्वः प्रवृत्तौ "पञ्चकृत्वः पचति" इति स्यात्। द्विः प्रवृत्तौ "सकृत्पचति" इति स्यादित्यतो विवक्षितार्थमाह [क्रियाया अभ्यावृत्तिः = पुनः पुनर्जन्मेति] अयमर्थः - सूत्रेऽभ्यावृत्तिशब्देन पुनः पुनरावृत्तिरित्यर्थो न गृह्यते। आवृत्तिगणन इत्येव सिद्धेऽभिग्रहणस्य वैयार्थ्यापात्तेः। किन्तु अभिमुखी + वृत्तिः = जन्मलक्षणा प्रवृत्तिरित्ययमर्थ आश्रीयतेऽभिग्रहणसामर्थ्यात्। एवं च व्यवहाराय अभिमुखी + वृत्तिः = प्रवृत्तिः = जन्म = अभ्यावृत्तिः = पुनः पुनर्भवनं = पुनः पुनर्जन्मेत्यर्थः सम्पद्यते। तत्रचाद्या प्रवृत्तिरन्तर्भवति। तद्यथा पौन पुन्यं भृशार्थो वा क्रियासमभिहार इत्यत्र योऽपि द्विः पचति तत्रापि पापच्यत इति भवति। तेन षट्कृत्वः प्रवृत्तौ पञ्चकृत्व इति न। नापि द्विः प्रवृत्तौ सकृदिति। किन्तु षट्कृत्वः पचति, द्विःपचतीत्येव भवति। एवं चैककर्तृकाणां तुल्यजातीयानां क्रियाणामभ्यावृत्तेः = पुत्रः पुनर्जन्मनः = उत्पत्तेः। गणनं = सङ्ख्यानं = क्रियाभ्यावृत्तिगणनमित्यर्थः पर्यवस्यति। एष चार्थोऽभ्यावृत्तिशब्दस्य तत्रैव प्रसिद्धेर्लभ्यते। अत एव सूत्रेऽभिग्रहणं कृतम्। भिन्नकर्तृकासु भिन्जातीयासु च क्रियासु निरन्तरमनुष्ठीयमानास्वपि क्रियाभ्यावृत्तिप्रत्ययाभावात्तत्र पञ्चकृत्व इत्यादिवारणाय क्रियाया विशेषणद्वयमेककर्तृकाणामिति, भिन्नजातीयानामिति च। तथा च "एकस्य सकृच्च" ५-४-२० इति सूत्रे भाष्यं - "नतु पुनः पुनरावृत्तिरभ्यावृत्तिः। किं तर्हि ? अभिमुखीप्रवृत्तिरभ्यावृत्तिः। पूर्वा च परे प्रत्यभिमुखी, परे च पूर्वां प्रत्यभिमुख्यौ" इति। "अस्ति हि तासां प्रवृत्तीनामेकसाधनानां परस्परापेक्षा - एतावत्य एताः प्रवृत्तय इति। सकृद्भुङ्क्ते इत्यादौ त्वेकस्या अपि वृत्तेः स्वरूपलाभं प्रत्ययाभिमुख्यमस्ति" इति कैयटः। अभिमुखीवृत्तिरभ्यावृत्तिर्जन्मलक्षणोच्यत इत्यस्मिन् सिद्धान्तपक्षे धात्वर्थानुवादक एव आङ्, यथा "अधिपरी अनर्थकौ" २-४-९३ इति।

"सङ्ख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्" ५-४-१७ इति सूत्रे भूरि वारान् भुङ्क्ते इत्यत्र प्रत्ययवारणाय "सङ्ख्यायाः" इति। वारशब्दस्य कालवाचित्वेऽपि क्रियावृत्तेरपि गम्यमानत्वात्प्रत्ययप्रसङ्गः।

ननु सूत्रे क्रियाग्रहणं व्यर्थम्। द्रव्यगुणयोः स्वभावसिद्धयोः शब्देन प्रतिपाद्यमानयोर्गमनायोग्यं पुनः पुनर्जन्म न सम्भवति। साध्यार्थविषयत्वाद्गणनायाः। यत एकैव तेषामुत्पत्तिः। क्रियायास्तु धातुतो निवृत्तभेदाया एव प्रत्ययेन भवति पुनः पुनर्जन्मेति प्रतीतिरावृत्तिश्च। द्रव्यस्य त्वनिवृत्तभेदस्यैव शब्देनोपादानान्न पुनः पुनरुत्पत्तिः, नाप्यावृत्तिः। पुनः पुनर्जन्मयोग्यस्य जन्मैवाभ्यावृत्तिपदेनोच्यते।

अभिमुखीत्यर्थकाभिपदस्वारस्यात्। एवं चाभ्यावृत्तिगणन इत्येव सिद्धे क्रियाग्रहणस्य वैयर्थ्यं स्पष्टमेवेति चेत् "एकस्य सकृच्च" ५-४-२० इत्यत्रानुवृत्त्यर्थं क्रियाग्रहणम्। तत्रैकशब्देनैकैव क्रियाव्यक्तिराख्यायते। न च तस्या आवृत्तिः सम्भवति। तत्रासति क्रियाग्रहणे एको भुङ्क्ते इत्यत्रापि सुच् प्रसङ्गः। एवं च सुखप्रतिपत्तये इहैव क्रियाग्रहणं कृतम्।

क्रियामात्रगणने पञ्च पाकाः, दश पाका इत्यादौ प्रत्ययवारणायाभ्यावृत्तिग्रहणम्। अत्र हि कर्तृभेदेन कर्मभेदेन वा भिन्नकालाः क्रिया एव गण्यन्ते, नाभ्यावृत्तिः। सा हि भिन्नकालानामेककर्तृकाणां च नैरन्तर्ये सति भवति।

नन्वेवमपि गणनग्रहणं व्यर्थम्। यतः सङ्ख्या गणनात्मिकैव। न च शतं वारान् भुङ्क्ते इत्यादौ प्रत्ययवारणाय तदिति वाच्यम्। वारशब्देन सङ्ख्याया उक्तत्वेन सङ्ख्याशब्दस्य तद्वृत्तित्वाभावादिति चेत्, यत्र साक्षादभ्यावृत्तिगणनं तत्रैव प्रत्ययार्थं गणनग्रहणम्। अन्यथा क्रियाभ्यावृत्ताविति्येवोच्यमाने सप्तदश प्राजापत्यानजांस्तूपरानेकवर्णा नालभेत" इत्यत्र शब्दतोऽभ्यावृत्त्यप्रतीतावपि अर्थतस्तत्प्रतीतिरस्त्येवेति साधनगणनवाचिनोऽपि सप्तदशशब्दात्प्रत्ययो दुर्वारः। नचाऽऽलम्भनक्रियायाः प्रतिपशु वस्तुतोऽभ्यावृत्तिसत्त्वेऽपि सप्तदशपदस्य न तद्वृत्तित्वमिति वाच्यम्। गणग्रहणाभावेऽभ्यावृत्तिविषये सङ्ख्यावाचकात्प्रत्यय इत्येव सूत्रार्थस्य लाभात्। एवञ्च शतं वारान् भुङ्क्ते इत्यपि प्रत्युदाहरणं भवत्येवेति बोध्यम्।

केचित्तु व्याख्यानतोऽभ्यावृत्तिरूपसङ्ख्येये वर्तमानात्सङ्ख्यावाचकात्प्रत्यय इत्यर्थेन न प्रागुक्तदोषावकाशः। तस्माद्गणनायां ये प्रसिद्धाः सङ्ख्यावाचकाश्शब्दा स्तद्ग्रहणार्थं गणनग्रहणम्। तेनोभशब्दाद्युग्मशब्दाच्च न कृत्वसुच्। न ह्येक उभौ त्रयः युग्ममिति लोके गण्यत इति वदन्ति।

तृतीयं व्याचष्टे [कारकमिति] तेषां = कर्त्रादिकारकाणां। ननु कर्तृपर्यायकारकशब्देन क्रियाश्रय इत्यर्थलाभेन ततो न भवदभीष्टसिद्धिरत आह [कारकशब्द इति] अधिकृतः कारकशब्द इत्यर्थः। कर्तृण्वुलन्तः कारकशब्दः क्रियारूपं कर्तारमभिदधातीत्याह [क्रियापर इति] ननु कारकशब्दाल्लोके क्रियाप्रतीतिर्न दृष्टेत्यत आह [करोतीति] अत्र सूत्रे कारकशब्दः क्रियापर इति भावः। व्यपदेशान् = व्यवहारान्। सा हि क्रिया कर्त्रादीनि विशिष्य व्यपदेशयुक्तानि करोति। तथाच भाष्यम् - "अथवा यावद् ब्रूयात् - क्रियायामिति तावत्कारक इति" इति। ततः किमायातम्? अत आह [तथाचेति] सूत्रस्थकारकपदस्य क्रियापरत्वे चेत्यर्थः। संज्ञाविधिषु = संज्ञाविधायकसूत्रेषु [कारकशब्देति] स च शब्दः सामान्ये नपुंसकः क्रियायामित्यर्थक इति भावः। [क्रियान्वयिनामेवेति] कारक इति विषयसप्तम्यन्तम्।

अन्वयीत्यस्याध्याहारः। तेन निरुक्तार्थलाभ इति भावः। [संज्ञेति] अपादानादिसंज्ञेत्यर्थः। अत्र पक्षे "कारकाद्दत्तश्रुतयोरेवाशिषि" ६-२-१४८ इत्यादौ कारकशब्दः स्मर्यते। तेन एतदधिकारोक्तं कर्त्रादिषट्कमेव गृह्यते। तेन नटश्रुतमित्यादौ न दोषः। [भाष्ये स्पष्टमिति] प्रकृतसूत्रे भाष्ये "अथवा यावद् ब्रूयात् क्रियायामिति तावत्कारक इति" इत्यतः पूर्वं "किमिदं कारक इति? संज्ञानिर्देशः" इत्युक्तम्। कारक इति व्यत्ययेन प्रथमार्थे सप्तमी। तच्च अग्रिमेष्वपादानादिविधिष्वनुवर्त्य वाक्यभेदेन व्याख्येयम्। अपाये ध्रुवं कारकसंज्ञं स्यात्, उक्तं कारकमपादानसंज्ञं स्यादित्यर्थः। अन्वर्था चेयं कारकसंज्ञा, करोति = क्रियां जनयतीति, तच्जनकं च तत्रैवान्वेति। तेन क्रियानन्वयिनां न कारकत्वं यथा ब्राह्मणस्य पुत्रं पन्थानं पृच्छतीति। इह हि ब्राह्मणः पुत्रविशेषणं, नतु क्रियान्वयी। भूषणे एतत्पक्षाशयोऽपि प्रदर्शितः। एवं च पक्षद्वयेऽपि कारकाणां क्रियायामेवान्वये साधुत्वमित्यंशः स्पष्टमेव लभ्यते।

प्रथमो वतिः - "तेन तुल्यं क्रिया चेद्वतिः" ५-१-११५ इति विहितः। तत्र यत्तुल्यं सा क्रिया चेदित्युक्तत्वात्।

धातुसम्बन्धाधिकारे "धातुसम्बन्धे प्रत्ययाः" ३-४-१ इत्यधिकृत्य तेषां विधानात्।

असमस्तनञ् - समासायोग्यः प्रसज्यप्रतिषेधीयो नञित्यर्थः। उत्तरपदार्थान्वयोऽपि समासविकल्पेन पक्षेऽसमस्तत्वाद् यथाश्रुतग्रहणायोगात्।

नचासमस्तनञः क्रियान्वये मानाभावः, न त्वं पचसि, न युवां पचथः, चैत्रो न पचति, घटो न जायत इत्यादौ क्रियाया एव निषेधप्रतीतेः। अत एव विद्यमानेऽपि घटे तादृशप्रयोगः। तथाच घटो नास्तीत्यत्रापि अस्तित्वाभाव एव बोध्यते। नहि घटो न जायते नास्तीत्यनयोर्धात्वर्थभेदमन्तरेण विशेषः। तथाच भूतले न घट इत्यत्राप्यस्तीत्यध्याहार्यम्। प्रकारतासम्बन्धेन नञर्थविशेष्यकबोधे धातुजन्य-भावनोपस्थितेर्हेतुत्वस्य क्लृप्तत्वात्। शेषं नञर्थनिर्णये वक्ष्यते।। ।।१६।।

चतुर्थं व्याचष्टे [प्रथमो वतिरिति] प्रथमग्रहणप्रयोजनमाह [तेन तुल्यमिति] अनेन "तत्र तस्येव" ५-१-११६ इति सूत्रविहितवत्यर्थस्य न क्रियान्वय इति सूचयति। तद्बीजं तु "तेन तुल्यम्" इति सूत्रात्तत्तत्क्रियाग्रहणाननुवृत्तिरेव। द्रव्यगुणादितुल्यार्थं तत्सूत्रं भविष्यति। प्रकृतार्थसिद्धिप्रकारं दर्शयति [तत्रेति] सूत्र इत्यर्थः। "तेन तुल्य क्रियाचेद्वतिः" इत्यत्र तुल्यमिति सामान्ये नपुंसकं

प्रथमान्तं च व्यापारविशेषणत्वात्। क्रियेति च सन्निहितत्वात्समानविभक्तिकत्वात्प्राधान्याच्च प्रत्ययार्थविशेषणम्। तृतीयासमर्थात्तुल्यमित्यर्थे वतिप्रत्ययः स्यात्, यत्तुल्यं सा क्रिया चेदिति सूत्रार्थः। तदेतदाह [यत्तुल्यं सा क्रियाचेदिति]। [इत्युक्तत्वादिति] ननु क्रियाग्रहणं प्रकृत्यर्थविशेषणमेवास्तु। वृत्तौ ब्राह्मणादिशब्दास्तत्कर्तृकाध्ययनपराः। तथाच क्रियाबोधकात्तृतीयान्तात्तुल्यमित्यर्थे वतिरिति फलतीति चेन्न। ब्राह्मणादिशब्दानां क्रियोपमानत्वयोग्यार्थकत्वेऽपि तत्र तृतीयार्थान्वयेन सत्त्वरूपतया क्रियात्वासम्भवात्क्रियाग्रहणस्य तद्विशेषणत्वायोगात्। नच स्थातव्येन तुल्यं गच्छतीत्यादौ तत्सम्भव इति वाच्यम्। तत्रापि तृतीयार्थान्वयेन सत्त्वरूपतया क्रियात्वासम्भवात्। पाकादीनां तु सत्त्वरूपता स्पष्टैव। असत्त्वभूतार्थकतिङन्तार्थानामुपमानत्वमेव न। "न वै तिङन्तेनोपमानमस्ति" इति सन्सूत्रस्थभाष्यात्। उपमेयत्वं त्वस्त्येव। क्त्वाद्यन्तानां क्रियान्वयनियमेन तुल्यशब्दार्थेऽन्वय एव नास्ति। अत एव प्रकृत्यर्थविशेषणत्वे "कथं च तृतीयासमर्थं नाम क्रिया स्यात्" इत्युक्तं भाष्ये। यस्यार्थस्य तिङन्तादिवाच्यत्वे क्रियारूपताऽभूत्, स सत्त्वभूतोऽपि क्रियेत्याश्रयिष्यत इति कल्पने गौरवं स्पष्टमेव। नृत्यवद्गमनमित्यादावस्तीत्यध्याहृत्य सत्तयोरेवोपमानोपमेयभावेनादोषः। अतः क्रियाग्रहणं च प्रकृत्यर्थविशेषणम्। किन्तु निरुक्तरीत्या प्रत्ययार्थविशेषणमेव। एवं चोपमेयस्य क्रियात्वे उपमानवाचकात्तृतीयान्ताद्वतिरिति फलितार्थः। एतेन "तेन तुल्यमिति - तृतीयान्तात्तुल्यमित्यर्थे वतिः स्यात्, यत्तुल्यं सा क्रिया चेदित्यर्थः। उपमानपदार्थः उपमेयपदार्थश्च क्रियेति यावत्। तथाच "ब्राह्मणवदधीते क्षत्रियः" इत्यनेन ब्राह्मणाध्ययनसदृशं क्षत्रियकर्तृकाध्ययनमिति बोधः। ब्राह्मणपदं चात्र ब्राह्मणाध्ययने लाक्षणिकम्। तस्मात् क्रियाबोधकात्तृतीयान्ताद्वतिरिति फलितम्" इति पञ्चोलिनः परास्ताः।

नन्वेवं ब्राह्मणवदधीते इति न स्यात्। ब्राह्मणसादृश्यस्याध्ययनेऽभावादिति चेन्न। वृत्तौ ब्राह्मणादिशब्दानां तत्कर्तृकाध्ययने लाक्षणिकत्वात्। सौष्ठवादिश्च साधारणो धर्मः। ब्राह्मणाध्ययनसदृशं क्षत्रियाध्ययनमिति बोधः। एवं च क्रियान्वय एवास्य साधुत्वम्।

अरविन्दवत्सुन्दरं मुखमित्यत्र भवतिक्रियाध्याहारः। अरविन्दपदेन सुन्दराराविन्दभवनं लक्ष्यते। सुन्दराराविन्दभवनसदृशं सुन्दरमुखभवनमिति बोधः। अनयोस्सौन्दर्यधर्मकसादृश्यं तु व्यञ्जनया बुध्यते।

अस्य वतेः क्रियान्वय एव साधुत्वस्वीकारेण ब्राह्मणेन तुल्यमस्य रूपमित्यादौ न वतिः। "तत्र तस्येव" ५-१-११६ इति वतिप्रत्यये मथुरावत्पाटलीपुत्रे प्राकारः इत्यस्य मथुरायामिवेत्यर्थः। मथुरावत्पाटलीपुत्रस्य विस्तारः इत्यत्र मथुराया इवेत्यर्थः। अत्र प्राकारयोरुपमानोपमेयभावः।

पञ्चमं व्याचष्टे [धातुसम्बन्धाधिकार इति] धातुसम्बन्धाधिकारे निष्पन्नं यत्प्रत्ययान्तरूपं तत्। [धातुसम्बन्धे प्रत्यया इति] धात्वर्थयोः प्रत्ययार्थद्वारकविशेष्यविशेषणभावरूपसम्बन्धे कालान्तरविहितानां प्रत्ययानामन्यस्मिन् काले साधुत्वाभ्यनुज्ञानार्थमिदं सूत्रम्। यथा "वसन् ददर्श" इत्यत्र वर्तमानकाले विहितस्य लटोऽनेन भूतकाले साधुत्वम्। यथावा गोमानासीदित्यत्र "तदस्यास्त्यस्मिन्निति मतुप्" ५-२-९४ इति सूत्रेण अस्तीति वर्तमानकाले विहितस्य मतुपोऽनेन भूतकाले साधुत्वम्। अतीतवासकर्तृकर्तृकं दर्शनम्, अतीतसत्ताकगोमत्कर्तृकातीता सत्तेति च बोधः। एवं च वसन्नित्यत्र शतुः, गोमानित्यत्र मतुपश्च धातूपस्थाप्यक्रियासम्बन्धनैयत्येन तत्रान्वय एव साधुत्वमिति स्पष्टमेव।

सूत्रे धातुशब्देन तदर्थो लक्ष्यते। धात्वोः सम्बन्धस्यानुपपन्नत्वात्। नच यथा सन्विधौ कर्मत्वं समानकर्तृकत्वं च धातोरर्थद्वारकं विशेषणमाश्रितं, यथा च क्यङ्विधौ सुबन्तस्य कर्मत्वं, तथेहापि धात्वोरर्थद्वारकः सम्बन्ध इति वाच्यम्। तथाहि सति परस्परसम्बद्धार्थबोधकधातुप्रयोगे प्रत्यया इति सूत्रार्थस्य फलितत्वेन गोमानासीत् गोमान् भवितेत्यादावनेकधातुप्रयोगाभावेन प्रकृतसूत्रस्याप्रवृत्त्यापत्तेः। तथा सति गोमानिति मतुपो भूतादावसाधुत्वापत्तिः। अतो धातुपदस्यार्थपरत्वमाश्रयणीयम्। गोमानित्यादौ अस्तेरप्रयोगेपि तदर्थस्य विद्यमानत्वेन तत्रापि प्रकृतसूत्रप्रवृत्तेर्निष्प्रत्यूहतया मतुपो वर्तमानकालादन्यस्मिन् कालेऽपि साधुत्वं सिद्ध्यति।

ननु "धातुसम्बन्धे प्रत्ययाः" इत्यनेन कालान्तरे प्रत्ययाः साधव इत्यर्थलाभः कथम्? यदितु यत्राप्राप्तास्तत्राप्येतत्सूत्रेण प्राप्येरन् तर्हि उपपदोपाधिप्रकृतिप्रत्ययार्थानां सङ्करे सति सर्वोपप्लवः स्यादिति चेत्, तत्तद्विधिवाक्यैरेव स्वविषये प्रत्ययाः सिद्ध्यन्ति। परन्तु कालमात्रमनेन बाध्यते, नत्वन्यदपि। अल्पबाधेनोपपत्तौ बहुबाधस्यान्याय्यत्वात्। अन्यदेव तर्हि किञ्चिदेकं बाध्यतामिति चेन्न। किं तदित्यत्र विनिगमकाभावात्। कालांशेऽपि किं विनिगमकमिति चेत्प्रायदर्शनमिति गृहाण। किञ्च "वर्तमानसामीप्ये वर्तमानवद्वा" ३-३-१३१ इत्यारभ्य प्रायः कालान्यत्वप्रतिपादनस्यैव दर्शनेन तदेवात्र विनिगमकम्। अनेन प्रयोगे श्रूयमाणानां प्रत्ययानां कालान्तरे विधानं क्रियते। एवं च वसन् ददर्शेत्यादौ भूते शतुः साधुत्वे बोधितेऽर्थापत्त्या तदर्थको लडपि कल्प्यते। गोमानासीदित्यत्र मतुपो भूते, गोमान् भवितेत्यादौ तस्य भविष्यति च साधुत्वं बोध्यते। स्यादेतत्। वसन् ददर्श (शिशु १ सर्ग १) वनानि पश्यन् ययौ (रघु २) निवेदयिष्यतो मनो न विव्यथे" (किरात सर्ग १) इत्यादिमहाकविप्रयोगेषु दर्शननिवेदनादीनामतीतानामपि लट्लृडादिभिः सम्बन्धो दृश्यते। स च कालबाधेऽपि समर्थनीय इत्येतदर्थमिदं सूत्रम्। तत्र ददर्श, ययौ, विव्यथे इति लिडर्थकालस्यैव बाधः किं न स्यादिति चेत्सत्यम्। परं त्वयं विशेषः। तिङन्तवाच्या क्रिया प्रधानभूता। कृदन्तोपस्थाप्या सा गुणभूता। तत्र

प्रधानानुरोधेन गुणस्य नयनं, ननु विपरीतम्। तेन प्राधान्येन या क्रिया प्रतीयते तस्यां यत्कालिकत्वं तस्मिन् काले गुणभूतक्रियावाचिभ्यः प्रत्यया भवन्तीति वसन्नित्यादौ वर्तमानकालबाधेन भूते शत्रादीनां साधुत्वं, नतु ददर्शेत्यादौ भूतकालबाधेन वर्तमाने साधुत्वमित्यदोषः।

ये तु नैयायिकाः प्रथमान्तार्थविशेष्यकं बोधं स्वेच्छामात्रेणास्थाय "क्रियाप्रधानमाख्यातम्" इति भाष्यवार्त्तिकनिरुक्तादिमहर्षिवचांस्युपेक्षन्ते, तेषामयमपि दोषः प्रसज्यते। तन्मते तिङन्तोपस्थाप्यक्रियायाः प्रथमान्तार्थापेक्षया प्राधान्याभावात् तदनुरोधेन भूते लटः शत्रादेः कल्पनायोगात्। अन्येऽपि दोषास्तन्मते निरूपिताः प्राक्।

षष्ठं निरूपयति [असमस्तनञिति] समासाघटको नञित्यर्थः। समासे तु नञर्थस्य समभिव्याहृतपदार्थान्वयित्वमेव। इदं च समर्थसमासाभिप्रायकम्। असूर्यम्पश्याः, अश्राद्धभोजीत्याद्यसमर्थसमासे नञर्थस्य क्रियायामेवान्वयात्।

नन्वब्राह्मणमानयेत्यादौ नञ्समासस्य वैकल्पिकतया तदभावपक्षे तस्याप्यसमस्ततया तत्रापि क्रियान्वयापत्तिरित्यत आह [समासायोग्य इति] [यथाश्रुतेति] न ब्राह्मणमानयेत्यादौ नञर्थस्य ब्राह्मणादावन्वयेन व्यभिचारापत्तेरिति भावः।

क्रियायामनन्वये पुरुषव्यवस्थानुपपत्तिं दर्शयति [न त्वं पचसीति] नञर्थस्य नामार्थेऽन्वयोपगमे युष्मदस्तिङ्सामानाधिकरण्याभावान्मध्यमः पुरुषो न सिद्ध्येत्। एवं नाहं पचामीत्यत्रापि बोध्यम्। वचनव्यवस्थापि नोपपद्यत इत्याह [न युवां पचथः इति]। त्वदभाव इत्यर्थे तत्र द्वित्वाद्यभावाद् द्विवचनाद्यसिद्धिरित्याशयः। अत्र पुरुषव्यवस्थापि न स्यादिति समानमेव।

प्रथमपुरुषोऽपि न सिद्ध्यतीत्याह [चैत्रो न पचतीति] अत्र चैत्रकर्तृकपाकाभाव एवानुभूयते, नञर्थस्य क्रियान्वय एव तत्सिद्धिरिति स्पष्टमेव। अन्यथा चैत्राभावकर्तृकः पाक इत्यर्थे पाके तत्कर्तृकत्वस्य बाधितत्वात् "शेषे प्रथमः" १-४-१०८ इति प्रथमोऽपि न स्यात्। यत्तु "पाकानुकूलकृत्यभावार्थकत्वे त्वन्मते पुरुषव्यवस्थापकाभावेन कदाचिन्मध्यमोत्तमयोरापत्तिश्चेति बोधयितुं "चैत्रो न पचतीत्युक्तम्" इति दर्पणकाराः। तन्न। पुरुषव्यवस्थाया एवानुपपत्तिरिति प्रकृते मध्यमादेरापत्तेर्दुरुपपदात्वात्। एतेन "चैत्र इति - अभावे एकत्वविशिष्टचैत्रादेर्विशेषणत्वे एकवचनस्य सिद्धावपि प्रतियोगिनो द्वित्वादिविशिष्टत्वेऽपि एकवचनमेव स्यादिति भावः" इति पञ्चोलिनोपि परास्ताः। पुरुषव्यवस्थाया एवानुपपत्तौ एकवचनस्याप्यनापत्तेर्गले पतितत्वात्। "चैत्रो न पचती" इति मूले कर्तरि द्वित्वादिव्यञ्जकशब्दाभावाच्च।

[निषेधप्रतीतेरिति] त्वत्कर्तृकपाकाभाव इति धात्वर्थक्रियाया अभावबोधने तु युष्मदाद्यर्थसामानाधिकरण्यस्य तिङि सत्त्वात्पुरुषव्यवस्था सिद्ध्यतीति भावः।

[अत एवति] नञः क्रियाप्रतियोगिकाभावबोधकत्वादेवेत्यर्थः। [विद्यमानेऽपीति] घटवत्तानिश्चये घटाभावबोधस्याशक्यतया तत्र घटकर्तृकोत्पत्त्यनुकूलव्यापाराभाव एव बोद्धव्य इति भावः। उक्तरीत्या नञः क्रियाप्रतियोगिकाभावबोधकत्वध्रौव्ये घटो नास्तीत्यत्र घटाभावकर्तृकत्वस्य धात्वर्थेऽबाधेऽपि तद्बोधमनादृत्य घटास्तित्वाभावबोधाभ्युपगम उचितः, वक्ष्यमाणकार्यकारणभावबलादित्याह [तथाच घटो नास्तीत्यत्रापीति] अस्तित्वाभाव एवेत्येवशब्देन घटाभावव्यवच्छेदः। उक्तमेवार्थमुपपदायति [नहीत्यादिना] ननु क्रियापदरहिते वाक्ये नञर्थस्य नामार्थ एवान्वयः स्वीकार्य इत्यत आह [तथाचेति]। [अध्याहार्यमिति] तथाच "अनभिहिते" २-३-१ इति सूत्रे भाष्यम् "अस्तिर्भवन्तीपरोऽप्रयुज्यमानोऽप्यस्ति" इति। "भवन्तीपरः = लट्परः" इति कैयटः। [प्रकारतासम्बन्धेनेति] नञर्थाभावनिष्ठविशेष्यतानिरूपित-प्रकारतासम्बन्धेन शाब्दबुद्धित्वावच्छिन्नं प्रति विशेष्यतासम्बन्धेन धातुजन्येपस्थितेर्हेतुत्वस्य न त्वं पचसीत्याद्यनुरोधेन क्लृप्तत्वादन्यत्रापि तद्बोधोपपत्तये क्रियापदाध्याहार आवश्यक इति भावः।

ननु नञ आरोपितत्वद्योतकत्वस्य "अस" इत्यादौ सर्वनामत्वानुरोधादावश्यकतया सर्वत्रापि तथैवास्तु, किमभावार्थकत्वस्वीकारेणात आह [शेषमिति] शिष्टमित्यर्थः। "सामान्ये नपुंसकम्" इति नपुंसकत्वम्। नञर्थनिर्णये = "अभावो वा तदर्थोऽस्तु" इत्यादिकारिकाव्याख्याने। [वक्ष्यत इति] आरोपितत्वं नञ्द्योत्यं न भवति। आरोपबोधस्याऽनुभवविरुद्धत्वात्। अस इत्यादौ सर्वनाम कार्यं तु नञर्थस्याभावस्य प्रतियोगिनि विशेषणत्वस्वीकारेण सूपपादम्। तस्य तत्र विशेष्यत्वेऽपि "एतत्तदोः सुलोपोऽकोरनञ्समासे हलि" ६-१-१३२ इति ज्ञापकात्तन्निर्वाह इति वक्ष्यत इत्यर्थः। अतो नारोपितत्वं नञ्द्योत्यम्। अपित्वभाव एव नञर्थः। तत्र पर्युदासस्थले नामार्थे, प्रसज्यप्रतिषेधस्थले धात्वर्थक्रियायामन्वय इति विवेक इति कौण्डभट्टस्याशयः।

वस्तुतस्तु "आरोपितत्वं नञ्द्योत्यम्" इति पक्ष एव दीक्षितसम्मतः। स एव भाष्यकारस्यापि सम्मतः। "अभावो वा तदर्थोऽस्तु" इति तु परमतानुवादः। तत्र 'वा' शब्दोऽनास्थायामिति "तत्त्वदर्शिनस्तु" कल्पे नञर्थनिर्णये निरूपयिष्यामः।। ।।१६।।

"यस्य च भावेन भावलक्षणम्" २-३-३७ इत्यत्र भावनार्थकभावशब्देन तद्योगे साधुत्वान्वाख्यानलाभात्। "षष्ठी चानादरे" २-३-३८ इति तदग्रिमसूत्रेऽपि चकाराद् "यस्य च भावेन" इत्यायातीत्यर्थः।

[साधुत्वमिति] तत्स्वरूपं तु वक्ष्यते। [क्रिययैवेति] अयं भावः। भूवादिसूत्रादिषु प्रायशः क्रियाशब्देन भावनाव्यपदेशात् तत्र तस्य साङ्केतिकी शक्तिः। फलांशे क्वाचित्कः - क्रियत इति यौगिकः प्रयोगः। तथाच संज्ञाशब्दस्यानपेक्ष्य प्रवृत्तत्वेन बलवत्त्वाद्भावनान्वय एव साधुता लभ्यते। अत एव संज्ञाशब्दप्राबल्यात् रथन्तरमुत्तराग्रन्थपठितऋक्षेवेव गेयं, नतु वेदे तदुत्तरपठ्यमान ऋक्षिवति नवमे निर्णीतम्।

किञ्च फलांशोऽपि भावनायां विशेषणम्। कारकाण्यपि क्वचित्तथाभूतानीति "गुणानां च परार्थत्वादसम्बन्धः समत्वात् स्यात्" (जै सू ३-१-२२) इति न्यायेन सर्वे सेवका राजानमिव भावनायामेव परस्परनिरपेक्षाण्यन्वियन्ति।

"नहि भिक्षुको भिक्षुकान्तरं याचितुमर्हति सत्यन्यस्मिन्नभिक्षुके" इति न्यायेनापि फलं त्यक्त्वा भावनायामेवान्वियन्तीति मीमांसका अपि मन्वते।

एवञ्च "विशेष्यतया कारकादिप्रकारकबोधं प्रति धातुजन्यभावनोपस्थितिर्हेतुः" इति कार्यकारणभावस्य क्लृप्तत्वाद् यत्रापि पक्ता पाचक इत्यादौ भावना गुणभूता तत्रापि क्लृप्तकार्यकारणभावनुरोधात्तस्यामेवान्वय इत्यवसीयते - इत्यादि भूषणे प्रपञ्चितम्।

केचित्तु भूतले घटः, देवदत्तो घटमित्यादावन्वयबोधाकाङ्क्षानिवृत्त्योरदर्शनान् तद्व्यतिरेकेण साधुत्वलाभ इत्याहुः।। ।।१७।।

सप्तममष्टमं च व्याचष्टे [यस्य च भावेनेत्यादिना] कारिकायां [तथेति] सम्बोधनान्तादिषट्कवत्, यस्य च भावेन, षष्ठी चेति भागाभ्यां तद्घटिते सूत्रे लक्ष्येते। इति = इति सूत्राभ्याम्। उदितम् = उद्गतं = निष्पन्नम्। उत्पूर्वादिणो निष्ठाप्रत्यय उदितमिति रूपम्। यद्वा वदधातोः क्ते "वचिस्वपियजादीनां किति" ६-१-२५ इति संप्रसारणे रूपम्। उक्तमित्यर्थः। द्वयं = सप्तमीषष्ठीरूपं विभक्तिद्वयम्। अनयोः षष्ठीसप्तम्योरुपपदविभक्तित्वेन कारिकायां कारकात् पृथग्ग्रहणम्। अस्य + अष्टकस्य = सम्बोधनान्तमित्याद्यष्टकस्य क्रिययैवान्वये साधुत्वमवधार्यतामिति समुदितोऽर्थः।

"यस्य च भावेन भावलक्षणम्" २-३-३७ इत्यत्र भावशब्दः क्रियापरः। द्वितीयभावपदेन क्रियान्तरं गृह्यते, सामर्थ्यात्। स्वेन स्वस्य लक्षणसम्भवात्। तथाच यस्य क्रियया क्रियान्तरं लक्ष्यते, ततः सप्तमी स्यादिति सूत्रार्थः। ब्राह्मणेष्वधीयानेषु गतः, गोषु दुह्यमानासु गतः, सति गुणे द्रव्यत्वमस्ति - इत्युदाहरणानि। गवादिपद - दुह्यमानादिपदयोरुभयोरपि तद्वाचकत्वादुभयत्रापि सप्तमी।

ननु ज्ञाप्यज्ञापकभावरूपलक्ष्यलक्षणभावो भूयोभूयोदर्शनाश्रयो दृष्टः। यथा वह्निधूमयोः। ततश्च धूमे सति वह्निर्भवति। उदिते सूर्ये तमो नष्टमित्यादावेव सप्तमी स्यात्, नतु प्रकृते। कदाचिद्धि अयं गोषु दुह्यमानासु गतः इति गोदोहनं गमनेन सह यदा पुनः पुनर्न दृष्टं तदा न तत्तस्य लक्षणमिति चेत्। नायं लक्षणशब्दोऽनुमापकत्वेनाभिमतलिङ्गपर्यायः। किन्तु क्रियानिमित्तकः। लक्ष्यतेऽनेनेति लक्षणम्। ततश्च तत्तच्छब्दवाच्यत्वेन विवक्षितमेव ज्ञापकत्वमेतच्छास्त्रप्रवृत्तौ निमित्तं, नतु तस्य मानान्तरेण नियमतो ग्रहणापेक्षेति नेदं भूयोदर्शनाश्रयम्। तथाच प्रकृतसूत्रे भाष्यं "न खल्ववश्यं तदेव लक्षणं भवति। येन पुनः पुनर्लक्ष्यते, सकृदपि यन्निमित्तत्वाय कल्पते तदपि लक्षणं भवति। तद्यथा - अपि भवान् कमण्डलुपाणिं छात्रमद्राक्षीदिति। सकृदसौ कमण्डलुपाणिर्दृष्टश्छात्रः स्वस्य तदेव लक्षणं भवति" इति। "यच्च निर्ज्ञातकालं (अग्निषु हूयमानेषु गतः) हवनादिकमनिर्ज्ञातकालस्य सकृदपि कालपरिच्छेदनिमित्तं भवति तत्तस्य लक्षणमित्यर्थः" इति कैयटः। ततश्च यत्सम्बन्धिना भावेन = क्रियया व्यक्त्यन्तरसम्बन्धी भावः = क्रिया परिच्छिद्यते ततः सप्तमी स्यात्। क्रियायाः क्रियान्तरपरिच्छेदकत्वं न साक्षात्। धातूपस्थाप्यायास्तस्या असत्त्वरूपत्वात्, तद्वाचकस्याप्रातिपदिकत्वेन ततः सप्तम्यसम्भवाच्च। अतोऽन्यद्वारैव तद्वाच्यम्। स च क्रियाश्रय एव। सोऽपि देशः कालो वा। तथाच निर्ज्ञातदेशकालक्रया अनिर्ज्ञातदेशकालक्रियायाः सम्बन्धिदेशकालपरिच्छेदकत्वेन लक्षणं भवति। देशादिपरिच्छिन्नत्वेन ज्ञापकत्वमेवात्र लक्षणत्वमिति बोध्यम्।

एवं च यत्सम्बन्धिन्या निर्ज्ञातदेशकालया यया क्रियया अनिर्ज्ञातदेशकालायाः क्रियाया देशकालपरिच्छेदाख्यं लक्षणं क्रियते, तस्याः क्रियायाः कर्तुः कर्मणश्च वाचकात्सप्तमीति सूत्रार्थः पर्यवस्यति।

तत्र "ब्राह्मणेष्वधीयानेषु गत" इति कर्तर्युदाहरणम्। अधीयानब्राह्मणज्ञापकगमनाश्रय इति बोधः। गोषु दुह्यमानासु गत इति कर्मण्युदाहरणम्। दुह्यमानगोज्ञापकगमनाश्रय इति बोधः। अत्राधीयानानां ब्राह्मणानां, दुह्यमानानां गवां च शब्दतः प्रतीयमानं लक्षकत्वं विशेषणीभूताध्ययन - दोहनक्रियाद्वारकं विश्राम्यति। शिखी ध्वस्त इत्यादौ ध्वंसप्रतियोगित्वं शिखिनः शिखाद्वारकमिव। अत एवोभयत्रापि सप्तमी।

देशोदाहरणं "सति गुणे द्रव्यत्वमस्ति" इति। अत्र गुणसत्त्वक्रियाधिकरणदेशः पृथिव्यादिर्ज्ञात इति गुणसत्त्वक्रिया द्रव्यत्वसत्त्वक्रियाया लक्षणम्।

ज्ञापकक्रियाणां मध्ये काचित् क्रिया स्वाधारकालेनान्यां क्रियां परिच्छिनत्ति। यथा - गोषु दुह्यमानासु गत इत्यादौ। चैत्रः कदा गतः ? इति प्रश्नस्योत्तरमिदम्। काचित्तु स्वाधारकालाव्यवहितपूर्वकालेन परिच्छिनत्ति। यथा - गोषु धोक्ष्यमाणास्वित्यादौ। काचित्तु स्वाधारकालानन्तरकालेन। यथा - गोषु दुग्धास्वित्यादौ।

यो जटाभिः स भुङ्क्ते इत्यत्र यो भुङ्क्ते स देवदत्त इत्यत्र च सप्तमीवारणाय सूत्रे भावद्वयग्रहणम्।

शास्त्रे भावपदस्य "तस्य भाव स्त्वतलौ" ५-१-११९ इत्यादावन्यार्थकत्वदर्शनादाह [भवनार्थकेति]। तद्योगे = क्रियायोगे [साधुत्वान्वाख्यानलाभादिति] उक्तोदाहरणेषु ज्ञाप्यज्ञापकभावस्सप्तम्यर्थः। तत्र प्रकृत्यर्थस्य स्ववृत्तिसमभिव्याहृतपदार्थक्रियाद्वारकसम्बन्धेनान्वयः। अत एवास्य क्रियायामेवान्वयः। भावलक्षणमित्युक्तक्रियाद्वारकसम्बन्धेन यन्निष्ठलक्षकतानिरूपितं लक्ष्यत्वं क्रियान्तरनिष्ठं, ततः सप्तमीति लब्धसूत्रार्थानुरोधादिति भावः।

"षष्ठी चानादरे" २-३-३८ इत्यत्र "यस्य च भावेन" इत्यादिसूत्रमनुवर्तते। अनादर इति विषयसप्तमी। अनादरे गम्यमाने यस्य क्रियया क्रियान्तरं लक्ष्यते ततः सप्तमी षष्ठी च स्यादिति सूत्रार्थः। उदाहरणं - रुदति प्राव्राजीत्, रुदतः प्राव्राजीत्। ज्ञाप्यज्ञापकभावः षष्ठीसप्तम्योरर्थः। अनादरविशिष्टं प्रव्रजनं धातोरर्थः। अत्र तात्पर्यग्राहकं षष्ठ्यादि। अनादरश्च प्रत्यासत्त्या पुत्रादिविषयक एव। वैशिष्टंच च सामानाधिकरण्य - स्वोत्तरकालिकत्वाभ्याम्। एवं च रोदनकर्तृपुत्रादिज्ञाप्यमनादरविशिष्टं प्रव्रजनमिति बोधः।

[तदग्रिमेति] यस्य च भावेनेत्यादिसूत्राग्रिमेत्यर्थः। [आयातीति] संपूर्णसूत्रमेव तत्रानुवर्तत इत्यर्थः।

ननु सम्बोधनान्तादेरष्टकस्य क्रियान्वयाभावेऽपि शक्तत्वरूपसाधुत्वं सुलभमत आह [तत्स्वरूपमिति] साधुत्वस्वरूपमित्यर्थः। [वक्ष्यत इति] "असाधुरनुमानेन" ३८ इत्यादिकारिकाव्याख्यावसरे, "शक्तत्वमेवास्तु साधुत्वमिति नैयायिकमीमांसकादीनां मतं तन्मतेनैव द्रष्टव्यम्" "पुण्यजननयोग्यत्वं साधुत्वं तत्र जनकतावच्छेदिका च जातिः। तज्ज्ञापकं च कोशादि, व्याकारणादि च" "एवं च यः शब्दो यत्रार्थे व्याकरणे व्युत्पादितः, स तत्र साधुरिति पर्यवसितम्" इति वक्ष्यत इत्यर्थः। प्रकृते च न्याकरणेन निरुक्तस्याष्टकस्य क्रियान्वय एव व्युत्पादितत्वेन तत्रैवान्वये साधुत्वं नान्यथेति भावः।

ननु क्रियान्वय एवाष्टकस्य साधुत्वमस्तु। क्रिया च धात्वर्थ एवेति, फलमात्रं धात्वर्थ इति मतेऽपि फलस्य क्रियारूपत्वेन फलान्वयेऽपि क्रियान्वयित्वमक्षतमेवेति न पाक इत्यादिस्थले कारकाणामन्वयबलेन भावनाया धातुवाच्यत्वं सिद्ध्यतीत्याशङ्क्याह [अयं भाव इत्यादिना 'भूषणे प्रपञ्चितम्' इत्यन्तेन] [भूवादिसूत्रादिष्विति] तत्र श्वादयो धातुसंज्ञाः स्युः। वादयः = वासदृशाः। सादृश्यं च क्रियावाचित्वेनेति स्वीकारादिति भावः। आदिपदेन "लक्षणहेत्वोः क्रियायाः" (३२-२२६) इत्यादेर्ग्रहणम्। व्यपदेशात् = व्यवहारात्। तत्र = भावनायाम्। तस्य = क्रियापदस्य [यौगिक इति] यौगिकशब्दस्य साधुत्वं प्रदर्शितं प्राक्। अत्र "योगात् = अवयवशक्तेः आगतो यौगिकः" इति पञ्चोलिनो वदन्ति। एतत् किञ्चिद्युक्तमेव। "तेन निर्वृत्तम्" ५-२-७९ इति 'कि रूपमिति प्रागुक्तिस्तेषामत्यन्तसमीचीनेति प्रागेवोक्तम्। ननु क्रियाशब्देन फलमपि व्यवह्रियत इत्यत आह [फलांश इति] तत्र कथं तत्प्रवृत्तिरत आह - [क्रियत इति] कर्मणि श इति भावः। [अनपेक्ष्येति] प्रकृतिप्रत्ययशक्तिमननुसन्धायेत्यर्थः। तथाच क्रियाशब्देन क्रियते या सा क्रिया = फलमिति प्रकृतिप्रत्ययतदर्थज्ञानपूर्वकमेव फलप्रतीतिः। व्यापारस्य तु शक्तिग्रहमात्रेणोपस्थितिरिति शीघ्रोपस्थितिकतया "क्रिययैवावधार्यताम्" इत्यत्र क्रियापदेन भावनाया एव ग्रहणं, न फलस्य। तस्य ग्रहणं तु प्रमाणान्तरापेक्षम्। अत एव = संज्ञा शब्दस्यानपेक्ष्यप्रवृत्तत्वादेव। [रथन्तरमिति] "यद्योन्यां तदुत्तरयोर्गायति" इति सामनि श्रुयते। तत्र संशयः - किं योन्युत्तरयोः, उक्तराग्रन्थाधीतयोर्वा रथन्तरं गेयम्? उतोत्तराग्रन्थाधीतयोरेव? इति। अयमर्थः - सामगानां रथन्तरादिसामयोनीनामेव पाठात्मक एको ग्रन्थः छन्दोनामकः। तथा एकस्य साम्नो योनिपाठादनन्तरमप्ययोनिभूतऋग्द्वयपाठः। क्वचिदेव ऋक्पाठोऽपि, ततः सामान्तरयोनिपाठ इत्येवं योनि - तदुत्तरऋक्पाठात्मकोऽपरो ग्रन्थो यः, स एवोत्तरा ग्रन्थ इत्युच्यते। एवं स्थिते "यद्योन्यां तदुत्तरयोर्गायति" इत्यत्र किं योनिग्रन्थपठितयोरुत्तरयोरुत्तराग्रन्थपठितयोर्वेत्यनियमः? उतोत्तराग्रन्थपठितयोरेवेति नियमः? इति संशयः।

तत्रोत्तराशब्दस्य सम्बन्धिशब्दत्वाद्यैव योनेः परतः पठिता, सैवोत्तरा। ततश्च योनिपाठापेक्षया रथन्तरयोनेः परतो बृहद्योनेः पठितत्वात्तस्यां गानम्, उत्तराग्रन्थेषु रथन्तरस्य योनेः परतः "न त्वा वाँ अन्यो दिव्य" इत्यस्याः पाठात्तस्यां गानम्। अतो विकल्पः। द्वयोरपि रथन्तरयोन्यपेक्षयोत्तरत्वादिति पूर्वपक्षः।

तत्रैवं सिद्धान्तितम्। यद्यप्ययं सम्बन्धिशब्दो लोके, तथापि उत्तरग्रन्थे संज्ञारूपेण प्रसिद्धः। "उत्तरा अध्यापयामः" इत्यादौ प्रतिसम्बन्ध्यनुपादानेनानन्याथासिद्धप्रयोगबलात्संज्ञारूपेण पृथक्शक्तिरवश्यं

स्वीकार्या। ततश्च संज्ञाशब्दस्यानन्यापेक्षवृत्तित्वात् सापेक्षवृत्तेः सम्बन्धिशब्दाद् बलीयस्त्वम्। प्रकरणपाठाच्चोत्तराग्रन्थः क्रत्वङ्गम्। तस्मादुत्तराग्रन्थाधीतास्वेव गेयमिति।

तथाच जैमिनेः सूत्रं "नैमित्तकं तूत्तरात्वमानन्तर्यात्प्रतीयते" इति ९-२-२३। नैमित्तकं = संज्ञानिमित्तमेव, उत्तरात्वम्। आनन्तर्यात् = प्रतिसम्बन्ध्यपेक्षाकृतव्यवधानाभावात्प्रतीयत इति। तदेतदाह [संज्ञाशब्दप्राबल्यादिति] संज्ञाशब्दस्यानन्यापेक्षवृत्तित्वेन बलवत्त्वादित्यर्थः। रथन्तरम् = सामवेदीयमन्त्रविशेषः। [उत्तराग्रन्थेति] योनितदुत्तरऋक्पाठात्मको ग्रन्थः। स च "उत्तरा अध्यापयामः" इति प्रसिद्धः। [ऋक्ष्वेवेति] एवं च उत्तरानामकग्रन्थपठित ऋक्ष्वेव रथन्तरं गेयमित्येव नियमः। नत्वनियम इति भावः। तदाह [तदुत्तरपठ्यमानऋक्षिति] रथन्तरयोन्युत्तरं बृहद्योनिः पठिता। तस्यां न गेयमित्यर्थः। एवं च रथन्तरं "न त्वा वाँ अन्यो दिव्य" इति उत्तरग्रन्थपठितऋक्ष्वेव गेयं, नतु बृहद्योन्यामिति सिद्धान्तः। तदाह [नवमे निर्णीतमिति]। मीमांसायामूहलक्षणे निर्णीतमित्यर्थः।

ननु क्रियाशब्दः "फले यौगिकः, भावनायां रूढः" इति कुतो निर्णयः। कर्मणि प्रत्यये तस्य फलपरत्वं करणे प्रत्यये भावनापरत्वमिति योगेनैव तच्छब्दस्य फलव्यापारोभयबोधकत्वात्। किञ्च फलस्यापि "कर्मवत्कर्मणा तुल्यक्रियः" ३-१-८७ इति सूत्रे भाष्ये क्रियापदेन ग्रहणादस्त्यादौ सत्तादिरूपफलस्य क्रियात्वोपपादनाच्च सर्वत्र क्रियापदेन फलस्य ग्रहणे बाधकाभाव इति न नावमिकसिद्धान्तानुगुण्यमित्यत आह [किञ्चेति]। [क्वचिद्गुणभूतानीति] क्वचिदर्थे गुणभूतान्येवेत्यर्थः। पक्ता पाचकः पक्व इत्यादौ कारकस्य धात्वर्थापेक्षया प्राधान्यावगमेऽपि तस्य अस्ति, तिष्ठति, गच्छतीत्यादिपदान्तरबोध्येऽर्थे गुणतैव, नतु कदापि तस्य सर्वात्मना प्रधानभावः। एवं च फलस्य भावनायामन्वयो निर्विवादः। कारकाणां भावनायामन्वयस्य विवादग्रस्तत्वेऽपि क्वचिदर्थे गुणभावो निर्विवादः। स चार्थो व्यापारः, फलं वाऽस्तु। सर्वथापि फलांशस्य कारकाणां च गुणभाव एव। अत एव "क्वचिद्गुणभूतान्येव" इत्येवशब्दसहितः पाठो भूषणे। एवं च "गुणानां च" इति न्यायेन फले कारकाणामन्वयासम्भवात्प्रधानभूतभावनायामेवान्वय इति सिद्ध्यतीत्याशयः।

एतेन "क्वचित्तथाभूतानीति - देवदत्तस्तण्डुलं पचतीत्यादौ कारकाणि भावनायां विशेषणतापन्नानीत्यर्थः। कृदन्ते कारकाणां भावनां प्रति विशेष्यत्वात् "क्वचिदिति" इति काशिकाकाराः।

"तथाभूतानीति - विशेषणानीत्यर्थः। कर्त्राख्यातस्थले क्वचिद् दृष्टत्वादिति भाव" इति दर्पणकाराः।

"किञ्चेति" तण्डुलं पचतीत्यादौ तिङन्ते। कृदन्ते "पाचकः पक्व इत्यादौ क्रियायाः कर्तृकर्मणोर्विशेषणीभूततया आह - क्वचिदिति" इति प्रभाकाराः पञ्चोलिनश्च परास्ताः।

पाचकः, पक्व इत्यादौ विशेष्याणामपि कारकाणामन्ततोऽस्तीत्यादौ गुणभावस्याऽऽवश्यकत्वात्। तदुक्तरीत्या कारकाणां क्वचिद्गुणभावस्य क्वचित्प्राधान्यस्य चाभ्युपगमे "गुणानां च" इति न्यायाविषयतया प्रकृतार्थसिद्ध्यनापत्तेश्चेति दिक्।

[गुणानां चेति] गुणानां = विशेषणानाम्। परार्थत्वात् = अन्योपकारकत्वात्। समत्वात् = समानधर्मवत्त्वात्, असम्बन्धः = परस्परं सम्बन्धो गुणगुणिभावः, तदभावः स्यादिति तदर्थः। [इतिन्यायेनेति] इत्याकारकेण जैमिनिसूत्ररूपेण (३-१-२२) न्यायेनेत्यर्थः। लोकप्रसिद्धं दृष्टान्तमप्याह [सर्वे सेवका इति] परस्परनिरपेक्षाणि = फलं कारकाणि च। [अन्वियन्तीति] वी (गतिव्याप्तिप्रजनकान्त्यसनखादनेषु) इत्यादादिके धातौ प्रश्लिष्टात् "इ" इति धात्वन्तराल्लटि प्रथमपुरुषबहुवचने शपि, तस्यादादित्वाल्लुकि इयङादेशे अन्वियन्तीति रूपम्।

विशेषातिदेशाध्यायाधिकरणन्यायं साधकतयोपन्यस्यति [नहि भिक्षुक इति] अस्य किञ्चेत्यादिः। [अन्वियन्तीति] कारकाणां नित्यपरतन्त्राणां विशेष्याकाङ्क्षायां धात्वर्थफलांशस्य तथान्वययोग्यतायामपि तस्यापि परतन्त्रस्य विशेष्याकाङ्क्षापूरणसमर्थायां भावनायामेव विशेषातिदेशाध्यायाधिकरणन्यायेनान्वयः। "नहि भिक्षुकः" इति न्याये ह्याकाङ्क्षाशामकत्वाक्लृ"रेव बीजं, तत्तुल्यमत्रापीति भावः।

[एवञ्चेति] भावनायामेव कारकान्वयनियमे चेत्यर्थः। कारकादीत्यादिपदेन धात्वर्थफलांशस्य सङ्ग्रहः। तस्यामेव = गुणभूतक्रियायामेव। ननु फलांशोपस्थितिरेव कारणमस्तु। काष्ठेनौदनस्य पक्तेत्यादौ क्लृप्तत्वादिति चेन्न। कारकीभूतधात्वर्थस्य भावनायामनन्वयापत्तेः। नहि स्वयमेव स्वकारकम्। विधिवाक्ये धात्वर्थफलांशस्य कारणतयान्वयेन तत्र कारकान्वये वाजपेयाधिकरणभङ्गापत्त्या करणान्तरोपसङ्ग्रहेण प्रयोगविधेरबोधकतापत्तेश्च क्रियान्वयित्वं विना कारकत्वस्यैव दुर्लभत्वाच्च। फलान्वयित्वस्य तत्रैवाव्याप्तेरयोगात्। तदेतदभिसन्धायाह [भूषणे प्रपञ्चितमिति] एवं च पाक इत्यादावोदनस्येत्यादिकारकान्वयाय भावनाया वाच्यत्वमावश्यकमिति सिद्धम्।

कारकाणां भावनान्वये प्रकारान्तर माह [केचित्त्विति]। [अन्वयबोधेति] अन्वयबोधस्य आकाङ्क्षानिवृत्तेश्चादर्शनादित्यर्थः। क्रियाकाङ्क्षायाः सत्त्वेन निराकाङ्क्षबोधादर्शनादिति भावः। [तद्व्यतिरेकेणेति] क्रियावाचकपदाभावेनेत्यर्थः। [साधुत्वेति] "सर्वं हि वाक्यं क्रियया परिसमाप्यते" इति न्यायेन निराकाङ्क्षान्वयबोधजनकत्वमेव साधुत्वमित्याशयः। नच क्रियारूपार्थाध्याहारेणापि शाब्दबोधाकाङ्क्षानिवृत्त्योः सम्भवान्न तद्वाचकपदप्रयोगस्यावश्यकत्वमिति वाच्यम्। पदजन्यपदार्थोपस्थितेरेव शाब्दबोधोपयोगित्वात्। पदानां सम्भूयान्वयबोधकत्वव्युत्पत्तेश्चेति बोध्यम्।

[आहुरिति] अनेनारुचिः सूचिता। तद्बीजं तु एतन्मते पाकः सुन्दर इत्यादावप्याकाङ्क्षासत्त्वात्क्रियायोगं विनाऽसाधुतापत्तिः। नचेष्टापत्तिः। भाष्यविरुद्धत्वात्। तथाच अर्थवत्सूत्रे भाष्यं "गामित्युक्ते कर्म निर्दिष्टं, कर्ता क्रिया चानिर्दिष्टे" इति। फलान्वयलाभेनोपपत्तौ भावनान्वयालाभश्चेति। स्पष्टं चेदं भूषणे।। ।।१७।।

स्वयमुपपत्तिमाह -

यदि पक्षेऽपि वत्यर्थः कारकं च नञादिषु।
अन्वेति त्यज्यतां तर्हि चतुर्थ्याः स्पृहिकल्पना।।१८।।

पर्वतो वह्निमान् धूमात् महानसवत्। भूतले न घटः 'भूतले घट' इत्यादिपदात्। एवमादिष्वनुशासनविरोधेऽपि यदि साधुत्वमन्वयबोधश्चाभ्युपेयते तर्हि चतुर्थ्याः स्पृहिकल्पनापि त्यज्यतामित्यर्थः। अनुशासनानुरोधतौल्येऽर्धजरतीयमयुक्तमिति भावः।। ।।१८।।

[स्वयमुपपत्तिमिति] भूतले न घट इत्यत्र भूतलाधेयत्वाभाववान् घट इति बोधान्न क्रियाध्याहारापेक्षा। एवं पर्वतो वह्निमान् भवितुमर्हति धूमात्, महानसवदिति वेदान्तिकृतप्रयोगे प्रतिज्ञायां क्रियापदप्रयोगो वृथेति तर्कग्रन्थे दूषितम्। तद्दूषयन्नुपपत्तिमाहेत्यर्थः।

कारिकायां - पक्षे = पर्वतादौ। वत्यर्थः = सादृश्यम्। [पर्वतो वह्निमानिति] इदं च प्रतिज्ञावाक्यम्। हेतुमाह [धूमादिति] दृष्टान्तमाह [महानसवदिति] तत्र वत्यर्थस्य सादृश्यस्यानुयोगितासम्बन्धेन पक्षेऽन्वयः। महानसप्रतियोगिकसादृश्यवान् पर्वत इत्येवंरूपेणेति नैयायिकाशयः। वैयाकरणमते तु महानसपदं महानसवृत्तिवह्निकर्तृकसत्तापरम्। पर्वतपदं च तद्वृत्तिवह्निपरम्। अस्तीत्यध्याहियते। तथाच महानसवृत्तिवह्निकर्तृकसत्तासदृशी पर्वतवृत्तिवह्निकर्तृका सत्तेति बोधः। अतो वत्यर्थसादृश्यस्य सत्तारूपक्रियायामन्वयः। कारकं च नञादिष्विति मूलं विवृणोति [भूतले न वट इति] तत्रादिशब्दार्थमाह [भूतले घट इति इति] आदिपदात् = नञादिष्विति कारिकाघटकादिपदात्। अनुशासनविरोधे नञादिष्विति मूलं विवृणोति [भूतले न घट इति] = "तेन तुल्यं क्रियाचेद्वतिः" ५-१-१२५ इत्यादिशास्त्रविरोधे। [चतुर्थ्या स्पृहिकल्पनेति] "स्पृहेरीप्सितः" १-४-३६ इति शास्त्रेण स्पृहयतेरीप्सितस्य संप्रदानसंज्ञायां तद्वाचकाच्चतुर्थी प्रवर्तते, पुष्पेभ्यः स्पृहयतीति। यत्रापि केवलं पुष्पेभ्य इति चतुर्थ्यन्तमात्रं प्रयुज्यते तत्र चतुर्थीविभक्तेः साधुत्वसम्पत्तये स्पृहयतीति शब्दाध्याहार एव, नतु तत्समानार्थकधात्वन्तरघटितपदाध्याहारो, नाप्यर्थाध्याहार इति नैयायिकाः आशेरते। सा

स्पृहिकल्पना त्यज्यतामित्याशयः। [अनुशासनानुरोधेति] "तेन तुल्यं क्रिया चेद्वतिः" "स्पृहेरीप्सितः" इत्यादीनां प्रामाण्यमेकरूपमेव। न ह्येकस्य प्रामाण्यमितरस्य चाप्रामाण्यमित्यत्र विनिगमकमस्ति येन "स्पृहेरीप्सितः" इत्याद्रियेत, "तेन तुल्यं क्रियाचेद्वतिः" इति परित्यज्येतेति भावः। [अर्धजरतीयमिति] "समासाच्च तद्विषयात्" ५-३-१०६ इति छप्रत्ययः। मुखं न कामयते। अङ्गान्तरं तु जरत्याः कामयते इति "अणिञोरनार्षयोर्गुरूपोत्तमयोः ष्यङ् गोत्रे" ४-१-७८ इति सूत्रे कैयटः। मुखं न कामयत इत्यस्य जरत्या एव मुखं न कामयत इत्यर्थः। कामुकपदाध्याहारेण कामुको जरत्या मुखं न कामयते, अङ्गान्तरमधोभागं तु कामयत इति कैयटाशयः।

अयमर्थः - "समासाच्च तद्विषयाता" इत्यनेन इवार्थविषयसर्वावयवकात्समासादिवार्थे छविधानात्समास इवार्थद्वयनिर्वाहाय जरतीशब्दो जरत्या अर्धान्तरे नाम तस्या जघनरूपेऽर्धान्तरे वर्तते। अर्धशब्दश्च प्रत्यासत्त्या जरत्या एवार्धान्तरे नाम मुखार्धान्तरे वर्तते। अर्धमिव जरतीवेति विग्रहेऽर्धरतीतीवार्थे समासोऽनेनैव सूत्रेण ज्ञाप्यते। पूर्वोत्तरपदयोर्जरत्यर्धकामनाजरत्यर्धाकामनयोर्लक्षणा। सामानाधिकरण्येन च तदर्थयोरन्वयः। एतेन "पूर्वोत्तरपदयोरनन्वयेनासामर्थ्यात्समासो दुर्लभः" इत्यपास्तम्। एवं च जरत्यर्धकामनाजरत्यर्धाकामनासदृशरूपोऽर्थः समासेन बोध्यते। स च प्रकृते शास्त्रानुरोधकामना-शास्त्रानुरोधाकामनारूपः। स एवोपमेयभूतोऽर्थः। तस्माच्च समासात्प्रकृतसूत्रेणेवार्थे छः। अर्धजरतीव = अर्धजरतीयम्। कामुक - नैयायिकयोः प्रवृत्त्योरुपमानोपमेयभावः। एवं च तादृशकामनाऽकामनासदृशशास्त्रानुरोधकामनाऽकामनाप्रयोज्या तादृशकामनाऽकामनाजन्यकामुकप्रवृत्ति-सदृशी नैयायिकप्रवृत्तिरित्यर्थस्संपद्यते। व्यतिरेकेचायं दृष्टान्तः। यथा तत्र विषयभेदात्तादृशकामनादि तथा प्रवृत्त्यादि च वक्तुं शक्यं, नैवं प्रकृते, शास्त्ररूपप्रमाणैकनिमित्तकत्वात्कार्यद्वयस्येति। स्पष्टं चेदम् "अणिञोरनार्षयोर्गुरूपोत्तमयोः ष्यङ् गोत्रे" ४-१-७८ इति भाष्यप्रदीपोद्द्योते।

एतेन "अर्धजरतीयमिति - इदमर्थे गहादित्वाच्छः। क्वचिदनुशासनानुरोधः, क्वचिन्नेत्यर्धजरतीसदृशमित्यर्थः" इति दर्पणोक्तमपास्तम्। निरुक्तरीत्योपपत्तौ अर्धजरतीशब्दस्य गहादिपाठ कल्पनायां मानाभावाच्च। उपगोरिदमौपगवमित्यादाविदमर्थकप्रत्ययान्ते सादृश्यस्याभानाच्च। उपगुसम्बन्धीत्येव ततो बोधात्।

यत्तु "अर्धजरतीयमिति - जरत्या अर्धम् अर्धजरती। तत्सदृशमर्धजरतीयम्। "समासाच्च तद्विषयात्" ४-१-७८ इतीवार्थे छः। यद्वा गहादित्वा'वार्थे छः" इति पञ्चोलिनः। तन्न। आद्ये जरत्या अर्धमर्धजरतीति समासस्येवार्थविषयकत्वाभावाच्छस्याप्राप्तेः। द्वितीयेऽर्थासङ्गतेः। अस्मदुक्तरीत्योपपत्तौ अर्धजरतीशब्दस्य ग्रहादिपाठ कल्पनायां मानाभावाच्च।

यदपि "अर्धजरतीयमिति - जरत्या अर्धमिवार्धजरती। तत्सदृशमर्धजरतीयम्। "समासाच्च तद्विषयात्" इति छः। यथा जरत्या अर्धं कामयते। अर्धं न तथेत्यर्थः" इति काशिकाकाराः, तदपि न। इवार्थविषयसर्वावयवकादेव समासात्तेन छप्रत्ययविधानात्, भाष्ये तथैवोदाहरणात्। अत एव शस्त्रीश्यामेत्यादौ न छप्रत्ययः। तत्र हि पूर्वपदभूत एवशब्द इवार्थविषयो नोत्तरपदभूतस्तद्विषयः। स्पष्टं चेदं प्रकृतसूत्रे मनोरमा - शब्दरत्नयोः। प्रकृतसूत्रे उद्द्योतेऽपि "तद्विषयादित्यस्येवार्थ-विषयसर्वावयवकादित्यर्थः। शस्त्रीश्यामेत्यादौ पूर्वपदमेव इवार्थविषयमिति न दोषः" इत्युक्तम्। प्रकृतसूत्रे भाष्येऽपि "तदित्यनेन किं प्रतिनिर्दिश्यते? छः। कथं पुनः समासो नाम छविषयः स्यात्? एवं तर्हीवार्थः। यदि तर्हि समासोऽपीवार्थे, प्रत्ययोपि, समासेनोक्तत्वात्प्रत्ययो न प्राप्नोति। एवं तर्हि द्वाविवार्थौ कथम्? काकागमनमिव तालपतनमिव काकतालं, काकतालमिव काकतालीयम्" इत्युक्तम्। अतो मदुक्तरीत्या अर्धमिव जरतीव = काकतालीयम्" इत्युक्तम्। अतो मदुक्तरीत्या अर्धमिव जरतीव = अर्धजरती अर्धजरतीव अर्धजरतीयमित्येव युक्तम्। एतदाशयः समनन्तरमेवोपवर्णितः। अत एव "अणिञोरनार्षयोः" इत्यादिसूत्रे भाष्ये "अर्धजरतीयं स्यात्। तद्यथा अर्धं जरत्याः कामयतेऽर्धं न" इयुक्तं सङ्गच्छते। अन्यथा जरत्यर्धयोर्द्विधाभानस्य, कामनाऽकामनयोश्चासङ्ग्रहः स्पष्ट एव।

इदं तु बोध्यम्। पञ्चोलिनामेष स्वभावः, यत् - प्रायो दर्पणकाशिकयोरुभयोरप्याशयानां स्वग्रन्थे प्रतिपादनम्। तदेवात्रापि तैः कृतम्। "जरत्या अर्धम् अर्धजरती, तत्सदृशमर्धजरतीयम्। सामासाच्च तद्विषयादिति छः" इत्याशयः काशिकानुसारीति गम्यते। तत्र जरत्या अर्धमिति समासविग्रहवाक्ये इवशब्दः पञ्चोलिनां सम्मतः। परन्तु मुद्रणदोषलुप्त इत्याभाति। अत एव "एकं सादृश्यं समासार्थः, द्वितीयं चेवार्थः" इति पञ्चोलिनां विवरणमुपपद्यते। एवमपि पञ्चोलिनो युक्ताभिधायिनो नासन्नेवेत्यलम् "अणिञोरनार्षयोः" रित्यादिसूत्रस्थोद्द्योतग्रन्थविरुद्धकल्पनया। अधिकं त्वादिभावप्रत्ययार्थनिर्णये "अत्रार्धजरतीयं स्यात्" ५० इत्यादि कारिकाव्याख्यावसरे प्रदर्शयिष्यामः।

"अर्धजरतीयमिति - गहादित्वाच्छः। अर्धजरतीसादृश्यमित्यर्थः" इति दर्पणच्छायानुगामिनी भैरवमिश्राणां परीक्षाप्यनादेयैवेति दिक्।। ।।१८।।

एवं कर्त्रादौ विहितानामिन्यादीनां क्रिययैवान्वय इत्याह -

अविग्रहा गतादिस्था यथा ग्रामादिकर्मभिः।
क्रिया सम्बध्यते तद्वत् कृतपूर्व्यादिषु स्थिता।। ।।१९।।

न विविच्य ग्रहो = ग्रहणं यस्याः सा अविग्रहा = गुणीभूतेति यावत्। यथाच ग्रामं गत इत्यत्र क्तप्रत्यययार्थगुणीभूतापि क्रिया ग्रामादिकर्मभिः सम्बध्यते, तथा कृतपूर्वी कटमित्यत्रापि गुणभूता इन्यादिरित्यर्थः।

नच वृत्तिमात्रे समुदायशक्तेर्वक्ष्यमाणत्वात्तत्रान्तर्गता भावना पदार्थैकदेश इति कथं तत्रान्वय इति वाच्यम्। नित्यसापेक्षेष्वेकदेशेऽपि देवदत्तस्य गुरुकुलम् चैत्रस्य नप्ता इत्यादाविवान्वयाभ्युपगमात्।

एवं भोक्तं पाकः, भुक्त्वा पाक इत्यत्रापि द्रष्टव्यम्।। ।।१९।।

[एवमिति] सम्बोधनान्ताद्यष्टकवदित्यर्थः। [इन्यादीनामिति] "पूर्वादिनिः" ५-२-८६ "सपूर्वाच्च" ५-२-८७ इति पाञ्चमिकेन्यादेरित्यर्थः। पूर्वं कृतमनेन = पूर्वी। कृतः पूर्वमनेन = कृतपूर्वी कटम्। अत्र "श्राद्धमनेन भुक्तमिनि'नौ" ५-२-८५ इति सूत्रात् "अनेन" इति कर्तृबोधकपदस्यानुवर्तनादिन्यादेः कर्त्रर्थकत्वम्। तस्य क्रियाकाङ्क्षायामन्तरङ्गत्वात्करोतिक्रियैव गृह्यते। उपस्थितकरोत्यर्थस्य त्यागे मानाभावत्। एवमेव इष्टमनेन = इष्टी, अधीतमनेन = अधीतीत्यादौ "इष्टादिभ्यश्च" ५-२-८८ इतीनिप्रत्ययान्ते यागाध्ययनादिक्रिया गृह्यते। [अविग्रहेति]। वाक्यपदीये तृतीयकाण्डे वृत्तिसमुद्देशे भर्तृहरेरियं कारिका ६७। "ननु च तद्वितार्थे कर्तरि गुणीभूता क्रिया वृत्तावभेदेन प्रतीयते। नतु कर्तृभेदेन स्वरूपप्राधान्येनेति कथं तया कटादेः कर्मणो योग इत्याशङ्क्य निदर्शनेनैतद्व्युत्पादयति" इत्यवतारिता हेलाराजेन। 'प्रकारान्तरमाह' इत्यवतार्य सुबर्थवादमञ्जूषायां नागेशेन व्याख्याता।

अकर्मकत्वे सत्येवं क्तान्ते भावाभिधायिनि।
ततः क्रियावता कर्त्रा योगो भवति कर्मणाम्।।

इति कारिका [६६] प्रकृतकारिकातः पूर्वं वर्तते। कृतपूर्वी कटमित्यादाविन्यादेः कञाद्यर्थ एवान्वय इति प्रकृतार्थस्यापि सा कारिकोपयुज्यत इत्याशयेन भट्टोजिदीक्षितेन स्वग्रन्थे संदब्धा।

वृत्त्यर्थावबोधकवाक्यपरो न विग्रहशब्द इत्याशयेन व्याचष्टे [न विविच्येति] पृथग्भूयेत्यर्थः। इतराविशेषणत्वेनेति यावत्। तदाह [गुणीभूतेति] दृष्टान्तमुपपादयति [यथाचेति]। [कृतपूर्वीकटमिति] कृधातोर्न कर्मणि क्तः, तेन कर्मणोऽभिहितत्वेन कटमिति द्वितीयानापत्तेः। अतः कर्मविशेषस्य तत्तद्रूपेण प्रागन्वयाविवक्षयाऽकर्मकत्वाद्भावे क्तः। स च कृतपूर्वी, अधीतीत्यादिवृत्तिविषय एव। एवं च तादृशक्तान्तस्य वाक्येन प्रयोगः। तदुक्तं "कर्तृकर्मणोः कृति" २-३-६५ इति सूत्रे भाष्ये "यदा

वाक्यं, न तदा प्रत्ययः = न तदा भावे प्रत्ययः, सकर्मकत्वात्। यदा प्रत्यय इत्यस्य भावे इति शेषः। किञ्च "योऽसौ कृतकटयोरभिसम्बन्धः, स उत्पन्ने तद्धिते निवर्तते" इति भाष्योक्त्या तद्धितेऽकृते कृतः कट इत्येवेति ध्वनितम्। ततो भावक्तान्तस्य पूर्वशब्देन "सह सुपा" इति समासः। ततस्तद्धितः। अनन्तरं फलस्याश्रयाकाङ्क्षायां कटमित्यादेर्विशेषकर्मणोऽन्वयः। एतेन "असामर्थ्यात्समासो न स्यात्" इति खण्डदेवाद्युक्तमपास्तम्। तदुत्पत्तिकालेऽसामर्थ्याभावात्। कटस्य गुणभूतधात्वर्थक्रियायामेवान्वयः। एतेन "असामर्थ्यात्समासो न स्यात्" इति खण्डदेवाद्युक्तमपास्तम्। तदुत्पत्तिकालेऽसामर्थ्याभावात्। कटस्य गुणभूतधात्वर्थक्रियायामेवान्वयः। ग्रामं गतो देवदत्त इत्यादौ गुणभूतक्रियायामपि कारकान्वयस्वीकारात्। एतेन "कृतपूर्वी कटमित्यादौ न कटस्य

कृञर्थेऽन्वयः। धात्वर्थान्वयस्य कारकाणामव्युत्पन्नत्वात्, अपितु तद्धितार्थ एव। लक्षणया कृतिरपि तद्धितार्थः" इति भाट्टरहस्ये खण्डदेवोक्तमपास्तम्। 'अनेन' इत्यर्थे विहितस्य तद्धितस्य कृतौ लक्षणायां मानाभावात्। कृतावेव कारकान्वय इति दुराग्रह एव लक्षणाबीजं, नान्यत्। तथापि प्रकृते करोत्यर्थकृतेस्सत्त्वात्तत्र कटादेरन्वये बाधकाभावः। तयैव च कृत्या प्रत्ययोपात्तयैव भवितव्यमिति त्वत्यन्तदुराग्रहमूलकमेव। एवं ग्रामं गतो देवदत्त इत्यादावपि कृत्प्रत्ययस्य कृतौ लक्षणां स्वीकृत्य तत्र कारकान्वयकथनमप्ययुक्तमेव, विना प्रमाणं स्वेच्छया लक्षणाश्रयणस्ययुक्तत्वात्। नैयायिका अपि धात्वर्थ एव कारकान्वयमभ्युपगच्छन्ति। तत्र तत्र विश्वङ्लवृत्त्या खण्डदेवस्य लक्षणाश्रयणेऽभिमान एव हेतुः, न ह्यभिमानेन वर्षशतेनापि व्याकरणार्थो ज्ञातुं शक्यते पण्डितम्मन्यैः। एतेन "अत एवोक्तं हरिणा - अविग्रहा गतादिस्था यथा ग्रामादिकर्मभिः। क्रिया सम्बध्यते तद्वत् कृतपूर्व्यादिषु स्थितेति। अविग्रहा = विशेष्यत्वेनानुपस्थितापीत्यर्थः। गतादिस्था गतमित्यादिकृत्पदस्था। धात्वर्थान्वयमादाय तच्छाब्दबोधोपपादनं नव्यवैयाकरणानामसङ्गतमेव। कारकाणां

धत्वर्थान्वयस्य क्काप्यव्युत्पन्नत्वादिति तदुक्तिरपि परास्ता। लक्षितप्रत्ययार्थान्वयापेक्षया कारकाणां धात्वर्थान्वयस्यैवाभ्यर्हितत्वत्। अत एव "अस्ति च करोतेः कटेन सामर्थ्यमिति द्वितीया भविष्यति" इति भाष्य उक्तम्।

कृतपूर्वी कटं देवदत्त इत्यत्रैककटाभिन्नाश्रयिका योत्पत्तिस्तदनुकूलव्यापारवदभिन्नो देवदत्त इति बोधः। एवं भुक्तपूर्वी ओदनं देवदत्त इत्यादावपि बोध्यम्। एवं च पाक इत्यादौ धात्वर्थमादाय कर्मकरणादिविभक्तिवत्कृतपूर्वी कटमित्यादावपि कर्त्राद्यर्थकाः प्रत्यया इति स्थितम्। कारिकायामदिपदेन भुक्तपूर्वी, अधीतीत्यादेर्ग्रहणम्।

गतादिस्था = गतपाकादिपदोपस्थाप्यधात्वर्थरूपा क्रिया, अविग्रहा = कर्तुः पृथक्त्वेन ग्रहणरहिता सती यथा ग्रामादिकर्मभिः सम्बध्यते, तद्वत् कृतपूर्व्यादिषु = कृतपूर्वी, भुक्तपूर्वी, अधीतीत्यादिषु स्थिता क्रिया सम्बध्यते = कटादिकर्मभिः सम्बध्यते इति कारिकार्थः। इनिप्रत्ययस्य कर्तरि विधानात्। तस्य क्रियापेक्षायां प्रत्यासत्त्या करोत्यर्थक्रिया सम्बध्यते, अन्तरङ्गत्वादिति इन्याद्यर्थस्य क्रिययैवान्वय इति प्रकृतार्थसिद्धिर्हरिग्रन्थाल्लभ्यते। इयं च कारिका हरेरेवेत्युक्तम्। एतदाशयेनैव "कृतपूर्वी कटमित्यत्रापि गुणभूता इन्यादिभिरित्यर्थः" इति सारे उक्तम्।

[नचेति] क्रिया न केवलं गुणीभूता, अपितु पदार्थैकदेशोऽपि। तेन "पदार्थः पदार्थैनान्वेति, न पदार्थैकदेशेन" इति न्यायविरोधापत्तिः। पदार्थः = पदजन्यप्रतीतिविशेष्यः, पदार्थेन = पदजन्यप्रतीतिविशेष्येण अन्वेति। पदजन्यप्रतीतिविशेष्यैकदेशेन नान्वेतीति तन्न्यायार्थः। प्रकृत एकार्थीभावस्वीकारात्क्रिया पदार्थैकदेश इति भावः।

[वृत्तिमात्र इति] मात्रपदं कृत्स्नार्थकम्। न केवलं समास एवैकार्थीभावः, किन्तु कृत्तद्धितैकशेषसनाद्यन्तधातुष्वपीत्याशयः। तथा न केवलं सोपपदेष्वेवैकार्थीभावः, किन्तु वृत्तिमात्र इत्यप्याशयः। [वक्ष्यमाणत्वादिति] "समासे खलु भिन्नैव शक्तिः पङ्कजशब्दवत्" इति ३१ कारिकाव्याख्याने व्याख्यास्यमानत्वादिति भावः। तत्र = वृत्तौ, अन्तर्गता = एकदेशभूता। [इतीति] इति हेतोरित्यर्थः। [कथमिति] पदार्थः पदार्थेनान्वेति "न पदार्थैकदेशेन" इति न्यायविरोधादित्यर्थः। अत एव ऋद्धस्य राजपुरुष इत्यादयो न प्रयोगाः। आदिभूतो यः पाकस्तत्कर्तेत्यर्थे "आदिः पाचकः" इत्यादयश्च नेति भावः। एवं च गतो ग्रामं देवदत्त इत्यादौ गमनकर्तृरूपगतपदार्थैकदेशभावनायां कर्मान्वयासम्भवः। कृतपूर्वी कटमित्यत्रापि कटस्य, इन्यर्थकर्तुश्च पदार्थैकदेशकृञर्थेऽन्वयासम्भव इति बोध्यम्।

[नित्यसापेक्षेष्विति] तत्त्वं च स्वनिरूपकाकाङ्क्षाव्याप्यज्ञानविषयत्वम्। स्वं = नित्यसाकाङ्क्षत्वेन जिघृक्षितम्। एवञ्च यत्र यत्र गुरुत्वज्ञानं, तत्र तत्र गुरुत्वस्य निरूपकं कि? मित्याकाङ्क्षायाः सत्त्वेन आकाङ्क्षाया व्यापकत्वं, गुरुत्वज्ञानस्य च व्याप्यत्वमिति व्याप्यज्ञानविषयत्वं गुरुत्वे इति गुरुत्वं नित्यसाकाङ्क्षमिति बोध्यम्। [एकदेशेऽपीति] नित्यसापेक्षेषु गमकत्वसत्त्वे एकदेशेऽप्यन्वयः स्वीकार्य इत्यर्थः। गमकत्वेमेव एकदेशान्वयेऽपि वृत्तिप्रयोजकं, न नित्यसापेक्षत्वम्। स्पष्टं चेदं समर्थसूत्रे "सुप आत्मनः क्यच्" ३-१-८ इति सूत्रे च भाष्ये सूक्ष्मदृशाम्। अत एव "तत्रोपपदं सप्तमीस्थम्" ३-१-९२ इति सूत्रस्थं भाष्यं सङ्गच्छते। तत्र हि "अथ च्व्यन्त उपपदे किमणा भवितव्यम्, अकुम्भं कुम्भं करोति कुम्भीकरोति मृदमिति" इति प्रश्ने "न भवितव्यम्। किं

कारणम्। प्रकृतिविवक्षितत्वात्। प्रकृतिविवक्षायां च्विर्विधीयते। तत्सापेक्षम्, सापेक्षं चासमर्थव'वति" इति समाहितम्। "प्रकृतिविवक्षायाम्" इति भाष्यस्य प्रकृतेर्विकृत्यभिन्नत्वेन विवक्षायां विकृतिवाचकात् च्विर्विधीयत इत्यर्थः। तत्रावश्यं विकारेण प्रकृतिविशेषोऽपेक्षणीयः, तदनपेक्षायां च्वेरभावात्। ततश्च यथा महान्तं कुम्भं करोतीत्यत्राऽण् न भवति, एवं मृदं कुम्भीकरोतीत्यादावपि। सापेक्षत्वेनासामर्थ्यादिति भाष्याशयः। नित्यसापेक्षत्वस्य वृत्तिप्रयोजकत्वे प्रकृते विकारस्य प्रकृत्यंशे नित्यसापेक्षत्वेनासामर्थ्याभावादणो दुर्वारतया तद्भाष्यासङ्गतिः स्पष्टैव। अतो नित्यसापेक्षत्वं न वृत्तौ प्रयोजकं, किन्तु गमकत्वमेव। च्व्यन्ते नित्यसापेक्षत्वे प्यगमकत्वान्न वृत्तिरिति तद्भाष्यसङ्गतिः स्पष्टैव। गमकत्वं च शिष्टानां तस्यार्थाव बोधकत्वम्। तस्माद्गमकत्वे सति भवति विशेषणसम्बन्धः। अगमकत्वे तु नेत्येव युक्तम्। अत एव "किमोदनश्शालीनाम्" मित्यादेरुपपत्तिः। एवं च "नित्यसापेक्षेषु" इति गमकत्वोपलक्षणमेव। अन्यथा देवदत्तस्य गुरुकुलमित्यादेस्साधुत्व उपपादितेऽपि किमोदनश्शालीनामित्यादेस्साधुत्वं नोपपादितं स्यादिति बोध्यम्।

[एकदेशेऽपीति] उपसर्जने विशेषणसम्बन्धे द्वियी गतिः। १) देवदत्तस्य गुरुकुलमित्यादौ देवदत्तादीनां गुरावेवान्वयः। देवदत्तस्य यो गुरु स्तस्य कुलमित्यर्थः। एवं च गुर्वादिनिरूपितसम्बन्ध एव देवदत्तस्येति षष्ठी। तथाच हरिः - ३ काण्डे १४-४७

सम्बन्धिशब्दस्सापेक्षो नित्यं सर्वः समस्यते।
वाक्यवत्सा व्यपेक्षा हि वृत्तावपि न हीयते।। इति।

नित्यं सापेक्षः सर्वोऽपि सम्बन्धिशब्दः समस्यते। देवदत्तस्य गुरोः कुलमिति वाक्य इव वृत्तावपि सा आकाङ्क्षा न हीयते हीति तदर्थः। वाक्यपदीये समर्थसूत्रस्थप्रदीपे च "सम्बन्धि .... प्रयुज्यते। स्वार्थवत् .... हीयते" इति पाठः। तत्रायमर्थः। प्रयुज्यते = समस्तत्वेन प्रयुज्यते। [स्वार्थवदिति] स्वार्थे इव स्वार्थवत्। स्वार्थशब्दो भावप्रधानः। स्वार्थमात्रोपस्थापकवाक्यघटकतादशायामिव वृत्तावपीति। स्पष्टं चेदमुद्द्योते। विशेषणान्वये च इतरसापेक्षस्वार्थस्यैव गुर्वादिपदैः प्रतिपादनमेव बीजम्। हरिग्रन्थे सम्बन्धिशब्दो गमकत्वोपलक्षणम्। अत एव "यत्रास्ति गमकत्वं, तत्रैकार्थीभावेऽपि भवति विशेषणयोग इत्याह" इति प्रकृतहरिग्रन्थो हेलाराजेनावतारितः। इदं च विशेषणे विशेषणानन्वयस्यैकार्थीभावफलत्वस्य निराकरणपरभाष्यानुरोधेनोक्तम्।

२) यद्वा देवदत्तस्य गुरुकुलमित्यादौ विशेषणस्य देवदत्तादेर्गुरुद्वारकेण स्वगुरूत्पाद्यत्वरूपेण सम्बन्धेन कुल एवान्वयः। चैत्रस्य नप्तेत्यादौ स्वजन्यपुंस्त्वसम्बन्धेन नप्तर्येवान्वयः। नत्वत्रोपसर्जनार्थस्य

गुरोर्देवदत्तापेक्षा। परन्तु किं देवदत्तस्य समीपं गुरुकुलमुतान्यथेति सन्देहे, अवश्यमिदं वक्तव्यं, देवदेत्तस्य यो गुरुस्तस्य यत्कुलमित्येवमवयवान् गुर्वादीन् सम्बन्धत्वेन स्वीकृत्य तद्विशिष्टेन अवयविना सम्बध्यन्ते देवदत्तादय इत्यवयवद्वारेणैव समुदायसम्बन्धः। यथा "द्विमयमुदश्विव द्यवाना" इत्यत्र। तत्र हि द्विशब्दस्य भागवृत्तेः नित्यसापेक्षत्वाद्यवानामित्येतत्सापेक्षत्वेऽपि "सङ्ख्याया गुणस्य निमाने मयट्" ५-१-४७ इति मयट्प्रत्ययः। एवं च य एव देवदत्तेन साक्षाद्गुरोर्योगेऽर्थः स एवात्रापि संपद्यते। अतो नात्र पक्षेऽवयवानां तत्सम्बन्धलाभ इति बोध्यम्। तदप्युक्तं हरिणा -

"समुदायेन सम्बन्धो येषां गुरुकुलादिना।
संस्पृश्यावयवांस्ते तु युज्यन्ते तद्वता सह"।। ३ काण्ड वृत्ति ४७

येषाम् = अर्थानाम्। गुरुकूलादिना = तदभिन्नेन। समुदायेन, सम्बन्धः, ते तु = तेऽप्यर्थाः, अवयवान् = गुर्वादीन्, संस्पृश्य = सम्बन्ध्य, तद्वता युज्यत इति हरिकारिकार्थः। उद्योतरीत्या 'ते तु' इत्यत्र "तेऽपि" इति पाठ अनुमीयते वाक्यपदीये 'ते च' इति पाठः। अपिशब्दपाठः स्वारस्यमधिरोहति। वृत्तिवादमञ्जूषायां 'ते तु' इत्येव पाठः। तु - च शब्दयोरप्यर्थकत्वं वा स्वीकार्यम्। इदं तु विशेषणे विशषणानन्वयस्यैकार्थीभावफलत्ववादि भाष्यानुरोधेनोक्तम्।

एकदेशेऽपीत्यादेरयमर्थः। एकदेशेऽपीत्यस्य "अन्वयाभ्युपगमादित्यत्रान्वयः। नित्यसापेक्षेषु = गमकत्ववत्सु। एकदेशेऽपि = ग्रामं गतो देवदत्तः, कृतपूर्वी कटमित्यादावेकदेशेऽपि क्रियारूपेऽर्थे। अन्वयाभ्युपगमात् = सम्बन्धिशब्दः सापेक्ष इति ग्रामकटेन्यर्थानां साक्षात् "समुदायेन सम्बन्धः" इति पक्षे परम्परया वा, अन्वयस्वीकात्। दृष्टान्तमाह [देवदत्तस्य गुरकुलमिति] एकार्थीभावविरहितं दृष्टान्तं दर्शयति [चैत्रस्य नप्तेति] स्वजन्यजन्यपुंस्त्वविशिष्टो नप्तृपदार्थः। चैत्रस्य "सम्बन्धिशब्दः सापेक्षः" इति पक्षे एकदेशे स्वजन्यत्वे, "समुदायेन सम्बन्धः" इति पक्षे स्वजन्यजन्यपुंस्त्वसम्बधेन परम्परया विशेष्ये नप्तर्यन्वयः। इत्यादाविवेत्यादिपदेन "अयश्शूलदण्डाजिनाभ्यां 'क'ञौ" ५-२-७६ इति सूत्रभाष्यस्थस्य "शिवभागवत" इत्यस्य, घटादन्य इत्यादेश्च ग्रहणम्। शिवो भगवान् भक्तिः = सेव्यः, अस्येत्यर्थः। घटादन्य इत्यत्र अन्यपदार्थैकदेशे भेदे, स्वप्रतियोगिकभेदसम्बन्धेनान्यस्मिन्वा पञ्चम्यर्थस्यान्वयः।

एवं च "कारकाणां भावनायामेवान्वयः" इत्यनेन भावनायामेव साक्षात्परम्परया वा कारकाणामन्वय इति प्रतिपाद्यते। भावनाघटितसम्बन्धं विनान्यत्रान्वयो व्यावर्त्यते चेति ज्ञेयम्।

उक्तमर्थमन्यत्राप्यतिदिशति [एवमिति]। [भोक्तुं पाक इति] "तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्" ३-३-१० इति सूत्रेण क्रियार्थायां क्रियायामुपपदे भविष्यदर्थे तुमुन् विधीयते। यथा ओदनं भोक्तुं पचति। अत्र तुमुन् प्रत्ययो धात्वर्थानुवादक एव। उद्देश्यत्वरूपं तादर्थ्यमपि तुमुन्द्योत्यम्। तच्च संसर्गः प्रकृत्युपपदार्थयोस्तादर्थ्यवत्समानकर्तृकत्वमपीहाभिधानलभ्यः संसर्गः। ओदनं भोक्तुं पचतीत्यादित ओदनकर्मकभविष्यद्भोजनोद्देश्यकं भोजनकर्तृकर्तृकं पचनमिति बोधः। एवं च तुमुनः क्रियायोगे विधानात्, क्रियापदस्य साध्यत्वविशिष्ट एव वृत्तेः पाक इत्यत्रापि प्रकृत्या साध्यत्वविशिष्टक्रियाभानात् तद्योगेऽपि भोक्तुं पाक इति तुमुन् सिद्ध्यति। अत्र धातुप्रतिपाद्यक्रियाया गुणभूतत्वेऽपि तन्निमित्तकस्य तुमुनः साधुत्वं स्वीकार्यम्। [भुक्त्वा पाक इति] अत्र "समानकर्तृकयोः पूर्वकाले" ३-४-२२ इति क्त्वा। समानकर्तृकयोः धात्वर्थयोः पूर्वकाले विद्यमानाद्धातोः क्त्वेति तदर्थः। यथा - भुक्त्वा पचति। पाक इति घञन्तयोगेऽपि तस्य साधुत्वं बोध्यम्। एवं गतादियोगेऽपि तुमुन्नादीनां साधुत्वं यथा - भोक्तुं गतः, पक्तुं गतः इत्यादि।

भोक्तुं पाक इत्यादौ पाकादियोगे तुमुनः साधुत्वप्रदर्शनं "गतिकारकोपपदात्कृत्" ६-२-१३९ इति सूत्रस्थकैयटानुरोधेन। तत्र हि" कृदभिहितो भावो द्रव्यव'वति। क्रियावदपि" इति भाष्ये "क्रियावदपि" इति प्रतीके "तेन तुमुन्, भोक्तुं पाक इत्यादौ क्रियोपपदाश्रयः प्रत्ययः" इति कैयटेनोक्तम्। वस्तुतस्तु कृदभिहितो भावो द्रव्यवदित्यादेरयमर्थः - यथा द्रव्यं लिङ्गसङ्ख्यासाधनैस्सम्बध्यते तथा घञाभिहितो भावोऽपि तैः सम्बध्यते। "क्रियावदपि" इत्यस्य त्वयमर्थः - अव्ययकृदभिहितस्तु भावो लिङ्गसङ्ख्यासाधनसम्बन्धाभावात्साध्यस्वभाव एव प्रतीयते नतु सिद्धस्वभाव इति हेतोः क्रियावदेवासौ भवति, नतु द्रव्यवत् - इति। एवञ्च क्रियावदपीति भाष्यस्याव्ययकृद्विषकतया पाक इत्यादिघञाद्यविषयकत्वात्तत्र साध्यमात्रावस्थ क्रियाया अभानात्तद्योगे तुमुनोऽसाधुत्वमेव। नच "तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्" इति सूत्रे साध्यमात्रावस्थक्रियाया ग्रहणे मानाभाव इति वाच्यम्। सूत्रे "क्रियार्थायाम्" इति स्त्रीलिङ्गनिर्देशेन क्रियार्थायाः क्रियाया एव लाभेन पुनः क्रियाग्रहणेन प्राधान्येन साध्यमात्रावस्थक्रियाया एव ग्रहणस्य ज्ञापितत्वात्। स्पष्टं चेदम् "उपपदमतिङ्" इति २-२-१७ सूत्रे भाष्यप्रदीपोद्द्योते। किञ्च "गतिकारकोपपदात्कृत्" ६-२-१३९ इति सूत्रे कृद्ग्रहणेन क्रियावाचकशब्दग्रहणे क्रियाशब्देन प्राधान्येन साध्यमात्रावस्थाक्रियाग्रहणमित्यर्थस्य ज्ञापनाच्च। स्पष्टं चेदं "गतिकारकोपपदात्कृत्" इति सूत्रे भाष्यप्रदीपोद्द्योते। यत्र तु क्रियारूपार्थस्य ग्रहणं तत्र गुणीभूतक्रियाया अपि ग्रहणम्। तेन गतपाकादिशब्दयोगे

कारकविभक्तिकृत्वसुच्क्त्वादीनां साधुत्वं सिद्ध्यति। यथा - ग्रामं गतः, द्विः प्रयोगः, भुक्त्वा पाक इति। "उपपदमतिङ्" "गतिकारकोपपदात्कृत्" इति सूत्रयोर्भाष्ये सर्वमिदं ध्वनितमिति तत्रैवोद्द्योते प्रपञ्चितम्। कृदर्थवादमञ्जूषाया मपि स्पष्टमिदम्। एवं च भोक्तुं पाक इत्यत्र तुमुनोऽसाधुत्वं, भुक्त्वा पाक इत्यत्र क्त्वः साधुत्वं चेति बोध्यम्।

यत्तु पञ्चोलिनः "अत्र भाष्यप्रदीपोद्द्योतकाराः - "एकस्य सकृच्च" ५-४-१९ इति सूत्रभाष्यात् "भोक्तुं पाकः" इत्यादेरसाधुत्वं लभ्यते। तथाहि - अथानुवर्तमानेऽपि क्रियाग्रहणे इह कस्मान्न भवति एकः पाक इति? पूर्वयोश्चापि योगयोः कस्मन्न भवति द्वौ पाकौ, त्रयः पाकाः, चत्वारः पाकाः, पञ्च पाकाः इति? नैतत्क्रियागणनम्। किं तर्हि? द्रव्यगणनमेतत्" इति। एतेन भावघञन्तपाकादिसमभिव्याहारे कृत्वोऽर्थानामसाधुत्वं स्पष्टमेव लभ्यते। "तुमुन्ण्वुलौ" इति सूत्रे "क्रियार्थायाम्" इति स्त्रीलिङ्गनिर्देशेनैव तत्फलक्रियाया लाभे क्रियाग्रहणसामर्थ्यात् प्रत्त्यासत्त्या च प्रत्ययार्थविशेषणतानापन्नसाध्यत्वमात्रापन्न-क्रियावाचकोपपद एव तुमुन्नादिविधानात्पाक इत्यत्र साध्यक्रियाया गुणीभूतत्वान्न तुमुन्नादिरित्याहुरिति वदन्ति। तन्न। "एकस्य सकृच्च" इति सूत्रस्थभाष्यस्य उद्द्योतकारसम्मतत्वप्रदर्शनस्यायुक्तत्वात्। नागेशसम्मतत्वेन स्वप्रतिपादिताशयस्य तद्भाष्यादलाभाच्च। तत्र क्रियावाचकक्रियापदाभावेन साध्यमात्रवस्थक्रियाग्रहणे मानाभावेन पाकादिशब्दसमभिव्याहारे कृत्वोऽर्थानामसाधुत्व-प्रतिपादनस्यासङ्गतत्वाच्च "उपपदमतिङ्" "गतिकारकोपपदा त्कृत्" इति सूत्रयोरुद्द्योते, कृदर्थवादमञ्जूषायां च पाकादिशब्दयोगे कृत्वोऽर्थानां साधुत्वस्य नागेशेन कण्ठरवेणोक्तत्वेन तेषामसाधुत्वस्य नागेशाभिप्रायत्वेन कथनस्यान्याय्यत्वाच्च। तद्भाष्येण पाकादिशब्दयोगे तुमुनोऽसाधुत्वालाभाच्चेति दिक्।

यत्तु "नव्यास्तु - तुमुन्विधायके क्रियार्थायां क्रियायामित्युक्त्या प्रत्त्यासत्त्या क्रियायोरेकजातीयत्वलाभेन स्ववाचकप्रकृतिकप्रत्ययार्थं प्रत्यगुणीभूतायाः साध्यमात्रस्वभावाया एव क्रियायामित्यनेन ग्रहणा'ोक्तुं गतः, भोक्तुं पाक इत्याद्यसाध्वेव। उभयत्रापि क्रिययोः साध्यमात्रस्वभावत्वाभावात्। प्रकृतिप्रत्ययार्थयोस्तयोर्विशेष्यविशेषणभावाच्च। ध्वनितं चेदमुपपदमिति सूत्रभाष्ये। यत्र तु क्रियामात्रार्थकस्य ग्रहणं तत्र गतपाकादियोगेऽपि सुच्क्त्वादि इत्याहुः।

तेषामयमाशयः - घञाद्यन्तस्थले प्रकृतिप्रत्ययाभ्यां विशेष्यविशेषणभावापन्नसत्त्वासत्त्वभाव-क्रियाद्वयमुपस्थाप्यते। तत्र प्रत्ययार्थक्रियायाः प्राधान्यम्। एवं च धातूपस्थाप्यक्रियायाः साध्यमात्रस्वभावत्वेऽपि तस्य घञर्थं प्रति गुणत्वान्न तत्र तुमुन्नादीति।

तत्रेदं चिन्त्यम्, भावनाधिकारीयधात्वर्थानुवादकप्रत्ययान्तयोगे तुमुनो दुर्वारत्वात्। किञ्च सुज्विधायकेऽप्युक्तविशेषणविशिष्टायास्तस्या ग्रहणमावश्यकम्। अन्यथा तत्तद्विशेषणीभूतक्रियायाः साध्यमात्रस्वभावत्वेन तज्जन्मगणने द्वौ पाकावित्यत्र सुजापत्तेरशक्यवारणत्वात्।

किञ्च "साध्यत्वेन क्रिया तत्र" इति हरिपद्यव्याख्यावसरे "एकस्यैव सम्बन्धिभेदादाचार्यत्वमातुलत्वादिवदेकस्या एव क्रियायाः प्रकृतिप्रत्ययरूपसम्बन्धिभेदादुपस्थितिः" स्वोक्तिविरोधः क्रियाद्वयबोधाङ्गीकारे इति - इति दर्पणकारा नागेशाशयमुद्भाव्य निराकुर्वन्ति।

तत्रेदं वक्तव्यम् - साध्यमात्रावस्थक्रियाग्रहणे भावनाधिकारीयधात्वर्थानुवादकप्रत्ययान्तयोगे प्रकृत्येत्यादौ तुमुन् तु नापाद्यः। उत्तरकालिकत्वादीनां क्त्वादिद्योत्यानां सत्त्वेन तत्रापि तन्मात्रार्थकत्वाभावात्। स्पष्टं चेदं "गतिकारकोपपदात्कृत्" इति सूत्र उद्द्योते। कृत्वसुजादिविधायके क्रियाग्रहणस्य स्पष्टार्थतया तद्बलेन साध्यमात्रावस्थक्रियाग्रहणस्यालाभश्च। अत एव पाकादियोगे कृत्वोऽर्थानां साधुत्वं नागेशेनोररीकृतम्। अधिकमनुपदमेव स्पष्टीभविष्यति। "एकस्यैव धात्वर्थस्य साध्यत्वेन प्रकारता, सिद्धत्वेन विशेष्यता। एकनिष्ठत्वाच्च तयोर्न स्फुटग्रहो बोधे। एतेन घञ्वाच्यो भावः प्रधानमिति ग्रन्था व्याख्याताः" इत्यादिनागेशग्रन्थपर्यालोचनया एकस्यैव व्यापारस्य धर्मभेदेन प्रकारताविशेष्यतयोर्लाभेन नागेशाशयविरुद्धं नागेशस्याविद्यमानं "तस्यायमाशयः" इत्यादिना "क्रियाद्वयमुपस्थाप्यते" इति नागेशाशयोद्भावनं, स्वोद्भाविताशयानुरोधेन "किञ्च" इत्यादिना नागेशस्य स्वोक्तिविरोधोद्भावनं च गगनकुसुमप्रख्यं दुराग्रहमूलकं चेति। ।।१९।।

अतिप्रसङ्गमाशङ्क्य समाधत्ते -

कत्वोऽर्थाः क्त्वातुमुन्वत्स्युरिति चेत्सन्ति हि क्वचित्।
अतिप्रसङ्गो नोद्भाव्योऽभिधानस्य समाश्रयात्।। ।।२०।।

भोक्तुं पाकः, भुक्त्वा पाक इत्यादौ "तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्" ३-३-१० "समानकर्तृकयोः पूर्वकाले" ३-४-२१ इति क्रियावाचकोपपदे क्रिययोः पूर्वोत्तरकाले विधीयमाना अपि तुमुन्नादयो गुणभूतां तामादाय यथा जायन्ते, तथा कुत्वोऽर्था अपि स्युः। एकः पाक इत्यत्र "एकस्य सकृच्च" ५-४-१९ द्वौ पाकौ, त्रयः, चत्वार इत्यत्र "द्वित्रिचतुर्भ्यः सुच्" ५-४-१८ पञ्चेत्यत्र कृत्वसुच् स्यात्। तथाच सकृत्पाकः, द्विस्त्रिश्चतुः पाका इत्याद्यापत्तिरिति चेदिष्टापत्तिः। द्विर्वचनमित्यादिदर्शनात्। अतिप्रसङ्गस्त्वनभिधानान्नेत्याह [अतीति] - "नहि वचिरन्तिपरः परः प्रयुज्यते" इत्याद्यभियुक्तोक्तरीत्या समाधेयमिति भावः।

केचित्तु "सङ्ख्यायाः क्रियाभ्यावृत्तिगणने" इत्यत्र क्रियाग्रहणं व्यर्थम्, तस्या एवाभ्यावृत्तिसम्भवेन सामर्थ्यात्तल्लाभात्। तथाच साध्यमात्रस्वभावक्रियालाभाय तदिति वाच्यम्। नच पाक इत्यादौ तादृशीति नातिप्रसङ्गः। द्विर्वचनमिति च "द्विः प्रयोगो द्विर्वचनम्" इति व्यत्पत्त्या "द्विर्वचनेऽचि" १-१-५९ इति ज्ञापकं वा आश्रित्योपपादनीयमित्याहुः।। ।।२०।।

ननु गुणीभूतक्रियान्वयेऽपि यदि तुमुन्नादीनां साधुत्वं, तदा सकृत्पाकः, द्विष्पाका इत्याद्यपि स्यादित्याशङ्क्येष्टापत्त्या परिहरन्नाह [अतिप्रसङ्गमिति] सच मूल एव स्पष्टः।

कारिकायां कृत्वोर्थाः = कृत्वसुच्सुच्धाः [सन्ति हीति] उक्तापत्तिरिष्टैवेति भावः। अभिधानस्य = तत्तत्प्रयोगस्य। यत्र तादृशमर्थमभिधातुं कृत्वोऽर्थास्समर्थास्तत्र स्युरेव यथा - द्विर्वचनम्, द्विरण् विधिः, द्विःकर्ता, द्विर्भोक्तेति। [कृत्वसुच् स्यादिति] एवं भोजनमित्यादियोगे "विभाषा बहोर्धाऽविप्रकृष्टकाले" ५-४-२० इति धाप्रत्ययोऽपि स्यादिति बोध्यम्। [इत्यादीति] आदिपदेन बहुधा दिवस्य भोजनमित्यस्य ग्रहणम्। इष्टापत्तौ मानमाह [द्विर्वचनमिति] ल्युडन्तयोगे सुच्। नच भावप्रत्ययान्ते पाकः, पक्तिः, पचनमित्यादौ धात्वर्थभावस्य गुणभावः, प्रत्ययार्थस्य प्राधान्यमित्यत्र किं वा विनिगमकम्? नहि राज्ञः पुरुष इत्यादाविव पाचक इत्यादाविव चार्थद्वयोपस्थितिरस्तीति वाच्यम्। प्रकृतिप्रत्ययरूपवाचक-भेदेनैकस्यैवार्थस्य भेदकल्पनया गुणप्रधानभावोपपत्तेः। एकार्थवृत्तित्वेन च न गुणप्रधानभावस्य स्फुटं ग्रहो बोधे। तत्र च लिङ्गसङ्ख्यासम्बन्धवशात्प्रत्ययार्थस्य प्राधान्यमध्यवसीयते। अव्ययकृदन्तस्थल एतादृशविशेषस्याभावात्प्रत्ययस्य धात्वर्थानुवादकत्वमेवेति ज्ञेयम्। एतेन "स्ववृत्ति क्रियात्ववत्सम्बन्धेन साध्यभाषणविशिष्टं सिद्धभाषणमिति वचनशब्देन बोधः। एवमेव पाक इत्यादावपि बोध्यम्" इति पञ्चोलिनः परास्ताः।

यदपि "**किञ्च तुमुन्नादीनां प्रधानक्रियान्वयित्वे साधुत्वस्वीकारेऽपि भावप्रत्ययस्थले साध्यत्वेन क्रिया तत्र धातुरूपनिबन्धना**" इति ह्युक्तरीत्या एकस्यैव चैत्रादेर्यथा सम्बन्धिभेदादाचार्यत्वपितृत्वादिर्भेदस्तथैव एकस्या एव क्रियाया धातुना साध्यत्वेन प्रतिपादने प्रत्ययस्य तात्पर्यग्राहकत्वम्, प्रत्ययेन सिद्धत्वेन प्रतिपादने धातोस्तात्पर्यग्राहकत्वमिति गुणीभूतत्वाभावे उक्तप्रयोगाणामिष्टापत्तिरुचितैव। अत एव भावप्रत्ययस्थले "पाक" इत्यादौ क्रियाया न द्विधा बोधानुभवः। यत्र तु "गतः" इत्यादिस्थले गुणीभूतत्वं क्रियायास्तत्र तुमुन्क्त्वादीनां त्वसाधुत्वमेव, क्रियाप्राधान्य एव तत्प्रवृत्तेरिति दिक्" इति पञ्चोलिनः।

तत्रेदं चिन्त्यम्। "सिद्धभावस्तु यस्तस्याः स घञादिनिबन्धनः" इति हरिकारिकोत्तरार्धेन एकस्यामेवावस्थायां प्रकृत्या साध्यरूपत्वं, प्रत्ययेन सिद्धरूपत्वं चैकस्या एव क्रियायाः प्रतिपाद्यते, नतु कदाचित्प्रकृत्या साध्यत्वं, कदाचित्प्रत्ययेन सिद्धत्वम्। चैत्रादेराचार्यत्वपितृत्व-दृष्टान्तोऽप्यस्माकमेवानुकूलः। नह्याचार्यत्वसत्तादशायां चैत्रादौ पितृत्वमपैति। "मृगो धावति पश्येति" इति हरिप्रतिपादितदृष्टान्तान्तरमस्मदाशयमेवोपोद्बलयति। युक्तं चैतत्। अन्यथा प्रकृत्या क्रियायाः साध्यत्वेनोपस्थितौ प्रत्ययस्य तात्पर्यग्राहकतादशायामोदनस्य पाक इत्यादौ प्रकृत्यर्थान्वयित्वेन कर्मषष्ठ्युपपत्तावपि पाक इत्यत्र सिद्धरूपत्वेन भासमानस्यार्थस्याभावेन लिङ्गसङ्ख्यानन्वयापत्तिर्दुर्वारा। एवं प्रत्ययेन सिद्धत्वेन रूपेणोपस्थितौ धातोस्तात्पर्यग्राहकतादशायां साध्यत्वेन भासमानस्यार्थस्याभावादोदनस्येति कर्मषष्ठ्यनुपपत्तिर्दुष्परिहरा। नहि कदाचित्कर्मषष्ठ्याः, कदाचिल्लिङ्गसङ्ख्ययोरुपपत्तिरिति वक्तुं पार्यते। किञ्च घञादेः कदाचिदेकस्मिन्नेव प्रयोगे वाचकत्वं, कदाचिद्द्योतकत्वमित्यनुभवविरुद्धम्। किञ्च कृदन्तेऽव्ययग्राहकता अदृष्टचरी। किञ्च गतादियोगे तुमुनोऽसाधुत्वेऽपि क्त्वोऽसाधुत्वं दूरापास्तम्। एकस्यैव धर्मद्वयाक्रान्ततया भानान्न बोधावृत्तिरपीति।

[अनभिधानादिति] अनभिधानं च ततः शिष्टलोकस्य बोधाभावरूपमिति "तदस्य तदस्मिन् स्यादिति" ५-१-१६ इति सूत्रे भास्ये स्पष्टम्। तत्र हि "द्वयी विवक्षा, प्रायोक्त्री लौकिकी च" इत्युक्तम्। प्रयोक्तृशब्देन व्यवहारार्थं प्रयोगकर्तारः। ते चापभ्रंशानपि प्रयुञ्जते। अतस्तद्विवक्षा न शास्त्रे प्रवृत्तौ नियामिका। लोकशब्देन शिष्टलोकः। स हि यत्रार्थे यं शब्दं धर्मबुद्ध्या परिशिष्टबोधनाय प्रयोक्तिमिच्छति तद्विवक्षा शास्त्रप्रवृत्तौ प्रयोजिकेति तदर्थ इति तत्रैव कैयटे स्पष्टम्। शिष्टाश्च शब्दतत्त्वविदः साक्षात्कृतपरावरा इति पृषोदरादिसूत्रे भाष्ये स्पष्टम्।

अनभिधानं विनापि सकृत्पाक इत्यादिप्रयोगापत्तिं वारयतां मतमाह [केचित्त्विति]। [व्यर्थमिति] निरूपितमिदं प्राक्। तस्या एव = क्रियाया एव। एवशब्देन द्रव्यगुणव्यावृत्तिः। सामर्थ्यात् = सूत्रेऽभ्यावृत्तिग्रहणसामर्थ्यात्। तल्लाभात् = क्रियारूपार्थलाभात्। [तथाचेति] क्रियापदाभावेऽपि तल्लाभे चेत्यर्थः। तत् = सूत्रे क्रियाग्रहणम्। [न चेति] नहीत्यर्थः। तादृशी = साध्यमात्रस्वभावा। नन्वेवं द्विर्वचनमित्यादेः का गतिरत आह [द्विर्वचनमिति चेति] द्विर्वचनमिति शब्दरूपं त्वित्यर्थः। अस्य "उपपादनीयम्" इत्यत्रान्वयः कार्यः। उपपत्तिमाह [द्विः प्रयोग इति]। [व्युत्पत्त्येति] भाष्योक्तव्युत्पत्तिबलेनेत्यर्थः।

[आहुरिति] अनेनारुचिस्सूचिता। तथाहि - सूत्रे क्रियाग्रहणं न निरुक्तार्थज्ञापनार्थं, भाष्यानुक्तत्वात्, किं त्विह स्पष्टार्थमेव। पञ्चकृत्वः पाचक इत्यादेरिष्टत्वमेव। तथाच हरिः - वाक्य - तृतीये क्रियासमुद्देशे ५२-

लकृत्यक्तखलर्थानां तथाव्ययकृतामपि।
रूढिनिष्ठा घञादीनां धातुः साध्यस्य वाचकः।। इति

अत्र हेलाराजः कृत्यादियोगे कृत्वसुजादयो भवन्त्येवेत्याह - कृत्येत्यादि क्तो नपुंसकविषयः। रूढिशब्दास्ताच्छीलिकाः। घञादयः भावकर्मादिविहिताः। आदिना तृजादयः। द्विश्शयितव्यम्, द्विस्सुकरः, द्विर्हसितम्, द्विर्दत्तवान्, द्विः कर्ता, द्विः पाकः द्विर्भुक्त्वा गत इत्युदाहरणानि" इति।

अत एव द्विः प्रयोगः, "द्विर्वचनेऽचि" द्विर्बद्धं सुबद्धं भवतीत्यादि सङ्गच्छते। सङ्गच्छते च "आवृत्तिरसकृदुपदेशात्" ४-१-१ इति वैयासकं सूत्रं, सकृच्छ्रवणं, सकृन्मननं, सकृन्निदिध्यासनम्। "नहि सकृत्प्रयुक्ताभ्यां शास्त्रयुक्तिभ्यामनवगतो विशेषः शतकृत्वोऽपि प्रयुज्यमानाभ्यामवगन्तुं शक्यते" इति तदधिकरणस्थं शारीरकभाष्यं च।

ननु "अभ्यावृत्तिग्रहणादेव क्रियासप्रत्ययः सिद्धः। तस्मात्क्रियाविशेषप्रतिपत्त्यर्थं क्रियाग्रहणं कृतम्। तेन साध्यस्वभावैव क्रिया गृह्यते। पाकादिभिस्तु शब्दैः सिद्धस्वभावाभिधीयते। सिद्धतायां घञादिविधानात्। यद्यपि धातुनात्र साध्यस्वभावा क्रियाभिधीयते, तथापि प्रत्ययार्थस्य प्राधान्यात्साध्यत्वं गुणीभूतमिति क्रियाग्रहणादिह सिद्धताधर्मयुक्तपाकाद्यग्रहः" इति "एकस्य सकृच्च" ५-४-१९ इति सूत्रस्थकैयटविरोध इति चेन्न। "द्विर्वचनेचि" इति ज्ञापकात् क्वचिद् घञाद्यन्तप्रयोगेऽपि कृत्वोऽर्थप्रत्ययो भवति" इति तत्सूत्रशेषस्थस्वग्रन्थेन "साध्यस्वभावैव क्रिया" इत्यादिप्रागुक्तस्वग्रन्थस्यानुक्तत्वस्य स्वयमेव सूचितत्वात्। स्पष्टं चेदमुद्योते।।।।२०।।

ननु सिद्धान्ते बोधकतारूपा शक्तिराख्यातशक्तिग्रहवतां बोधादावश्यकीति धातोरेव भावना वाच्या, नाख्यातस्येति कथं निर्णय इत्याशङ्कां समाधत्ते -

भेद्यभेदकसम्बन्धोपाधिभेदनिबन्धनम्।
साधुत्वं, तदभावेऽपि बोधो नेह निवार्यते।। ।।२१।।

भेद्यं = विशेष्यं, भेदकं = विशेषणं, तयोर्यः सम्बन्धस्तस्य यो भेदस्तन्निबन्धनं साधुत्वम्। अयमर्थः - व्याकरणस्मृतिः शब्दसाधुत्वपरा। तत्रैवावच्छेदकतया

कल्प्यमानधर्मस्य शक्तित्वं वदतां मीमांसकानां पुनः शक्तित्वं साधुत्वमित्येकमेवेति तद्रीत्या विचारे साधुत्वनिर्णय एव शक्तिनिर्णय उच्यते। अतिरिक्त-शक्तिवादेऽप्याख्यातानामसाधुता भावनायां स्यादेव। एवञ्च चतुर्थ्यर्थे तृतीयाप्योगवद्धात्वर्थभावनायामाख्यातप्रयोगे याज्ञे कर्मण्यसाधुशब्दप्रयोगात् "नानृतं वदेत्" इति निषेधोल्लङ्घनप्रयुक्तं प्रायश्चित्तं दर्शनान्तरीयव्युत्पत्तिमतां स्यादेव - इति।।

एवं धातोरसत्त्वभावनावाचित्वे पाक इत्यादावपि तादृशभावनाभानापत्तिं मीमांसकोद्भावितामिष्टापत्त्या परिहृत्य तत्र "ओदनस्य पाकः" इति कर्मणि षष्ठीं प्रमाणयित्वा तदुपष्टम्भकतया कारकाणां भावनान्वयित्वं संसाध्य तत्प्रसङ्गेन सम्बोधनान्तादीनामपि क्रियायामेवान्वये साधुत्वं व्युत्पाद्य आख्यातवाच्यत्वनिराकरणेन भावनाया धातुवाच्यत्वं सिद्धान्तितम्। तत्र सिद्धान्ते मीमांसकानां पर्युनुयोगं प्रदर्श्य निराकरोति [नन्विति] सिद्धान्ते = भावना धातुवाच्येति वैयाकरणसिद्धान्ते स्वीकृतेऽपि। [बोधकतारूपेति] "इन्द्रियाणां स्वविषयेषु" इत्यादिना वक्ष्यमाणा बोधकतारूपेत्यर्थः। [आख्यातशक्तिग्रहवतामिति] "आख्यातं भावनाविषयकबोधजनकम्" इति शक्तिज्ञानवतां मीमांसकानामित्यर्थः। [बोधादिति] तद्रीत्या व्युत्पन्नस्य आख्यातपदाद्भावनाबोधस्याप्यनुभव-सिद्धत्वादित्यर्थः। [आवश्यकीति] अत्र बोधकतारूपा शक्तिरित्यन्वेति। आख्यातेऽपि बोधकतारूपा शक्तिरावश्यकीति योजयितव्यम्। अत्र हेतुः "आख्यातशक्तिग्रहवतां बोधात्" इति। ततः किमायातमत आह [इतीति] इति हेतोरित्यर्थः। [कथं निर्णय इति] "विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः" ३-१-४१ इति न्यायसूत्रम्। अंय भावः - बोधकता शक्तिरिति त्वया पतिपादयिष्यते। तद्रीत्या विचारे भावनायां धातुशक्तिग्रहवतो बोधाद्धातोर्भावनायां शक्तिस्सिध्यतु। परं तु भावनायामाख्यात-शक्तिग्रहवतामाख्यातादपि भावनाबोधदर्नाद्भावनायामाख्यातस्य बोधकतारूपा शक्तिः सिद्ध्यत्येव। एवं स्थिते भावना धातोरेव वाच्या, नाख्यातस्येति कथं निर्णयः? प्रतिपक्षस्य सर्वात्मनाऽनिराकृतत्वात् - इति।

भेद्यभेदकेत्यादिकारिका हरेरिति प्रसिद्धिः। "तदुक्तं हरिणा भेद्यभेदक .... निवार्यते" इति तिङर्थवादमञ्जूषायां नागेशोऽपि स्पष्टमेव ब्रवीति। प्रामाणिकीं हरिकारिकामिमां स्वाभिमतार्थप्रतिपादकतया दीक्षितः स्वग्रन्थमानिनाय। परन्तु प्रकृत उपलब्धवाक्यपदीय एषा कारिका न दृश्यते। कालवशादभ्रश्यद्वाक्यपदीयादित्यनुमीयते। एवं लकारार्थनिर्णये "अस्ति प्रवर्तनारूपम्" इत्यादिकारिकाद्वयं भूषणसारोदाहृतं हरिग्रन्थाद् भ्रष्टमिति ज्ञायते। कारिकाद्वयं हरेरिति दर्पणव्याख्याने तिङर्थवादमञ्जूषायां च स्पष्टमेवोक्तम्।

भवदुक्तोऽपि बोधो भवद्दर्शनव्युत्पन्नानामनुभवसाक्षिक इति सत्यमेव। नहि वयं बोध एवं नोदेतीति ब्रूमः। किन्तु तस्मिन्नर्थे तिङ्प्रत्ययस्यासाधुत्वम्। एवञ्च कस्माद्वाक्यात्कीदृशो बोधः? इति प्रश्ने यो यथा व्यत्पन्नस्तस्य तादृगेव बोधो जायत इति वस्तुस्थितिः। कीदृशे बोधे साधुत्वं, कुत्र नेति परं विचारविषय इति समाधातुराशयः।

कारिकां व्याचष्टे [भेद्यं = विशेष्यमिति]। भिदेः कर्मणि ण्यप्रत्ययः। भिद्यते इतरेण व्यावर्त्यते इति व्युत्पत्त्या भेदशब्दो विशेष्यपर इत्याशयः। [भेदकं = विशेषणमिति] भिदेः कर्तरि ण्वुल्। भिनत्ति = इतरस्माद्व्यावर्तयतति व्युत्पत्त्या प्रकृतार्थलाभः। उभयत्रापि "सामान्ये नपुंसकम्" इति नपुंसकत्वम्। तयोः = विशेष्यविशेषणयोः। [यः सम्बन्ध इति]। विशेष्यविशेषणभाव इत्यर्थः। तस्य = सम्बन्धरूपोपाधेः। यो भेदः = सम्बन्धविशेषसमवायादिः। मूले भेदशब्दो विशेषपरः सः = सम्बन्धविशेषसमवायादिः, निबन्धनं = निमित्तं यस्य तत् = तन्निबन्धनम्। भेद्यभेदकशब्दयोः द्वन्द्वे तस्य सम्बन्धशब्देन षष्ठीसमासे तस्योपाधिशब्देन विशेषणसमासे द्वन्द्वे तस्य सम्बन्धशब्देन षष्ठीसमासे तस्योपाधिशब्देन विशेषणसमासे "ततो भेदशब्देन षष्ठीतत्पुरुषे भेदान्तनिबन्धनशब्दयोर्बहुव्रीहौ प्रकृतार्थसिद्धिः।

अयं भावः - घटादिशब्दानां घटत्वादि प्रवृत्तिनिमित्तम्। तदेव भेदकमित्यभिधीयते। तदाश्रयीभूतं यद् घटादि तदेव भेद्यम्। तयोर्घटत्वघटयोर्यो विशेषणविशेष्यभावः स एव सम्बन्धोपाधिरितरव्यावर्तकः = समवायसम्बन्धेन घटत्वविशिष्टघटनिरूपितबोधकत्वमेव घटशब्दे। नतु घटविशिष्टघटत्वबोधकत्वं, पटत्वविशिष्टपटबोधकत्वं वेत्येवं घटादिशब्दानामन्यतो बोधकत्वं वारयति। तथाच यस्मिन् विशेष्ये विशेष्यतया भासमाने घटादौ यादृशविशेषणा (घटत्वादि) न्विते यादृशानुपूर्व्याः सूत्रवार्तिकभाष्यकाराद्यन्यतमेन साधुत्वमुक्तं तत्र स शब्दः साधुरन्यत्रासाधुरेव। अत एव दन्त्यसकारमध्योऽस्वशब्दो दरिद्रे साधुः। घोटकेऽसाधुरेव। एवं तालव्यमध्योऽश्व शब्दो घोटके साधुः। दरिद्रेऽसाधुरेव।

यद्वा भेद्यं, भेदकं तयोर्यस्सम्बन्धश्चेति त्रयाणां द्वन्द्वः। तद्रूपा ये उपाधयः, तेषां यो भेदस्तन्निबन्धनं साधुत्वमित्यर्थः। स्पष्टं चेदं तिङर्थवादमञ्जूषाव्याख्याने कलायाम्।

यद्वा भेद्यं, भेदकं, तयोर्यस्संसर्गश्च उपाधिः = पशौ कर्तरि इति पश्वादिश्चेति चतुर्णां द्वन्द्वः, तेषां यो भेदस्तन्निबन्धनमित्यर्थः। इदमपि "तेन तुल्यं क्रियाचेद्वतिः" ५-१-११५ इति सूत्रे शब्दरत्ने स्पष्टम्।

एवंच "भूवादयो धातवः" १-३-१ "क्रियावचनो धातुः" "भाववचनो धातुः" "कश्च धात्वर्थः ?" क्रिया "उपसर्गाच्छन्दसि धात्वर्थे" ५-२-२२८ इत्यादिसूत्रवार्त्तिकभाष्यैर्भावनावाचित्वस्य धातोर्निर्धारितत्वेन "लः कर्मणि च भावेचाकर्मकेभ्यः" ३-४-६९ "प्रधाने कर्तरि लादयो विधीयन्ते" "तिङ्भ्यामेकं द्रव्यमभिधीयते" "सुपां कर्मादयोप्यर्थाः सङ्ख्या चैव तथा तिङाम्" इत्यादि सूत्रवार्तिकभाष्यैः कर्त्रादेर्धर्मिण आख्यातावाच्यतायाः कण्ठतः प्रतिपादितत्वेन च तिङां मीमांसकानुभवबलेन भावनाबोधकत्वेऽपि तत्रासाधुत्वं दुर्वारमेव। व्याकरणबलेन कर्त्रादिबोधकत्व एव तिङां साधुत्वलाभात्। तदेतन्मनसि निधायाह [अयमर्थ इत्यादिना स्यादेवेत्यन्तेन]

[साधुत्वपरेति] अत्र च "मृजिप्रसङ्गे मार्जिस्साधुर्भवति" इति वृद्धिसंज्ञासूत्रे भाष्यं मानम्। हरिरप्याह -

"साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः" इति।

साधुपदव्युत्पत्त्यधिकरणे मीमांसकैरप्येवमेव निर्णीतम्। ततः किमायातमित्यत आह [तत्रैवेति] साधुशब्द एवेत्यर्थः। एवशब्देनासाधुशब्दो व्यावर्त्यते। अवच्छेदकतया = बोधजनकतावच्छेदकतया। [कल्प्यमानधर्मस्येति] जनकतायाः = बोधजनकतावच्छेदकतयाः। [कल्प्यमानधर्मस्येति] जनकताया अवच्छिन्नत्वनियमानुरोधेनावच्छेदकधर्मकल्पनाया आवश्यकतया अवच्छेदकत्वेन कल्पितधर्मस्येत्यर्थः। मीमांसकानां पुनः = मीमांसकानां तु। तुशब्द एवार्थकः। [शक्तित्वं साधुत्वमित्येकमेवेति] साधुशब्देभ्य एव बोधोत्पत्त्यङ्गीकारेण शक्तेः साधुशब्दमात्रवृत्तितया शक्तत्वमेव साधुत्वमिति फलतीत्यर्थः। तद्रीत्या = मीमांसकरीत्या। [साधुत्वनिर्णय एवेति] साधुत्वनिर्णयस्य व्याकरणस्मृत्यधीनतया शक्तिनिर्णयस्यापि तदधीनत्वमिति भावः। तथाच "अनादिवाचकत्वमेव साधुत्वं, तद्विपर्ययश्चासाधुत्वम्" इति साधुपदव्युत्पत्त्यधिकरणे मीमांसकैरुच्यते। एवं च व्याकरणस्य शक्तिनिर्णायकत्वं निष्प्रत्यूहमिति तद्विरोधाद्भावनायामाख्यातस्यासाधुत्वमेव।

[अतिरिक्तशक्तिवादेऽपीति] साधुत्वापेक्षयातिरिक्ते शक्तिवादेऽपीत्यर्थः। ईश्वरेच्छा शक्तिः। पदपदार्थयोः सम्बन्धः सेत्यादि वादेऽपीति यावत्। [असाधुतेति] साधुत्वस्य व्याकरणैकगम्यतया व्याकरणेनाऽऽख्यातस्य धर्मिबोधकत्व एव साधुत्वनियमनाद्भावनायामसाधुता स्यादेवेत्याशयः। नच व्याकरणं साधुत्वमात्रतात्पर्यकं, नार्थव्यवस्थापकमिति वाच्यम्। व्याकरणं शक्तिग्राहकमिति वृद्धव्यवहारस्यासङ्गत्यापत्तेः। अर्थविशेषपुरस्कारेणैव साधुत्वस्य भाष्यसङ्गतत्वाच्च। "पदसमयज्ञानार्थं व्याकरणम्" इति न्यायभाष्ये वात्स्यायनोक्तेश्चेति बोध्यम्।

[एवं चेति] भावनायामर्थे तिङामसाधुत्वे चेत्यर्थः। [चतुर्थ्यर्थ इति]। "संप्रदाने चतुर्थी" इति शास्त्रेणानुशिष्टा। तेन संप्रदाने चतुर्थ्या एव साधुत्वलाभे विना व्यत्ययानुशासनं तृतीयादिकं न साधु। तत्पयोगे तस्यानृतवदनरूपदोषजनकत्वं शास्त्रकृद्भिरुच्यते, तद्वदित्यर्थः। [भावनायामिति] व्याकरणे धात्वर्थत्वेन प्रतिपादितभावनायामित्यर्थः। आख्यातप्रयोगे = व्याकरणोल्लङ्घनेन तिङ्प्रयोगे सति। [नानृतं वदेदिति] शब्दार्थभेदेन सत्यं द्विविधम्। तत्र यथैवार्थसत्यं यथावस्थितार्थकथनरूपं धर्माय, तथा शब्दसत्यमपि यथावस्थिताविप्लुतशब्दोच्चारणरूपं धर्माय भवति। यथाचान्यथावस्थितस्य अन्यथावचनरूपमर्थानृतं जनयति, तथान्यरूपे वाचके सत्यन्यरूपोच्चारणरूपं शब्दानृतमपि प्रत्यवायं जनयतीति मीमांसायामेव निर्णीतम्।

[प्रायश्चित्तमिति] "यद्यविज्ञाते भूर्भुवः स्वाहेत्याहवनीये जुहोति" इति श्रोतं प्रायश्चित्तमित्यर्थः। तच्च यज्ञाङ्गभ्रेषनिमित्तकम्। किञ्च यागवैगुण्यं च दुर्वारमिति बोध्यम्।

[दर्शनान्तरीयेति] अन्यद्दर्शनं दर्शनान्तरं, तत्र भवा दर्शनान्तरीया। ग्रहादित्वाच्छः। व्युत्पत्तिः = शास्त्रजन्यं यत् शब्दार्थज्ञानं। तत्संपाद्यः संस्कारविशेषः, शास्त्रीयार्थबोधकशक्तिर्वा। दर्शनान्तरीया चासौ व्युत्पत्तिश्चेति कर्मधारयः। अत्र दर्शनान्तरशब्देन न्यायमीमांसयोरुभयोरपि ग्रहणमविशेषात्। एवं चार्वाचीननैयायिकमीमांसकानां व्याकरणातिरिक्तेऽर्थे पचतीत्यादिप्रयुञ्जनानां प्रत्यवायो यागवैगुण्यं च दुर्वारम्, तदतिरिक्तेऽर्थे तेषामसाधुत्वात्। शब्दसाधुत्वे व्याकरणस्यैव प्राबल्यादिति ज्ञेयम्।

ननु व्याकरणमपि तिङां भावनावाचित्वमेव बोधयत। तथाच भूवादिसूत्रे भाष्ये अन्वयव्यतिरेकाभ्यामर्थावगतिरिति संदर्भे इह पचतीत्युक्ते अर्थोऽपि कश्चिद्गम्यते विक्लित्तिः, कर्तृत्वमेकत्वं च। पठतीत्युक्ते अर्थोपि कश्चिद्धीयते, कश्चिदुपजायते। कश्चिदन्वयी, विक्लित्तिर्हीयते, पठिक्रयोपजायते, कर्तृत्वमेकत्वं चान्वयि" इत्युक्तम्। एवमनभिहितसूत्रेऽपि भाष्ये "भिनत्ति छिनत्ति। श्नमोक्तत्वात्कर्तृत्वस्य कर्तरि शब् न भवति" इत्यक्तम्। अत्र कर्तृत्वशब्देन कृतिरूपा भावनोच्यते। पचति पठतीत्यत्रान्वयी कर्तृत्वरूपोऽर्थ इत्युक्त्या तस्य प्रत्ययार्थत्वं स्पष्टमेव लभ्यते इति चेन्न। "प्रधाने कर्तरि लादयो विधीयन्ते, गौणे कर्मणि दुह्यादेः प्रधाने नीहृकृष्वहाम्" "सुपां कर्मादयो प्यर्थाः सङ्ख्या चैव तथा तिङाम्" "तिङ्भ्यामेकं द्रव्यमभिधीयते" इत्यादिन्यायोपबृंहितानेकभाष्यविरुद्धत्वात्प्रदर्शित-भाष्यस्यैकदेश्युक्तित्वेन तस्यासाधकत्वात्। उक्तं चैतत्प्राक्।

नच "उपपदमतिङ्" १-२-१९ इति सूत्रे "उपपदमति ङिति तदर्थप्रतिषेधः" इति वार्तिके "उपपदमतिङिति तदर्थस्यायं प्रतिषेधः। कस्य? तिङर्थस्य। "कः पुनस्तिङर्थः? क्रिया" इति भाष्येण क्रियाया आख्यातार्थत्वलाभ इति वाच्यम्। भाष्ये तिङर्थ इत्यस्य तिङन्तार्थ इति प्रदीपोद्द्योते

व्याख्यातत्वात्। युक्तं चैतत्। अन्यथा "क्रियाप्रतिषेधो वा" इति लाघवमूलके न्यासान्तरे "कारको गतः, हारको यातः" इति प्रत्युदाहरणस्यासङ्गतिः स्पष्टैवेत्यलम्।

ननु त्वन्मते नानृतमिति निषेधः क्रत्वर्थ एव न सिद्ध्येत्। आख्यातेन कर्तुरुक्तत्वाच्छ्रुत्या पुरुषार्थतैव स्यात्। प्रकरणाद्धि क्रत्वर्थता। तच्च श्रुतिविरोधे बाध्यत इति चेन्न। "तिङर्थस्तु विशेषणम्" इत्यनेन परिहृतत्वात्। नहि गुणभूतः कर्ता निषेधं स्वाङ्गत्वेन ग्रहीतुमलम्। भावना तु प्रधानं तं ग्रहीतुं समर्थेति प्रकरणात् क्रत्वर्थतैव।

अस्तु वा क्रतुयुक्तपुरुषधर्मः, अनुष्ठाने विशेषाभावात्, "जञ्झभ्यमानो ब्रूयान्मयि दक्षक्रतू" इति वाक्योक्तमन्त्रजपवदित्यादि भषणे प्रपञ्चितम्।

नन्वाख्यातस्य भावनायामसाधुत्वे ततस्तद्बोधो न स्यात्, साधत्वज्ञानस्य शाब्दबोधहेतुत्वादित्यत आह - [बोध इति] असाधुत्वेऽपि साधुत्वभ्रमाद् बोधोऽस्तु नाम, अपभ्रंशवत्। असाधुत्वं तु स्यादेवेति भावः।

वस्तुतः साधुत्वज्ञानं न हेतुः, तद्व्यतिरेकनिर्णयोऽपि न प्रतिबन्धक इति "असाधुरनुमानेन" इत्यत्र वक्ष्यामः।। ।।२१।।

रङ्गोजिभट्टपुत्रेण कौण्डभट्टेन निर्मिते।
पूर्णो भूषणसारेऽस्मिन् धात्वाख्यातार्थनिर्णयः।।
इति वैयाकरणभूषणसारे धात्वाख्यातसामान्यार्थयोर्निरूपणम्।।१।।

उक्तरीत्या कर्तुराख्यातार्थत्वे व्याकरणसिद्धान्तसङ्गतावपि पूर्वमीमांसासिद्धान्तो न सिद्ध्यति। तथाहि - "नानृतं वदेदिति दर्शपूर्णमासप्रकरणपठितस्य निषेधस्य क्रत्वर्थत्वं, न पुरुषार्थत्वम्। एवं च क्रतावपभाषणे क्रतोर्वैगुण्यापत्तिभिया यज्ञगता अनृतं न वदन्ति। पुरुषार्थत्वे तु निषेधस्य, क्रत्वङ्गत्वाभावादनृतवदनेऽपि क्रतोर्वैगुण्यभावाद्यज्ञगतेन स निषेधो न परिपाल्येत। एवं च यः स्वस्य प्रत्यवायमङ्गीकृत्य क्रतुमविगुणमिच्छति तेनानृतं न वर्ज्यं न स्यात्। अतो निषेधस्य क्रत्वर्थत्वमेवाऽऽस्थेयं, न पुरुषार्थत्वमिति मीमांसकैः कर्त्रधिकरणे निर्णीतम्। कर्तुराख्यातवाच्यत्वे स मीमांसकसिद्धान्तो न सिद्ध्यति - इत्याशयेन मीमांसकः पर्यनुयुङ्क्ते [नन्विति] त्वन्मते = आख्यातस्य कर्तृवाचित्ववादिनस्तव मते। निषेधः = ज्योतिष्टोमप्रकरणपठितो "नाऽनृतं वदेत्" इति निषेधः। [न सिद्ध्येदिति] तथाच क्रतावपभाषणे क्रतुवैगुण्यनिवारणार्थं प्रायश्चित्तानुष्ठानादिसकलयाज्ञिकमीमांसकादिशिष्टाचारविरोधापत्तिर्दोष इति भावः।

ननु आख्यातार्थस्य कर्तृवाचित्वस्य, निषेधस्य क्रत्वर्थत्वासिद्धेश्च कः सम्बन्धः कर्तुराख्यातार्थत्वेऽपि

निषेधस्य क्रत्वर्थत्वे किं वा बाधकमित्यत आह [आख्यातेनेति] श्रुत्या = निरपेक्षरवरूपया श्रुत्या = [पुरुषार्थतैवेति] एवशब्देन क्रत्वर्थत्वनिरासः। नचेष्टापत्तिः। क्रत्वङ्गत्वाभावेन यज्ञगतेन स्वस्य प्रत्यवायेऽपि क्रतुमविगुणमिच्छताऽनृतवदनस्य परित्यागापत्तेः। क्रत्वङ्गत्वे तु यागवैगुण्यभयेनानृतवदनं परिपालितं स्यादेवेति स्पष्टमेव। [तच्चेति] प्रकरणं चेत्यर्थः। [बाध्यत इति] तथाच जैमिनेः सूत्रं "श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात्" ३-३-१४ इति। श्रुत्यादीनां समवाये = एकविषयसमवायेन विरोधे सति पारदौर्बल्यमिति तदर्थः। विधि-मन्त्र-नामधेय-निषेधार्थवादात्मको वेदः। तत्रोत्पत्तिविधिर्विनियोगविधिः प्रयोगविधिरधिकारविधिश्चेति विधिश्चतुर्विधः। तत्राङ्गप्रधान-सम्बन्धबोधको विधिर्विनियोगविधिः। यथा दध्ना जुहोतीति। स हि तृतीयाप्रतिपन्नाङ्गभावस्य दध्नो होमसम्बन्धं विधत्ते। दध्ना होमं भावयेदिति। तस्य च विधेः सहकारिभूतानि षट् प्रमाणानि। श्रुतिलिङ्गवाक्यप्रकरणस्थान-समाख्यारूपाणि। एतत्सहकृतेन विधिना अङ्गत्वं परोद्देशप्रवृत्तकृतिव्याप्यत्वरूपं पारार्थ्यापरपर्यायं ज्ञाप्यते। श्रुत्यादिषु विरोधे परस्परं दुर्बलमिति न्यायविदां समयः। तत्र निरपेक्षो रवः श्रुतिः। सा च विधात्री, अभिधात्री, विनियोक्त्री चेति त्रिधा। तत्र विधात्री क्तिङाद्यात्मिका अभिधात्री व्रीह्यादि श्रुतिः। यस्य शब्दस्य श्रवणादेव सम्बन्धः प्रतीयते सा विनियोक्त्री। सा च त्रिविधा। विभक्तिरूपा, समानाभिधानरूपा, एकपदरूपा चेति। तत्र विभक्तिश्रुत्याऽङ्गत्वं यथा - व्रीहिभिर्यजेतेति तृतीयाश्रुत्या व्रीहीणां यागाङ्गत्वम्। पशुना यजेतेत्यत्रैकत्वपुंस्त्वयोः समानाभिधानश्रुत्या कारकाङ्गत्वम्, यजेतेत्याख्याताभिहितसङ्ख्याया भावनाङ्गत्वं समानाभिधानश्रुतेः। एकपदश्रुत्या च यागाङ्गत्वमिति पूर्वतन्त्रे निर्णीतम्।

एवं च वैयाकरणमते श्रुत्या = आख्यातरूपशब्देन कर्तुरुपस्थितत्वादनृतवदनस्य पुरुषार्थत्वं, नानृतमिति वचनस्य दर्शपूर्णमासप्रकरणे पठितत्वेन प्रकरणेन क्रत्वर्थत्वं च प्राप्तम्। तत्र प्रकारणात् श्रुतेर्बलवत्त्वेन तस्या एव विनियोजकत्वेनानृतवदननिषेधस्य पुरुषार्थत्वमेव स्यात्, न प्रकरणप्राप्तक्रत्वर्थत्वमिति दोषः प्रसज्यते।

मीमांसकमते तु आख्यातरूपश्रुत्या उपस्थिता भावना, कर्ता तु भावनया आक्षिप्यत इति श्रुत्या क्रियारूपो यः क्रतुस्तदर्थत्वमनृतवदननिषेधस्य सिद्ध्यति। तथाच क्रतुवैगुण्यवारणाय सकलयाज्ञिकमीमांसकप्रार्यश्चित्ताचाररूपो व्यवहारः सार्थको भवति। अतो भावनावाचकत्वमेव तिबादीनामास्थेयं, न कर्तृवाचकत्वमिति ज्ञेयम्।

इत्यनेन = इति मूलग्रन्थेन। [परिहृतत्वादिति] कर्तुराख्यातवाच्यत्वमिति वैयाकरणमतेऽपि निरुक्तदोषस्य परिहृतत्वादित्यर्थः। परिहारमेवोपपादयति [नहीति] गुणभूतः = धात्वर्थव्यापाररूपभावनायां

गुणत्वमापन्नः। कर्ता = आख्यातवाच्यः कर्ता। निषेधम् = अनृतवदननिषेधम्।

[प्राधानमिति] यत्तु पञ्चोलिनः "इदं प्रथमान्तं भावनाविशेषणम्। प्रधानशब्दस्य श्रेष्ठेऽर्थे त्रिलिङ्गत्वात् "प्रधाना" इति तूचितम्" इति। तत्रेदं चिन्त्यम्। तदुक्तरीत्या प्रधानशब्दस्य श्रेष्ठेऽर्थे त्रिलिङ्गत्वेन तस्य लिङ्गसर्वनामतया "सामान्ये नपुंसकम्" इति कात्यायनवचनात् "प्रधानम्" इति नपुंसकप्रयोगः कौण्डभट्टस्य युक्त एव। "लिङ्गसर्वनामनपुंसकम्" इति "दाण्डिनायन" ६-४-१७४ इत्यादिसूत्रे भाष्ये स्पष्टम्। वस्तुतस्तु प्रधानशब्दस्य त्रिलिङ्गत्वे मानाभावः। तस्य श्रेष्ठेऽर्थेऽपि क्लीबताया एव वाचस्पत्यादिषु सत्त्वात्, "क्लीबे प्रधानम्" (अमरः ३ - विशेष्यनि - ५७) "महामात्राः प्रधानानि" (अमर) "महामात्रं प्रधानं स्यात्" (वोपालित) "सेनाध्यक्षः प्रधानः स्यात्" (पुंस्कण्डे वोपालितः) इत्यादिकोशप्रामाण्येन प्रधानपदस्य पुंनपुंसकत्वयोरेव प्रतीयमानत्वेन तस्य स्त्रीत्वस्य क्वाप्यनुपलम्भात्। अत एव "प्रत्ययार्थः प्रधानम्" "पिता प्रधानं प्रजने तस्माद्धर्मेण तं भजेत्" इति मनुः (९-१२) "प्रधानो नाम राजा च" १२-२३०-१८१ इति भारतं चास्मत्पक्षमेवोपोद्बलयतीत्यलम्।

तं = निषेधम्। [समर्थेति] विशेष्य एवाङ्गत्वस्य न्याय्यत्वात्, विशेषणेऽङ्गसम्बन्धे प्राधान्यमप्राधान्यं चेति विरुद्धद्वयमापद्येत। अत एव "सोमेन यजेत" इत्यत्र सोमस्य यागे कारणत्वेनान्वयो निराकृतः, सोमसाध्येन यागेनेति मीमांसकैः। एवं च निषेधस्य तद्भावनाया वा कैमर्थक्यात्प्रकरणात्क्रत्वर्थतैव। श्रुतिप्रकरणयोरङ्गत्वग्राहकत्वसम्भव एव श्रुतिरेव ग्राहिका, बलीयस्त्वात्, न प्रकरणं दुर्बलत्वादिति वक्तुं पार्यते। प्रकृते तु नैवमिति तात्पर्यम्।

नन्वेवं "मा हिंस्यात्सर्वा भूतानि" "न कलञ्जं भक्षयेत्" इत्यादिनिषेधनामपि श्रुत्या पुरुषार्थत्वं न स्यात्। श्रुत्युपस्थितकर्तुः क्रियाविशेषणत्वादत आह [अस्तु वेति]

यद्वा श्रुत्यपेक्षया विलम्बेन विनियोजकतया प्रकरणस्य दौर्बल्यं क्लृप्तं, श्रुतेरितरनैरपेक्ष्येण प्रकरणात्पूर्वमेव विनियोजकत्वेन प्राबल्यात्। अतः प्रकृतेऽपि प्रबलायाः श्रुतेः प्रकरणबाधकत्वमभ्युपेत्य समाहितम्। वस्तुतस्तु प्रमाणयोर्विरोध एव बलाबलचिन्ता। अन्यथा जञ्ञभ्यमानाधिकरणविरोधः। प्रकृते तु विरोधाभावाच्छ्रुतिप्रकरणाभ्यां निषेधस्य क्रतुयुक्तपुरुषधर्मत्वमेव सिद्ध्यतीत्याह [अस्तु वेति]। [क्रतुयुक्तपुरुषधर्म इति] न च "नानृतं वदेत्" इत्यस्य क्रतुयुक्तपुरुषधर्मत्वे यजमानस्य प्राधान्यात्प्रधानभूतकर्त्रा यजमानेनैव वर्ज्यं स्यात्। क्रत्वर्थत्वे प्रतिषेध्यस्य वर्जनीयतया कर्त्रनपेक्षत्वेन यज्ञप्रवृत्तेन यजमानेन ऋत्विग्भिश्च वर्जनं सिद्ध्यतीति विशेष इति वाच्यम्। श्रुतिप्रकरणाभ्यां क्रतुसम्बद्धपुरुषकर्तृकानृतवदनाभाव इति बोधेन तत्सम्भवात्, क्रतुकर्तृकर्तृकेति बोधे मानाभावात्। किञ्च वर्ज्यभावनायाः कर्त्रनपेक्षत्वे व्यभिचारेण भावनायाः कर्त्राक्षेपकत्वमेव भवदुक्तं भज्येत। अत

एव "क्रतुयुक्तपुरुषेत्युक्तं, नतु क्रतुकर्तृकेति" इति ज्ञेयम्।

[अनुष्ठान इति] क्रतौ "नानृतं वदेत्" इति निषेधपरिपालनरूपानुष्ठान इत्यर्थः। [विशेषाभावादिति] भेदाभावादित्यर्थः। नानृतमिति निषेधस्य केवलक्रत्वर्थत्वेऽपि तत्परिपालनं क्रतुगतपुरुषैरेव कार्यम्। नहि सम्भवति क्रियारूपेणाचेतनेन क्रतुरूपेण तत्परिपालनम्। अतः केवलक्रत्वर्थत्ववादिनामपि पुरुषद्वारैव निषेधस्य परिपालनस्यावश्यकत्वेन क्रतुयुक्तपुरुषधर्मत्ववादेऽपि तदविशिष्टमिति भावः।

पञ्चोलिनस्तु "अनुष्ठान इति - क्रतुकर्ता यजमानः, क्रत्वङ्गकर्तारश्चान्ये इति क्रियानुष्ठाने विशेषाभावात् = भेदाभावात् श्रुतिप्रकरणाभ्यां सर्वैरेवानृतं वर्जनीयमिति सिद्ध्यतीति भावः" इति व्याचक्षते।

अत्रेदं चिन्त्यम्। "नानृतं वदेत्" इति अनृतवदननिषेधस्य केवलपुरुषार्थत्वं, केवलक्रत्वर्थत्वं, क्रतुयुक्तपुरुषार्थत्वमित्यादि संदिह्य पक्षान्तरनिराकरणेन क्रत्वर्थत्वं मीमांसकैस्सिद्धान्तितम्। वदेदित्याख्यातस्य कर्तृवाचकत्वं पूर्वपक्षबीजम्। तस्य तदवाचकत्वसमर्थनेन सिद्धान्तसमर्थनमिति तत्र विस्तरेण प्रतिपादितम्। कर्तुराख्यातार्थत्वेऽपि प्रतिषेधस्य क्रत्वर्थत्वमविहतमेव। वस्तुतस्तु श्रुतिप्रकरणाभ्यां निषेधस्य क्रतुयुक्तपुरुषधर्मत्वमेव युक्तमिति वैयाकरणाः। तत्र हेतुवचनम् "अनुष्ठाने विशेषाभावात्" इति। अस्य हेतुवचनस्य पञ्चोल्युक्तार्थकत्वे प्रकृतार्थासाधकत्वापत्तिर्दुर्वारा। वैयाकरणोक्तरीत्या तस्य क्रतुयुक्त पुरुषार्थत्वसिद्ध्युत्तरं "क्रतुकर्त्रा तत्परिपालनम्। अथवा ऋत्विग्भिरपि" इति शङ्कासमाधानयोरवतारेण तत्परतया सारग्रन्थयोजनमत्यन्तमनुचितमेव इति।

अयमत्र वैयकरणानामाशयः - श्रुत्यादीनां परस्परं विरोधे बलाबलविचारः। प्रकृते श्रुतिप्रकरणयोर्विरोधाभावान्नैव तद्विचारावश्यकता। अतः श्रुतिप्रकरणाभ्यां क्रतुयुक्तपुरुषार्थत्वमेव निषेधस्य सिद्ध्यति। एवं चैतल्लोभेन कर्तुराख्यातावाच्यत्वसमर्थनं मीमांसकानामयुक्तमेवेति।

निरुक्तार्थास्वीकारे जञ्जभ्यमानाधिकरणसिद्धान्तविरोध इति दृष्टान्तव्याजेनाह [जञ्जभ्यमान इति] दर्शपूर्णमासयोः श्रूयते - "जञ्जभ्यमानो ब्रूयान्मयि दक्षक्रतू" इति। जञ्जभ्यमानः = पुनः पुनः जृम्भां कुर्वाणः, जभधातो र्यङन्तात्कर्तरि शानच्। तत्र संशयः - किमेतन्मन्त्रवचनं शुद्धपुरुषधर्मः, उत क्रतुयुक्तपुरुषसंस्कारः क्रतोरेवाङ्गमिति। तत्र वाक्यान्मन्त्रवचनस्य पुरुषार्थत्वं वाच्यम्। प्रकरणात्क्रत्वर्थत्वं वाच्यम्। वाक्याच्च प्रकरणं दुर्बलम्। अतोऽस्य पुरुषार्थत्वमेव। न चैवं फलं कल्पनीयं स्यादिति वाच्यम्। वाक्यावगतजञ्जभ्यमानपुरुषार्थत्वबलेन तत्कल्पनस्य न्याय्यत्वात्। सत्यां च फलाकाङ्क्षायां "प्राणापानावेवात्मन्धते" इति वाक्यशेषेणैव रात्रिसत्रवत्फललाभात्" इति पूर्वपक्षः। तथाच जैमिनेः पूर्वपक्षसूत्रम् - "अहीनवत्पुरुषधर्मस्तदर्थत्वात्" ३-४-२० इति। प्रकरणाद्वाक्यस्य

बलवत्त्वं पूर्वपक्षबीजम्। "प्रकरणविशेषाद्वा तद्युक्तस्य तत्संस्कारो द्रव्यवत्" ३-४-२१ इति तत्र सिद्धान्तसूत्रम्। सति विरोधे श्रुत्यादीनां बलाबलचिन्ता, प्रकृते वाक्यप्रकरणयोरविरोधाद्बलाबलविचाराभावेन वाक्यप्रकरणाभ्यां "मयि दक्षक्रतू" इति मन्त्रवचनस्य क्रतुयुक्तपुरुषधर्मत्वमेव। यदाहुः -

सत्यं यदि विरोधः स्याद्वाक्यप्रक्रययोरिह।
ततः फलं प्रकल्प्येत नत्वत्रास्ति विरोधिता।।
जञ्जभ्यमानः पुरुषः क्रतावपि हि विद्यते।
तत्संस्कारमुखेनैव क्रत्वर्थत्वं भविष्यति।। इति।

यथा जञ्जभ्यमानवाक्यस्थलेऽविरोधाद्वाक्यप्रकरणे सम्भूय विनियोजके, तथा "नानृतं वदेत्" इति वाक्यस्थलेऽप्यविरोधाच्छ्रुतिप्रकरणे सम्भूय विनियोजके स्यातामेवेति तस्य क्रतुयुक्तपुरुषधर्मत्वमेव न्याय्यम्। अन्यथा न्यायतौल्येन जञ्जभ्यमानवाक्येऽपि वाक्यस्यैव प्रकरणबाधनेन विनियोजकत्वापत्तौ जञ्जभ्यमानाधिकरणं दत्तजलाञ्जलि स्यादिति भावः। दर्शपूर्णमासप्रकरणपठिते नानृतमिति वाक्ये तस्य स्मार्तानृतवदननिषेधानुवादत्वमुत विधित्वमित्युपक्रम्य अनुवादत्वमेव तस्येति पूर्वपक्षः, फलान्तरसद्भावान्नानुवादता, किन्तु विधित्वमेवेति सिद्धान्तः। कर्तुराख्यातवाच्यत्वावाच्यत्वाभ्यां तत्पूर्वपक्षसिद्धान्तौ मीमांसकैः प्रदर्शितौ। तथाच कर्त्रधिकरणे जैमिनेः पूर्वपक्षसूत्रम् "अकर्म क्रतुसंयुक्तं संयोगान्नित्यानुवादः स्यात्" इति। ततः "विधिर्वा संयोगान्तरात्" इति सिद्धान्तसूत्रम्। तत्र नव्यमीमांसकानामधिकरणरचना न साधीयसी, कर्तृवाच्यत्वावाच्यत्वाभ्यामुक्तसिद्धान्तसङ्गमस्तस्माच्च तत्सिद्धिरित्यन्योन्याश्रयापत्तेः। तदेतदभिप्रेत्याह [इत्यादि भूषणे प्रपञ्चितमिति] प्रपञ्च उक्तप्राय एव।

तदभावेऽपीत्यादि मूलमवतारयति [नन्विति]। भावनायामसाधुत्वे = मीमांसकादिव्युत्पत्तिमद्भिर्भावनाया माख्यातस्य प्रयुक्तस्य व्याकरणातिक्रमेण प्रयुज्यमानत्वेनासाधुत्वे। ततः = अपभ्रष्टादाख्यातात्। [बोधो न स्यादिति] साधुशब्दानामेव वाचकत्वस्वीकारादित्यर्थः। स्वसिद्धान्तरीत्याह [वस्तुत इति] [न हेतुरिति] - अव्युत्पन्नस्य साधुभ्योऽप्यबोधात् तत्रैव व्युत्पन्नस्यासाधुभ्योऽपि बोधाच्च साधुत्वज्ञानं न हेतुः। कस्मात्किं बुध्यत इति न नियन्तुं शक्यते, किन्तु किं विशेष्यके किं प्रकारके किं संसर्गके बोध उद्देश्ये किं साधु, किं नेत्येव शास्त्रीयविचारविषयः। एतेन "घटः कर्मत्वमानयनं कृतिः" इत्यादीनां स्वरूपयोग्यतेति परास्तम्। तथा व्युत्पन्नस्य बोधानुभावात्। अन्यथा व्युत्पन्नस्य व्युत्पत्तिरूपसहकारिविरहात्कार्यानुदयेऽपि स्वरूपयोग्यतानपायात्। एतेन प्रकृत्यर्थप्रकारको बोधो यत्र, विशेष्यतया तत्र विषयतया प्रत्ययजन्योपस्थितिर्हेतुरिति कार्यकारणभावं कल्पयन्तोऽप्यपास्ताः। विपरीतव्युत्पादिते व्यभिचारात्। सिद्धान्ते तु घटः कर्मत्वमियाद्यसाध्वेव।

तथाहि "अभिहिते प्रथमा" इति वार्त्तिके जागरूके कथं घटः, कर्मत्वमिति प्रथमा? घटानयनयोरानयनकृती प्रति कर्मतया "कर्तृकर्मणोः कृति" २-३-६५ इति षष्ठी च दुर्वारेति बोध्यम्। वक्ष्यामः = शक्तिनिर्णये।

अयमत्र सङ्ग्रहः - एकविंशतिसङ्ख्याककारिकाभिः प्रकरणमिदं निबद्धम्। प्रथमा दीक्षितस्य प्रतिज्ञापरा। अनन्तरकारिकात्रयं "फलव्यापारौ धात्वर्थः, आश्रय आख्यातार्थः, धात्वर्थमुख्यविशेष्यकश्च शाब्दबोधः, तिङर्थो विशेषणमेव" इति वैयाकरणसिद्धान्तं प्रतिबोधयति। अनन्तरकारिकात्रयं "कृतिरेव वाच्या लाघवात्, न व्यापारो गौरवात्" इति नैयायिकमतं, "कार्यताबोधकलिङादीनामेव भावना वाच्या, तदतिरिक्तलडाद्यन्तस्थले प्रकृतिभागे प्रत्ययभागे वा यत्किञ्चिद्रूपापि भावना वाच्यैव न, आक्षेपात्संसर्गमर्यादया वा भावना प्रतीयते" इति प्राभाकरमतं च दूषयति, व्यापारस्य वाच्यत्वमात्रं प्रतिपादयति। नतु प्रकृतेः प्रत्ययस्य वा भावनावाच्येत्यंशं प्रतिपादयति। अनन्तरं कारिकाचतुष्टयं "फलं धात्वर्थः, व्यापारः प्रत्ययार्थ" इति मण्डनमतनिराकरणेन व्यापारस्यापि धातुवाच्यत्वं सप्रमाणं निर्णयति। अनन्तरचतुर्दशकारिका असत्त्वभावनाया धातुवाच्यत्वस्वीकारे मीमांसकैरु'ावितान् दोषान् निवारयन्ति। "आख्यातशब्दे भागाभ्याम्" १४ "साध्यत्वेन क्रिया तत्र" १५ "भेद्यभेदक" २१ इत्यादिकारिकात्रयं वाक्यपदीयाद् "अस्त्यादावपि धर्म्यंशे" १२ इत्यादिकारिकां तन्त्रवाचकाञ्च समाहृत्य दीक्षितमहाशयोऽत्र प्रकरणे ग्रथयामास - इति।। ।।२१।।

इति श्री वैयाकरणभूषणसारतत्त्वदर्शिन्यां

धात्वाख्यातार्थनिर्णयः।।१।।

अथ लकारार्थ निर्णयः।

प्रत्येकं दश लकाराणामर्थं निरूपयति -

वर्तमाने परोक्षे श्वोभाविन्यर्थे भविष्यति।

विध्यादौ प्रार्थनादौ च क्रमाज्ज्ञेया लडादयः।। २२।।

लडादयष्टितः षट् क्रमेणैष्वर्थेषु द्रष्टव्याः। तथाहि - वर्तमाने लट्। "वर्तमाने लट्" ३-२-१२३ इति सूत्रात्। प्रारब्धापरिसमाप्तत्वं भूतभविष्यद्भित्त्वं वा वर्तमानत्वम्। पचतीत्यादावधिश्रयणाद्यधःश्रयणान्ते मध्ये तदस्तीति भवति लट्प्रयोगः।

अथ लकारार्थनिर्णयः।

पूर्वग्रन्थेन सङ्गतिं दर्शयति [अथेति] "लः कर्मणि च भावेचाकर्मकेभ्यः" ३-४-६९ इति सूत्रबलात् "आश्रये तु तिङः स्मृताः" इत्यनेन लकारस्य आश्रयार्थकत्वव्यवस्थापनान्तरमित्यर्थः। [प्रत्येकमिति] वीप्सायामव्ययीभावः। एकैकस्येत्यर्थः। [दशलकाराणामिति] लट्, लिट्, लुट् इत्यादिक्रमेण दशानां लकाराणामित्यर्थः। [अर्थमिति] स चार्थो वाच्यो द्योत्यो वा। [निरूपयति] कारिकाद्वयेन निरूपयति।

कारिकायां [वर्तमाने इति] "१. वर्तमाने लट् २. परोक्षे लिट्" ३-२-१२५ ३. अनद्यने लुट् "३-३-१५, ४. लृट् शेषे च" (३-३-१५) ५. लिङर्थे लेट् ३-४-७ ६. लोट् च ३-३-१६२ इत्यादीनि शास्त्राणि प्रमाणम्।

ननु वर्तमानाद्यर्थे क्रमाज्ज्ञेया लडादय इत्यनुपपन्नम्, वर्तमान इत्यादीनामर्थानां षट्त्वेन लडादीनां दशत्वेन च यथासङ्ख्यासम्भावादत आह [टितः षडिति] "ह्यो भूते प्रेरणादौ च" इत्याद्युत्तरग्रन्थबलादत्र "लडादयः" इत्यनेन लडादीनां टितामेव ग्रहणेन न यथासङ्ख्यहानिरित्यर्थः। क्रमेण व्याचष्टे [तथाहीति] - [सूत्रादिति] "वर्तमाने लट्" (३-१-१८३) इत्यादीनि शास्त्राणि लडादिविधायकानि। तद्विहितलकारानुवादेन च "लः कर्मणि च" इत्यादि कर्त्राद्यर्थनियामकम्। तत्र लकारस्य कर्त्राद्यर्थकत्वे दर्शनान्तरीयाणां विप्रतिपन्नतया तत्समाधानाय स्वसिद्धान्तनिरूपणाय च धात्वर्थनिर्णयः प्रक्रान्तः। लडादीनां वर्तमानाद्यर्थकत्वे न कस्यापि विप्रतिपत्तिः। अत एव "तिङर्थस्तु विशेषणम्" इति कारिकाभागव्याख्यावसरे कालस्यापि धात्यर्थव्यापारेऽन्वयः प्रदर्शितः। तथापि प्रकरणशुद्धये कारिकाद्वयेन वर्तमानाद्यर्थबोधकत्वं लडादीनां दीक्षितैः प्रदर्शितम्।

ननु 'अधीमहे' इति यत्राध्ययनं प्रवृत्तं नच तत्समाप्तं, तत्र यदा भोजनादिकं कुर्वन्तो नाधीयते, तत्राध्ययनस्यावर्तमानत्वात् 'अधीमहे' इति लट्प्रयोगानुपपत्तिरत आह [प्रारब्धापरिसमाप्तत्वमिति]। "यावदभिमतफलप्रयोजनसकलक्रियापरिसमाप्तिर्भवति तावद्वर्तमानत्वमेव क्रियायाः, नतु भूतत्वमिति "निष्ठा" ३-२-१०२ इति सूत्रे कैयटः। प्रारब्धा च सा अपरिसमाप्ता चेति कर्मधारयः। तथा च "वर्तमाने लट्" इति सूत्रे भाष्यं "न्याय्या त्वेषा वर्तमानकालता प्रारम्भानपवर्गात्" इति। तत्र "प्रारम्भ" इति कर्मघञन्तम्। प्रारब्ध इत्यर्थः। अपवर्गः = समा"ाः। ततः "यं खल्वपि भवान् मुक्तसंशयं वर्तमानकालं न्याय्यं मन्यते भुङ्क्ते देवदत्तः" इति तेनैतत्तुल्यम्। सोऽपि ह्यवश्यं भुञ्जानो हसति वा जल्पति वा पानीयं वा पिबति, यद्यत्र युक्ता वर्तमानकालता दृश्यते, इहापि युक्ता दृश्यताम् इति भाष्य उक्तम्। अत्र कैयटः "अध्ययनं यदा प्रवृत्तं, नचोपरतं, तदा तस्य भोजनादिक्रिया नान्तरीयकत्वादव्यवधायिका। अथवाऽध्ययनस्यैवावयवक्रियेति नान्तरीयकत्वा'ोजनादिक्रियाणां नाध्ययनव्यवधायकत्वमिति प्रथमपक्षाशयः। भोजनाद्यपि अध्ययनशब्दार्थत्वेनाश्रीयते। अतश्च यथा स्वावयवक्रिया न व्यवधायिकास्तथेमा अपीति द्वितीयपक्षस्याशयः।"

निरुक्तं "वर्तमाने लट्" इति सूत्रस्थं भाष्यं हरिणापि द्वेधा व्याख्यातम्।

१) व्यवधानमिवोपैति निवृत्त इव दृश्यते।
क्रियासमूहो भुज्यादिरन्तरालप्रवृत्तिभिः। वाक्य काल ८२
सर्वैव हि क्रियान्येन संकीर्णेवोपलभ्यते।।

अन्तरालक्रियाभिरवयवद्वारेण विच्छिन्नस्वभावोऽसावाफलप्राप्तेरनुवर्तादविरतोपस्थित एव वर्तमानस्वभावः। न केवलं भुज्यादिरेव, यावद्धाससंकथनादिरपि क्रियान्तरैर्व्यवधीयत एव। अक्षिनिमेषादेरपि व्यवधानात्। अन्तत उच्छ्वासनिश्वासादेरपि भावात्। अतो विश्रम्य विश्रम्य क्रियान्तरात्सङ्कीर्णेव, नतु सर्वथा संकीर्णा। आफलप्राप्तेर्विरामाभावात्। अन्तरालक्रियाणामवश्यं भाविनीनां संकरकारित्वस्यायोगात्। संदर्शनादिर्हि फलपर्यन्तः क्षणसमूहः क्रिया। तत्र च भौतिकव्यापारोपरमेऽप्यन्तरालदर्शनप्रार्थनादेर्मानसस्य व्यापारस्य यावत्फलावगमस्तावदविराम एव। एवं भोजनादेरप्यविरतत्वाद्वर्तमानता सिद्धा। अत एव हरिग्रन्थे इवशब्दप्रयोगः।

एवं तावत्फलावसानः समूहः क्रियेति फलान्तरहेतुक्रियान्तरव्यवधानमभ्युपेत्यापि वर्तमानत्वं समर्थितम्। यद्वाऽन्तरालप्रवृत्तं क्रियान्तरं भिन्नजतीयमेव न भवतीति पक्षान्तरमुक्तं हरिणा यथा -

२) तदन्तरालदृष्टा वा सर्वैवाऽवयक्रिया।
सादृश्यात्सति भेदे तु तदङ्गत्वेन गृह्यते।। वाक्य काल ८३

कारिकायां तुशब्दोऽप्यर्थे। तस्या भुजिक्रियाया मध्यवर्तिनो ये क्रियाभेदा हसितादयस्ते भुज्यादेवरवयवा गुणव्यापाररूपा आचमानादिवदुपकारकत्वात्। तत श्चाचमनादिभिः सादृश्यात्सत्यपि हासादीनां क्वचिदसन्निधाने भुजिनिवृत्तेः प्रसिद्धैर्दध्युपसेचनादिभिरङ्गैर्भेदे भुज्यङ्गत्वेन ग्रहणम्। सुहृदो हि निर्वृतचेतसः परस्परं हाससंकथनादि कुर्वाणा एव भुजिं प्रतिपद्यन्ते। तदेवमत्र प्रत्यवयवं क्रियापरसमाि"ाः। अतो भोजनस्य हसितादादयोऽङ्गभूताः क्रिया एव। एवमध्ययनस्य भुज्यादयोऽवयवभूताः स्वार्था एवेति न तासां व्यवधायकत्वमिति हरिग्रन्थाशयः।

यत्तु "परन्तु पठ धात्वादे स्तथाविधबहुतरव्यापारवाचकत्वकल्पनायां गौरवात्कण्ठाद्यभिघातादि-व्यापारेष्वल्पेष्वेव शक्तिरुचितेति पूर्वोक्तमेव युक्तम्" इति काशिकाकारास्तदनुसारिणः पञ्चोलिनश्च। तन्न। हरिकैयटाद्यनुभवविरोधात्, "भोजनादिक्रियाणामध्ययनव्यवधायकत्वमभ्युपेत्योक्तम्। वस्तुतस्तु व्यवधानं नास्त्येवेति पक्षान्तरमाह" इति हेलाराजग्रन्थपर्यालोचनया द्वितीयपक्षस्यैवोचितत्वलाभाच्च। अनेकव्यापारवाचित्वगौरवापादनं धातुस्थले नैव शोभते। भाष्यकारैरनेकत्र शक्तिस्वीकारात्। नचैवं जलताडनादेरप्यध्ययनशब्दवाच्यत्वापत्तिरिति तदुक्तं युक्तम्। तादृशार्थे तात्पर्याभावात्। सति तात्पर्ये भोजनादेरिव तदर्थत्वे इष्टापत्तिरेव। केवलमस्मदीयानुभवबलादेवार्थनिर्णये तु परस्परं सुतरां विरुद्धानां भोजनादिक्रियाणामध्ययनक्रियाव्यवधायकत्वस्य दुर्वारतया कथं प्रथमपक्षस्यापि युक्तत्वमिति सुधियो विभावयन्तु।

ननु प्रारब्धापरिसमाप्तत्वं क्रियाया एव सम्भवति। न कालस्येति चेत्सत्यम्। कालस्य धात्वर्थव्यापारानतिरिक्ततया प्रारब्धापरिसमाप्तक्रियात्वमेव वर्तमानत्वमिति सारग्रन्थार्थः। एतच्चानुपदमेव स्फुटीभविष्यति। धात्वर्थक्रियातिरिक्त एव काल इति मते तु प्रारब्धापरिसमाप्तक्रियोपलक्षितत्वं वर्तमानत्वमिति बोध्यम्।

वस्तुतस्सूत्रे भूतभविष्यद्भित्वरूपमेव वर्तमानत्वं विवक्षितम्। "वर्तमाने लट्" इति सूत्रात्प्राक् "भूते" ३-२-८४ इत्यस्य "वर्तमाने लट्" इति सूत्रादनन्तरं "भविष्यति" ३-३-३ इत्यस्य चोपादानादित्यभिप्रेत्य लक्षणान्तरमाह [भूतभविष्यद्भिन्नत्वं वेति] उक्तं च भाष्ये "भूतभविष्यत्प्रतिद्वन्द्वो वर्तमानः कालः" इति। साध्यस्यार्थस्यानित्यत्वादवश्यं भविष्यत्त्वेन भाव्यम्। उत्पन्नस्यापि नाशाद्भूतत्वेन भाव्यम्। अतो भूतभविष्यत्प्रतिद्वन्द्वो वर्तमान इत्याशयः।

यत्तु "अत्र वाकारोऽनास्थायाम्। पूर्वापेक्षयाऽस्य गुरुत्वात्। एवं भूतत्वभविष्यत्वयोरप्येवं निर्वचनस्यैतत्तुल्यतयाऽन्योन्याश्रयापत्तिश्च स्यात्" इति भैरवमिश्राः, पञ्चोलिनः, कशिकाकाराः दर्पणकाराश्च। तन्न। विद्यमानध्वंसप्रतियोगित्वं भूतत्वं, विद्यमानप्रागभावप्रतियोगिसमयोत्पत्तिमत्त्वं भविष्यत्त्वमिति स्वीकारेणान्योन्याश्रयाप्रसक्तेः।

यदपि काशिकाकाराः "प्रारब्धापरिसमाप्तक्रियोपलक्षितत्वमिति भषणपर्यालोचनयेदं तत्तत्कालोपलक्षकमात्रं, नतु तस्य शाब्दबोधे भानम्। शाब्दबोधे तु वास्तवमेतादृशवर्तमानत्वं, यत्र स कालत्वेन भासते। अतस्तत्कालत्वेनैव लडादिवाच्यता परन्तु कालगतभूतत्वानद्यतनत्वादेरपि लिडादिप्रयोगे भानानापत्तिः। तेषामनुभवबला'नमिति तेषां लिडादिवाच्त्वमिति चेत्प्रकृतेऽपि तथेति प्रतिभाति" इति। तदपि भूषणग्रन्थतात्पर्यानवबोधनिबन्धनम्। तथाहि - भूषणे हि कालस्य व्यापाररूपस्य धातुना लाभाल्लडादेर्द्योतकत्वमित्युपन्यस्य, कालस्य व्यापाररूपत्वे अत्मास्ति पर्वतास्तिष्ठन्तीत्यादौ लडाद्यसिद्धिशङ्कासामाधानपरं भाष्यमुपष्टम्भकतया प्रदर्शितम्। अनन्तरं "क्रियाभेदाय कालस्तु सङ्ख्या सर्वस्य भेदिका" इति वाक्यपदीयबलात्कालस्य व्यापारातिरिक्तत्वमुररीकृत्य लडादीनां वाचकत्वपक्ष एव युक्तः। पर्वतास्तिष्ठन्तीत्यादिविषयकशङ्कासमाधानपरं भष्यं तु द्योतकतापक्षाभिप्रायेणेति प्रदर्श्य वस्तुतस्तु कालस्यातिरिक्तत्वेऽपि वर्तमानत्वं तत्र प्रारब्धापरिसमाप्तक्रियोपलक्षितत्वम्। तच्च "आत्मास्ति" इत्यादौ क्रियायाः प्रारब्धत्वाभावान्न सम्भवतीति शङ्काशयः, क्रियाया अप्रारब्धत्वेऽपि किञ्चिद्विशिष्टायाः प्रारब्धत्वात्तदुपलक्षितत्वस्य सम्भवा'वति वर्तमानत्वादिकमिति सिद्धान्ताशय इति ध्येयम। वस्तुतः कालो नातिरिक्तः। किन्तु क्रियैव कालः तद्वतं प्रारब्धापरिसमाप्तत्वादिरूपं वर्तमानत्वादिकं लडर्थ इति परमार्थः। तस्माद्वर्तमानत्वं वाच्यमेवेति प्रतिपादितम्। अनेन भूषणग्रन्थेन प्रारब्धापरिसमाि"ाक्रियोपलक्षितत्वं वर्तमानत्वमिति लक्षणं कालस्य धात्वर्थव्यापारातिरिक्तत्वनय इति लभ्यते। कालस्य धात्वर्थव्यापारानतिरिक्तत्ववादिमते प्रारब्धापरिसमाप्तत्वं वर्तमानत्वमित्युक्तम्। उपलक्षणपदं विशिष्टमित्यर्थकम्। तादृशक्रियाविशिष्टत्वमित्यर्थः। नतु शाब्देऽविषयत्वपरम्। तथा सति पर्वतास्तिष्ठन्तीत्यादिविषयकशङ्कासमाधानपरं भाष्य मसङ्गतमेव स्यात्। किञ्च कालस्य लडादिवाच्यत्वसमर्थनायायं ग्रन्थः प्रवृत्तः। तत्र काशिकोक्तरीत्या एतद्ग्रन्थस्य वर्तमानकालस्य शाब्दे भानं नेत्यभिप्रायकल्पने तस्य वाच्यत्वसमर्थनप्रयासो व्यर्थ एव स्यात्। कालस्य क्रियारूपत्वे प्रारब्धापरिसमाप्तत्वं वर्तमानत्वं, प्रत्ययो द्योतक एव। कालस्य क्रियातिरिक्तत्वे तु

प्रारब्धापरिसमाप्तक्रियोपलक्षितत्वं वर्तमानत्वं, प्रत्ययो वाचक एव। वस्तुतस्तु कालस्य क्रियारूपत्वेऽपि तादृशक्रियागतं प्रारब्धापरिसमाप्तत्वादिरूपं वर्तमात्वं, तदेव लडर्थः प्रत्ययो वाचक एवेति भूषणग्रन्थनिष्कर्षः।

यदपि काशिकाकाराः "प्रारब्धापरिसमाप्तो यः क्रियात्मोऽर्थस्तदधिकरणत्वोपलक्षित-समयत्वमित्यर्थः। वर्तमानत्वस्य कालगतत्वेन सर्वानुभवसिद्धत्वात्। अत एव "आख्यातार्थः कालः" इति प्रवादोऽपि सङ्गच्छते। भूषणेऽप्यत एवेत्थमेवोक्तम्" इति।

तदपि न । कालः क्रियारूप एवेति ग्रन्थकर्तृरीत्या प्रारब्धापरिसमाप्तक्रियात्वं वर्तमानत्वमिति यथाश्रुतमेव व्याख्यानस्योचितत्वात्। पर्वतास्तिष्ठान्तीत्यादौ लडाद्यसिद्धिशङ्कासमाधानभाष्यमन्यथा सङ्गमय्य कालस्य क्रियातिरिक्तत्वमङ्गीकुर्वतां मञ्जूषाकृतां मतमवलम्ब्य तद्रीत्या प्राकृतग्रन्थयोजनस्यान्याय्यत्वाच्च। कालस्य क्रियारूपत्वेऽपि क्रियागतस्य प्रारब्धापरिसमाप्तत्वादेराख्यातार्थत्वसम्भवाच्च। काशिकाकारप्रदर्शितलक्षणार्थस्य भूषणेऽनुक्तत्वाच्च। एवं च "भूषणेऽप्यत एवेत्थमेवोक्तम्" इति मन्दप्रतारणं भूषणग्रन्थपरिशीलकानामत्यन्तमुपहासं जनयतीत्यलं विवादेन। भूषणकारमतान्नागेशमतं युक्तिसहमिति त्वन्यदेतत्।

लक्षणं लक्ष्ये सङ्गमयति [पचतीत्यादाविति] आदिना "अधीमहे" इत्यादेर्ग्रहणम्। तत् = प्रारब्धापरिसमाप्तत्वम्। अन्यथा संप्रतितनत्वं वर्तमानत्वमिति लोकप्रतीतार्थपरिग्रहेऽधिश्रयणानन्तरं काष्ठेषु ज्वलत्सु चैत्रादिः पाचको यदा विश्राम्यति, पानीयं पिबति वा तदा पाकस्याकरणात् "चैत्रः पचति" इति न स्यात्। निरुक्तार्थपरिग्रहे तु विश्रान्तिपानादेर्नान्तरीयकतया व्यवधायकत्वाभावद्वस्तुतस्तस्य पाकानुकूलतया पच्यर्थत्वाच्च अधिश्रयणाद्यधःश्रयणमध्येऽपि विश्रान्तिपानादिसमयेऽपि चैत्रः पचतीति लट्प्रयोग उपपद्यत इति भावः। अधिश्रयणं = चुल्ल्युपरि स्थापनम्। अधः श्रयणं = ततोऽवतरणम्।

आत्मास्ति, पर्वताः सन्तीत्यादौ तत्तत्कालिकानां राज्ञां क्रियाया अनित्यत्वात्तद्विशिष्टस्योत्पत्त्यादिकमादाय वर्तमानत्वमूह्यम्। उक्तं हि भाष्ये "इह भूतभविष्यद्वर्तमानानां राज्ञां क्रियास्तिष्ठतेरधिकरणम्" इति।

परतो भिद्यते सर्वमात्मा नु न विकम्पते।
पर्वतादिस्थितिस्तस्मात्पररूपेण भिद्यते।।

इति वाक्यपदीये च। एवं "तम आसीत्" "तच्छेनाभ्यपिहितं यदासीत्" "अह मेकः प्रथममासं, वर्तामि च, भविष्यामि च" इत्यादिश्रुतयोऽपि योज्याः।

तत्र वर्तमानत्वादि लडादिभिर्द्योत्यते। क्रियासामान्यवाचकस्य तद्विशिष्टे लक्षणायां लडादेस्तात्पर्यग्राहकत्वेनोपयोगात्। अन्वयव्यतिरेकाभ्यां तद्रूपं लडादिवाच्यमेव। अन्यथा प्रत्ययानां वाचकत्वविलोपापत्तिरित्यपि पक्षान्तरम्।

ननु भूतभविष्यद्भित्वं वर्तमानत्वमिति लक्षणस्य "आत्मास्ति पर्वतास्तिष्ठन्ति" इत्यादावव्याप्तिर्दोषः। तथाहि - भावी, भूतः, वर्तमान इत्येते व्यवहाराः कालनिमित्ताः परस्परव्यावृत्तशरीराः कालकृतोपकाराणामेव भावानां युक्ताः। ते च जन्मवतः सम्भवन्ति। तत्र योग्यसाधनसन्निधानेऽभिमुखोत्पत्तयो भाविन इत्युच्यन्ते। यथा - इह चैत्रः पक्ष्यति, इह देवदत्तो यक्ष्यतीति। साधनादवा"ाजन्मानो यावदवस्थानं वर्तमाना इति कथ्यन्ते। यथा - चैत्रः पचति, देवदत्तो यजतीति व्यपगतशरीरा भूता इति व्यपदिश्यन्ते - यथा चैत्रोऽपचत्, देवदत्तोऽयजत्। वर्तमानव्यपदेशश्च भूतभविष्यन्मध्यवर्ती यत्र भूत भविष्यन्तौ नस्तस्तत्र नैव सम्भवोऽस्ति वर्तमानव्यपदेशस्य। "एवं स्थिते नियतावधिकजन्मरहितेष्वत एव नित्येषु आत्मपर्वतादिषु भूतभविष्यतोरभावात्तत्र वर्तमानाभावः स्पष्ट एवेति लटोऽनुपपत्तिरेव। किञ्च कालावच्छेदाभावात्कालोपाधिका क्रियैव तत्र नास्ति। सा हि कालोपाधिः। सा क्रिया साध्यमानस्वभावा चेति प्रकृते क्रियाया अभावात्क्रियाकारकोपाधिनिबन्धनसकलव्यवहारानुपपत्तिरित्यत आह [आत्माऽस्तीति]। [पर्वतास्तिष्ठन्तीति] आदिपदेन "स्रवन्ति नद्यः" इत्यादेर्ग्रहणम्। [राज्ञामिति] इदमुपलक्षणं सूर्यादीनामपि। प्राधान्यात्तु राज्ञामित्युक्तम्। [अनित्यत्वादिति] अयमर्थः। राज्ञामुत्पत्त्यादिमत्त्वेन तत्र क्रियाणां त्रैकल्यं क्रमिकत्वं साध्यमानत्वं च प्रसिद्धम्। राज्ञां क्रियाः पर्वतादिस्थितेर्भेदकत्वादाश्रयत्वेन व्यवह्रियन्ते। राजकीयगतवर्तमानत्वादिकं पर्वतादिस्थितिभेदकं भविष्यति। राजक्रियासहचरितानामपि पर्वतादीनां स्थिते स्तदध्यारोपेण गौणस्त्रिकालविषयः प्रयोगोऽत्रोपपद्यते। "अस्य राज्ञः समयेऽयं पर्वत एवं रमणीयो वर्तते, तस्य राज्ञः समये तदानीमेवमासीत्, भाविनो राज्ञः समये कथं वाऽयं पर्वतो भविष्यति" इत्यादिलौकिकव्यवहार एव राजक्रियामादाय पर्वतस्थितिभेदकल्पने प्रमाणम्। एवमस्य राज्ञः समये नगरमिदमेवं वर्तते। अस्य पितुस्समयेऽन्यथाऽवर्तत। अस्य पुत्रस्य समये नगरमिदं कथं वा वर्तिष्यते इत्यादिः सार्वजनीनो व्यवहारोऽनुसर्तव्यः। एवं च पर्वतादिस्थितेः स्वतो भेदाभावेऽपि तत्सहचरितराजादिगतक्रियाणां तत्रारोपेण तद्गतभेदमादाय कालभेदोपपत्तिः - इति।

तद्विशिष्टस्य = राजादिक्रियाविशिष्टस्य। उत्पत्त्यादिकम् = आरोपमूलकतया गौणमुत्पत्त्यादिकम्। [वर्तमानत्वमिति] नित्यस्यापि पदार्थस्य वस्त्वन्तरेण भेदमादाय कालयोगस्तत्स्थित्यादेः क्रियारूपत्वं च सिद्ध्यति। स्वतः पर्वतनिष्ठक्रियाया उत्पत्त्याद्यभावेऽपि राजादिविशिष्टस्योत्पत्त्यादिकमादाय तदुपपत्तिः। एवं च तस्यापि सहचरितवस्त्वन्तरगतक्रियारोपेण भूतत्वादेस्सम्भवेन भूतभविष्यद्भित्वरूपं वर्तमानत्वमपि प्रसिद्ध्यत्येव। देहाद्युपाधीनामुपत्त्यादिमत्त्वेन तद्धर्मस्यात्मन्यारोपे आत्मसत्ताया अपि भूतभविष्यत्वयोगस्य क्रियारूपत्वस्य च सुघटतया तत्रापि वर्तमाप्रयोग उपपद्यत इति भावः।

भाष्ये = "वर्तमाने लट्" इति सूत्रे भाष्ये। [तिष्ठतेरिति] स्थितेरित्यर्थः। अर्थपरत्वेऽपि "ईक्षतेर्नाशब्दम्" (ब्रह्म सू १-१-५) इत्यादाविव श्तिप्। अधिकरणं = निमित्तं भेदिका इति यावत्। नित्यानामपि पर्वतादीनामपरतत्सहचरितपदार्थगतसत्तोपाश्रयेण सत्ताभेदात्कालभेदोपपत्तिरिति तात्पर्यम्।

प्रकृतभाष्यमेव कालस्य क्रियारूपत्वे मानम्। अतिरिक्तकालस्यैव वाच्यत्वाभ्युपगमे आत्मास्ति, पर्वतास्तिष्ठन्ति इत्यादौ तत्तत्कालिकसूर्यादीनां क्रियाया निराबाधात्तामादय तदुपपत्तौ "कथं पर्वतास्तिष्ठन्तीत्यादौ लडादिप्रयोगः" इत्याशङ्कापरं "तत्तत्कालिकराजक्रियामादाय तदुपपत्तिः" इति समाधानपरं च भाष्यमसङ्गतमेव स्यात्। तावत्पर्यन्तानुधावनस्यानुपयोगस्य स्पष्टत्वात्। कालस्य क्रियारूपत्वे तु आत्मधारणानुकूलव्यापारस्य प्रारब्धत्वाभावात्प्रारब्धापरिसमाप्तत्वरूपवर्तमानत्वस्य भूतभविष्यद्भित्वरूपस्य वा तस्यासम्भवाच्छङ्काभाष्यस्य तत्तत्कालिकराजक्रियामादाय सत्ताभेदेन तदुपपत्तिरिति समाधानभाष्यस्य च सङ्गतिः स्पष्टैव। नच कालस्य क्रियातिरिक्ततायामपि प्रकृतभाष्यस्योपपत्तिर्भूषणे निरूपितेति वाच्यम्। तदुत्तरं "वस्तुतस्तु कालो नातिरिक्तः। किन्तु क्रियैव" इत्युपसंहारा'षणकारेण भाष्यस्यान्यथानयनस्य स्वानभिमतत्वद्योतनात्। कैयटेनापि कालस्य क्रियारूपत्वमङ्गीकृत्यैव भाष्यं व्याख्यातम्। विस्तरस्त्वन्यत्रावसेयः।

आत्मास्ति, पर्वतास्तिष्ठन्तीत्यादौ नित्यवस्तुस्थल एव न केवलं सन्निहितवस्त्वन्तरगतक्रियाश्रयेण वर्तमानत्वादिसमर्थनमपि तु घटो भविष्यति, घटोऽस्ति, घटोऽभूत् इत्यादावनित्यवस्तुस्थलेऽपि। वस्त्वन्तरगतक्रियानाश्रयणे घटादेरपि क्रियावेशित्वासम्भवेन स्वरूपेण क्रियाश्रयत्वाभावात्तत्रापीयमेव दुरवस्था स्यात्। घटोत्पत्त्यनुकूलसाधनसन्निधाने तस्य भावित्वं, साधनादवा"ाजन्मनो वर्तमानत्वं, तद्व्यपगमे भूतत्वमिति लोकप्रसिद्ध एव घटादीनामपि कालसम्बन्धः। अन्यथा केवलघटादीनां स्वरूपतो भेदाभावात्तद्व्यवहारोऽसङ्गत एव स्यात्। अतो नेयमपूर्वकल्पना, किन्तु सार्वत्रिकी। अनित्यपदार्थस्थले वर्तमानत्वादिव्यपदेशः साधु युज्यत इव, नित्यस्थले न युज्यत इवाऽऽभाति सामान्यबुद्धीनामिति भाष्यकारस्य निगूढाशयः।

एतद्भाष्यव्याख्यानभूतं हरिग्रन्थमाह [परत इति] (वाक्य काल ८०) सर्वं = नित्यमनित्यं वा सर्वमपि पदार्थजातम्। परतः = पदार्थान्तरगतक्रियावेशतः। भिद्यते = भूतभविष्यदादिभिन्नव्यवहारविषयो भवति। आत्मा + तु = द्रव्यं तु। न + विकम्पते = न विचलति = स्वतः क्रियाश्रयो न भवति। न स्वरूपेण भिन्न इत्यर्थः। तस्मात् = स्वरूपेण सर्वस्याप्यर्थस्य भेदासम्भवात्। [पर्वतादिस्थितिरिति] आदिना घटादेरनित्यस्य सङ्ग्रहः। तेषां स्थित्यादिः पररूपेण = राजदेवदत्तादिनिष्ठक्रियारूपेण भिद्यते इति कारिकाशयः।

दर्पणकारास्तु "परतो भिद्यत इति। सर्वं = पच्यादिधात्वर्थसामान्यम्। परतः = स्वापेक्षया अन्येन वर्तमानत्वादिना। भिद्यते = व्यावर्त्यते। आत्मा तु इत्यत्रात्मादिपदमात्मसत्ताद्यर्थकम्। न विकम्पते = सनातनत्वेन निरवयवत्वादुक्तविशेषणसम्बन्धाभावेन भेदानुमितविषयो न भवतीत्यर्थः। तथाचात्मास्तीति प्रयोगानुपपत्तिरिति पूर्वार्धार्थः। समाधत्ते तस्मादिति विशेषातिरिक्तपदार्थस्य स्वतो व्यावृत्तत्वासम्भवादित्यर्थः। पर्वातादीत्यादिनाऽऽत्मादिपरिग्रहः। पररूपेणेति - परस्य = राजक्रियादिरूपार्थस्य। रूपेण = वर्तमानत्वादिना" इति हरिकारिकां व्याचख्युः। अत्रेदं वक्तव्यम्। आत्मानात्मविषयको नायं विचारः। हरिकारिकायामात्मशब्दो द्रव्यमात्रपरः। अतः "आत्मा = द्रव्यम्" इति व्याख्यातमुद्योते। हेलाराजेनापि "सर्वमेव हि भावजातमेवमुपाधिसंसर्गवशेन भिद्यते। न स्वरूपेण" इत्येव विवृतम्। अत एव भाष्ये पूर्वपक्षे "नित्यप्रवृत्ते च शासितव्या भवन्ती। तिष्ठन्ति पर्वताः, स्रवन्ति नद्यः" इत्येवोक्तम्। तद्भाष्यमुपलक्षणीकृत्य आत्मास्ति, तिष्ठन्ति पर्वता इत्याद्युदाह्रियते दीक्षितभूषणकृदादिभिः। निरवयवत्वे आत्मा न विकम्पते, पच्यादिकं सर्वं वर्तमानत्वादिना व्यवर्त्यत इत्यर्थस्य हेलाराजादिभिर्न स्पृश्यते च। आत्मास्तीति प्रयोगासिद्धिमात्रतात्पर्यकत्वे भाष्यादौ "पर्वतास्तिष्ठन्ति, स्रवन्ति नद्यः" इत्याद्युपादानस्य नैरर्थक्यापत्तिः। तस्य "काकवद्देवदत्तगृहं पश्य" इत्यादौ काकादेरिवोपलक्षकत्वाश्रयणं तु प्रमाणविरहादयुक्तमेव। किञ्च पूर्वार्धस्य पूर्वपक्षतया व्याख्यानमनुचितम्। संपूर्णकारिकायाः सिद्धान्तभाष्यार्थप्रतिपादकत्वपरतया कैयट - हेलाराजनागेशादिभिर्व्याख्यातत्वात्, किञ्च दर्पणकारोक्तरीत्या पूर्वार्धस्य पूर्वपक्षप्रतिपादकत्वे समाधावाक्ये "तस्मात्" इत्यनेन पूर्वार्धोक्तार्थस्य परिग्रहणमत्यन्तमसङ्गतं स्यात्। एतेन "आत्मा = आत्मसत्ता, न भिद्यते, आत्मादिकर्तृकसत्ताया नित्यत्वात्" इत्यादि वदन्तः पञ्चोलिप्रभृतयोऽपि परास्ताः [तम आसीदिति] यावदात्मतत्त्वज्ञानमज्ञानरूपस्य तमसः सर्वदा सत्त्वेन भूतकालार्थकप्रत्ययप्रयोगोऽपि इत्थमेव निर्वहति। एवमेव तुच्छेन = अज्ञानेन। आवृतमासीदित्यादावपि बोध्यम्।

शास्त्रे णिच् - सनादयः केचन प्रत्यया वाचका एव, यङ् - तर"ामबादयो द्योतका एवेति व्यवस्थापितम्। लडादयस्तु वाचका द्योतका वा स्युः। पक्षद्वयस्याप्याकरे प्रतिपादनादित्याशयेन प्रथमं लडादेर्द्योतकत्वं व्यवस्थापयति [तञ्चेति] पचतीत्यादौ भासमानमित्यर्थः। वर्तमात्वादीत्यादिपदेन पपाच, पक्ष्यतीत्यादौ भासमानस्य भूतत्वभविष्यत्वयोर्ग्रहणम्। द्योत्यते = व्यज्यते। गच्छ, अतृणेट्, अजर्घाः, इत्यादौ विनापि प्रत्ययं वर्तमानत्वादेर्भानेन तत्र तद्वाचित्वस्य धातोरावश्यकत्वेन पचतीत्यादावपि तथात्वस्य न्याय्यतया प्रत्ययस्य द्योतकत्वमेव युक्तम्। अन्यथा लुप्तप्रत्ययस्थले प्रत्ययस्य द्योतकत्वं, श्रुतप्रत्ययस्थले तस्य वाचकत्वमिति वैषम्यं स्यादिति भावः।

[क्रियासामान्यवाचकस्येति] तादृशस्य धातोरित्यर्थः। [तद्विशिष्ट इति] तद्विशेष इत्यर्थः। विशिष्टशब्दो भावप्रत्ययान्तः। क्रियाविशेष इति यावत्। क्रियारूप एव कालो, नातिरिक्तः। तथाच क्रियासामान्यवाचकस्य धातोः कालरूपक्रियाविशेषे लक्षणा स्वीक्रियते। तत्रैव लडादिस्तत्पर्यग्राहकः। क्रियाया विद्यमानत्वं वर्तमानत्वं, तस्या अतीतत्वं भूतत्वं, भावित्वं भविष्यत्वम्। अत एव "क्रियासामान्यवाचकस्य" इत्युक्तं सारे। अन्यथा "क्रियावाचकस्य" इति "धातोः" इत्येव वाऽवक्ष्यत्। सामान्यवाचकस्य विशेषवाचकत्वे, विशेषवाचकस्य सामान्यवाचकत्वे वा लक्षणेति प्रकाशकारादयो निरणैषुः। नच पचेदित्यादौ प्रेरणाया लिङ्वाच्यत्स्यावश्यकतया लकाराणां वाचकत्वमेव युक्तमिति वाच्यम्। तत्रापि प्रेरणाया धातुवाच्यत्वाभ्युपगमेन प्रत्ययस्य द्योतकत्वस्यैव स्वीकारात्। तस्या अपि पाकानुकूलत्वात्। तत्र च पाकानुकूलत्वेनोपस्थितव्यापाराणां मध्ये प्रयोजकव्यापारस्य विषयितया विशेषणत्वेनान्वयः, इतरव्यापाराणां तु विषयतया विशेष्यत्वेनान्वयः। एवं च पचेदित्यादित एकाश्रयिका प्रवर्तनाविषयीभूता पाकानुकूला क्रियेति बोधः। स्पष्टं चेदं "विधिनिमन्त्रण" इत्यादिसूत्रे मनोरमाशब्दरत्ने। [तात्पर्यग्राहकत्वेनेति] तात्पर्यग्राहकत्वमेव प्रकृते द्योतकत्वमित्याशयः।

वाचकत्वपक्षे उपपत्तिं दर्शयति [अन्वयव्यतिरेकेति] तिप्रत्ययश्रवणवेलायां वर्तमानकालः, ष्यति, स्यति प्रत्ययश्रवणवेलायां भविष्यत्कालश्च प्रतीयते। तदश्रवणे न प्रतीयत इति "प्रत्ययश्रुतिवेलायाम्" इति भट्टपादोक्तरीत्या प्रत्ययस्यैव वाचकत्वं सिद्ध्यति। नहि प्रत्ययमश्रुत्वा केवलधातुश्रवणवेलायां कालः प्रतीयते। नहि तावेवान्वयव्यतिरेकौ यौ परस्परपरित्यागेन वर्तेते। युक्तं चैतत्। अन्यथा प्रत्ययसत्तादशायां धातुभागस्यापि सत्त्वेन प्रत्ययस्यैव वाचकत्वमिति स्वीकारे विनिगमकाभावः स्पष्ट एवेति भावः। अन्यथा = निरुक्तरीत्यस्वीकारे। [विलोपापत्तिरिति] गमयति, जिगमिषयतीत्यादावपि गम्धातोरेव प्रेरणेच्छादिबोधकतामाश्रित्य तत्र णिच्सनादीनां

तात्पर्यग्राहकत्वकल्पनयोपपत्तौ णिजादीनामपि द्योतकताया एव सिद्धतया प्रत्ययानां वाचकत्वकथैवोच्छिद्येतेति भावः।

अत्रेदं बोध्यम्। प्रत्ययत्वावच्छेदेन वाचकत्वमेवेति वा द्योतकत्वमेवेति वा न नियन्तुं शक्यते। अतः केचन प्रत्यया वाचकाः, केचन द्योतका इत्याश्रयणीयम्। तत्र सनादिषु द्वादशसु यङ्, यक्, आय, ईयङ्, णिङ् एते द्योतका एव। अन्ये सनादयो वाचका एव। विकरणास्तु सर्वथा द्योतका एव। कृत्प्रत्ययेषु अव्ययकृतो द्योतकाः, अन्ये वाचकाः। तद्धितेषु अस्तातिप्रत्ययादारभ्य द्योतकाः, ततः पूर्वे तद्धिता वाचका एव। टाबादयो नव स्त्रीप्रत्यया द्योतका एव। द्विकं, त्रिकं, चतुष्कं वा प्रातिपदिकार्थः। फलव्यापारौ धात्वर्थ इति पक्षस्वीकारे सुप्तिङौ वाचकौ भवतः। जातिव्यक्तिलिङ्गसङ्ख्याकारकरूपं पञ्चकं प्रातिपदिकार्थः, फल - व्यापार - काल - सङ्ख्या - कारकरूपं पञ्चकं धात्वर्थ इति पक्षस्वीकारे सुप्तिङौ द्योतकावेव भवतः। तत्र "कुत्सिते" ५-३-७४ "बहुषु बहुवचनम्" १-४-२१ इत्यादिसूत्रस्थभाष्ये पञ्चकपक्षस्यैव सिद्धान्तितत्वेन सुप्तिङां द्योतकत्वपक्ष एव भाष्यसम्मतः। तिङ्भावी लकारो द्योतकः। कृद्भावी लकारस्तु वाचक एव। एवं च लकाराणां तिङ्भाविनां द्योतकत्वमेव साधीयः। पचन्, पचमान इत्यादौ लकारो वाचक एव - इति।

[इत्यपि पक्षान्तरमिति] अत्रापिनारुचिः सूचिता। तद्बीजं तु "अत्रेदं बोध्यम्" इत्यादिना प्रतिपादित आशय एव वेदितव्यः। अधिकं निपातार्थनिर्णये वक्ष्यते।।

लिडर्थमाह [परोक्ष इति] "परोक्षे लिट्" इति सूत्रात्। कालस्तावदद्यतनानद्यतन-भेदेन द्विविधः। द्विविधोऽपि भूतभविष्यद्रूपः। तत्रानद्यतने भूते परोक्षे लिडित्यर्थः। तेनाद्यतने भूते, अनद्यतने भविष्यति, भूतेऽप्यपरोक्षे च न लिट्प्रयोगः। परोक्षत्वं च - साक्षात्करोमि इत्येतादृशविषयताशालिताविषयत्वम्।

न च "क्रिया नामेयमत्यन्तापरिदृष्टा पूर्वापरीभूतावयवा न शक्या पिण्डीभूता निदर्शयितुम्" इति भाष्यात्तस्या अतीन्द्रियत्वेन 'परोक्षे' इत्यव्यावर्तकमिति शङ्क्यम्। पिण्डीभूताया निदर्शयितुमशक्यत्वेऽपि अवयवशः साक्षात्करोमीति प्रतीतिविषयत्व-सम्भवात्। अन्यथा पश्य मृगो धावतीत्यत्र तस्या दर्शनकर्मता न स्यादिति प्रतिभाति।

व्यापाराविष्टानां क्रियानुकूलसाधननामेवात्र पारोक्ष्यं विवक्षितम्। अतो नोक्तदोषः। अयं पपाचेत्याद्यनुरोधाद्व्यापाराविष्टानामित्यपि वदन्ति।

कथं तर्हि "व्यातेने किरणावलीमुदयनः" इति। स्वक्रियायाः स्वप्रत्यक्षत्वादिति चेत्, असङ्गतमेव। व्यासङ्गादिना स्वव्यापारस्य परोक्षत्वोपपादनेऽपि बहुतरमनःप्रणिधान-साध्यशास्त्रार्थनिर्णयजनकशब्दरचनात्मके ग्रन्थेऽनद्यतनत्वातीतत्वयोर्विस्तार-क्रियायामसत्त्वेनानद्यतनातीतत्वयोरभावेन तदर्थकलिडसम्भवात्।

लुडर्थमाह [श्वो भाविनीति] अनद्यतने भाविनीत्यर्थः। "अनद्यतने लुट्" इति सूत्रात्। यथा "श्वो भविता" इत्यादौ।

लृडर्थमाह [भविष्यतीति] भविष्यत्सामान्ये इत्यर्थः। "लृट् शेषे च" इति सूत्रात्। यथा - घटो भविष्यतीत्यादौ। तत्त्वञ्च विद्यमानप्रागभावप्रतियोगिसमयोत्पत्तिकत्वम्।

लेडर्थमाह [विध्यादाविति] "लिङर्थे लेट्" इति सूत्रात्। लिङर्थश्च विध्यादिरिति वक्ष्यते।

लोडर्थमाह [प्रार्थनेति] आदिना विध्याद्याशिषो गृह्यन्ते। "आशिषि लिङ्लोटौ" "लोट् च" इति सूत्राभ्यां तथावगमात्। यथा - भवतु ते शिवप्रसाद इत्यादौ। एतयोरर्थो लिङर्थ एव। त्रयाणां समानार्थत्वादिति तन्निर्णयेनैव निर्णयः।। ।।२२।।

[परोक्षे लिडिति] अत्र "भूते" इत्यधिक्रियते। "अनद्यतने लङ्" इति सूत्रादनद्यतन इत्यनुवर्तते। भूते, अनद्यतने, परोक्षे इति च धात्वर्थक्रियायामन्वेति। भूतानद्यतनपरोक्षार्थवृत्तेर्धातोर्लिडित्यर्थः। विशेषणव्यावर्त्यप्रदर्शनाय प्रथमं संक्षेपतः कालविभागं दर्शयति [कालस्तावदिति] द्विविधोऽपि = अद्यतनानद्यतनरूपः। व्यावर्त्यमाह [तेनेति] अद्यतन इत्यादेः "न लिट्प्रयोगः" इत्यत्रान्वयः।

ननु तत्र किं परोक्षत्वमत आह [परोक्षत्वञ्चेति] साक्षात्करोमीत्येतादृशविषयताशालिज्ञानत्वं ज्ञाननिष्ठमपरोक्षत्वम्। तद्विषयत्वं चार्थनिष्ठम्। तद्भिन्नं च परोक्षत्वम्। तादृशविषयता च ज्ञानाकरणकज्ञान एवेत्यन्यत्र विस्तरः। ननु क्रियायाः सर्वथा परोक्षत्वाद्व्यावर्त्याभावात्सूत्रे परोक्षग्रहणं व्यर्थमित्याशङ्कते [नचेति]। [क्रिया नामेति] "भूवादयो धातवः" "निष्ठा" "परोक्षे लिट्" इति सूत्रेषु भाष्यमिदम्। अत्यन्तापरदृष्टेति भाष्ये पाठः। तथैव निष्ठेति सूत्रे कैयटेन व्याख्यातम्। अयमर्थः - परं = प्रधानमुत्कृष्टं प्रमाणं = प्रत्यक्षम्। परेण = प्रत्यक्षेण, दृष्टा न भवतीत्यपरदृष्टा। अत्यन्तमपरिदृष्टा = अत्यन्तापरिदृष्टा। पूर्वापरीभूतावयवेति तल्लक्षणकथनम्। "पूर्वापरीभूतावयवा" इति भागो न भाष्यकारस्य। "क्रियानामेयमत्यन्तापरिदृष्टाऽशक्या पिण्डीभूता निदर्शयितुम्" इत्येतावानेव सूत्रत्रयेऽपि भाष्यग्रन्थः।

क्रियायाः पिण्डीभूताया निदर्शयितुमशक्यत्वे "पूर्वापरीभूतावयवा" इति हेतुगर्भक्रिया विशेषणवचनं कौण्डभट्टस्य, "परोक्षे लिट्" इति सूत्रे मनोरमायामेवमेव दीक्षितस्य वचनम्। तस्याः = क्रियायाः। अतीन्द्रियत्वेन = इन्द्रियजन्यज्ञानाविषत्वेन। [परोक्ष इति] परोक्षे लिडिति सूत्रस्थं परोक्ष इत्येतत्। [अव्यावर्तकमिति] यस्याः कस्याश्चित्क्रियायाः प्रत्यक्षत्वे तादृशक्रियामादाय लिडापत्तिवारणाय तच्चारितार्थ्यं वाच्यम्। निरुक्तभाष्या त्क्रियामात्रस्य प्रत्यक्षत्वभावावगत्या, व्यावर्त्याभावात्सूत्रे परोक्षग्रहणमव्यावर्तकमेव। अत एवैतच्छेषे भाष्ये "सा साऽवनुमानगम्या" इत्युक्तम्। एवं च सूत्रे परोक्षग्रहणं व्यर्थम्। क्रियायां परोक्षत्वस्य व्यभिचाराभावात्, "सम्भवव्यभिचाराभ्यां स्याद्विशेषणमर्थवत्" इति न्यायादिति भावः। भाष्ये पिण्डीभूताया इति विशेषणमहिम्नाऽधिश्रयणाद्यधःश्रयणान्तक्रियासमुदायस्याप्रत्यक्षत्वेऽप्यवयवक्रियायाः प्रत्यक्षत्वमित्यर्थलाभादवयवक्रियामादाय तत्प्रत्यक्षत्वे लिटो वारणाय परोक्षग्रहणमावश्यकमित्याशयेन समाधत्ते [पिण्डीभूताया इति]। [अवयवश इति] एकैकावयवस्येत्यर्थः। "सङ्ख्यैकवचनाच्च वीप्सायाम्" इति शस्। [प्रतीतिविषयत्वसम्भवादिति] प्रत्यक्षत्वसम्भवादित्यर्थः। तथाच क्रियावयवानां वक्तृपरोक्षत्वदशायां लिट्प्रयोगस्य साधुत्ववारणाय सूत्रे परोक्षग्रहणं चरितार्थमिति भावः। [अन्यथेति] अवयवक्रियाणां प्रत्यक्षत्वानभ्युपगम इत्यर्थः। तस्याः = धावनक्रियायाः। मतान्तरमाह [व्यापाराविष्टानामिति] क्रियायाः प्रत्यक्षत्वासम्भवेऽपि आश्रयद्वारा तस्याः प्रत्यक्षत्वमित्याशयः। अत्र = लिङुत्पत्तौ। नोक्तद्वोषः = सूत्रे परोक्षग्रहणमव्यावर्तक मित्युक्तदोषो नेत्यर्थः। [व्यापाराविष्टानामिति] क्रियानुकूलसाधनमात्रस्य परोक्षत्वाभ्युपगमे "अयं पपाच" इति प्रयोगानुपपत्तिः, अतः क्रियाविष्टानामिति। इदानीं साधनभूतस्य पुरुषस्य प्रत्यक्षत्वेऽपि क्रियाविष्टसाधनस्याप्रत्यक्षत्वाल्लिडन्तप्रयोगोपपत्तिरिति भावः।

इत्यपि वदन्तीत्यनेनारुचिर्बोध्यते। तद्बीजं तु - परोक्षे लिडित्यस्य क्रियायाः पारोक्ष्ये लिडित्येवार्थः, नतु क्रियाविष्टसाधपारोक्ष्य इति। तत्राधिकृतस्य शब्दपरस्य धातोस्तदर्थे लक्षणाश्रयणे स्ववाच्यत्वं सम्बन्धः, साधनलक्षणायां तु स्ववाच्यसाधनत्वं सम्बन्ध इत्यतिगौरवमिति। स्पष्टं चेदं भूषणे। अतः पूर्वोक्तमेव युक्तं, ग्रन्थकृत्सम्मतं च। नागेशोपाध्यायस्तु अवयवक्रियाणामप्यप्रत्यक्षत्वमेव, साधनानां पारोक्ष्ये लिडित्येवोचितमित्यभिप्रैति।

[कथमिति] स्वकर्तृकक्रियायाः परोक्षत्वासम्भवाल्लिडनुपपत्तिरिति भावः। तर्हि = लिङुत्पत्तौ क्रियापारोक्ष्यस्य नियामकत्वाभ्युपगमे। [किरणावलीमिति] प्रशस्तपादविरचितस्य वैशेषिकसूत्रभाष्यस्य व्याख्या "किरणावली" इति बोध्यम्। [स्वप्रत्यक्षत्वादिति] एवं च "परोक्षे लिट्" इति शास्त्रस्याप्रवृत्तिरिति

तात्पर्यम्। "व्यापाराविष्टानाम्" इत्यादिमतान्तरेऽप्यत्रानुपपत्तिरेव, क्रियाविष्टसाधनस्य स्वप्रत्यक्षत्वादिति ज्ञेयम्। ननु विषयान्तरसंचाररूपव्यासङ्गादिना स्वव्यापारस्य व्यापारविशिष्टस्य च स्वप्रत्यक्षविषयत्वाभावरूपपारोक्ष्यसम्भवाद् न लिट्प्रयोगानुपपत्तिरित्याशङ्क्य समाधत्ते [व्यासङ्गादिनेति] - अत एव -

बहु जगद पुरस्तात्तस्य मत्ता किलाहं
चकर च किल चाटु प्रौढयोषिद्वदस्य।
विदितमिति सखीभ्यो रात्रिवृत्तं विचिन्त्य
व्यपगतमदयाह्नि व्रीडितं मुग्धवध्वा।। शिशु - ११ - ३९

इति माघकविप्रयोगः सङ्गच्छते। [अनद्यतनत्वेति] निरुक्तरीत्या स्वक्रियायाः परोक्षत्वोपपादनेऽपि तत्रानद्यतनत्वातीतत्वयोरसत्त्वाल्लिङ् दुरुपपाद इति भावः। [तदर्थकेति] भूतानद्यतनपरोक्षक्रियार्थकेत्यर्थः। "परोक्षत्वोपपादनेऽपि" इति ग्रन्थादनन्तरं "बहुतरमनः प्रणिधानसाध्यशास्त्रार्थनिर्णयजनकशब्दरचनात्मके ग्रन्थे" इति पाठो दृश्यते। स च पाठो भूषणे दृश्यते। प्रकृतग्रन्थेऽपि तं पाठमाश्रित्य पञ्चोलिनो व्याचक्रुः। काशिकाकारादयस्तु तं पाठं नाशिश्रियुः। पञ्चोलिव्याख्यासहितपुस्तके स पाठः कोष्टान्तर्गतो दृश्यते।

नागेशोपाध्यायस्तु "व्यातेने किरणावलीम्" इत्यादीनां साधुत्वमभ्युपगच्छति, सचाभ्युपगमप्रकारस्तिङर्थवादमञ्जूषातोऽवगन्तव्यः। तद्व्याख्याने नागेशभावप्रकाशेऽस्माभिः प्रदर्शितश्च। ननु "श्वो भाविनि" इति मूलमयुक्तम्। तृतीयादिदिनभाविन्यपि पक्तेति लुट् प्रयोगस्येष्टत्वात्, श्व इत्यस्य निर्मूलत्वाच्चेत्यत आह [अनद्यने भाविनीत्यर्थ इति] अतीतरात्रेः पश्चिमार्धेन, आगामिन्या रात्रेराद्ययामेन च सहितः कालोऽद्यतनः, तद्भिन्नः कालोऽनद्यतनः, स च भूतो भावी च, तत्रानद्यतन भविष्यति लुडित्यर्थः। एवं चागामिन्या रात्रेराद्ययामादारभ्य तदर्वाक्कालेऽपि पक्तेति लुट्प्रयोगः सेत्स्यति। उदाहरणेऽनद्यतनत्वस्फोरणाय श्वः पदप्रयोग इति बोध्यम्।

ननु भविष्यति लुटो विधानात्पुनरपि तत्र लृटो विधानं व्यर्थमत आह [भविष्यत्सामान्य इति] एवं च भविष्यत्सामान्ये लृट्, अनद्यनभविष्यति लुडिति विवेकः। [इति सूत्रादिति] - अयं चकारयुक्तः सूत्रपाठो वार्तिककारसम्मतः। अत्र सूत्रे "भविष्यति गम्यादयः" इति ३-३-३ सूत्रा'विष्यतीत्यनुवर्तते। क्रियार्थक्रियावाचकपदासत्त्वं शेषशब्दार्थः। "तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्" ३-३-१० इति प्रकरणादनन्तरमस्य पाठात्। चकारात् क्रियार्थक्रियावाचकपदसत्त्वेऽपि लृट् - यथा - करिष्यतीति

व्रजतीत्यादौ। चकाररहितः पाणिनेः पाठ इति तद्भाष्यस्वरसः। तत्रहि - लृटि शेषवचनं क्रियायां प्रतिपदविध्यर्थम्। लृटि शेषवचनं क्रियते, क्रियायां प्रतिपदविधिर्यथा स्यात्। लृट् शेषे च करिष्यति हरिष्यतीति क्रच, क्रियायामुपपदे क्रियार्थायाम्। करिष्यामीति व्रजति। स तर्हि चकारः कर्तव्यः? न कर्तव्यः। कथम्? इह "लृड् भवति" इतीयता सिद्धम्। सोऽयमेवं सिद्धे सति शेषग्रहणं करोति तस्यैतत्प्रयोजनम् - योगाङ्गं यथा विज्ञायेत। योगाङ्गे योगविभागः करिष्यते, लृट् लृड्भवति क्रियायामुपपदे क्रियार्थायामिति। ततः "शेषे" शेषे च लृड् भवति" इत्युक्तम्। "चकारसहिताच्छेषग्रहणात्क्रियायामप्युपपदे लृट् सिद्ध्यतीति वार्तिककाराशयं" इदानीं योगविभागाश्रयणेन चकारं प्रत्याख्यातुमाह स तर्हीति" इति कैयटः। "चकारं = वार्तिककृदुक्तम्" इति चोद्द्योतकारः। नच क्रियार्थायामित्यादेर्निवृत्त्यैव सिद्धे शेषग्रहणं व्यर्थमिति वाच्यम्। भावकर्त्रोस्तुमुन्ण्वुल्भ्यां लृटो बाधाभावार्थं तस्यावश्यकत्वात्। वासरूपन्यायेन तु न तत्सिद्धिः। "तुमुन्ण्वुलौ" इति सूत्रे पुनर्ण्वुल्ग्रहणेन क्रियार्थायां क्रियायामुपपदे वासरूपविधिना प्रत्ययान्तराभावज्ञापनस्य भाष्य उक्तत्वात्। स्पष्टं चेदं प्रदीपोद्द्योतयोः, शेखरे च।

[घटो भविष्यतीति] घटाभिन्नाश्रयवृत्तिर्वर्तमानप्रागभावप्रतियोगिसमवायावच्छिन्न उत्पत्त्यनुकूलो व्यापार इति बोधः। क्रियागतं भविष्यत्त्वमाह [तत्त्वं चेति] भविष्यत्वं चेत्यर्थः। [वर्तमानेति] वर्तमानो यो ध्वंसः, तत्प्रतियोगी यः समयस्तदधिकरणकोत्पत्तिमत्क्रियात्वमित्यर्थः। अनेनापि कालः क्रियारूप एव नातिरिक्त इति सूच्यते।

लेडर्थमाह = तारिषत्, करति, भवाति इत्यादीनि लेडन्तरूपाणि। आद्ये "सिब् बहुलं लेटि" ३-४-७ इति सिब् विकरणः। "इतश्च लोपः परस्मैपदेषु" ३-४-९७ इति इकारलोपः। "सिब् बहुलं णिद्वक्तव्यः" इति णित्त्वम्। अन्त्ययोः "लेटोऽडाटौ" इति ३-४-९३ अडाटौ। एतयोः = लेट्लोटोः। [वक्ष्यत इति] लिङ्विधायक एव विध्यादीनामुपादानात्तत्रैव तन्निर्णयः कार्य इत्याशयः। भूषणे तु लेडर्थनिरूपणप्रसङ्ग एव विध्यादिनिरूपणं कृतम्। तन्निर्णयेन = लिङर्थनिर्णयेन।। ।।२२।।

लङादिक्रमेण ङितामर्थ माह -

ह्योभूते प्रेरणादौ च भूतमात्रे लङादयः।
सत्यां क्रियातिपत्तौ च भूते भाविनि लृङ्स्मृतः।। ।।२३।।

लङर्थमाह - [ह्यो भूत इति] अनद्यतने भूत इत्यर्थः। "अनद्यतने लङ्" इति सूत्रात्। यथा - अस्य पुत्रोऽभवदित्यादि।

लिङर्थमाह [प्रेरणादाविति] "विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ्" इति सूत्रात्। तत्र विधिः = प्रेरणम्, भृत्यादेर्निकृष्टस्य प्रवर्तनम्। निमन्त्रणं = नियोगकरणमावश्यके प्रेरणेत्यर्थः। आमन्त्रणं = कामचारानुज्ञा। अधीष्टं = सत्कारपूर्वको व्यापारः। एतच्चतुष्टयानुगतप्रवर्तनात्वेन वाच्यता, लाघवात्। उक्तञ्च -

अस्ति प्रवर्तनारूपमनुस्यूतं चतुर्ष्वपि।
तत्रैव लिङ्विधातव्यः किं भेदस्य विवक्षया।।
न्यायव्युत्पादनार्थं वा प्रपञ्चार्थमथापि वा।
विध्यादीनामुपादानं चतुर्णामादितः कृतम्।। इति।

प्रवर्तकत्वञ्च - प्रवृत्तिजनकज्ञानविषयतावच्छेदकत्वम्। तच्चेष्टसाधनता-ज्ञानस्यास्तीति तदेव विध्यर्थः।

एवं "वर्तमाने" इत्यादिकारिकया लडादीनां टितां षण्णां लकाराणामर्थं निरूप्य कारिकान्तरेण लङादीनां ङितां चतुर्णां लकाराणामर्थं निरूपयतीत्याशयेनोत्तरग्रन्थमवतारयति [लङादिक्रमेणेति] ननु ह्यो भूते लङित्ययुक्तम्, दिनद्वयादिव्यवहितभूतकाले लङोऽनापत्तेरत आह [अनद्यतन इति] एवं च कारिकायां ह्यः पदमनद्यतनस्योपलक्षणमिति भावः। अनद्यतन इति अविद्यमानोऽद्यतनो यस्येति बहुव्रीहिः, नतु तत्पुरुषः। तत्पुरुषे पर्युदासाश्रयणे व्यामिश्रे दोषः - अद्यच ह्यश्चाभुक्ष्महीति। अत्र लुङेव, तत्पुरुषे अद्यतने नेति प्रतिषेधाश्रयणे असमर्थसमासत्वापत्तिः, भूतसामान्ये लङापत्तिश्च। नचैवमद्यतनेऽपि लङापत्तिरद्यतनेऽद्यतनाभावादिति वाच्यम्। "अद्यतनेऽपि ह्यद्यतनो विद्यते। कथम्? व्यपदेशिवद्भावेन" इति भाष्य एव समाधानात्।

ननु सूत्राद् विध्यादीनां लिङर्थत्वप्रतीतेः कथं "प्रेरणादौ" इति मूलसङ्गतिरित्यत आह [तत्रेति] सूत्रोपात्तेष्वर्थेषु मध्य इत्यर्थः। ननु 'अध्यापय' इति गुरुकर्मकचोदनायामपि प्रेरणव्यवहारापत्तिरत आह - [भृत्यादेरिति] प्रेरणं = स्वामिना स्वाभिलषिते प्रेरणम्। [नियोगकरणमिति] तथाच प्रकृतसूत्रे भाष्यम् - "यन्नि योगतः कर्तव्यं, तन्निमन्त्रणम्। किं पुनस्तत्। हव्यं कव्यं च। ब्राह्मणेन सिद्धं भुज्यतामित्युक्तेऽधर्मः प्रत्याख्यातुः" इति। "अवश्यकर्तव्यं यन्नित्यं नैमित्तिकं च तन्निमन्त्रणमिति निमन्त्रणविषयत्वात्तदेव निमन्त्रणम्" इति "तन्निमन्त्रणम्" इति भाष्यप्रतीके कैयटः। तदेतदाह [आवश्यके श्राद्धभोजनादाविति] "अधर्म" इति भाष्यप्रतीके "यदाऽन्यो ब्राह्मणो भोक्ता न लभ्यते, तदा दौहित्रादिर्भोजयितव्यः। तस्य च प्रत्याख्यानेऽधर्म इति स्मार्तः समाचारः" इति कैयटोक्तिमाश्रित्याह

[दौहित्रादेः प्रवर्तनमिति] स्पष्टं चेदं हरदत्तग्रन्थेऽपि। "निमन्त्रणं = नियोगकरणम्। आवश्यके श्राद्धभोजनादौ दौहित्रादेः प्रवर्तनमिति यावत्" इति भूषणेऽपि पाठ उपलभ्यते। दर्पणकारास्तु "आमन्त्रणं नियोगकरणम्। आवश्यके प्रेरणेत्यर्थः" इति भूषणसारपाठमाश्रित्य आवश्यक इति श्राद्धभोजनादिश्च तथा। प्रेरणेति - प्रवर्तनेत्यर्थः। अस्य दौहित्रादेरित्यादिः" इति व्याचक्षते।

"आमन्त्रणे कामचारः" इति भाष्यादाह [कामचारानुज्ञेति] स्वाभिलषिते कामचारेण प्रवर्त्यप्रवर्तनेत्यर्थः। कामचारश्च प्रवर्त्यस्यैव। [अधीष्टमिति] अधिपूर्वादिच्छतेर्भावे क्तः। अधीष्ट इति पुंलिङ्गपाठस्त्वपपाठः। "अधीष्टं नाम सत्कारपूर्विका व्यापारणा" इति भाष्यादाह [सत्कारपूर्वको व्यापार इति] अतिरिक्तांशस्य मानान्तरलभ्यत्वात्प्रवर्तनाया एव लिङर्थत्वमित्यर्थप्रदर्शनस्य प्रस्तुतत्वात्तदवसरेऽनुपयोगात्संप्रश्नपदार्थो न विवृतः, भूषणस्वरसोऽप्येवमेव। अत एव नागेशेनापि स परित्यक्तः। दर्पणकारास्तु "संप्रश्नः = सम्प्रधारणम्" इति पाठमाश्रित्य व्याकुर्वते। प्रार्थना तु स्वाभिलषितवस्तुदानादिप्रवर्तकोक्तिरिति बोध्यम्।

एवं विध्यादीनां स्वरूपमुपदर्श्य तत्रान्यांशस्य मानान्तरलभ्यतया विशिष्टस्य न शक्यत्वं, किन्तु प्रवर्तनाया एवानन्यलभ्यत्वादित्याह [एतदिति] [चतुष्टयेति] प्रार्थनासहितचतुष्टयेत्यर्थः। [प्रवर्तनात्वेनेति] प्रवर्तनातिरिक्तस्योत्कर्षापकर्षावश्यकत्वकामचारदानाद्यंशस्य प्रकरणधर्मशास्त्रादिना लभ्यत्वेनानन्यलभ्यप्रवर्तनात्वेन रूपेण विध्यादीनां वाच्यतेत्याशयः [लाघवादिति] तत्त्वेन वाच्यत्वे प्रवर्तनात्वस्य विधिप्रत्ययशक्यतावच्छेदकत्वेन लाघवादित्यर्थः। अन्यथा विधित्वनिमन्त्रणत्वादिना वाच्यत्वे गुरुभूतशक्यतावच्छेदकनानात्वापत्त्या गौरवमिति भावः। स्वोक्तार्थे हरिं प्रमाणयति [उक्तञ्चेति] तत्रादौ शङ्कते कारिकायाम् [अस्तीति] चतुर्षु = विधिनिमन्त्रणामन्त्रणाधीष्टेषु, अपिना प्रार्थनायामनुस्यूतं = सम्बद्धम्, प्रवर्तनारूपमस्ति। अतः तत्रैव = प्रवर्तनायामेव। लिङ् = विधिप्रत्ययः लोट् लेट् च विधातुं योग्यः, भेदस्य = विधिनिमन्त्रणादिभेदस्य, विवक्षया किं प्रयोजनम्? अतः "प्रवर्तनासंप्रश्नयोर्लिङ्" इति सूत्रयितुमुचितमिति शङ्कितुराशयः। अभ्युपगम्य समाधत्ते [न्यायेति] प्रागुक्ततत्स्वरूपविवरणरूपस्य न्यायस्याव्यभिचरितत्वप्रदर्शनार्थमित्यर्थः। नन्वस्य लोकव्युत्पत्त्यैव सिद्धिरत उक्तं [प्रपञ्चार्थमिति] चतुर्णामित्युपलक्षणम् - प्रार्थनस्यापि। तत्रापि प्रवर्तनायाः सत्त्वात्। एतेन "सम्प्रश्नप्रार्थनयोः स्वातिरिक्तैव शक्तिः। किं त्वमधीयायाः? भवति मे प्रार्थना वेदमधीयीयेत्यादौ। तत्र प्रवर्तनात्वस्याभावात्। आनुशासनिकी वा निरूढलक्षणा, "हेतुहेतुमतोर्लिङ्" "कामप्रवेदनेऽकिञ्चिति" इत्यादिनेव हेतुत्वादौ इति भाट्टरहस्ये खण्डदेवोक्तमपास्तमिति बोध्यम्।

"इष्टसाधनत्वं विध्यर्थः" इति सिद्धान्तं समूलयति [प्रवर्तनात्वमिति] प्रवर्तना = प्रवृत्तिकरणमिति व्युत्पत्त्या प्रपूर्वाद्वृतुधातोर्ण्यन्तात् युच्प्रत्यये निष्पन्नप्रवर्तनाशब्दात् प्रवृत्त्यनुकूलव्यापारलाभ इत्याशयेनाह - [प्रवृत्तिजनकेति] प्रवृत्तिः = यागपाकादौ प्रवृत्तिः, तज्जनकं यज्ज्ञानं यागः स्वर्गसाधनं, पाकस्तृप्तिसाधनमित्याकारकं ज्ञानं, तादृशज्ञानीया या विषयता यागादिनिष्ठा विशेष्यत्वाख्या विषयता, तन्निरूपितप्रकारतावच्छेदकत्वं स्वर्गसाधनत्वस्येति भावः। यागादिनिष्ठविशेष्यतानिरूपितप्रकारता स्वर्गसाधनत्वनिष्ठेति विशेष्यतानिरूपकत्वरूपमवच्छेदकत्वं स्वर्गसाधनत्वस्येति यावत्। "तन्निरूपकाश्रयोऽपि तन्निरूपकः" इति न्यायेन प्रकारताश्रयस्य स्वर्गसाधनत्वस्यापि तन्निरूपकत्वमतः साक्षाद्विशेष्यतानिरूपकतायाः प्रकारतायामेव सत्त्वेपि न क्षतिः। यद्वा तादृशविशेष्यतायामवच्छेदकत्वं स्वर्गसाधनत्वस्य। विशेष्यतायां प्रकारावच्छिन्नत्वमङ्गीकुर्वतां मतेनेदमिति बोध्यम्।

नन्वेवमपि स्वर्गसाधनत्वादेरेव विध्यर्थत्वलाभादिष्टसाधनत्वस्य विध्यर्थत्वव्यवहारस्योपपत्तिः का? इत्यत आह [तच्चेति] उक्तविधप्रवर्तनात्वं चेत्यर्थः। [इष्टसाधनत्वस्येति] अयं भावः - ओदनकामः पचेत, 'स्वर्गकामो यजेत' इत्यादावोदनस्वर्गादिरूपं यत्फलं तत्साधनत्वं पाकयागादिक्रियायां प्रतीयते। तादृशफलानां च तत्तद्रूपेण लिङ्गादिशक्यतावच्छेदककोटिप्रवेशे शक्त्यानन्त्यं, सर्वसाधारण्येनापूर्वफलसाधनत्वबोधानिर्वाहश्च। अतस्तेषामिष्टत्वेनानुगमः, इष्टत्वं च समभिव्याहृतपदोपस्थापितकामनाविषयत्वम्। तथा च तादृशेच्छाविषयत्वोपलक्षितं यदोदनस्वर्गादिफलं, तत्साधनत्वेन ज्ञानं प्रवर्तकम्। इच्छाविषयत्वस्योपलक्षणतया शक्तिविषयत्वादिच्छाविषयत्वेन स्वर्गादीनां शाब्दबोधे न भानम्, किन्तु स्वर्गत्वादिनैव। विशेषणस्यैव शाब्दबोधे भानोपगमात्। उपलक्षणत्वं च तत्तत्पदजन्यबोधाविषयत्वेन शक्तिविषयत्वम्, तत्तत्पदजन्यबोधविषयत्वेन शक्तिविषयत्वमेव विशेषणत्वमिति विवेकः - इति।

अत्र तार्किकाः - लिङो बलवदनिष्टाननुबन्धित्वे कृतिसाध्यत्वे इष्टसाधनत्वे च शक्तिः, अन्यतमाभावे इतरद्वयसत्त्वेऽपि मधुविषसंपृक्तान्नभोजने चन्द्रस्पर्शे मण्डलीकरणादौ च प्रवृत्त्यदर्शनात्। तत्रापि विशेषणविशेष्यभावे विनिगमनाविरहात्प्रत्येकं शक्तिः। पुष्पवच्छब्दवच्च व्युत्पत्तिवैचित्र्याद्युगपदर्थत्रयस्यापि बोधः। अन्वयश्चास्य योग्यताबलाद्धात्वर्थे यागादावेव, "न कलञ्जं भक्षयेत्" इत्यादौ तु नञर्थेऽभावे, सोऽपि न त्रितयस्यापि, कलञ्जभक्षणस्य कृतिसाध्यत्वादिष्टसाधनत्वाच्च। किन्तु बलवदनिष्टाननुबन्धित्वाभावस्य (बलवदनिष्टानुबन्धित्वस्य) नञा बोधनात् कारणाभावात्तत्राप्रवृत्तिः। श्येनादौ तु कृतिसाध्यत्वेष्टसाधनत्वयोरेवान्वयो, न बलवदनिष्टाननुबन्धित्वस्य, प्रमाणान्तरेण

तत्फलस्याभिचारस्य नरकसाधनत्वावगमेन तस्य नरकप्रयोजकत्वरूपबलवदनिष्टानुबन्धित्वादत-स्तत्रास्तिकानामप्रवृत्तिः - इति वदन्ति।

तन्न। बलवदनिष्टाननुबन्धित्वकृतिसाध्यत्वयोर्विधिप्रत्ययवाच्यत्वे मानाभावात्, बलवदनिष्टाननुबन्धित्वज्ञानस्याप्रवर्तकत्वात्। कृत्यसाध्ये चन्द्रमण्डलग्रहणादौ प्रवृत्त्यभावस्य वृथाश्रमजनकतया द्वेषादुपपत्तेः। अतः पारिशेष्यादिष्टसाधनत्वस्यैव लिङर्थत्वमित्याशयेनाह [तदेवेति] इष्टसाधनत्वमेवेत्यर्थः। एवशब्देन बलवदनिष्टाननुबन्धित्वकृतिसाध्यत्वयोर्व्यावृत्तिः। विध्यर्थः = विधिप्रत्ययार्थः। "न कलञ्जं भक्षयेत्" इत्यादौ त्वनिष्टसाधनत्वं विध्यर्थः। अत्रैव नञ् तात्पर्यग्राहक इति बोध्यम्।

यद्यप्येतत् कृतिसाध्यत्वस्याप्यस्ति, तज्ज्ञानस्यापि प्रवर्तकत्वात्। तथापि यागादौ सर्वत्र तल्लोकत एव लभ्यत इत्यन्यलभ्यत्वान्न तच्छक्यम्।

बलवदनिष्टाननुबन्धित्वज्ञानञ्च न हेतुः, द्वेषाभावेनान्यसिद्धत्वात्। आस्तिककामुकस्य नरकसाधनताज्ञानदशायामप्युत्कटेच्छायां द्वेषाभावदशायां प्रवृत्तेर्व्यभिचाराच्च।

तस्मादिष्टसाधनत्वमेव प्रवर्तना। उक्तञ्च मण्डनमिश्रैः -

पुंसां नेष्टाभ्युपायत्वात् क्रियास्वन्यः प्रवर्तकः।
प्रवृत्तिहेतुं धर्मं च प्रवदन्ति प्रवर्तनाम्।। इति।
प्रपञ्चितं चैत द्वैयाकरणभूषणसारे।

आदिना "हेतुहेतुमतोर्लिङ्" "आशिषि लिङ्लोटौ" इति सूत्रोक्ता हेतुहेतुमद्भावादयो गृह्यन्ते। "यो ब्राह्मणायापगुरतै शतेन यातयात्" इति यथा।

नन्विष्टसाधनत्वस्य विध्यर्थत्वे चन्द्रमण्डलग्रहणादौ प्रवृत्तिर्दुर्वारा, तत्र तद्वरणाय कृतिसाध्यत्वस्यापि विध्यर्थत्वस्यावश्याभ्युपेयतया इष्टसाधनत्वमेव विध्यर्थ इति कथं नियम इत्याशङ्क्य दूषयति [यद्यपीति] एतत् = प्रवृत्तिजनकज्ञानविषयतावच्छेदकत्वम्। [प्रवर्तकत्वादिति] अत एव कृत्यसाध्ये चन्द्रमण्डलग्रहणादौ प्रवृत्त्यभावः सिद्ध्यतीति भावः। तथाचेष्टसाधनत्वमेव विध्यर्थ इति नियमासिद्धिरेवेति तात्पर्यम्। कारणतावच्छेदककोटिप्रविष्टं कृतित्वं च निवृत्तिजीवनयोनिव्यावृत्तयत्नत्वव्याप्यो जातिविशेषः। नृसिंहाश्रमोक्तदिशा परिहरति [तथापीति] तत् = कृतिसाध्यत्वम्। [लोकत एव लभ्यत इति]

अयमाशयः - कृतिसाध्यत्वमात्रे वेदादवगतेऽपि न तन्मात्रं प्रवर्तकमशक्तस्यापि प्रवृत्त्यापत्तेः। किन्तु मदंशविशिष्टम्। तच्च लौकिकप्रमाणेनापि सम्भवतीति न विधेस्तत्र शक्तिरन्यलभ्यत्वात्। तच्च लौकिकप्रमाणं यागो मत्कृतिसाध्यः, मत्कृतिसाध्यत्वविरोधि धर्मानधिकरणत्वादित्यनुमारूपमिति। [अन्यलभ्यत्वादिति] निरुक्तानुमानरूपलौकिकप्रमाणलभ्यत्वादित्यर्थः। तत् = कृतिसाध्यत्वम्। वस्तुतस्तु कृतिसाध्यताज्ञानस्य प्रवर्तकत्वमेव नास्ति। कृत्यसाध्ये चन्द्रमण्डलग्रहणादौ प्रवृत्त्यभावस्तु तत इष्टाभावेन वृथाश्रमजनकतया द्वेषादुपपद्यते। अतो न तच्छक्यम्। नच चिकीर्षानुरोधेन तस्य शक्यत्वमिति वाच्यम्। लोकतस्तदवगमाच्चिकीर्षासम्भवात्। नन्वेवमिष्टसाधनताज्ञानस्यापि प्रवर्तकत्वं न स्यात्, अनिष्टसाधने उदासीने च "कष्टं कर्म" इति न्यायेन वृथाश्रमजनकत्वेन द्वेषादप्रवृत्तेः सिद्धत्वादिति चेन्न। इष्टाजनके आन्तरालिकश्रमे द्वेषाभावदशायामप्रवृत्तेः। सर्वसिद्धाया अनुरोधेन तज्ज्ञानस्य प्रवर्तकत्वावश्यकत्वात्। स्पष्टमधिकं भूषणे।

नन्वेवमपि इष्टसाधनत्वमेव विध्यर्थ इत्यसङ्गतम्। मधुविषसंपृक्तान्नभोजनादौ प्रवृत्तिवारणाय बलवदनिष्टाननुबन्धित्वज्ञानस्यापि प्रवृत्त्यौपयिकतया तच्छक्यत्वस्याप्यावश्यकत्वात्। तत्त्वं चेष्टोत्पत्तिनान्तरीयकदुःखाधिकदुःखाजनकत्वम्। प्रकृते इष्टोत्पत्तिनान्तरीयकदुःखातिरिक्तस्य मरणदुःखस्य तेन जननान्न प्रवृत्तिरित्यत आह [बलवदिति] ज्ञानञ्च = ज्ञानमपि। न हेतुः = न प्रवृत्तिहेतुः, क्वचित्तथैव पाठ इति दर्पणकाराः। [अन्यथासिद्धत्वादिति] कारणत्वस्यान्यथासिद्धिशून्यत्वघटितत्वेन, अस्य च द्वेषाभावरूपान्यथासिद्धिविशिष्टत्वेन कारणत्वासम्भव इति भावः। एवं च द्वेषदशायामप्रवृत्तेस्तदभावदशायां प्रवृत्तेश्च सिद्धतया न नैयायिकोक्तरीत्या तज्ज्ञानस्य कारणत्वं सिद्ध्यतीत्याशयः। नन्वान्वयव्यतिरेकसहचारज्ञानस्य कारणत्वस्योभयत्र साम्यात्तेनैवास्यान्यथासिद्धिर्दुर्वारेत्यत आह [आस्तिकेति] कर्मधारयः। आस्तिकः परलोकाङ्गीकारवान्। "अस्ति नास्ति दिष्टं मतिः" ४-४-६० इति 'क्'। परलोकानङ्गीकर्तुर्नरकसाधनताज्ञानासम्भवादिदं विशेषणं कामुकस्य। आस्तिकस्य परदारागमने नरकसाधनताज्ञानेन तत्र द्वेषावश्यम्भावेन प्रवृत्त्यसम्भवादाह [कामुकस्येति] प्रवृत्तावुत्तेजकं दर्शयति [उत्कटेति] इच्छायामुत्कटत्वं जातिविशेषः। [द्वेषाभावेति] द्वेषे सत्यप्रवृत्तेश्चेत्यपि बोध्यम्। प्रवृत्तेः = परदारागमनादौ। उपसंहरति [तस्मादिति] उक्तञ्च = विधिविवेके। [पुंसामिति] प्राणिनां क्रियासु प्रवर्तकः इष्टसाधनताज्ञानादन्यो नास्ति। चो हेतौ, यतः प्रवृत्तिहेतुं = तद्धेतुतावच्छेदकप्रवर्तनापदेन व्यपदिशन्तीत्यर्थः।

ननु बलवदनिष्टसाधनताज्ञानस्य प्रवृत्तिं प्रति प्रतिबन्धकत्वमस्तु, किं द्वेषाभावकल्पनयेति चेन्न। बलवदनिष्टजनकमिति ज्ञानेऽपि तत्र द्वेषाभावदशायां परसुन्दरीगमनादौ प्रवृत्तेः सर्वसिद्धत्वात्। ननु दुःखस्यापि ईश्वरेच्छाविषयत्वसम्भवात्तत्साधनत्वमपि शक्यं स्यादिति चेन्न। इष्टापत्तेः। अपूर्वं विधिशक्यमिति गुरुमतमयुक्तमेव, तस्य लिङ्वाच्यत्वे प्रमाणाभावात्। प्रवृत्तिकारणीभूतस्वर्गसाधनताज्ञानस्य तेन विनाप्युपपत्तेः। तदेतदाह [प्रपञ्चितं चेति]

नागेशोपाध्ययस्तु "इष्टसाधनत्वमपि न विध्यर्थः। तस्यापि चिकीर्षयान्यथासिद्धत्वात्। लिङ्लटितशब्दप्रयोगरूपा प्रेरणापरपर्याया प्रवर्तनैव विध्यर्थः। तया चेष्टसाधनत्वमाक्षिप्यते। तत्तः प्रवृत्तिः। अत्र च "हेतुमति च" इति सूत्रस्थं भाष्यं मानम्। तत्र हि "पृच्छतु मा भवान्" इत्यत्र णिचमाशङ्क्य "अकर्तृत्वात्" इति समाधाय "अथापि कथञ्चित्कर्ता स्यादेवमपि न दोषः। लोटोक्तत्वाद् णिज् न भविष्यति" इत्युक्तम्। इष्टसाधनत्वस्य विध्यर्थत्वे तदसङ्गतिरेव, इष्टसाधनत्वे णिचोऽविधानात्" इत्यभिप्रैति। स्पष्टमधिकमन्यत्र। दर्पणकारास्तु नागेशाशयस्यायुक्ततां तदुदाहृतभाष्यस्यान्याशयकत्वं च प्रदर्शयन्तः अन्ते "वस्तुतस्तु" इत्यादिना नागेशाशयमेव स्वाशयत्वेन प्रादर्शयन्। तादृशं तेषां शिष्यदन्भ्रणं दृष्ट्वा न व्यामुह्येयुरिति सहृदयान् दोषज्ञानभ्यर्थये। अत्रत्यं तत्त्वं मदीये मञ्जूषाव्याख्याने नागेशभावप्रकाशे प्रत्यपीपदम्, तत्तु तत एवावधार्यम्। विस्तरभयान्नेह प्रतन्यते।

अत्रेदं बोध्यम् - प्रवर्तनाया विध्यर्थत्वमित्यस्य शाब्दभावनायाः प्रत्ययार्थत्वमित्यर्थः। तेनाऽऽर्थभावनाया धात्वर्थत्वमेव, मीमांसकानां तूभयस्यापि प्रत्ययार्थत्वमिति विशेषः, परंतु मीमांसकमतमयुक्तमिति प्राक् प्रतिपादितमेवेति। आदिना = "ह्यो भूते प्रेरणादौ च" इत्यादिकारिकायां 'प्रेरणादौ' इत्यादिपदेन। [यो ब्राह्मणायेति] बृहस्पतिपुत्रेण शंयुना देवान् प्रति वरोऽभ्यर्थितः - किं मे प्रजया इति। ब्राह्मणत्वेन मत्सजातीयायाः प्रजाया ब्राह्मणजातेः किमभीष्टं दातुं भवन्तो मन्यन्ते इति तदर्थः। एवं पृष्टे सति "योऽपगुरातै शतेन यातयात्" इत्यादयो वरा देवैर्ब्राह्मणजातये दत्ताः। स्पष्टं चें तत्तिरीयसंहितायां द्वितीये काण्डे षष्ठे प्रश्ने दशमेऽनुवाके। ब्राह्मणायेत्यत्र द्वितीयार्थे चतुर्थी। [अपगुरातै इति] अपपूर्वकाद्गुरी = उद्यमने इति तौदादिकादनुदात्तेतो लिङर्थे लेटि प्रथमपुरुषैकवचने टित एत्वे "वैतोऽन्यत्र" ३-४-९६ इत्येकारस्यैत्वे "लेटोऽडाटौ" ३-४-९४ इत्याडागमे रूपमिदम्। अपगुरेतेत्यर्थः। अपगोरणं = ताडनाय दण्डोद्यमानम्। [यातयादिति] यत धातोर्णिजन्ताल्लेटि "इतश्च लोपः परस्मैपदेषु" ३-४-९७ इतीकार लोपः। यातयेदित्यर्थः। "योनिहन् सहस्रेण यातयात्, यो लोहितं करवद्यावतः प्रस्कद्य पाँसून् सङ्गृह्णात्तावतः संवत्सरान् पितृलोकं न प्रजानात्" इति प्रकृतिश्रुतिशेषो

बोध्यः। यत्र द्वयोर्धात्वर्थयोर्हेतुहेतुमद्भावः प्रतिपिपादयिषितस्तत्र विनिगमनाविरहादुभाभ्यामपि धातुभ्यां लिङादीनां प्रवृत्तिः। प्रकृते यत्कर्तृको ब्राह्मणवधोद्यमस्तत्कर्मिका तादृशवधोद्यमजन्या यमदूतकर्तृका शतयातनेति बोधः।

लुङर्थमाह [भूतमात्रे इति] भूतसामान्य इत्यर्थः। "भूते" इत्यधिकृत्य "लुङ्" इति सूत्रात्। अत्र विद्यमानध्वंसप्रतियोगित्वं भूतत्वम्। तच्च क्रियायां निर्बाधमिति, विद्यमानेऽपि घटे 'घटोऽभूत्' इति प्रयोगः। विद्यमान ध्वंसप्रतियोगी घटाभिन्नाशयक उत्पत्त्यनुकूलो व्यापार इति बोधः।

अयमत्र सङ्ग्रहः - कालो द्विविधः। अद्यतनोऽनद्यतनश्च। आद्यस्त्रिविधः, भूतभविष्यद्वर्तमानभेदात्। अन्त्यो द्विविधः - भूतो भविष्यंश्च। तत्र वर्तमानत्वे लट्। भूतत्वमात्रे लुङ्। भविष्यत्तामात्रे लृट्। हेतुहेतुमद्भावाद्यधिकार्थविवक्षायामनयोर्लृङ्। अनद्यतने भूतत्वेन विवक्षिते लङ्। तत्रैव परोक्षत्वविवक्षायां लिट्। तादृशे भविष्यति लुडिति द्रष्टव्यः।

लृङर्थमाह [सत्यामिति] क्रियाया अतिपत्तिः = अनिष्पत्तिस्तस्यां गम्यमानायां भूते भाविनि हेतुहेतुमद्भावे सति लृङित्यर्थः। "लिङ् निमित्ते लृङ् क्रियातिपत्तौ" इति सूत्रात्। लिङो निमित्तं हेतुहेतुमद्भावादि। यथा - सुवृष्टिश्चेदभविष्यत् सुभिक्षमभविष्यत्। वह्निश्चेत्प्राज्वलिष्यद् ओदनमपक्ष्यदित्यादौ। अत्र वह्न्यभिन्नाश्रयक्प्रज्वलानानुकूल-व्यापाराभावप्रयोज्य ओदनाभिन्नाश्रयकविक्लित्त्यनुकूलव्यापाराभाव इति शाब्दबोधः। एवंरीत्या द्रष्टव्यम्।

अयं चार्थनिर्देश उपलक्षणय्। अर्थान्तरेऽपि बहुशो विधानदर्शनात्। प्रसिद्धत्वादेष्वेवार्थेषु शक्तिरन्यत्र लक्षणेति मतान्तररीत्या वोक्तम्।

एतेषां क्रमनियामकश्चानुबन्धक्रम एव। अत एव 'पञ्चमो लकार' इत्यनेन मीमांसकैर्लेट् व्यवह्रियत इति दिक्।। ।।२३।।

इति वैयाकरणभूषणसारे लकारविशेषार्थ
निरूपणं समाप्तम्।।२।।

मात्रपदं कृत्स्नार्थकमित्याशयेनाह [भूतसामान्य इति] तद्विशेषविवक्षायां तु लङादिरेवेति भावः। तच्च = भूतत्वं च। [प्रयोग इति] घटस्य विद्यमानत्वेऽपि तदुत्पत्तेर्ध्वस्ततया निरुक्तप्रयोग उपपद्यत इति भावः। तिङर्थकालस्य कर्त्रादावन्वये तु प्रकृतप्रयोगानिर्वाह एवेत्याशयः।

शिष्यबुद्धिवैशद्यायाह [अयमत्रेति] भविष्यत्तामात्रे = तत्सामान्ये। तत्रैव = अनद्यतन एव।

अनिष्पत्तिः = साधनवैकल्यान्नियताऽनुत्पत्तिः। [भूते इति] "भूते च" ३-३-१४० इति निरुक्तार्थे लृङ् विधीयते। तत्सूत्रे "लिङ्निमित्ते लृङ् क्रियातिपत्तौ" ३-३-१३९ इति संपूर्णसूत्रमनुवर्तत इति भावः। [भाविनीति] भविष्यति चेत्यर्थः। "लिङ् निमित्ते" ३-३-१३९ इति सूत्रे "भविष्यति मर्यादावचनेऽवरस्मिन्" ३-३-१३६ इत्यतो भविष्यतीत्यनुवृत्तेरित्याशयः। [इति सूत्रादिति] इत्याकारकसूत्रे भविष्यति, इत्येत्सत्रसम्बद्धाद् "भूते च" इति सूत्राद्भूते चेत्यर्थः। कालद्वयेऽपि लुङ एकमेवोदाहरणं दर्शयति [सुवृष्टिरिति] भविष्यति काले उदाहरणवाक्यार्थः स्पष्ट एव। भूतकाले लङि त्वयमर्थः - सुवृष्टिर्यदि जाता तर्हि सुभिक्षं जातं भवेत्, सुवृष्टिर्नासीत्, तद्धेतुकं सुभिक्षमपि न जातमिति। एवं दृष्टे मया त्वतपुत्रोऽन्नार्थी चङ्क्रम्यमाणः, अतश्च भोक्तारं मार्गयमाणश्चङ्क्रमाणो दृष्टः। स तेन दृष्टोऽभविष्यत्, तदाऽभोक्ष्यत्" इत्यप्युदाहरणं भूते क्रियातिपत्तौ लुङः। नतु भुक्तवान्, अन्येन पथा स गत इत्यर्थावगमात् क्रियातिपत्तिरवगम्यते। एवं "दक्षिणेन चेदायास्यन्न शकटं पर्याभविष्यत्। यदि कमलकमाह्वास्यन्न शकटं पर्याभविष्यत्" इत्याद्यपि भविष्यति क्रियातिपत्तौ लुङ उदाहरणं भवितुमर्हति। कमलको नाम कश्चन पुरुषः, स शकटादीनां विषमेष्वपि स्थानेषु मुसलाद्यवष्टम्भयोगेन नेता। पर्याभवनं = भङ्गः। स्पष्टं चेदं वृत्तिपदमञ्जर्योः, हेलाराजीये च। कालद्वयसाधारणमुदाहरणान्तरं दर्शयति [वह्निश्चेदिति] क्रियातिपत्तेरभिव्यञ्जनाय बोधं दर्शयति [अत्रेति] अयं बोधोऽपि कालद्वसाधारणलुङर्थपर एव। दर्पणकारास्तु "धात्वर्थयोर्भविष्यत्त्वप्रदर्शनार्थं परमभावविशेष्यकबोधोत्कीर्तनम्" इति वदन्तो मूलोक्तमुदाहरणं भविष्यति लुङ इत्यभिप्रयन्तीति स्पष्टमवगम्यते। अत एव तैः "एवं भूते -

परस्परेण स्पृहणीयशोभं नचेदिदं द्वन्द्वमयोजयिष्यत्।
अस्मिन् द्वये रूपविधानयत्नः पत्युः प्रजानां विफलोऽभविष्यत्।।

"मय उञो वा" इत्यवक्ष्यत्, यणं चान्वर्तिष्यदित्यादि बोध्यम्" इति प्रत्येकमुदाहृतम्। मूलोक्तमुदाहरणं कालद्वयसाधारणमिति प्रामाणिकग्रन्थस्वरसः। बोधप्रकारमन्यत्राप्यतिदिशति [एवं रीत्येति] नन्वेवं कथमेतेष्वेवार्थेषु निर्भरः, "यजति स्म युधिष्ठिरः" इत्यादिष्वर्थान्तराणामपि दर्शनात्। नच तत्र लक्षणेति वाच्यम्, वैपरीत्यापत्तेः, शक्तिनिर्णये वक्ष्यमाणरीत्या तस्या असत्त्वाच्चेत्यत आह [अयञ्चार्थनिर्देश

इति] "वर्तमाने परोक्षे श्वो भाविनि" इत्यादिकारिकाद्वयोक्तोऽर्थनिर्देश इत्यर्थः। [उपलक्षणमिति] दिक्प्रदर्शनमात्रमित्यर्थः। एतेष्वेवार्थेषु लडादय इति ननिर्भर इति भावः। अर्थान्तरेऽपि = कालरूपार्थान्तरेऽपि, कालान्तरेऽपीति यावत्। [विधानदर्शनादिति] लडादीनां मूलोक्तरीत्या वर्तमानादिकालोपाधिकतया प्रवृत्तिलाभेऽपि तेषां तन्मात्रार्थकत्वमेवेति नियमो न। "अभिज्ञावचने लृट्" "लट् स्मे" "यावत्पुरानिपातयोर्लट्" इत्यादिभिर्विधिभिः कालान्तरेऽपि विधानदर्शनादिति भावः। एवं च "सर्वे सर्वार्थवाचकाः" इत्यभ्युपगमाल्लडादीनां वर्तमानभूतादि सर्वार्थकत्वमस्त्येव, परं तु तत्तदर्थेषु साधुत्वाख्यापकं "वर्तमाने लट्" "परोक्षे लिट्" इत्यादि व्याकरणं, नतु शक्तिपरिच्छेदकम्। तथाचार्थान्तरे सत्यनुशासने साधुत्वमिष्टमेव। मूलं त्वेतद्दिक्प्रदर्शनमात्रपरमिति तात्पर्यम्।

"सर्वे सर्वार्थवाचकाः" इत्यस्यानभ्युपगमे आह [प्रसिद्धत्वादिति] एतेन वैपरीत्यशङ्का निरस्ता। एष्वेव = कारिकानिर्दिष्टेषु अपरोक्षे लिट् इत्यादिष्वन्येष्वर्थेषु। उक्तम् = कारिकाग्रन्थे। स्पष्टं चेदं भूषणे ।

ननु कारिकायां "क्रमाज्ज्ञेया लडादयः" इत्युक्तम्। तत्र क्रमनियामकः कः? इत्यपेक्षायामाह - [क्रमनियामक इति]। [अनुबन्धक्रम एवेति] तथाच वर्णसामाम्नायक्रमेणोक्ता अकारादयोऽनुबन्धा एव क्रमनियामका इति भावः। उक्तार्थे मीमांसकसंवादमपि दर्शयति [अत एवेति] अकाराद्यनुबन्धानां क्रमनियामकत्वादेवेत्यर्थः। [दिगिति] "सर्वे सर्वार्थ" इत्यनभ्युपगमेन लक्षणा स्वीकृता, परंतु नैयायिकमीमांसकादिभिः 'घटं जानाति' इत्यादावाख्यातस्याऽऽश्रयत्वे तत्र तत्र स्वीकृताऽनुशासनविरुद्धा लक्षणा न साधुत्वसम्पादिकेति तदर्थः। स्पष्टं चेदं भूषणे।। ।।२३।।

इति भूषणसार तत्त्वदर्शिन्यां

लकारार्थनिर्णयः।।२।।

अथ सुबर्थनिर्णयः

सुबर्थमाह -

आश्रयोऽवधिरुद्देश्यः सम्बन्धः शक्तिरेव वा।
यथायथं विभक्त्यर्थाः सुपां कर्मेति भाष्यतः।।१।। (२४)

द्वितीयातृतीयासप्तमीनामाश्रयोऽर्थः। तथा हि - "कर्मणि द्वितीया"। तच्च कर्तुरीप्सिततमं क्रियाजन्य फलाश्रय इत्यर्थः। क्रियाजन्यफलवत्त्वेन कर्मण एव कर्तुरीप्सिततमत्वात्।

सुबर्थनिर्णयः

"सर्वं नाम च धातुजम्" इति निरुक्तान्नाम्नो मूलभूतधातोस्तत्प्रकृतिकतिङ्प्रत्ययानां चार्थनिर्णयानन्तरं वक्तव्यत्वरूपावसरसङ्गत्या सुपः पदत्वसम्पादकतया क्रियया कारकस्याऽऽकाङ्क्षितत्वेन च स्मृतत्वात्सुबर्थनिरूपणमित्याह [सुबर्थमाहेति] कारिकायाम् [आश्रय इति] कर्मणि द्वितीयायाः, कर्तृकरणतृतीयायाः कर्तृकर्मषष्ठ्या अधिकणसप्तम्याश्चाश्रयोऽर्थः। अवधिः पञ्चम्यर्थः। उद्देश्यः संप्रदानचतुर्थ्यर्थः। सम्बन्ध उपपदविभक्तीनां शेषषष्ठ्याश्चार्थः। एवं शक्तिमत्कारकमिति पक्षे सुबर्थमुक्त्वा शक्तिः कारकमिति पक्षे आह [शक्तिरेव वेति] कारकविभक्तीनां कर्तृत्वादिशक्तिरेवार्थ इत्यर्थः। [यथायथमिति] "यथास्वे यथायथम्" ८-१-१४ इति सूत्रेण यथास्वेऽर्थे यथा शब्दस्य द्वित्वं क्लीबत्वं च तिपात्यते। यथास्वमिति वीप्सायामव्ययीभावः। योऽयमात्मा यच्चात्मीयं तद्यथास्वं, तत्तद्विभक्तीनां यद्यदात्मीयमर्थस्वरूपं तद्यथायथं विभक्त्यर्थ इत्यर्थः। [भाष्यत इति] यद्यपि "सुपां कर्मादयोऽप्यर्थाः" इति वार्तिकं, तथापि "सुपां कर्मेति" इति मूलस्य सुपां कर्मेति वार्तिकस्येत्यर्थः। तथा च वार्तिकभाष्योभयसिद्धतापीति भावः। व्याख्यानव्याख्येययोरभेदाभिप्रायेणेदमुक्तमित्यन्ये। स्पष्टं चेदं द्वयमपि भूषणे।

[सप्तमीनामिति] इद मुपलक्षणं कर्तृकर्मणोः षष्ठ्या अपि। ननु "कर्मणि द्वितीया" २-३-२ इत्याद्यनुशासनबलाद् द्वितीयादीनां कर्माद्यर्थकत्वं लभ्यते, नाश्रयार्थकत्वमनुशासनाभावादित्याशङ्कायामाह [तथाहीति]। [कर्मणि द्वितीयेति] कर्मणि द्वितीयेत्याकारकसूत्रेण कर्मरूपेऽर्थे द्वितीयेत्यर्थः। तच्च = कर्म तु। [कर्तुरीप्सिततममिति] अत्र "कर्तुरीप्सिततमं कर्म" २-४-४९ इति सूत्रं मानम्। सूत्रे

कर्तुरित्यत्र "क्तस्य च वर्तमाने" २-३-६७ इति कर्तरि षष्ठी। नचैवं घटो घट इतिवत्प्रकृत्यर्थकर्तुः प्रत्ययार्थकर्त्राऽभेदान्वयो न स्यादिति वाच्यम्। हरिं पश्यतीत्यादिप्रयोगसमवायिधात्वर्थकर्तुः प्रकृत्यर्थत्वेनाप्नोतिकर्तुः प्रत्ययार्थत्वेन तयोर्भेदेनाऽनुपपत्तेरभावात्। ईप्सिततममित्यत्राप्नोतेः सन्नन्तात्कर्मणि "मतिबुद्धिपूजार्थेभ्यश्च" ३-२-१८८ इति वर्तमाने क्तः, ततस्तमप्। मतिबुद्धीत्यादिसूत्रे मतिशब्द इच्छापरः, पुनर्बुद्धिग्रहणात्। क्तप्रत्ययेनोपस्थितं वर्तमानत्वं नेह विवक्षितम्। तेन कटं कृतवान्, कटं करिष्यतीत्यादि सिद्ध्यति। अत्राप्नोतेः सम्बन्धमात्रमर्थः। ननु व्याप्तिरेव, सा हि अवच्छेदकावच्छेदेन सम्बन्धः, सेनया ग्रामो व्याप्त इत्यादौ तथा प्रतीतेः। तथाचेप्सितमित्यस्य सम्बद्धमित्यर्थः सनस्तमपश्चार्थोऽविवक्षित एव। आप्नोत्यर्थस्य करणाकाङ्क्षायां सूत्रोपात्त कर्तृपदार्थविशेषणीभूतफलानवच्छिन्नव्यापारेऽन्वेति। सम्बन्धश्चात्र जन्यता रूपः, जन्याश्रयतारूपश्च। एवं च कर्त्रा स्वनिष'व्यापारेण जन्यत्व - जन्याश्रयत्वान्यतरसम्बन्धेन सम्बद्धं कारकं कर्मसंज्ञं त्यादिति सूत्रार्थः संपद्यते। तेन कर्तृनिष्ठव्यापारजन्यस्य विक्लित्त्यादिफलस्य, तादृश व्यापारजन्यविक्लित्त्याश्रयतण्डुलादेश्च कर्मत्वं सिद्ध्यति। स्पष्टश्चायमर्थः शब्दरत्नव्याख्याने भावप्रकाशे। "अनुग्वलं गामी" ५-२-१५ इति सूत्रे मनोरमायामपि प्रकृत्यर्थभावनामात्रं प्रति विक्लित्त्यनुकूलव्यापाररूपं संपूर्णं प्रकृत्यर्थं प्रति च क्रमत्वमिति रीत्या द्वेधा कर्मत्वं प्रतिपादितम्।

यत्तु आप्नोत्यर्थस्य करणाकाङ्क्षायां कारकाधिकाराद्धात्वर्थव्यापारस्य करणत्वेनान्वयः। स च धात्वर्थो व्यापारमात्रमिति सङ्कोचे मानाभावात्फलावच्छिन्नव्यापाररूपः संपूर्णधात्वर्थ एव। एवं च फलस्य कर्मत्वं सूत्राक्षरमर्यादया न लभ्यत इति।

तन्न। प्रकरणात्श्रुतेर्बलवत्त्वेन प्राकरणिककारकाधिकारात्तादृशार्थकल्पनापेक्षया श्रौतसूत्रोपात्तकर्तृपदार्थविशेषणीभूतफलानवच्छिन्नव्यापारस्यैव करणत्वेनान्वयमाश्रित्य निरुक्तार्थस्वीकारस्यैव युक्तत्वात्। सूत्रे चेप्सितशब्दो निरुक्तरीत्या यौगिक एव, नत्वभिप्रेतपरो रूढः। स्पष्टं चेदं प्रकृतसूत्रे भाष्ये। तत्र हि "दध्नौदनं भुङ्क्ते, पयसौदनं भुङ्क्ते इत्यादौ दध्यादेरीप्सित्वेन कर्मत्वं प्राप्नोति" इत्याशङ्क्य "तस्याप्योदन एवेप्सिततमः। नतु गुणेष्वस्यानुरोधः। तद्यथा - भुञ्जीयाहमोदनं, यदि मृदु विशदः स्यात्। एवमिहापि दधिगुणमोदनं भुञ्जीय। पयोगुणमोदनं भुञ्जीयेति" इत्युक्तम्। सूत्र ईप्सितशब्दोऽभिप्रेतपरो रूढ इत्याशयेन शङ्का। "तस्याप्योदन एव" इत्युत्तरं तु क्रियाशब्दोऽयं न रूढ इत्याशयेन। स्पष्टं चेदमुद्द्योते। अत एव तद्योगे कर्तुरिति कर्तरि षष्ठीसिद्धिः। एवं च चैत्रादिनिष्ठक्रियाजन्यविक्लित्त्यादेः

फलस्य, तादृशक्रियाजन्यविक्लित्त्यादिफळाश्रय तण्डुलादेश्च कर्मत्वं कर्तुरीप्सिततमं कर्मेति सूत्रेणैव सेत्स्यति। नच विक्लित्त्यादेः फलस्य निरुक्तरीत्या क्रिययेप्सितत्वेऽपि कारकत्वाभावात्कथं कर्मत्वमिति वाच्यम्। फलस्यापि क्रियाजनकत्वात्। तज्ज्ञानपूर्वकं क्रियोत्पादनात्। एवं च ज्ञानगतजनकत्वस्य फल आरोपात्क्रियाजनकत्वरूपकारकत्वं तस्य निराबाधमेव।

नच महता प्रयासेन फलस्य कर्मत्वसंपादनं वृथा, फलाभावात्, तद्वाचकस्य धातोरप्रातिपदिकत्वेन ततो द्वितीयादेरप्राप्तेरिति वाच्यम्। धात्वर्थफलस्य कर्मत्वे तत्समानाधिकरणस्य स्तोकादेरपि कर्मत्वात् स्तोकं पचतीत्यादौ स्तोकादेर्द्वितीयाप्रवृत्तेः फलस्य सुवचत्वात्। एवं च धात्वर्थफलस्य कर्मत्वं निरक्तरीत्या "कर्तुरीप्सिततमं कर्म" इति पाणिनिसूत्राक्षरैः शब्दशक्त्या लभ्यत एव। अत एव "पूजानात्पूजितमनुदात्तम्" ८-१-६७ इति सूत्रे भाष्ये "पूजनात्पूजिते मलोपश्च वक्तव्यः। दारुणाध्यापकः, दारुणाभिरूपः इत्युक्तम्। क्रियाविशेषणं दारुणशब्दो द्वितीयान्तः। वैयधिकरण्यात्समासाभावान्मलोपो विधीयते" इति कैयटः। दारुणं यदध्यापनं तत्कर्तेत्यर्थः। वृत्तौ दारुणादयः पूजार्थकाः। एवं च दारुणपदार्थस्य द्रव्यवाचिना सामानाधिकरण्याभावाद्विशेषणस्याप्रवृत्त्या स्कोकं पाक इतिवद्दारुणमध्यापाक इति प्राप्ते दारुणाध्यापक इत्यस्य सिद्धये मलोपवचनमारब्धम्। स्पष्टं चेदमुद्द्योते। एतेन दारुणाध्यापक इत्यादौ विशेषणसमासे विभक्तिलोपेन सिद्धे किं मलोपवचनेनेति शङ्का परास्ता। एतद्भाष्यात्क्रियाविशेषणानां समासाभावोऽपि लभ्यते। स्पष्टं चेदं कर्तृकर्मणोरिति सूत्रे शेखरे।

अनया रीत्या फलस्य कर्मत्वप्रतिपादनं सकर्मकधातुस्थल एव। तत्रैव तत्सम्भवात्। फले व्यापारवैयधिकरण्यस्य तत्रैव सम्भवाच्च। अकर्मकधातुस्थले निरुक्तरीत्या फलस्य कर्मत्वासम्भवात्तद्विशेषणे प्रथमैव, न द्वितीया सकर्मकेऽपि फलस्य कर्मत्वात्तद्विशेषणाद् द्वितीया। व्यापारविशेषणात्तु प्रथमैव। धात्वर्थस्य करणत्वेनान्वये तु तत्समानाधिकरणे तृतीयैव। यथा - तृप्तिकामः स्तोकेनौदनं पचतीत्यादौ। तृप्ति विषयकामनावत्कर्तृकः स्तोकविक्लित्तिकरणक ओदनकर्मकः पाक इति बोधः। स्पष्टं चेदं "सामान्ये नपुंसकम्" इत्यत्र तत्पुरुषशेखरे।

ननु "द्वितीयान्तादस्माद्वर्तत इत्यर्थे 'क् स्यात्, क्रियाविशेषणत्वाद् द्वितीयेति "तत्प्रत्यनुपूर्वमीपलोमकूलम्" ४-४-२८ इति सूत्रस्थ कौमुदीग्रन्थात् "हतशायिकाः शय्यन्ते यादृशानि हतानां शयनानि तत्सदृशानि देवदत्तादिभिः क्रियन्त इत्यर्थः। शायिका इति क्रियाविशेषणत्वाद् द्वितीयाबहुवचनान्तम्" इति यग्विधायकसूत्रस्थकौस्तुभमनोरमाग्रन्थस्वारस्याच्चाकर्मकधातुस्थलेपि

क्रियाविशेषणानां द्वितीयान्तत्वमेव लभ्यत इति चेत्, न। तद्ग्रन्थानां वृत्तिपदमञ्जरीग्रन्थानुरोधितया तेषां निरुक्तार्थतात्पर्याभावात्। वामनहरदत्तौ हि सकर्मकार्मकधातुविभागमन्तरा धातुसामान्ये क्रियाविशेषणानां कर्मत्वेन द्वितीयान्तत्वमङ्गीकुर्वाते। तथाहि - "तत्प्रत्यनुकूलमीपलोमकुलम्" ४-४-२८ इति सूत्रे वृत्तिकार एवमाह "तदिति द्वितीया समर्थविभक्तिः। द्वितीयासमर्थेभ्यो वर्तत इत्यर्थे 'क् प्रत्ययो भवति। ननु च वृतिरकर्मकः, तस्य कथं कर्मणा सम्बन्धः? क्रिया विशेषणमकर्मकाणामपि कर्म भवति" इति। अत्र हरदत्तः - "क्रियाविशेषणमित्यादि आख्यातं हि धात्वर्थस्य कर्तव्यतामाचष्टे। वर्तते = वर्तनं करोति। सुप्यते = स्वापः क्रियते। शोभनमोदनः पच्यते = ओदनकर्मकः पाकः शोभनः क्रियते। पचिधात्वर्थः कर्तव्य एव सम्बध्यमानः कर्म सम्बध्यमानः संपद्यते। तस्य यत्समानाधिकरणं विशेषणं तदपि कर्मैव भवति" इति।

काशिकापदमञ्जरीकारयोरयमाशयः - संप्रदानसंज्ञासूत्रे "क्रियया यमभिप्रैति सोऽपि संप्रदानम्" इति वार्तिकं "क्रियापि कृत्रिमं कर्म। क्रियापि हि क्रिययेप्सिता भवति। कया क्रियया? संदर्शनादिक्रियया" इति भाष्यकारेण प्रत्याख्यातम्। पत्ये शेत इत्यादेः संदर्शनप्रार्थनारम्भपूर्वकं शयनं करोतीत्यर्थः। तेन संदर्शनप्रार्थनव्यवसायजन्यारम्भणक्रियानिरूपितकर्मत्वस्य शयनक्रियायां सत्त्वेन सूत्रेणैव पत्युः संप्रदानत्व सिद्धिरिति भाष्याशयः। पतिसंप्रदानक मारम्भकर्मभूतं पत्नीकर्तृकं शयनमिति बोधः। तद्रीत्या वर्तते सुप्यते पच्यत इत्यादौ करोति क्रियानिरूपितं कर्मत्वं वर्तनस्वापपाकादीनां सिद्ध्यति। तेन तत्समानाधिकरणविशेषणस्यापि कर्मत्वलाभः। एषा रीतिरकर्मकसकर्मकधातु विभागमन्तरा सर्वधातुविषयिका। अतो धातुमात्रसमभिव्याहारे क्रियाविशेषणाद् द्वितीया। सापि कर्मत्वनिमित्तिका। धात्वर्थस्य करणत्वेन विवक्षायां तु तत्समानाधिकरणे तृतीया। यथा - "ज्योतिष्टोमेन यजेत" इत्यादौ। अकर्मके सकर्मके च शयनक्रियाया इव संपूर्णधात्वर्थस्य करोत्यादिक्रियानिरूपितं कृत्रिमं कर्मत्वम्। तत्समानाधिकरणविशेषणस्यापि तत्त्वाद् द्वितीया। नतु कदाचिदपि क्रियाविशेषणात्प्रथमेति।

एतादृशं वृत्तिकारमतमाश्रित्य दीक्षितग्रन्थाः प्रवृत्ताः। अतस्तद्बलेनाकर्मकधातुस्थलेऽपि क्रियाविशेषणाद् द्वितीयां प्रत्याशा न कार्या। एतदाशयेनैव "तत्प्रत्यनुपूर्वमीपलोमकूलम्" इति सूत्रे "क्रियाविशेषणत्वाद् द्वितीया" इति कौमुदीप्रतीकमुपादाय "अकर्मकधातुस्थलेऽपि फलव्यापारयो र्धात्वर्थत्वेन फलसामानाधिकरण्याद् द्वितीयेति भावः। क्रियाविशेषणत्वान्नपुंसकत्वं प्रथमान्तत्वं च युक्तम्" इति तद्धितशेखरे नागेशेनोक्तम्। अकर्मकस्थलेऽपि क्रियाविशेषणानां कर्मत्वमिति

वृत्तिकाराशयप्रदर्शनपरः "इति भावः" इत्यन्तः शेखरग्रन्थः। फलेन = व्यापारसमानाधिकरणेन करोतिक्रियानिरूपितकर्मत्ववता वर्तनरूपेण (धात्वर्थेन) सामानाधिकरण्यात्, द्वितीया = प्रतीपादेरपि कर्मत्वाद् द्वितीयेति शेखरार्थः।

यत्तु "फलसामानाधिकरण्यात्" इति शेखरप्रतीके भैरवमिश्राः "फलस्य व्यपदेशिवद्भावेन फलाश्रयत्वात्कर्मत्वम्" इति। तन्न। वृत्तिकारादिभिर्धात्वर्थफलाश्रयस्य व्यपदेशिवद्भावेन फलाश्रयत्वात्कर्मत्वानङ्गीकारात्। वर्तते सुप्यते पच्यत इत्यादौ वर्तनस्वापपाकादेः करोतिक्रियानिरूपितकर्मत्वस्यैव तैः स्वीकारात्। नागेशमतरीत्यापि चन्द्रकला न युक्ता, सकर्मकधातुस्थल एव नागेशेन फलस्य कर्मत्वस्वीकारात्, वृतेरकर्मकत्वात्। अतो मदुक्तिरेव युक्ता।

एवं वृत्तिकारमतं प्रदर्श्य स्वसिद्धान्तप्रदर्शनपरः - क्रियाविशेषणत्वान्नपुंसकत्वं प्रथमान्तत्वं च युक्तम्" इति शेखरग्रन्थः। अकर्मकस्थले फले व्यापारवैयधिकरण्याभावात्कर्मत्वाभावेन तत्समानाधिकरणस्यापि तत्त्वाभावान्न द्वितीया, किन्तु प्रातिपदिकार्थमात्रे प्रथमैवेति तदाशयः।

अत एव "सार्वधातुके यक्" इति सूत्रे "हतशायिका इति क्रियाविशेषणं प्रथमान्तम्" इत्युद्द्योते नागेशेनोक्तम्। शेतेरकर्मकत्वात्।

अकर्मकस्थलेऽपि क्रियाविशेषणं द्वितीयान्तमेवेति वृत्तिकारमतमाश्रित्यैव "परिपन्थं च तिष्ठति" ४-४-३६ इति सूत्रे "तिष्ठतिक्रियाविशेषणत्वाद् द्वितीया" इति शेखरे नागेशेनोक्तम्।

एवं चाकर्मकसकर्मकविभागं फलव्यापारान्यतरान्वयविभागं चानपेक्ष्य क्रियाविशेषणस्य कर्मत्वाद् द्वितीयैव प्रवर्तते, नतु प्रथमेति वृत्तिपदमञ्जरीकारयोराशयः। सकर्मकधातुस्थले फलेऽन्वये क्रियाविशेषणानां कर्मत्वाद् द्वितीया, तत्रैव व्यापारान्वये तद्विशेषणानां कर्मत्वाभावान्न द्वितीया, किन्तु प्रथमैव। अकर्मकधातुस्थलेषु फलस्याकर्मतया तद्विशेषणाना मप्यकर्ततया न द्वितीया, किन्तु प्रथमैवेति दीक्षितनागेशयोराशयः। धात्वर्थस्य करणत्वेन विवक्षायां तु तद्विशेषणेभ्यः सर्वेषामपि मते तृतीयैवेति निर्गलितोऽर्थः। अस्मिन्नर्थे दीक्षितनागेशयोरैककण्ठ्यमेव। अत एव दीक्षितोऽपि "अन्यथा तु प्रथमैव" इति करोतिक्रियानादरेण प्रथमामेव तत्पुरुषमनोरमायाम् "अव्ययीभावश्च" इति नपुंसकविधायकसूत्रे कौस्तुभे चाङ्गीचकार। अत एव दीक्षितस्तत्रैव धात्वर्थफलांशस्य भावनां प्रति कर्मत्वं प्रतिपादयामास। वृत्तिकारपदमञ्जरीकारयोर्मतापेक्षया दीक्षितनागेशाशयोर्विभिन्न एवेति स्पष्टमवभासते तत्पुरुषमनोरमाशब्दरत्नग्रन्थयोः।

ननु संप्रदानसंज्ञासूत्रस्थ भाष्यानुगृहीतत्वेन व्यवहृतं वृत्तिकारादीनां मतं दीक्षतनागेशौ किमर्थमुपेक्षेते इति चेत्, श्रृणु - सकर्मकेषु फलान्वये क्रियाविशेषणाद् द्वितीया, व्यापारान्वये प्रथमेति व्यवस्था तन्मते नोपपद्यते। तैः करोतिक्रियापेक्षया विशिष्टस्य पच्याद्यर्थस्य कर्मत्वस्वीकारात्। न च व्यापारविशेषणता नास्तीति वक्तुं शक्यम्। मन्दं गच्छति, कुटिलं गच्छति, भक्तिपूर्वं सोमेन यजेतेत्यादौ व्यापारविशेषणत्वमन्तरा गत्यभावात्। अत एव "न शिक्षितस्त्वया तेन मन्दं गच्छति वारणः" इत्यादौ "सपूर्वायाः प्रथमाया विभाषा" ८-१-२६ इति विकल्पसिद्धिः।

एतेन नपुंसके प्रथमाद्वितीययो रूपभेदाभावादियं व्यवस्था निष्फलेति वदन्तः परस्ताः। नियतलिङ्गे "सामान्ये नपुंसकम्" इत्यस्याप्रवृत्त्या फलान्वये आदिं पचतीति, व्यापारान्वये आदिः पचतीति रूपवैलक्षण्यस्य सत्त्वाच्च। स्पष्टं चेदं तत्पुरुषप्रकरणान्ते मनोरमाशेखरयोः। एवं च वृत्तिकारादिमते सकर्मकस्थले व्यापारान्वये क्रियाविशेषणानां प्रथमान्तत्वानापत्तिर्दोषः। एवमकर्मकेषु तेषां तत्त्वानापत्तिश्च दोषः।

किञ्च संदर्शनप्रार्थनाव्यवसायारम्भणानां प्रवृत्तिमात्रे नान्तरीयकतया सत्त्वेऽपि यत्र तद्बोध आनुभविकस्तत्रैव तन्निरूपितं कर्मत्वं क्रियायां संपादनीयम्। अन्यथा कटं करोतीत्यत्रापि कटाय करोतीत्यापत्तेः। तत्र हि कटकर्मिका क्रियेत्येव बोधोऽनुभूयते। नतु तस्याः क्रियाया विद्यमानमपि सन्दर्शनादिपूर्वकारम्भणकर्मत्वं तत्तद्रूपेण बोधविषयः। स्पष्टं चेदं संप्रदानसूत्रे प्रदीपोद्द्योतयोः। प्रतीपं वर्तते = वर्तनं करोति, सुप्यते = स्वापः क्रियते, पच्यते पाकः क्रियत इति तत्तद्रूपेण बोधो नानुभूयते। अतः करोत्यादिक्रियानिरूपितं कर्मत्वं वर्तनस्वापपाकादेर्न सिद्ध्यति। अतो वृत्तिपदमङ्गरीकारयोराशयो न ग्राह्य एवेत्यलं स्वगोत्रकलहानुवर्णनेन।

एवं कर्तुरीप्सिततमं कर्मेति सूत्रस्य कर्तुः क्रियया आप्तुं = सम्बन्धुमिष्टतमं कारकं कर्मसंज्ञं स्यादित्यर्थः। सम्बन्धश्च जन्यत्वरूपः जन्याश्रयत्वरूपो वा। आद्यमादाय धात्वर्थफलस्य, द्वितीयमादाय तण्डुलादेश्च कर्मत्वं सिद्धम्। जन्यत्वरूपं सम्बन्धमादाय सकर्मकेषु फलांशस्य कर्मत्वप्रतिपादनं "धातूपात्तभावनां प्रति हि फलांशः कर्मीभूतः" इति तत्पुरुषप्रकरणान्ते मनोरमायां कथयतो दीक्षितस्य सम्मतमेव। चैत्रं ग्रामं गमयतीत्यादौ प्रयोज्यस्य कर्मत्वनिर्वाहाय द्वितीयसम्बन्धस्थले जन्यत्वमपहाय प्रयोज्यत्वं निवेश्यम्। प्रयोज्यत्वं च जन्याजन्यसाधारणम्। जन्याश्रयत्वरूपद्वितीयसम्बन्धमात्र-निवेशाभिप्रायेण "फलस्यापि व्यपदेशिवद्भावेन फलाश्रयत्वात्कर्मत्वम्" इति नागेशग्रन्थाः प्रवृत्ताः।

जन्यत्वरूपप्रथमसम्बन्धस्यापि निवेशे तु व्यपदेशिवद्भावो नाश्रयणीय एव। वस्तुतस्तु नागेशग्रन्था जन्यत्वरूपप्रथमसम्बन्धस्यापि स्वीकारेण फलस्य कर्मत्वं वक्तव्यमित्यर्थका एव। अन्यथा स्तोकं पचतीत्यत्रासहायत्वेन व्यपदेशिवद्भावेऽपि स्तोकं तण्डुलं पचतीत्यत्र मुख्यधर्मवतः फलाश्रयस्य तण्डुलादेः समभिव्याहारस्य सत्त्वात्ससहाये व्यपदेशिवद्भावाभावात्कर्मत्वानापत्त्या यथाश्रुते तदसङ्गतिः स्पष्टैव। अत एव "धातूपात्तभावनां प्रति फलांशस्य कर्मतया" इत्यादितत्पुरुषप्रकरणान्तस्थशेखरग्रन्थे नैकवाक्यतासिद्धिः। एवं च दीक्षितनागेशयोरुभयोरपि सकर्मकस्थले फलस्य कर्मत्वं सम्मतमेव। तत्समानाधिकरणस्यापि तत्त्वात्ततो द्वितीया। एतदेवाभिप्रेत्य वृद्धाः पठन्ति "क्रियाविशेषणानां क्लीबत्वं कर्मत्वं च" इति। तत्र "क्लीबत्वम्" इत्यंशोऽपि "सामान्ये नपुंसकम्" इति वचनसिद्धार्थानुवाद एव। "सामान्ये नपुंसकम्" इत्यनियतलिङ्गविषयम्। तेनादिं पचतीत्यादौ पुंस्त्वमेव। आदिशब्दो हि नित्यं पुमान्। क्रियाविशेषणानामित्यस्य फलविशेषणानामित्यर्थः। तेन सकर्मके व्यापारविशेषणानामकर्मक-स्थलीयानां च न कर्मत्वम्। सङ्ख्यान्तराभावादेकवचनं प्रवर्तते क्रियाविशेषणेभ्यः। एवं च "क्रियावशेषणानां क्लीबत्वं कर्मत्वमेकवचनान्तत्वं च" इति वृद्धोक्तिः सर्वापि न्यायसिद्धार्थानुवाद एव। सामान्ये नपुंसकमित्यपि न्यायसिद्धमेव। विशेष्य विशेषासन्निधाने लिङ्गंसर्वनाम्नो नपुंसकस्य न्याय्यत्वात्। "लिङ्गंसर्वनाम नपुंसकम्" इति "दाण्डिनायन" ६-४ १७४ इत्यादि सूत्रे भाष्ये स्पष्टम्। क्रियाविशेषणानां कर्मत्वमित्यादेर्वाचनिकत्वे तु यत्र धात्वर्थस्य करणत्वेनान्वयस्तत्रापि स्यात्। यथा तृप्तिकामः स्तोकेनौदनं पचतीत्यादौ। तृप्तिविषयकामनावत्कर्तृकः स्तोकबिक्लित्तिकरणक ओदनकर्मकः पाक इति बोधः। तद्विषयकामनावत्कर्तृकत्वेन विक्लित्तेरुद्देश्यत्वमर्थसिद्धम्। केषाञ्चित्तृ"यादिषु कर्मत्वव्यवहारस्तूद्देश्यत्वसामान्यात्। एतेन "स्तोकं पचति मृदु पचति" इत्यादौ विरुद्धविभक्त्यवरुद्धपदोपस्थितस्यापि स्तोकमृद्वादेर्धात्वर्थपाकादावभेदान्वयो व्युत्पत्तिसिद्धः। तदनुरोधेन च द्वितीयान्तपदधातुपदयोः समभिव्याहारस्याप्यभेदान्वयौपयिकाकाङ्क्षत्वमुपगम्यते। क्रियाविशेषणस्थले च न द्वितीयातिरिक्तविभक्तिरुत्पद्यते। "क्रियाविशेषणानां क्लीबत्वं कर्मत्वं च" इत्यनुशासनेन तत्र कर्मत्वातिदेशात्" इति व्युत्पत्तिवादोक्तं "सर्वथैव द्वितीयान्तत्वम्" इति भाट्टरहस्योक्तं च परास्तम्।

"क्रियाविशेषणानामिति वचनं वार्तिकानारूढमपि वृत्तिकारेणोक्तमित्याहुः" इति "अव्ययीभावश्च" २-४-२८ इति सूत्रे भट्टोजिदीक्षितोक्त्या क्रियाविशेषणानामिति वचनं न कात्यायनस्येति स्पष्टमेवावगम्यते। एवं च "अनुशासनं वार्तिकरूपम्" इति व्युत्पत्तिवादव्याख्यातॄणां भ्रम एव। क्रियाविशेषणानामित्यादि-र्न्यायसिद्ध एव। नतु मुनित्रयोक्तिरिति ज्ञेयम्।

यत्तु "स्तोकं पचति, मृदु पचति, कथं तर्हि तत्र द्वितीयानियमः "उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु, द्वितीयाम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते" इत्यनुशासनादिति गृहाण। अत्र "ततोऽन्यत्रापि = प्रतिपदोक्तादन्यत्रापि = क्रियाविशेषणेऽपीत्यर्थ" इति भाट्टरहस्ये खण्डदेवः।

तन्न। तद्रीत्या क्रियाविशेषणानां द्वितीयान्तत्वोपपत्तावप्यकारकत्वेन सकृल्ल्वावित्यादौ "ओः सुपि" ६-४-८३ इति यणादेशस्यासिद्ध्यापत्तेः। "गतिकारकपूर्वस्यैव" इति भाष्ये पाठात्। अतः क्रियाविशेषणानां कर्मत्वमाश्रित्यैव द्वितीया कार्या, नोपपदविभक्तिः। नचैवं स्तोकं पाकः शोभनं पाक इत्यादौ द्वितीयां बाधित्वा "कर्तृकर्मणोः कृति" २-३-६५ इति कृद्योगे कर्मणि षष्ठ्यापत्तिः। एवं तत्कर्मणि लकारापत्तिश्च। एत'येनैव क्रियाविशेषणादुपपदद्वितीयैव खण्डदेवादिभिराद्रियत इति वाच्यम्। कर्तृसाहचर्येण धात्वर्थे भेदेनान्वयिन एव कर्मणस्तत्र ग्रहणात्। स्पष्टं चेदं "पूजनात्पूजितमनुदात्तम्" ८-१-६७ इत्यत्राष्टमे भाष्ये। तत्र हि दारुणं यथा भवति तथाऽध्यापक इत्यर्थकस्य दारुणाध्यापक इत्यस्य सिद्ध्यर्थं मलोपवचनमारब्धम्। अन्यथा दारुणशब्दात् षष्ठ्यां समासे सुपो लुकि तद्रूपसिद्धौ मलोपवचनं व्यर्थमेव स्यात्।

किञ्च क्रियाविशेषणात् "ततोऽन्यत्रापि दृश्यते" इत्यनुशासनेन द्वितीयेत्यपि चिन्त्यमेव। तथाहि - "कर्मणि द्वितीया" २-३-२ इति सूत्रे भाष्ये केनचित् किञ्चित् स्मृतमिति प्रदर्शनायानेकाः स्मृतय उपन्यस्ताः - १ समयानिकषाहायोगेषूपसङ्ख्यानम्। २ अपर आह - द्वितीयाविधानेऽभितः परितस्समया निकषाध्यधिधिग्योगेषूपसङ्ख्यानम्। ३ उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु। द्वितीयाऽऽम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते" इति। तृतीयवाक्ये "दृशिग्रहणं प्रयोगानुसरणार्थम्" इति कैयटः। "न देवदत्तं प्रतिभाति किञ्चित्। बुभुक्षितं न प्रतिभाति किञ्चित्" इति भाष्यकृदुदाजहार। एवं च तृतीयवचनेन पूर्वस्मृतिद्वयार्थोऽन्यार्थश्च सङ्गृहीतः। तेन तदेवाद्रियते व्याख्यातृभिः। "ततोऽन्यत्रापि दृश्यते" इत्यनेन सर्वस्मृत्यर्थः सङ्गृहीत इति तदाशयः। तदेतदभिप्रेत्य "अभितः परितः समया निकषा हाप्रतियोगे" इत्याह वृत्तिकारः। "ततोऽन्यत्रापीत्युक्तम्। तानेवान्यान् परिगणयति" इति च हरदत्तः। प्रयोगानुसारेण सकलस्मृत्यर्थो वृत्तिकारेण परिगणनेन प्रदर्शितः। एवं च क्रियाविशेषणात् "ततोन्यत्रापि दृश्यते" इत्यनेन द्वितीयासमर्थनं खण्डदेवस्यानुचितमेव। यदितु एतयाऽऽनुपूर्व्या परिगणनं न भाष्यारूढम्, अत एवाप्रामाणिकमित्यभिमन्यते, तदापि खण्डदेवस्य प्रमाद एव। अनेकस्मृतिस्वारस्यात्, "न देवदत्तं प्रतिभाति किञ्चित्। बुभुक्षितं न प्रतिभाति किञ्चित्" इति भाष्योदाहरणस्वारस्याच्च द्वितीयाप्रवृत्तेरव्ययसंज्ञकशब्दयोगनिमित्तकत्वलाभादिति दिक्।

एतेन "स्तोकं पचतीत्यादौ क्रियायां प्रकरीभूतोऽपि स्तोकादिर्न कारकम्। द्वितीया तु तत्र क्लीबलिङ्गत्ववदानुशासिक्येव" इति शब्दशक्तिप्रकाशकाराः परास्ताः।

एवंच सकर्मकधातुस्थले फलस्य मुख्यमेव कर्मत्वं, तत्समानाधिकरणस्य स्तोकादेरपि कर्मत्वातत्तो द्वितीया, स्तोकं पचति। अनियतलिङ्गस्य तस्य "सामान्ये नपुंसकम्" इति नपुंसकत्वम्। नियतलिङ्गस्य तु तत्तल्लिङ्गत्वमेव - आदि पचति। घञन्तस्थलेऽपि फलान्वये स्तोकं पाकः, व्यापारान्वये प्रथमा पुंलिङ्गता च - स्तोकः पाकः। अकर्मकस्थले सर्वथा प्रथमैव - सुखं वर्तते। हतशायिकाः शय्यन्त इति यग्विधायकभाष्यप्रयोगे क्तिनः स्त्र्यधिकारस्थत्वात्स्त्रीत्वम्। शेतेरकर्मकतया प्रथमा, बहुवचनं च। क्रियाविशेषणात् कदाचित् तृतीयापि - तृप्तिकामः स्तोकेनौदनं पचति। धात्वर्थस्य करणत्वेन विवक्षायां तृतीया-ज्योतिष्टोमेन यजेतेति वैयाकरणसिद्धान्तनिष्कर्षो बोध्यः।

एवंच कर्तृनिष्ठक्रियया जन्यत्व - जन्याश्रयत्वान्यतरसम्बन्धेन सम्बन्धुमिष्टतमं कारकं कर्मसंज्ञं स्यादिति रीत्या "कर्तुरीप्सिततमं कर्म" इति सूत्रस्यार्थस्वीकारेण धात्वर्थस्य विक्लित्त्यादेः फलस्य, तदाश्रयतण्डुलादेश्च कर्मत्वं सूत्राक्षरमर्यादयैव लभ्यते। संज्ञान्तरविधानादिष्टानुरोधाच्च निरुक्तसम्बन्धद्वयस्यैव ग्रहणान्नातिप्रसङ्गः। जन्याश्रयत्वरूपं सम्बन्धमादाय कर्तृनिष्ठक्रियाजन्यफलाश्रयत्वं कर्मत्वमिति व्यवहारः संजातः। जन्यत्वरूपं सम्बन्धमादाय फलस्य कर्मत्वेन "क्रियाविशेषणानां कर्मत्वम्" इति व्यवहारो जातः। तत्र सार्वत्रिकत्वाज्जन्याश्रयत्वसम्बन्धमादाय ग्रन्थकर्तारो धात्वर्थफलाश्रयः कर्मेति वदन्तीत्यन्यत्र विस्तरः।

[क्रियाजन्यफलाश्रय इति] इदमुपलक्षणं क्रियाजन्यस्यापि। [क्रियाजन्यफलवत्त्वेनेति] क्रियाजन्यफलाश्रयत्वेनेत्यर्थः। [कर्मण एवति] कर्मत्वेनाभिमतस्य तण्डुलादेरेवेत्यर्थः। एवशब्देन संप्रदानापादानादेर्व्यावृत्तिः। [कर्तुरीप्सिततमत्वादिति] जन्यत्व जन्याश्रयत्वयोरेवाऽऽप्रोत्यर्थत्वस्वीकारादिति भावः। अन्यथा सम्बन्धान्तरस्यापि स्वीकारे संप्रदानापादानादेरपि कर्मत्वापत्तिः। संप्रदानादिसंज्ञान्तरविधानसामर्थ्यादिष्टानुरोधाद्वा जन्यत्व - जन्याश्रयत्वयोरेव सम्बन्धत्वं प्रकृत इत्यदोषः। एवं च कर्तुः क्रियया, आप्तुं = जन्यत्व - जन्याश्रयत्वान्यतसम्बन्धेन सम्बन्धुमिष्टतमं कारकं कर्मसंज्ञं स्यादिति सूत्रार्थ इति बोध्यम्।

"तथा युक्तं चानीप्सितम्" इत्यादिसङ्ग्रहाच्चौवमेव युक्तम्। ईप्सितानीप्सितत्वयोः शाब्दबोधे भाना भावेन संज्ञायामेव तदुपयोगो न तु वाच्यकोटौ

तत्प्रवेशः। तथा च क्रियायाः फलस्य धातुनैव लाभादनन्यलभ्यश्चाश्रय एवार्थः। तत्त्वं चाखण्डशक्तिरूपमवच्छेदेकम्। ओदनं पचतीत्यत्र विक्लित्त्याश्रयत्वात्कर्मता। घटं करोतीत्यत्रोत्पत्त्याश्रयत्वात्। उत्पत्तेर्धात्वर्थत्वात्। जानाती त्यत्राऽऽवरण-भङ्गरूपज्ञाधात्वर्थफलाश्रयत्वात्। अतीतानागतादिपरोक्षस्थलेऽपि ज्ञानजन्यस्य तस्यावश्यकत्वात्। अन्यथा यथापूर्वं न जानामीत्यापत्तेः अतीतादेराश्रयता च विषयतया ज्ञानाश्रयताया नैयायिकानामिव सत्कार्यवादसिद्धान्ताद्वोपपद्यत इति। उक्तं च -

तिरोभावाभ्युपगमे भावानां सैव नास्तिता।
लब्धक्रमे तिरोभावे नश्यतीति प्रतीयते।। इति

ननु कर्तुरीप्सिततमिति सूत्रेण कर्मपदस्येच्छाविशिष्टे शक्तिग्रहलाभात्तदविवक्षया निरुक्तार्थस्वीकारोऽनुचित इत्यत आह [तथा युक्तमिति] सूत्रे तथेति भिन्नं पदम्। स्पटं चेदमुद्द्योते। इत्यादीत्यादिपदेन "अकथितं च" इत्यादीनां ग्रहणम्। [एवमेवेति] इच्छाद्यर्थानन्तर्भावेण शक्तिकल्पनमेवेत्यर्थः। [युक्तमिति] इच्छाविशिष्टे कर्मपदस्य शक्त्यभ्युपगमे "तथायुक्तं चानीप्सितम्" इति सूत्र बलादनिच्छाविशिष्टेऽपि शक्तिः स्वीकार्या। तथाच कर्मणि विहितस्यमादेर्नानार्थकतापत्तौ गौरवं स्पष्टमेव। क्रियाजन्यफलाश्रये कर्मपदस्य शक्तिस्वीकारे तूभयत्राप्येकरूप एव बोध इति लाघवमिति भावः। नन्वीप्सितादेः शाब्दबोधे भानेन "एवमेव युक्तम्" मित्यसङ्गतमत आह [ईप्सितेति]। यद्वा ननु गौरवमत्र न प्रतिबन्धकम्" "कर्तुरीप्सिततमं कर्म" "तथा युक्तं चानीप्सितम्" इति शास्त्रप्रमाणकत्वात्तस्यार्थस्येत्यत आह [ईप्सितेति] ईप्सितत्वानीप्सितत्वयोरित्यर्थः। [भानाभावेनेति] इच्छाविषयत्वानिच्छाविषयत्वभानकृतवैरूप्यरहित एव शाब्दबोधो हरिं भजति, ग्रामं गच्छन् तृणं स्पृशतीत्युभयत्रापि जायत इति भावः। तर्हि "कर्त्रा सम्बद्धं कर्म" इत्येव सूत्रमस्तु, किमविवक्षितार्थकपदघटितद्विसूत्रस्येत्यत आह [संज्ञायामेवेति] संज्ञाप्रवृत्तावेवेत्यर्थः। [तदुपयोग इति] ईप्सित तमानीप्सितपदार्थयोरुपयोग इत्यर्थः। इच्छाविषयत्वानिच्छाविषयत्वयोः स्वरूपतः सत्तयोपयोग इत्याशयः। संज्ञोत्पत्तौ निमित्तत्वेनोक्तानामर्थानां स्वरूपतः सत्त्वमपेक्षितमेव, घटाद्युत्पत्तौ दण्डादेरिव। अन्यथा तदुक्तिर्व्यर्था स्यादिति भावः। कर्त्रा सम्बद्धं कर्मेत्येतावन्मात्रोक्तावग्नेर्माणवकं वारयतीत्यादौ माणवकस्य "वारणार्थानामीप्सितः" १-४-२७ इत्यपादानत्वं कर्मत्वबाधनेन प्रवर्तेत। नचाग्नावपादानस्य चारितार्थ्यमिति वाच्यम्। अग्नेरपि वारयत्यर्थसंयोगाश्रयत्वेन कर्मत्वप्राप्तेः। नचायं संयोगस्तत्कर्तृजन्य

इति वाच्यम्। तत्र कर्तृपदाभावात्। वारयतेश्च संयोगानुकूलव्यापाराभावानुकूलो व्यापारोऽर्थः। कर्मसंज्ञासूत्रं तु तण्डुलं पचतीत्यादौ चरितार्थं स्यात्। कर्तुरीप्सिततममित्युक्तौ तु ईप्सितमात्रे सावकाशस्यापादानत्वस्येप्सिततमे परत्वादनेन बाधान्माणवकस्य कर्मत्वं निष्प्रत्यूहं सिद्ध्यति। एवं कर्मसंज्ञायामीप्सिततमग्रहणस्यावश्यकत्वे द्वेष्योदासीनयोः सङ्ग्रहाय "तथायुक्तं चानीप्सितम्" इत्यावश्यकमेवेति बोध्यम्। [तत्प्रवेश इति] ईप्सिततमत्वादेः प्रवेश इत्यर्थः। नन्वेवमपि द्विती याया आश्रयमात्रार्थकत्वकथनमयुक्तम्। क्रियाजन्यफलाश्रयरूपस्य विशिष्टस्यैव सूत्रतस्तदर्थकत्वलाभादत आह [तथाचेति] सूत्रतो विशिष्टस्य वाच्यत्वलाभे चेत्यर्थः। [लाभादिति] फलव्यापारयोरुभयोरपि धातुवाच्यत्वस्य प्राक् प्रतिपादितत्वादिति भावः। [अनन्यलभ्य इति] - नचाश्रयस्यापि द्वितीयाप्रकृत्या लाभात्तस्यापि शक्यत्वं न स्यादिति वाच्यम्। ग्रामं गच्छतीत्यादौ ग्रामादेर्ग्रामत्वेन रूपेणोपस्थितावपि आश्रयत्वेनानुपस्थित्या तेन रूपेणोपस्थित्यर्थमाश्रये शक्तिस्वीकारस्यावश्यकत्वात्। आश्रय एवेत्येवशब्देन विशिष्टस्य व्यवच्छेदः। ननु तत्तत्स्वरूपात्मकस्याश्रयत्वस्याश्रयभेदेन भेदाददननुगततया तस्यावच्छेदकत्वासम्भवेनाश्रये शक्तिकल्पनमयुक्तमत आह [तत्त्वं चेति] आश्रयत्वं चेत्यर्थः। [अखण्डशक्तिरूपमिति] अखण्डोपाधिरूपमित्यर्थः। उपाधित्वं च विशेषणत्वे सति जातिभिन्नत्वम्। तत्राखण्डत्वं च - इतरपदार्थघटितस्वरूपकधर्मभिन्नत्वम्। एतेन फलाश्रयत्वरूपस्य सखण्डस्योपाधित्वेऽपि शक्त्यानन्त्यतादवस्थ्यमित्यपास्तम्। अखण्डत्वे घटत्वादिवदेकत्वमेव तस्येति भावः। [शक्तिरूपमिति] कर्मत्वादितत्तच्छक्तिरूप मित्यर्थः।

लक्षणं लक्ष्ये योजयति [ओदनं पचतीति] अत्रौदनशब्दस्तण्डुलपरः। तथाच कर्मसंज्ञासूत्रे भाष्यम् "तादर्थ्यात्तच्छब्द्यं भविष्यति। ओदनार्थास्तण्डुला ओदनमिति" इति। तण्डुलानोदनं पचतीत्यत्र तु विक्लेदनं निर्वर्तनं च धात्वर्थः। तण्डुलान् विक्लेदयन्नोदनं निर्वर्तयतीत्यर्थः। तण्डुलानामोदनं पचतीत्यत्र तु विकारयोगे षष्ठी। तण्डुलविकारमोदनं पाकेन निर्वर्तयतीत्यर्थः। इदमपि तत्रैव भाष्ये स्पष्टम्। [कर्मतेति] कर्मसंज्ञेत्यर्थः। सविषयकधातुस्थले द्वितीयाया विषयत्वे लक्षणेति नैयायिकमीमांसकोक्तमयुक्तमिति सूचयंस्तत्र घटादेः कर्मत्वमुपपादयति [घटं करोतीति] उत्पत्त्याश्रयत्वादित्यादौ कर्मतेत्यस्यानुषङ्गेणान्वयः कार्यः। [उत्पत्तेरिति] उत्पत्त्यनुकूलव्यापारस्येत्यर्थः। [धात्वर्थत्वादिति] निरूपितं चेदं धात्वर्थनिर्णये। जानातियोगे तस्य विषयावच्छिन्नावरण-भङ्गानुकूलव्यापारार्थकतामाश्रित्य घटादेः कर्मत्वमुपपदायति [जानातीत्यत्रेति] [आवरणभङ्गेति]

विषयावच्छिन्नावरणभङ्गेत्यर्थः। आत्ममनस्संयोगजन्यजानात्यर्थज्ञानरूपफलाश्रयत्वेन ज्ञानजन्यविषयतारूपतदर्थफलाश्रयत्वेन वा घटादीनां कर्मत्वमिति प्रकारान्तरद्वयमपि भूषणे प्रतिपादितम्। ननु विद्यमानघटे ज्ञानजन्यावरणभङ्गस्य सम्भवेऽपि भाविविनष्टघटे निराश्रयस्य तस्यासम्भवेन तस्य कर्मत्वानुपपत्तिरत आह [अतीतानागतेति] तस्य = आवरणभङ्गस्य। तत्राश्रयताङ्गीकारे युक्तिमाह [अन्यथेति] तत्रावरणभङ्गास्वीकार इत्यर्थः। [यथापूर्वमिति] जानातिक्रियाविशेषणमिदम्। पदार्थानतिवृत्तावव्ययीभावः। पूर्वमनतिक्रम्येत्यर्थः। पूर्वज्ञानानतिक्रमो यस्मिंस्तदिति यावत्। घटस्य विद्यमानतादशायां तात्कालिकज्ञानस्य तद्घट आवरणभङ्गजनकताऽतीतदशायामाधुनिकज्ञानस्य तदजनकत्वेन पूर्वातिक्रमस्य सत्त्वात्पूर्वानतिक्रान्तज्ञानाभावरूपविषयस्याबाधात्तादृशप्रयोगस्य प्रामाण्यापत्तिः। अतीतघटे आधुनिकज्ञानेनाऽऽवरणभङ्गोत्पादाभ्युपगमे तु तेन पूर्वज्ञानानतिक्रमात्तदभावस्य बाधात्तस्याप्रामाण्यसिद्धिरिति भावः। ननु युक्तिप्रदर्शनेऽपि वस्तुतो विषयस्याभावात्तदाश्रयताया अनुपपत्तिरेवेत्याशङ्क्याह [अतीतादेरिति] आदिपदेनानागतस्य ग्रहणम्। अतीतानागतघटादेरित्यर्थः। [आश्रयतेति] आवरणभङ्गाश्रयतेत्यर्थः। अस्य "उपपद्यते" इत्यत्रान्वयः। [नैयायिकानामिवेति] अतीतघटस्य विषयतया ज्ञानाश्रयत्वमनुभावनुरोधादभ्युपगच्छन्ति नैयायिकाः, तद्वदस्माकमपीति भावः। नन्वतीतो घटो ज्ञानविषय इति प्रतीतिबलादस्त्वतीतघटस्य विषयतया ज्ञानाश्रयत्वम्। आवरणभङ्गाश्रयतायां तु न तथा साधकोपलब्धिरत आह [सत्कार्यवादेति] कारणव्यापारात्प्रागपि सदेव कार्यम्, "सदेव सोम्येदमग्र आसीत्" इति श्रुतेरिति तत्सिद्धान्तः। तन्मते कारणे कार्यस्य सूक्ष्मरूपेणावस्थानमेव नाशः। स्थूलरूपेणानभिव्यक्तिरेव भविष्यत्त्वमित्यतीतानागतघटस्यासद्रूपत्वाभावेनावरभङ्गाश्रयतोपपत्तिरिति भावः। अत्रार्थे हरिग्रन्थं प्रमाणयति [उक्तं चेति] हरिणेति शेषः। वाक्यकण्डे जातिसमुद्देशे ३८ कारिका। ब्रह्मसत्तैव भावविकारेषु षडवस्थाः प्रतिपद्यत इत्युक्त्वा ननु जन्मनाशावस्तुत्वात्कथं सत्तात्मकौ स्यातामित्याशङ्कायामिदमुक्तं [तिरोभावाभ्युपगम इति] अयं च कारिकाग्रन्थो नाशस्य सत्तारूपतां प्रतिपादयति। भावानां = पदार्थानाम्। तिरोभावाभ्युपगमे = स्वकारणेषु शक्तिरूपतयाऽवस्थितिस्तिरोभावः, तस्याभ्युपगमे। सैव = ब्रह्मसत्तैव। नास्तिता = नाशः। इति कथ्यत इति शेषः। सर्वेऽपि भावाः सत्तारूपा एव। सैव सत्ता स्वकारणेषु शक्तिरूपतयाऽवस्थिता सती नाश इति व्यपदिश्यते। एतदेव वस्तूनां नाशो नाम। नत्वयं नाशो निरुपाख्यः (अवस्तुरूपः) समस्तेषु च भावेषु तिरोभूतेषूपसंहृतक्रमः सिद्धरूपस्तिरोभावो नाश इत्यादिनामपदप्रत्याय्य इति

कारिकापूर्वार्धेन प्रतिपाद्यते। तिरोभावे = पदार्थानां तिरोभावे। लब्धक्रमे = साधनसंपर्कवशात्प्राप्तक्रमे सति। साध्यस्वभावतया विवक्षिता सा सत्तैव, नश्यतीति प्रतीयते = नश्यतीति तिङन्तपदप्रत्याय्या। तत्र भवनधर्मिणो भावस्य भवनविरोधात्तिरोभावमात्रं विनाश इति। नाशः सत्तारूप एवेति भावः। स्पष्टश्चायमर्थो हेलाराजीये।

ननु चैत्रो ग्रामं गच्छतीत्यत्र ग्रामस्येव चैत्रस्यापि क्रियाजन्यग्रामसंयोगरूप-फलाश्रयत्वात्कर्मत्वापत्तौ चैत्रश्चैत्रं गच्छतीत्यापत्तिः, प्रयागतः काशीं गच्छति चैत्रे 'प्रयागं गच्छति' इत्यापत्तिश्च। क्रियाजन्यसंयोगस्य काश्यामिव विभागस्य प्रयागेऽपि सत्त्वादिति चेन्न। ग्रामस्यैव चैत्रस्यापि फलाश्रयत्वेऽपि तदीयकर्तृसंज्ञया कर्मसंज्ञाया बाधेन चैत्रश्चैत्रमिति प्रयोगासम्भवात्। द्वितायोत्पत्तौ संज्ञाया एव नियामकत्वात्। अन्यथा गमयति कृष्णं गोकुलमित्यत्रेव पाचयति कृष्णेनेत्यत्रापि कृष्णपदाद् द्वितीयापत्तेः। शाब्दबोधश्चैत्रश्चैत्रमित्यत्र स्यादिति चेन्न। तथा व्युत्पन्नानामिष्टापत्तेः। उच्यतां वा प्रकारतासम्बन्धेन धात्वर्थफलविशेष्यकबोधं प्रति धात्वर्थव्यापारानधिकरणाश्रयोपस्थितिर्हेतुरिति कार्यकारणभावान्तरम्। प्रकृते चैत्रस्य व्यापारानधिकरणत्वाभावान्न दोषः। प्रयागस्य कर्मत्वं तु सम्भावितमपि न। समभिव्याहृतधात्वर्थफलशालित्वस्यैव क्रियाजन्येत्यनेन विवक्षणस्योक्तप्रायत्वात्।

क्रियाजन्यफलाश्रयः कर्मेति लक्षणेऽव्याप्तिमाशङ्कते [नन्वित्यादिना]। [फलाश्रयत्वादिति] संयोगस्योभयनिष्ठत्वादिति भावः। कर्मतापत्तौ = कर्मसंज्ञापत्तौ। [चैत्रश्चैत्रमिति] संयोगरूपफलाश्रयतया कर्मसंज्ञायां तद्विशिष्टार्थबोधकद्वितीयान्तस्य, संयोगानुकूलव्यापाराश्रयतया कर्तृसंज्ञायां तद्विशिष्टार्थबोधकप्रथमान्तस्य चैकदैव प्रयोगापत्तिरिति भावः। [आपत्तिरिति] चैत्रश्चैत्रं ग्रामं गच्छतीति वाक्यप्रयोगापत्तिरित्यर्थः। तत्रैव लक्षणे दोषान्तरमाह [प्रयागत इति] प्रयागे वर्तमानश्चैत्रः प्रयागं त्यक्त्वा यदा काशीं गच्छति, तदा संयोगविभागयोरप्येकक्रियाजन्यतया चैत्रनिष्ठक्रियाजन्यसंयोगाश्रयतया काश्या इव तन्निष्ठक्रियाजन्यविभागश्रयतया प्रयागस्यापि कर्मत्वापत्तौ निरुक्तार्थे प्रयागं गच्छतीत्यापत्तिरिति भावः। [विभागस्येति] चैत्रनिष्ठक्रियाजन्यविभागस्येत्यर्थः। [प्रयागेऽपीति] फले धात्वर्थविशेषणानिवेशाभिप्रायेणेदम्।

आद्यदोषमुद्धरति [ग्रामस्येति]। [तदीयेति] चैत्रीयेत्यर्थः। [बाधेनेति] "आकडारादेका संज्ञा" १-४-१ इति शास्त्रबलात्संज्ञयोरपि बाध्यबाधकभावसत्त्वेन परत्वाच्चैत्रीयकर्तृसंज्ञया तदीयकर्मसंज्ञाया बाधेन फलाश्रयत्वेऽपि कर्मसंज्ञाया अभावेन चैत्रपदान्न द्वितीयेति भावः। ननु कर्मसंज्ञाया अभावेऽपि

वस्तुतः फलाश्रयत्वमादाय द्वितीया दुर्वारेत्यत आह [द्वितीयोत्पत्ताविति] इदमुप लक्षणं कारकविभक्तिमात्रस्य। [नियामकत्वादिति] प्रकृते फलाश्रयत्वेऽपि कर्मसंज्ञाया अभावान्न चैत्रपदाद् द्वितीया। किन्त्वभिहिते प्रथमैवेति भावः। संज्ञाया एवेत्येवशब्देन फलाश्रयत्वमात्रस्य व्यवच्छेदः। अन्यथा = तत्तद्विभक्त्युत्पत्तौ तत्तत्संज्ञाया नियामकत्वानभ्युपगमे। [द्वितीयापत्तेरिति] गमयति, पाचयतीत्युभयत्रापि धात्वर्थविशेषणत्वरूपफलत्वस्य प्रयोज्यव्यापारे सत्त्वेन तदाश्रयत्वेन प्रयोज्यवाचकाद्गमयतियोग इव पाचयतियोगेऽपि द्वितीयापत्तिः। इष्टा तु तत्रानभिहिते कर्तरि तृतीया। अतः संज्ञाया एव विभक्त्युत्पत्तिप्रयोजकत्वमास्थेयम्। तथाच "कर्तुरीप्सिततमम्" इति सूत्रविहितकर्म संज्ञाया "गतिबुद्धि" १-४-५२ इत्यादिसूत्रेण "णिजर्थेनाप्यमानस्य यदि कर्मत्वं तर्हि गत्यादिधातुयोग एव" इति नियमितत्वात्पाचयतियोगे प्रयोज्यस्य कर्मत्वाभावान्न प्रयोज्यवाचकाद् द्वितीया, किन्तु तदीयकर्तृप्रयुक्ता तृतीयैव। गत्यादियोगे तु प्रयोज्यस्य कर्मत्वात्ततो द्वितीयेति विषयविभागः सिद्ध्यतीति भावः।

ननु विभक्त्युत्पत्तौ संज्ञाया नियामकत्वाभ्युपगमेन चैत्रश्चैत्रमिति प्रयोगस्य साधुत्ववारणेऽपि तत्र चैत्रनिष्ठ संयोगजनकश्चैत्रनिष्ठो व्यापार इति शाब्दबोधो दुर्वारः। शाब्दबोधेऽसाधुत्वज्ञानस्याप्रतिबन्धकत्वात्, साधुत्वज्ञानस्य तत्राहेतुत्वाच्चेत्याशङ्कते [शाब्दबोध इति] इदमापादनं चैत्रश्चैत्रं गच्छतीत्यत्रैव। फलाश्रयत्वेन चैत्रस्य तत्प्रकारकबोधो दुर्वार इत्याशयः।

यत्तु "चैत्रकर्मकचैत्रकर्तृकव्यापारशाब्दबोधस्य चैत्रो ग्रामं गच्छतीत्यत्राननुभवादाह - उच्यतां वेति, इति दर्पणकाराः। अत्रेदं चिन्त्यम्। इदमापादनं चैत्रो ग्रामं गच्छतीत्यत्रेति तेषामाशयोऽवगम्यते। परन्तु सोऽयुक्तः। चैत्रो ग्रामं गच्छतीत्यत्र चैत्रसंयोगयोर्नामार्थधात्वर्थयोर्भेदेन साक्षादन्वयस्याव्युत्पन्नत्वादेवान्वयवारणसम्भवे ऽतिरिक्तकार्यकारणभावस्वीकारेण तद्वारणप्रयासस्य ग्रन्थकृतो वैफल्यापत्तेः। "शाब्दबोधश्चैत्रश्चैत्रमित्यत्र" इति प्रकृतग्रन्थविरुद्धत्वाच्चेति दिक्।

[तथाव्युत्पन्नानामिति] व्युत्पत्तिः = कार्यकारणभावः। समवायसम्बन्धेन धात्वर्थफलनिष्ठविशेष्यतानिरूपितप्रकारतासम्बन्धेन जायमानशाब्दबोधं प्रति आश्रयोपस्थितिः कारणमिति ज्ञानवतामित्यर्थः।

तादृशवाक्यादुक्तशाब्दबोधस्याननुभवादिष्टापत्तेरयुक्तत्वादाह [उच्यतां वेति] [प्रकारतेति] चैत्रनिष्ठसंयोगानुकूलो व्यापार इति बोधे चैत्रे प्रकारता, संयोग विशेष्यता। तथाचोक्तशाब्दबोधनिष्ठा

या कार्यता तदवच्छेदकः धात्वर्थफलनिष्ठविशेष्यतानिरूपितप्रकारतासम्बन्धः, धात्वर्थव्यापारानधिकरण-विशेष्यतासम्बन्धः कारणतावच्छेदक इति कारणतावच्छेदकसम्बन्धेन चैत्र उपस्थिते रभावान्न शाब्दबोधः। चैत्रस्य धात्वर्थव्यापाराधिकरणतयोक्तसम्बन्धेनोपस्थितेरभावादिति भावः।

[आश्रयोपस्थितिरिति] विभक्तिजन्याश्रयोपस्थितिरित्यर्थः। सम्बन्धे व्यापारानधिकरणत्व-निवेशेनविभक्त्या आश्रयत्वेनैवाश्रयोपस्थित्या व्यापारधिकरणत्वानधिकरणत्वयोस्तत्राभानादि-दमसङ्गतमित्यपास्तम्। कारणतावच्छेदकसम्बन्धस्याकाङ्क्षाभास्यतया तत्र तथात्वसम्भवात्। चैत्रो ग्रामं गच्छतीत्यत्र विभक्युपस्थापिताश्रयता भिन्ने ग्रामे धात्वर्थव्यापारानधिकरणविशेष्यतासम्बधेनोपस्थितेः सत्त्वात्तादृशबोधः सूपपादः। उपस्थितौ विभक्तिजन्यत्वनिवेशाद्व्यापारजन्यसंयोगाश्रयो ग्राम इत्येतदर्थके 'गम्यमानो ग्राम' इत्यादौ धात्वर्थव्यापारानधिकरणविशष्यतासम्बन्धेन शानजर्थाश्रयोपपस्थितेः सत्त्वेऽपि फलनिष्ठविशेष्यतानिरूपितप्रकारतासम्बन्धेन शाब्दबोधाभावान्नान्वयव्यभिचारः।

चैत्रश्चैत्रमित्यत्रातिप्रसङ्गं वारयति [प्रकृत इति] द्वितीयं दोषं वारयति [प्रयागस्येति]। [सम्भावितिमिति] इदं च कर्मत्वासम्भवकथनं विभागो न गम्यर्थ इत्यभिप्रायेण। नचापादानस्थले प्रयागात्काशीं गच्छतीत्यादौ विभागो गम्यर्थ इति क्रमत्वं दुर्वारमिति वाच्यम्। निरवकाशतयाऽपादानसंज्ञया कर्मत्वस्य बाधात्। [समभिव्याहृतधात्विति] इदं च प्रत्यासत्तिलभ्यम्। [क्रियाजन्येत्यनेनेति] क्रियाज्यफलाश्रय इति कर्मसंज्ञासूत्रार्थप्रतिपादकवाक्येनेत्यर्थः। [उक्तप्रायत्वादिति] अन्यथाऽव्यावर्तकतया फलग्रहणमनर्थकमेव स्यादिति भावः।

नैयायिकास्त्वाद्यदोषवारणाय परसमवेतत्वं, द्वितीयदोषवारणाय धात्वर्थतावच्छेदकत्वं फले विशेषणं द्वितीयावाच्यमित्युपाददते। परसमवेतत्वं धात्वर्थक्रियायामन्वेति। तथैव कार्यकारमभावान्तरकल्पनात्। परत्वमपि द्वितीयया स्वप्रकृत्यर्थापेक्षया बोध्यते। तथा च चैत्रस्तण्डुलं पचतीत्यादौ तण्डुलान्यसमवेतव्यापारजन्यधात्वर्थतावच्छेदकविक्लित्तिशालित्वात्तण्डुलानां कर्मता। शाब्दबोधस्तु - तण्डुलसमवेतधात्वर्थतावच्छेदकविक्लित्त्यनुकूलतण्डुलान्य-समवेतक्रियाजनककृतिमांश्चैत्र इत्याहुः।

तत्र रोचयामहे। परसमवेतत्वादेः गौरवेणावाच्यत्वात्। अतिप्रङ्गः किं द्वितीयायः शाब्दबोधस्य वा। नाद्यः, तावद्वाच्यत्वकथनेऽपि तत्तादवस्थ्यात् गमयति कृष्णं

गोकुलमितिवत्पाचयति कृष्णं गोप इत्यापत्तेः, तण्डुलं पचति चैत्र इतिवत्तण्डुलं पच्यते स्वयमेवेत्यापत्तेश्च। विक्लित्तयनु कूलतण्डुलान्यसमवेताग्निसंयोगरूप-धात्वर्थाश्रयत्वात्। शाब्दबोधातिप्रसङ्गोऽप्युक्तरीत्यैव निरस्तः। परसमवेतत्वस्य शक्यत्वेऽपि परत्वस्य परसमवेतत्वस्य चेष्टान्वयलाभायानेकशः कार्यकारणभावाभ्युपगमे गौरवतरत्वादिति स्पष्टं भूषणे।

चैत्रश्चैत्रं गच्छतीति प्रयोगवारणोपायं नैयायिकोक्तं दूषयितु मुपन्यस्यति [नैयायिकास्त्वति] [आद्यदोषेति] चैत्रो ग्रामं गच्छतीत्यर्थे चैत्रश्चैत्रं गच्छतीति प्रयोगापत्तिरूपदोषेत्यर्थः। आद्यदोषवारणाय परसमवेतत्वं द्वितयावाच्यमित्युपाददते = स्वीकुर्वन्तीत्यन्वयः। द्वितीयदोषवारणाय धात्वर्थतावच्छेदकं फले विशेषणमित्युपाददत इत्यपरोऽन्वयः कार्यः।

पञ्चोलिनस्तु "परसमवेतत्वं धात्वर्थतावच्छेदकत्वं च द्वितीयार्थ इत्यर्थः" इति व्याचक्षते। तदत्यन्तमसमीचीनमिति न पृथग्विविच्य वक्तव्यम्।

ननु परसमवेतत्वस्य विनिगमनाविरहात्फलेऽन्वये चैत्रभिन्न ग्रामसमवेतफलाश्रयत्वात्प्रकृत-दोषतादवस्थ्यमत आह [परसमवेतत्वमिति] यद्वा एवमवतरणीयम् - ननु परसमवेतत्वस्य द्वितीयावाच्यत्वे चैत्रस्तण्डुलं पचतीत्यत्र द्वितीयार्थस्य फल एवान्वयदर्शना त्तदर्थपरसमवेतत्वस्यापि तत्रैवान्वयौचित्येन द्वितीयाप्रकृत्यर्थभिन्नसमवेतफलाभावाल्लक्षणस्यासम्भव एवेत्यत आह [परसमवेतत्वमिति] एकप्रत्ययोपात्तत्वेऽपि परत्वं धात्वर्थक्रियायामन्वेति। नतु फले, अतो न दोष इत्याशयेनाह [धात्वर्थक्रियायामिति]। [कार्यकारणभावेति] स्वनिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन जायमानपरसमवेतत्वप्रकारकबोधं प्रति भावनात्वावाच्छिन्नविशेष्यतासम्बन्धेन धातुजन्यभावनोपस्थितिः कारणमिति कार्यकारणभावेत्यर्थः। द्वितायार्थाश्रयत्वस्य धात्वर्थफले ऽन्वयायाऽन्यः कार्यकारणभावः स्वीकार्य इत्याशयेन कार्य कारणभावान्तरेत्युक्तम्। तथाच द्वितीयार्थपरसमवेतत्वं धात्वर्थक्रियायामाश्रयत्वं फले चान्वेतीति भावः। ननु परसमवेतत्वं = भेदाश्रयसमवेतत्वम्। तच्च यत्किञ्चि'दस्य सर्वत्रैव सत्त्वात्केवलान्वयि। तथाच "मैत्रात्परश्चैत्रः" इति चैत्ररूपपरसमवेता या क्रिया तज्जन्यधात्वर्थतावच्छेदकसंयोगरूपफलाश्रयत्वाच्चैत्रस्य कर्मत्वापत्तिस्तदवस्थैवेत्यत आह [परत्वं चेति] परत्वं त्विर्यर्थः। [स्वप्रकृत्यर्थापेक्षयेति] तण्डुलं पचतीत्यादौ तण्डुलादेरेव लक्ष्यत्वेनोपस्थितत्वात्तदन्यस्यैव ग्रहीतुमुचितत्वादिति भावः। पच्यते तण्डुलश्चैत्रेणेत्यादौ कर्माख्यातस्थले तु तिङर्थसङ्ख्यान्वय्यपेक्षया

परत्वं बोध्यते। तथाच यस्मात्प्रातिपदिकाद् द्वितीया विधित्सिता तदर्थापेक्षया यः परस्तत्समवेतक्रिया जन्यधात्वर्थतावच्छेदकफलशालित्वं कर्मत्वमिति फलति। लक्ष्यमाह [तथाचेति] तण्डुलान्यः = चैत्रः। बोधं दर्शयति [शाब्दबोधस्त्विति]। [तण्डुलसमवेतेति] तण्डुलसमवेता धात्वर्थतावच्छेदिका च या विक्लित्तिस्तदनुकूला तण्डुलान्यचैत्रसमवेता या क्रिया तज्जनककृतिमांश्चैत्र इति तदर्थः। चैत्रश्चैत्रमित्यत्र चैत्ररूप द्वितीया प्रकृत्यर्थापेक्षया चैत्रस्य परत्वाभावान्न तस्य कर्मत्वमिति भावः। [आहुरिति] अयमत्र नैयायिकमतनिष्कर्षः - क्रियायाः फलस्य च धातुनैव लाभादाधेयत्वं परत्वं च द्वितीयार्थः। परत्वं च भेद एव। तत्र फले आद्यान्वयः। अन्त्यस्य सामानाधिकरण्येन व्यापारे। भेदे प्रकृत्यर्थस्य फलान्वयिव्यक्तिविशेषावच्छिन्नप्रतियोगितयाऽन्वयः। एवं च ग्रामं गच्छतीत्यत्र ग्रामाधेयफलानुकूलग्रामभेदसमानाधिकरणव्यापारवानिति बोधः। एतेन प्रतियोगितासामान्येनान्वये द्वित्वावच्छिन्नप्रतियोगिताकचैत्रभेदस्य चैत्रे सत्त्वेन चैत्रश्चैत्रं गच्छतीत्यस्यापत्तिः। अन्वयितावच्छेदकावच्छिन्नप्रतियोगितयाऽन्वये देवदत्तो द्रव्यं गच्छतीत्यस्यानापत्तिरिति परास्तम् - इति।

नैयायिकमतं दूषयति [तन्न रोचयामह इति] रुचधातुरकर्मकः। ततो णिचि "गतिबद्धि" इत्यादिना तच्छब्दार्थस्य नैयायिकमतस्य कर्मत्वम्।

पञ्चोलिनस्तु "रोचयामाह इत्यस्य तार्किकेभ्य इति वयमिति च शेषः" इति वदन्ति। "रुच्यर्थानां प्रीयमाणः" इति तार्किकाणां संप्रदानत्वमिति तेषामाशयः। वस्तुतस्तु स न समीचीनः। णिजन्तस्य सकर्मकत्वेन संप्रदानसूत्रस्याप्रवृत्तेः। किञ्च वयं तार्किकेभ्यः। तत् = परसमवेतत्वादेर्वाच्यत्वं न रोचयामह इत्यर्थो वाच्यः। स चात्यन्तमसम्बद्धः। अतः "तार्किकेभ्यः" इति शेष इत्युक्तम्। "तार्किकाणाम्" इति शेष इति पञ्चोलिनामाशयो भवेत्। तार्किकाणां तत् = परसमवेतत्वस्य द्वितीयावाच्यत्वं वयं न रोचयामह इत्यर्थो भवेत्।

नन्वतिप्रसङ्गनिरासाय परसमवेतत्वे गुरुभूतेऽपि शक्तिः कल्प्य इत्यत आह [अतिप्रसङ्ग इति] तावद्वाच्यत्वकथनेऽपि = परसमवेतत्वस्य द्वितीयावाच्यत्वकथनेपि। [तत्तादवस्थ्यादिति] द्वितीयाति प्रसङ्गरूपदोषस्य तदवस्थत्वात् = तस्य स्थितेरित्यर्थः। चैत्रश्चैत्रमिति प्रयोगवारणेऽपि पाचयत्यादियोगे प्रयोज्यवाचकाद् द्वितीया दुर्वारेति भावः। तमेव दोषं दर्शयति [पाचयति कृष्णं गोप इति] तण्डुलं कृष्णः पचति, पचेर्हेतुमण्णौ गोपस्तण्डुलं कृष्णेन पाचयतीति प्रयोगः प्रामाणिकः। नैयायिकमतरीत्या

प्रयोज्यस्य कर्मत्वापत्तिर्दोषः। प्रयोज्ये कृष्णे स्वभिन्नप्रयोजकसमवेतक्रियाजन्यणिजन्त-धात्वर्थतावच्छेदकीभूतप्रकृत्यर्थक्रियात्मकफलशालित्वरूपकर्मत्वसत्त्वाद् द्वितियापत्तिरित्यर्थः। ननु "कर्तुरीप्सिततमम्" इति सूत्रेण भ्वादिगणपठितधात्वर्थतावच्छेदकफलशालिन एव कर्मसंज्ञाविधानात्पाचयतियोगे प्रयोज्यस्य कर्मत्वं नेत्यतो दृष्टान्तव्याजेनाह [गमयति कृष्णं गोकुलमिति वदिति] निरुक्तरीतिस्वीकारे गमयतियोगेऽपि प्रोज्यस्य कर्मत्वानापत्ति रिति भावः। नच गमयतियोगे "गतिबुद्धि" इत्यादिना प्रयोज्यस्य कर्मसंज्ञाविधानाद् द्वितीया, पाचयतियोगे संज्ञाया अविधानान्न दोष इति वाच्यम्। गतिबुद्धीत्यादिसूत्रस्य नियामकस्यैव भाष्यसम्मतत्वात्। सूत्रकृदाशयप्रदर्शनायैव भाष्यकृतः प्रवृत्तेरिति बोध्यम्।

ननु "गतिबुद्धि" इत्यादिसूत्रोपात्तातिरिक्तधातुप्रकृतिकणिजन्ते प्रयोज्यस्य कर्मत्वाविवक्षाया बोधनान्नायमतिप्रसङ्ग इत्यतो दोषान्तरमाह [तण्डुलमिति] शुद्धकर्तरीव कर्मकर्तर्यपि तण्डुलादेः कर्मत्वा पत्तिरिति भावः। [तण्डुलं पच्यत इति] तण्डुलमित्यापाद्यमानद्वितायान्त-पदघटितयादृच्छिकवाक्यमेतत्। नतु तादृशं पदं साधु तण्डुलः पच्यते स्वयमेवेति कर्मकर्तरि प्रथमान्तार्थस्य तण्डुलस्यापि त्वदुक्तकर्मत्वापत्तौ द्वितीयापत्तिरिति भावः। तमेव दोषमुपपादयति [विक्लित्तीति] विक्लित्त्यनुकूलस्तण्डुलान्यकाष्टसमवेतो योऽग्निसंयोग रूपो धात्वर्थस्तज्जन्यविक्लित्तिरूपफलाश्रयत्वादित्यर्थः। अग्निसंयोगः पच्यर्थ इत्याशयेनेयमापत्तिः। कर्मकर्तरि कर्मनिष्ठव्यापार एव धातुनोच्यते, नान्यनिष्ठ इति स्वीकारे तु नेयमापत्तिः।

बोधापत्तिरूपद्वित्तीयदोषोऽपि नेत्याह [शाब्दबोधेति]। [उक्तरीत्यैवेति] तादृशबोधस्येष्टापत्त्या, प्रकारतासम्बन्धेन धात्वर्थफलविशेष्यकबोधं प्रति धात्वर्थव्यापारानधिकरणाश्रयोपस्थितिः कारणमिति कार्याकरणभावस्वीकारेण वा शाब्दबोधातिप्रसङ्गो निरस्त इत्यर्थः। न चातिरिक्तकार्यकारणभावस्वीकारे तत्रापि गौरवापत्तिरिति वाच्यम्। धात्वर्थफलविशेष्यकबोधे विभक्तिजन्योपस्थितिर्हेतुरिति सामान्यकार्यकारणभाव एव धात्वर्थव्यापारनधिकरणेति विशेषणं दीयते, नत्वपूर्वतया कार्यकारणभावः स्वीक्रियत इत्याशयात्। प्रत्युत तवैव विपरीतं गौरवमित्याह [परसमवेतत्वस्येति]। [इष्टान्वयेति] परत्वं द्वितीयाप्रकृत्यर्थप्रतियोगिकमेव, नान्यप्रतियोगिकम्। परसमवेतत्वं धात्वर्थक्रियायामेवान्वेति, न फल इत्यभीष्टार्थसंपत्तय इत्यर्थः। [कार्यकारणभावेति] प्रकृत्यर्थप्रकारकबोधे द्वितीयार्थपरसमवेतत्वोपस्थितिः कारणं, परसमवेतत्वप्रकारकबोधे विशेष्यतया धातुजन्योपस्थितिः कारणमित्यादिकार्यकारणभावस्वीकारेऽधिकं गौरव मित्यर्थः।

किञ्च वर्त जानातीत्यादौ घटादेस्त्वदुक्तकर्मत्वाभावेन घटाद् द्वितीयानापत्तिः। न च सविषयार्थकधातुभिन्नस्थल एव द्वितीयायाः परसमवेतत्वार्थकत्वम्। सविषयकधातुस्थले तु द्वितीयाया विषयत्वे लक्षणेति वाच्यम्। अनेकाननुगतक्लिष्टकल्पनापत्तौ गौरवस्य स्पष्टत्वात्। तदेतदाह [स्पष्टं भूषण इति]।

किञ्च नैयायिकमते फलावच्छिन्नो व्यापारो धात्वर्थस्तदा द्वितीयार्थवृत्तित्वस्य पदार्थैकदेशे संयोगादौ फलेऽन्वयादेकदेशान्वयनिबन्धनो व्युत्पत्तिभङ्गोदुर्वारः। किञ्च किमिदं फलस्यावच्छेदकत्वं नाम? न तत्तद्धातुशक्यतावच्छेदकत्वं, विशिष्टशक्तौ प्रमाणाभावात्। चैत्रो मैत्रं गमयति ग्राममित्यादिणिजर्थरूपधात्वर्थस्यावच्छेदकीभूते गमनरूपे फलेऽव्याप्तेः। अथ फले पृथगेव धातोः शक्तिः, तस्य च व्यापारे प्रकारत्वमेवावच्छेदकत्वमिति चेन्न। तृतीयार्थकरणत्वादौ, पाचयतीत्यत्र णिजर्थविशेषणीभूते पाके चातिव्याप्तेः।

किञ्च नैयायिकमतेऽनेकशक्तिकल्पनापत्तिः, अनेकव्यत्पत्तिकल्पनापत्तिश्च दोषः। तथाहि - द्वितीयाया वृत्तित्वे भेदे च शक्तिरित्यनेकशक्ति कल्पना। धातोः फलावच्छिन्नव्यापार एका, फले व्यापारे च नाना शक्तिरिति कल्पना। तथा फलस्य तत्त्वेन बोधे पूर्वदेशविभागस्यापि क्रियाजन्यत्वावशेषात् पूर्वदेशं गच्छतीति प्रयोगापत्तिः। संयोगत्वादिना बोधे वृक्षस्थितस्यैव सर्पस्य मूलदेशादग्रदेशं गच्छतो वृक्षं गच्छतीति प्रयोगापत्तिः। तत्तदवयवसंयोगनाशेनावयविसंयोगानां नाशात् तया क्रियया जनितसंयोगेनाभिनवस्यैवावयविसंयोगस्योत्पत्तेः। न ह्यवयविसंयोगो न धात्वर्थतावच्छेदकः, ग्रामं गच्छतीति प्रयोगानापत्तेः। अतस्तदुत्तरदेशसंयोगस्यैव फलत्वं वाच्यम्। उत्तरत्वं च तत्तत्क्रियापूर्वदेशघटितमित्यनन्तशक्तिकल्पना। तथा व्युत्पत्त्यानन्त्यमपि - ग्रामं गच्छतीत्यत्र तावत्प्रातिपदिकार्थस्य ग्रामस्य तत्तत्संसर्गभेदन वृत्तित्वे भेद चान्वयाद्व्युत्पत्तिद्वयम्। पुनश्चान्वयितावच्छेद कावच्छिन्नप्रतियोगिताकत्वव्युत्पत्तिभङ्गः। तदभङ्गाय वा ग्रामप्रातिपदिकेन ग्रामविशेषलक्षणेति दोषः। द्वितीयार्थस्य च भेदस्य सामानाधिकरण्यसम्बन्धेन क्रियायां वृत्तित्वस्य च साक्षात्सम्बन्धेन फल इति व्युत्पत्तिद्वयम्। स्वं गच्छतीति प्रयोगवारणाय भेदो वा द्वितीयार्थः समवायो वा, ग्रामस्य च तस्मिन् समवाये स्वप्रतियोगिकभेदवद्वृत्तित्वं संसर्गः, समवायस्य च साक्षात्सम्बन्धेन क्रियायामन्वय इत्स्यापि सुवचत्वेन विनिगमनाविरहश्च।

एवं ग्रामस्य गन्तेत्यादिकर्मषष्ठीस्थले शक्त्यनेकत्वं, व्युत्पत्त्यनेकत्वं, विनिगमनाविरहश्च दोषाः। ग्रामो गम्यत इति कर्माख्यातस्थले चात्मनेपदस्य फले च शक्त्यन्तरकल्पनात्, ग्रामस्य प्रथमान्तपदोपस्थाप्यस्यापि आख्यातार्थे भेदेऽन्वयकल्पनं, तस्य भेदस्य प्रत्यायार्थस्यापि

धात्वर्थव्यापारेऽन्वयकल्पनं, तस्य च व्यापारस्य धातूपस्थापितफलं प्रति विशेष्यभूतस्यापि पुनर्जन्यत्वसम्बन्धेन प्रथमान्तपदोपस्थप्ये ग्रामेऽन्वयकल्पनमिति दोषा नैयायिकमते सम्भवन्त्येवेत्लं परमतदूषणेन परद्वेषकरेण।

एतच्च सप्तविधम् -

"निर्वर्त्यं च विकार्यं च प्राप्यं चेति त्रिधा मतम्।
तच्चेप्सिततमं कर्म चतुर्धाऽन्यत्तु कल्पितम्।
औदासीन्येन यत्प्राप्यं यच्च कर्तुरनीप्सितम्।
संज्ञान्तरैरनाख्यातं यद्यच्चाप्यन्यपूर्वकम्।।

इति वाक्यपदीयात्।।

यदसज्जायते सद्वा जन्मना यत्प्रकाशते।
तन्निर्वत्यं विकार्यं तु द्वेधा कर्म व्यवस्थितम्।।
प्रकृत्युच्छेदसम्भूतं किंचित्काष्ठादि भस्मवत्।
किंचिद्गुणान्तरोत्पत्त्या सुवर्णादिविकारवत्।।
क्रियाकृतिविशेषाणां सिद्धिर्यत्र न गम्यते।
दर्शनादनुमानाद्वा तत्प्राप्यमिति कथ्यते।।

इति च तत्रैवोक्तम्। घटं करोतीत्याद्यम्। काष्ठं भस्म करोतीति, सुवर्णं कुण्डलं करोतीति च द्वितीयम्। घटं पश्यतीति तृतीयम्। तृणं स्पृशतीत्युदासीनम्। विषं भुङ्क्ते इति द्वेष्यम्। गां दोग्धीति संज्ञान्तरैरनाख्यातम्। क्रूरमभिक्रुध्यतीत्यन्यपूर्वकम्।

एवं कर्म सामान्यतो लक्षयित्वा वाक्यपदीयमवलम्ब्य तद्विभजते [एतच्चेति] ईप्सिततमम् = "कर्तुरीप्सिततमं कर्म" इति प्रथमसूत्रविहितं, तत् + च = कर्म तु निर्वर्त्यं विकार्यं प्राप्यमिति त्रिधा मतम्। अन्यत् + तु = अन्यदपि सूत्रान्तरनिर्दिष्टमपि, चतुर्धा। कथमित्यत आह - यत्, औदासीन्येन = ताटस्थ्येन प्राप्यम्। यच्च कर्तुरनीप्सितम् = यथा चोरविषादि। एतद् द्वयमपि "तथा युक्तं चानीप्सितम्" १-४-५० इति द्वितीयसूत्रनिर्दिष्टम्। यत्, संज्ञान्तरैः = अपादानादिसंज्ञान्तरैः, अनाख्यातम् = अविवक्षितम्। एतद् "अकथितं च" १-४-५१ इति तृतीयसूत्रनिर्दिष्टम्। यच्चापि, अन्यपूर्वकम् = अन्यत् कारकं पूर्वं यस्य तत् = यथा देवदत्त मभिक्रुध्यति, देवदत्तादिकं "क्रुधद्रुह" इत्यादिपूर्वसूत्रेण संप्रदासंज्ञकमपि

"क्रुधद्रहोरुपसृष्टयोः कर्म" १-४-३२ इत्यनेन कर्मसंज्ञकमेव भवति। एवं प्रथमसूत्रविहितं कर्म त्रिविधं, सूत्रान्तरविहितं कर्म चतुर्विधमित्याहत्य कर्म सप्तविधं भवति।

पञ्चोलिनस्तु "अन्यत्तु = अनीप्सिततमं कर्म तु। चातुर्विध्यमाह" इति व्याचख्युः। तदयुक्तम्। अनीप्सितकर्मणश्चातुर्विध्यायोगात्। अतो मदुक्तरीत्या "अन्यद्" इत्यस्य सूत्रान्तरविहितं कर्मेति व्याख्या युक्ता। "ईप्सिततमं कर्म" इत्यस्य ईप्सिततमपदघटितसूत्रविहितं कर्मेत्यर्थो वाच्यः।

[वाक्यपदीयादिति] तृतीयकाण्डे साधनसमुद्देशे ४५-४६ कारिकाभ्यामेतत्सप्तविधमिति सम्बन्धः।

वाक्यपदीये निर्वत्यविकार्ययोर्लक्षणमेवमुक्तम् -

"सती वाऽविद्यमाना वा प्रकृतिः परिणामिनी।
यस्य नाश्रीयते तस्य निर्वर्तयत्वं प्रचक्षते।
प्रकृतेस्तु विवक्षायाम्" इति।।

अयमर्थः - यस्य सती परिणामिनी प्रकृतिः = उपादानकारणम्, नाश्रीयते = न विवक्ष्यते, यस्य वा प्रकृतिरविद्यमानैव। तत्कर्म निर्वर्त्यमित्युच्यत इत्यर्थः। यथा घटं करोति, संयोगं करोति। उपादानशब्द उपादानकारणपरः। "जनिकर्तुः प्रकृति" १-४-३० "प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्" व्यास सूत्रम् १-४-२३ इत्यादौ तथा दर्शनात्। यस्य प्रकृतिर्विवक्ष्यते कार्याभेदेन तद् विकार्यं कर्म। यथा - मृदं घटं करोति। सुवर्णं कुण्डलं करोतीति। भेदेन विवक्षायां तु मृदं घटं करोतीति निर्वर्त्यमेव कर्म।

एवं लोकप्रतीत्यनुसारेण निर्वर्त्यविकार्ययोर्लक्षणमभिधाय शास्त्रकृन्मतानुसारेण तयोस्तदुक्तं तत्रैव - "..... कैश्चिदन्यथा। निर्वर्त्यं च विकार्यं कर्मशास्त्रे प्रदर्शितम्" इति। कैश्चित् = शास्त्रकृद्भिः शास्त्रे निर्वर्त्यं च विकार्यं च कर्म, अन्यथा = प्रकारान्तरेण प्रदर्शितमिति तदर्थः। कथं निदर्शितमत उक्तम् - यदसज्जायते सद्वेति - एवं च लौकिकप्रतीतिं शास्त्रकृत्सम्मतिं चाश्रित्य वाक्यपदीये निर्वर्त्यविकार्ययोर्लक्षणमुक्तम्। शास्त्रकृत्सम्मतो द्वितीयः प्रकारः प्रदर्शितोऽत्र कौण्डभट्टेन - "यदसज्जायते" इत्यादिना हरिगन्थेन। हरिकारिकायां - यद् असदेव सद् घटादिकं जायते, तन्निर्वर्त्यं कर्म। इदं च वैशेषिकमतानुसारेण, असत्कार्यवादनो हि ते। असदेव कार्यमुत्पद्यत इति तेषा मभ्युपगमः। सत्कार्यवादिमतेनाह [सद्वा जन्मना यत्प्रकाशत इति] सदेव कार्यं कारणसामग्र्याऽभिव्यज्येत। कारणव्यापारात्प्रागपि सदेव कार्यम्। "सदेव सोम्येदमग्र आसीत्" इति श्रुतेरिति सत्कार्यवादिसिद्धान्तः।

विकार्यं कर्मतु द्वेधा व्यवस्थितम्। द्वेधा = आत्यन्तिकरूपान्तरप्राप्तितदभावाभ्याम्। पूर्वरूपस्य सर्वात्मना परित्यागतदभावाभ्यामिति यावत्। तदेव दर्शयति [प्रकृत्युच्छेदेति] - प्रकृतेः = आत्मनः, उच्छेदं = नाशं, सम्भूतं = प्राप्तं, भू प्राप्ताविति चौरादिकस्य "आधृषाद्वा" इति णिचो विकल्पनात्तदभावे कर्तरि क्तः। किञ्चित् = एकविधम्। उदाहरति [काष्ठादीति]। भस्मवदिति मतुबन्तम्। भस्मरूपवत्, भस्मरूपधारीति यावत्। काष्ठं भस्म करोतीत्यत्र काष्ठं विकार्यं कर्मेति यावत्। द्वितीयमाह [किञ्चिदिति] एकविधमन्यदिति यावत्। गुणान्तरोत्पत्त्या = प्रकृतरूपापरित्यागेन गुणान्तरस्य = अवयवसन्निवेशादेर्धर्मस्य उत्पत्त्या। अस्य "उपलक्षितम्" इति शेषः। उदाहरणं [सुवर्णादीति] तद्विशेषणं - "विकारवत्" इति। इदमपि मतुबन्तमेव। विकारयुक्तं सुवर्णादि अपरं विकार्यं कर्मेत्यर्थः। अत्र हरिग्रन्थे काष्ठसुवर्णयोरेव विकार्यकर्मत्वं स्पष्टमेव प्रतिपादितम्। काष्ठं भस्म करोतीत्यादौ "सती वाऽविद्यमाना वा" इति प्रथमकल्पे प्रकृतेरविवक्षायां काष्ठादिकं निर्वर्त्यकर्म, तद्विवक्षायां तु विकार्यकर्म। "यदसज्जायते" इति द्वितीयकल्पे तु प्रकृतेरविवक्षायामपि काष्ठादिकं विकार्यमेवेति विशेषः। स्पष्टं चेदं हेलाराजीये।

अयमत्र सङ्ग्रहः -

"सती वाऽविद्याना वा प्रकृतिः परिणामिनी।
यस्य नाश्रीयते तस्य निर्वर्त्यत्वं प्रचक्षते।।

प्रकृतेस्तु विवक्षायां विकार्यं, कैश्चिदन्यथा।
निर्वर्त्यं च विकार्यं च कर्म शास्त्रे प्रदर्शितम्।।

यदसज्जायते, सद्वा जन्मना यत्प्रकाशते।
तन्निर्वर्त्यं, विकार्यं तु द्वेधा कर्म व्यवस्थितम्।।

प्रकृत्युच्छेदसम्भूतं किञ्चित्काष्ठादि भस्मवत्।
किञ्चिद्गुणान्तरोत्पत्त्या सुवर्णादिविकारवत्।।

क्रियाकृतविशेषाणां सिद्धिर्यत्र न गम्यते।
दर्शनादनुमानाद्वा तत्प्राप्यमिति कथ्यते।।

इति वाक्यपदीयपाठः। तत्र "प्रकृतेस्तु विवक्षायां विकार्यम्" इत्यन्तो ग्रन्थो लोकप्रतीत्यनुसारेण निर्वर्तयविकार्यकर्मणोर्लक्षणप्रतिपादनपरः। "कैश्चिदन्यथा" इत्यादिग्रन्थस्तु शास्त्रकृन्मताश्रयेण तयोरेव

लक्षणप्रतिपादनपरः। अत एव "विवक्षायाम्, शास्त्रे" इत्यक्तिरत्यन्तं सुश्लिष्टा भवति। प्रकृत्युच्छेदसम्भूतमित्यस्य प्रकृतेः = आत्मनः, उच्छेदं = नाशं, सम्भूतं = प्राप्तमित्यर्थः। एतादृशं किञ्चित् = एकविधं विकार्यकर्म। उदाहरणं काष्ठादीति। तद्विशेषणं भस्मवदिति। इदं च मतुबन्तम्। भस्मस्वरूपवदित्यर्थः। गुणान्तरोत्पत्त्येत्यस्य उप लक्षितमिति शेषः। गुणान्तरोत्पत्त्योपलक्षितं, किञ्चत् = अन्यद् विकार्यं कर्म। उदाहरणं - सुवर्णादीति। तद्विशेषणं - विकारवदिति। इदमपि मतुबन्तमेव। विकारसंयुक्तसुवर्णादीत्यर्थः। एवं च काष्ठं भस्म करोति, सुवर्णं कुण्डलं करोतीत्यादौ काष्ठसुवर्णयोरेव विकार्यकर्मत्वम्। भस्मकुण्डलयोस्तु निर्वर्त्यकर्मत्वमिति स्पष्टमेव। एष एव वाक्यपदीयपाठो हेलराज - दीक्षित - भूषणकृदादिभिराश्रितः। एवमेव स ग्रन्थो व्याख्यातश्च। शास्त्रकृत्सम्मतत्वाद् द्वितीयः प्रकारोऽत्र ग्रन्थे कौण्डभट्टेन प्रदर्शितः। "कर्मण्यण्" ३-२-१ इति सूत्रे कैयटस्तु "सती वाऽविद्यमाना वा" इत्यादिप्रथमकल्पमाश्रित्य निर्वर्त्य - विकार्ये लक्षयामासेति।

यत्तु "प्राकृत्युच्छेदेति - प्राकृतेः = कारणस्य, उच्छेदः = नाशः, स चात्यन्ताप्रतीयमानप्रकृतिस्वरूपफलकः। तेन, सम्भूतम् = उत्पत्तिशालि। इदं च काष्ठादिभिस्मवदन्वितम्। काष्ठादिभस्मवदिति समस्तपदम्। यत्तु काष्ठादीति पृथक्पदम्, नतु भस्मना सह समासः, समासे काष्ठस्य तुरीयतापत्तेरिति, तन्न। असमास एव तुरीयतापत्तेर्दोषात्। तथाहि - काष्ठादि इत्येकम्, भस्म इत्यपरम्, सुवर्णादि इत्येकम्, कुण्डलमित्यपरमिति। मम तूभयोः काष्ठभस्मनोर्विकार्यत्वमेव" इति पञ्चोलिनः। अत्रेदं चिन्त्यम्। काष्ठादिभस्मवदित्यस्य समस्तस्य प्रकृत्युच्छेदसम्भूत मित्यनेन सम्बन्धेऽन्वयो दुरुपपादः। असमासे भस्मवत् विकारवत् इत्यनयोर्मतुबन्तयोः काष्ठ - सुवर्ण विशेषणत्वात्काष्ठादेः कथं तुरीयतापत्तिरिति पञ्चोलिन एव प्रष्टव्याः। भस्मवत् विकारवत् इत्यनयोर्मतुबन्तत्वं हरदत्तग्रन्थे स्पष्टम्। समासे मतुबर्थस्य कुत्र वाऽन्वय इति दुर्वचमित्यलम्।

दर्पणकारास्तु "प्रकाशत इत्यनन्तरं प्रकृतेस्तु विवक्षायां विकार्यं कैश्चिदन्यथा। तन्निर्वर्त्यम्" इत्येव वाक्यपदीयपाठः। अन्यथा सामान्यधर्मेणालक्षितस्य विकार्यस्य विशेषरूपेण प्रदर्शनेऽर्थान्तरतापत्तेः। तदर्थस्तु कैश्चित् = प्रसिद्धैराचार्यैः, प्रकृतिविवक्षायां निष्पाद्यं विकार्यमित्युच्यते। अन्यथा = तदविवक्षायाम्, तन्निष्पाद्यं निर्वर्त्यमिति। तत्र घटं करोतीत्यादौ सत्या अपि मृदादिप्रकृतेः परिणामित्वेनाविवक्षा। भस्म करोतीत्यादौ त्वसत्या एव तस्यास्तत्त्वेन सा। यद्यपि निर्वर्त्यते = निष्पाद्यत इति व्युत्पत्त्या निर्वर्त्यत्वं तण्डुलानोदनं पचतीत्यादावोदनादौ विकार्यकर्मण्यप्यस्ति, तथापि

प्रकृतिवाचकपदासमभिव्याहृतपदोपस्थाप्यत्वे सति निष्पाद्यत्वरूपपारिभाषिकनिर्वर्त्यत्वस्य विवक्षणान्न दोषः। तदुक्तं "सती वाऽविद्यमाना वा प्रकृतिः परिणामिनी। यस्य नाश्रीयते = न प्रयुज्यते न विवक्ष्यत इति यावत्। यद्यपि विकार्यं द्वेधा - प्रकृतावपि विकार्यत्वं ज्ञातप्रायं भवतीत्याशयेन तदनुक्त्वैव विकृतिमेव विभजते - प्रकृत्युच्छेदेति। सम्भूतमिति - प्रकृतिनाशप्रयोज्योत्पत्तिमदित्यर्थः। इदं च भस्मवदित्यन्वयि। काष्ठादीति पृथक् पदम्। अन्यथा काष्ठसुवर्णादेस्तुरीयतापत्तेः। भस्मवदिति - तत्तौल्येन वर्तमानमन्यदपि विकारजातमित्यर्थः। तथाच प्रकृतिविकृतिभावापन्नं काष्ठभस्मादि विकार्यमित्यर्थः - इति वदन्ति।

तेषामयमाशयः - सामान्यरूपेणालक्षितस्य विकार्यकर्मणो "विकार्यं तु द्वेधा" इति द्वैविध्यप्रदर्शनमसङ्गतं स्यात्। अतो "यदसज्जायते सद्वा जन्मना यत्प्रकाशते" इत्यस्मादनन्तरं "प्रकृतेस्तु विवक्षायां विकार्यं कैश्चिदन्यथा" इत्येव वाक्यपदीयपाठः। अनन्तरं "तन्निर्वर्त्यं विकार्यं तु द्वेधा कर्म व्यवस्थितम्" इति वाक्यपदीयपाठः। तथा सति निष्पाद्यस्य प्रकृतिविवक्षायां विकार्यं, तदविवक्षायां निर्वर्त्यं कर्मेति सामान्येन लक्षितस्य विकार्यस्य "विकार्यं तु द्वेधा" इति विशेषप्रदर्शनं सङ्गतं भवति। "सती वाऽविद्यमानावा" इत्यादिकारिका निर्वर्त्यलक्षणे प्रकृतिवाचकपदासमभिव्याहृतपदोपस्थाप्यत्वे सतीति विशेषणप्रदर्शनपरा, नतु स्वातन्त्र्येण निर्वर्त्यलक्षणप्रदर्शनपरा। विकार्यं कर्म द्विविधं - प्रकृतिर्विकृतिश्चेति। विकृतिरूपं विकार्यं द्विविधम् प्रकृतेर्नाशेनोत्पन्नमेकं। यथा - काष्ठविनाशेनोत्पन्नं भस्मादि। प्रकृतौ रूपान्तरोत्पत्तिरूपं द्वितीयम्। यथा सुवर्णे कुण्ड लादिकम्। एवं प्रकृतिरूपविकार्यमपि द्विवधम्। स्वरूपनाशं प्राप्तमेकं। यथा - काष्ठं भस्म करोतीत्यादौ काष्ठादि। धर्मान्तरोत्पाद आधारभूतं द्वितीयम्। यथा - सुवर्णं कुण्डलं करोतीत्यादौ सुवर्णादि। एवं च काष्ठं भस्म करोति, सुवर्णं कुण्डलं करोतीत्यादौ काष्ठसुवर्णादिकं भस्मकुण्डलादिकं चोभयमपि विकार्यकर्मैव। "प्रकृत्युच्छेदसम्भूतम्" इति ग्रन्थो विकाररूपविकार्यकर्मणो भस्मादेः कुण्डलादेश्च लक्षणप्रदर्शनपरः, न काष्ठसुवर्णादिरूपस्य प्रकृतिविकार्यकर्मणो लक्षणप्रतिपादनपरः। विकारकर्मणो द्विविधत्वेऽर्थात्प्रकृतावपि द्वैविध्यमवगतमेव स्यादित्याशयेन तदनुक्तिः। प्रकृतेरुच्छेदेन = नाशेन, सम्भूतम् = उत्पन्नम्। भस्मवत् = भस्मसजातीयं विकारजातं विकार्यम्। सुवर्णादि = सुवर्णादिकमपि विकार्यमिति हरिग्रन्थार्थः। एवं च काष्ठं भस्म करोतीत्यादौ द्वयमपि विकार्यं कर्मैव। तत्र काष्ठं प्रकृतिविकार्यं, भस्म तु विकाररूपविकार्यमिति विशेषः। एवं सुवर्ण कुण्डलं करोतीत्यादावपीति।

अत्रेदं चिन्त्यम् - हेलाराजभूषणकृदादिभिरादृतस्य निर्वर्त्यविकार्यकर्मणोर्मतभेदेन प्रकारभेदस्य दर्पणरीत्याऽलाभेन प्रामाणिकग्रन्थविरोधः। "सती वाऽविद्यमाना वा प्रकृतिः परिणामिनी। यस्य नाश्रीयते तस्य निर्वर्तयत्वं प्रचक्षते। प्रकृतेस्तु विवक्षायाम्" इति हरिग्रन्थो लोकप्रतीत्यनुसारेण निर्वर्त्यविकार्यकर्मणोर्लक्षणप्रतिपादनपरः, "कैश्चिदन्यथा निर्वर्त्यं च विकार्यं च कर्म शास्त्रे प्रदर्शितम्" इत्यादिको हरिग्रन्थः शास्त्रकृन्मताश्रयेण तयोस्तत्प्रतिपादनपर, इति विभागेन हेलाराजादिभिर्व्याख्यातः। दर्पणकारैस्तु एतादृशविभागपरित्यागेनैकरूपतयैव हरिग्रन्थो व्याख्यातः। अत्र दर्पणग्रन्थस्यौचिती कियतीति दोषज्ञाः सहृदया एव प्रमाणम्। किञ्च "प्रचक्षते, कैश्चि दन्यथा" इति मतान्तरत्वस्फोरकशब्दस्वारस्यं भज्येत। किञ्च वाक्यपदीय एतत्सन्दर्भे "निर्वर्त्यं च विकार्यं च कर्म शास्त्रे प्रदर्शितम्" इत्यर्धश्लोको विद्यते। दर्पणकारैराश्रिते पाठे सोऽनन्वित एव स्यात्। निर्वर्त्यविकार्ययोर्द्विर्ग्रहणस्य वैयर्थ्यापत्तिश्च। किञ्चोत्पत्तिरूपकृधात्वर्थ फलाश्रितत्वरूप-कर्मसामान्यलक्षणाक्रान्तस्य विकार्यस्य "विकार्यं तु द्वेधा कर्म व्यवस्थितम्" इति विशेषरूपेण प्रदर्शने का वाऽर्थान्तरतापत्तिः। एवं चैतामनुपपत्तिमु'ाव्य तत्परिहाराय "जन्मना यत्प्रकाशते" इत्यनन्तरं "प्रकृतेस्तु विवक्षायां विकार्यं कैश्चिदन्यथा। तन्निर्वर्त्यम्" इति वाक्यपदीयपाठ कल्पनं दर्पणकाराणामत्यन्तमसङ्गतमेव। कथमन्यथा निर्वर्त्यस्यापि सामान्यरूपेण लक्षणमप्रदर्शयित्वा "यदसज्जायते सद्वा जन्मना यत्प्रकाशते। (अन्यथा) प्रकृतेरविवक्षायां निर्वर्त्यम्" इति विशेषलक्षणप्रतिपादनं घटेत। "यदसज्जायते" इत्यादि निर्वर्त्यस्य विशेषलक्षणप्रतिपादकमिति कौस्तुभे स्पष्टम्। किञ्च निपूर्वाद्भृतुधातो श्चुरादिण्यन्तात् "अचो यत्" ३-१-९१ इति यत्प्रत्यये णिनिमित्तके लघूपधगुणे "णेरनिटि" ६-४-५२ इति णिलोपे निर्वर्त्यमिति रूपम्। निर्वर्तनार्ह मित्यर्थः। निर्वर्तनं च निष्पादनम्। असतो वस्तुन उत्पत्तिरिति यावत्। विपूर्वात्करोतेः "ऋहलोर्ण्यत्" ३-१-१२४ इति ऋदन्तलक्षणे ण्यति विकार्यमिति रूपम्। निर्वर्त्यमित्यत्र यत्प्रत्ययो विकार्यमित्यत्र ण्यप्रत्ययश्च "तयोरेव कृत्यक्तखलर्थाः" ३-४-७० इति कर्मणि विहितौ "अर्हे कृत्यतृचश्च" ३-३-६९ इत्यर्हार्थं बोधयतः। विकार्यमित्यस्य विकारार्हमित्यर्थः। एवं च निर्वर्त्यपदेन घटं करोतीत्यादौ घटादेर्ग्रहणम्। काष्ठं भस्म करोतीत्यादौ निर्वर्त्यं भस्म, विकार्य काष्ठमिति स्पष्टमवगम्यते। एष च विभागः कौस्तभे स्पष्टः। भस्म विकारार्हं न भवति, विकार एव हि तत्। तदर्हं च प्रकृतिभूतं काष्ठादिकमेव। भूषणादावपि "काष्ठं विकार्यकर्म, भस्म निर्वर्त्यकर्म" इति स्पष्टमेव प्रतिपादितम्। एवं च काष्ठं भस्म करोतीत्यादौ काष्ठभस्मनोरुभयोरपि विकार्यकर्मत्वप्रतिपादनं दर्पणकाराणा मनुचितमेव, प्रामाणिकग्रन्थविरुद्धं च। गदाधरभट्टाचार्या अपि भस्मादेनिर्वर्त्यत्वमेवाभिप्रयन्ति। खण्डदेवादयोऽपि भस्मादेर्निर्वर्त्यत्वं प्रतिपादयामासुः।

किञ्च दर्पणोक्तरीत्या विकार्यकर्मणश्चतुर्विधत्वलाभेन "विकार्यं तु द्वेधा" इति वाक्यपदीयविरोधः। नच "प्रकृत्युच्छेदसम्भूतम्" इति ग्रन्थो विकाररूपविकार्यस्य लक्षणं प्रतिपादयति। विकृतिद्वैविध्येऽवगते प्रकृतावपि विकार्यत्वं ज्ञातप्रायं भवतीति तदुक्तरीत्या न तद्विरोध इति वाच्यम्। तस्य विकृतिरूपविकार्यमात्रस्य लक्षणप्रतिपादकत्वे मध्ये "काष्ठादि, सुवर्णादि" इत्येतयोरनन्वयापत्तेः। अपिच प्रकृतेः = आत्मनः, उच्छेदं = नाशं, सम्भूतं प्राप्तमिति व्युत्पत्त्याश्रयणेन काष्ठस्य, प्रकृतेरुच्छेदेन = नाशेन, सम्भूतम् = उत्पन्नमित्यर्थाश्रयणेन भस्मनश्च विकार्यत्वलाभेन "प्रकृत्युच्छेदसम्भूतम्" इति वाक्यपदीयग्रन्थे विकृतिरूपविकार्यकर्मलक्षणमात्रप्रतिपादनपर इति कथनमपि दर्पणकाराणामसङ्गतमेव। नच सिद्धान्तेऽपि निरुक्तव्युत्पत्तिद्वयाश्रयणेन काष्ठभस्मनोरुभयोरपि विकार्यत्वमेव स्वीक्रियतामिति वाच्यम्। "विकार्यं तु द्वेधा" इत्यस्यासङ्गत्यापत्तेः। भस्मनो निर्वर्त्यत्वप्रतिपादकभूषण - कौस्तुभ - पदमञ्जरी - व्युत्पत्तिवाद - भाट्टरहस्यादिप्रामाणिकग्रन्थविरोधापत्तेश्च। किञ्च तदादृतवाक्यपदीयपाठपर्यालोचनायां काष्ठं भस्म करोतीत्यादावसतो जातस्य भस्मनः प्रकृतेः कष्ठस्य विवक्षायां विकार्यविसिद्धावपि एतद्दशायां काष्ठस्य सिद्धवस्तुतया तस्य जन्माभावेन प्रकृतेरभावेन च तन्मते विकार्यत्वासिद्धिः। किञ्चैवं काष्ठादेरविकार्यतया, एतद्दशायामनिष्पाद्यत्वेनानिर्वर्त्यतया, तत्र क्रियाकृतविशेषस्य प्रत्यक्षेणोपलब्ध्याऽप्राप्यतया च तुरीयतापत्तिः। किञ्च तण्डुलानोदनं पचतीत्यादावोदनादौ निर्वर्त्यते = निष्पाद्यत इति व्युत्पत्त्या निर्वर्त्यत्वमतिप्रसक्तमित्यपि न युक्तम्। पदमञ्जर्यादिप्रामाणिकग्रन्थेभ्य ओदनादेर्निर्वर्त्यत्वस्यैव लाभात्। एवंचैतदतिप्रसक्तिवारणाय निर्वर्त्ये प्रकृतिवाचकपदासमभिव्याहृत-पदोपस्थाप्यत्वे सतीति विशेषणं देयमित्यर्थप्रतिपादनपरः "सती वाऽविद्यमाना वा" इति हरिग्रन्थ इति तदुक्तिरपि चिन्त्यैव। अतो हेलाराजादिभिरादृतपाठविरुद्धवाक्यपदीयपाठकल्पनं, काष्ठं भस्म करोतीत्यादौ काष्ठभस्मनोरुभयोरपि विकार्यत्वप्रतिपादनं च दर्पणकाराणामत्यन्तमसङ्गतं, प्रामाणिकमूलग्रन्थानवलोकनमूलकं च। "न तत्त्वमग्रहीषुस्ते मूलग्रन्थानवेक्षणात्" इत्यलं पल्लवितेन।

एवं निर्वर्त्यविकार्ये लक्षयित्वा प्राप्यं लक्षयति [क्रियाकृतेति] यत्र = कर्मणि क्रियाकृतानां विशेषाणां सिद्धिः। दर्शनात् = प्रत्यक्षादनुमानाद्वा, न गम्यते, तत्कर्म प्राप्यमिति कथ्यते। यथा आदित्यं पश्यति, ग्रामं गच्छति। नहि दृष्टादृष्टादित्ये गतागतग्रामे वा क्रियाकृतो विशेषः प्रत्यक्षेणानुमानेन वाऽवगन्तुं शक्यते। तण्डुलं पचतीत्यादौ तु पक्वापक्वतण्डुलेषु क्रियाकृतविशेषस्यावगमेन तण्डुलो न प्राप्यकर्म। तत्रैव = वाक्यपदीय एव।

निर्देशक्रमेणोदाहरणानि दर्शयति [घटं करोतीति]। [आद्यमिति] निर्वर्त्यमित्यर्थः। द्विविधमपि विकार्यं दर्शयति [काष्ठ मित्यादिना] [द्वितीयमिति] विकार्यमित्यर्थः। अत्र विकार्यत्वं काष्ठसुवर्णयोरेव, भस्मकुण्डलयोस्तु निर्वर्त्यत्वमेव। स्पष्टं चेदं कौस्तुभादौ। नचोत्पत्त्यनाश्रयत्वाद्विकार्यस्य काष्ठादेः कर्मत्वानापत्ति रिति वाच्यम्। प्रकृतिविकृत्योरभेदविवक्षया विकार्यस्योत्पत्त्याश्रयत्वात्। यद्वा विकृत्यनुकूल्ले व्यापारो निर्वर्तनं च कृञोऽर्थः। काष्ठं विकुर्वत् भस्मोत्पादयतीत्यर्थः। एवं चोभयोरपि कर्मत्वं निराबाधम्। एवं तण्डुलानोदनं पचतीत्यादावपि। प्राप्यकर्मोदाहरति [घटं पश्यतीति] तृतीयं = प्राप्यम्। एवं "कर्तुरीप्सिततमं कर्म" इति सूत्रनिर्दिष्टं कर्मत्रयमुदाहृतम्। इदानीं "तथायुक्तं चानीप्सितम्" इति सूत्रनिर्दिष्टं कर्मद्वयमुदाहरति - तृणं स्पृशतीत्यादिना द्वेष्यमित्यन्तेन। "तथायुक्तं चानीप्सितम्" इति सूत्रे तथायुक्तत्वं प्रकृतधात्वर्थप्रयोज्य फलाश्रयत्वम्। अनीप्सितत्वमनुद्देश्यत्वम्। तत्त्वं च प्रत्यासत्त्या यद्धात्वर्थफलाश्रयत्वेन कर्मत्वं तद्धात्वर्थकर्तुरेव बोध्यम्। तेन वारयति योगेऽग्न्यादेर्नानेनापि कर्मत्वम्। "अकथितं च" इति निर्दिष्टमुदाहरति [गामिति] संज्ञान्तरैः = अपादानादिभिः। अनाख्यातम् = अविवक्षितम्। "क्रुधद्रुहोरुपसृष्टयोः" इति निर्दिष्टमुदाहरति [क्रूरमिति] अन्यपूर्वकम् = संप्रदानादिसंज्ञापूर्वकम्। शास्त्रान्तरप्राप्तसंज्ञान्तरबाधकशास्त्रप्रयोज्यकर्मसंज्ञक मित्यर्थः।

इति द्वितीया

कर्तृ तृतीयाया आश्रयोऽर्थः। तथा हि - "स्वतन्त्रः कर्ता"। स्वातन्त्र्यं च धात्वर्थव्यापाराश्रयत्वम्। धातुनोक्तक्रिये नित्यं कारके कर्तृतेष्यते।

इति वाक्यपदीयात्।

एवं कारकद्वितीयाया अर्थं निरूप्य कारकतृतीयाया अर्थं निरूपयति [कर्तृतृतीयाया इति] करणतृतीयाया व्यापारार्थकत्वस्यापि वक्ष्यमाणत्वात्त"ावृत्त्यर्थं कर्तृग्रहणम्। तृतीयाया आश्रयार्थकत्वे प्रमाणं दर्शयति [तथाहीति] ननु स्वतन्त्रस्यैव कर्तृसंज्ञाविधानेन स्वतन्त्रस्तृतीयार्थ इति वक्तुमुचितमित्याशङ्कायामाह स्वातन्त्र्यमिति, इति पञ्चोलिनः। वस्तुतस्त्वेवमवतरणीयम् - ननु विततास्तन्तवस्तन्त्रं = वस्त्रम। स्वं तन्त्रं यस्येति बहुव्रीहिसमासाश्रयणे तन्तुवायस्यैव कर्तृसंज्ञा प्राप्नोति। ततश्च तन्तुवायाद्गृह्णातीत्यादावपि परत्वादपादानसंज्ञां बाधित्वा तन्तुवायस्य कर्तृत्वापत्तिर्दोषः। चैत्रस्तण्डुलं पचति, मैत्रो ग्रामं गच्छतीत्यादौ चैत्रमैत्रादेः कर्तृत्वानापत्तिश्च। तथा च भाष्यं "किं यस्य स्वं तन्त्रं स स्वतन्त्रः? किं चातः? तन्तुवाये प्राप्नोति" इति। तन्तुवाय इति भाष्यस्य तत्रैवेत्यर्थः। तथाच नेदं सूत्रं स्वोक्तार्थे मानमत आह [स्वातन्त्र्यं चेति] अयं भावः - कारकाधिकारात् क्रियासिद्धौ

यः स्वतन्त्र इत्यर्थे प्राधान्यस्यैवान्वययोग्यत्वात्, 'कारक' इत्यनेन क्रिया मात्रोपस्थितेस्तस्मिंश्च तन्तुवायस्य तन्तुवायत्वेन रूपेणानुपयोगाद् बहुलक्ष्यसंस्कारानुरोधाच्च सूत्रे स्वतन्त्रशब्दः प्रधानवाची, न तन्तुवायवाची। तथाच भाष्यम् "अयं तन्त्रशब्दोऽस्त्येव विताने वर्तते। तद्यथा - आस्तीर्णं तन्त्रं, प्रोतं तन्त्रमिति। वितानमिति गम्यते। (स च सन्निवेशविशेषस्तन्तुसमूहः) अस्ति प्राधान्ये वर्तते। तद्यथा स्वतन्त्रोऽसौ ब्राह्मण इत्युच्यते। स्वप्रधान इति गम्यते। तद्यः प्राधान्ये वर्तते तन्त्रशब्दस्तस्येदं ग्रहणम्" इति। स्वः = आत्मा, तन्त्रं = प्रधानमस्य = स्वतन्त्रः, करणादीनां हि परः कर्तैव तन्त्रं प्रधानम्। क्रियासिद्धौ करणादीनां तत्प्रयोज्यत्वात्, कर्ता त्वनन्यप्रयोज्यः स्वतन्त्र इत्युच्यते इति तदाशयः। [धात्वर्थेति] सूत्रे स्वतन्त्रशब्द एतादृशार्थपरः, "स्थालीस्थे यत्ने पचिना कथ्यमाने स्थाली स्वतन्त्र" इति "कारके" १-४-२३ इति सूत्रस्थं भाष्यमत्र मानम्। भाष्ये यत्नशब्देन व्यापारसामान्यं गृह्यते। यस्य व्यापारो धातुनाऽभिधीयते स एवासौ स्वतन्त्र इति भाष्याशयः। चैत्रस्तण्डुलं पचति घटो भवतीत्यादौ चैत्र - घटादौ पाक - भवनादि रूपधात्वर्थव्यापाराश्रयत्वाल्लक्षणसमन्वयः। पाचयति चैत्रो मैत्रेणेत्यादौ पाकस्य णिजर्थस्य चोभयोरपि भिन्नधातूपात्तव्यापारत्वात्तदाश्रययोः प्रयोज्यप्रयोजकयोरुभयोरपि कर्तृत्वोपपत्तिः। "गतिबुद्धि" इत्यादिसूत्रस्य नियमार्थत्वात्पाचयति योगे प्रयोज्यस्य न कर्मत्वम्। गमयति चैत्रं मैत्र इत्यादौ तु प्रयोज्यस्य कर्मत्वम्। व्यापारे धात्वर्थत्वविशेषणेन काष्ठेन तण्डुलं पचतीत्यादौ न कष्ठादेः स्वातन्त्र्यम्। व्यापारपदोपादानाद्धात्वर्थफलाश्रये कर्मण्योदनादौ नातिव्याप्तिः। [आश्रयत्वमिति] तच्च सति सम्भवे तद्धात्वर्थकृतिव्यापारोभयाश्रयत्वसमानाधिकरणमेव। तेन गुरुतरभारोत्तोलादिविषयकयत्नसत्त्वेऽपि तत्क्रियाया अनिष्पत्तौ तत्र न कर्तृत्वव्यवहारः। धात्वर्थकृतिश्च साध्यत्वाख्यविषयतया कृतिविषयैव ग्राह्या। तेन मत्तो भून्नतु मया कृतमिति व्यवहारस्योपपत्तिः। नान्तरीयककृतिसाध्यपिष्टकमध्यस्थशर्कराभोक्तरि च न तत्कर्तृत्वव्यवहारः। एतेन कृतिर्नाम न काचि"ापारातिरिक्तेति परास्तम्। व्यापाराश्रयत्वं च व्यापारतावच्छेदकसम्बन्धेन ग्राह्यम्। तेन कालिकादिसम्बन्धेन व्यापाराश्रये नातिव्याप्तिः।

एवं च स्वः = आत्मा, तन्त्रं = प्रधानमस्येति व्युत्पत्त्या स्वतन्त्रशब्दः प्रधानपरः, नतु तन्तुवायपरः। स्वातन्त्र्यं च "स्थालीस्थे यत्ने पचिना कथ्यमाने स्थाली स्वतन्त्रा" इति "कारके" इति सूत्रस्थभाष्येण यस्य व्यापारो धातुनोच्यते, तस्यैवेति मूलोक्तार्थलाभः स्पष्ट एव। एतेन "कर्तृसंज्ञाविधायके "स्वतन्त्रः कर्ता" इति सूत्रे स्वतन्त्रशब्दोऽर्श आद्यजन्तः। तत्प्रकृतिभूतेन प्रधानवाचिना स्वतन्त्रशब्देन व्यापारो गृह्यते" इति चित्रप्रभाकाराः परास्ताः।

यत्तु स्वातन्त्र्यस्येतरानधीनत्वरूपस्याश्रयणे देवदत्तेन पाचयति मैत्र इत्यादौ प्रयोज्यस्य प्रयोजकव्यापाराधीनतया कर्तृत्वानापत्तिरित्याशङ्कापनोदनार्थं विवक्षितार्थमाह - स्वातन्त्र्यं चेतीति काशिकाकाराः। तत्र प्रयोज्यस्य कर्तृत्वानापत्तिरित्यसङ्गतं, प्रयोज्यस्य प्रयोजकाधीनत्वेऽपि स्वव्यापारे स्वस्य स्वातन्त्र्यानपायात्। अत एव कर्तृसंज्ञासूत्रे भाष्ये पाचयत्योदनं देवदत्तेनेत्यादौ प्रयोज्यस्य कर्तृसंज्ञा न प्राप्नोतीत्याशङ्क्य स्वव्यापारे स्वातन्त्र्यमादाय तत्सिद्धिरिति समाहितम्। किञ्च धातूपात्तेति प्रतीकमुपादाय "व्यापारश्च प्रधानीभूतो ग्राह्यः" इति तैरवोक्ततया पाचयतीत्यादौ णिजर्थव्यापारे पच्यर्थव्यापारस्य गुणभूतत्वेन प्राधान्याभावात्तदाश्रयस्य प्रयोज्यस्य कर्तृत्वानिर्वाहेण धातूपात्तेत्यादिविवक्षितार्थस्वीकारेऽपि भवदुक्तरीत्या प्रयोज्यस्याऽकर्तृत्वापत्तिस्तदवस्थैव। यदि तु णिप्रकृत्युपस्थाप्यव्यापारस्यापि प्राधान्यं धातुभेदादभिप्रेतं, तर्हि पाचयति देवदत्तेनेत्यादौ प्रयोज्यस्याकर्तृत्वापत्तिर्भवदुक्ता कथं सङ्गच्छेत? किञ्च "व्यापारश्च प्रधानीभूतो ग्राह्यः" इत्यपि काशिकाकाराणामसङ्गतमेव। धात्वर्थव्यापाराश्रयत्वमिति लक्षणे व्यापारपदेन प्रधानव्यापारग्रहणे फलाभावात्, पाचयत्यादौ प्रकृतिण्यन्तधातुभेदेन व्यापारभेदाद्व्यापारद्वयाश्रयस्यापि कर्तृत्वस्येष्टत्वात्। नच नयतेः संयोगानुकूलव्यापारानुकूलव्यापारार्थकत्वे देवदत्तो ग्राममजां नयतीत्यत्राजायाः कर्तृत्ववारणमेव फलमिति वाच्यम्। संयोगानुकूलव्यापारस्य देवदत्तनिष्ठव्यापारे विशेषणतया फलत्वात्तदाश्रयत्वेनाजायाः कर्मत्वस्यैव प्रवृत्तेः। नच परत्वात्कर्तृसंज्ञया कर्मसंज्ञाया बाधः। किञ्च संयोगानुकूलव्यापाराश्रयतयाऽन्तरङ्गत्वादजायाः कर्तृत्वमेव स्यादिति वाच्यम्। प्रधानणिजर्थव्यापारनिरूपितफलाश्रय तयाऽन्तरङ्गकर्तृत्वबाधेनाजायाः कर्मत्वस्यैव प्रवृत्तेः। अन्तरङ्गादपि प्रधानकार्यबलवत्त्वस्य "हेतुमति च" ३-१-२६ इत्याकरसम्मतत्वात्। एवं च धात्वर्थव्यापाराश्रयत्वं कर्तृत्वमित्येवंरूपकर्तृलक्षणस्वीकारे तत्र प्रधानपदनिवेशस्य प्रयोजनं दुर्वचमेव। अत एव कर्तृसंज्ञासूत्रे कौस्तुभे "धातूपात्तव्यापाराश्रयत्वं स्वातन्त्र्यम्" इत्येवोक्तं दीक्षितैः। व्यापारान्तर्भावेण तल्लक्षणस्वीकारे प्राधान्यनिवेशनस्य फलाभाव इत्येव तदाशयः। अत एव व्यापारानन्तर्भावेण स्वीकृते कर्तृत्वलक्षणे प्रधानपदं निवेशितम्। मनोरमायामपि "प्रधानधात्वर्थाश्रयत्वं स्वातन्त्र्यमित्येवोक्तम्। नागेशेनापि "कर्मवत्कर्मणा तुल्यक्रियः" ३-१-८७ इति सूत्रे भाष्यप्रदीपोद्द्योते "स्वातन्त्र्यं च प्रधानधात्वर्थाश्रयत्वम्" इत्युक्तम्। कर्तृसंज्ञासूत्रे शेखरेऽपि "स्वातन्त्र्यं च कर्तृप्रत्ययसमभिव्याहारे प्रधानधात्वर्थाश्रयत्वम्" इत्यभाणि। एवं च व्यापारान्तर्भावेण लक्षणस्वीकारे प्रधानपदं तत्र न निवेशनीयम्। अन्यथा तु प्रधानपदनिवेशनमावश्यकमेव। उभयोर्लक्षणयोः फलभेदस्त्वनुपदमेव स्फुटीभविष्यति।

नन्वेवं कर्तृसंज्ञासूत्रे "स्वतन्त्र" इति कैयटप्रतीके "स्वातन्त्र्येण विवक्षित इत्यर्थः। तच्चारोपितमनारोपितं वेत्यन्यदेतत्। कर्तृप्रत्ययसमभिव्याहारे प्रधानीभूतधात्वर्थव्यापाराश्रयो हि सः" इत्युद्द्योते नागेशोक्तिरसङ्गता स्यात्। तथा "प्रधानधात्वर्थव्यापाराश्रयत्वम्" इति सुबर्थवादमञ्जूषायां परेतु कल्पे नागेशोक्तिरसङ्गतैव स्यादिति चेत्, लिखितपुस्तके तत्र व्यापारपदरहित एव पाठः। व्यापारपदसहितपाठ स्तु लेखकप्रमादात्। युक्तं चैतत्। नहि तौ ग्रन्थभागौ नागेशसिद्धन्तप्रतिपादकौ, किंतु दीक्षिताशयानुवादभूतौ। दीक्षितो हि कर्तृसंज्ञासूत्रे कौस्तभेऽन्यत्र च "स्वातन्त्र्यं च धात्वर्थव्यापाराश्रयत्वम्। प्रधानधात्वर्थाश्रयत्वं स्वातन्त्र्यम्" इति पृथगेव लक्षणे प्रतिपादयामास, नतु कुत्रापि प्रधानधात्वर्थव्यापाराश्रयत्वं स्वातन्त्र्यमिति प्रोवाच। तथाहि सति प्रधानव्यापारपदयोरन्यतरस्य वैयर्थ्यं स्पष्टमेव। एवं पृथग्लक्षणयोर्जाग्रतोरन्यतरपदस्य निरर्थकत्वसूचकं संकीर्णं लक्षणं नागेशः कथं वा प्रतिपादयति। अतिजागरूको हि नागेशः।

एतेन "धात्वर्थेति - प्रधानधात्वर्थव्यापाराश्रयत्वमित्यर्थ" इति वदन्तः पञ्चोलिप्रभृतयः सर्वेऽपि परास्ताः।

अत्रेदं बोध्यम् - स्वातन्त्र्यं च धात्वर्थव्यापाराश्रयत्वमिति लक्षणे व्यापारपदेन प्रधानव्यापारस्यैव ग्रहणे प्रमाणाभावात्फलाभावाच्च व्यापारमात्रस्य ग्रहणम्। तेन चैत्रस्तण्डुलं पचति, चैत्रेण तण्डुलः पच्यते, पाचयति चैत्रेण मैत्र इत्यादौ प्रधानव्यापाराश्रयस्य, पक्वस्तण्डुलश्चैत्रेणेत्यादौ धात्वर्थफलविशेषणव्यापाराश्रयस्य, तण्डुलस्य पाचकश्चैत्र इत्यादौ कृदर्थविशेषणव्यापाराश्रयस्य, चैत्रः पचति भवति, पश्य मृगो धावतीत्यादौ धात्वन्तरार्थविशेषणव्यापाराश्रयस्य च निरुक्तस्वातन्त्र्यसत्त्वेन कर्तृत्वं सिद्धयति। एतेन मूलोक्तलक्षणे व्यापारपदेन प्रधानव्यापारस्यैव ग्रहणमिति व्याख्याय निरुक्तस्थलेषु चैत्रादेः स्वातन्त्र्यनिर्वाहाय "प्राधान्यं च कर्तृप्रत्ययसमभिव्याहारे तद्धात्वर्थनिष्ठविशेष्यता-निरूपितप्रकारतानाश्रयत्वम्" इति क्लिश्नन्तः काशिकाकारादयः परास्ताः। अजां ग्रामं नयतीत्यादौ संयोगानुकूलव्यापाराश्रयस्य स्वातन्त्र्यापत्तिस्तु समनन्तरमेव परिहृता। अतो मूलोक्तं लक्षणं यथाश्रुतार्थकमेव।

तण्डुलः पच्यते स्वयमेवेत्यादौ कर्मकर्तर्यप्यस्तीदं स्वातन्त्र्यम्। पचादावौत्सर्गिकस्य फलव्यापारयोर्वैयधिकरण्यमात्रस्य परं त्यागः। विशकलितशक्तिपक्षे विशिष्टशक्तिपक्षे चेदं तुल्यम्। एवं च पचादेः फलसमानाधिकरणव्यापारार्थकतया तादृशव्यापाराश्रयतया कर्मकर्तरि तण्डुलादेः स्वातन्त्र्यं निष्प्रत्यूहम्।

ननु "कर्तुरीप्सिततमं कर्म" इत्यनेन कर्तृनिष्ठक्रियाजन्यफलाश्रयस्य कर्मत्वं विहितम्। धात्वर्थफलस्यापि व्यपदेशिवद्भावेन फलाश्रयत्वेन कर्मत्वात्तत्समानाधिकरणानां स्तोकादीनामपि तत्त्वात् स्तोकं पचतीत्यादौ द्वितीयेति नागेशेनाश्रितम्। न्यायसाम्याद्धात्वर्थ व्यापारस्यापि व्यपदेशिवद्भावेन व्यापाराश्रयत्वेन कर्तृत्वं स्यादिति चेत्, इष्टापत्तिरेव। अत एव मन्दं गच्छति कुटिलं गच्छतीत्यादौ व्यापारसमानाधिकरणेभ्यः प्रथमासिद्धिः। अत एव "न शिक्षितस्त्वया तेन मन्दं गच्छति वारणः" इत्यादौ "सपूर्वायाः प्रथमाया विभाषा" इति विकल्पप्रवृत्तिः। नचैवं कर्तुरपि क्वचिद्धात्वर्थेऽभेदान्वयदर्शनात् "कर्तृकर्मणोः कृति" इति सूत्रविषयकशेखरमञ्जूषादिग्रन्थविरोधः। "कर्तृसाहचर्येण कर्मापि धात्वर्थे भेदेनान्वय्येव गृह्यते। तेन स्तोकं पाक इत्यादौ न क्रियाविशेषणात् षष्ठी" इति तत्रोक्तत्वात्। त्वद्रीत्या कर्तुरपि क्वचिद्धात्वर्थेऽभेदेनान्वयेन तत्साहचर्यस्य नियामकत्वायोगादिति वाच्यम्। मन्दं गच्छति कुटिलं गच्छतीत्यादेः "न लोक" इत्यादिनिषेधेन "कर्तृकर्मणोः" इति सूत्र विषयतया तत्सूत्रविषये कर्तुर्भेदेनान्वयिन एव कर्तुः सम्भवात्तत्साहचर्येण निरुक्तार्थकल्पनाया युक्तत्वेन तद्ग्रन्थविरोधाभावात्। 'न लोक' इत्यादिनिषेधाविषये स्तोकः पाक इत्यादावपि घञर्थव्यापारस्य बहिर्भूतक्रियानिरूपितकर्तृत्वात्तस्य च तिङादिभिरभिधानात्तत्समानाधिकरणस्तोकादिनिष्ठस्यापि तस्याभिहितत्वात्तस्यापि "कर्तृकर्मणोः" इति सूत्राविषयतया कुटिलं गन्तेत्यादावपि तृचा गमनक्रियाकर्तृत्वस्याभिधानात्तस्यापि प्रकृतसूत्राविषयत्वेन कर्तृसाहचार्येण तादृशार्थकल्पनायां बाधकाभावाच्च।

तत्त्वदर्शिनस्तु "कर्तुरीप्सिततमं कर्म" इति सूत्रेण शब्दशक्त्या फलस्य कर्मत्वं लभ्यते। निरूपितं चैतत्प्राक्। "फलस्यापि क्रियाजनकत्वं, तज्ज्ञानपूर्वकं क्रियोत्पादनात्" इति सुबर्थवादे द्वितीयाप्रकरणे फलस्य क्रियाजनकत्वरूपं कारकत्वमपि नागेशेन प्रतिपादितम्। अतो युज्यते धात्वर्थफलस्य कर्मत्वम्। "व्यपदेशिवद्भावेन फलस्यापि फलाश्रयत्वात्कर्मत्वम्" इति नागेशग्रन्थस्याशयः प्राक् प्रतिपादित एव। धात्वर्थव्यापारस्य कर्तृत्वं तु "स्वतन्त्रः कर्ता" इति सूत्रादक्षरमर्यादया नैव लभ्यते। व्यापारस्य व्यपदेशिवद्भावेन व्यापाराश्रयत्वसंपादनेऽपि तस्य क्रियाजकत्वरूपकारकत्वासम्भवेन कर्तृत्वं दुरुपपादमेव। अत एव वैयाकरणनागेशेन धात्वर्थफलस्य कर्मत्वं प्रतिपादितं, तदर्थव्यापारस्य न क्वापि कर्तृत्वं प्रतिपादितम्। किञ्च स्तोकः पाक इति प्रथमान्तस्थले घञर्थव्यापारस्य बहिर्भूतक्रयानिरूपितकर्तृत्वात्तस्य च तिङादिभिरभिधानात्तत्समानाधिकरणस्तोकादिनिष्ठस्यापि

तस्याभिहितत्वात्तस्य "कर्तृकर्मणोः" इति सूत्रविषयत्वेऽपि स्तोकः पाकेन तृप्यतीत्यादौ घञर्थव्यापारस्य बहिर्भूतक्रियानिरूपितकर्तृत्वाभावात्तत्समानाधिकरणस्तोकाद्यर्थस्य तिङादिभिरनभिधानात्तस्य "कर्तृकर्मणोः" इति सूत्रविषयताया दुर्वारत्वेन व्यापारस्य कर्तृत्वसंपादनकल्पे कर्तृकर्मणोरिति सूत्रविषयकनागेशग्रन्थविरोधो दुष्परिहर एव। किञ्च "कर्मवत्कर्मणा तुल्यक्रियः" ३-१-८७ इति सूत्रस्थोद्द्योतग्रन्थो व्यापारस्य कर्तृत्वकल्पे विरुणद्धि। तत्रहि "क्रियाविशेषणरूपे कर्मणि लकारो न, कर्तृसाहचर्येण धात्वर्थे भेदेनान्वयिकर्मण एव तत्र ग्रहणात्" इत्युक्तम्। अत एव विक्लित्त्यादिफलस्यापि व्यपदेशिवद्भावेन फलाश्रयत्वात्तत्त्वम्। अत एव तत्समानाधिकरणे स्तोकं पचतीत्यादौ कर्मत्वम्" इति नागेशेन फलविशेषणस्तोकादेः कर्मत्ववत्, व्यापारविशेषणस्तोकादेः कर्तृत्वं नोक्तम्। "व्यापारान्वये तु शोभनः पाक इत्येव। तस्य कर्मत्वाभावेन तद्विशेषणे द्वितीयाया अप्राप्तेः। तिङन्तार्थव्यापारान्वये तु नपुंसकतैव" इत्येवोक्तं कृदर्थवादे मञ्जूषायाम्। तत्र प्रतिपादिकार्थे प्रथमेत्येव नागेशाशयः। प्रदर्शितश्चायमर्थो मञ्जूषाव्याख्याने नागेशभावप्रकाशेऽस्माभिः।

किञ्च धात्वर्थव्यापाराश्रयत्वं स्वातन्त्र्यमिति दीक्षिताद्युक्तदिशा यथाकथंचिद्व्यापारस्य कर्तृत्वसंपादनेऽपि नागेशसिद्धान्तरीत्या तस्य तत्त्वं दुर्वचमेव। सुबर्थवादमञ्जूषायां "परेतु" कल्पे "तद्धात्वर्थीयकारकचक्रप्रयोक्तृत्वं स्वातन्त्र्यम्। एवं स्वेच्छाधीनप्रवृत्तिनिवृत्तिकत्वमपि सूत्रे स्वातन्त्र्यम्" इत्युक्तं नागेशेन। तयोर्द्वयोरप्यर्थयोर्धात्वर्थव्यापारस्य कर्तृत्वं नैव लभ्यते। "व्यापारस्यापि व्यपदेशिवद्भावेन व्यापाराश्रयत्वात्कर्तृत्वम्" इति कारकशेखरप्रकरणस्थ गुरुप्रसादशेष व्याख्या तु मतान्ताभिप्रायेणैवेत्यलम्। अत्र युक्तमुत्पश्यन्तु सुधिय इति वदन्ति।

ननु -

निवृत्तप्रेषणं कर्म स्वक्रियावयवे स्थितम्।
निवर्तमाने कर्मत्वे स्वे कर्तृत्वेऽवतिष्ठते।।

इति ३ काण्डे साधन ५६ समुद्देशे वाक्यपदीये उक्तम्। तत्र निवृत्तप्रेषणं स्वक्रियावयवे स्थितं कर्म कर्मत्वे निवर्तमाने सति स्वे कर्तृत्वेऽवतिष्ठत इति योजना। निवृत्तप्रेषणं = त्यक्तप्रेषणं, स्वक्रियावयवे = स्वनिष्ठकर्मतो नियामकधातुवाच्यैकदेशे फलरूपे, स्थितम् = अधीनतया स्थितं सत्। कर्मत्वे = कर्मसंज्ञायाम्, निवर्तमाने = प्रकृतधात्वर्थव्यापारव्यधिकरणफलाश्रयत्वाभावान्निवर्तमाने सति स्वे कर्तृत्वे अवतिष्ठते = धात्वर्थाश्रयत्वादवतिष्ठत इति तदर्थः। अत्र पक्षे पचादीनां धातुत्वं तु

भूतपूर्वभावनार्थत्वाद्बोध्यम्। एवं च "निवृत्तप्रेषणं कर्म" इत्यत्र पक्षे धात्वर्थव्यापाराश्रयत्वरूप-स्वातन्त्र्यलक्षणस्य कर्मकतर्यव्याप्तिरेवेति सत्यम्। एतदभिप्रायेणैव प्रधानधात्वर्थाश्रयत्वं स्वातन्त्र्यम्' इति लक्षणान्तरमाश्रितं कर्तृसंज्ञासूत्रे कौस्तुभे। अत एतदेव लक्षणमभिमतं दीक्षितस्य, व्यापकत्वात्। अत एव "प्रधानीभूतधात्वर्थं प्रत्याश्रयत्वं स्वातन्त्र्यम्" इत्येव मनोरमायां प्रदर्शितम्। धात्वर्थव्यापाराश्रयः कर्तेति तूत्सर्गः। निरुक्तरीत्या कर्मकर्तर्यव्याप्तेः। अत एव कर्तृसंज्ञासूत्रे शब्देन्दुशेखरे वैयाकरणनागेशेन "स्वातन्त्र्यं च प्रधानीभूतधात्वर्थाश्रयत्वम्" इत्येव दीक्षिताशयः प्रदर्शितः। सुबर्थवादमञ्जूषायामप्येतदेव परिष्कृत्य दीक्षिताशयत्वेन प्रदर्शितम्।

प्रधानीभूतधात्वर्थाश्रयत्वरूपस्वातन्त्र्यस्य कर्मकर्तरि व्याहतत्वेन नाव्याप्तिः। धात्वर्थाश्रयत्वमात्रोक्तौ चैत्रस्तण्डुलं पचतीत्यादौ धात्वर्थफलाश्रये तण्डुलादावतिव्याप्तिः। अतः प्रधानीभूतेति। मुख्यविशेषताश्रयत्वरूपं प्राधान्यं चैत्रेण पाचतीत्यादौ प्रयोज्यव्यापारेऽव्याप्तं पक्वस्तण्डुलश्चैत्रेणेत्यादौ विक्लित्त्यादौ फलेऽतिप्रसक्तं, तत्रैव व्यापारेऽव्याप्तं च। अतः कर्तृप्रत्ययसमभिव्याहारे तद्धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतानाश्रयधात्वर्थत्वरूपं प्राधान्यं स्वीकर्यम्। स्पष्टं चेदं शब्दरत्ने मञ्जूषायां च। अत्र प्रकारतानाश्रयत्वमित्येवोक्ते प्रयोज्यव्यापारादावव्याप्तिः, विशेष्यतानिरूपित-प्रकारतानाश्रयत्वमित्युक्तेऽपि तत्रैवाव्याप्तिः। धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतानाश्रयत्वमित्युक्तेऽपि सैव दोषः, अतो धात्वर्थमित्यन्तं विशेष्यम्। चैत्रः पचति भवति, पश्य मृगो धावतीत्यादौ पाकधावनादावव्याप्तिवारणाय धात्वर्थे तत्त्वम्। तथाच प्रत्यासत्त्या तद्धात्वर्थनिष्ठविशेष्यता-निरूपितप्रकारतानाश्रयत्वे सति तद्धात्वर्थत्वं लब्धम्। णिचो वाचकत्वेन ण्यन्तधातुतत्प्रकृतिधात्वोर्भिन्नत्वेन तदुभयवाच्यव्यापारयोः स्वस्वार्थं प्रत्युक्तरूपप्राधान्यसत्त्वाद्व्यापारद्वयाश्रययोः कर्तृत्वसिद्धिः। पक्वस्तण्डुलो देवदत्तोनेत्यादौ फलस्यैव प्राधान्यात्फलनिष्ठविशेष्यतानिरूपितप्रकारतापन्नव्यापारस्य निरुक्तप्राधान्याभावात्तदाश्रयस्य देवदत्तादेः कर्तृत्वानापत्तिर्दोषः। अतः कर्तृप्रत्ययसमभिव्याहार इति। तदुपादाने तु तृजादिप्रत्ययसमभिव्याहारे देवदत्तादेर्निरुक्तप्रधानीभूतधात्वर्थाश्रयत्वस्य सत्त्वेन तदादायात्रापि कर्तृत्वोपपतिः स्पष्टैव। नच धात्वर्थनिष्ठप्रकारता निरूपकधात्वर्थत्वं प्राधान्यमित्येव सिद्धे प्रकारतानाश्रयत्वनिवेशो व्यर्थ इति वाच्यम्। निवृत्तप्रेषणं कर्मेति पक्षे तण्डुलः पच्यते स्वयमेवेत्यादौ धात्वर्थे प्रकारताया अभावेन विशिष्टाभावात्तस्य प्राधान्यानापत्त्या तदाश्रयस्य तण्डुलादेः कर्तृत्वानापत्तेः। तादृशप्रकारतानाश्रयत्वनिवेशे तु कर्मकर्तरि धात्वर्थे विशिष्टमादाय तादृशप्रकारतानाश्रयत्वस्य सत्त्वेन प्रधानतया तदाश्रयस्य कर्तृत्वसिद्धिः स्पष्टैव।

यत्तु "व्यापारद्वयार्थनयत्यादियोगे संयोगानुकूलव्यापारानुकूलव्यापारस्य धात्वर्थतया संयोगनिष्ठप्रकारतानिरूपकस्यावान्तरव्यापारस्यापि प्राधान्यात्तदाश्रयस्याजादेरप्यजां ग्रामं नयतीत्यादौ कर्तृत्वापत्तिवारणाय प्रकारतानाश्रयत्वनिवेशः" इति शब्दरत्नव्याख्याने चित्रप्रभायामुक्तं, तन्न। अवान्तरव्यापारस्य प्रधानव्यापारे विशेषणत्वेन फलत्वात्तदाश्रयत्वेनाजायाः कर्तृत्वबाधनेन कर्मत्वस्यैव प्रवृत्तेः। अन्तरङ्गादपि प्रधानकार्यबलवत्त्वस्य "हेतुमति च" इत्याकरसम्मतत्वात्। व्यापारद्वयार्थकदुहादिधातावप्येवं न दोषः। ण्यन्तस्थले तु द्वयोरपि व्यापारयोः प्राधान्यं सर्वसम्मतमेव। अतो निरुक्तरीत्या कर्मकर्तर्यव्याप्तिवारणायैव प्रकारतानाश्रयत्वनिवेशः।

ननु कर्तृलक्षणे "कर्तृप्रत्ययसमभिव्याहारे" इति कर्तुः प्रवेशेनात्माश्रयापत्तिः। नच कर्मप्रत्ययसमभिव्याहारे धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतानाश्रयधात्वर्थत्वं प्राधान्यम्। तदुपहितव्यापाराश्रयत्वं कर्तृत्वमिति विवक्षणान्न दोष इति वाच्यम्। एवमपि कर्तृलक्षणे कर्मणः, कर्मलक्षणे कर्तुश्च प्रवेशेनान्योन्याश्रयस्य दुर्वारत्वात्। नच करणतानिरूपकधात्वर्थातिरिक्तधात्वर्थत्वं प्राधान्यम्। तद्विशिष्टव्यापाराश्रयत्वं च कर्तृत्वमतो न काप्यनुपपत्तिरिति चित्रप्रभाकारोक्तं युक्तम्। एवं सति करणव्यापारस्य प्राधान्यानापत्तौ काष्ठानि पचन्तीत्यादौ काष्ठादीनां कर्तृत्वानापत्तेः। नच तस्मिन् प्रयोगे करणतानिरूपकत्वं तस्य नास्तीति वाच्यम्। प्रयोगभेदेन लक्षणकरणे यस्मिन् प्रयोगे करणतानिरूपकधात्वर्थोऽप्रसिद्धस्तत्र प्रतियोग्यप्रसिद्ध्या तदतिरिक्तत्वस्याप्रसिद्धेस्तत्र लक्षणस्याव्याप्तेर्दुर्वारत्वादिति चेन्न। कर्तृप्रत्ययसमभिव्याहार इत्यनेन कर्तृवाचकतृजादिप्रत्ययसमभिव्याहार इत्यर्थस्य विवक्षणेनादोषात्। अत एवैतत्फलतया पक्वस्तण्डुल इत्यादौ फलस्य प्राधान्येऽपि चैत्रादेः कर्तृत्वसिद्धिरिति कृदन्तस्थलप्रदर्शनं शेखरादौ स्वरसतः सङ्गच्छते। अन्यथा पच्यत इत्याख्यातस्थलमपि प्रदर्शयेत्। अतः कर्तृप्रत्ययसमभिव्याहार इत्यस्य तृजादिप्रत्ययसमभिव्याहार इत्येवार्थः स्वीकार्यः। एवं च धात्वर्थव्यापाराश्रयत्वस्य "निवृत्तप्रेषणं कर्म" इति पक्षे कर्मकर्तर्यव्याप्ततया प्रधानीभूतधात्वर्थाश्रयत्वं स्वातन्त्र्यमित्येव दीक्षितस्याभिमतं लक्ष्यते। नचैतत्पक्षे फले व्यापारत्वारोपान्ना व्याप्तिरिति दर्पणोक्तं युक्तम्। "धातुत्वं तु भूतपूर्वभावनार्थत्वात्" इति कौस्तुभपर्यालोचनयाऽऽरोपानुसरणस्य दीक्षितानभिमतत्वलाभात्। कौण्डभट्टस्तु अध्यारोपपक्षाश्रयणेन "स्वातन्त्र्यं च धात्वर्थव्यापाराश्रयत्वम्" इत्युररीचकारेत्यलम्।

यत्तु "न धातूपात्तव्यापारश्रयत्वं कर्तृत्वम्। नञ्समभिव्याहारे न पचतीत्यादौ धातूपात्तव्यापारानाश्रये चैत्रादावव्याप्तेः। अतो यद्धात्वर्थावच्छिन्नलिङ्गानन्वयिपदोपस्थाप्यार्थाश्रयत्वं यस्य तस्य, तद्धात्वर्थकर्तृत्वम्।

चैत्रः पचतीत्यादौ धात्वर्थावच्छिन्नकृत्याश्रयत्वात्कर्तृत्वम्। चैत्रः पाचक इत्यादौ कृदर्थकृत्याश्रयत्वात्कर्तृत्वम्। चैत्रस्य पाक इत्यादौ लक्षणया प्रकृत्युपस्थाप्यपाकावच्छिन्नव्यापाराश्रयत्वे कर्तृत्वम्। घञादीनां वा व्यापारे लक्षणा। चैत्रस्येति सम्बन्धसामान्ये षष्ठीति वा। अस्तीत्यध्याहृतप्रधानक्रियायामन्वयः। पाचयति चैत्रो मैत्रेणेत्यादौ मैत्रस्य धात्वर्थपाकानुकूलकृत्याश्रयत्वात्, चैत्रस्याख्यातोपात्तकृत्याश्रयत्वात्वर्तृत्वम्। कर्माख्याते फलस्य संसर्गलभ्यतया तदाश्रये ओदनादावतिव्याप्तिवारणाय पदोपस्थाप्येति। वस्त्वादिपदोपात्तभावनायाश्चैत्रादावन्वयवारणाय लिङ्गानन्वयीति। चैत्रो न पचतीत्यादौ चैत्रवृत्तिपाकभावना अभावप्रतियोगिनीति बोधः" इति भाट्टरहस्ये खण्डदेवः।

तन्न। वैयाकरणनये नञ आरोपितत्वद्योतकतया चैत्रवृत्तिरारोपितः फलानुकूलो व्यापार इति बोधेन धातूपात्तव्यापाराश्रत्वरूपकर्तृत्वस्याव्याप्तेरभावात्। किञ्च चैत्रः पाचक इत्यादौ प्रत्ययार्थकृत्याश्रयत्वाकर्तृत्वमिति भवदुक्तमसङ्गतम्। पाचक इत्यादौ कृतां कर्तृवाचकताया मीमांसाकौस्तुभे भवतैव प्रतिपादितत्वेन तेषां कृतिवाचकत्वायोगात्। चैत्रस्य पाक इत्यादौ प्रकृत्यर्थाश्रयत्वेन कर्तृत्वोपपादनात्सर्वत्रापि तथैवोचितम्। किञ्च घञो व्यापारलक्षकत्वमयुक्तम्। भावे विधायकानुशासनवैयर्थ्यापत्तेः। चैत्रस्य पाक इत्यादौ सम्बन्धसामान्ये षष्ठीत्यप्यसङ्गतम्। "कर्तृकर्मणोः कृति" २-३-६५ इत्यस्य वैयर्थ्यापत्तेः। मैत्रेण चैत्रः पाचयतीत्यादौ प्रयोजकस्याख्यातार्थव्यापाराश्रयत्वेन कर्तृत्वप्रतिपादनमप्यसङ्गतमिति "किं कार्यं पचनीयम्" इति कारिकाव्याख्याने मूल एव स्पष्टं प्रतिपादितमित्यलम्।

यत्तु "कृत्याश्रयः कर्ता। कृधातोः कृतिवाचकत्वात्। तृचश्चाश्रयवाचकत्वात्। युक्तं चैतत्। योगार्थबलात्। आश्रयांशस्य प्रकृत्यैव लाभात्कृतिरेव तृतीयार्थः" इति नैयायिकाः।

तन्न। कृतेरपि धातुलभ्यताया धात्वर्थनिर्णये प्रतिपादितत्वात्। नैयायिकोक्तलक्षणस्य स्थाली पचतीत्यादावचेतनेऽव्याप्तेश्च। तत्र व्यापारे लक्षणापेक्षयाऽस्मदुक्तस्यैवोचितत्वादित्यलं पल्लवितेन।

स्वोक्तार्थे हरिसम्मतिं दर्शयति [धातुनेति] उक्ता = उपात्ता क्रिया = व्यापारो यस्मिंस्तत्, तस्मिन्। धातूपात्तव्यापाराश्रय इत्यर्थः। तादृशे, कारके नित्यं = सर्वदा, कर्तृता = कर्तृसंज्ञा, इष्यते भाष्यकृद्भिरिति भावः। "स्थालीस्थे यत्ने पचिना कथ्यमाने स्थाली स्वतन्त्रा" इति हि "कारके" इति सूत्रे भाष्यकृतः। तादृशे कारके कर्मत्वादिवारणार्थं कारिकायां नित्यग्रहणम्।

अत एव यदा यदीयो व्यापारो धातुनाऽभिधीयते तदा स कर्तेति स्थाली पचति, अग्निः पचति, एधांसि पचन्ति, तण्डुलः पच्यते स्वयमेवेत्यादि सङ्गच्छते।

नन्वेवं "कर्मकर्तृव्यपदेशाच्च" [ब्र. सू. १-२-४] इति सूत्रे "मनोमयः प्राणशरीरः" इति वाक्यस्थमनोमयस्य जीवत्वे वाक्यशेषे तस्य "एतमितः प्रेत्याभिसम्भविताऽस्मि" इति प्राप्तिकर्मत्वकर्तृत्वव्यपदेशो विरुद्ध इति भगवता व्यासेन निर्णीतं कथं सङ्गच्छताम्? उच्यते - जीवस्यैव ज्ञेयत्वे प्राप्तिकर्मत्वमपि वाच्यम्। कर्तृत्वं च तस्याऽऽख्यातेनोक्तम्। न चैकस्यैकदा संज्ञाद्वयं युक्तम्। कर्तृसंज्ञया कर्मसंज्ञाया बाधात्। तथा चैत्रमिति द्वितीया न स्यात्। कर्मकर्तृतायां च यगाद्यापत्तिरिति शब्दविरोधद्वारा भवति स भेदहेतुः। एवं च व्यापाराश्रयस्य धातुलभ्यत्वादाश्रयमात्रं तृतीयार्थः। कारकचक्रप्रयोक्तृत्वं कृत्याश्रयत्वं वा 'दण्डः करोति' इत्यत्राव्याप्तम्।

अयं च त्रिविधः - शुद्धः, प्रयोजको हेतुः, कर्म कर्ता च। मया हरिः सेव्यते। कार्यते हरिणा। गमयति कृष्णं गोकुलम्। मदभिन्नाश्रयको हरिकर्मकसेवनानुकूलो व्यापारः, हर्यभिन्नाश्रयक उत्पादनानुकूलो व्यापारः, गोकुलकर्मकगमनानुकूलकृष्णाश्रयक-व्यापारानुकूलो व्यापार इति शाब्दबोधः।

[अत एवेति] धातूपात्तव्यापाराश्रयत्वरूपस्वातन्त्र्यस्य विवक्षणेन तदाश्रयस्य कर्तृत्वस्वीकारादेवेत्यर्थः। [यदा यदीय इति] एतदर्थमेव सूत्रे स्वतन्त्रपदोपादानम्। इदं च "कारके" इति सूत्रे भाष्य स्पष्टम्। [धातुनाभिधीयत इति] सर्वेषामपि कारकाणां व्यापारा धातुनाभिधीयन्ते। परंतु यत्कारकनिष्ठो व्यापारो वक्तृबुद्धिस्थः, स एव धातुनाभिधीयते। यन्निष्ठो व्यापारोऽभिधीयते धातुना तदेव करकं कर्तृसंज्ञम्। तस्यामवस्थायां कारकान्तरनिष्ठा व्यापारा नाभिधीयन्ते। तद्दशायां तेषां करणत्वादिकमेव। युगपदेव तु सर्वकारकनिष्ठा व्यापारा नाभिधीयन्ते। किंतु वक्तृविवक्षानुसारेण यत्किञ्चिदेककारकनिष्ठ एवाभिधीयते। तत्रापि संप्रदानापादननिष्ठव्यापारस्तु धातुना कदापि नाभिधीयत एव, शब्दशक्तिस्वाभाव्यादिति भावः। यदीय इत्यस्य यदर्थनिष्ठ इत्यर्थः। अभिधीयते = कर्तृविवक्षानुसारेण धातुनोच्यते, तदा = तस्यामवस्थायाम्। सः अर्थः। इति = इति हेतोः। [स्थाली पचतीति] पाकक्रियासौकर्यद्योतनाय चैत्रादिगतव्यापारस्य धात्वर्थत्वेनाविवक्षायां कारकान्तरनिष्ठव्यापारस्य धात्वर्थत्वेन विवक्षायां तादृशव्यापाराश्रयत्वेन कारकान्तराणामपि कर्तृत्वं सिद्ध्यति।

अधिश्रयणोदकासेचनतण्डुलावपनैधोपकर्षणादिक्रियाणां पच्यर्थत्वविवक्षायां तदाश्रयत्वेन कारकान्तराणामपि कर्तृत्वं सिद्ध्यति। अधिश्रयणोदकासेचनतण्डुलावपनैधोपकर्षणादिक्रियाणां पच्यर्थत्वविवक्षायां तदाश्रयत्वेन चैत्रादेः कर्तृत्वम्। निरुक्तव्यापाराणां पच्यर्थत्वेनाविवक्षापूर्वकं स्थालीनिष्ठव्यापारस्यैव पच्यर्थत्वेन विवक्षायां स्थाल्याः कर्तृत्वम्। स्थिरत्वादाक्रियासमाप्तेस्तण्डुलानां धारणं स्थालीनिष्ठो व्यापारः। अत्र सौकर्यमनायासेन पाकाश्रयत्वम्। तच्च कर्तृव्यापारस्येषत्वेन। कर्तृव्यापाराविवक्षायामप्यनुदरा कन्येतिवत्तत्र पर्यवसानम्। ईषत्त्वादेव तस्य स्वातन्त्र्येण धात्ववाच्यत्वमिति धारणमात्रवृत्तित्वं पचेर्बोध्यम्। धातूनामनेकार्थत्वात्पचतेर्धारणार्थकत्वम्। एषोऽधिकरणकर्तेत्युच्यते। यथा स्थाली तण्डुलं पचतीति। करणकर्तारमुदाहरति [अग्निरिति]। [एधांसीति] सकारान्तमिदं नपुंसकम्। अकारान्तस्तु पुमान्। तथाच "कारके" इति सूत्रे "एधाः पक्ष्यन्ति" इति भाष्ये प्रयोगः। अत एव "एधाः कर्तारः" इति कारकप्रकरणे मनोरमाप्रयोगः सङ्गच्छते। ज्वलनरूपव्यापारस्य विक्लित्त्यनुकूलतया पच्यर्थत्वे तदाश्रयस्य कर्तृत्वम। यथा एधांसि तण्डुलं पचन्ति, अग्निस्तण्डुलं पचतीति। कर्मकर्तारमुदाहरति - [तण्डुलः पच्यत इति] तण्डुलवृत्तिविक्लित्तेर्व्यापारसमानाधिकरणस्य पच्यर्थत्वेन तदाश्रयत्वात्तण्डुलस्य कर्तृत्वम्। अत्र पचतिरकर्मक एव। "कर्मवत्कर्मणा तुल्यक्रियः" इत्यतिदेशेन यगात्मनेपदादिकम्। अधिकरणकर्तरि करणकर्तरि च पचिः सकर्मक एव। द्विकर्मकाणामेकस्य कर्मणः प्राधान्यविवक्षायामपि अपरेण सकर्मकत्वमस्त्येव। यथा - स्वयं प्रदुग्धेऽप्यगुणैरुपस्तुता वसूपमानस्य वसूनि मेदिनी" इत्यादौ। संप्रदानापादानयोस्तु न कर्तृत्वविवक्षेति समनन्तरमेवोक्तम्। अत एव ब्राह्मणाय ददातीत्यर्थे ब्राह्मणो ददातीति, वृक्षात्पततीत्यर्थे वृक्षः पततीति च न प्रयोगः। विप्रोऽनुमन्यते, वृक्षोऽवधिभावमुपगच्छतीत्यादौ स्वस्वप्रवृत्तयोः कर्तृत्वं दृश्यते। दाधात्वादिवाच्यत्वं तु न तद्व्यापारस्यानभिधानादित्यन्यत्र विस्तरः। [इत्यादीति] आदिना द्रोणः पचति, आढकं पचति, असिना चैत्रो वृक्षं छिनत्ति, असिश्छिनत्ति, छिद्यते वृक्षः स्वयमेवेत्यादेर्ग्रहणम्। [सङ्गच्छत इति] "स्वतन्त्रः कर्ता" इति सूत्रे स्वतन्त्रशब्देन धातूपात्तव्यापाराश्रयस्य ग्रहणेन निरुक्तसर्वव्यवहारः सङ्गच्छते। अन्यथा सूत्रे स्वतन्त्रशब्देन पूर्वपक्षभाष्योक्तरीत्या तन्तुवायस्यैव ग्रहणे तु निरुक्तव्यवहारानिर्वाहः स्पष्ट एवेति भावः। स्पष्टं चेदं सर्वं भाष्ये सूक्ष्मदृशाम्। स्थाल्यादिनिष्ठव्यापारस्य धात्वर्थत्वेनाविवक्षणे तु तस्य करणत्वादिकं प्रवर्तते। स्थाल्या पचति स्थाल्यां पचति, अग्निना पचति, काष्ठैः पचति, तण्डुलं पचति एतेन "एद्व्यापारस्य धातुनाभिधाने काष्ठेन पचतीति न स्यात्। अनभिधाने काष्ठं पचतीति न स्यात्" इत्यापास्तम्। विवक्षावशेन सर्वस्यापि व्यवहारस्य सूपपादत्वात्।

यदा यो धातूपात्तव्यापाराश्रयस्तदा स कर्तेति स्वीकारेण एकस्य कर्तृत्वकर्मत्वादेरङ्गीकारे वेदान्तशास्त्रविरोधमाशङ्क्य परिहरति [नन्विति] एवम् = एकस्य कर्तृत्वकर्मत्वाङ्गीकारे। [सूत्र इति] अस्य "भगवता व्यासेन निर्णीतं कथं सङ्गच्छताम्" इत्यत्रान्वयः। छान्दोग्ये श्रूयते "सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत। अथ खलु क्रतुमयः पुरुषो यथा क्रतुरस्मिंल्लोके पुरुषो भवति, तथेतः प्रेत्य भवति स क्रतुं कुर्वीत। मनोमयः प्राणशरीरो भारूपः" इति। तस्मिन् जायत इति तज्जम्, तस्मिन् लीयत इति तल्लम्, तस्मिन् अनिति = चेष्टत इति तदनम्, तज्जं च तल्लं च तदनं चेति तज्जलान्। तज्जलानमिति वक्तव्ये "सुपां सुलक्" ७-१-३९ इत्यादिना द्वितीयाया लुक्। क्रतुः = संकल्पो ध्यानमित्यर्थः। मनोमय इत्यादौ "व्यत्ययो बहुलम्" ३-१-८५ इति बाहुलकाद्व्यत्ययेन द्वितीयार्थे प्रथमा। मनोमयं प्राणशरीरं भारूपं ध्यायेदित्यर्थः। तत्र मनोमयत्वादिभिर्धर्मैः शारीरः (जीवः) आत्मोपास्यत्वेनोपदिश्यते, आहोस्वित्परं ब्रह्मेति संशये, शरीर एवोपास्यत्वेनोपदिश्यते। जीवस्य हि कार्यकरणाधिपतेः प्रसिद्धो मन आदिभिः सम्बन्धो, न परस्य ब्रह्मणः। "अप्राणो ह्यमनः शुभ्रः" मुण्ड २-१-२ इत्यादिश्रुतिभ्य इति पूर्वपक्षे, "सर्वत्र प्रसिद्धोपदेशात्" १-२-१। "विवक्षितगुणोपपत्तेश्च" १-२-२ इति सूत्राभ्यां परमेव ब्रह्म मनोमयत्वादिभि र्धर्मैरुपास्यमिति सिद्धान्तयित्वा, ततः "अनुपपत्तेस्तु न शरीरः" १-२-३ इति सूत्रेण परं ब्रह्मैव मनोमयत्वादिगुणं, नतु शरीरो जीवो मनोमयत्वादिगुण इति प्रतिपाद्य, तत्प्रसङ्गे "कर्मकर्तृव्यपदेशाच्च" १-२-४ इति सूत्रितं भगवता व्यासेन सर्वत्र प्रसिद्ध्यधिकरणे प्रथमाध्याये द्वितीयपादे। "अनुपपत्तेस्तु न शरीर" इति सूत्रे तुशब्दोऽवधारणार्थः। प्रवृत्सूत्रे नेति, शारीर इति चानुवर्तते। कर्मकर्तृव्यपदेशादपि न शारीरो मनोमयत्वादिगुण इति व्याससूत्रार्थः।

निर्णीतमर्थं दर्शयति [मनोमय इत्यादिना] मनोमयस्य = मनोमयशब्दवाच्यस्य। वाक्यशेषे = एष म आत्मान्तर्हृदय एतद् ब्रह्म इत्यस्मादनन्तरं विद्याने वाक्ये। तस्य = मनोमयस्य। एतमित्यादि इतः = शरीरात्, प्रेत्य = निस्सृत्य एतच्छरीरं परित्यज्येति यावत्। एतं = प्रकृतं मनोमयमात्मानम्। अभिसम्भवितास्मि = प्राप्तास्मि। अभिसमुपसृष्टात्प्राप्त्यर्थका'वतेरात्मनेपदिनो बाहुलकाद्व्यत्ययेन लुटः स्थाने परस्मैपदम्। [प्राप्तिकर्मत्वेति] अभिसम्भवितास्मीत्यत्र भवतेः प्राप्त्यर्थकत्वादिति भावः। [विरुद्ध इति] छान्दोग्यश्रुतिरेतमिति प्रकृतं मनोमयत्वादिगुणमुपास्यमात्मानं कर्मत्वेन प्राप्यत्वेन व्यपदिशति। अभिसम्भवितास्मीति शारीरकमुपासकं कर्तृत्वेन प्रापकत्वेन व्यपदिशति श्रुतिः। नच सत्यां गतवेकस्य कर्मकर्तृव्यपदेशो युक्तः। आत्मानमात्मना हन्तीत्यादौ तु गत्यभावादेकस्यैव कर्तृत्वकर्मत्वे स्यातां

नाम। तथोपास्योपासकभावोऽपि भेदाधिष्ठान एव। तस्मादपि न शारीरो मनोमयत्वादिगुणविशिष्ट इति भावः। [कथं सङ्गच्छतामिति]। शाब्दिकमते वैवक्षिकयोः कर्तृत्वकर्मत्वयोरेकस्मिन्नपि सत्त्वे बाधकाभावेन एकस्यैव जीवस्य तदुभयसत्त्वे बाधकाभावाद्व्यासेन निर्णीतं विरुध्येतेति भावः।

एकस्य समयभेदेन संज्ञाद्वयसम्भवेपि न युगपत्तत्सम्भवः। प्रकृतश्रुतौ तु युगपदेव संज्ञाद्वयप्रयुक्तकार्यद्वयोपलम्भो विरुद्ध इति नास्माकं व्याससिद्धान्तविरोध इत्याशयेन समाधत्ते [उच्यत इति] तस्य = जीवस्य। [न चेति] नहीत्यर्थः। [एकस्यैकदेति] यन्निष्ठो व्यापारो धातुनाभिधीयते तस्य कर्तृत्वम्। अन्येषां तु यथायथं करणत्वादि। न ह्येकस्यैकदा कर्तृत्वं करणत्वादिकं च सम्भवति। परया कर्तृसंज्ञया बाधात्। नह्येकदा सर्वेषां कारकाणां व्यापारा धातुनाभिधीयन्ते। अत एव चैत्रस्तण्डुलः काष्ठं स्थाली पचतीत्यादयो न प्रयोगाः। अत एव समयभेदेन चैत्रस्तण्डुलं पचति काष्ठेन, पच्यते तण्डुलः स्वयमेव, काष्ठं पचति, स्थाली पचतीत्यादयः प्रयोगा उपपद्यन्ते। प्रकृते त्वेकस्मिन्नेव समय एकस्यैव जीवस्य कर्तृत्वं कर्मत्वं च वाच्यम्। तन्नोपपद्यते, परया कर्तृसंज्ञया कर्मसंज्ञाया बाधात्। तथाचैतमिति द्वितीया न स्यादिति शब्दविरोधद्वारा संज्ञाद्वयविरोधो भवति भेदहेतुरित्याशयः। [तथा चेति] कर्तृसंज्ञया कर्मसंज्ञाया बाधे चेत्यर्थः। [द्वितीया न स्यादिति] तत्प्रयोजककर्मसंज्ञाया अभावादित्यर्थः। कर्मणः कर्तृत्वे दूषणान्तरमप्याह [कर्मकर्तृतायामिति] [यगाद्यापत्तिरिति] आदिपदग्राह्यात्मनेपदापत्तिरिति भाव इति काशिकाकाराः। "यगाद्यापत्तिरिति - अभ्युपगमवादेन (वादिबलनिरीक्षणार्थं निर्दिष्टस्य स्वीकरणवादेन) इयमुक्तिः। यगादेस्तासादिना बाधात्। प्राप्ये कर्मणि कर्मवद्भावाभावाच्च" इति तु पञ्चोलिनः।

सः = संज्ञाद्वयविरोधः। [भेदहेतुरिति] उपास्योपासकयोः परजीवयोः कर्मकर्त्रोर्भेदहेतुरित्यर्थः। तथाच संज्ञाद्वयविरोधमादायैवाधिकरणसिद्धान्तसङ्गतिः, नतु कर्तृत्वकर्मत्वयोः पारमार्थिकं विरोधमादाय। अत एव भगवता व्यासेन "व्यपदेशात्" इत्येवोक्तम्। व्यपदेशादित्यस्य निर्देशादित्यर्थः। अन्यथा कर्तृत्वकर्मत्वाभ्यामित्याद्येवावक्ष्यत। तथाच मनोमयशब्देन परमात्मैव गृह्यत इति सिद्धमिति नोक्ताधिकरणविरोध इति तात्पर्यार्थः। एवम् "अधिकं तु भेदनिर्देशात्" २-१-२२ "भेदव्यपदेशात्" १-३-५ इत्यादावपि द्रष्टव्यम्।

ननूक्तरीत्या धात्वर्थव्यापाराश्रयस्य कर्तृत्वलाभात्तादृशव्यापाराश्रयस्य तृतीयार्थत्वमायातम्, नतु त्वदुक्तरीत्याऽऽश्रयमात्रस्येत्यत आह [एवं चेति] धातूपात्तव्यापाराश्रयस्य स्वतन्त्रपदार्थत्वेन विवक्षितत्वे चेत्यर्थः। [आश्रयमात्रमिति] अनन्यलभ्यत्वादित्यर्थः।

यत्तु माधवाचार्याः -

"प्रागन्यतः शक्तिलाभान्न्यग्भावापादनादपि।
तदधीनप्रवृत्तित्वात्प्रवृत्तानां निवर्तनात्।। ९९
अदृष्टत्वात्प्रतिनिधेः प्रविवेके च दर्शनात्।
आरादप्युपकारित्वात् स्वातन्त्र्यं कर्तुरुच्यते।।३ काण्ड साधन १००

इति वाक्यपदीयमवलम्ब्य कारकचक्रप्रयोक्तृत्वं कर्तृत्वमित्याहुः। तदयुक्तमित्याह [कारकचक्रेति] कृञ् धातोः कृतिवाचकतया तदुत्तरतृच्प्रत्ययस्याश्रयार्थकतया योगमर्यादया कृत्याश्रयत्वं कर्तृत्वमिति नैयायिकोक्तमप्ययुक्तमित्याह [कृत्याश्रयत्वमिति]। [अव्याप्तमिति] अचेतने घटादौ कारकचक्रप्रयोक्तृत्वस्य, कृत्याश्रयत्वस्य च बाधादिति भावः। व्यापाराश्रयत्वं तु तत्राबाधितमेवेति न दोषः।

कर्तारं विभजते [अयं चेति] [शुद्ध इति] शुद्धत्वं च हेतुत्वानाश्रयत्वे सति सामानाधिकरण्येन कर्मत्वविशिष्टकर्तृत्वानधिकरणत्वरूपम्। [प्रयोजक इति] "तत्प्रयोजको हेतुश्च" १-४-५५ इति शास्त्रात्। [कर्मकर्तेति] अणौ कर्तुः "गतिबुद्धि" इत्यादिना कर्मसंज्ञाविधानात्कर्तृसंज्ञाया बाधेऽपि प्रकृतधातूपात्तव्यापाराश्रयत्वरूपकर्तृत्वस्य सत्त्वात्कृष्णादेः कर्मकर्तृत्वेन व्यवहार इति भावः। [कार्यत इति] करोतेर्ण्यन्तात्कर्मणि लकारः। अत्र हरिर्हेतुकर्ता।

यत्तु कारकपरीक्षायां पञ्चविधः कर्तेति प्रतिज्ञाय अभिहितकर्ता अनभिहितकर्ता चेति भेदद्वयमधिकमुक्तं, तदयुक्तम्। मूलोक्तत्रयस्यैवाभिधानमनभिधानं चेति तदतिरिक्तभेदाभावात्। अन्यथा त्रयाणामपि अभिधानानभिधानाभ्यां भेदषट्कापत्त्या कर्तुः पञ्चविधत्वासङ्गतिः। किञ्च कर्म सप्तविधमित्यप्यसङ्गतं स्यात्। तस्यापि तदुक्तरीत्या नवविधत्वापत्तेरिति दिक्।

नागेशोपाध्यायस्तु "तद्धात्वर्थीयकारकचक्रप्रयोक्तृत्वं सूत्रे स्वातन्त्र्यम्। अत्र च "कारके" इति सूत्रस्थं भाष्यं मानम्। एवं स्वेच्छाधीनप्रवृत्तिनिवृत्तिकत्वमपि सूत्रे स्वातन्त्र्यम्। एतच्च "स्वतन्त्रः कर्ता" इति सूत्रे भाष्ये स्पष्टम्। धात्वर्थव्यापाराश्रयत्वं स्वातन्त्र्यमिति तु न युक्तम्। स्वतन्त्रपदस्य तत्रापरिभाषणात्। लोके उक्तार्थयोरेव तत्प्रवृत्तेः। निरुक्तभाष्यार्थप्रतिपादक एव "प्रागन्यतः शक्ति लाभात्" इत्यादि र्हरिग्रन्थः" इत्यभिप्रैति।

क्रमेण बोधस्वरूपमाह [मदभिन्नेति]

करणतृतीयायास्त्वाश्रयव्यापारौ वाच्यौ। तथा हि - "साधकतमं करणम्"। तमबर्थः प्रकर्षः। स चाव्यवानेन फलजनकव्यापारवत्ता। तादृशव्यापारवत्कारणं च करणम्।

उक्तं च वाक्यपदीये -

क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम्।
विवक्ष्यते यदा तत्र करणं तत्तदा स्मृतम्।।
वस्तुतस्तदनिर्देश्यं न हि वस्तु व्यवस्थितम्।
स्थाल्या पच्यत इत्येषा विवक्षा दृश्यते यतः।। इति।।

विवक्ष्यत इत्यनेन सकृदनेकेषां तदभावाद् द्वितीया सप्तम्यादेरवकाशं सूचयति। न चैवं "कर्ता शास्त्रार्थ वत्त्वात्" [ब्र. सू. २-३-३३] इत्युत्तरमीमांसाऽधिकरणे "शक्तिविपर्ययात्" [ब्र. सू. २-३-३८] इति सूत्रेणान्तः करणस्य कर्तृत्वे करणशक्तिविपर्यया पत्तिरुक्ता न युज्येतेति वाच्यम्। "तदेवैतेषां प्राणानां विज्ञानेन विज्ञानमादाय" इति श्रुत्यन्तरे करणतया क्लृप्तस्य कर्तृतां प्रकल्प्य शक्तिविपर्ययापत्तिर्निष्प्रमाणा कल्प्येतेत्यभिप्रायात्। वस्तुतस्त्वभ्युच्चयमात्रमेतदिति "यथा च तक्षोभयथा" [ब्र. सू. २-३-४०] इत्यधिकरणे भाष्ये एव स्पष्टमित्यादि प्रपञ्चितं भूषणे।

एवं कर्तृतृतीयाया अर्थं निरूप्य करणतृतीयाया अर्थं निरूपयति [करणतृतीयायास्त्विति] [आश्रयव्यापाराविति]। नच व्यापारस्य धातुलभ्यतया करणतृतीयायास्तत्र शक्तिकल्पनमयुक्तमिति वाच्यम्। कर्तृनिष्ठव्यापारस्य धातुलभ्यत्वेऽपि अनुभूयमानकरणनिष्ठव्यापारस्य धातुनाऽलाभात्। अन्यथा धातूपात्तव्यापाराश्रयत्वेन रामेण बाणेन हतो वालीत्यादौ बाणादेः कर्तृत्वमेव स्यात्, नतु करणत्वम्। एवं च "आश्रयोऽवधिरुद्देश्यः" इति मूले आश्रयपदं व्यापारस्याप्युलक्षणम्। स्पष्टं चेदं भूषणे। नच तस्य संसर्गलभ्यत्वं, प्रकारतयैव भानस्यानुभवसिद्धत्वात्। उक्तं च कौतुभेऽपि "स्थाल्या पचतीत्यत्र तृतीयोपात्तव्यापाराश्रयोऽपि स्थाली करणमेव, न कर्त्री, देवदत्तादिव्यापारस्यैव तत्र धातूपात्तत्वात्" इति। एवं च "तस्य संसर्गविधया लाभान्न तस्य वाच्यत्वम्। आश्रयोऽवधिरिति मूलस्वारस्यात्" इति दर्पणोक्तमयुक्तमेवेति बोध्यम्।

[प्रकर्ष इति] स च कारकान्तरापेक्षया, नतु करणान्तरापेक्षया। कारकसामान्यवाचिनः साधकशब्दादुत्पद्यमानेन तमपा तत एव प्रकर्षबोधनात्। उक्तं च हरिणा -

स्वकक्ष्यासु प्रकर्षश्च करणानां न विद्यते।
आश्रितातिशयत्वं तु परतस्तत्र लक्षणम्।। इति। साधन - ९२

अत एवाश्वेन पथा दीपिकया व्रजतीत्यादौ सर्वेषामपि करणत्वात् तृतीया।

ननु क्रियासंसिद्धौ सामग्र्याः साधनत्वात्कोऽतिशयः करणस्य, येन तत्साधकतमं स्यादित्यत आह [स चेति] प्रकर्षश्चेत्यर्थः। [फलजनकव्यापारेति] तद्यथा - छेदने दात्रमनुप्रविश्यच्छेद्यावयवविभागं साधयत्प्रकृष्टामुपकारकतामासादयत्यधिकरणादिकारकान्तरेभ्यः। एवं दर्शने चक्षुः प्रणिधीयमानमित्याद्युदाहार्यम्। उक्तार्थे हरिं प्रमाणयति [उक्तं चेति] कारिकायां क्रियापदं फलपरम्। यद्व्यापारादित्यत्र अनन्तरशब्दयोगे "दूरानतिकार्थैः षष्ठ्यन्यतरस्याम्" इति सूत्रेण पञ्चमी। यत्रेत्यस्य येषां कारकाणां मध्य इत्यर्थः। ननु साधनसमुद्देशप्रारभ्ये "साधनव्यवहारश्च बुद्ध्यवस्थानिबन्धनः" ३ इत्युक्ततया तेनैव सिद्धेऽत्र विवक्ष्यत इत्यधिकं पुनरुक्तं चेति चेत्, उच्यते। साधनान्तराणां वास्तवेऽप्याधारादिभावे बुध्याऽन्यथात्वम्। यथा स्थाल्या पच्यत इत्यादौ। करणस्य तु रूपमेव विवक्षाधीनमतो न तत्पुनरुक्तम्।

ननु साधनमात्रस्यैकस्मिन्नेव प्रयोगे करणतापत्तिः, सर्वस्यापि अव्यवधानेन फलानुकूलव्यापारवत्वादत आह [विवक्ष्यत इत्यनेनेति] अनेकेषां = कारकाणाम्। तदभावात् = अव्यवधानेन फलजनकव्यापारवत्त्वाभावात्। एतदेवाहानन्तरकारिकया [वस्तुत इति] वस्तुनीत्यर्थः। सार्वविभक्तिकस्तसिः। तत् = कारकत्वं, तद्व्याप्यकर्तृत्वादिषट्कं च। अनिर्देश्यम् = इदं वस्तु कर्तैव, इदं वस्तु करणमेवेत्यादिक्रमेण न निर्देश्यमित्यर्थः। हि = यतः, वस्तु तत्तद्रूपेण न व्यवस्थितम्। तामेवाव्यवस्थां दर्शयति [स्थाल्येत्यादि] निश्चिताधकरणत्वापि स्थाली तनुतरकपालत्वाच्छीघ्रतरपाकसाधनत्वेनानुभवति वैवक्षिकं करणत्वम्। विवक्षेत्यनेन विवक्षैव व्याकरणेऽङ्गं, न ब्राह्यवस्तुसत्तेति बोध्यते। अत एव दात्राद्यनादरेण बलस्य तत्त्वविवक्षायां बलेन लुनातीत्यादि भवति। स्पष्टं चेदं हेलाराजीये। एवं च यथा विशेषणत्वादि खञ्जकुब्जादावव्यवस्थितमेवं कारकत्वं तद्व्याप्यं कर्तृत्वादिषट्कं चाप्यवस्थितमेवेति भावः। तण्डुलानोदनं पचतीत्यत्र करणत्वाविवक्षयाऽकथितकर्मकारकस्यापि तण्डुलस्य तण्डुलानामोदनं पचतीत्यादावोदनपदार्थान्वयेन

षष्ठ्यन्ततादर्शनात्कारकत्वस्य व्यभिचारो द्रष्टव्यः। गौः सर्वं प्रति गौरेव भवति, नतु किञ्चित्प्रत्यगौः। तद्वत् कारकत्वादि न नियतं, किं तु विशेषणत्वादिवदनियतमेवेति तात्पर्यम्।

एकस्मिन्नेव धर्मिणि विवक्षया करणत्वकर्तृत्वयोः स्वीकारे प्रसक्तमुत्तरमीमांसाधिकरणसिद्धान्त-विरोधमुद्भाव्य परिहरति [नचेति] एवं = विवक्षाया एव नियामकत्वे। [शास्त्रार्थवत्त्वादिति] तद्गुणसारत्वाधिकारेणैवापरोऽपि जीवधर्मोऽनेन प्रपञ्च्यते। कर्ता चायं जीवः, कस्मात्, शास्त्रार्थवत्त्वात्। यजेत, दद्यात्, जुहुयात् इत्यादेश्शास्त्रस्य "एष हि द्रष्टा श्रोता मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुषः" इत्यादेः शास्त्रस्य चार्थवत्त्वात्। अन्यथा तदनर्थकं स्यात्। तद्धि कर्तुः सतः कर्तव्यविशेषमुपदिशति। असति कर्तृत्वे तन्नोपपद्येत। अतो जीवः कर्तेति तत्सूत्राशयः। ननु बुद्धेः कर्तृत्वाश्रयणेन शास्त्रस्यार्थवत्त्वमस्तु, किं जीवस्य कर्तृत्वेनेति चेन्न। मयेदं कर्तव्यमिति बोधसमर्थस्यैव कर्तृत्वस्य वाच्यत्वेनाचेतनाया बुद्धेस्तत्त्वासम्भवात्। अतो जीव एव कर्ता, न बुद्धिरित्यधिकरणार्थः। [शक्तिविपर्ययादिति] इदं च सूत्रं विज्ञानशब्दवाच्यबुद्धिव्यतिरिक्तस्य जीवस्य कर्तृत्वं प्रतिपादयति। यदि पुनर्बुद्धिरेवकर्त्री स्यात्, ततः श्रुत्यन्तरे बुद्धेः क्लृप्ता करणशक्तिर्हीयते। कर्तृशक्तिश्चापद्येत। बुद्धेः कर्तृत्वे तस्या एवाहं प्रत्ययविषयत्वमभ्युपगन्तव्यम्। तस्याश्च कर्तृशक्तियुक्तायाः सर्वार्थकारिकरणमन्यत्कल्पयितव्यम्। शक्तोऽपि हि सन् कर्ता करणमुपादाय क्रियासु प्रवर्तमानो दृश्यते। ततश्च संज्ञामात्रे विवादः स्यात्, नतु वस्तुभेदः कश्चित्। करणव्यतिरिक्तस्य कर्तृत्वाभ्युपगमादिति प्रकृतसूत्राशयः। बुद्धेः श्रुत्यन्तरे क्लृप्तकरणशक्तिविपर्ययापातभयात् न बुद्धिः कर्त्री, किन्तु तदतिरिक्तो जीव एव कर्तेति तदर्थः। [अन्तः करणस्येति] बुद्धेरित्यर्थः। आत्मन उपाधिभूतमन्तः करणं मनो बुद्धि र्विज्ञानं चित्तमिति चानेकधा तत्र तत्राभिलप्यत इति शङ्करभगवत्पादोक्तेः। वृत्तिविभागेन व्यवहारे तु 'अन्तः करणस्य' इत्यस्य निश्चयवृत्तिकान्तःकरणस्येत्यर्थः। तदप्युक्तं भगवत्पादैः "क्वचिच्च वृत्तिविभागेन संशयादिवृत्तिकं मन इत्युच्यते। निश्चयादिवृत्तिकं बुद्धिरिति" इति। [विपर्ययापत्तिरिति]। तथाच सर्वार्थकारिणोऽन्यस्य करणस्य कल्पनापत्तिरिति तात्पर्यम्। [न युज्येतेति]। कर्तृकरणशक्त्योरविरोधस्य भवता प्रतिपादनादिति भावः। [निष्प्रमाणेति]। काष्ठैः पचतीत्यादौ करणतया क्लृप्तानां काष्ठानां शीघ्रतरं पाकनिर्वर्तनरूपलापेक्षया तन्निष्ठव्यापारस्यैव धात्वर्थत्वस्वीकारेण कर्तृत्वं विवक्ष्यते। प्रकृते तद्वत्कर्तृत्वकल्पकं किंचिदपि प्रयोजनं नास्ति। प्रत्युत बुद्धेः कर्तृत्वे तस्याः सर्वार्थकार्यन्यत्करणं कल्पनीयमिति भावः। एतदशायेनैव भगवता व्यासेन करणशक्तिविपर्ययापत्तिरुक्ता, नतु कर्तृकरणशक्त्योर्विरोधाभिप्रायेणेति तात्पर्यम्।

एकत्र श्रुतौ करणतया क्लृप्तत्वेऽप्यन्यत्र कर्तृत्वविवक्षायां न किञ्चिद् बाधकम्। युगपदुभयविवक्षाया एव विरुद्धत्वादित्याशङ्क्याह [वस्तुतस्त्विति]। बुद्धेः कर्तृत्वेऽपि शक्तिविपर्ययापत्तिरयुक्ता। सर्वकारकाणां स्वस्वव्यापारे कर्तृत्वस्याप्यवश्यंभावित्वात्। यथा काष्ठानां पाकक्रियायां करणत्वसत्त्वेऽपि स्वीयज्वलनक्रियायां करणत्वसत्त्वेऽपि स्वीयज्वलनक्रियायां काष्ठानि ज्वलन्तीत्यादौ कर्तृत्वं, तथा विषयावच्छिन्नचैतन्योपलब्धौ बुद्धेः करणत्वेऽप्यध्यवसायसंकल्पादिक्रियायां कर्तृत्वमविरुद्धम्। उपलब्धिकर्तृत्वं तु जीवस्यैव। तच्च कर्तृत्वं न केवलस्यात्मनः, किन्तु बुद्ध्युपाधिकस्य। केवलस्य कर्तृत्वेऽनिर्मोक्षप्रसङ्गात्। एवं च बुद्धिविशिष्टात्मनः कर्तृत्वं विशेषणीभूतबुद्धेरेव करणत्वसम्भवात् करणान्तरकल्पनाप्रसङ्गोऽपि बुद्धिविशिष्टात्मन एव, न केवलस्य। अध्यासं विना केवलबुद्धेरेव कर्तृत्वमिति वादिनां कापिलानां तु करणान्तरकल्पनाप्रसङ्गो दुर्वार एव। एवं चैकस्मिन्नेव वस्तुनि विवक्षाभेदेन कर्तृत्वं करणत्वं च सम्भवत्येव। अतो नास्मत्सिद्धान्तहानिरिति भावः।

[अभ्युच्चयमात्रमिति] प्राधान्येन तात्पर्यविषयीभूतार्थप्रसङ्गाद्यत्रार्थन्तरस्यापि सम्बन्धप्रतीतिः, सोऽभ्युच्चयः। एतत् = बुद्धेः कर्तृत्वे शक्तिविपर्ययकथनम्। एवं तावच्छास्त्रार्थवत्त्वादिभिर्हेतुभिः शरीरस्य जीवस्य कर्तृत्वं प्रदर्शितम्। तच्च कर्तृत्वं स्वाभाविकं स्यादुपाधिनिमित्तं वेति विचार्यते। न स्वाभाविकं कर्तृत्वमात्मनः सम्भति, अनिर्मोक्षप्रसङ्गात्। कर्तृत्वस्वभावत्वे ह्यात्मनो न कर्तृत्वान्निर्मोक्षः सम्भवति, अग्नेरिवौष्ण्यात्। तस्मादुपाधिधर्माध्यासेनैवात्मनः कर्तृत्वम्, न स्वाभाविकम्। तथा च श्रुतिः "ध्यायतीव लेलायतीव" इति। "आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः" इति चेति बोध्यम्। [यथा च तक्षोभयथेति] इदं च द्वितीयाध्याये तृतीयपादे चत्वारिंशत्सूत्रम्। सूत्रे चकारस्त्वर्थकः। यथा तु तक्षा वास्यादिकरणहस्तः कर्ता दुःखी भवति, स एव स्वगृहं प्राप्तो विमुक्तवास्यादिकरणः स्वस्थो निर्वृतो निर्व्यापारः सुखी भवति, एवमविद्याप्रत्युपस्थापितद्वैतसंपृक्त आत्मा स्वमात्मानं परं ब्रह्म प्रविश्य विमुक्तकार्यकारणसङ्घातोऽकर्ता सुखी भवति संप्रसादावस्थायाम्। तथा मुक्त्यवस्थायामप्यविद्याध्वान्तं विद्याप्रदीपेन विधूयात्मैव केवलो निर्वृतः सुखी भवति। तक्षदृष्टान्तश्चैतावतांऽशेन द्रष्टव्यः, यत्, तक्षा हि विशिष्टेषु तक्षणादिव्यापारेषु अपेक्ष्यैव प्रतिनियतानि वास्यादीनि करणादीनि कर्ता भवति, स्वशरीरेण त्वकर्तैव। नत्वात्मनस्तक्ष्ण इवावयवाः सन्ति। यैर्हस्तादिभिरिव वास्यादीनि तक्षा, मन आदीनि करणान्यात्मोपाददीत, न्यस्येद्वा इति। विधिशास्त्रं तु अविद्याकृतं कर्तृत्वमादाय प्रवर्तिष्यते। तदेतदाह [भाष्य एवेति] शारीरकभाष्य एवेत्यर्थः। एवं च

जीवस्यौपाधिकं कर्तृत्वं नतु स्वाभाविकमित्येव प्राधान्येन तात्पर्यविषयीभूतं, नतु शक्तिविपर्ययापत्तिरूपं दूषणमिति तस्यान्वाचयशिष्टत्वं स्पष्टमेवेति बोध्यम्।

एवं च कर्तृतृतीयाया इव करणतृतीयाया अपि आश्रयार्थकत्वं कर्तृनिष्ठव्यापारांशस्य धातुलभ्यत्वेऽपि व्यापारन्तरस्य करणतृतीयावाच्यत्वं च सिद्ध्यति। रामेण बाणेन हतो वालीत्युदाहरणम्। अत्र बाणस्य प्रकृत्यर्थस्याभेदेन तृतीयार्थाश्रयेऽन्वयः। तस्य च व्यापारेऽपरतृतीयार्थे आधेयतयाऽन्वयः। तस्य च जन्यत्वसम्बन्धेन धात्वर्थव्यापारे, फले वा प्राणवियोगात्मनि। तथा च रामनिष्ठो यो व्यापार स्तद्विषयीभूतबाणव्यापारसाध्यप्राणवियोगाश्रयो वालीति वाक्यार्थः।

इति तृतीया

सप्तम्या अप्याश्रयोऽर्थः। "सप्तम्यधिकरणे च" इत्यधिकरणे सप्तमी। तच्च "आधारोऽधिकरणम्" इति सूत्रादाधारः। तत्त्वञ्चाऽऽश्रयत्वम्। तत्राऽऽश्रयांशः शक्यः। तत्त्वमवच्छेदकम्। न चाऽऽश्रयत्वमात्रेण कर्तृकर्मकरणानामाधारसंज्ञा स्यात्। स्यादेव यदि ताभिरस्या न बाधः स्यात्। "कारके" इत्यधिकृत्य विहितसप्तम्याः क्रियाश्रय इत्येव यद्यपि तापर्यं तथाप्यत्र कर्तृकर्मद्वारा तदाश्रयत्वमस्त्येव स्थाल्यादेर्भूतलकटादेश्चेति 'स्थाल्यां पचति' 'भूतले वसति' 'कटे शेते' इत्याद्युपपद्यते।

उक्तं च वाक्यपदीये -

कर्तृकर्मव्यवहितामसाक्षाद्धारयत्क्रियाम्।
उपकुर्वत्क्रियासिद्धौ शास्त्रेऽधिकरणं स्मृतम्।। इति।।

एतच्च त्रिविधम्। औपश्लेषिकं वैषयिकमभिव्यापकं च। कटे शेते, गुरौ वसति, मोक्षे इच्छाऽस्ति, तिलेषु तैलमिति। एतच्च "संहितायाम्" इति सूत्रे भाष्ये स्पष्टम्।

सप्तम्यर्थं निरूपयति [सप्तम्या अपीति] [सप्तमीति] यतोऽधिकरणे सप्तमी, अत आश्रयोऽर्थ इति योज्यम्। तच्च = अधिकरणं च। नन्वेवमपि सप्तम्या आधार एव शक्यो, न त्वाश्रय इत्यत आह [तत्त्वं चेति] आधारत्वं चेत्यर्थः। आश्रयस्याधेये साकाङ्क्षतया "कारके" इत्यधिकृतपदेनोपस्थितक्रियैवाधेयतया सम्बध्यते, सा च धातुलभ्येत्यनन्यलभ्य आश्रय एव शक्य इत्याह [आश्रयांशः शक्य इति] तत्त्वम् = आश्रयत्वम्। अवच्छेदकं = शक्यतावच्छेदकम्।

[आश्रयत्वमात्रेणेति] आश्रयत्वमात्रपुरस्कारेण विधानेनेत्यर्थः। तथाच क्रियाधारमात्रस्याधिकरणसंज्ञायां फलरूपक्रियाया आधारत्वेन कर्मणो, व्यापाररूपक्रियाया आधारत्वेन करणस्य कर्तुश्चाधिकरणसंज्ञा स्यादिति भावः। [आधारसंज्ञेति] नायं कर्मधारयः, किन्तु आधारस्य संज्ञेति षष्ठीतत्पुरुषः। तथाच "आधारोऽधिकरणम्" मिति सूत्रेणाधारस्य विधीयमाना या संज्ञा सा स्यात्। अधिकरणसंज्ञा स्यादिति तात्पर्यम्। समाधत्ते [स्यादेवेति] ताभिः = कर्मकर्तृकरणसंज्ञाभिः। अस्याः = अधिकरणसंज्ञायाः। [न बाधः स्यादिति] तथाच ईप्सिततम - स्वतन्त्रपदाभ्यां साक्षात् क्रियाधारयोः कर्मकर्तृसंज्ञाभ्यां बाधात्परिशेषात्परम्परया क्रियाश्रयस्याधिकरणसंज्ञा प्रवर्तते। अतः कर्मादीनां नाधिकरणत्वापत्तिरिति भावः। [क्रियाश्रय इत्येवेति] साक्षात्क्रियाश्रय इत्यर्थः। एवशब्देन चैत्राद्याश्रयकटादेर्व्यावृत्तिः। तत्र क्रिया कर्तरि कर्मणि वाऽवतिष्ठत इति तयोः क्रियाधारत्वादधिकरणसंज्ञावचना त्पर्यायेण स्यात्। कर्मस्थक्रियाविषया वा कर्तृसंज्ञा कर्तृस्थक्रियाविषया वा कर्मसंज्ञा स्यादिति तत्र यथायोगं कर्तृ कर्मसंज्ञा स्यात्, नाधिकरणसंज्ञा प्रसज्यते इति तात्पर्यम्। [तथाप्यत्रेति] अधिकरणसंज्ञाविधानसामर्थ्यात्परम्परया क्रियाश्रयस्य कटादेः संज्ञासिद्धिः। यद्यपि कालः साक्षात्क्रियाधारस्तथापि कारकाधिकारे तरतमयोगो नास्तीति परम्परया क्रियाधारस्यापि ग्रहणम्। किञ्च कालस्य तत्त्वविवक्षायां कर्तृत्वमेव, भूतानि कालः पचतीतिवत्। [कर्तृकर्मद्वारेति] परम्परा च यद्यपि प्रकरणात्क्रियया सर्वकारकाणामुपस्थित्या तद्द्वारिका प्राप्ता, तथापि योग्यताबलेन व्याख्यानेनानुभवबलेन च कर्तृकर्मद्वारिकैवेति भावः। तदाश्रयत्वं = क्रियाश्रयत्वम्। अत्रार्थे हरिं प्रमाणयति [उक्तं चेति] लोके द्रव्यगुणक्रियाविषयमधिकरणम्। अत्र शास्त्रे तु कारकाधिकारात्क्रियाविषयमेव तदिति "शास्त्र" इत्यनेन सूचयति। साक्षात्क्रियाश्रययोः कर्तृकर्मणोस्ते संज्ञे बाधिके, अतः [तद्व्यवहितामिति] व्यवहितामित्युक्तेऽपि 'असाक्षात्' इत्युक्तिर्लोकानुसारेणान्वयोऽपि परम्परयैवेति सूचनाय। कटे शेते, स्थाल्यां पचतीत्यादावधिकरणेनाऽऽधृते कर्तृकर्मणी शयनपचनादिक्रियां न संपादयत इत्यधिकरणं क्रियाधारमुपकुर्वत्तत्स्थां क्रियामुपकरोति। क्रियासिद्धौ = कर्तृकर्मगतक्रियासिद्धौ। क्रियाश्रयधारणादेव लोकेऽधिकरणस्य क्रियोपकारः प्रतीयते, न साक्षादिति हरिग्रन्थाशयः। स्पष्टं चेदं हेलाराजीये। नच धात्वर्थफलस्यापि कर्मतायाः प्राग् व्युत्पादनात्तण्डुलं पचतीत्यादौ धात्वर्थफलरूपकर्मद्वारा क्रियाश्रयत्वेन तण्डलादेरधिकरणत्वापत्तिरिति वाच्यम्। तण्डुले व्यापारजन्यफलाश्रयत्वस्य सत्त्वेन परया कर्मसंज्ञाया बाधेनादोषात्। नच मोक्षे इच्छास्तीतिवन्मोक्षे इच्छति, भवतीति स्यादिति वाच्यम्।

परत्वेनान्तरङ्गत्वेन च कर्मसंज्ञाया एव प्रवृत्तेः। मोक्षे इच्छेत्यादौ प्रत्ययोपात्तेच्छाद्वाराऽस्तिक्रियायामन्वयस्य विवक्षितत्वेनाधकरणत्वम्। प्रकृत्यर्थसाध्येच्छाद्वारा तत्रान्वये तु कर्मत्वात् षष्ठ्येव बोध्या।

अधिकरणं विभजते [एतच्चेति]। [औपश्लेषिकमिति] उप = समीपे श्लेषः = सम्बन्धस्तत्कृतमित्यर्थः। "तत्र च दीयते कार्यं भववत्" ५-१-९६ इति सूत्रे भाष्ये "यन्मासेऽतिक्रान्ते दीयते तस्य मास औपश्लेषिकमधिकरणमित्युक्तेः। तत्रोपश्लेषपदाध्याहारेण सप्तमीति "संहितायाम्" इति सूत्रे भाष्ये स्पष्टम्। यत्किञ्चिदवयवावच्छेदेनाधारस्याधेयेन व्याप्तिरप्युपश्लेपः। यथा - कटे अस्ति। एवमेव गङ्गैकदेशे तरन्तीषु गोषु कूपैकदेशे स्थिते गर्गकुले गङ्गायां घोषः, कूपे गर्गकुलमित्यादौ बोध्यम्। [वैषयिकमिति] अप्राप्तिपूर्वकप्राप्तिरूपसंयोगसमवायैतद्भिन्नसम्बन्धेन यदधिकरणं तत्। [अभिव्यापकमिति] यत्र सर्वावयवावच्छेदेन व्याप्तिस्तत्। आद्यमुदाहरति [कटे शेत इति] द्वितीयस्योदाहरणे दर्शयति [गुरौ वसति] [माक्षे इच्छास्तीति] शिष्यस्य गुर्वधीनायां वृत्तौ वैषयिकमधिकरणं गुरुः। स्पष्टं चेदं "संहितायाम्" ६-१-७२ इति सूत्र उद्द्योते। तत्र सूत्रे वैषयिकमिति भाष्यप्रतीके "यथा खे शकुनयः, गुरौ वसति" इति कैयटः। एतेन "आद्यस्य कटे शेते, गुरौ वसतीत्युदाहरणे" इति वदन्तो दर्पणकारादयः परास्ताः। तृतीयस्योदाहरणं दर्शयति [तिलेषु तैलमिति] दध्नि सर्पिरित्यप्युदारणं बोध्यम्।

एष्वन्त्यमेव मुख्यमधिकरणम्। "आचार्यः किमधिकरणं न्याय्यं मन्यते। यत्र कृत्स्न आधारात्मा व्याप्तः" इति "स्वरितेनाधिकारः" १-३-११ "साधकतमं करणम्" १-४-४२ इति सूत्रभाष्योक्तेः। अस्य न्याय्यत्वं च प्रकृत्यर्थतावच्छेदकविशिष्टे तद्भानात्। नह्येकदेशस्तद्विशिष्टः। आद्ययोश्च गौणमाधारत्वं तत्रैव भाष्ये उक्तम्। कारकाधिकारे गौणाधारादीनामपि स्वरितगुणपाठे नाधिकरणसंज्ञादिबोधनात्सर्वत्र तत्र विभक्तेः शक्तिरेव। अतो गङ्गायां घोष इत्यादौ न प्रकृतेर्नवा प्रत्ययस्य लक्षणेति बोध्यम्। एतच्च = अधिकरणत्रैविध्यम्। [भाष्य इति] तत्र हि "अयं योगः शक्योऽकर्तुम्। कथम्? अधिकरणं नाम त्रिप्रकारम्। व्यापकमौपश्लेषिकं वैषयिकमिति। शब्दस्य च शब्देन कोऽन्योऽभिसम्बन्धो भवत्यन्यदत उपश्लेषात्। "इको यणचि" अच्युपश्लिष्टस्येति। तत्रान्तरेण संहिताग्रहणं संहितायामेव भविष्यति" इत्युक्तम्। वर्णानां सांख्यादिमते द्रव्यत्वात्संयोगवत् पूर्वपरयोर्वौपश्लेषिकेऽधिकरणे सप्तमी सिद्ध्यति। कटे शेत इत्यादौ कटाधिकरणकं शयनमित्यादिरीत्या बोधः।

इति स्पतमी

अवधिः पञ्चम्यर्थः। "अपादाने पञ्चमी"। तञ्च "ध्रुवमपायेऽपादानम्" इति सूत्रादपायो विश्लेषस्तज्जनकक्रिया तत्रावधिभूतमपादानमित्यर्थकाद् अवधिभूतमिति भावः।

उक्तं च वाक्यपदीये -

अपाये यदुदासीनं चलं वा यदि वाऽचलम्।
ध्रुवमेवातदावेशात्तदपादानमुच्यते।।

पततो ध्रुव एवाश्वो यस्स्मादश्वात्पतत्यसौ।
तस्याप्यश्वस्य पतने कुड्यादि ध्रुवमुच्यते।।

उभावप्यध्रुवौ मेषौ यद्यप्युभयकर्मके।
विभागे प्रविभक्ते तु क्रिये तत्र व्यवस्थिते।।
मेषान्तरक्रियापेक्षमवधित्वं पृथक्पृथक्।
मेषयोः स्वक्रियापेक्षं कर्तृत्वं च पृथक्पृथक्।। इति।।

अस्यार्थः - अपाये विश्लेषहेतुक्रियायाम्। उदासीनम् - अनाश्रयः। अतदावेशात् - तत्क्रियानाश्रयत्वात्। एवं च विश्लेषहेतुक्रियानाश्रयत्वे सति विश्लेषाश्रयत्वं फलितम्। वृक्षात्पर्णं पततीत्यत्र पर्णस्य तद्वारणाय सत्यन्तम्। धावतोऽश्वात्पततीत्यत्राश्वस्य क्रियाश्रयत्वाद्विश्लेषहेत्विति।

कुड्यात्पततोऽश्वात्पततीत्यत्राश्वस्य विश्लेषजनकक्रियाश्रयत्वेऽपि तत्र विरुद्धमित्याह - यस्मादश्वादिति। तद्विश्लेषहेतुक्रियानाश्रयत्वे सतीति विशेषणीयमिति भावः। एवमश्वनिष्ठक्रियानाश्रयत्वात्कुड्यादेरपि ध्रुवत्वमित्याह- तस्यापीति।

उभयकर्मजविभागस्थले विभागस्यैक्यात्तद्विश्लेषजनकक्रियानाश्रयत्वा-भावात्परस्परस्मान्मेषावपसरत इति न स्यादित्याशङ्क्य समाधत्ते उभावपीति। मेषान्तरेति। यथा निश्चलमेषादपसरद्द्वितीयमेषस्थले निश्चलमेषस्यापसरन्मेषक्रियामादाय ध्रुवत्वं तथात्रापि विभागैक्येऽपि क्रियाभेदादेकक्रियामादाय परस्य ध्रुवत्वमिति। तथा च विश्लेषाश्रयत्वे सति तज्जनकतत्क्रियानाश्रयत्वं तत्क्रियायामपादानत्वं वाच्यम्। क्रिया चात्र धात्वर्थो न तु स्पन्दः। तेन वृक्षकर्मजविभागवति वस्त्रे वृक्षाद्वस्त्रं पततीति सङ्गच्छते।

एवं कारिकायाम् "आश्रयः" इति भागमवलम्ब्य द्वितीयातृतीयासप्तमीनामाश्रयार्थकत्वं व्यवस्थाप्य "अवधिः" इति कारिकाभागमाश्रित्य पञ्चम्यर्थं निरूपयति [अवधिः पञ्चम्यर्थ इति] अवधेः पञ्चम्यर्थत्वे सूत्रं प्रमाणयति [अपादाने पञ्चमीति] ननु सूत्रेणापादानस्य पञ्चम्यर्थत्वं लभ्यते, नत्ववधेरत आह [तञ्चेति] अपादानं चेत्यर्थः। अस्य "अवधिभूतम्" इत्यत्रान्वयः। सूत्रतस्तदर्थलाभप्रकारमाह [अपायो विश्लेष इति]। अपायशब्दस्तज्जनकक्रियापर इत्याशयेनाह [तज्जनकक्रियेति] तत्र = विश्लेषजनकक्रियायाम्। [अवधिभूतमिति] अयमाशयः - ध्रुवमित्यत्र ध्रु गतिस्थैर्ययोरित्यस्मात्कुटादेः पचाद्यच्। ध्रुव स्थैर्ये इति पाठेतु इगुपधलक्षणः कप्रत्ययः। ध्रुवतीति ध्रुवं = स्थिरमेकरूपमिति यावत्। "ध्रुवमस्य शीलम्" इत्यादौ तथा दर्शनात्। तथाचापाये साध्ये यदेकरूपमित्युक्ते प्रकृतधातूपात्तगत्यनाविष्टत्वे सति तदुपयोगीति लभ्यते। तञ्चार्थादवधिभूतमेव पर्यवस्यतीति। वृक्षात्पर्ण पततीत्यादौ प्रकृत्यर्थस्य प्रत्ययार्थेऽवधावभेदेनान्वयः। प्रत्ययार्थस्य च धात्वर्थक्रियायामन्वयः। कारकाणां क्रिययैव सम्बन्धात्। क्रियान्वये सत्येव हि कारकसंज्ञा तत्पूर्विका विशेषसंज्ञाश्च स्थिताः। अत्रार्थे हरिं प्रमाणयति [उक्तं चेति] अपाये यदुदासीनमित्यादि "कुड्यादि ध्रुवमुच्यत" इत्यन्तं कारिकाद्वयमधुनातनवाक्यपदीयग्रन्थे नोपलभ्यते। दीक्षितकौण्डभट्टनागेशादयस्तु वाक्यपदीयस्थत्वेनोदाहरन्त्येव। तेनेदमनुमीयते, यत् - तेषां समये वाक्यपदीये निरुक्तं कारिकाद्वयमासीदेव। परंतु तत्र तत्पाठः कालवशाद् भ्रष्ट इति। एवमेव "धातुनोक्तक्रिये नित्यं कारके कर्तृतेष्यते" "भेद्यभेदकसम्बन्धोपाधिभेदनिबन्धनम्। साधुत्वं तदभावेऽपि बोधो नेह निवार्यते" इति हरिग्रन्थोऽपीदानीन्तनवाक्यपदीये नोपलभ्यते। "अस्ति प्रवर्तनारूपमनुस्यूतं चतुर्ष्वपि" इत्यादिकारिकाद्वयमप्यवगन्तव्यमिति लकारार्थनिर्णये लिखितं न विस्मर्तव्यम्। हरिग्रन्थस्य पाठ प्रवचनयोरभावात्तस्यैषा गतिस्तदवस्थेति महदिदं विषादस्थानम्।

हरिकारिकायाम् "अपाये = विश्लेषजनकक्रियायां साध्ये, यद् उदासीनम् = अनाश्रयः, तद् ध्रुवमेव, प्रत्त्यासत्त्या तद्विश्लेषजनकक्रियायामित्यर्थलाभेन स्वतस्तस्य क्रियाश्रयत्वेऽपि तद्विश्लेषजनकक्रियाश्रयत्वाभावाद् ध्रुवत्वमेवेति लभ्यते। तदाह [चलं वा यदि वाऽचलमिति]। जङ्गमस्थावरविषयकमेव न, प्रकृतानुपयोगात्। तादृशार्थस्याविवक्षितत्वाच्च। एतेन "चलं = जङ्गमविषयमेवोदाहरणतया स्वीक्रियते। अत एव "अतदावेशात्" इति हेतुरुपन्यस्तः सङ्गच्छते। "अतदावेशात्" इति हेतुवचनं "तत्क्रियानाश्रयत्वा" इति सार एव विवृतम्। "तदावेशात्" इति पाठे तु तन्मात्रावेशात् = विभागमात्रावेशादित्यर्थः।

[एवं चेति] अपाये ध्रुवमित्यनेन विश्लेषजनकक्रियानाश्रयत्वविवक्षणे चेत्यर्थः। तद्वारणाय = अपादानत्ववारणाय। [सत्यन्तमिति] तदभावे विभागजनको व्यापारोऽपायस्तद्विषये यत्कारकं तद्रूपक्रियाजानकतादृशविभागाश्रयस्तदपादानमित्यर्थापत्त्या प्रयागादावप्राप्त्या निरवकाशकत्वेन विशेषविहितत्वेन च पर्णादवपादनत्वं कर्तृत्वस्यापवादः स्यात्। कर्तृसंज्ञा तु पचत्यादियोगे चरितार्थेति भावः। प्रयागाद् ग्रामं गच्छतीत्यादौ प्रकृतधातूपात्तगत्यनाविष्टत्वस्य ग्रामादौ सत्त्वात्तत्रातिव्याप्तिवारणाय विशेष्यम्। स्पष्टं चेदं प्रकृतसूत्रे मनोरमाशब्दरत्ने। तक्रकौण्डिन्यन्यायेन विशेषविहितत्वात्कर्मत्वापवादः स्यादिति तद्व्याख्याने भावप्रकारे स्पष्टम्। एतदाशयेनैव "विश्लेषाश्रयत्वम्" इति प्रतीके "एतन्निवेशनं तु देवदत्तो ग्रामात्काशीं यातीत्यादौ काश्यादावतिव्याप्तिवारणाय" इति काशिकाकाराः। एतेन "यत्तु प्रयागतः काशीं गच्छतीत्यत्र काश्या अपादानत्ववारणाय धात्वर्थविभागाश्रयत्वमिति। विभागस्य गम्यर्थत्वाभावान्न दोष इति। तन्न। परत्वात्कर्मसंज्ञाया बाधात्" इति पञ्चोलिनः परास्ताः।

ननु धावतोऽश्वात्पततीत्यादावश्वस्य धावनक्रियाश्रयत्वेनापादानत्वात्तिरत आह [धावतोऽश्वादिति]। [क्रियाश्रयत्वादिति] धावनरूपक्रियाश्रयत्वादित्यर्थः। तथाचापादानत्वानापत्तिरतस्तद्वारणाय लक्षणे विश्लेषहेत्विति। विश्लेषजनकपतनक्रियाश्रयो देवदत्तः, तादृशपतनक्रयानाश्रयत्वादश्वस्यापादानत्वसिद्धिरिति भावः। नन्वेवमपि कुड्यात्पततोऽश्वात्पततीत्यादौ विश्लेषजनकपतनक्रियाश्रयत्वादश्वस्यापादनत्वानापत्तिरित्याशङ्क्याह [कुड्यात्पतत इति] विश्लेषे तत्त्वनिवेशान्न दोष इत्याशयः। अश्वपुरुषविभागजनकपतनापेक्षया कुड्याश्वविभागजनकपतन-क्रियायामन्यत्वस्य स्पष्टतयाऽश्वपुरुषविभागजनकपतनक्रियानाश्रयत्वेनाश्वस्यापादानत्वसिद्धिरित्याशयः।

नन्वेवमपि परस्परस्मान्मेषावपसरत इति न स्यात्। तत्र विभागस्याप्येकत्वादित्याशयकं हरिग्रन्थमवतारयति [उभयकर्मजेति] मेषद्वयनिष्ठक्रियाजन्यविभागस्थल इत्यर्थः। हरिकारिकायां [यद्यपीति] पूर्वपक्षे। यद्यपि उभयकर्मजे विभागे उभावपि मेषावध्रुवाविति पूर्वपक्षाशयः। विभक्ते तु "क्रिये तत्र विवक्षिते" इति समाधानग्रन्थः। विभक्ते इत्यादिकं प्रथमाद्विवचनान्तम्। तत्र = उभयकर्मजविभागस्थले। "उभयकर्मजे विवक्षिते" इत्येव वाक्यपदीयपाठः। यद्वा "उभावप्यध्रुवौ मेषौ यद्यप्युभयकर्मजे" इत्येतावानेव पूर्वपक्षग्रन्थः। उभयकर्मजे = उभयनिष्ठकर्मजविभागस्थले। "विभागे प्रविभक्ते तु क्रिये तत्र विवक्षिते" इति समाधानग्रन्थः। विभागे, प्रविभक्ते इति सप्तम्यन्ते पदे। क्रिये - विवक्षिते इति प्रथमाद्विवचनान्ते। तत्त"क्तित्वे विभागस्य बुद्ध्या प्रविभागे तु तद्विभागानुकूलक्रयावत्त्वस्या-

परत्राभावादुभयोरपि ध्रुवत्वमित्यर्थः। एतदेवानन्तरकारिकयोच्यते - मेषान्तर क्रियापेक्षमित्यादि। अत्रार्थे दृष्टान्तं दर्शयति [यथेति] एको मेषो निश्चलः, अपरस्तस्मादपसरति। तत्र अपसरद्द्वितीयमेषनिष्ठक्रियानाश्रयत्वान्निश्चलमेषस्यापादानत्वं प्रसिद्धमेव। तद्वत्प्रकृतेऽपति भावः। [ध्रुवत्वमिति] क्रियानाश्रयत्वादित्यर्थः। [विभागैक्येऽपीति] अनैन हरिग्रन्थे "उभावप्युध्रुवौ मेषौ यद्यप्युभयकर्मजे विभागे" इत्येष एव भागः पूर्वपक्षप्रतिपादक इति लभ्यते। परन्तु सुबर्थवादमञ्जूषापरिशीलने "विभागे प्रविभक्ते तु क्रिये तत्र व्यवस्थिते" इति कारिकोत्तरभागः सर्वोऽपि सिद्धान्तप्रतिपादक इति प्रतीयते। [क्रियाभेदादिति] तत्तन्मेषवृत्तिक्रियाया व्यक्तेस्तद्व्यक्तित्वेन भिन्नतयोभयोस्तत्क्रिया-नाश्रयत्वेनापादानत्वम्। तद्विश्लेषजनकक्रियात्वावच्छिन्नप्रतियोगिताकाभावस्यासत्त्वेऽपि तद्विश्लेषजनकक्रियानिष्ठतद्व्यक्तित्वानवच्छिन्नप्रतियोगिताकाभावस्य "तत्क्रिया नास्ति" इत्याकारकस्य तत्तन्मेषे सत्त्वान्न दोष इत्याशयः। फलितमाह [तथाचेति] तत्तत्क्रियायास्तद्व्यक्तित्वेन लक्षणे निवेशे चेत्यर्थः। [तज्जनकेति] तद्विश्लेषजनकेत्यर्थः। [तत्क्रियेति] कर्मधारयः।

ननु वृक्षकर्मणैव विभागोत्पत्तिस्थले वृक्षात्पतति वस्त्रमित्यस्यानुपपत्तिः। वृक्षस्य विभागजनकक्रियाश्रयत्वादत आह [क्रिया चेति] [धात्वर्थ इति] प्रकृतधातुवाच्यैव क्रियात्र गृह्यते। नतु स्पन्दः = यथाकथञ्चित् प्रतीयमानव्यापारमात्रम्। तथाच वृक्षक्रियाया विभागजनकत्वेऽपि धात्ववाच्यत्वाद्धातुवाच्यक्रियानाश्रयत्वादपादानत्वोपपत्तिः।

दर्पणकारास्तु "अत्र वदन्ति" इत्यादिना महता प्रबन्धेन विभागो न धात्वर्थः, स पञ्चम्यर्थ एवेति प्रतिपादयामासुः। पञ्चोलिनोऽपि तानेवानुसस्रुः। तत्त्वयुक्तमेवेति धात्वर्थनिर्णये फललक्षणनिरूपणावसरे प्रतिपादितमस्माभिः।

वस्तुतो नैतावत्पञ्चम्या वाच्यम्, किं त्ववधेर्लक्षणमात्रम्। द्वितीयार्थोक्तरीत्या प्रयोगातिप्रसङ्गःस्यासम्भवेन वाच्यकोटौ प्रवेशस्य गौरवेणासम्भवादिति तु प्रतिभाति। न चैवमपि वृक्षात्स्यन्दत इति स्यादिति शङ्क्यम्। आसनाच्चलितः, राज्याच्चलित इतिवदिष्टत्वात्। एतेन पञ्चमीजन्यापादानत्वबोधे सकर्मकधातुजन्योपस्थितेर्हेतुत्वमिति समाधानाभासोऽप्यपास्तः। न चैवमपि वृक्षात्त्यजतीति दुर्वारम्। कर्मसंज्ञयाऽपादानसंज्ञाया बाधेन पञ्चम्यसम्भवात्। भ्रमात्कृते तथा प्रयोगे यदि बोधाभावोऽनुभवसिद्धस्तर्हि पञ्चमीजन्यापादानत्वबोधे त्यजादिभिन्नधातुजन्यबुद्धेर्हेतुत्वं वाच्यम्। बलाहकाद्विद्योतते

विद्युदित्यादौ निःसृत्येत्यध्याहार्यम्। रूपं रसात्पृथगित्यत्र तु बुद्धिपरिकल्पितमपादानत्वं द्रष्टव्यम्। पृथग्विना इति पञ्चमी वा।

इदं च -

निर्दिष्टविषयं किंचिदुपात्तविषयं तथा।
अपेक्षितक्रियं चेति त्रिधाऽपादानमुच्यते।।

इति वाक्यपदीयात्त्रिविधम्। यत्र साक्षाद्धातुना गतिर्निर्दिश्यते तन्निर्दिष्टविषयम्। यथा - अश्वात्पतति। यत्र धात्वन्तरार्थाङ्गं स्वार्थं धातुराह, तदुपात्तविषयम्। यथा - बलाहकाद्विद्योतते। निःसरणाङ्गे विद्योतने द्युतिर्वर्तते। अपेक्षिता क्रिया यत्र तदन्त्यम्। यथा - कुतो भवान् पाटलिपुत्रात्। अत्राऽऽगमनमर्थमध्याहृत्यान्वयः कार्यः।

ननु सूत्रे ध्रुवग्रहणं व्यर्थम्। नच ग्रामादागच्छति शकटेनेत्यादौ शकटादेः, वृक्षात्पर्णं पततीत्यादौ पर्णादेश्चापादानत्ववारणार्थं तदिति वाच्यम्। तत्र परत्वात्करणादिसंज्ञानामेव प्रवृत्तेः। तथा च भाष्यम्। "अपादानमुत्तराणि कारकाणि बाधन्ते, यथा - धनुषा विध्यतीति इति। अत्र धनुषः शरनिस्सरणं प्रत्यवधिभावोपगमेनैव व्यधने करणत्वमित्यस्त्युभयप्रसङ्गः। वृक्षस्य पर्णं पततीत्यत्र तु वृक्षस्य पर्णेनैव योगादपायेन योगाभावात्कारकत्वमेव नास्तीत्यदोषः। नच संज्ञिनिर्देशार्थं ध्रुवग्रहणमिति वाच्यम्। अपाये क्रियायां यदन्वेतीत्यस्याक्षिप्तस्य संज्ञिसमर्थकत्वात्। यद्वा कारक इति निर्धारणसप्तम्याश्रयणात्कारकमिति लभ्यते। पूर्वत्रापि प्रथमार्थे सप्तमीत्युक्तत्वाच्च। एवं च ध्रुवग्रहणस्य चिन्त्यप्रयोजनकतया तद्बलेन पञ्चम्या अवध्यर्थकत्वस्वीकारो न युक्त इति चेत्सत्यम्। एतदाशयेनैवाह [वस्तुत इति] अस्य प्रतिभातीत्यत्रान्वयः। एतत् = ध्रुवपदार्थत्वेनाभिमतमनाश्रयत्वान्तम्। [लक्षणमात्रमिति] सूत्रे ध्रुवपदसत्तादशायां तस्य लक्षणमात्रमिदं, सिद्धान्ते तु तननकर्तव्यमेवेति भावः। एतदभिप्रायकमेव मात्रपदम्। पञ्चम्यर्थस्तु विभागाश्रय इति बोध्यम्। ननु सूत्रे ध्रुवग्रहणाभावे वृक्षात्पर्णं पतति, ग्रामादागच्छति शकटेनेत्यादौ पर्णशकटादेरपादानत्वापत्तिरत आह [द्वितीयार्थोक्तरीत्येति] परया कर्तृसंज्ञया कर्मसंज्ञाया बाधान्न द्वितीयेत्याद्युक्तरीत्येत्यर्थः। एवं च यथा चैत्रश्चैत्रं गच्छतीति न प्रयोगः, परया कर्तृसंज्ञया कर्मसंज्ञाया बाधात्। तथा वृक्षात्पर्णं पततीत्यादयोऽपि न प्रयोगाः, पराभिः कर्त्रादिसंज्ञाभिरपादानसंज्ञाया बाधादिति ध्रुवग्रहणं चिन्त्यप्रयोजनमेवेति ज्ञेयम्। [प्रयोगातिप्रसङ्गस्येति] वृक्षात्पर्णात्पततीत्यादिप्रयोगातिप्रसङ्गस्य। [असम्भवेनेति] परत्वात्कर्तृत्वादिभिरपादानत्वबाधादित्यर्थः।

वाच्यकोटौ = पञ्चमीवाच्यकोटौ। [असम्भवादिति] सूत्रे ध्रुवग्रहणस्य चिन्त्यप्रयोजनतयाऽसम्भवादित्यर्थः। गौरवेणेत्यस्य प्रयोजनरहितध्रुवग्रहणं सूत्रे स्वीकृत्यैतादृशार्थस्वीकारे गौरवेणेत्यर्थः। अत्र "असम्भवात्" इत्यनेन ध्रुवग्रहणस्य चिन्त्यप्रयोजनकतां सूचयति। अन्यथा "वाच्यकोटौ प्रवेशे गौरवात्" इत्येवावक्ष्यत्। "आश्रयोऽवधिः" इति मूलेऽवधिग्रहणं सूत्रे ध्रुवग्रहणसत्ताभिप्रायेण। ध्रुवग्रहणप्रत्याख्याने तु अवधिग्रहणं विभागोपलक्षणार्थम्। अभिमतश्चायमर्थः शब्दकौस्तुभे ध्रुवग्रहणस्य चिन्त्यप्रयोजनकतां प्रतिपादयतो मूलकृतो दीक्षितस्य। एवं च द्वितीयातृतीयासप्तमीपञ्चमीनामाश्रयोऽर्थः, करणतृतीयाया व्यापारः, पञ्चम्या विभागश्चाऽधिकोर्थ इति ध्येयम्।

यत्तु "लक्षणमात्रमिति। अवधित्वस्य परिचायको धर्मः। किन्त्ववधिमात्रं पञ्चम्यर्थः।" इति पञ्चोलिनः। यदपि "अवधेर्लक्षणमात्रमिति - किन्त्ववधिः पञ्चम्यर्थ इति शेषः। अत एव "आश्रयोऽन्धिरित्यत्र पृथगुपादानं सङ्गच्छते" इति भैरवमिश्राः, तन्न। "तस्माद् ध्रुवग्रहणं चिन्यप्रयोजनम्" इति कौस्तुभग्रन्थविरोधात्। "आश्रयोऽवधि" इति मूलं यथा न विरुणद्धि, तथाऽस्माभिर्व्याख्यातमेव। अतो विभागाश्रयौ पञ्चम्यर्थ इत्येव भूषणकारमतमास्थेयम्। अत एव "आश्रयो विभागश्चार्थः" इति भूषणे प्रतिपादितम्। अत एव "विभाग आश्रयश्च पञ्चम्मर्थः" इति मतस्य भूषणकारीयत्वेन व्यवहारो मञ्जूषाकाराणां सङ्गच्छते। स्पष्टा चेयं रीतिः सुबर्थवादकलायाम्।

यदपि "अवधित्वं चात्राखण्डोपाधिरूपम्" इति मिश्राः पञ्चोलिनश्च, तदपि न। तथा सति पाषाणपतनावधित्ववर्णपतनावधित्वयोरेकत्वेन पर्णपतनवेलायां पाषणपतनप्रतीत्यापत्तेः। नच समवायस्यैकत्वेन स्पर्शमसमवायवति वायौ रूपसमवायस्यापि सत्त्वेऽपि रूपप्रतियोगिकत्वावच्छेदेन समवायानुयोगित्वस्य वायावभावाद्यथा तत्र रूपवत्ताप्रतीत्यभावस्तद्वदिहापि पाषणनिष्ठविभागनिरूपितत्वावच्छेदेनावधित्वस्य वृक्षवृत्तित्वाभावादखण्डत्वेऽपि तस्य वृक्षात्पाषाणपतनस्यापि सम्भवेन वृक्षात्पाषाणः पततीत्यादेर्निर्बाधत्वेत पाषाणनिष्ठविभागनिरूपितत्वावच्छेदेन विधित्वस्य वृक्षनिष्ठत्वाभावाभावेन वैषम्यात् समवायदृष्टान्तेन निरुक्तापत्तिवारणस्य दुर्घटत्वादित्यलम्।

[एवमपीति] पर्णात्पर्णं पतति, ग्रामादागच्छति शकटात्। वृक्षात्पर्णात्पततीत्यादि-प्रयोगापत्तिवारणेऽपीत्यर्थः। वृक्षात् स्यन्दत इत्यत्र जलस्य कर्तृत्वाद्वृक्षस्य कर्तृत्वाभावेन तत्संज्ञयाऽपादानसंज्ञाया बाधाऽयोगादपादानसंज्ञायाः प्रवृत्तौ न किञ्चिद्बाधकम्। सूत्रे ध्रुवग्रहणसत्त्वेऽपीयमापतिर्बोध्या। तत्पक्षे "एवमपि" इत्यस्य विश्लेषाश्रयत्वे सति

तज्जनकतत्क्रियानाश्रयत्वमित्यर्थविवक्षणेऽपीत्यर्थः। स्पन्दत इति पाठे तु वस्त्रस्य कर्तृत्वं बोध्यम्। उक्तापत्तिमिष्टापत्त्या परिहरति [आसनाच्चलित इति] परेषां समाधानं दूषयति [एतेनेति] इष्टत्वाङ्गीकारेणेत्यर्थः। [समाधानाभासोपीति] वृक्षात् स्यन्दते जलमिति प्रयोगवारणाय निरुक्तकार्यकारणभावस्वीकारे आसनाच्चलित इत्यादेरिष्टप्रयोगस्यानिर्वाहात्तदुक्तसमाधेराभासत्वम्। किञ्च तथापि न निस्तारः वृक्षात्त्यजतीति प्रयोगापत्तेर्दुर्वारत्वात्। अतो नैयायिकोक्तं समाधानमयुक्तमेव। अपिना "अवधिः पञ्चम्यर्थः" इत्यस्य ग्रहणम्। [एवमपीति] वृक्षात् स्यन्दत इत्यत्रेष्टापत्तावपीत्यर्थः। समाधत्ते [कर्मसंज्ञयेति]। [पञ्चम्यसम्भवादिति] वृक्षात् स्यन्दते जलमिति प्रयोगवारणाय निरुक्तकार्यकारणभावस्वीकारे आसनाच्चलित इत्यादेरिष्टप्रयोगस्यानिर्वाहात्तदुक्तसमाधेराभासत्वम्। किञ्च तथापि न निस्तारः वृक्षात्त्यजतीति प्रयोगापत्तेर्दुर्वारत्वात्। अतो नैयायिकोक्तं समाधानमयुक्तमेव। अपिना "अवधिः पञ्चम्यर्थः" इत्यस्य ग्रहणम्। [एवमपीति] वृक्षात् स्यन्दत इत्यत्रेष्टापत्तावपीत्यर्थः। समाधत्ते [कर्मसंज्ञयेति] [पञ्चम्यसम्भवादिति] तत्तत्कारकविभक्त्युत्पत्तौ तत्तत्संज्ञाया एव नियामकत्वादित्यर्थः। यदिशब्देन तादृशबोध इष्ट एवेति सूचयति।

ननु वलाहकाद्विद्योतत इति प्रयोगानुपपत्तिः, धूमज्योतिस्सलिलमरुत्समुदायरूपस्य मेघस्य विद्युद्रूपज्योतिषश्च विभागासम्भवादत आह [वलाहकादिति] अवयवावयविनोर्भेदविवक्षया तदुपपत्तिः कार्येति भावः। एतदभिप्रायेणैवाह [निःसृत्येति]। [अध्याहार्यमिति] विपूर्वकद्युत धातौ निस्सरणमन्तर्भाव्यमित्यर्थः। ग्रन्थकारोऽप्यनुपदमेव वक्ष्यति "निस्सरणाङ्गे विद्योतने द्युतिर्वर्तते" इति। यदि त्ववयवावयविनोर्न भेदविवक्षा, तेजोमयत्वात्तस्य प्रकाशनसामर्थ्यम्, उदकादेस्तत्प्रतिबन्धकत्वाविवक्षा च तदा वलाहको विद्योतत इत्येव प्रयोगः। तेजस आधारत्वविवक्षायां तु वलाहके विद्योत इति प्रयोगः। स्पष्टं चेदं सुबर्थवादे मञ्जूषायाम्। "रूपं रसात्पृथक्" इत्यत्र रूपे विभागपूर्वकसंयोगानुकूलव्यापाररूपनिस्सरणस्यानुपपत्तिमाशङ्क्याह [रूपमिति] अत्र बौद्धसंश्लेषपूर्वको बौद्धो यो विश्लेषस्तज्जनको रूपाश्रयको बौद्धव्यापारः कल्पनीयः। बुद्धिपरिकल्पितगौरवमपेक्ष्य लाघवादाह [पृथग्विनेति]।

अपादानं विभजते [इदं चेति] अपादानं चेत्यर्थः। अस्य "त्रिविधम्" इत्यत्रान्वयः। तत्र हरिं प्रमाणयति [निर्दिष्टविषयमिति] निर्दिष्टः = साक्षाद्धातुना बोधितः, विषयः = निरूपकोऽर्थो यस्य तत्। तदेतदाह [यत्रेति] उपात्तः = धातुना धात्वन्तरार्थगर्भितो, विषयोऽर्थो यस्य तदुपात्तविषयं,

तदाह [यत्रेति] [धात्वन्तरार्थाङ्गमिति] धात्वन्तरस्य अर्थः अङ्गं = विशेषणं यस्य सः, तम्। यद्वा धात्वन्तरार्थे अङ्गम् = गुणभूतम्, तादृशं स्वार्थं यत्र धातुराह तदुपात्तविषयमपादानम्। उक्तमर्थं लक्ष्ये सङ्गमयति [निस्सरणाङ्ग इति] निपूर्वकसृधात्वर्थो निस्सरणम्। अङ्गं = विशेषणं यत्रेति बहुव्रीहिः। निस्सरणस्य अङ्गं = विशेषणीभूतमिति तत्पुरुषो वा। द्युतिः = द्युतधातुः। इका निर्देशः। [वर्तत इति] निस्सरणाङ्गके विद्योतने, विद्योतनाङ्गके निस्सरणे वा वर्तत इत्यर्थः। आद्ये वलाहकान्निःसृत्य ज्योतिर्विद्योतत इत्यर्थः। द्वितीये तु वलाहकाद्विद्योतमानं निस्सरतीत्यर्थः। यत्रापायलक्षणो विषयः (निस्सरणादिकम्) क्रियान्तरस्य गुणभावेन प्रधानभावेन वा उपात्तः = तदुपात्तविषयमपादानमिति निष्कृष्टार्थः। एवं कुसूलात्पचतीत्यप्युदाहरणं, कुसूलादादाय पचतीत्यादानाङ्गे पाके पचिवर्तते। एवं ब्राह्मणाच्छंसीयप्युदाहरणम्। ब्राह्मणात् गृहीत्वा शंसतीति ग्रहणाङ्गे शंसने शंसिर्वर्तते। पञ्चमीप्रकरणे "ब्राह्मणाच्छंसिन उपसङ्ख्यानम्" इत्यलुक्। अत्र कात्यायनस्य द्वितीयार्थे पञ्चम्यभिमता। यदाह - एतानि ब्राह्मणानि ग्रन्थविशेषरूपाणि यः शंसति स कथ्यते - ब्राह्मणाच्छंसीति। वृत्तिविषयेऽत्र द्वितीयार्थे पञ्चमी वक्तव्येति। भाष्यकारास्तु ब्राह्मणाद्गृहीत्वा = आहृत्य शंसतीत्याहरणाङ्गे शंसने शंसिर्वर्तत इत्युपात्तविषयमपादानमेव मन्यन्ते। अपेक्षिता = धातोरनुपादानेन आकाङ्क्षिता गम्यमाना क्रिया यस्य तदपेक्षितक्रियमित्यर्थः। [कुतो भवानिति] प्रत्यक्षसिद्धमागमनं मनसि निधाय कुतो भवानिति प्रश्नः। पाटलिपुत्रादित्युत्तरम्। कुतो भवानागतः? इति प्रश्नवाक्यार्थः। अहं पाटलिपुत्रादागत इति समाधानवाक्यार्थः। यत्र सर्वथैव क्रियाशब्दस्यानुपलब्धेरश्रुता क्रियानुमीयमाना ससम्बन्धिषु द्रव्येषु संज्ञाविशेषहेतूनां शक्तिभेदानामाविर्भावनिमित्तत्वाय कल्प्यते, तत्तृतीयमिति हेलाराजः। यथा - माथुराः पाटलिपुत्रकेभ्य आढ्यक्षणेतराः। अत्र हि प्रकर्षप्रत्ययसामर्थ्यात् विभागहेतुरनुमीयमानाऽपकर्ष-क्रियापायलक्षणेत्यपेक्षिता।

इति पञ्चमी।।

उद्देश्यश्चतुर्थ्यर्थः। तथा हि - संप्रदाने चतुर्थी। तच्च "कर्मणा यमभिप्रैति स संप्रदानम्" इति सूत्रात्कर्मणा करणभूतेन यमभिप्रैति = ईप्सति तत्कारकं संप्रदानमित्यर्थकादुद्देश्यः। इदमेव शेषित्वम्। तदुद्देश्यकेच्छाविषयत्वं च शेषत्वमित्येव पूर्वतन्त्रे निरूपितम्। अत एव "प्रासनवन्मैत्रावरुणाय दण्डप्रदानम्" [अ. ४. पा. २ अधि. ६] इत्यधिकरणे क्रीते सोमे मैत्रावरुणाय दण्डं प्रयच्छतीति विहितं दण्डदानं न प्रतिपत्तिः, किन्तु चतुर्थीश्रुत्याऽर्थकर्मेति तत्र निर्णीतम्।

चतुर्थ्यर्थं निरूपयति - [उद्देश्य इति] - प्रकृतेरुद्देश्यत्वं च तत्तद्धात्वर्थकर्मनिष्ठफल-निरूपकत्वेनेच्छाविषयत्वम्। तत्र प्रमाणं दर्शयति [तथाहीत्यादिना] तच्च = संप्रदानं च। अस्य वक्ष्यमाणेन उद्देश्यमित्यनेनान्वयः। सूत्रे अभिप्रैतीति पदत्रयम्। नतु समस्तम्। "उदात्तगतिमता च तिङा" इति वार्त्तिकस्य, "सह सूपा" इत्यत्र सहेति योगविभागस्य च च्छन्दोमात्रविषयकत्वात्। [करणभतेनेति] कर्मणेति करणतृतीयान्तमित्याशयः। नच विप्राय गां दादातीत्यादौ गवादेर्युगपत्कर्मत्वं करणत्वं च कथमिति वाच्यम्। क्रियाभेदेनाविरोधात्। दानक्रियायां गौः कर्म, अभिप्रापणक्रियायां करणम्। दीयमानया हि गवा राजा विप्रमभिप्रैति। [ईप्सतीति] अभिप्रपूर्वको हीणुधातुरीप्सतिना समानार्थः। अभिप्रेतमित्युक्त ईप्सितमिति गम्यते। हरिरपि "कर्मणेप्सितम्" इत्याह।

ननु विप्राय गां ददातीत्यत्र गोर्विप्रस्य चाभिप्रेयमाणत्वं यतो गौर्दानक्रिययाऽभिप्रेयते, गवा तु विप्रः। तत्र परत्वाद्गोः कर्मसंज्ञायाः प्रवृत्त्या पारिशेष्याद्विप्रस्यैव संप्रदानसंज्ञा भविष्यतीति सूत्रे 'कर्मणा' इति व्यर्थमिति, चेन्न। सत्यप्युभयसम्भवे दानक्रियाभिप्रेतया गवा विप्रोऽभिप्रेयत इति विप्रस्य क्रियासम्बन्धस्य बहिरङ्गतया, गवादेस्तत्सम्बन्धस्यान्तरङ्गत्वाद्गवादेरेव संप्रादनत्वापत्त्या तद्वारणार्थत्वात्कर्मग्रहणस्य। नचैवं कर्मत्वमनवकाशं स्यादिति वाच्यम्। वचनसामर्थ्यात्कर्मणो गवादेरेव पर्यायेण कर्मत्वसंप्रदानत्वयोरापत्तेः। "साधकतमं करणम्" इति सूत्रे तमपो ग्रहणेन कारकाधिकारे सामर्थ्यगम्यप्रकर्षो नाश्रीयते, न त्वन्तरङ्गबहिरङ्गव्यवहारः। अतः सूत्रे कर्मणेत्यावश्यक मेव।

नन्वध्याहारेणापि सर्वनामद्वयार्थस्य लाभात्सूत्रे "यं सः" इत्यनयोर्ग्रहणं व्यर्थमिति चेन्न। अभिप्रयतः कर्तुः संप्रदानत्ववारणार्थत्वात्तद्ग्रहणस्य। तथाहि - अभिप्रैतीति कर्तृतिङ्श्रुत्या "यः सः" इत्येव लभ्यते। तथा च तदर्थसम्बन्धेनैव निराकाङ्क्षतया "यं सः" इत्यध्याहारो नोपपद्यते। तथा च कर्मणा योऽभिप्रैति स संप्रदानमिति सूत्रार्थलाभात्कर्तुरेव संप्रदानत्वापत्तिः। कर्तृसंज्ञा त्वकर्मकधातुस्थले सावकाशा स्यात्। ततश्चोपाध्यायाय शिष्येण गौर्दीयत इत्यर्थे शिष्यायोपाध्यायस्य गौर्दीयत इति प्रयोगापत्तिः। अतस्सूत्रे "यं सः" इति गृहीतम्। तेनाभिप्रयतः कर्तुः संप्रदानत्वं वार्यते।

ननु सूत्रे उपसर्गद्वयमनर्थकम्, तदभावेऽपि कर्मणा यमेति = गच्छति प्राप्नोति सम्बध्नातीत्यर्थो लभ्यते। अभिप्रैतीत्युक्तेऽपि स एवार्थः खल्विति चेत्, सन्निहितसंप्रदानस्थले दानस्य तत्काले विप्रसंतोषरूपदृष्टफलवत्त्वात्तत्रैव संप्रदानत्वं स्यात्, असन्निहितसंप्रदानस्थले विप्राय ददातीति न स्यात्। अतः सूत्र उपसर्गद्वयग्रहणम्। अभिराभिमुख्ये वर्तते। प्रशब्द आदिकर्मणि। तथाच कर्मणा

करणभूतेन कर्ता क्रियारम्भे यमुद्दिशति, स संप्रदानमिति सूत्रार्थो लभ्यते। स चोद्देशः सन्निहितेऽसन्निहिते च सर्वत्रास्तीति विप्राय गां ददाति, गा मदात्, गां दास्यतीत्यादिप्रयोगोपपत्तिः स्पष्टैवेति बोध्यम्।

[उद्देश्यमिति] - अन्यार्थस्यान्यलभ्यत्वात्तावन्मात्रमेव चतुर्थ्यर्थ इत्यर्थः। नन्वेवमजां ग्रामं नयतीत्यादौ नयतिक्रियाकर्मभिरजादिभिः सम्बध्यमानस्य ग्रामस्य संप्रदानत्वापत्तिरित्याशङ्कायामाह [इदमेव शेषित्वमिति] अयं भावः - सूत्रे यमभिप्रैतीत्युक्त्या यमिति निर्दिष्टस्य शेषित्वं, कर्मणेति निर्दिष्टस्य शेषत्वं च प्रतीयते। यथा "स्वरितञितः" इति सूत्रे कर्त्रभिप्राये क्रियाफल इत्युक्त्या कर्तुः शेषित्वं क्रियाफलस्य शेषत्वं च प्रतीयते। प्रकृते यस्य शेषित्वं तस्यैव संप्रदानत्वमित्यजाया ग्रामं प्रत्यशेषत्वात्तन्निरूपितशेषित्वस्य ग्रामेऽसत्त्वान्न तस्य संप्रदानत्वम्। इदमेवेत्यस्य सूत्रे यमिति निर्दिष्टमुद्देश्यत्वमेवेत्यर्थः। अजां ग्रामं नयतीत्यत्र ग्रामोऽजासम्बद्धो भवत्विति नेच्छा नेतुः, किं तर्हि अजा ग्रामसम्बद्धा भवत्विति। यदा तु ग्रामोऽजासंयुक्तो भववित्युद्देशेनाजानयनं, तदा ग्रामस्य संप्रदानत्वं भवत्येव - अजां ग्रामाय नयतीति। अजापुरीषसम्बन्धेनाधिकसस्यसम्पत्त्याः विलक्षणशोभाजननाय ग्राममजासंयुक्तं जनः करोति। नागेशपण्डितस्तु "अजां ग्रामं नयतीत्यत्र परत्वात्कर्मत्वेन संप्रदानत्वं बाध्यते। अन्यथा अजाग्रामसम्बद्धा भवत्वित्यभिप्रायेणाजानयनेऽजायाः संप्रदानत्वापत्तिरित्यभिप्रैति। एतादाशयेनैव "कर्मसंज्ञया बाधान्न दोष इति तत्त्वम्" इति शब्दरत्न उक्तम्।

ननु अजा ग्रामसंयुक्ता भवत्वित्युद्देशेनाजानयनेऽपि उपकारकत्वरूपशेषत्वस्याजायां सत्त्वेन तन्निरूपितशेषित्वस्य ग्रामे सत्त्वात्संप्रदानत्वापत्तिरेवेत्याशङ्कायामाह [तदुद्देश्यकेति] परोद्देशप्रवृत्तपुरुष व्यापारगोचरत्वरूपं पारार्थ्यं शेषत्वमिति यावत्। एतादृशस्य शेषत्वस्याजायामभावान्न ग्रामस्य शेषित्वम्। इत्येवेत्येवशब्देनोपकारकत्वादेर्व्यावृत्तिः। तदाश्रयणे हि प्रधानान्यप्यङ्गानामनुष्ठानलक्षणमुपकारं कुर्वन्ति शेषत्वं गच्छेयुः। नच येन विना यन्न भवति स तस्य शेषः, बीजादिनेवाङ्कुरादिः, स बीजादिस्तस्याङ्कुरादेः शेषः। भवनमिहोत्पत्तिस्थितिसाधारणमिति वाच्यम्। रूपरसादीनामाग्नेयादीनां मिथोऽविनाभावेन शेषत्वापत्तेः। नापि प्रयोज्यत्वं शेषत्वमिति वाच्यम्। पुरोडाशकपालादिष्वप्रयोज्येष्वपि शेषत्वसम्भवात्तत्राव्याप्तेः। केचित्तु यद्यस्मादधिकं विधीयते, स तस्य शेष इति वदन्ति। तदपि न, अङ्गप्राधानानां परस्पराधिक्यात्। तथाच राजसूयादिषु अङ्गापेक्षयाऽनुमत्यादि-प्रधानानामाधिक्यादव्याप्त्यतिव्याप्ती स्याताम्। अन्ये तु विध्यन्तविहितत्वं शेषत्वं प्राहुः। तदप्ययुक्तम्। विध्यादिविहितानामपि शाखाच्छेदनादीनामङ्गत्वदर्शनात्। उक्तं च पार्थसारथिमिश्रैः -

तस्मात्पारार्थ्यमेवैकं युज्यते शेषलक्षणम्।
परोद्देशप्रवृत्तिश्च पारार्थ्यमभिधीयते।। इति।।

[पूर्वतन्त्र इति] पूर्वमीमांसायामित्यर्थः। तथाच तृतीये प्रथमपादे जैमिनेः सूत्रम् - "शेषः परार्थत्वात्" इति ३-१-२।

एवं च सूत्रे यमिति निर्दिष्टस्य शेषित्वरूपमुद्देश्यत्वं, कर्मणेति निर्दिष्टस्य परोद्देशप्रवृत्तपुरुषव्यापारगोचरत्वरूपं शेषत्वं च प्रतीयते। तत्र कर्मण श्चतुर्थीनिमित्तत्वप्रदर्शनात्कर्मश्रुत्यपेक्षया चतुर्थीश्रुतेर्बलवत्त्वं बोध्यत इति ज्ञेयम्। [अत एवेति] यमिति निर्दिष्टस्य शेषित्वालाभादेवेत्यर्थः। शेषित्वरूपोद्देश्यत्वस्य चतुर्थ्यर्थत्वस्वीकारादेवेति यावत्। [प्रासनवदिति] "प्रासनवन्मैत्रावरुणाय दण्डप्रदानं कृतार्थत्वात्" इति मैत्रावरुणाय दण्डदानस्य प्रतिपत्तिकर्मत्वबोधकं जैमिनेः पूर्वपक्षसूत्रम्। प्रासनवदिति दृष्टान्तवचनम्। तथाहि अग्निष्टोमप्रकरणे "कृष्णविषाणया कण्डूयते" इति विधायनात्परं श्रूयते "नीतासु दक्षिणासु कृष्णविषाणं चात्वाले प्रास्यति" इति। अयमर्थः - यदा यजमानेन दत्ता दक्षिणा ऋत्विग्भिर्नीता, तदा यजमानो यज्ञे गात्रकण्डूयनाय स्वहस्ते धृतं कृष्णमृगश्रृङ्गं चात्वालनामके यज्ञीयगर्ते प्रास्येत् = प्रक्षिपेदिति। प्रपूर्वस्य असु क्षेपणे धातोर्दैवादिकस्य प्रास्यतीति रूपम्। तत्र प्रासनं प्रतिपत्तिकर्म, उतार्थकर्मेति संदिह्य सप्रयोजनत्वादर्थकर्मेति युक्तम्। प्रतिपत्तितायां त्वपूर्वाभावे निरर्थकमेव स्यादिति पूर्वपक्षे "कृष्णविषाणया कण्डूयति" इति श्रुत्या कण्डूयनेन कृतार्थस्य प्रतिपत्यपेक्षत्वात्प्रतिपत्तिकर्मैवेति युक्तम्। नचानर्थक्यम्, प्रासनक्रियाप्रयुक्तापूर्वाभावेऽपि चात्वाल एवेति नियमापूर्वसम्भवादिति सिद्धान्तितम्। तथाच प्रासनस्य प्रतिपत्तिकर्मताप्रतिपादकं जैमिनेः सिद्धान्तसूत्रम् - "उत्पत्तौ येन संयुक्तं तदर्थं श्रुतिहेतुत्वात्तस्यार्थान्तरगमनशेषत्वात्प्रतिपत्तिः स्तात्" ४-२-१९ इति। एवं च प्रासनवत् दण्डदानमपि प्रतिपत्तिकर्मैव। तथाहि - "दण्डेन दीक्षयति" इत्यनेन दीक्षितस्य दण्डधारणं विधाय पुनराम्नायते "क्रीते सोमे मैत्रावरुणाय दण्डं प्रयच्छति" इति। प्रपूर्वस्य दाण् (दाने) धातोः प्रयच्छतीति रूपम्। मैत्रावरुणाय दण्डप्रदानं दण्डस्य प्रयोजकमर्थकर्म? उत प्रतिपत्तिकर्माऽप्रयोजकमिति सन्देहे द्वितीयाश्रुतिसंयोगात् कृतार्थत्वाच्च दण्डप्रदानं प्रतिपत्तिकर्मैवेति पूर्वपक्षसूत्राशयः। ततः "अर्थकर्म वा कर्तृसंयोगात् स्रग्वत्" ४-२-१८ इति जैमिनेः सिद्धान्तसूत्रम्। अयमर्थः - प्रासनवद्दण्डप्रदानं न प्रतिपत्तिकर्म भवितुमर्हति। किन्तु द्वितीयाश्रुत्याः बलीयस्त्वान्मैत्रावरुणायेति चतुर्थीश्रुत्याऽर्थकर्म। अर्थकर्मत्वे च शेषित्वं प्रयोजकम्। चतुर्थ्या च मैत्रावरुणस्य शेषित्वं बोध्यते।

किञ्च दण्डदानस्य प्रतिपत्तिकर्मत्वे मैत्रावरुणहस्ते प्रक्षेपमात्रेण शास्त्रस्य कृतार्थत्वात् "दण्दी प्रैषानन्वाह" इत्यादावत्यन्तमप्राप्तदण्डविधिः स्यात्। अर्थकर्मत्वे तु मैत्रावरुणेन यत्क्रियते, तदर्थं दण्डदानं स्यात्। तत्र च प्रकरणाविशेषात्सर्वमैत्रावरुणकार्यार्थत्वप्राप्त्या प्रैषानुवचनयोस्तदुपसंहारार्थं "दण्डी प्रैषानन्वाह" इति वचनमिति विधिलाघवम्। अतश्चतुर्थीश्रुत्या दण्डदानमर्थकर्मैव। अत एवाग्नीषोमीयपशुविकारे निरूढपशावसत्यपि दीक्षिते मैत्रावरुणार्थेन दण्डेऽपादानत्वसिद्धिरिति भावः। [प्रतिपत्तिरिति] प्रधानकर्मणि यज्ञादौ कृतोपयोगस्य वस्तुनः संस्कारकं कर्म प्रतिपत्तिरित्युच्यते। यथा इडाभक्षणादि। इडा नाम दर्शपूर्णमासयोः पुरोडाशविशेषः। त'क्षणस्य "यजमानपञ्चमा इडां भक्षयन्ति" इति श्रुत्या विधानात्। यजमानः पञ्चमो येषु ऋत्विक्षु - ते यजमानपञ्चमाः। चत्वार ऋत्विजः। पञ्चमो यजमानः। नचोपयुक्तस्य संस्कारे फलाभावः। यज्ञीयभूमिसंकीर्णताविवृत्तेरेव फलत्वकल्पनात्। [अर्थकर्मेति] उपयोक्ष्यमाणस्य संस्कारः। यथा - उपयोक्ष्यमाणस्य व्रीह्यादेरुपयोगात्पूर्वमेव प्रोक्षणादिसंस्कारः। अत्र संस्कृतेन द्रव्येण यज्ञस्वरूपसिद्धिस्तदद्वारा अदृष्टं च फलम्। प्रतिपत्तौ संस्कारजन्यं न किञ्चित् फलमित्युपयुक्तसंस्कारापेक्षया उपयोक्ष्यमाणस्य संस्क्रिया गरीयसी। एवं प्रासनं प्रतिपत्तिरेव। तद्वत् मैत्रावरुणाय दण्डदानं न प्रतिपत्तिः। किन्त्वर्थकर्मेति।

रजकाय वस्त्रं ददातीत्यपि खण्डिकोपाध्यायः शिष्याय चपेटां ददातीति भाष्योदाहरणादिष्टमेव। वृत्तिकारास्तु सम्यक्प्रदीयते यस्मै तत्संप्रदानमित्यन्वर्थसंज्ञया स्वस्वत्वनिवृत्तिपर्यन्तमर्थं वर्णयन्तो रजकस्य वस्त्रमित्येवाऽऽहुः।

इदं च -

अनिराकरणात्कर्तुस्त्यागाङ्गं कर्मणेप्सितम्।
प्रेरणानुमतिभ्यां च लभते सम्प्रदानताम्।।

इति वाक्यपदीयात्त्रिविधम्। "सूर्यायार्घ्यं ददाति" इत्याद्यम्। नात्र सूर्यः प्रार्थयते, नानुमन्यते, न निरा करोति। प्रेरकं - "विप्राय गां ददाति" अनुमन्तृ - "उपाध्यायाय गां ददाति"।

संप्रदानमित्यन्वर्थसंज्ञाविज्ञानाद्रजकाय वस्त्रं ददातीति न प्रयोगः, किन्तु रजकस्य वस्त्रं ददातीत्येवेति वृत्तिकारमतमयुक्तं, भाष्यविरोधादित्याह [रजकाय वस्त्रमिति] खण्डिकोपाध्यायः = खण्डिकासंज्ञकाथर्व-वेदभागस्योपाध्यायः। चपेटां = प्रसृतकरतलम्। [इष्टमेवेति] अन्वर्थसंज्ञाविज्ञाने भाष्यप्रयोगासङ्गत्यापत्त्या

तदनाश्रयणात्तादृशचतुर्थ्यन्तरूपमिष्टमेवेति भावः। वृत्तिकारमतमाह [वृत्तिकारास्त्विति] [आहुरिति] अनेनारुचिः सूच्यते। तद्बीजं तु - स्वत्वनिवृत्तेरभावेऽपि न शूद्राय मतिं दद्यात्, खण्डिकोपाध्यायः शिष्याय चपेटां ददातीति भाष्यप्रयोगदर्शनेन तस्यान्वर्थत्वाश्रयणमयुक्तम्। रजकस्य वस्त्रं ददातीति तु शेषत्वविवक्षया साध्विति। अत एव पत्ये शेते, ग्रामाय गच्छतीत्यादिप्रयोगाणां संप्रदानचतुर्थ्या निर्वाहं प्रदर्श्य "क्रियाग्रहणं कर्तव्यम्" इति वार्त्तिकस्य "गत्यर्थकर्मणि" इत्यादिसूत्रस्य च प्रत्याख्यानं भाष्यकृतः सङ्गच्छते।

संप्रदानं विभजते [इदं चेति] अस्य त्रिविधमित्यत्रान्वयः। हरिकारिकायाम् ["अनिराकरणात्" इति] इत्यागाङ्गं कर्तुः कर्मणा = क्रियया ईप्सितम् अनिराकरणात्, प्रेरणानुमतिभ्यां च संप्रदानतां लभत इत्यर्थः। अनिराकर्तृ प्रेरयितृ अनुमन्तृ इति संप्रदानं त्रिविधमिति भावः। [आद्यमिति] अनिराकर्तृसंप्रदानमित्यर्थः। "नात्र सूर्यः प्रार्थयते, नानुमन्यते" इत्युक्तिः सूर्य अनुमन्तृत्वप्रेरयितृत्वरूपधर्मप्रतिपादनाय। एवं च निराकुर्वत्कारकं नैव संप्रदानतां लभत इति बोध्यम्। [प्रेरकमिति] धनिको गां दास्यतीति श्रुत्वा ब्राह्मणो 'मह्यं कुटुम्बधारणाय देहि' इति धनिकं प्रेरयति। एवं प्रेरयित्रे ब्राह्मणाय गां ददातीत्याशयः। [अनुमन्त्रिति] उपाध्यायो न प्रेरयति, न निराकरोति, अपि त्वेवमस्त्वित्यनुमन्यत इत्याशयः।

ननु ब्राह्मणाय गां ददातीत्यादौ गवादीनां ब्राह्मणाद्यर्थतया मुक्तये हरिं भजत इत्यादाविव तादर्थ्यचतुर्थ्यैव सिद्धे किं संप्रदानचतुर्थीविधानेनेति चेन्न। दानक्रियार्थं हि ब्राह्मणादिसंप्रदानं, नतु दानक्रिया संप्रदानार्था, कारकाणां क्रियार्थत्वात्। संप्रदानार्थं तु दीयमानं गवादि कर्मेति वाक्यार्थभूतसंप्रदानक्रियायास्तादर्थ्याभावात्तादर्थ्यचतुर्थ्या गतार्थयितुमशक्यत्वात्। तदेतद्धरिकारिकायां "त्यागाङ्गम्" इत्यनेन सूच्यते। स्पष्टं चेदं हेलाराजीये।

एवमत्र ग्रन्थे "कर्तुरीप्सिततमं कर्म" "साधकतमं करणम्" "आधारोऽधिकरणम्" "ध्रुवमपायेऽपादानम्" "कर्मणा यमभिप्रैति स संप्रदानम्" इत्येतैः सूत्रैर्निर्दिष्टाः कर्मादिसंज्ञा निरूपिताः। अनया दिशा "रुच्यर्थानां प्रीयमाणः" "वारणार्थानामीप्सितः" इत्यादिसूत्रान्तरैर्निर्दिष्टाः संज्ञा अपि ज्ञातव्याः। कारिकायां "सम्बन्ध" इत्यनेनोपपदविभक्त्यर्थः कथितः। विस्तरणे तु ग्रन्थान्तरतो विभक्त्यर्था ज्ञातव्याः। अनेनैवाशयेन श्रीमत्कालोपनामक केशवदीक्षितात्मजहरिरामदीक्षिता महता प्रबन्धेन "अथ केषुचित् प्रयोगेषु विभक्त्यर्थो निरूप्यते" इत्युपक्रम्य सुबर्थनिर्णयभूषणसारव्याख्याने काशिकायां विभक्त्यर्थान् सविस्तरं प्रतिपादयामासुः। तत्प्रतिपादनं तत एवावगन्तव्यम्।

अत्र सर्वत्र प्रकृतिप्रत्ययार्थयोरभेदः संसर्गः। विभक्तीनां धर्मिवाचकत्वात्। धर्ममात्रवाचकत्वे "कर्मणि द्वितीया" इति सूत्रस्वरसभङ्गापत्तेः। कर्मार्थककृत्तद्धितादौ तथा दर्शनाच्च। द्वितीयाद्यर्थकबहुव्रीहौ "प्राप्तोदक" इत्यादौ धर्मावाचकतालाभाच्च।

सुपां कर्मादयोऽप्यर्थाः सङ्ख्या चैव तथा तिङाम्।

इति भाष्याच्चेति दिक्। आश्रयस्यापि प्रकृत्यैव लाभान्न विभक्तिवाच्यता, किन्त्वाश्रयत्वमात्रं वाच्यम्। तदेव च तादात्म्येनावच्छेदकम्। करणतृतीयायाश्च व्यापारोऽपि, पञ्चम्या विभागमात्रं, चतुर्थ्या उद्देश्यत्वमात्रम्। अत एवाऽऽकृत्यधिकरणमपि न विरुध्यत इत्यभिप्रेयत्याऽऽह शक्तिरेव वेति। षण्णामपीति शेषः। "षष्ठी शेषे" इति सूत्रात्तस्याः सम्बन्धमात्रं वाच्यम्। कारकषष्ठ्यास्तु शक्तिरेवेत्यूह्यम्। "सप्तमीपञ्चम्यौ कारकमध्ये" इति सूत्रे शक्तिः कारकमिति पक्षस्य भाष्ये दर्शनात्। एवं च "देवदत्तस्य गौर्ब्राह्मणाय गेहाद् ग्रङ्गायां हस्तेन मया दीयते" इत्यत्र देवदत्तसम्बन्धिनी या गौस्तदभिन्नाश्रयकत्यागानुकूलो ब्राह्मणोद्देश्यको गेहनिष्ठविभागजनको गङ्गाधिकरणको हस्तकरणको मन्निष्ठो व्यापार इति बोधः। यथायथम् - उक्तप्रकारेण।

प्रकृत्यर्थप्रत्ययार्थयोरन्वयबोधे दर्शयति [अत्र सर्वत्रेति]। [अभेदः सम्बन्ध इति] प्रकृत्यर्थस्याभेदेन सम्बन्धेन प्रत्ययार्थे विशेषणत्वमित्यर्थः। अभेदो न संसर्ग इति तु सुबर्थवादमञ्जूषायां नागेशोपाध्यायाः। तन्मतेऽभेदेऽपि विशेषणविशष्यभाव इत्यर्थो वाच्यः। अभेदो न संसर्ग इति नागेशोक्तिरयुक्तेति दर्पणकाराः, पञ्चोलिनश्चाभिप्रयन्ति। तत्तु नागेशग्रन्थार्थानवबोधनिबन्धनमेवेति बोध्यम्। एवमनेकेषु स्थलेषु दर्पणकारा नागेशं पर्यनुयुञ्जते। तदुराग्रहमूलकमेव, न वास्तवमिति तत्र तत्रोपपादयामः। विस्तरस्तु मदीये मञ्जूषाव्याख्याने नागेशभावप्रकाशे द्रष्टव्यः। नच प्रकृतिप्रत्ययार्थयोरभेदान्वयो न दृष्ट इति वाच्यम्। ऐन्द्रं, वैश्वदेवीत्यादिषु देवतादिविशिष्टामिक्षादिबोधकेषु तथान्वयस्य दृष्टत्वात्। ऐन्द्रमित्यादावपि तद्धितप्रत्ययस्य देवतात्वविशिष्टद्रव्य एव शक्त्यङ्गीकारेण तत्रेन्द्रस्याधेयतासम्बन्धेनैवान्वयस्वीकारे तु गौरवम्। नच द्वितीयादेराश्रयमात्रार्थकत्वे प्रातिपदिकस्यापि तदर्थकतया प्रातिपदिकार्थे प्रथमया सह द्वितीयादेः प्रर्यायतापत्तिरिति वाच्यम्। प्रातिपदिकार्थसूत्रे मात्रग्रहणेन तदतिरिक्तार्थाभावे प्रथमाविधानात्। द्वितीयादीनामाश्रयत्वादिरूपकर्मशक्तेरपि वाच्यतावच्छेदिकाया वाच्यत्वात्। ननु प्रकृतिप्रत्ययार्थयोरभेदेनान्वयो न घटते "द्व्येकयोर्द्विवचनैकवचने"

इत्यत्र द्व्येकशब्दयोरिव "कर्मणि द्वितीया" इत्यादौ कर्मादिशब्दानां धर्मवाचकत्वादित्यत आह [विभक्तीनामिति]। [धर्मिवाचकत्वादिति] "सङ्ख्या चैव तथा तिङाम्" इति वार्तिकबलात् सूत्रे "द्व्येकयोः" इति द्विवचनान्तनिर्देशेन च सूत्रे द्व्येकशब्दयोः सङ्ख्यापरत्वेऽपि "कर्मणि द्वितीया" इत्यादौ धर्मपरत्वे मानाभाव इत्याशयः। "द्व्येकयोः" इत्यादिसूत्रे द्व्येकशब्दस्य सङ्ख्येयपरत्वे द्व्येकेष्विति स्यादिति स्पष्टमेव।

द्वितीयादिविभक्तीनां कर्मत्वादिधर्ममात्रवाचित्वं, लाघवात्। "कर्मणि द्वितीया" इत्यादेः कर्मत्वे द्वितीयेत्यादिरर्थ इति परेषां मतं दूषयति [धर्ममात्रवाचकत्व इति]। [भङ्गापत्तेरिति] अन्यथा कर्मत्वे द्वितीयेत्याद्येवावक्ष्यत्, नतु "कर्मणि द्वितीया" इत्यादि। ग्रामं गच्छतीत्यादौ ग्रामाभिन्नं यत्कर्मेति बोधे, तस्य चाधेयतासम्बन्धेन धात्वर्थसंयोगादावन्वयः। तथा च ग्रामाभिन्नकर्मवृत्तिसंयोगानुकूलो व्यापार इति शाब्दबोधः। एतेन "कर्मणि द्वितीये त्यादौ कर्मादिपदं धर्मपरम्। अन्यथा कर्मणि नामार्थस्य ग्रामादेरभेदेनान्वयसम्भवेऽपि धात्वर्थगमनादिना तदन्वयासम्भवात्" इति नव्यनैयायिकोक्तमपास्तम्। ननु लाघवात् कर्मादिपदानां धर्मपरत्वमेव युक्तम्। किञ्च राज्ञः पुरुष इत्यादौ सम्बन्धवाचिषष्ठीस्थले प्रातिपदिकार्थस्य प्रत्ययार्थे सम्बन्धे भेदसम्बन्धेनैवान्वयस्याङ्गीकर्तव्यतया सर्वत्रापि तथैवास्तु, किं व्युत्पत्त्यन्तरकल्पनया। तथा च ग्रामं गच्छतीत्यादौ भेदसम्बन्धेनैवान्वयोपगमे न किञ्चिद्बाधकमत आह [कर्मार्थकेति]। [कृदिति] - कृतः कटः, पक्वस्तण्डुल इत्यादौ। [तद्धितेति] शत्योऽश्व इत्यादौ। न्यायसाम्यात्कृत्तद्धितावपि "तयोरेव" इत्यादौ कर्मादिपदानां धर्मपरतायां तत्र नामार्थयोरभेदान्वय इति व्युत्पत्तिविरोधा'दसम्बन्धेन कर्मत्वादेः कटादावनन्वयापत्तिः। राज्ञः पुरुष इत्यादौ तु धर्मिबोधकप्रमाणाभावात्तत्र विभक्तेः सम्बन्धबोधकत्वमस्तु। "षष्ठी शेषे" इति शास्त्रं तत्र प्रमाणं भवितुमर्हतीति भावः। [तथा दर्शनादिति] धर्मिवाचकतादर्शा दित्यर्थः। ननु कृत्तद्धितादौ पदार्थान्तरसामानाधिकरण्यानुपपत्त्या धर्मिवाचकत्वमस्तु। "कर्मणि द्वितीया" इत्यादौ प्रकृते तूक्तापत्त्यभावेन लाघवाद्धर्मवाचकत्वमेवास्त्वित्यत आह [द्वितीयाद्यर्थकेति] द्वितीयादिविभक्तीनां धर्मवाचकत्वे तदर्थविहितसमासस्यापि धर्मवाचकत्वं स्यात्। तथाच प्राप्तोदको ग्राम इत्यादावुदककर्तृकप्राप्तिकर्माभिन्नो ग्राम इति शाब्दबोधानुपपत्तिः स्पष्टैवेति तदनुरोधेन द्वितीयादेर्धर्मिवाचकत्वमास्थेयमिति भावः। ननु प्राप्तोदकादिसमासस्यापि धर्मवाचकत्वमेवास्तु, ग्रामसामानाधिकरण्यं तु लक्षणया सेत्स्यतीत्यत आह [सुपामिति]। [इति भाष्यादिति] इत्यस्य कात्यायनवचनस्य भाष्यादित्यर्थः। "सुपां तिङां च सङ्ख्या

चैवार्थः। कर्मादयश्च" इति तत्रत्यं भाष्यम्। एवं च भाष्यवार्तिकाभ्यामुभाभ्यामपि कर्मादीनामेव द्वितीयादिवाच्यत्वं, न कर्मत्वादीनामिति स्पष्टमेव लभ्यते। इदं च भाष्यं "बहुषु बहुवचनम्" इत्यादिसूत्रेषु स्थितम्। ननु "कर्तृत्वमेकत्वं चान्वयि" इति भूवादिसूत्रस्थभाष्येण तिङां कर्तृत्ववाचकतालाभेन, तद्बलेन "सुपां कर्मादयोऽप्यर्थाः सङ्ख्या चैव तथा तिङाम्" इति वार्तिके "कर्मणि द्वितीया" इत्यादिसूत्रजाते च कर्मादिपदानां धर्मवाचकत्वमेवाश्रीयते। अन्यथाऽर्धजरतीयतापत्तेः। एवं च प्राप्तोदको ग्राम इत्यादौ लक्षणाश्रयणान्न किञ्चिद् विरुध्यत इत्यत आह [दिगिति] तदर्थस्तु - अनेकभाष्यविरुद्धत्वान्निरुक्तभूवादिसूत्रस्थं भाष्यमेकदेश्युक्तिः। तथा च "सहयुक्तेऽप्रधाने" इति सूत्रे भाष्यं "प्रधाने कर्तरि लादयो विधीयन्ते" इति, "गत्यर्थलोटा" इत्यादि सूत्रेऽपि "तिङ्भ्यामेकं द्रव्यमभिधीयते" इति, "सार्वधातुके यक्" इति सूत्रेऽपि "भावकर्मकर्तारः सार्वधातुकार्थाः" इति। अन्यत्रापि "गौणे कर्मणि दुह्यादेः" इत्यादि। एवमादिबहुभाष्यविरुद्धत्वात् भूवादिसूत्रस्थं तज्जातीयमनभिहितसूत्रस्थं भाष्यं चैकदेश्युक्तिरेवेति।

एवं शक्तिमत्कारकमिति पक्षाश्रयणेन "आश्रयोऽवधिरुद्देश्य" इति मूलं व्याख्याय शक्तिः कारकमिति पक्षमाश्रित्य "शक्तिरेव वा" इति मूलवतारयति [आश्रयस्यापीति]। [प्रकृत्यैवेति] अयं भावः - द्वितीयादीनामाश्रयेऽपि न शक्तिः, फलव्यापारयोर्धातुलभ्यत्ववदाश्रयस्यापि द्वितीयादिप्रकृतिलभ्यत्वात्। अनन्यलभ्यः शब्दार्थ इति न्यायादिति। [आश्रयत्वमात्रमिति] प्रकृत्यर्थगतमाश्रयत्वमात्रमित्यर्थः। आश्रयत्वरूपधर्ममात्रे शक्तिरिति यावत्। धर्मधर्मिणोश्चाभेदात् "कर्मणि द्वितीया" इत्यादिसूत्रविरोधोऽपि न। शक्तिमदभेदमापन्नाया एव शक्तेर्विभक्तिवाच्यतया प्राप्तोदकादिबहुव्रीहावपि न दोषः। तिङ्कृदादेस्तु चैत्रः पचति, चैत्रः पक्ता, पक्वस्तण्डुल इत्यादौ सामानाधिकरण्यदर्शनाद् "युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः" इति ऋष्यनुभवाच्च धर्मिवाचकत्वं सेत्स्यतीति बोध्यम्। नन्वाश्रयत्वस्य वाच्यत्वे आश्रयत्वत्वस्य शक्यतावच्छेदकत्वं वाच्यम्। तस्य च तदाश्रयातिरिक्तावृत्तित्वे सति निखिलतदाश्रयवृत्तित्वरूपतया गौरवं स्यादत आह [तदेवेति] आश्रयत्वमेवेत्यर्थः। एवशब्देनाश्रयत्वात्वस्य व्यवच्छेदः। ननु शक्यतासमानाधिकरणधर्मस्यैवावच्छेदकतया आश्रयत्वस्य शक्यतासामानाधकरण्येनाव-च्छेदकतानुपपत्तिरत आह [तदात्म्येनेति] तथाचाश्रयत्वस्य तादात्म्येन शक्यतासामानाधिकण्यमिति भावः। तादात्म्यस्य वृत्त्यनियामकत्वेऽपि तेन सम्बन्धेन सम्बन्धित्वं सम्भवत्येवेति न दोषः। [व्यापारोपीति]

दण्डेन पचतीत्यादौ कर्तृनिष्ठव्यापारस्य धातुना लाभेऽपि करणनिष्ठव्यापारस्य तेनालाभात्करणतृतीयाया व्यापारोऽपि वाच्य इत्यर्थः। [विभागमात्रमिति] ध्रुवग्रहणप्रत्याख्यानेन विभागाश्रयः पञ्चम्यर्थ इति प्राक् प्रतिपादितम्। आश्रयस्यापि प्रकृत्यैव लाभाद्विभागमात्रं पञ्चम्यर्थ इत्यर्थः। अत एव = कर्मत्वादिधर्ममात्रस्य वाच्यत्वादेव। [आकृत्यधिकरणमिति] पूर्वमीमांसायां प्रथमाध्याये तृतीयपादे दशमाधिकरणमित्यर्थः। तस्मिन्नधिकरणे जैमिनेः षट् सत्राणि - "प्रयोगचोदनाभावादर्थैकत्वमविभागात्" ३० "अद्रव्यशब्दत्वात्" ३१ "अन्यदर्शनाच्च" ३२ "आकृतिस्तु क्रियार्थत्वात्" ३३ "न क्रिया स्यादिति चेदर्थान्तरे विधानं न द्रव्यमिति चेत्" ३४ "तदर्थत्वात्प्रयोगस्याविभागः" ३५ इति। [न विरुध्यत इति] गवादिपदशक्तिग्रहे जातिव्यक्त्योरुभयोर्भानेऽपि न व्यक्तिः शक्या, आनन्त्यात्, व्यभिचारात्, "नागृहीतविशषणा बुद्धिर्विशेष्यमुपसंक्रामति" इति न्यायात्। किन्तु विशेषणीभूते धर्म एव शक्तिरिति तत्राधिकरणे निर्णीतम्। धर्मिवाचकत्वे तु तदधिकरणविरोधः स्पष्ट एवेति भावः। [षण्णामिति] षण्णां कारकविभक्तीनामित्यर्थः। एतेन षष्ठीवर्जितविभक्तीनां षट्त्वेऽपि कारकषष्ठ्या अपि सत्त्वेन तदसङ्ग्रहापत्तिः। सप्तानामित्युक्तौ सम्बन्धषष्ठ्या अपि ग्रहणापत्तिरित्यापास्तम्।

[सम्बन्धमात्रमिति] षष्ठ्याः सम्बन्धार्थकत्वे तदपवादानामुपपदविभक्तीनामपि तदर्थकत्वमिति ज्ञेयम्। षष्ठीसामान्यस्य सम्बन्धार्थकत्वभ्रमवारणायाह [कारकषष्ठ्यास्त्विति] कारकत्वव्याप्यककर्तृत्वाद्यवच्छिन्न "कर्तृकर्मणोः कृति" इत्यादिसूत्रविहितषष्ठ्या इत्यर्थः। [शक्तिरिति] कर्मत्वादिशक्तिरेवेत्यर्थः। किञ्च द्रव्यस्य कारकत्वे तस्यैकरूपत्वेन कार्यवैचित्र्यानुपपत्तिः। दृश्यते च घटं पश्य घटेन जलमाहर घटे जलं निधेहीत्यादौ कार्यवैचित्र्यम्। सर्वस्यापि सर्वशक्त्याश्रयतेति कदाचित्कस्याश्चिच्छक्तेर्विवक्षया तत्तद्विचित्रानेककार्योपपत्तिः। क्वचिच्छक्त्याविष्टस्यापि साधनत्वेन व्यवहारः, शक्तिशक्तिमतोरभेदस्यापि सत्त्वात्। शक्त्या करोतीत्यादौ शक्तेरपि द्रव्यायमाणतया शक्त्यन्तरयोगः। अत एव विभक्त्यर्थेनाव्ययेनाव्ययीभावः सङ्गच्छते। द्रव्यस्यैव साधनत्वे तु तस्य शब्देनैवोक्त्वादव्ययस्य प्रयोग एव नेति कथं तेन समासः स्यात्। उक्तं च वाक्यपदीये -

विभक्त्यर्थेऽव्ययीभाववचनादवधार्यताम्।
अन्यो द्रव्याद्विभक्त्यर्थः, सोऽव्ययेनाभिधीयते।। इति।।

"पशौ कर्तरि" इत्यादेश्च कर्तृशक्त्याश्रय इत्यादिप्रकारेणार्थः। तदेतदाह [इत्यलमिति]

ननु कर्मादौ विहितविभक्तीनां धर्मवाचकत्वे मानाभाव इत्यत आह [सप्तमीपञ्चम्याविति] तत्र हि "द्रव्यं कारकम्" इति पक्षे द्रव्यस्यैकत्वा[१]दनिबन्धनो मध्यव्यपदेशो नास्तीति अद्य देवदत्तो भुक्त्वा "हा[२]क्ता, द्वयेहे भोक्तेत्यादौ पञ्चमीसप्तम्योरप्राप्तिभिया तत्सिद्ध्यर्थं प्रवृत्तं "क्रियामध्य" इति वार्तिकं शक्तिः कारकमिति पक्षाश्रयणेन भगवता प्रत्याख्यातम् - "नान्तरेण साधनं क्रियायाः प्रवृत्तिर्भवति। क्रियामध्यं चेत् कारकमध्यमपि भवति, तत्र कारकमध्य इत्येव सिद्धम्" इति। अत्र कैयटः "साधनमिति शक्तिमित्यर्थः। कालभेदभिन्नभुजिक्रियानुमितशक्तिभेदाश्रयो मध्यव्यपदेशोऽस्त्येवेत्यर्थ" इति। शक्तेरतीन्द्रियत्वात्क्रियानुमितेत्युक्तं कैयटेन। एवं च शक्तिद्वयमध्ये यौ कालाध्वानौ ताभ्यां सप्तमीपञ्चम्यौ स्त इति सूत्रार्थ इति ज्ञेयम्। एवम् "अनभिहिते" इति सूत्रेऽपि भाष्ये शक्तिः कारकमिति पक्षो व्युत्पादितः। एवं सुब्विभक्त्यर्थानुपवर्ण्य सम्बन्धसहित सकलकारकघटितवाक्यार्थबोधं दर्शयति [एवं चेति] उक्तरीत्या विभक्तीनां धर्मिवाचकत्वे चेत्यर्तः। शक्तिः कारकमिति पक्षेऽपि शक्तिशक्तिमतोरभेदाद्वक्ष्यमाणरीत्यैव बोधस्तत्रापि पक्ष इति बोध्यम्। [यथायथमिति] "यथास्वे यथायथम्" इति निपातनादिदं साधु। निरूपितं चैतत्प्राक्।

अत्र मानमुपदर्शयन् "घटं जानाति" इत्यादौ द्वितीयाया विषयतायां लक्षणेति बह्वाकुलं वदतो नैयायिकादीन्प्रत्याह - सुपां कर्मेति। अयं भावः -

सुपां कर्मादयोप्यर्थाः सङ्ख्या चैव तथा तिङाम्।
प्रसिद्धो नियमस्तत्र नियमः प्रकृतेषु वा।।

इति वार्तिकतद्भाष्याभ्यां कर्मादेर्वाच्यतायास्तन्नियमस्य च लाभः। तथा हि - "स्वौजसमौट्" "कर्मणि द्वितीया" "द्व्येकयोर्द्विवचनैकवचने" इत्यादेः "लस्य" "तिप्तस्झि" "तान्येकवचनद्विवचन" इत्यादेश्चैकवाक्यतया कर्मादेस्तत्सङ्ख्यायाश्च वाच्यता लभ्यते। तथा तन्नियमश्च द्विविधो लभ्यते। द्वितीया कर्मण्येव, तृतीया करणे एवेत्येवमादिश्शब्दनियमः। कर्मणि द्वितीयैव, करणे तृतीयैवेत्येवमर्थनियमश्च। उभयथाऽपि सिद्धनियमविरुद्धं लक्षणादिकमसाधुत्वप्रयोजकमिति याज्ञे कर्मणि "नानृतं वदेत्" इति निषेधविषयो भवत्येवेति स्वेच्छया लक्षणाऽपि विभक्तावप्रयोजिकैव। अत एव "विभक्तौ न लक्षणा" इत्यादिर्नैयायिकवृद्धानां व्यवहार इति दिक्।। ।।१।। (२४)

इति रङ्गोजिभट्टात्मजकौण्डभट्टविरचिते वैयाकरणभूषणसारे सुबर्थनिर्णयः समाप्तः।।

"सुपां कर्मेति भाष्यतः" इति मूलमवतारयति [अत्रेति] "आश्रयोऽवधिरुद्देश्य" इति मूलोक्तार्थे इत्यर्थः। ननु "कर्तुरीप्सिततमं कर्म" "साधकतमं करणम्" इत्यादिसूत्रैरेव मूलोक्तार्थस्य समूलत्वसिद्धिरत आह [घटं जानातीत्यादाविति] "कर्तुरीप्सिततमं कर्म" "कर्मणि द्वितीय" इत्यादिभिर्मूलोक्तार्थसिद्धावपि द्वितीयादीनां कर्माद्यतिरिक्तार्थेऽसाधुत्वं न झटिति परिस्फुरतीत्यतस्तत्प्रतिपादनाय "सुपां कर्म" इत्यादि भष्योपन्यास इति भावः। [विषयतायामिति] सविषयकधातूनां व्यापारमात्रार्थकत्वम्। घटं जानातीत्यादौ द्वितीयाया विषयत्वे लक्षणा। ज्ञायते घट इत्यादौ तु विषयित्वे लक्षणेति नैयायिकादयो मन्यन्ते। [बह्वाकुलमिति] शास्त्रमर्यादातिक्रमेणेति भावः। नैयायिकादीनित्यादिपदेन मीमांसकसङ्ग्रहः। "सुपां कर्मादयः" इत्यस्मात्प्रकृतार्थसिद्धिप्रकारं दर्शयति [अयं भाव इत्यादिना] [सुपां कर्मादयोऽपीति] "बहुषु वहुवचनम्" १-४-२१ इत्यादिसूत्रेषु कात्यायनवचनमिदम्। सुपां सङ्ख्या चैवार्थः। कर्मादयोऽपि = कर्मादयश्च अर्थाः। तथा तिङाम् = सङ्ख्या कर्मादयश्च तिङामर्थाः। नियमः प्रसिद्धः। पूर्वार्धेन सामान्यापेक्षप्रत्ययनियमस्यासम्भवो दर्शितः। अर्थद्वयसत्त्वे कर्मण्येवेत्यादेर्वक्तुमशक्तयत्वात्। वा = अथवा, प्रकृतेषु = अर्थेषु, नियमः = प्रत्ययनियमः। कर्माद्यर्थविधानसामर्थ्यात्तुल्यजातीयसङ्ख्यापेक्ष एव नियम इत्याशयः। [कर्मादेर्वाच्यताया इति] एकस्मिन् कर्मणि सुप्तिङावित्येव गुणगुणिनोः सामानाधिकरण्येन सम्बन्धे सति सङ्ख्या कर्मादयश्च सुप्तिङामर्था भवन्तीति भावः। [तन्नियमस्येति] अयमर्थः - जातिद्रव्यलिङ्गसङ्ख्याकारकरूपं पञ्चकं प्रातिपदिकार्थः। तथा फलव्यापारसङ्ख्याकालकारकरूपं पञ्चकं धात्वर्थः। तत्र "स्वौजसमौट्" "तिप्तस्झि" इत्यादिसामान्यशास्त्रेणार्थविशेषमनाश्रित्य विधीयमानाः स्वादयस्तिबादयश्चा "अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे" इति न्यायेन स्वप्रकृत्यर्थमेव बोधयन्तीति "कर्मणि द्वितीया" "लः कर्मणि च भावे चाकर्मकेभ्यः" "द्व्येकयोर्द्विवचनैकवचने" इत्यादिविधिविधेयस्य कर्मादौ द्विवचनादेः स्वादितिबादिसूत्रेण सिद्धतया पुनस्तद्विधानं नियमार्थम्। एवं च विहितानां नियमपक्षे तन्नियमोपपत्तिः स्पष्टैव - इति। [लाभ इति] कर्मादेर्वाच्यतालाभ "आश्रयोऽवधिः" इति मूलोक्तार्थं, तन्नियमलाभो लक्षणाया अयुक्तत्वं च साधयतीत्याशयः।

ननु विहितानां नियमपक्षे निरुक्तरीत्या "कर्मणि द्वितीया" "द्व्येकयोर्द्विवचनैकवचने" इत्यादीनां नियमत्वलाभेऽपि, तेषां स्वादि-तिबादिविधिना सहैकवाक्यतया विधायकत्वपक्षे तत्त्वालाभ एव। तत्पक्षे तत्तदर्थे शास्त्रान्तरेण सुप्तिङामसिद्धत्वादित्याशङ्कायामाह [तथा हीति] सुब्विषयमाह [स्वौजसमौडिति] तिङ्विषयमाह [तिप्तस्झीति] "स्वौजसमौट्" "तिप्तस्झि" इत्यादिप्रधानशास्त्राभ्यां सह "द्व्येकयोः" इत्यादिगुणशास्त्राणां वाक्यैकवाक्यतेति तत्पक्षाशयः।

[एकवाक्यतयेति] वाक्यैकवाक्यतयेत्यर्थः। आकाङ्क्षावशादेकवाक्यतामनुभूयैव तेषां लक्ष्यसंस्कारकत्वमिति भावः। एकवाक्यतयेत्यस्य पदैकवाक्यतयेति तु नार्थः कार्यः, तथा सति कर्मत्वादियोग्यार्थकप्रातिपदिकार्थमात्रगते एकत्वे प्रथमैकवचनं सुः, कर्मशक्तिसमानाधिकरणे एकत्वे द्वितीयैकवचनमित्यादिप्रकारेण बोधादन्यत्राव्ययादौ प्राप्तिरुद्भावयितुमशक्यैव। किञ्चार्थनियमप्रकृतार्थापेक्षप्रत्ययनियमशुद्धप्रत्ययनियमेति कथोच्छेद एव। एकवचनादिशब्दे भाविसंज्ञाविज्ञानगौरवं च। अतो वाक्यैकवाक्यतैवात्रैकवाक्यतापदेन विवक्षिता। स्पष्टश्चायमर्थः "बहुषु बहुवचनम्" २-४-२१ इति सूत्रे भाष्यप्रदीपोद्योते। [तन्नियम इति]। पञ्चकस्यापि धातुप्राप्तिपदिकरूपप्रकृत्यर्थतया ततो लस्य सुपश्च स्थाने विधीयमानाः। सुपस्तिङश्च "अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्ति" इति न्यायेन प्रकृत्यर्थ एव प्रवर्तन्त इति "कर्मणि द्वितीया" "लः कर्मणि" "द्व्येकयोः" इत्यादीनां सूत्राणामभावेऽपि सुप्तिङां सङ्ख्याद्यर्थकत्वलाभेन पुनरारभ्यमाणं "द्व्येकयोः" इत्यादिकमेकवाक्यतया विधानपक्षेऽपि प्राप्ताप्राप्तविवेकन्यायेन नियम एव पर्यवस्यतीति भावः। तत्पक्षे फलतो नियमादेव "अनुदात्तङित" इति सूत्रे भाष्येऽत्र पक्षे तेषां सूत्राणां परिभाषात्वव्यवहार इति ज्ञेयम्। [द्विविध इति] प्रत्ययनियमः, अर्थनियमश्चेत्यर्थ। प्रत्ययनियमोऽपि द्विविधः - अर्थसामान्यापेक्षः, तद्विशेषापेक्षश्चेति। प्रातिपदिकाच्चेद् द्वितीया, तदा कर्मण्येवेति सामान्यापेक्षः। कर्माद्यर्थयोग्यप्रातिपदिकाच्चेद् द्वितीया, तदा कर्मण्येव न करणादाविति अर्थविशेषापेक्षः। [शब्दनियम इति] प्रत्ययनियम इत्यर्थः। शब्दे नियमः = शब्दनियमः। अर्थस्य शब्दे नियम इति यावत्। [अर्थनियम इति] अर्थे नियमः = अर्थनियमः कर्माद्यर्थे द्वितीयादीनां नियमनात्। अत एव "यत एवकारस्ततोऽन्यत्र नियमः" इति प्रवादः। एतेन "येन नियमेन अर्थो नियम्यते सोऽर्थनियमः। उक्तनियमेन कर्मरूपार्थो द्वितीयामेव लभते, नान्यां सुब्विभक्तिम्" इति पञ्चोलिनः प्रयुक्ताः।

"सुपां कर्मादयोऽप्यर्थाः" इति कात्यायनवार्तिके "तत्र" इत्यत्र तच्छब्देन पूर्वोपक्रान्तार्थ एव परामृश्यते। तत्रेत्यस्य अर्थविषय इत्यर्थः। स्पष्टं चेदमुद्द्योते। एतेन "तत्र = सुप्तिङ्क्षु" इति दर्पणकाराः पञ्चोलिनश्च परास्ताः।

[उभयथेति] द्वितीया कर्मण्येव, कर्मणि द्वितीयैवेत्युभयथापीत्यर्थः। [नियमविरुद्धमिति] द्वितीया कर्मण्येवेति नियमेन द्वितीयायाः कर्मार्थ एव साधुत्वं, नान्यत्रार्थे इति लाभेन, कर्मणि द्वितीयैवेति नियमेन द्वितीयाया एव कर्मणि साधुत्वं, नान्यस्या विभक्तेरिति लाभेनान्यार्थे द्वितीयायाः,

कर्मार्थे विभक्त्यन्तरस्य चासाधुत्वलाभेन घटं जानातीत्यादौ द्वितीयादेर्विषयतादौ लक्षणाश्रयणं नैयायिकादीनां विरोधोऽपि अर्थनियम पक्ष इति भावः। उक्तेऽर्थे प्राचीननैयायिकानामपि सम्मतिमाह [अत एवेति] स्वेच्छया लक्षणाया असाधुत्वप्रयोजकत्वादेवेत्यर्थः। निषेधविषयोऽपीत्यनेन विषयतायां द्वितीयां प्रयुञ्जाना नैयायिकमीमांसका याज्ञे कर्मणि "नानृतं वदेत्" इति निषेधोल्लङ्घनात्प्रत्यवयन्त्येवेति सूचयति। एवं च नव्यनैयायिकानां न केवलं व्याकरणविरोधः, अपि तु याज्ञे कर्मणि प्रत्यवायः स्वीयवृद्धसिद्धान्तविरोधश्चेति तदुक्तिरुपेक्ष्यैवेति भावः।

नन्विदमसङ्गतम्, "कर्मणि द्वितीया" "कर्तृकरणयोस्तृतीया" "लः कर्मणि च भावे चाकर्मकेभ्यः" "कर्तरि कृत्" इत्यादिभिर्नियमशास्त्रैः सजातीयशब्दान्तरव्यावृत्तावपि विभक्तेर्लक्षणया विषयत्वादावसाधुत्वस्याप्रतिपादनात्। तथाहि - यस्मिन्नर्थे या विभक्तिः शास्त्रेणानुशिष्टा, तस्मिन्नर्थे सैव साध्वीः, नान्या। - यथा - कर्मणि द्वितीया शास्त्रेणानुशिष्टा, तस्मिन्नर्थे द्वितीयैव साध्वी, नान्या तृतीयादिः। एवं सम्प्रदाने चतुर्थ्येव, न द्वितीयादिः साध्वी। एवमेव "लः कर्मणि" इत्यादिना कर्तृकर्मणोरेव लकाराः, न करणादाविति बोध्यते। एवं च शास्त्रनिर्दिष्टार्थविषयकान्येव नियमशास्त्राणि। ये त्वर्थाः शास्त्रेण न प्रतिपाद्यन्ते यथा विषयत्वाश्रयत्वादयस्ते नियमशास्त्रैर्न निवर्त्यन्ते। अत एव चैत्रो जानातीत्यादावाख्यातस्याश्रयार्थकत्वे नासाधुत्वम्। एतदर्थबोधिकैव "विभक्तौ न लक्षण" इति वृद्धोक्तिः। नचैवं व्यत्ययानुशासनस्य "सुपां सुलुक्" इत्यादेश्च वैयर्थ्यापत्तिरिति वाच्यम्। अभेदान्वयबोधे विशेष्यवाचकपदोत्तरवर्तिविभक्तिप्रयोजकतात्पर्यविषयीभूतसङ्ख्याविरुद्धसङ्ख्याया अविवक्षायां विशेष्यविशेषणवाचकपदयोः समानवचनकत्वनियमेन "ऋजवः सन्तु पन्थाः" इत्यत्र सोः, "चषालं ये अश्वयूपाय दक्षति" इत्यत्र तिपश्चासाधुत्वापत्त्या तत्साधुत्वसम्पत्त्यर्थं तत्सार्थक्यसम्भवात्। नापि "कर्तृकर्मणोः कृति" इत्याद्यर्थनिर्देशानर्थक्य, मन्यथा शेषषष्ठ्या एव लक्षणया कर्तृकर्मबोधकत्वे तदानर्थक्यं स्पष्टमेवेति वाच्यम्। कृष्णस्य कृतिरित्यादौ कर्तृत्वादिना बोधे तृतीयाप्रयोगवारणाय "कर्तृकर्मणोः" इति षष्ठीविधानस्यावश्यकत्वात्। एवं च घटं जानातीत्यादौ विषयतायाः शास्त्रेऽनिर्दिष्टतया तत्र लक्षणायां न किञ्चिद्बाधकमित्यत आह [दिगिति] तदर्थस्तु - "लः कर्मणि च भावे चाकर्मकेभ्यः" "कर्मणि द्वितीया" इत्यादिरर्थनिर्देशोऽन्यार्थेऽन्यशब्दमात्रस्यासाधुत्वबोधकः। स चार्थः शास्त्रनिर्दिष्टोऽन्यो वा भवतु। तथा हि - व्याकरणस्मृतेः शब्दसाधुत्वपरतया तत्तदर्थ एव तत्तत्प्रत्ययानां साधुत्वबोधनेनार्थादन्यार्थेऽसाधुत्वं लभ्यते। शास्त्रानारम्भे सर्वेषामपि शब्दानां सर्वेष्वप्यर्थेषु

प्रयोगार्हत्वात्तद्दशायामारभ्यमाणं शास्त्रं शब्दस्यान्यार्थमात्रेऽसाधुत्वं गमयति, शास्त्रनिर्दिष्टार्थान्तरमात्रे इति संकोचे मानाभावात्। न च भाष्ये प्रत्ययनियमपक्षे प्रकृतकर्मत्वैकत्वादिरूपसुप्तिङर्थापेक्षयैव तन्नियमकरणादप्रकृतविषयत्वाश्रयत्वादिलक्षणायां न कोऽपि शास्त्रविरोध इति वाच्यम्। प्रकृतशब्देन भाष्यकृता एकत्वादिसङ्ख्यामात्रस्यैव विवक्षिततत्वात्। अत एव भाष्ये "प्रकृतानर्थानपेक्ष्य नियमः। केच प्रकृताः? एकत्वादयः" इत्युक्तम्। एतेन "विभक्त्यन्तरार्थे विभक्त्यन्तरस्य परं न लोके लक्षणा। न तु विषयत्वादावपि" इति भाट्टरहस्ये खण्डदेवोक्तिः परास्ता। किञ्च येषां प्रत्ययानामन्येषां वा शब्दानामर्थे विधानं कृतं शास्त्रेण, तेषामन्यत्रार्थे तदर्थे चान्येषामसाधुत्वमित्यर्थः। "प्रत्ययः" "पुंयोगादाख्यायाम्" "परश्च" इति सूत्रेषु भाष्ये स्पष्टम्। एतच्च मदीये मञ्जूषाव्याख्याने नागेशभावप्रकाशे विस्तरेण निरूपितम्। तत्तु तत एवावधार्यम्।

एवं च स्वेच्छया लक्षणां स्वीकुर्वन्तो नैयायिकमीमांसकादयो विरुद्धार्थाभधायिन एव। अतो घटं जानातीत्यादावाख्यातस्याश्रयत्वे द्वितीयाया विषयत्वे च लक्षणश्रयणं नव्यनैयायिकमीमांस कानामशास्त्रीयमेवति।। ।।२४।।

इति वैयाकरणभूषणसारतत्त्वदर्शिन्यां

सुबर्थनिर्णयः।।३।।

अथ नामार्थनिर्णयः

अथ नामार्थमाह -

एवं द्विकं त्रिकं चाथ चतुष्कं पञ्चकं तथा।

नामार्थ इति सर्वेऽमी पक्षाः शास्त्रे निरूपिताः।।१।। (२५)

एकं - जातिः, लाघवेन तस्या एव वाच्यत्वौचित्यात्। अनेकव्यक्तीनां वाच्यत्वे गौरवात्। न च व्यक्तीनामपि प्रत्येकमेकत्वाद्विनिगमनाविरहः, एवं ह्येकस्यामेव व्यक्तौ शक्त्यभ्युपगमे व्यक्त्यन्तरे लक्षणायां स्वसमवेताश्रयत्वं संसर्ग इति गौरवम्। जात्या तु सहाश्रयत्वमेव संसर्ग इति लाघवम्। किञ्च विशिष्टवाच्यत्वमपेक्ष्य नागृहीतिविशेषणन्यायेन जातिरेव वाच्येति युक्तं, व्यक्तिबोधस्तु लक्षणया। एवं च तत्र विभक्त्यर्थान्वयोऽप्युपपद्यत इति दिक्।

अथ नामार्थनिर्णयः।

एवं सुबर्थं निरूप्य तत्प्रकृतिभूतप्रातिपदिकार्थं निरूपयतीत्याह [नामार्थमाहेति]। अत्र नामपदं प्रातिपदिकमात्रपरम्। निरूपितं चैतद्धात्वर्थनिर्णये।

मूले - एकं = जातिर्व्यक्तिर्वा। द्विकं = जातिव्यक्ती। त्रिकं = जातिव्यक्तिलिङ्गानि। चतुष्कं = जातिव्यक्तिलिङ्गसंङ्ख्याः। पञ्चकं = जातिव्यक्तिलिङ्गसङ्ख्याकारकाणि। एकमित्यादेर्नामार्थ इत्यत्रान्वयः। तत्र पूर्वपूर्वस्य प्रातिपदिकार्थत्व उत्तरोत्तरं प्रत्ययार्थो व्यक्तिं विना। पञ्चकं प्रातिपदिकार्थ इति मुख्ये चरमपक्षे प्रत्ययो द्योतक एवेति बोध्यम्।

प्रथममेकशब्दार्थो जतिरित्याशयेनाह [एकं जातिरिति] जन्यते असाविति जातिः। "जननेन या प्राप्यते सा जाति" इति "अतिशायने तमबिष्ठनौ" ५-३-५५ इति सूत्रे भाष्यकृतः। "जातेरस्त्रीविषयादयोपधात्" ४-१-६३ इति सूत्रे भाष्ये जातिलक्षणद्वयमुक्तम्। तच्च "अपर आह, अन्य आह" इत्यवतार्य प्रदर्शितम्। तदपि भाष्यकृता न व्याख्यातम्। अतो भाष्यकारस्य न तत्र निर्भर इत्याभाति। भाष्यकारसम्मतं लक्षणं तु "भिन्नेष्वभिन्नं छिन्नेष्वच्छिन्नं सामान्यभूतम्" इति पस्पशाह्निकोक्तं बोध्यम्। तत्रोपपत्तिं दर्शयति [लाघवेनेति] निखिलगोवृत्तिगोत्वरूपजातेरेकत्वेन तादृशजात्याश्रयशक्तेरेकत्वेन लाघवम्। "भिन्नेष्वभिन्नम्" इति भाष्येण जातेरेकत्वं सिद्धम्। अत्र पक्षे

शक्तिग्रहस्तु "गौर्गोपदशक्यः" इत्याकारकः। स च "स्वर्गौ ध्वस्तः" इतिवत् "नागृहीतविशेषणा बुद्धि र्विशेष्य उपजायते" इति न्यायसहकृतलाघवेन जातमात्रे। यद्वा जातिविशेष्यक एव शक्तिग्रहः "गौर्गोपदशक्यः" इति। जातावेव शक्तावप्येवमेव शक्तिग्रहाभिलापः। शक्यतावच्छेदकं तु शब्दगता जातिः। शब्दार्थयोस्तादात्म्येन तद्गतजात्योरपि तत्त्वात्। यद्वा जातिगतो धर्मश्शक्यतावच्छेदक इति भावः।

ननु शक्तिग्रहकशिरोमणिना व्यवहारेण नयनानयनाद्यात्मकेन व्यक्तावेव शक्तिग्रहात्कथं जातौ तत्सिद्धिरत आह [अनेकव्यक्तीनामिति] व्यवहारेण प्रथमतो व्यक्तावेव शक्तिसिद्धावपि व्यक्तीनामानन्त्यात्तत्र शक्तिग्रहासम्भवः, अनेकव्यक्तिरूपाश्रयभेदभिन्ननानाशक्तिकल्पने गौरवात्। अतः प्रथमतो व्यक्तौ गृहीता शक्तिर्जातौ विश्राम्यतीति भावः।

व्यक्तिशक्तिवादी शङ्कते [न चेति] विरह इत्यन्तेन अयं भावः - निखिलव्यक्तिष्वेकशक्तिस्वीकारे आश्रयभेदात् शक्तिभेदः प्रसज्यते। अतो न तथा स्वीक्रियते, किं तु एकैकव्यक्तौ शक्तिः स्वीक्रियते। तेनैकाश्रयकशक्तेरेकस्यास्सम्भवान्नास्मन्मतेऽपि गौरवम् - इति। [विनिगमनाविरह इति] एकपक्षसाधिका युक्तिः = विनिगमना, तदभाव इत्यर्थः। जातिव्यक्त्योर्मध्ये जातौ शक्तिः? उत व्यक्तौ? इति विचिकित्सायां लागवाज्जातौ शक्तिरास्थिता। तादृशलाघवस्यास्मन्मतेऽपि सत्त्वेन व्यक्तावेव शक्तिरास्थेया। एवं च जातावेव तत्स्वीकार इत्यत्र न विनिगमनेति पूर्वपक्ष्याशयः। तत्पक्षेऽपि गौरवमेव बाधकमित्याशयेन समाधत्ते [एवं हीति] एकैकव्यक्तौ प्रत्येकं शक्तिस्वीकारे चेत्यर्थः। शक्त्यभ्युपगमे = प्रत्येकशक्त्यभ्यपगमे। व्यक्त्यन्तरे = त"क्तिविषयकशक्त्यनाश्रये व्यक्त्यन्तरे। [लक्षणायामिति] व्यक्त्यन्तरबोधान्यथानुपपत्त्या तत्र लक्षणायां स्वीक्रियमाणायामित्यर्थः। [स्वसमवेताश्रयत्वमिति] शक्यत्वेनाऽभिमतव्यक्तिविशेषः स्वपदार्थः। स्वसमवेतसमवायित्वमित्यर्थः। [संसर्ग इति]। लक्षणायाश्शक्यसम्बन्धरूपतया तत्स्वीकार इत्याशयः। स्वमते लाघवं दर्शयति [जात्या त्विति] [आश्रयत्वमेवेति] स्वसमवायित्वमेवेत्यर्थः। ननु विनिगमनाविरहात्सर्वास्वपि प्रत्येकं शक्त्यभ्युपगमाच्छक्त्यनाश्रयव्यक्तेरभावा"क्त्यन्तरे न लक्षणाश्रयणमित्यत आह [किं चेति] [नागृहीतेति] "नागृहीतविशेषणाबुद्धिर्विशेष्य उपजायते" इति न्यायाकारः। विशेषणाविषया बुद्धिर्विशेष्यं नावगाहत इत्यर्थः। अयं भावः - व्यक्तिवाच्यतावादेऽपि जातेर्वाच्यत्वमावश्यकम्। शुद्धव्यक्तेर्वाच्यत्वे प्रतिव्यक्ति शक्तिस्वीकारे आनन्त्यम्। एकव्यक्तौ तत्स्वीकारे व्यभिचारः। अतस्तद्दोषवारणाय जातावपि शक्तिरास्थेया। एवं जातिविशिष्टव्यक्तेर्वाच्यत्वापेक्षया

प्रथमतो ज्ञाताया जातेरेव वाच्यत्वं "नागृहीत" न्यायाद्युक्त - इति। ननु गां दद्यादित्यादावनन्वयापत्तिर्दोषः, जातौ दानादीनामन्वयायोगात्। नच जात्याक्षिप्तव्यक्तौ दानान्वयः, द्वितीयार्थकर्मत्वमपि तादृशव्यक्तावेवान्वेतीति वाच्यम्। "नहि शाब्दमशाब्देनान्वेति" इति न्यायविरोधात्। "प्रत्ययानां स्वप्रकृत्यर्थान्वितस्वार्थबोधकत्वम्" इति व्युत्पत्त्या प्रत्ययार्थकर्मत्वस्याक्षिप्तव्यक्तावन्वयायोगाच्च। उक्तं च तद्भूताधिकरणे -

"गम्यमानस्य चार्थस्य नैव दृष्टं विशेषणम्।
शब्दान्तरैर्विभक्त्या वा धूमोऽयं ज्वलतीतिवत्" इति

इत्यत आह - [व्यक्तिबोधस्त्विति] - [लक्षणयेति] - निरूढलक्षणयेत्यर्थः। तत्र च नान्वयाद्यनुपपत्तिज्ञानापेक्षेति भावः। इदमुपलक्षणं जातिव्यक्त्योरभेदस्यापि। उक्तं च भट्टैः -

"तेन तल्लक्षितव्यक्तेः क्रियासम्बन्धचोदना।
व्यक्त्याकृत्योरभेदो वा वाक्यर्थेषु व्यवस्थितः" इति।।

एवं च = लक्षणोपगमे च। तत्र = लक्षितव्यक्तौ। [उपपद्यत इति] वृत्त्या प्रकृत्युपस्थाप्यत्वं प्रकृत्यर्थत्वमिति स्वीकारात्लक्षितव्यक्तौ विभक्त्यर्थसङ्ख्याकारकान्वय उपपद्यते। अन्यथा गङ्गायां घोष इत्यादौ लक्षिततीरादौ प्रत्ययार्थान्वयानुपपत्तिरेवेति भावः।

ननु "स्वार्थादन्येन रूपेण ज्ञाते भवति लक्षणा" इति नियमात् कथं गौः इत्यादौ गोत्वेन रूपेणोपस्थिते गवि लक्षणाभ्युपगम इत्यत आह [दिगिति] तदर्थस्तु - उक्तनियमाङ्गीकारे मानाभावः। नीलमानयेत्यादौ नीलपदस्य नीलरूपवति लक्षणाभ्युपगमेन तत्र तस्य व्यभिचारश्चेति।

अत्र च पक्षे "सवर्णेऽण्ग्रहणमपरिभाष्यमाकृतिग्रहणात्" इति "अइउण्" सूत्रस्थम्, "आकृतिं वाजप्यायनः" इति सरूपसूत्रस्थं च भाष्यं प्रमाणमिति बोध्यम्।

यद्वा केवलव्यक्तिरेवैकशब्दार्थः। केवलव्यक्तिपक्ष एवाण्ग्रहणस्यैकशेषस्य चाऽऽरम्भेण तस्यापि शास्त्रसिद्धत्वात्। युक्तं चैतत्। व्यवहारेण व्यक्तावेव तद्ग्रहणात्। सम्बन्धितावच्छेदिकाया जातेरैक्याच्छक्तिरप्ये कैवेति न गौरवमपि। न चैवं घटत्वमपि वाच्यं स्याच्छक्यतावच्छेदकत्वात्। तथा च नागृहीतविशेषणन्याया त्तदेव वाच्यमस्त्विति शङ्क्यम्। अकारणत्वेऽपि कारणतावच्छेदकत्ववदलक्ष्यत्वेऽपि लक्ष्यतावच्छदेकत्ववदऽत्रापि सम्भवात्।

उक्तं च -

आनन्त्येऽपि हि भावानामेकं कृत्वोपलक्षणम्।
शब्दः सुकरसम्बन्धो न च व्यभिचरिष्यति।। इति।।

ननु जातिशक्तिवादो न युक्तः गां दद्यादित्यादौ गोत्वादेर्दानकर्मत्वासम्भवा दनन्वयापत्तेः। न च लक्षणया व्यक्तिभानमित्युक्तरीत्या निर्वाहः, व्यक्त्यन्तरे शक्यसम्बन्धरूपलक्षणाया अग्रहेण दोषतादवस्थ्यात्। तथात्वे वा हस्तिपकव्यक्त्यन्तरे तत्त्वं धर्मितावच्छेददकीकृत्यापि हस्तिसम्बन्धग्रहाद्यत्र हस्तिपके स न गृहीतस्तस्यापि हस्तिदर्शनात्स्मरणापत्तेः। सर्वेष्वपि गामानयेत्यादिवाक्येषु वृत्ति द्वयकल्पनायां गौरवाच्च। वृत्तिद्वयविरोधस्यादूषकतापत्तेश्चेत्यत एकशब्दार्थो व्यक्तिरित्याशयेनाह [यद्वा केवलव्यक्तिरेवेति] केवलशब्देन जातेर्व्यवच्छेदः। अत्र पक्षे मानं दर्शयति [केवलव्यक्तिपक्ष एवेति]। जातेरपि पदार्थत्वे तज्ज्ञात्याश्रयसकलव्यक्तिबोधसम्भवेन "अणुदित्सर्वर्णस्य चाप्रत्ययः" १-१-६९ इति सूत्रेऽण्ग्रहणवैयर्थ्यमेकेनैव घटशब्देन द्विबहुघटव्यक्तिविषयकबोधसिद्ध्याऽनेकघटशब्दप्रयोगाप्रसक्त्या एकशेषारम्भवैयर्थ्यं च स्पष्टमेव। अतस्तद्बलेन व्यक्तिपक्षस्य शास्त्रसम्मतत्वं लभ्यत इति भावः। ननु "जात्याख्यायामेकस्मन् बहुवचनमन्यतरस्याम्" १-२-५८ इत्यादिशास्त्रबलाज्जातिपक्षाश्रयणमेव युक्तमत माह [युक्तं चैतदिति] एतद् = व्यक्तौ शक्त्याश्रयणम्। व्युत्पित्सुः गामानयेति वृद्धवाक्यश्रवणानन्तरं मध्यमवृद्धेन गवानयने कृते गोव्यक्तिमेवाऽऽवापोद्वापभ्यां गोपदवाच्यामवधारयति, नतु जातिम्। "जात्याख्यायाम्" इत्यादिशास्त्रं व्यक्त्यविनाभाविजात्यभिप्रायकमेवेति भावः [व्यवहारेणेति] गवानयनादिरूपव्यवहारेणेत्यर्थः। [व्यक्तावेवेति] - एवशब्देन जातिव्यवच्छेदः। [तद्ग्रहणादिति] शक्तिग्रहादित्यर्थः। न च प्रथमतः परिच्छिन्नापि व्यक्तौ शक्तिर्गौरवेण पश्चाद्बाध्यत इति वाच्यम्। एवं हि परिच्छिन्नोऽपि कर्मधारयसमासः अग्रेऽपूर्वविद्याकल्पनाभिया बाध्येतेति निषादस्थपत्यधिकरण-सिद्धान्तभङ्गापत्तेः। नन्वेवं शक्त्यानन्त्यापत्तिर्दोषोऽत आह [सम्बन्धितावच्छेदकस्येति] शक्यतावच्छेदकस्येत्यर्थः। घटादिपदानां व्यक्तावेव शक्तिः, शक्यताया अवच्छेदिका जातिरेवेत्याशयः। [शक्तिरप्येकैवेति] घटादिपदानां तत्तद्धर्मोपलक्षिततत्त"क्तिषु शक्तिराश्रीयते। तत्र शक्तेराश्रयभूतानां व्यक्तीनां सिद्ध्यतीति भावः। [न गौरवमपीति] शक्त्यानन्त्यरूपगौरवमपि नेत्यर्थः। [एवमिति] शक्यतावच्छेदकगतैकत्वमादाय शक्तेरेकत्वोपपादने त्वित्यर्थः। [शक्यतावच्छेदकत्वादिति] अवाच्यस्य शक्यतावाच्छेदकत्वायोगादित्याशयः। वाच्यत्वे सति वाच्यवृत्तित्वे सति वाच्योपस्थित्यंशे प्रकारीभूय

भासमानत्वं शक्यतावच्छेदकत्वमिति तल्लक्षणे "वाच्यत्वे सति" इति विशेषणं निविष्टम्। तदभावे द्रव्यत्वादेरपि घटपदशक्यतावच्छेदकतापत्तिः। एवं च शक्तेरेकत्वसंपादनाय तत्र जातेः शक्यतावच्छेदकत्वस्वीकारे तस्यावाच्यत्वं सिद्धिमेवेति भावः। इष्टापत्तिस्तु न कार्येत्याह [तथाचेति] जातेर्वाच्यत्वसिद्धौ चेत्यर्थः। तदेव = घटत्वादिकमेव। एवशब्देन व्यक्तेर्व्यवच्छेदः। [अस्त्विति] तथाच व्यक्तेर्वाच्यत्वं दूरापास्तमेवेत्याशयः। घटत्वस्य वाच्यत्वे हेतूपन्यसनं "नागृहीतविशेषणन्यायात्" इति। एतेन "एवमिति - विशिष्टे शक्तिस्वीकार इत्यर्थः। शक्यत्वे हेतूपन्यसनं न्यायादिति" इति दर्पणकाराः परास्ताः। [अकारणत्वेपीति] घटादिकं प्रति दण्डादिरेव कारणं, नतु दण्डत्वाद्यपि, अम्यथासिद्धत्वात्। यदाहुः "येन सह पूर्वभावः यत्कार्यं प्रति कारणस्य पूर्ववृत्तिता येन रूपेण गृह्यते, तत्कार्यं प्रति तद्रूपमन्यथासिद्धमित्यर्थः। यथा घटं प्रति दण्डत्वम्" इति न्यायविदः। तद्धर्मावच्छिन्ननिरूपितनियतपूर्ववृत्तित्वग्रहविशेष्यत्वावच्छिन्नत्वे सति तद्धर्मवच्छिन्नं प्रति स्वतन्त्रान्वयव्यतिरेकशून्यत्वं तद्धर्मावच्छिन्नं प्रत्यन्यथासिद्धत्वमिति तदर्थः। तथा चाकारणस्यापि दण्डत्वादेः कारणत्वावच्छेदकत्वं दृष्टमित्यर्थः। [अलक्ष्यत्वेऽपीति] गङ्गायां घोष इत्यादौ गङ्गापदेन तीरं लक्ष्यते। शक्यार्थेन प्रवाहेण तीरस्य समीप्यरूपसम्बन्धात्, नतु तीरत्वं, सम्बन्धाभावात्। परम्परासम्बन्धस्तु न लक्षणानियामक इति द्वितीये काव्यप्रकाशे स्पष्टम्। एवमपि तीरत्वस्य लक्ष्यतावच्छेदकत्वं स्वीक्रियते। [अत्रापीति] घटादिपदशक्यतांशेऽपीत्यर्थः। [सम्भवादिति]। घटादिपदानां व्यक्तिमात्रमेव वाच्यम्। जातिर्वाच्यैव न अवाच्यस्यापि घटत्वादेः शक्यतावच्छेदकत्वं सम्भवतीत्यर्थः। शक्यतावच्छेदकलक्षणे "शक्यत्वे सति" इति विशेषणं न देयमेव। द्रव्यत्वादेर्घटपदशक्यतावच्छेदकत्वं तु न द्रव्यत्वस्याधिकदश वृत्तितया घटपदशक्यतावच्छेदकत्वायोगात्। अन्यूनानतिरिक्त-वृत्तिधर्मस्यैवावच्छेदकत्वात्। अतो न कश्चिद्दोष इति भावः।

उक्तार्थे वृद्धसम्मतिं दर्शयति [उक्तं चेति] भट्टपादैररुणाधिकरणे। भावानां = पदार्थानां व्यक्तीनामिति यावत्। आनन्त्येऽपि = अनन्तत्वेऽपि। एकं = जातिरूपं धर्मम्। उपलक्षणं कृत्वा। शब्दः = घटादिः। सुकरसम्बन्धः = सुकरशक्तिग्रहः। नच व्यभिचरिष्यति = असम्बद्धां व्यक्तिं न बोधयति। उपलक्षीभूतधर्मेण सकलव्यक्तीनामनुगमादिति अरुणाधिकरणभट्टवाक्यार्थः।

यत्तु "उक्तं चेति - हरिणेति शेषः" इति भैरवमिश्राः, पञ्चोलिनश्च, तत्प्रामादिकम्। द्विकं = जातिव्यक्ती नामार्थ इति पक्षमुत्थापयति [वस्तुतस्त्विति] अयं भावः - न केवला जातिर्व्यक्तिर्वा

पदार्थः, किन्तु जातिविशिष्टा व्यक्तिरेव पदार्थः। सङ्केतस्य बोधकत्वस्य वा विशिष्ट एव सत्त्वात्। नच घटत्वप्रकारकघटविशेष्यकबोधे घटशक्तिज्ञानत्वेन कारणत्वमस्त्विति वाच्यम्। द्रव्यादिपदानामप्येवमापत्तौ घटपदाद् द्रव्यत्वप्रकारकबोधप्रसङ्गात्। अतो विशिष्टमेव शक्यम्। केवलजातिशक्तिवादिनो मीमांसकाः। केवलव्यक्तिशक्तिवादिनः प्राचीननैयायिकाः। विशिष्टशक्तिवादिनो वैयाकरणाः, नैयायिकनव्याश्च। पदार्थपरिशोधनाय सम्भवप्रदर्शनाय च "एकं प्रातिपदिकार्थः" इति पक्षोपन्यासः - इति।

[न ह्याकृतिपदार्थकस्येति] "न ह्याकृतिपदार्थकस्य द्रव्यं न पदार्थः, द्रव्यपदार्थकस्य वा आकृतिर्न पदार्थः। उभयोरुभयं पदार्थः" इति सरूपसूत्रे भाष्यम्। आकृतिः = जातिः, पदार्थः = अभिधेयं यस्य, तस्य = आकृतिपदार्थकस्य घटादिपदस्य; द्रव्यं = व्यक्तिः, न पदार्थ इति न, किन्तु पदार्थ एव = अभिधेय एव। एवं द्रव्यपदार्थस्य घटादिपदस्य आकृतिर्न पदार्थ इति न। उभयोः = आकृतिपदार्थक - द्रव्यपदार्थकयोः, उभयम् = आकृतिः द्रव्यम्। पदार्थः = अभिधेय एवेति तद्भाष्यार्थः। [इतीति] इत्यादीत्यर्थः। भाष्यात् = सरूपसूत्रस्थभाष्यात्। विशिष्टं = जातिविशिष्टं द्रव्यम्।

वस्तुतस्तु "न ह्याकृतिपदार्थकस्य द्रव्यं न पदार्थः" इति भाष्याद्विशिष्टं वाच्यम्। एकमित्यस्य चायमभिप्रायः - शक्तिज्ञाने च विषयतावच्छेदिका जातिरेकैव। तथाच घटत्वप्रकारकघटत्वविशिष्टबोधे घटत्वांशेऽन्याप्रकारकघटत्वशक्तिज्ञानत्वेन हेतुतेति कार्यकारणभाव इत्यादि प्रपञ्चितं भूषणे। तदेतदभिप्रेत्याऽऽह - द्विक मिति। जातिव्यक्ती इत्यर्थः। पूर्वपक्षविरोधपरिहारः पूर्ववत्।

ननु विशिष्टं नामार्थ इति पक्षेण 'एकं' नामार्थ इति पक्षो विरुणद्धि, विशिष्टस्य वाच्यत्वेऽपि वस्तुतो वाच्ये पदार्थे द्वित्वसद्भावातित्याशङ्कायामाह [एकमित्यस्येति]। अयं = वक्ष्यमाणः। चशब्दस्त्वर्थकः। [शक्तिज्ञान इति] शक्तिज्ञाननिष्ठकारणतायामित्यर्थः। विषयतया = विषयतासम्बन्धेन। जातिरेव अवच्छेदिका, न तु व्यक्तिः, नापि वैशिष्ट्यमवच्छेदकम्। तद्विषयकशक्तिज्ञानत्वेन कारणत्वाभावात्। एकं = विशिष्टं नामार्थः एकं नामार्थ इत्यस्य एकं = सामान्यमेव तादृशकारणतावच्छेदकमित्यर्थ एतत्पक्षे। "जातिरेकैव" इत्यत्रैकशब्देन व्यक्तेः, एवशब्देन वैशिष्ट्यस्य च व्यवच्छेदः। अयमर्थः - घटादिपदानां घटत्वादिविशिष्टे शक्तिः। ततो घटत्वप्रकारकघटविशेष्यकबोधो जायते। तादृशबोधे घटत्वशक्तिज्ञानत्वेन कारणत्वं कल्प्यते, लाघवात्। नतु घटत्वविशिष्टशक्तिज्ञानत्वेन, गौरवात्।

तथा सति वैशिष्ट्यस्य, घटव्यक्तेश्च कारणतावच्छेदकत्वे गौरवं स्पष्टमेव। एकं = विशिष्टं नामार्थः, एकं = जातिर्व्यक्तिर्वा नामार्थ इति कारिकाग्रन्थव्याख्याने द्वयोरपि पक्षयोः परस्परं विरोधः प्रसज्येत, अतो न तथा व्याख्यायते, किन्तु "एकं = विशिष्टं वाच्यम्। एकं = जातिरूपमेवान्तर्भाव्य कार्यकारणभावो वाच्य इति व्याख्येयम्। अतो न विरोधः। एवं च घटत्वविशिष्टशाब्दबुद्धित्वावच्छिन्नं प्रति घटत्वशक्तिज्ञानं कारणमिति कार्यकारणभावः स्वीक्रियते। शक्तिस्तु विशिष्टे कल्प्यते। विशिष्टबोधे जातिशक्तिज्ञानस्यैव कारणत्वमङ्गीक्रियत इति पर्यवसन्नम्। अयमेव कुब्जशक्तिवाद इति मीमांसकैर्गीयते। नचैवं व्यक्तौ शक्तिस्वीकारो व्यर्थ इति वाच्यम्। शब्दे व्यक्तिभानाय तत्र तत्स्वीकारस्यावश्यकत्वात्। अशक्यस्य शाब्दे भानायोगात्। अन्यथाकाशादेरपि घटपदजन्यबोधे भानप्रसङ्गात्। न च विनिमगमनाविरहाद्व्यक्तिविषयशक्तिज्ञानत्वेन विशिष्टबोधं प्रति कारकत्वमस्त्विति वाच्यम्। व्यक्तीनामानन्त्यादनन्तव्यक्ति-विषयकत्वनिवेशे गौरवात्। अतो न व्यक्तेः कारणतावच्छेदकत्वं, नापि वैशिष्ट्यस्य, किन्तु जातेरेवेति। [अवच्छेदिकेति] विशिष्टबोधं प्रति कारणभूतघटत्वशक्तिज्ञाने घटत्वजातेः प्रकारत्वेन सैव तत्रावच्छेदिकेत्यर्थः।

ननु घटत्वशक्तिज्ञानत्वेन घट इत्येतादृशविशिष्टबोधे कारणतायां "घटोऽस्ति" इत्यत्रेव "घटत्वमस्ति" इत्यत्रापि घटत्वप्रकारकघटविशेष्यकबोधापत्तिः। अतो घटत्वविशिष्टशक्तिज्ञानत्वेन हेतुताया वाच्यतया न भवदुक्तलाघवावकाश इत्यत आह [तथा चेति] [घटत्वांशेऽन्यप्रकारकेति] अन्यनिष्ठप्रकारतानिरूपितविशेष्यत्वाभाववद् घटत्वशक्तिज्ञानत्वेन विशिष्टबोधं प्रति हेतुतेत्यर्थः। "घटत्वमस्ति" इत्यत्र च घटत्वे घटव्यक्तिनिष्ठप्रकारतानिरूपितविशेषणत्वस्य सत्त्वान्न ततो विशिष्टबोधापत्तिः। शुद्धजातिरूपस्याभिलापासम्भवाद् घटत्वशब्देनोल्लेखः कृतः। विशिष्टशक्तिज्ञानत्वेन कारणत्वकल्पनापेक्षया निरुक्तार्थकल्पनाया एव लघीयस्त्वादिति बोध्यम्। वस्तुतस्तु निरवच्छिन्नप्रकारतासम्बन्धेन घटत्वशक्तिज्ञानस्य विशिष्टबोधं प्रति कारणत्वं कल्प्यते। घटत्वमित्यत्र घटत्वस्य प्रकारत्वाभावान्न ततो विशिष्टबोधः। तदेतदाह [इत्यादि भूषणे प्रपञ्चितमिति] -

[तदेतदिति] विशिष्टं शक्यम्। शक्तिज्ञानशब्दबोधकार्यकारणभावस्तु एकं जातिरूपं शक्तिज्ञानेऽन्तर्भाव्य वाच्य इत्येतदित्यर्थः। केषुचित् पुस्तकेषु "तदेतदभिप्रेत्याह" इति पाठो नास्त्येव। [द्विकमिति] ननु जातेर्व्यक्तेश्च "न ह्याकृतिपदार्थस्य" इत्यादि भाष्यप्रामाण्येन नामार्थत्वप्रतिपादनात् "द्विकम्" इति पुनरुक्तमित्यत आह - [जातिव्यक्ती इत्यर्थ इति] पूर्वं विशिष्टस्य नामार्थत्वं प्रतिपादितम्।

"द्विकम्" इत्यनेन जातेर्व्यक्तेश्च पृथक् पदार्थत्वं प्रतिपाद्यते। उभयत्रापि सरूपसूत्रस्थं भाष्यमेव मानम्। अतो "द्विकम्" इति न पुनरुक्तमिति भावः। ननु एकं = जातिर्व्यक्तिर्वा नामार्थ इति पक्षेण "द्विकम्" इति पक्षस्य विरोधः प्रसज्यते। अत्र पक्षे द्वयोः पदार्थत्वेन पूर्वेणास्य विरोधः स्पष्ट एवेत्यत आह [पूर्वपक्षादिति]। [पूर्ववदिति] पूर्ववद्विषयतासम्बन्धेन जातिरेव तादृशकारणतावच्छेदिकेति स्वीकारेण विरोधः परिहरणीय इत्यर्थः। पूर्वत्र विशिष्टस्य पदार्थत्वे विरोधः परिहृतः। इह तु द्वयोस्तथात्वे विरोधः परिहृतः।

दर्पणकारास्तु - "बोधकत्वं शक्तिरिति मते बोधजनकत्वज्ञानविषयबोधांशे प्रकारतयावच्छेदकत्वं शक्तिरिति लाभात्तादृशप्रकारतावच्छेदकतारूपायाः शक्तेर्जातिमात्रनिष्ठतया "आकृतिरेव पदार्थः" इति पक्षः समर्थितो भवति। बोधांशे विशेष्यतावच्छेदकतारूपायाः शक्तेर्व्यक्तिमात्रनिष्ठतया "व्यक्तिः पदार्थः" इति पक्षः समर्थितः। [पूर्वपक्षादिति] एकमिति पक्षादित्यर्थः। तत्पक्षे प्रकारतयावच्छेदकत्वे शक्तिरिति जातिरेवशक्या। विशष्यतावच्छेदकत्वमिति मते केवलव्यक्तिरेव शक्येति तत्पक्षे सिद्धान्तितम्। अत्र तु विषयतात्वेन प्रकारताविशेष्यतेऽनुगमय्य विषयतयावच्छेदकत्वं शक्तिरित्यभ्युपगमात् द्वयोरपि नामार्थत्वसिद्धिरिति न तयोः परस्परविरोधशङ्केति भावः - इति व्याचक्षते। अत्रोच्यते। मीमांसकसम्मतस्य भूषणे सविस्तरं प्रतिपादितस्य कुब्जशक्तिवादस्य दर्पणकृता निराकृतत्वेन तद्भूषणग्रन्थार्थानुवादक-प्रकृतग्रन्थस्य दर्पणकृता गत्यन्तराभावादेवमेव व्याख्यातव्यतया दर्पणकारस्य हरिवल्लभस्यैतादृशं कुव्याख्याकरणं तदवस्थमिति महदिदं विषादस्थानम्। व्याख्यातव्यमूलाशयप्रदर्शनं व्याख्यातुर्मुख्यो व्यापारः। तत्प्रद्रशनानन्तरं स्वाशयप्रकटनमन्यत्। स्वोत्प्रेक्षितार्थानुगुणतया मूल संयोजनं तु न प्रवीराणां पन्थाः। प्रायो हरिवल्लभः पारिपन्थिक एव। अतो मत्प्रदर्शित आशय एव मूलसम्मतः।

किञ्च "पूर्वपक्षाद्विरोधपरिहारः पूर्ववत्" इति ग्रन्थपर्यालोचनया "एकमित्यस्य चायमभिप्रायः- शक्तिज्ञाने च विषयतयावच्छेदिका जातिरेकैव" इति पूर्वग्रन्थः "एकं द्विकं नामार्थः" इति पक्षयोर्विरोधपरिहारक इत्यवश्यमभ्युपगन्तव्यम्। "विषयतयावच्छेदिका जतिरेकैव" इति ग्रन्थस्य बोधांशे प्रकारतयावच्छेदकत्वं शक्तिरित्यङ्गीकारे जातिः पदार्थः, विशेष्यतयावच्छेदकत्वमित्यभ्युपगमे व्यक्तिः पदार्थ इति पक्षद्वयसाधकतया व्याख्यातत्वेन विरोधापरिहारकतया दर्पणोक्तरीत्या तद्ग्रन्थासङ्गतिः स्पष्टैव। किञ्चैवं तयोर्विविक्तविषयकतया सिद्धत्वेन विरोधस्यैवाप्रसक्त्या तन्मते तदसङ्गतिरेव।

किञ्च बोधकत्वं शक्तिरित्यस्यार्थविषयकबोधजनकत्वं शक्तिरित्याशयकतया तन्मते बोधजनकत्वस्य पदनिष्ठतया तदवच्छेदकत्वस्य आनुपूर्व्या एव सम्भवेन तदुक्तरीत्या प्रकारतयावच्छेदकत्वं शक्तिः। विशेष्यतावच्छेदकत्वं शक्तिरित्यर्थालाभश्च। अत्र महता कोलाहलेन दर्पणकाराः पाठकानां बुद्धिव्यामोहं जनयामासुरित्यलम्।

त्रिकमिति। जातिव्यक्तिलिङ्गानीत्यर्थः। सत्त्वरजस्तमोगुणानां साम्यावस्था नपुंसकत्वम्, आधिक्यं पुंस्त्वम्, अपचयः स्त्रीत्वम्, ततच्छब्दनिष्ठं तत्तद्वाच्यं च। तमेव विरुद्धधर्ममादाय तटादिशब्दा भिद्यन्ते। केषांचिदनेकलिङ्गत्वव्यवहारस्तु समानानुपूर्वीकत्वेन शब्दानामभेदारोपात्। एवं च पदार्थपदे पुंस्त्वमेव, व्यक्तिपदे स्त्रीत्वमेव, वस्तुपदे नपुंसकत्वमेवेति सर्वत्रैव 'अयं पदार्थः' 'इयं व्यक्तिः' 'इदं वस्तु' इति व्यवहारः, तटः तटी तटमिति चोपपद्यते। तच्च लिङ्गमर्थपरिच्छेदकत्वेनान्वेतीति पश्वादिशब्दोक्तं पशु स्त्रियां नास्तीति पशुनेत्यादिविधिर्न च्छाग्यादीनङ्गत्वेन प्रयोजयतीति विभावनीयम्। न च व्यक्त्यादिशब्दोक्तलिङ्गस्येव पश्वादिशब्दोक्तस्यापि साधारण्यं शङ्क्यम्। व्यक्तिशब्दस्य नित्यस्त्रीलिङ्गत्वेन तथा सम्भवेऽपि पशुशब्दस्य नित्यपुंलिङ्गत्वे प्रमाणाभावात्। "पश्वा नतायुं गुहा चरन्तम्" "पश्वे नृभ्यो यथा गवे" इत्यादि वेदे दर्शनाच्च। मीमांसायां चतुर्थे पशुना यजेतेत्यत्रैकत्वपुंस्त्वयोर्विवक्षितत्वान्नानेकपशुभिः पशुस्त्रिया वा याग इति प्रतिपादितत्वाच्च।

वस्तुतस्तु विशेषविध्यभावे उप्रत्ययान्तानां पुंस्त्वस्य व्याकरणे निर्णीतत्वाद्वेद-भाष्येऽपि "जसादिषु च्छन्दसि वा वचनम्" इति नाभावाभाव इत्युक्तेः पशुशब्दस्य नित्यपुंस्त्वनिर्णयात्, प्रकृते "छागो वा मन्त्रवर्णात्" इति न्यायेनैव निर्णयः। मन्त्रवर्णो हि "छागस्य वपाया मेदसः" इति श्रूयते। तत्र छागस्येति च्छाग्यामसम्भावितमिति भवति ततः पुंस्त्वनिर्णय इति विस्तरेण प्रपञ्चितं भूषणे।

त्रिकं नामार्थ इति पक्षं व्याचष्टे [त्रिकमितीति] अत्र पक्षे सङ्ख्याकारके प्रत्ययवाच्ये इति भावः। न च लिङ्गमपि प्रत्ययार्थ एवास्त्विति वाच्यम्। लिङ्गस्य प्राधान्यापत्तेः। वागादिशब्देभ्यो विनापि प्रत्ययं तद्बोधाच्च। लिङ्गानुशासनस्य प्रकृतावेव दर्शनाच्च। अत एव "स्वमोर्नपुंसकात्" ७-१-२३ "ह्रस्वो नपुंसके प्रातिपदिकस्य" १-२-४७ "नपुंसकस्य झलचः" ७-२-७२ इत्यादीनि सूत्राणि

सङ्गच्छन्ते। "तस्माच्छसो नः पुंसि" ६-१-१०३ इत्यत्र पुंसीत्यस्य पुंलिङ्गशब्दस्य प्रकृतित्व इत्यर्थः। "स्त्रियाम्" ४-१-३ इत्यस्य च तत्र वर्तमानात्प्रातिपदिकादित्यर्थः। "प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा" २-३-४६ इति सूत्रेऽपि लिङ्गेत्यस्यापि तत्र वर्तमानादित्यर्थः। प्रथमाया लिङ्गार्थत्वाभ्युपगमे तु घटेनेत्यादौ तत्प्रतीत्यनापत्तिः। अतस्तस्य नामार्थत्वमेवाऽऽस्थेयम्।

ननु "स्तनकेशवती स्त्री स्याल्लोमशः पुरुषः स्मृतः" इत्यादिलक्षणलक्षितस्त्रीत्वादेरचेतने बाधात् खट्वेत्यादौ टाबाद्यनापत्तिः, दारानित्यादौ पुंस्त्वनिबन्धननत्वाद्यनापत्तिश्चेत्यतो भाष्यसम्मतं लक्षणमाह- [सत्त्वरजस्तमोगुणानामिति]। [साम्यावस्थेति] स्थितिमात्रमित्यर्थः। एतदेवादाय "सामान्ये नपुंसकम्" इत्युद्घोषः। सत्त्वादिगुणानामुत्कर्षापकर्षसत्त्वेऽपि साम्यावस्थारूपस्थितिमात्रविवक्षायां नपुंसकमिति तद्वचनस्यार्थः।

अत्र केचित् - "स्तनकेशवती" इत्यादि लौकिकलिङ्गमेव शास्त्रीयव्यवहारप्रयोजकम्। खट्वेत्यादौ तु स्त्रीत्वाद्यारोपाट्टाबादिनिर्वाहो बोध्यः। अत्र च लिङ्गानुशासनं, "रात्राह्नाः पुंसि" २-४-२९ इत्यादिशास्त्रं च मानमित्याहुः।

भाष्यकारास्तु - स्तनकेशवतीत्यादिलौकिकलिङ्गाश्रयणे खट्वादौ टाबाद्यनिर्वाहान्निरुक्तरीत्या लिङ्गव्यवस्था कार्या। तच्च लिङ्गं केवलान्वि, अर्थनिष्ठं च। पुंलिङ्गशब्द इति तूपचारात्। पुमान् लिङ्गमस्मात्प्रतीयत इति वा तदर्थः। "तस्माच्छसो नः पुंसि" ६-१-१०३ "आङो नाऽस्त्रियाम्" ७-३-१२० "ह्रस्वो नपुंसके प्रातिपदिकस्य" १-२-४७ इत्यादिशास्त्रीयव्यवहारे लौकिकव्यवहारे च एतान्येव लिङ्गानि निमित्तानीत्याहुः।

वैशेषिकमतानुयायिनस्तु - उपचयादेर्विरुद्धधर्मस्यैकत्र समावेशायोगात् कथं तटस्तटी तटमित्यादयो व्यवहाराः? सत्त्वादिगुणानां क्षणिकत्वाभ्युपगमेऽपि युगपत्तथाव्यवहारानापत्तिः। अविकारिणि ब्रह्मणि तदसम्भवेन आत्मा, ब्रह्मेत्यादेरनुपपत्तिश्च। आरोपादिकं च पूर्वमतवादिनापि सुवचमेवेति न तन्मताभिनिवेशः शोभते। अतः पुंस्त्वादयो जातिविशेषा इत्येवाभ्युपेयम्।

तथा च हरिः -

तिस्रो जातय एवैताः केषांचित्समवस्थिताः।
अविरुद्धाविरुद्धाभिर्गोमहिष्यादिजातिभिः।। इति।।

केषाञ्चित् = वैशेषिकाणामिति हेलाराजः - इत्याहुः।

अत्रायं विवेकः - प्रथममते लौकिकलिङ्गे पृथक् शक्तिकल्पना नेति लाघवम्। खट्वाद्यर्थं स्त्रीत्वाद्यारोपोऽभ्युपेयः। चरममते जातिकल्पनायां गौरवमनारोपश्च। भाष्यमते तूभयं कल्प्यम् - इति। एवं च भाष्यमतमेव गौरवग्रस्तमित्याशङ्क्य भाष्यमते लिङ्गस्य शब्दनिष्ठत्वान्नारोपादिकमाश्रीयते। पारिभाषिकं लिङ्गमेव सर्वत्र व्यवस्थापकं भविष्यतीति भाष्योक्तमेव ज्यायः। तदेतत्सर्वमभिप्रेत्याह [तत्तच्छब्दनिष्ठमिति] पुंलिङ्गश्शब्द इत्यादिव्यवहारालिङ्गं शब्दनिष्ठमेव। पुंलिङ्गवाचकत्वात्तथा व्यवहार इति तु न युक्तम्। घटश्शब्द इत्यस्याप्यापत्तेरिति भावः। [तत्तच्छब्दवाच्यं चेति] अत्र च "ह्रस्वो नपुंसके प्रातिपदिकस्य" इत्यादि शास्त्रं प्रमाणं बोध्यम्। लिङ्गस्य शब्दनिष्ठत्वाभ्युपगमान्न वैशेषिकाद्युक्तदूषणावकाश इत्याह [तमेवेति] शब्दनिष्ठं पुंस्त्वादिकमेवेत्यर्थः। [भिद्यन्त इति] ह्रस्वत्वदीर्घत्वोदात्तत्वानुदात्तत्ववत् स्त्रीत्वपुंस्त्वादिविरुद्धधर्ममादाय शब्दा भिद्यन्त इत्यर्थः। लिङ्गस्यार्थनिष्ठत्वे तु एतदनुपपत्तिरेव। एवमात्मा, ब्रह्मेत्यादेरनुपपत्तिरेव। लिङ्गस्यार्थनिष्ठत्वे प्रपञ्चस्य मायिकत्वेन तद्दशायां ब्रह्मणोऽपि तत्तद्भिन्नशब्दबोध्यत्वेन तत्रापि लिङ्गभेदव्यवस्थोपपद्यते। लिङ्गस्य शब्दनिष्ठत्वादेव भार्यारूपेऽर्थे दारकलत्रशब्दयोः पुंनपुंसकत्वमित्यादिसर्वव्यवहार उपपद्यत इति ज्ञेयम्। नन्वेवं "तटं त्रिषु" "तिथिर्द्वयोः" इत्यादिप्रामाणिकव्यवहारानुपपत्तिरेव, लिङ्गभेदेन भेदातित्याशङ्कायामाह [केषाञ्चिदिति] अनेकलिङ्गक एकशब्दो नास्त्येव। "तटं त्रिषु" इत्यादिव्यवहारस्तु शब्दानामभेदोपचारादुपपाद्यः। अभेदोपचारे हेतुः [समानानुपूर्वीकत्वेनेति]। अभेदारोपेऽपि "एकस्य त्रिलिङ्गकत्वम्, एकस्य द्विलिङ्गकत्वम्, एकस्य शब्दस्यैकलिङ्गकत्वम्" इत्यत्र च कोशादिकं प्रमाणम्।

यत्तु "वस्तुतस्तु शब्दस्यार्थस्य सत्त्वादिगुणत्रयात्मकतया तत्र कस्यचिद्गुणस्योपचयः, इत्येवंरूपस्योपचयापचयस्यैकत्रैककालावच्छेदेन सम्भवात्, आत्मादिनिरवयवपदार्थेषु उपचचादेरभावेऽपि कस्यचिदपचय तद्वाचकगुणत्रयात्मकशब्दगतोपचयादिमादाय दोषाभावाच्च "केषाञ्चिदनेकलिङ्गत्वव्यवहारस्तु सामानानुपूर्वीकत्वेन शब्दानामभेदारोपात्" इति मूलोक्तिश्चिन्त्यैवेति गुरवः" इति पञ्चोलिनः। तन्न। कौण्डभट्टोद्भावितस्य सत्त्वादिगुणानामुपचयापचयविरोधस्य तावताप्यपरिहारात्। एककाले एकत्र पदार्थे तद्विरोधस्य सर्वशास्त्रकृत्सम्मतत्वाच्च। नच सत्त्वादिगुणानां प्रदीपवर्तिकदृष्टान्तेन कापिलाविरोधं परिहरन्तीति वाच्यम्। तैरप्युपाधिमन्तर्भाव्यैव तत्स्वीकारात्। एककालावच्छेदेनोपचयापचयस्य स्वीकारे जगतो वैचित्र्यभङ्गापत्तेश्च। आत्मब्रह्मादिशब्दविषये त्वयापि शब्दगतलिङ्गस्यैव व्यवस्थापकत्व-स्वीकाराच्चेत्यलम्।

लिङ्गस्य शब्दनिष्ठत्वादेव सर्वत्रापि पदार्थे अयं पदार्थः, इयं व्यक्तिः, इदं वस्तु इति व्यवहारोऽपि सूपपाद इत्याह [एवञ्चेति] लिङ्गस्य शब्दनिष्ठत्वे चेत्यर्थः। [पदार्थपदे पुंस्त्वमेवेति] पदार्थशब्दे सत्त्वादिगुणानामुपचयस्यैव सत्त्वेन तत्र पुंस्त्वमेव। तादृशपदार्थशब्देन अर्थबुबोधयिषायाम् "अयं पदार्थः" इत्येव स्वारसिकः प्रामाणिकश्च व्यवहारो लोके। एवं व्यक्तिशब्दे गुणानामपचयस्यैव सत्त्वेन, वस्तुशब्दे तेषां साम्यस्यैव सत्त्वेन च तत्र स्त्रीत्वं नपुंसकत्वं च वर्तत इति "इयं व्यक्तिः, इदं वस्तु" इति व्यवहार उपपद्यते। एवं चार्थगतलिङ्गानादरेण शब्दः प्रयुज्येत। तथा च भार्यायामपि "अयं पदार्थः" इति, पुरुषेऽपि "इयं व्यक्तिः" इति, स्त्रीपुंसयेऽपि "इदं वस्तु" इति नपुंसकत्वेन लोकैर्व्यवह्रियमाणे "इयं व्यक्तिः, अयं पदार्थः" इति च प्रयोगा उपपद्यन्त इति भावः। लिङ्गस्य केवलान्वयित्वं दर्शयति [सर्वत्रैवेति] - अस्याशय उक्त एव। लिङ्गस्यार्थनिष्ठत्वे तु स्त्रियां स्त्रीत्वस्यैव सत्त्वेन "अयं पदार्थः" "इदं वस्तु" इति प्रयोगो नोपपद्येत। एवमन्यत्रापि बोध्यम्। [इति चोपपद्यत इति] इति भेदेन व्यवहारोऽप्युपपद्यत इत्यर्थः।

ननु शब्दनिष्ठपारिभाषिकलिङ्गस्यैव लौकिकशास्त्रीयव्यवहारनियमाकत्वाभ्युपगमे "पशुना यजेत" इत्यादौ पुंस्त्वस्य विवक्षितत्वान्न पशुस्त्रिया याग इति मीमांसकसिद्धन्तभङ्गः। लिङ्गस्य शब्दनिष्ठत्वस्वीकारेण, तेन पशुस्त्रिया अव्यावृत्तेः। पारिभाषिकलिङ्गस्य पशुस्त्रियामपि सत्त्वे बाधकाभावाच्चेत्यत आह [तच्च लिङ्गमिति] - शब्दनिष्ठं पारिभाषिकलिङ्गमित्यर्थः। [अर्थपरिच्छेदकत्वेनेति] अर्थविशेषणत्वेनेत्यर्थः। लिङ्गविशेषविशिष्टस्यैव शब्दस्यार्थविशेषवाचकत्वमित्यर्थस्य लिङ्गानुशासन-शास्त्रसिद्धतया स्वाश्रयवाच्यत्वसम्बन्धेन लिङ्गस्यान्वयादर्थान्तरव्यावर्तकत्वम्।

तेन पारिभाषिकलिङ्गाश्रयणेऽपि पशुनेत्यत्र पशुशब्दे सत्त्वादिगुणानामुपचयरूपस्य पुंस्त्वस्य सत्त्वेन तादृशपशुशब्दोक्तलिङ्गस्य पशुस्त्रियामभावान्न दोष इति भावः। तदेतदाह [पश्वादिशब्दोक्तं पशुस्त्रियां नास्तीति] पशुनेत्यत्र पशुशब्दोक्तं सत्त्वादिगुणानामुपचयरूपं पुंस्त्वं पशुस्त्रियां नास्तीत्यर्थः। अङ्गत्वेन = यागाङ्गत्वेन। ननु व्यक्त्यादिशब्दानामर्थनिष्ठलिङ्गानादरेण प्रवृत्तिवत् पशुशब्दस्यापि तथा प्रवृत्तौ बाधकाभावादुक्तदोषो दुर्वार एवेत्याशयेन शङ्कते [न चेति] [साधारण्यमिति] स्त्रीपुंसादिसाधारण्यमित्यर्थः। तथा सम्भवेऽपि = स्त्रीपुंसादिसाधारण्यसम्भवेऽपि। [प्रमाणाभावादिति] तथाच पशुशब्देन पुंस्त्वविशिष्टमेवाभिधीयते, नतु स्त्रीत्वादिविशिष्टमपीति न दोष इति भावः। ननु पशुनेति वैदिकप्रयोग एव पशुशब्दस्य नित्यपुल्लिङ्गत्वे मानं स्यादत आह [पश्वा नतायुमिति] पशुशब्दस्य

नित्यपुल्लिङ्गत्वे तु "आङो नाऽस्त्रियाम्" ७-३-१२० इति तृतीयैकवचनस्य नाभावो दुर्वारः। आङिति टासंज्ञा प्राचाम्। तथा च पशुनेत्येव रूपं स्यात्, नतु पश्वेति। तेन पशुशब्दस्यानियतलिङ्गकत्वं ज्ञाप्यत इति भावः। अनियतलिङ्गकत्वे प्रमाणान्तरमाह [पश्वे नृभ्य इति] पशुशब्दस्य नित्यपुल्लिङ्गत्वे स्त्रीवाचकत्वाभावेन "ङिति ह्रस्वश्च" १-४-६ इत्यस्याप्राप्त्या घिसंज्ञायां "घेर्ङिति" ७-३-१११ इति परत्वाद्यणं बाधित्वा गुणे पशवे इत्येव स्यात्, नतु पश्वे इत्यपीति। अतस्तत्प्रयोगबलेन पशुशब्दस्य नित्यपुंलिङ्गत्वाभावो ज्ञाप्यत इति बोध्यम्। तत्र मीमांसकसम्मतिमप्याह - [मीमांसायामिति] पूर्वमीमांसायामित्यर्थः। [चतुर्थ इति] चतुर्थाध्याये प्रथमपादे सप्तदशे सूत्र इत्यर्थः। "तथा लिङ्गम्" इति तत्सूत्रम्। सङ्ख्यावल्लिङ्गमपि विवक्षितमिति तदर्थः। तदेतदाह [एकत्वपुंस्त्वयोरिति] सङ्ख्याया विवक्षणे फलं दर्शयति [नानेकपशुभिरिति]। नञो याग इत्यत्रान्वयः। लिङ्गस्य विवक्षणे प्रयोजनमाह [पशुस्त्रियेति] न याग इत्यन्वयः। [प्रतिपादितत्वाच्चेति] पशुशब्दस्य नित्यपुल्लिङ्गत्वे तु पुंस्त्वविवक्षायामपि तस्य स्त्रीपुंसादिसाधारणत्वात्तद्विवक्षाया अनुपयोगात्तदसङ्गतिरेवेति भावः।

ननु "नित्यपुंलिङ्गत्वे मानाभावात्" इत्यसङ्गतम्। "उप्रत्ययान्ताः पुंसि" इति व्याकरणस्यैव मानत्वादित्याशङ्क्य प्रकारान्तरेण छागीग्रहणापत्तिं वारयति। [वस्तुतस्त्विति] [उप्रत्ययान्तानामिति]- प्रभुः, इक्षुरित्यादीनामित्यर्थः। [व्याकरणेनेति] पुमानित्यधिकारे "उप्रत्ययान्तः" इति लिङ्गानुशासन-सूत्रेणेत्यर्थः। नन्वेवं धेनुः रेणुरित्यादीनामपि पुंलिङ्गत्वापत्तिरत उक्तम् [विशेष्यविध्यभाव इति] "धेनु - रज्जु - वसु - सरयू - तनु - रेणु - प्रियङ्गवः स्त्रियाम्" "श्मश्रु - जानु - वसु - स्वा - द्वस्रु - जतु - त्रपु - तालूनि नपुंसके" इत्यादिविशेषविध्यभाव इत्यर्थः। एवं "हनुर्हट्टविलासिन्यां नृत्यारम्भे गदे स्त्रियाम्। द्वयोः कपोलावयवे" (मेदिनी) "करेणुरिभ्यां स्त्रीनेभे" (अमरः) इत्यादिवचनानाक्रान्त उकारान्तः प्रकृतसूत्रविषयः। यदाहुः "लिङ्गशेषविधिर्व्यापी विशेषैर्यद्यबाधितः" इति। [जसादिषु च्छन्दसि वा वचनमिति] जसादिषु विभक्तिषु। तत्कार्येषु छन्दसि = वेदे, वावचनं = वाग्रहणं कर्तव्यमित्यर्थः। तेन तत्र कार्याणां वैकल्पिकत्वं लभ्यते। तदाह [नाभावाभाव इति] - पशुशब्दस्य नित्यपुल्लिङ्गत्वाभावे तु "अस्त्रियाम्" इति निषेधादेव नाभावाप्रवृत्तिसिद्धौ वावचनाश्रयणोपन्यासस्य वैयर्थ्यं स्पष्टमेव।

ननु च्छन्दसि जसादिषु वावचनस्वीकारो न युक्तः, वेदभाष्ये पश्वे इत्यत्र "संज्ञापूर्वको विधिरनित्यः" इति वचनमाश्रित्य गुणाभावस्योपपादितत्वादिति चेत्। अत्रेदं विचार्यम्। "संज्ञापूर्वको विधिरनित्यः" इति वचनं महाभाष्ये न दृश्यते। न च "ओरोत्" इति वाच्ये "ओर्गुणः" ६-४-१४६

इति सूत्रे गुणग्रहणं प्रकृतवचनपरिग्रहणे प्रमाणमस्त्विति वाच्यम्। भाष्यानुक्तज्ञापितार्थस्य साधुतानियामकत्वे मानाभावात्। भाष्याविचारितप्रयोजनकानां सौत्राक्षराणां पारायणादावदृष्टमात्रार्थकत्वकल्पनाया एवौचित्यात्। अतो जसादिषु च्छन्दसि वावचनाश्रयणमेव ज्यायः। एतेन "वेदभाष्येपीति - चिन्त्यमिदम्। वेदभाष्ये पश्च इत्यत्र "संज्ञापूर्वको विधिरनित्य" इति वचनमाश्रित्य गुणाभावस्योपपादितत्वा" इति पञ्चोलिनः परास्ताः।

ननु पशुस्त्रिया यागाङ्गत्वापत्तिरत आह [प्रकृत इति] पशुना यजेतेत्यत्रेत्यर्थः। [छागो वा मन्त्रवर्णादिति] षष्ठाध्यायेऽष्टमे पादे एकत्रिंशत्तमं सूत्रमिदम्। तत्र "पशुचोदनायामनिमयोऽविशेषात्" इति पूर्वपक्षसूत्रम्। "अग्नीषोमीयं पशुमालभेत" इत्यत्र किं यः कश्चित्पशुरालब्धव्यः? उत च्छाग एवेति संशये पशुमिति सामान्यश्रुत्या पशुसामान्यस्य ग्रहणमिति पूर्वपक्षः। ततः सिद्धान्तसूत्रमिंद "छागो वा मन्त्रवर्णात्" इति। मन्त्रवर्णात् पशुरत्र च्छाग एव। नतु यः कश्चित्पशुरिति सिद्धान्तसूत्रार्थः। मन्त्रवर्णमेव दर्शयति [मन्त्रवर्णे हीति] तत्र = मन्त्रवर्णे। [असम्भावितमिति] पशुविशेषनिर्णय इव पुंस्त्वस्यापि तेनैव निर्णय इति भावः। एवं च शब्दनिष्ठस्य पारिभाषिकलिङ्गस्य लौकिकशास्त्रीयव्यवहारनिर्वाहायाश्रयणे न किंचिद्बाधकम्।

चतुष्कं सङ्ख्यासहितं त्रिकमित्यर्थः। पञ्चकं - कारकसहितं चतुष्कमित्यर्थः। नन्वन्वयव्यतिरेकाभ्यां प्रत्ययस्यैव तद्वाच्यम्। तत एव लिङ्गादीनामुपस्थितौ प्रकृतिवाच्यत्वे मानाभावाच्चेति चेत्सत्यम्। प्रत्ययवर्जिते दधि पश्येत्यादौ प्रत्ययमजानतोऽपि बोधात्प्रकृतेरेव वाचकत्वं कल्प्यते। लिङ्गानुशासनस्य प्रकृतेरेव दर्शनाच्चेति। अत एवैषु पक्षेषु न निर्बन्धः प्रत्ययस्यैव वाचकताया युक्तत्वात्।

"द्योतिका वाचिका वा स्युर्द्वित्वादीनां विभक्तयः"।

इति वाक्यपदीयेऽपि पक्षद्वयस्य व्युत्पादनात्। शास्त्रे इति बहुषु स्थलेषु व्युत्पादनं व्यञ्जयितुम्। प्राधान्येन सरूपसूत्रादौ व्यक्तम्।।१।। (२५)

चतुष्कं नामार्थमिति पक्षं व्याचष्टे - [चतुष्कमिति] लिङ्गादित्रयस्य नामार्थत्वं व्यवस्थापयितुं शङ्कते - [नन्विति]। [अन्वयव्यतिरेकाभ्यामिति] प्रत्ययश्रवणवेलायां लिङ्गादिप्रतीतिः, तदश्रवणवेलायां तदप्रतीतिरित्येवंरूपान्वयव्यतिरेकाभ्यामित्यर्थः। इदमुपलक्षणं "द्व्येकयोर्द्विवचनैकवचने" १-४-२२

आङो नाऽस्त्रियाम्" ७-३-१२० "कर्मणि द्वितीया" २-३-२ इत्यादिशास्त्राणामपि। तैः सङ्ख्यादीनां प्रत्ययवाच्यत्वलाभात्। तत् = लिङ्गादित्रिकम्। तत एव = प्रत्ययादेव। [पश्येति] एतदुदाहरणप्रदर्शनेन तिङामपि द्योतकत्वमेवेति सूच्यते। प्रथमायाः प्रयोगसाधुतामात्रार्थकतया तत्र सङ्ख्यादीनां भानाभावेऽपि क्षत्यभावेन दधीत्यस्य द्वितीयान्तत्वद्योतनाय पश्येति प्रयोग इति तु न युक्तम्। तथा सति पश्यतीत्येतस्मिन् प्रदर्शितव्ये लोडन्तपर्यन्तानुधावनस्य वैयर्थ्यापत्तेः। ननु पश्य दधीत्यत्रापि लुप्तप्रत्ययानुसन्धानेन बोधात् प्रत्ययवाच्यत्वमेव युक्त मत आह [प्रत्ययमजानतोऽपीति] लिङ्गस्य प्रकृतिवाच्यत्वे हेत्वन्तरमाह [लिङ्गानुशासनस्येति] - "तटं त्रिषु" इत्यादिलिङ्गानुशासनस्येत्यर्थः। ननु अन्वयव्यतिरेकाभ्यां प्रत्ययस्यैव तद्वाच्यम्" इत्यादियुक्तप्रमाणबलात्प्रत्ययवाच्यत्वपक्ष एवाऽश्रीयतामत आह [अत एवेति] प्रकृतिप्रत्ययोरन्यतस्य वाचकत्वे तुल्यबलत्वादेवेत्यर्थः। [एषु पक्षेष्विति] - त्रिकं नामार्थः, सङ्ख्याकारके तु प्रत्ययार्थ इत्येके। सङ्ख्यापि प्रकृत्यर्थः, कारकं प्रत्ययार्थ इत्यपरे। कारकमपि प्रकृत्यर्थ इति परे। केचित्तु सङ्ख्यामात्रं विभक्त्यर्थः। कारकान्तं चतुष्कं प्रातिपदिकार्थं इति वदन्ति। [न निर्बन्ध इति] अयमेव पक्षो युक्तो, नान्य इत्याग्रहो नेत्यर्थः। ननु साभिनिवेशं "पञ्चकं नामार्थः" इति पक्षस्य प्रतिपादितत्वेन "न निर्बन्धः" इत्युक्तिरयुक्तेत्यत आह - [प्रत्ययस्यैवेति] एवशब्दोऽप्यर्थे। [युक्तत्वादिति] युक्तिसिद्धत्वादित्यर्थः। प्रत्ययस्यापि वाचकत्वं युक्तिसिद्धम्। अपिना प्रकृतेर्ग्रहणम्। यद्वा एवशब्दोऽप्यर्थे, सच भिन्नक्रमः, वाचकताया इत्यनन्तरं योज्यः। प्रत्ययस्य वाचकताया + एव = वाचकताया अपि युक्तत्वादित्यर्थः। अपिना द्योतकत्वपरिग्रहः। युक्तं चैतत्, "वाचिका द्योतिका वा स्युर्द्वित्वादीनां विभक्तय" इत्यनुपदवक्ष्यमाणहरिग्रन्थस्वारस्यात्।

पञ्चोलिनस्तु "अत्र प्रत्ययस्य वाचकत्वसमर्थनमयुक्तम्। पूर्वत्र "न निर्बन्धः" इत्युक्त्वा प्रत्ययस्य वाचकत्वं सामर्थ्यं च पुनर्न निर्बन्ध इत्यस्यैव वाक्यपदीयकारिकया समर्थितत्वात्। अन्यथा प्रत्ययस्य वाचकत्वव्यवस्थापनान्तरमुभयपक्षसमर्थिका "द्योतिका वाचिका वा" इति वाक्यपदीयोक्तिरसङ्गता स्यादिति पञ्चोलिनः" इति वदन्ति। तत्तु नातीव शोभते। एवशब्दस्यावधारणार्थकतायां मूलमयुक्तमिति पञ्चोलिनामाशयः। एवशब्दस्याप्यर्थकत्वे मूलं सुसङ्गतमेवेति तेऽपि जानत एव। यद्यपि "पुरुषबुद्धिः प्रमादिनी" इति न्यायेन कौण्डभट्टस्य प्रमाद इति वक्तुं युज्यते, किं त्वेतावन्मात्रं विरोधं कौण्डभट्टो नाकलयचकारेति वक्तुं न पारयामो वयम्। "प्रत्ययस्यैव" इत्यत्र एवशब्दोऽप्यर्थक इत्येव कौण्डभट्टस्य हृदयं प्रतीमः। अत एव "प्रकृतेरपि तत्र शक्तिः कल्प्यते" इति भूषणे

अपिशब्दपाठो दृश्यते। तद्बलेनात्र एवशब्दस्य अप्यर्थकत्वस्वीकारो युक्त एवेत्यलम्।

पक्षद्वयस्य समबलत्वे हर्युक्तिं प्रमाणयति - [द्योतका इति] - "प्रत्ययभागस्य सङ्ख्याकर्मादयो वाच्यत्वेन द्योत्यत्वेन वाऽर्थाः" इति हेलाराजः। [व्युत्पादनादिति] एवं च यस्यैव वाचकताग्रहस्तत एव तेषामुपस्थितिः, सम्भेदे तूभयतोऽपीति बोध्यम्। नैतत् त्रिमुनिसम्मतमिति भ्रमं निराचष्टे कारिकायां - [शास्त्र इति]। शास्त्र इति सामान्योपादानस्य प्रयोजनमाह [बहुष्विति]। [व्यञ्जयितुमिति] मूले शास्त्र इत्युक्तिः बहुषु स्थलेषु व्यञ्जयितुमित्यर्थः। सर्वेऽप्यमी पक्षा अनभिहितसूत्रादौ प्रदर्शिताः। [प्राधान्येन त्विति] - अनभिहितसूत्रादौ प्रसक्तानुप्रसक्त्या एतदुपन्यासः। सरूपसूत्रे तु पूर्वपक्षसिद्धान्ताभ्यां तत्पक्षनिरूपणं विस्तरेण कृतम्। समर्थसूत्रे "तद्धितार्थ" इत्यादिसूत्रे च भाष्ये जातिव्यक्तिविचारः कृतः। ननु पञ्चकं प्रातिपदिकार्थ इति पक्षे नामार्थप्रकारकबोधं प्रति तदुत्तरसुबादिजन्योपस्थितिः कारणमिति कार्यकारणभावस्य विलयापत्तिरिति वाच्यम्। इष्टापत्तेः। द्योत्यार्थमादाय वा तदुपपत्तेरिति बोध्यम्।।२५।।

शब्दस्तावच्छाब्दबोधे भासते।

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।

अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते।।

इत्याद्यनुभविकोक्तेः। "विष्णुमुच्चारय" इत्यादावर्थोच्चारणासम्भवेन विना शब्दविषयं शाब्दबोधासङ्गतिश्चेति सोऽपि प्रातिपदिकार्थः। न च लक्षणया निर्वाहः। निरूढलक्षणायाः शक्त्यनतिरेकात्। "जबगडदशमुच्चारय" इत्यादौ शक्याग्रहेण शक्यसम्बन्धरूपलक्षणाया अग्रहाच्च। अज्ञातायाश्च वृत्तेरनुपयोगात्। "गावमुच्चारय" इत्यादि भाषाशब्दानामनुकरणे साधुतासम्प्रतिपत्तेस्तेषां शक्त्यभावेन परनये लक्षणाया असम्भवाच्चेत्यभिप्रेत्य षोढापि क्वचित्प्रातिपदिकार्थ इत्याह -

शब्दोऽपि यदि भेदेन विवक्षा स्यात्तदा तथा।

नो चेच्छ्रोत्रादिभिः सिद्धोऽप्यसावर्थोऽवभासते।।२।। (२६)

यद्यनुकार्यानुकरणायोर्भेदविवक्षा तदा शब्दोऽपि प्रातिपदिकार्थः। यदि न भेदविवक्षा तदा श्रोत्रादिभिरुपस्थितोऽप्यर्थवद्भासते। अपिर्हेतौ। उपस्थितत्वाद्भासत इत्यर्थः। अयं भावः - अनुकार्यानुकरणयोर्भेदेऽनुकार्यस्य पदानुपस्थितत्वात्तसिद्धये

शक्तिरुपेया। शब्दार्थयोरभेदे प्रत्यक्षे विषयस्य हेतुत्वात्स्वप्रत्यक्षरूपां पदजन्योपस्थिति-मादाय शाब्दबोधविषयतोपपत्तिरिति। यद्यप्यतिप्रसङ्गःवारणाय वृत्तिजन्यपदोपस्थितिरेव हेतुस्तथाऽप्यत्राऽऽश्रय तया वृत्तिमत्त्वस्य सत्त्वान्नानुपपत्तिः। निरूपकताश्रयतान्यतर-सम्बन्धेन वृत्तिमत एव शाब्दबोधविषयत्वं कल्प्यत इत्यनवद्यम्। सम्बन्धस्योभय-निरूप्यत्वात्पदार्थस्येव तद्बोधकत्वेन स्वस्यापि ज्ञानसम्भवाच्चेति।

उक्तं च वाक्यपदीये -

ग्राह्यत्वं ग्राहकत्वं च द्वे शक्ती तेजसो यथा।
तथैव सर्वशब्दनामेते पृथगवस्थिते।। इति।
विषयत्वमानादृत्य शब्दैर्नार्थः प्रकाश्यते।

इति चेति।।२।। (२६)

"शब्दोऽपि यदि भेदेन" इत्यादिकारिकामवतारयति [शब्दस्तावदिति]। [भासत इति] विशेषणतया, विशेष्यतया वा भासत इत्यर्थः। घटमानयेत्यादौ शब्दस्यार्थे विशेषणतया, "अग्रे॑क्" ४-२-३३ इत्यादौ विशेष्यतया भानमिति विवेकः। तत्र मानं दर्शयति - [न सोऽस्तीति] - यः प्रत्ययः = ज्ञानम्, शब्दानुगमात् + ऋते = शब्दानुगमं विना, अस्ति, सः = तादृशः प्रत्ययः, लोके नास्ति। सर्वं ज्ञानं = प्रत्यक्षानुमितिशाब्दादिकं सर्वम्। शब्देन + अनुविद्धम् + इव = शब्दानुविद्धमेव, भासत इति हरिकारिकार्थः।

ननु शाब्दबोधे शब्दो भासत इत्ययुक्तम्। तस्य वृत्त्यनुपस्थितत्वात्। वृत्त्योपस्थितस्यैव शाब्दे भानाङ्गीकारात्। अन्यथा घटपदजन्यबोधे आकाशस्यापि भानप्रसङ्गात्। नच घटपदस्य जात्याद्यर्थेष्विव शब्देऽपि शक्तिरस्त्विति वाच्यम्। घटमानयेत्यादित एकत्वसङ्ख्याविशिष्टघटकर्मकमानयनमिति बोधस्य सर्वानुभवसिद्धतया तदुपपत्तये घटाद्यर्थेषु शक्तिस्वीकारेऽपि शब्देऽपि तत्स्वीकारे मानाभावादत आह [विष्णुमुच्चारयेति]। [अर्थोच्चारणासम्भवेनेति] अर्थस्य = विष्णवादेः, ताल्वोष्ठपुटसंयोगरूपोच्चारण-क्रियानिरूपितकर्मत्वा सम्भवेनेत्यर्थः। शब्दविषयं विना = विष्णवादिशब्दरूपविषयं विना। सोऽपि = शब्दोऽपि। शब्देपि शक्तिस्वीकारात्तस्य वृत्त्योपस्थितत्वाद्विष्णुशब्दकर्मकमुच्चारणमिति शाब्दबोध उपपद्यते। विष्णुमुच्चारयेत्यादौ शब्दे शक्तिस्वीकारस्यावश्यकतया तदनुरोधेन घटमानयेत्यादा वपि

तत्र तत्स्वीकार आवश्यकः। घटपदवाच्यघटकर्मकमानयनमिति बोध इति भावः। ननु शब्दे शक्तिस्वीकारो न युक्तः, विष्णुमुच्चारयेत्यादावर्थस्योच्चारणासम्भवरूपानुपपत्त्या शब्दस्वरूपे लक्षणाश्रयणान्न दोषः। अन्यथा गङ्गायां घोष इत्यादावपि गङ्गादिपदानां तीरादौ शक्तिस्वीकारापत्तौ लक्षणोच्छेदप्रसङ्गः। अतः कथं शब्दे सर्वत्र शक्तिस्वीकार इत्याशयेन शङ्कते [नचेति] [लक्षणयेति] शब्दस्वरूपे लक्षणयेत्यर्थः। [निर्वाह इति] विष्णुमुच्चारयेत्यादौ शाब्दबोधनिर्वाह इत्यर्थः।

समाधत्ते - [निरूढलक्षणाया इति] - यया कथायां वादिनो न निग्रहास्सा निरूढलक्षणेति आख्यातवादशिरोमणिव्याख्याने मथुरानाथः। शक्त्यनतिरेकात् = शक्तितुल्यत्वात्। नचात्र प्रयोजनलक्षणाश्रयणं सुशकम्। अन्वयानुपपत्तिप्रतिसन्धानं विनापि बोधात्, प्रयोजनाभावाच्च। सुतरां लक्षणाया असम्भवस्थलं दर्शयति [जबगडदशमुच्चारयेति]। [शक्याग्रहणेति] समुदायस्योच्चारणक्रिया कर्मत्वं प्रतिपाद्यते। समुदायेन कस्याप्यर्थस्यानुपस्थापनात्तदग्रहेणेत्यर्थः। ननु एकाक्षरकोशादिप्रामाण्येन प्रत्येकवर्णस्य शक्यार्थसद्भावेन शक्यसम्बन्धरूपलक्षणा सुवचेत्यत आह [अज्ञातायाश्चेति] च स्त्वर्थे। [अनुपयोगादिति] प्रत्येकं वर्णानामेकाक्षरकोशेऽर्थकथनेऽपि सर्वैस्तदज्ञानेन, तच्छक्यार्थस्याज्ञातत्वेन लक्षणायामनुपयोगादित्यर्थः। वृत्तेरित्यस्य शक्तिरूपवृत्तेरित्यर्थः। यद्वा एवमवतरणीयम् - ननु लक्षणाया अग्रहेऽपि लक्ष्यार्थबोधो भवत्येव। अनुपपत्त्यादिरूपसामग्र्या विद्यमानत्वादत आह - [अज्ञातायाश्चेति] [वृत्तेरिति] लक्षणावृत्तेरित्यर्थः। [अनुपयोगादिति] बोधप्रयोजकत्वादित्यर्थः। अन्यथा सर्वेषामपि सर्वान् प्रत्यर्थबोधकत्वापत्तिरिति भावः। ननु जबगडदशित्यादौ "आदिरन्त्येन सहेता" १-१-७१ इत्यनेन शक्तिग्रहाद्विनैव लक्षणादिकं शाब्दबोधोपपत्तिरत आह - [गाङ्गमुच्चारयेति]। [साधुतासम्प्रतिपत्तेरिति] - साधुत्वाभ्युपगमादित्यर्थः। एतच्च समनन्तरकारिकाव्याख्याने मूल एव स्फुटीभविष्यति। परनये = नैयायिकादिनये। भाषाशब्देषु परनये शक्त्यभावेन तत्र लक्षणाश्रयणमशक्यमिति भावः। तदाह - तेषामित्यादिना। तेषामित्यस्य भाषाशब्दानामित्यर्थः। षोढापि - पूर्वोक्तपञ्चकसहितश्शब्दोऽपि। [क्वचिदिति] - अनुकरणस्थल इत्यर्थः। इदं च गत्यन्तराभावादना यत्याऽनुकरणस्थले शक्तिः स्वीकार्येत्याशयेन, नत्वनुकरण एव शक्तिश्शब्दे, नान्यत्रेत्याशयेन। सर्वत्रापि शब्दे शक्तिस्वीकारस्याऽऽवश्यकताया अन्यत्र प्रतिपादितत्वात्। कारिकायां "तथा" इत्यत्र विवरणं "शब्दोऽपि प्रातिपदिकार्थः" इति। कारिकायां - श्रोत्रादिभिरिति। आदिपदेन शक्तिज्ञानतत्संस्काराणां सङ्ग्रहः। ननु भेदेन विवक्षेत्युक्त्या शब्दार्थयोर्भेदेन विवक्षेत्यर्थो लभ्यते, स चायुक्तः। प्रकृतानुपयोगादत आह [अनुकार्यानुकरणयोरिति]।

कारिकायां 'व' शब्द इवार्थकः। "शात्रवं व पपुर्यशः" इतिवत्। तथाचायं कारिकार्थः - भेदेन = अनुकार्यानुकरणयोः, भेदेन विवक्षा यदि स्यात्, तदा, शब्दोऽपि, तथा = प्रातिपदिकार्थः। नो + चेत् = भेदविवक्षा नो चेद्यदि, तदा श्रोत्रादिभिः = श्रोत्रशक्तिज्ञानतत्संस्कारैः, सिद्धोऽपि = उपस्थितोऽपि, असौ = शब्दः, अर्थः + व = अर्थ इव, भासते = शाब्दबोधविषयो भवतीति। एवं च पटदिति कुर्वित्यादावनुकार्यानुकरणयोर्भेदविवक्षायां शब्दोऽपि प्रातिपदिकार्थः। तयोरभेदविवक्षायां शब्दो न प्रातिपदिकार्थः। पक्षद्वयेऽपि शब्दो बोधविषयो भवत्येवेति फलितार्थोऽवगन्तव्यः।

[भेदविवक्षेति] तयोर्ध्वनिमयत्व - वर्णमयत्वादिरूपविरुद्धधर्मवत्त्वाद्भेदविवक्षेत्याशयः। [शब्दोऽपीति] अपिना प्रागुक्तपञ्चकस्य ग्रहणम्। [प्रातिपदिकार्थ इति] अनुकार्येऽनुकरणस्य शक्तिरास्थेयेत्याशयः। "भुवो वुक्" इत्यादौ तु अनुकार्यानुकरणयोरर्थपरत्वशब्दपरत्वरूपधर्मवत्त्वेन भेदादनुकार्येऽनुकरणस्य शक्तिरुपेया। [अर्थवद्भासत इति] - अर्थेऽवभासमाने शब्दोऽप्युपस्थितत्वाद्भासत इत्यर्थः।

कारिकायाम् "अर्थोऽवभासते" इति प्रथमान्तः पाठः सार्वत्रिकः। क्वचित् "अर्थेऽवभासत" इति सप्तम्यन्तः पाठो दृश्यते। तत्रायमर्थः। अर्थे = घटादिस्वरूपे, अवभासते = शब्दो विशेषणतया विषयो भवतीति। सप्तम्यन्तपाठे अवभासत इति च्छेदः, अवेत्युपसर्गः। प्रथमान्तपाठे व, भासत इति च्छेदः। 'व' शब्द इवार्थे। "अर्थवद्भासते" इति कौण्डभट्टविवरणस्वारस्येन प्रथमान्तपाठ एव साम्प्रदायिक इति निश्चीयते।

यत्तु "अर्थशब्दस्येवशब्देन सह समासस्तु न। तथा सति "इवेन समास" इति विभक्तिश्रवणापत्तेः" इति काशिकाकाराः। अत्रेदं चिन्त्यम्। किमयं विचारः सप्तम्यन्तपाठे ? उत प्रथमान्त पाठे ? नाद्ये। तत्र इवशब्दस्यैवाभावात्। नान्त्ये, विभक्तिश्रवणापत्तेरसङ्गतत्वात्। तत्र विभक्तेः श्रूयमाणत्वात्। अर्थ + सु + व इत्यवस्थायाम् "इवेन समासो विभक्त्यलोपश्च" इति कात्यायनवचनेन समासे विभक्त्यलोपे रुत्वे "हशि च" ६-१-११४ इत्युत्वे आद्गुणे "अर्थोव" इति सिद्धेः। वस्तुतो विचारस्यावसर एव नास्ति। इवशब्दस्यैवाभावात्, इवार्थे दीक्षितैः "व" शब्दस्यैव प्रयोगादिति।

ननु "सिद्धोऽपि" इत्यपि व्यर्थः, तत्सङ्ग्राह्यस्यार्थान्तरस्याभावादत आह [अपिर्हेताविति]। ननु भेदाभेदयोरुभयोरपि पक्षयोरनुकार्योपस्थितये शब्दांशे वृत्तिस्वीकारस्यावश्यकतया मूले भेद पक्ष

एव तदावश्यकताकथनमयुक्तमतो मूलकृत आशयमाह - अयं भाव इत्यादिना। [पदानुपस्थितत्वादिति] - तत्र शक्त्यभावादिति भावः। तत्सिद्धये = अनुकार्योपस्थितिसिद्धये। उपेया = स्वीकार्या।

अभेदे = अनुकार्यानुकरणयोरभेदे। [प्रत्यक्ष इति] अनुकरणस्य श्रावणप्रत्यक्षे, प्रत्यक्षात्मकज्ञानस्य विषयोऽनुकरणात्मकः शब्दः, सचानुकार्यादभिन्न इति स्व (अनुकार्य) प्रत्यक्षरूपां शब्दात्मकानुकरणजन्यामुपस्थितिमादाय शब्दस्य शाब्दबोधविषयत्वोपपत्तिः। पदप्रत्यक्षस्य विषयविधया पदजन्यत्वादिति भावः। अतोऽस्मिन् पक्षे शब्दे नातिरिक्ता शक्तिः कल्प्येत्याशः।

[अतिप्रसङ्गेति] समवायेन घटादिशब्दजन्योपस्थितिविषयस्याकाशस्य घटोऽस्तीत्यादिवाक्यजन्य-शाब्दबोधविषयत्वापत्तिवारणायेत्यर्थः। [हेतुरिति] शाब्दबोधहेतुरित्यर्थः। सा च प्रकृते नास्तीति न गवित्ययमाहेति वाक्यजन्यबोधविषयताऽनुकार्यस्य सम्भवतीति भावः। नन्वाश्रयतासम्बन्धेन शक्तिरूपवृत्तिमत्त्वस्य सत्त्वेपि निरूपकतासम्बन्धेनाऽसत्त्वाच्छाब्दबोधविषयत्वानुपपत्तिस्तदवस्था, निरूपकतासम्बन्धेन तत्सत्त्वस्यैव शाब्दभानप्रयोजकत्वादित्याशङ्कायामाह [निरूपकताश्रय तान्यतरसम्बन्धेनेति]। [वृत्तिमत एवेति] नतु निरूपकतया वृत्तिमत एवेत्यर्थः। आश्रयतासम्बन्धेन शब्दस्य, निरूपकतासम्बन्धेनार्थस्य च वृत्तिमत्तया शाब्दबोधविषयत्वमिति भावः। [कल्प्यत इति] अन्यतरसम्बन्धेन वृत्तिविशिष्टस्य शाब्दबोधविषयत्वकल्पने गौरवसत्त्वेऽप्यनुभवानुरोधात्तत्कल्प्यत इति भावः। अनवद्यं = अगर्ह्यम्।

ननु वृत्तिमत एव शाब्दबोधविषयत्वाभ्युपगमे प्रत्यक्षादिनोपस्थितघटादेरपि शाब्दबोध-विषयतापत्तिवारणायाविषयतया शाब्दबोधमात्रं प्रति वृत्तिसंस्कारज्ञानान्यतरजन्यपदार्थोपस्थिति-र्हेतुरित्यवश्यमङ्गीकरणीयम्। तथा च प्रकृते शब्दस्य वृत्तिमत्त्वे, श्रोत्रादुपस्थितौ च सत्यामपि तादृशोपस्थित्यविषयत्वात्कथं शाब्दबोधविषयत्वमित्याशङ्कायामाह [सम्बन्धस्येति]। उभयनिरूपितत्वात् = उभयनिष्ठत्वात्। अयमर्थः - घटचैत्रादिपदानां घटत्वचैत्रत्वादिजातिवत् शक्तिसम्बन्धेन पदमपि शक्यतावच्छेदकत्वाच्छाब्दबोधे भासते। तत्र घटत्वादिजातिवच्छब्दांशे न वृत्तिविषयत्वं कल्प्यम्, मानाभावात्। आश्रयत्वेनैव तत्कार्यसिद्धेः। तथाच सम्बन्धस्योभयनिरूप्यत्वेन सम्बन्धिद्वयोपस्थापकत्वा-विशेषाद्घटत्वाद्यवच्छिन्नशक्त्यैव घटादिवच्छब्दस्यापि तयैव वृत्त्योपस्थितौ शाब्दबोधविषयत्वं सेत्स्यति- इति। अत्रायं विवेकः - निरुक्तरीत्या शब्दस्य वृत्त्योपस्थितौ यत्रार्थबोधे न तात्पर्यं, तत्र शब्दोऽर्थे विशेषणतया भासते। तत्रापि घटत्वादिरूपेण विशिष्यशक्तिग्रहवतां पदजात्युभयप्रकारको

बोधः। अन्येषां केवलव्यक्तौ शक्तिग्रहा"क्तिविशेष्यकः केवलपदप्रकारको घटपदवाच्यः कश्चिदर्थ इत्याकारको बोधः - इति। [पदादिति] जातिमच्छक्तात्पदादित्यर्थः। स्वस्यापि = शब्दस्यापि। [ज्ञानसम्भवादिति] घटत्वाद्यवच्छिन्नशक्त्यैव घटाद्यर्थवत् शब्दस्यापि तयैव वृत्त्या ज्ञानविषयत्वसम्भवादित्यर्थः। स्पष्टश्चायमर्थो विस्तरेण भूषणे। स्वोक्तार्थे हरिं प्रमाणयति [उक्तं चेति]। शब्दस्य वृत्तिमत्त्वेन ग्राह्यत्वं ग्राहकत्वं चोक्तमित्यर्थः। हरिकारिकायां [ग्राह्यत्वमिति] तेजसो यथा ग्राह्यत्वं, ग्राहकत्वमिति द्वे शक्ती पृथगिव प्रत्यवभासेते, तथैव सर्वेषामपि शब्दानाम्, एते = ग्राह्यत्वग्राहकत्वशक्ती पृथगिव अवभासेते। पृथगित्यस्य पृथगिवेत्यर्थः। क्वचित्तथैव पाठः। यद्यपि घटादयो ग्राह्या एव, नतु ग्राहकाः। चक्षुरादीनि ग्राहकाण्येव, नतु ग्राह्याणि, तथापि तेजसो दृष्टान्तत्वमुपपद्यते, तेजो यथा उपलब्धौ विषयभावमापन्नमेव विषयोपलब्धौ कारकत्वं प्रतिपद्यते, तथा शब्दोऽपि। ते चास्य प्रतिपाद्यप्रतिपादकत्वशक्ती नित्यमात्मभूते पृथगिव प्रत्यवभासेते। स्पष्टश्चायमर्थः पुञ्जराजीये। एतेन "पृथगवस्थितेः" इत्युक्त्या तयोरसमनैयत्यं दर्शितम्" इति पञ्चोलिप्रभृतयः परास्ताः।

यस्मादेवं तस्मात् - "विषयत्वमनादृत्य शब्दैर्नार्थः प्रकाश्यते" शब्दैः विषयत्वं = स्वविषयत्वमनादृत्य, अर्थः न प्रकाश्यते। शब्दः स्वरूपसम्बद्ध एवार्थं प्रकाशयति। "विषयत्वमनापन्नैः शब्दैर्नार्थः प्रतीयते" इति वाक्यपदीयपाठः।। ।।२६।।

प्रसङ्गादनुकार्यानुकरणयोरभेदपक्षे साधकमाह -

अत एव गवित्याह भू सत्तायामितीदृशम्।
न प्रातिपदिकं नापि पदं साधु तु तत्स्मृतम्।।३।। (२७)

"गवित्ययमाह" "भू सत्तायाम्" इत्येवमादयो यतोऽनुकरणशब्दा अनुकार्यान्न भिद्यन्तेऽतस्तेषामर्थवात्त्वाद्य भावात् "अर्थवदधातुः" इत्याद्यप्रवृत्तौ न पदत्वं न वा प्रातिपदिकत्वम्, अथ च साधुत्वमित्युपपद्यते। अन्यथा "प्रत्ययः" "परश्च" "अपदं न प्रयुञ्जीत" इति निषेधादिलङ्नादसाधुतापत्तिरित्यर्थः।।३।।(२७)

इति कौण्डभट्टविरचिते वैयाकरणभूषणसारे नामार्थनिर्णयः समाप्तः।।

"अत एव गवित्याह" इत्यादिकारिकामवतारयति [प्रसङ्गादिति] स चेत्थम्। ननु अनुकार्यानुकरणयोर्भेद एव युक्तः। अभेदेऽपि वा स्वस्य स्वस्मिन् शक्तिरस्तु। अन्यथाऽनुकरणशब्दानां

वृत्तिविषयार्थाप्रतिपादकत्वेनार्थवत्त्वाभावात् प्रातिपदिकसंज्ञा न स्यात्। तथा च "वार्त्रघ्नी पौर्णमास्यां कवतीषु रथन्तरं गायति। ऐरं कृत्वोद्गेयम्" इत्यादिश्रुतयो नोपपद्येरन्। प्रातिपदिकात्सुबन्ताद्वा तद्धितोत्पत्तेर्भाष्ये सिद्धान्तितत्वात्। तथा "एरुः" "एचोऽयवायावः" "रषाभ्यां नो णः" इत्यादिसूत्राणि च विरुध्येरन्। अर्थवत्त्वाभावेनाप्रातिपदिकतया सुबनापत्तेः। नचैवं धातूपसर्गादिगणपठितानामर्थवत्त्व-निबन्धनप्रातिपदिकत्वापत्तौ भू सत्तायाम्, प्र, परा, सर्व, इत्यादिभ्यः सुबुत्पत्तिप्रसङ्ग इति वाच्यम्। "अ इ उ ण्" इत्यादिषु स्वरसन्ध्यकरणवत् अविवक्षयैव सुपोऽप्रवृत्तेरिति। एवं विधात्प्रसङ्गादित्यर्थः। कारिकायाम् - [अत एवेति] उक्तरीत्या यतो न भेदः, उपस्थितस्यैव वा भानमत एवेत्यर्थः। [गवित्ययमाहेति] अत्र 'गव्' इत्यनुकरणम्, 'भू' इत्यनुकरणम्। [अर्थवत्त्वाभावादिति] निरूपकतासम्बन्धेन वृत्तिमत एवार्थस्य "अर्थवत्सूत्रे ग्रहणात्प्रकृते आश्रयतासम्बन्धेन वृत्तिमतः शब्दस्य पदजन्योपस्थितिविषयत्वेन शाब्दबोधविषयत्वेऽपि वृत्त्या अर्थविषयकबोधजनकत्वाभावान्न प्रातिपदिकत्वमित्यर्थः। अत एवाह [नापि पदत्वमिति] प्रातिपदिकत्वाभावात्सुपामप्रवृत्त्या सुबन्तत्वनिबन्धनपदत्वमपि नेत्यर्थः। नन्वनुकरणस्य पदत्वाभावे कथं साधुत्वमत आह [अथ चेति] एवमपीत्यर्थः। [साधुत्वमिति] शास्त्रबोधितसाधुत्वाभावेऽपि शिष्टप्रयुक्तत्वरूपं साधुत्वं सिद्ध्यतीत्याशयः। [अन्यथेति] भेदपक्षस्यैव स्वीकार इत्यर्थः। [प्रत्ययः परश्चेति] अयं भावः - प्रत्ययविधौ पञ्चमीनिर्देशात् षष्ठ्यंशविकलायाः "तस्मादित्युत्तरस्य" १-१-६७ इति परिभाषायाः प्रवृत्त्यैव प्रत्ययस्य प्रकृतिपरत्वे लब्धे "परश्च" इति सूत्रं नियमार्थं - प्रत्ययपरैव प्रकृतिः प्रयोक्तव्येति। एतदेवादायाभियुक्तैः पठ्यते- न केवला प्रकृतिः प्रयोक्तव्या, नापि केवलः प्रत्यय इति तथा च नियमशास्त्राणां निषेधमुखेन प्रवृत्तिरिति पक्षे निषेधोल्लङ्घनं स्पष्टमेव। तेषां विधिमुखेन प्रवृत्तिरिति पक्षे त्वार्थिकनिषेधोल्लङ्घनमिति बोध्यम्। अभेदपक्षे उक्तरीत्या प्रातिपदिकत्वाभावेन प्रत्ययविधावुद्देश्यतावच्छेदकाक्रान्तत्वरूप-प्रकृतित्वाभावेन "न केवला" इति निषेधस्य पदत्वयोग्य एव प्रवृत्तिः। पदत्वरहिते "अपदं न प्रयुञ्जीत" इति निषेधप्रवृत्त्या द्वितीय निषेधस्य चानवतारः - इति।। ।।२७।।

इति वैयाकरणभूषणसारतत्त्वदर्शिन्यां नामार्थनिर्णयः।। ४।।

अथ समासशक्तिनिर्णयः

समासान्विभजते -

सुपां सुपा तिङा नाम्ना धातुनाऽथ तिङां तिङा।
सुबन्तेनेति च ज्ञेयः समासः षड्विधो बुधैः।।१।। (२८)

सुपां सुपा = पदद्वयमपि सुबन्तम्। राजपुरुष इत्यादिः। सुपां तिङा = पूर्वपदं सुबन्तमुत्तरपदं तिङन्तम्। पर्यभूषत्, अनुव्यचलत्। "गतिमतोदात्तवता तिङाऽपि समासः" इति वार्तिकात्समासः। सुपां नाम्ना। कुम्भकार इत्यादिः। "उपपदमतिङ्" इति समासः। स च "गतिकारकोपपदानां कृद्भिः समासवचनं प्राक्सुबुत्पत्तेः" इति परिभाषया भवति सुबुत्पत्तेः प्राक्। अत्रोत्तरपदे सुबुत्पत्तेः प्रागित्यर्थात्। अन्यथा चर्मक्रीती इत्यादौ नलोपानापत्तेः। सुपां धातुना। उत्तरपदं धातुमात्रं, न सुप्तिङन्तम्। कटप्रूः, आयतस्तुः। "क्विब्वचि प्रच्छ्यायतस्तुकटप्रजुश्रीणां दीर्घश्च" इति वार्तिकात्। तिङां तिङा। पिबतखादता, पचतभृञ्जतेत्यादि। "आख्यातमाख्यातेन क्रियासातत्ये" इति मयूरव्यंसकाद्यन्तर्गणसूत्रात्। तिङां सुबन्तेन पूर्वपदं तिङन्तमुत्तरं सुबन्तम्। जहिस्तम्बः। "जहि कर्मणा बहुलमाभीक्ष्ण्ये कर्तारं चाभिदधाति" इति मयूर-व्यंसकाद्यन्तर्गणसूत्रात्। अयं षड्विधोऽपि समासः "सह सुपा" इत्यत्र योगविभागेन भाष्ये व्युत्पादितः स्पष्टः शब्दकौस्तुभादौ।। ।।१।।(२८)

अथ समासशक्तिनिर्णयः

सामान्यतो नामार्थं निरूप्य समासस्यापि नामविशेषत्वात् क्लृप्तशक्त्यैव निर्वाहात्तत्र नातिरिक्ता शक्तिरिति दर्शनान्तरीयाणां मतं निराकरिष्यन् समासार्थं निरूपयितुं प्रसङ्गात् समासभेदान् दर्शयति [समासानिति] तत्त्वं च सङ्केतविशेषसम्बन्धेन समासपदवत्त्वम्। "अर्थबोधाय ननुसन्धीयमानविभक्तिक-पूर्वपदकनामसमुदायत्वं समासत्वम्" इति नैयायिकोक्तन्तु न युक्तम्। दधि सन्दरमित्यादावतिव्याप्तेः। न च तत्र लुप्तप्रत्ययानुसन्धानादर्थबोधान्नातिव्याप्तिरिति वाच्यम्। राजपुरुष इत्यादावपि तथा सुवचत्वात्। लोपमजानतां बोध इत्यप्युभयत्र तुल्यम्। "श्रुतेरिवार्थम्" इत्येतद्धटके इवार्थमिति समुदायेऽतिव्याप्तेश्च, "पर्यभूषत्" "पचत भृञ्जता" इत्यादि तिङन्तघटितसमासेऽव्याप्तेश्च। "एकार्थीभावापन्नपदसमुदायविशेषः समास" इति दर्पणोक्तमपि न युक्तम्। कुम्भकार इत्यादावव्याप्तेः। कारेत्यादेरुत्तरभागस्यापदत्वात्।

शक्तं पदमिति पदग्रहणे तु औपगवादावतिव्याप्तिः। किञ्च उपपदनिमित्तककृद्विधौ समर्थपरिभाषोपस्थितेरुपपदसंज्ञासूत्रे भाष्ये उक्ततया उपपदकृदन्तयोर्व्यपेक्षाया दुरुपपादतया तयोरेकार्थीभावस्य नित्यतया एकार्थीभाव एव "तृतीयाप्रभृतीन्यतरस्याम्" इत्यत्राऽन्यतरस्यां ग्रहणेन समाससंज्ञाया वैकल्पिकतया, तदभावपक्षे मूलकेनोपदंशं भुङ्क्ते, महता मूलकेनोपदर्शं भुक्तं इत्यादयो न प्रयोगाः। "न च संज्ञाया भावाभावाविष्येते" इति भाष्ये महाविभाषयेति शेष इति न तद्विरोध इत्यलम्। मूले [सुपामिति] इदं सर्वत्र सम्बध्यते। अथ तिङामिति यावत्। ननु 'सुपां तिङा' इत्यनेनैव तिङां सुपा इत्यस्यापि सङ्ग्रहः स्यात्, सुप्तिङ्घटितस्योभयत्राप्यविशिष्टत्वात्। तथाच समासस्य पञ्चविधत्वमेव सिद्ध्यति, इति "समासः षड्विध" इति मूलमयुक्तमत आह [पूर्वपदं सुबन्तमुत्तरपदं तिङन्तमिति]। 'सुपां तिङा' इत्यनेन तिङन्तपूर्वपदकस्य ग्रहणमित्याशयेन "समासः षडिविधः" इत्युक्तिरिति भावः।

[इति वार्त्तिकादिति] इत्यर्थकात् "उदात्तगतिमता च तिङा" इति वार्तिकादित्यर्थः। उदात्तवता गतिमता च तिङन्तेन अव्ययं समस्यत इति तदर्थः। आद्यस्योदाहरणं - पर्यभूषदिति। द्वितीयस्योदाहरणं- अनुव्यचलदिति। द्वितीये अनुना समासात्पूर्वं परत्वात् 'तिङतिङः' इति निघातप्रवृत्त्योदात्तत्वाभावाद्वार्तिके पृथक् गतिमद्ग्रहणम्। अत्र समाससंज्ञायाः "न समास" इति शाकलप्रतिषेधः फलम्। अत्र समासान्तोदात्तत्वं तु न, "तिङतिङः" इत्यनेन परत्वात् बाधात्। अतोऽनोः "गतिर्गतौ" इत्यनेन निघातः, विशब्द उदात्तः "उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य" इत्यनेन अकारः स्वरित इति केचित्। वस्तुतोऽत्र सतिशिष्टत्वात्समासान्तोदात्तत्वं भवत्येव। अत एव 'सह' इति योगविभागस्य प्राविशदित्युदाहरणदानं भगवतः सङ्गच्छते। अन्यथा तत्र समासासमासयोः स्वरे रूपे चाविशेषात्तदसङ्गतिरेवेति बोध्यम्।

ननु 'सुप्सुपा' इत्याधिकारेण सुबन्तस्य सुबन्तेन समासलाभात् "सुपां नाम्ना" इति मूलमसङ्गतम्। नामपदेन प्रातिपदिकमात्रस्यैव मूलकृता ग्रहणादत आह [स चेति]। उपपदस्य कृदन्तेन समासलाभात्सुपां नाम्नेति मूलं युक्तमेवेति भावः। नन्वेवमपि "उपपदम्" इति सूत्रे "अतिङ्ग्रहणादनयोर्योगयोर्निवृत्तं सुप्सुपा" इतीति भष्यात्सुप्सुपेत्युभयोरपि निवृत्तिलाभात् 'सुपां नाम्ना' इति मूलमसङ्गतमेव। पदद्वयेऽपि सुबुत्पत्तेः पूर्वमेव तेन समासलाभादत आह [अत्रेति]। [उत्तरपद इति] अयं भावः - 'उपपदमतिङ्' इतिसूत्रे अतिङिति नोपपदविशेषणम्। किन्तु प्रथमान्ततया समासविशेषणम्। अतिङन्तश्चासौ समास

इति तदर्थः। तेन सुपेत्यस्यैव निवृत्तिर्ज्ञाप्यते, सुबितिप्रथमान्तन्तु पूर्वपदस्य पदकार्यार्थमनुवर्तत एव। भाष्यं तु समुदायाननुवृत्तितात्पर्यकमेकानुवृत्तावपि समुदायानुवृत्तेरभावस्याक्षतत्वात्। स्पष्टं चेदं कैयटे कौस्तुभे चेति। [इत्यर्थादिति] - अस्य 'सुपां नाम्ना' इति मूलं नायुक्तमिति शेषः। अत्रेत्यस्य गतिकारकेत्यादिपरिभाषायामित्यर्थः। अन्यथा = पूर्वपदेऽपि सुबुत्पत्तेः प्रागेव समासप्रवृत्त्यभ्युपगमे। [नलोपानापत्तेरिति] चर्मन्नित्यादेः पदत्वाभावादिति भावः। [न तिङन्तमिति] नापि सुबन्तमित्यपि बोध्यम्। [वार्तिकात्समास इति] वार्तिके निपातनात्समास इति भावः। यद्वा दीर्घप्रत्ययविधायकमपीदं वृद्धकुमारीवरन्यायेन समासविधायकमपीति भावः। [पिबतखादतेति] "आख्यातमाख्यातेन" इति गणसूत्रे 'एहीडादयोऽन्यपदार्थे' इति गणसूत्रादन्यपदार्थ इत्यस्यानुवृत्तेरन्यपदार्थस्य च क्रीडारूपतया स्त्रीत्वात्समासत्वेन प्रातिपदिकत्वाच्च टापीदं रूपम्। [जहिकर्मणेति] जहीत्येतत्तिङन्तं कर्मवाचकसुबन्तेन बहुलं समस्यते आभीक्ष्ण्ये गम्यमाने कर्त्रभिप्रायकश्चेत्समास इति तदर्थः। कर्ता च उक्तिक्रियाश्रयः प्रकृते। जरिस्तम्बमित्याभीक्ष्ण्येन य आह स "जहिस्तम्बः" इत्युच्यते। [समास इति] अस्य "एवं सूत्रवार्त्तिकयोर्व्युत्पादित" इति शेषः। योगविभागेन = सहेति योगिविभागेन, भाष्ये = भाष्ये तु। व्युत्पादितः = सुबन्थपूर्वपदक तिङन्तोत्तरपदकः अनुव्यचलदित्यादिः व्युत्पादितः इति शेषपूरणेन व्याख्येयम्। अन्यथा सहेति योगविभागेन अनुव्यचलदित्यादेः कतिपयतिङन्तोत्तरपदकस्य च्छान्दसस्य समासस्यैव सङ्ग्रहस्य कैयटादौ स्पष्टतया यथाश्रुतेऽसङ्गतेः। तिङन्तार्थं कृतेन सहेति योगविभागेनाप्येतत्सुसाधमिति सर्वसमासशेषप्रकरणान्तस्थमनोरमायां "सुसाधम्" इति प्रतीकमुपादाय- "अनेन प्रकारेणापि अत्र समासः प्रत्ययसन्नियोगेनैव, योगविभागस्येष्टसिद्ध्यर्थत्वादिति बोध्यम्। यद्यपि स च छन्दस्येवेति पूर्वमुक्तं तथापि लक्ष्यानुसारात् क्वचिदन्यत्रापि प्रवृत्तौ न बाधकमिति तात्पर्यम्" इति शब्दरत्नोक्तरीत्यापि योगविभागेन सुबन्तपूर्वकस्यैव सङ्ग्रहलाभेऽपि 'पचतभृज्जता' 'जहिजोडः' इत्यादीनामसङ्ग्रहाद्यथाश्रुतेऽसङ्गतिरेव।

एवं च "उदात्तगतिमता" इति वार्त्तिकार्थो भाष्यकृता सहेति योगविभागेन साधित इति फलितम्। युक्तं चैतत्। अन्यथा वार्त्तिकरीत्या तस्य नित्यसमासत्वापत्त्या "य आनयत्" आयोनत् संप्रयच्छ अभिप्रभरघृषते" इत्यादीनामसमस्तानामसाधुतापत्तेः। सहेति योगविभागाश्रयणे तु न दोषः। सर्वत्र योगविभागस्थले समानविधेयताकद्वितीययोगेन तस्य क्वाचित्कत्वबोधनात्। अत एव "योगविभागस्येष्टसिद्ध्यर्थत्वमेव न त्वनिष्टापादकत्वमित्युद्घोषः।

एतेन "भाष्ये व्युत्पादित इति - चिन्त्यमेतत् उक्तषड्विधत्वस्य भाष्यकृताऽसंस्पृष्टत्वात्। तथाहि - सहग्रहणं क्रियते। सहभूतयोरेव समाससंज्ञा यथा स्यात्। एकैकस्य समाससंज्ञा मा भूदिति सहग्रहणस्य प्रयोजनं गर्गशतदण्डनन्यायेन समुदाये वाक्यपरिसमाप्तिविधया संसाध्योक्तम् - एवं तर्हि सिद्धे सति यत्सहग्रहणं करोति तस्यैतत्प्रयोजनं, योगाङ्गं यथा विज्ञायेत। सति च योगाङ्गे योगविभागः करिष्यते। सह = सुप् समस्यते। केन सह? समर्थेन। अनुव्यचलत्। अनुप्राविशत्। ततः सुपा। सुपा च सह समस्यते। अधिकारो लक्षणं च। यस्य समासस्यान्यल्लक्षणं नास्ति, इदं तस्य लक्षणं भविष्यति" इति। नेदं षड्विधत्वं केनापि स्वीकृतमिति गुरवः" इति पञ्चोलिनः परास्ताः। निरुक्तदिशा सुबन्तपूर्वपदकतिङन्तोत्तरपदकस्यैव अनुव्यचलदित्यादेर्योगविभागेन भाष्यकृता स्वीकृतत्वात्। षड्विधस्य समासस्य सूत्रवार्त्तिककाराभ्यां व्युत्पादितत्वात्। एष एवाशयो ग्रन्थकृतः। तथैव कौस्तुभे स्पष्टं प्रतिपादनादित्यम्।। ।।२८।।

स्वयं भाष्यादिसिद्धं तद्भेदं व्युत्पाद्य प्राचीनवैयाकरणोक्तविभागस्याव्याप्त्यति-व्याप्त्यादिभिस्तल्लक्षणस्य प्रायिकत्वं च दर्शयति -

समासस्तु चतुर्धेति प्रायोवादस्तथा परः।।
योऽयं पूर्वपदार्थादिप्राधान्यविषः स च।।२।। (२९)
भौतपूर्व्यात्सोऽपि रेखागवयादिवदास्थितः।।

चतुर्धा, अव्ययीभावतत्पुरुषद्वन्द्वबहुव्रीहिभेदात्। अयं प्रायोवादः। भूतपूर्वः, दृन्भूः, काराभूः, आयतस्तूः, वागर्थाविव इत्याद्यसङ्ग्रहात्। तथा पूर्वपदार्थप्रधानोऽव्ययीभावः, उत्तरपदार्थप्रधानस्तत्पुरुषः, उभयपदार्थप्रधानो द्वन्द्वः, अन्यपदार्थप्रधानो बहुव्रीहिः, इत्यादिलक्षणमपि प्रायिकम्। उन्मत्तगङ्गम्, सूपप्रति, अर्धपिप्पलि, द्वित्राः, शशकुशपलाशमित्यादौ परस्परव्यभिचारात्। तथा हि - उन्मत्तगङ्गमित्यव्ययीभावे पूर्वपदार्थप्राधान्याभावादव्याप्तिः, अन्यपदार्थप्राधान्याद् बहुव्रीहिलक्षणातिव्याप्तिश्च "अन्यपदार्थे च संज्ञायाम्" इति समासात्। सूपप्रतीत्यव्ययीभावाव्याप्तिश्च। "सुप्प्रतिना मात्रार्थे" इति समासात्। अर्धपिप्पली इति तत्पुरुषे पूर्वपदार्थपराधान्यसत्त्वादव्ययी-भावातिव्याप्तिस्तत्पुरुषाव्याप्तिश्च "अर्धं नपुंसकम्" इति समासात्। एवं पूर्वकाय इत्यादौ द्रष्टव्यम्। द्वित्रा इति बहुव्रीहावुभयपदार्थप्राधान्याद् द्वन्द्वातिव्याप्तिर्बहुव्रीह्यव्याप्तिश्च।

शशकुशपलाशमित्यादिद्वन्द्वे समाहारान्यपादर्थप्राधान्याद्बहुव्रीह्यतिव्याप्तिर्द्वन्द्वाव्याप्तिश्च स्यादिति भावः। सिद्धान्ते त्वव्ययीभावाधिकारपठितत्वमव्ययीभावत्वमित्यादि द्रष्टव्यम्।

असम्भवश्चैषामित्याह - भौतपूर्व्यादित्यादि। रेखागवयादिनिष्ठलाङ्गूलादेर्वास्तव-पश्वलक्षणत्ववदेतेषामपि न समासलक्षणत्वम्। बोधकता तु तद्वदेव स्यादिति भावः। ।।२ १/२।। (२९ १/२)

स्वयं = भट्टोजिदीक्षितः। अनुव्यचलदित्यादिसङ्ग्रहायाह [भाष्यादीति] तद्भेदं = समासभेदम्। विभागस्य = समासविभागस्य। [प्रायिकत्वं चेति] अत्र चो भिन्नक्रमः। तल्लक्षणस्येत्यनन्तरं योज्यः। विभागस्य तल्लक्षणस्य च प्रायिकत्वं दर्शयतीति योजना कार्या। एतेन "प्रायिकत्वमिति - अत्र चशब्दः प्रक्षिप्तोऽनन्वितार्थत्वात्" इति पञ्चोलिनः परास्ताः। इत्याद्यसङ्ग्रहादित्यत्राऽऽदिपदेन विस्पष्टपटुः, काकतालीयमित्यादेः सङ्ग्रहः। "सह सुपा" २-१-३ "इवेन समासो विभक्त्यलोपश्च" "विस्पाष्टादीनि गुण वचनेषु" ६-२-२४ "समासाच्च तद्विषयात्" ५-३-१०६ इत्यादीनामव्ययीभावाद्य-धिकारेष्वपाठादेषामसङ्ग्रहः, विस्पाष्टादीनि गुणवचनेषु" "समासाच्च तद्विषयात्" इत्यादयः स्वरप्रत्ययविधानार्थमारभ्यमाणा अपि वृद्दकुमारीवरन्यायेन समासविधायका अपीति तदसङ्ग्रह इति भावः। स्पष्टं चेदं "सह सुपा" २-१-३ इति सूत्रे कौस्तुभे।

मूले [प्रायोवाद इति] बाहुल्येन वाद इत्यर्थः। मूले परशब्दार्थमाह [योऽयमिति] [पूर्वपदार्थामिति] आदिपदेन उत्तरपदार्थान्यपदार्थोभयपदार्थसङ्ग्रहः। व्यभिचारं दर्शयति [तथाहीत्यादिना] अव्याप्तिः = अव्ययीभावलक्षणस्याव्याप्तिः। अन्यपदार्थं प्राधान्ये गमकमाह [अन्यपदार्थे चेति] उन्मत्तगङ्गम् इत्यादावव्ययीभावसमासकार्याणामुपपत्त्यर्थं त्वव्ययीभावाधिकारपाठ इति बोध्यम्। अव्ययीभावाव्याप्तिः= अव्ययीभावलक्षणस्याव्याप्तिः। एवमुत्तरत्रापि ज्ञेयम्। ननु तर्हि कान्यव्ययीभावादीनां लक्षणानीत्यत आह - [सिद्धान्ते त्विति] [अव्ययीभावाधिकरणपठितत्वमिति] अव्ययीभावाधिकारस्थविधिविहित-समाससंज्ञकत्वमित्यर्थः। तेनोपकुम्भमित्यादेरव्ययीभावाधिकारे पाठाभावेऽपि न क्षतिः।

सिद्धान्तभूतजहत्स्वार्थावृत्तिमवलम्ब्य मूलमवतारयति [असम्भवश्चेति]। [एषामिति] पूर्वपदार्थप्रधानोऽव्ययीभाव इत्यादिलक्षणानामित्यर्थः। मूले [भौतपूर्व्यादिति] पूर्वं भूतः = भूतपूर्वम्। ततः स्वार्थे ष्यञ्। वृत्तेः पूर्वकाले भूतं यत् पूर्वादिपदार्थविशेष्यकबोधजनकत्वं, तस्माद्धेतोरित्यर्थः। मूले आस्थितः = स्वीकृतः। [रेखागवयेति] यथा रेखागवयादिनिष्ठलांगूलादेर्वास्तवपशुगत्वाभावान्न

वास्तवपशुलक्षणत्वं, तथा तादृशतादृशबोधजनकत्वस्य तत्तत्समासघटकपूर्वादिपदनिष्ठत्वाभावान्न तत्तत्समासलक्षणत्वं, समासे विशिष्टशक्तिस्वीकारेणावयवानां निरर्थकत्वादिति भावः। [बोधकता तु तद्वदेवेति] रेखागवयादिनिष्ठलांगूलादेर्यथा सादृश्येन पशुनिष्ठलांगूलादिबोधनद्वारा वास्तवपशुबोधकत्वं, तथा वृत्तेः प्राक् तत्तत्पदार्थत्वं यत्र दृष्टं तत्तदर्थविशेष्यकबोधजनकतया, तत्तदाश्रये तत्तत्समासबोधकत्वमिति भावः। उक्तं च "सह सुपा" इति सूत्रे कौस्तुभे "एकार्थीभावात्पूर्वस्यामवस्थायां यौ पृथक्पदार्थौ तयोर्वृत्तौ प्राधान्याप्राधान्याभ्यां प्रवेशमाश्रित्योक्तनामौत्सर्गिकव्यवहाराणां निर्वाहो बोध्यः" इति।। २९।।

नतु पूर्वपदार्थप्राधान्यादि समासे सुवचम्। तथा हि - "समर्थः पदविधिः" इति सूत्रे भाष्यकारैरनेकधोक्तेष्वपि पक्षेषु जहत्स्वार्थाजहत्स्वार्थपक्षयोरेवैकार्थीभावव्यपेक्षारूपयोः पर्यवसानं लभ्यते। तत्राजहत्स्वार्थपक्ष उक्तव्यवस्था नासम्भविनीत्याशङ्कां मनसिकृत्याऽऽह -

जहत्स्वार्थाजहत्स्वार्थे द्वे वृत्ती ते पुनस्त्रिधा।।३।।(३०)
भेदः संसर्ग उभयं वेति वाच्यव्यवस्थितेः।

जहति पदानि स्वार्थं यस्यां जहत्स्वार्था। पदे वर्णवद्वृत्तौ पदानामानर्थक्यमित्यर्थः। अयं भावः - सामासशक्त्यैव राजविशिष्टपुरुषभानसम्भवे न राजपुरुषपदयोरपि पुनस्तद्बोधकत्वं कल्प्यम्, वृषभयावकादिपदेषु वृषादिपदानामिव। अन्यथा राजपदेन विग्रहवाक्ये इव राज्ञः स्वातन्त्र्येणोपस्थिति-सत्वाद् ऋद्धस्य राज्ञः पुरुषः इत्यत्रेव ऋद्धस्य राजपुरुष इत्यस्याप्यापत्तेरिति।

"जहस्त्वार्थ" इत्यादिकारिकामवतारयति [नन्विति] [अनेकोक्तेष्विति] - इत्थं तावद्भाष्ये पक्षसृष्टिः प्रतीयते - समासादावेकार्थीभावः, वाक्ये व्यपेक्षेत्येकः पक्षः। "अथ ये वृत्तिं वर्तयन्ति" इत्यारभ्य जहत्स्वार्था, अजहत्स्वार्था चेति पक्षभेदेन मतान्तरम्। समासादावपि वाक्यवद्व्यपेक्षैव सामर्थ्यमिति चापरं मतम् - इति।

यत्तु "अनेकधोक्तेष्विति" "अथ ये वृत्तिं वर्तयन्ति किं त आहुः, किं जहत्स्वार्था-वृत्तिराहोस्विदजहत्स्वार्थेत्यादिनेत्यादिः" इति दर्पणकाराः। तन्न। एकार्थीभावो व्यपेक्षा वेति पूर्वप्रतिपादितपक्षस्य "परस्परव्यपेक्षां सामर्थ्यमेके" इतिवक्ष्यमाणपक्षस्य चासङ्ग्रहापत्तेः।

तत्र भाष्ये कैयटेनैवं निर्णीतम् - नित्यशब्दवादाभिप्रायेणाद्यः पक्षः। द्वितीयस्तु कार्यशब्द-वादाभिप्रायेण। नित्यशब्दवादे जहत्स्वार्थादिविचारस्यानवकाशात्। तत्र शब्दानां नित्यतया स्वार्थत्यागाद्ययोगात्। तृतीयस्तु वाक्य इव वृत्तावपि व्यपेक्षैवेति स्वतन्त्रः पक्षः - इति।

वस्तुतस्तु कैयटोक्तमयुक्तम्। "पृथगर्थानामेकार्थीभावः सामर्थ्यम्। क्व पृथगर्थानि? क्ववैकार्थानि? वाक्ये पृथगर्थानि। समास एकार्थानि" इति समर्थसूत्रस्थभाष्यविरोधात्। अखण्डपक्षे पदानामसत्त्वात्। किञ्च पदस्याखण्डत्वे व्याकरणस्थविधीनामसंलग्नकतापत्तिः। प्रकृतिप्रत्ययागामदीनामभावात्। यदितु पञ्चकोशकल्पना न्यायेन प्रकृत्त्यादिकल्पनया शास्त्रप्रवृत्तिरित्युच्यते, तर्हि "समर्थः पदविधिः", "सह सुपा" इत्याद्यपि शास्त्रान्तर्गततया तद्दशायामेव प्रवर्तत इति कथमखण्डपक्षमभ्युपेत्य प्रथमः पक्षः प्रवर्ततामिति तत्र पक्षे जहदजहद्विचारः प्रवर्तत एवेत्यादिकं विस्तरेण प्रतिपादितं भूषणे।

हरदत्तेन त्वेवं निर्णीतम् - राजपुरुष इत्यादौ पदद्वयेनापि प्रत्येकं राजपुरुषोभयोपस्थापनाय वृत्तावेकार्थीभाव आवश्यकः। जहत्स्वार्था वृत्तिस्तु न युक्ता, राजपुरुष इत्यादितः पुरषमात्रस्यानयनापत्तेः। समासादौ व्यपेक्षाप्यङ्गीकार्या। अन्यथा एकार्थीभावमात्रमाश्रित्य "द्रष्टुं गतः कृष्णं, श्रितो गुरुकुलं मैत्रः" इत्यादौ कृष्ण - श्रितशब्दयोः समासापत्तेः। तस्मादेकार्थीभावो व्यपेक्षा अजहत्स्वार्था चेति त्रयं समुच्चितं परिभाषाप्रवृत्तिहेतुः इति।

तदप्ययुक्तम्। वृत्तावेकार्थीभावो, वाक्ये व्यपक्षेति भाष्यकैयटविरोधात्। किञ्चोभयोरपि पदयोरुभयार्थकताकल्पना न युक्ता, विशेषणान्वयनिरासस्य राजपदे तथाकल्पनादेव सम्भवात् - इत्यादि भूषणे प्रपञ्चितम्।

तदेतद् ध्वनयन्नाह [जहत्स्वार्थाजहत्स्वार्थयोरेवेति] - एवशब्देन कैयटहरदत्तोक्तिव्यवच्छेदः। कारिकायामप्युक्तम् - "जहत्स्वार्थाजहत्स्वार्थे द्वे वृत्ती" इति। द्वे एव वृत्ती इति अवधारणेन मूलं व्याख्येयम्। कैयटरीत्या भेदाधिक्यस्यापि सत्त्वात्, हरदत्तरीत्या जहत्स्वार्थाविरहात् "द्वे" इति मूलमयुक्तं स्यादिति ज्ञेयम्। अत इत्थं व्यवस्था कार्या - एकार्थीभावो व्यपेक्षा चेति यत्पक्षद्वयं भाष्ये प्रथमत उपन्यस्तं, तदेवाभिप्रेत्य जहत्स्वार्थाजहत्स्वार्थविचारः कृतः। एकार्थीभावे जहत्स्वार्था, व्यपेक्षायामजहत्स्वार्था। एकार्थीभावश्च समासादौ, "पृथगर्थानामेकार्थीभावः सामर्थ्यम्" इति भाष्यस्वरसात्। अत एव एकार्थीभावव्यपेक्षयोर्मतान्तरत्वेऽपि संशये कोटितयोल्लेखवज्जहत्सावर्थाजहत्स्वार्थयोरपि तदन्तर्गतयोर्विकल्पोनोल्लेखः सङ्गच्छते।

नन्वेवम् "अथ ये वृत्तिं वर्तयन्ति किं त आहुरिति मतान्तरमवतार्य जहत्स्वार्थादिविचारो भाष्ये कथं सङ्गच्छत इति चेत्, अत्राहुः- नैतन्मातान्तराभिप्रायकं भाष्यम्, विना समुदायशक्तिं जहत्स्वार्थायाः, विना व्यपेक्षामजहत्स्वार्थायाश्च दुर्वचत्वात्। किंतु वृत्तिलक्षणाभिधानाय प्रश्नरूपम्।

अत एव "परार्थाभिधानं वृत्तिः" इति तल्लक्षणकथनं सङ्गच्छते। अन्यथा मतान्तरे लक्षणनिर्वचनमेतद्भाष्यमित्यभ्युपगम उक्तैकार्थीभाव - वक्ष्यमाणव्यपेक्षयोर्वृत्तिलक्षणानभिधानान्न्यूनतापत्तेः। तथा च ये = एकार्थीभाववादिनो व्यपेक्षावादिनो वा, वृत्तिं = कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपां पदविधित्वात्सूत्रे सामर्थ्यवत्वेन वर्तयन्ति = वर्णयन्ति, किं ते वृत्तिलक्षणमाहुरिति प्रश्नभाष्याशयः। उत्तरयति - परार्थाभिधानमिति। अत एव पूर्वोक्तपक्षाणां सूत्राक्षरतो लाभप्रदर्शनावसरे "अथ यद्येवमेकार्थीभावः सामर्थ्यम्, अथापि व्यपेक्षासामर्थ्यम्, किं गतमेतदियता सूत्रेण, आहोस्विदन्यतरस्मिन्पक्षे भूयः सूत्रं कर्तव्यम्?" इति भाष्ये एकार्थीभावव्यपेक्षारूपपक्षद्वयस्यैव प्रदर्शनं, तरपः प्रयोगश्चोपपद्यते। तथाच समुदायशक्त्यभ्युपगम एव जहत्स्वार्थता सूपपादेति स एव जहत्स्वार्थपक्षः। परस्परान्वये योग्यतारूपव्यपेक्षासामर्थ्यं पदानां स्वार्थत्यागे न सम्भवतीति व्यपेक्षा अजहत्स्वार्था चैकैव। एवं च एकार्थीभावो जहत्स्वार्था चेत्यनर्थान्तरम्। व्यपेक्षा अजहत्स्वार्था चेत्यनर्थान्तरम्" इति। तदेतदभिप्रेत्य आह [एकार्थीभावव्यपेक्षारूपयोरिति]। पर्यवसानम् = निरुक्तविधया। एकार्थीभावसामर्थ्यपक्ष एव जहत्स्वार्थाजहत्स्वार्थविचारः, व्यपेक्षा तु नाजहत्स्वार्थारूपेति तु मञ्जूषाकारा अभिप्रयन्ति।

तत्र = समर्थसूत्रभाष्यस्थनिष्कृष्टपक्षद्वयमध्ये। उक्तव्यवस्था = पूर्वपदार्थप्रधानोऽव्ययीभाव इत्यादिव्यवस्था। [नासम्भविनीति] अजहत्स्वार्थावृत्तिपक्षे पूर्वोत्तरपदयोरर्थवत्त्वादुक्तव्यवस्था नासम्भविनीति भावः। सा व्यवस्था अव्याप्त्यतिव्याप्तिदोषदुष्टेति त्वन्यदेतत्। मनसिकृत्य = निधाय। "अनत्याधान उरसिमनसी" १-४-७५ इति गतिसंज्ञा पक्षे "कुगतिप्रदायः" २-२-१८ इति समासे क्त्वो ल्यबादेशः।

प्रथमतो जहत्स्वार्थावृत्तिमुपपादयति। [जहतीति]। शत्रन्ताद् बहुवचनम्। तच्च प्रयोग-बहुत्वाभिप्रायेण। [यस्यां सेति]। नायं विग्रहः। किन्तु फलितार्थकथनपरः। विग्रहस्तु एवं कार्यः - जहत् स्वं पदं यं स जहत्स्वः। जहत्स्वः अर्थो यस्यां सा = जहत्स्वार्थेति। बहुव्रीहिगर्भो बहुव्रीहिः। स्पष्टश्चायं विग्रहः "सर्वनाम सङ्ख्ययोः" इति वार्त्तिके कौस्तुभमनोरमयोः। नच "जहत्स्वः" इत्यत्र "सर्वनामसङ्ख्ययोः" इति वार्त्तिकात् स्वशब्दस्य सर्वनाम्नः पूर्वनिपातापत्तिरिति वाच्यम्। राजदन्तादिषु पाठेन स्वशब्दस्य परनिपातात्। अत्र च "जहत्स्वार्थेति समर्थसूत्रस्थभाष्यप्रयोग एव मानम्। इदमपि कौस्तुभमनोरमयोः स्पष्टम्। एवं स्थिते "सप्तमीविशेषणे बहुव्रीहौ" २-२-३४ इति सूत्रे सप्तमी-

ग्रहणाज्ज्ञापकाद्व्यधिकरणानामपि पदानां क्वचिद्बहुव्रीहिर्भवतीति भावः - इति व्याख्याय वस्तुतस्तु जहति स्वानि वृत्तिघटकपदानि यं जहत्स्वः तादृशोऽर्थो यस्यामिति समानाधिकरणपदकोपि सम्भवतीति परे - इति भाषमाणानां हरिपञ्चोलिप्रभृतीनां व्याख्यानेषु समानाधिकरणबहुव्रीहेर्ग्रन्थकृदसम्बन्धित्वस्फोरकपरे वस्तुतस्त्विति पदप्रयोगोसङ्गत एवति बोध्यम्।

[वर्णवदिति] षष्ठ्यन्ताद्वतिः। [पदानामानर्थक्यमिति] अयं भावः - समर्थसूत्रे भाष्ये जहत्स्वार्थावृत्त्युपपादनावसरे "अथवा अन्वयाद्विशेषणं भविष्यति - यथा मल्लिकापुटश्चम्पकपुट इति। निष्कीर्णास्वपि सुमनस्सु अन्वयाद्विशेषणं भविष्यति। अयं मल्लिकापुटः, अयं चम्पकपुट इति इत्युक्तम्। "आमोदान्वयाद्विशेषावगतिः" इति कैयटः। अयमाशयः। यथा पुष्पाणामभावेऽपि गन्धान्वयमात्रेण पूर्वतनीं पुष्पसत्तामनुमाय मल्लिकापुट इति व्यवहारः तथा वृत्तौ पदानामर्थाभावेऽपि वाक्यदृष्टसार्थकपदवर्णानुपूर्वीसत्त्वमात्रेण यथा राज्ञः पुरुष इति वाक्ये राजसम्बन्धवत्पुरुषप्रतीतिः, तथा राजपुरुष इति वृत्तावपि तस्यैव प्रतीतिः। एवं चोभयोरप्यनर्थकत्वमेव दृष्टान्तबलात्प्रतीयते। यद्यपि "जहत्युपसर्जनपदानि यत्रेति" इति हेलाराजग्रन्थेनोपसर्जनपदस्यैवानर्थकत्वं प्रतीयते, तथापि एकार्थीभावस्य पूर्वपदमात्रनिष्ठतापत्तिः। समासनिष्ठतानापत्तिश्च सर्वेषामनर्थकत्वं न्याय्यम्। अन्यथा समासत्वस्य व्यासज्यवृत्तित्वात्। किञ्च द्वन्द्वबहुव्रीह्योरुभयोरपि उपसर्जनतया उभयोरप्यनर्थकताया अवश्यस्वीकार्यतया अर्धजरतीयस्यान्याय्यतया सर्वत्रापि तत्स्वीकार आवश्यकः - इत्याशयेन पदानामानर्थक्यं स्वीकृतम्। यद्यपि "जहदप्यसौ नात्यन्ताय जहाति। यः परार्थविरोधी स्वार्थस्तं जहति। तद्यथा तक्षा राजकर्मणि प्रवर्तमानः स्वं तक्षकर्म जहाति, नतु हिक्कितहसितकण्डूयितानि। न चायमर्थः परार्थविरोधी, विशेषणं नाम "तस्मात्तन्न हास्यति" इति भाष्ये राजपुरुष इत्यादौ राजत्वनिष्ठप्रकारतानिरूपितराजनिष्ठविशेष्यत्वांशस्य त्यागमात्रेण जहत्स्वार्थतेति लभ्यते, तथापि निरुक्तरीत्या जहत्स्वार्थतायाः पूर्वपदमात्रनिष्ठतापत्तिरित्याशयेन तत्पक्षस्त्यक्तो मूलकृता। अत एव भगवता "जहदप्यसौ नात्यन्ताय जहाति" इति पक्षोपन्यासानन्तरं - "अथवा अन्वयाद्विशेषणं भविष्यति" इति पक्षान्तरमुपन्यस्तम्। तस्य चाशय उक्त एवेति। तदेताह - [अयं भाव इत्यादिना]। [समासशक्त्यै वेति] तन्निष्ठविशिष्टशक्त्यैवेत्यर्थः। अवयवशक्तिमजानतामपि समुदायशक्त्यैव बोधस्य सर्वानुभवसिद्धत्वेन अवश्यकल्प्यया समुदायशक्त्यैव राजविशिष्टपुरुषभानसम्भवेन अवयवयो राजपुरुषपदयोरपि तदर्थबोधकत्वं न कल्प्यमिति भावः। एवशब्देन अवयवशक्तिव्यवच्छेदः। वाक्ये

तु पदान्यर्थवन्त्येव। समुदायशक्तिस्वीकारादेव समासस्यार्थवत्त्वात्प्रातिपदिकसंज्ञासिद्धिः। अत एव "वृत्तौ विशिष्ट एवार्थो राजपुरुषपदाभ्यामभिधीयते" इति कैयटः। [वृषभयावकेति] समासघटकानां राजादिपदानां निरर्थकत्वे पूर्व दृष्टान्तोपन्यासः। समासान्तर्गतराजादिपदानां समासात्पूर्वं वाक्येऽर्थवत्त्वं, तेषामेव समासघटकतादशायामनर्थकत्वमित्येतदर्थे एतद्दृष्टान्तोपन्यासः। केवलवृषशब्दस्य शक्तावच्छेदकानुपूर्व्याः सत्त्वादर्थवत्त्वं, वृषभशब्दघटकतादशायां तदानुपूर्व्या अभावादनर्थकत्व-मानुपूर्व्यन्तरघटकत्वाभावविशिष्टानुपूर्व्या एव शक्तावच्छेदकत्वात्। एवं प्रकृतेऽपि। यथा एकस्यैव मणेः सिद्धेश्च उत्तेजकौषधि - सिषाधयिषादशायां न दाहानुमितिप्रतिबन्धकत्वं, तदभावदशायां तु तत्प्रतिबन्धकत्वं तद्वदिति बोध्यम्। समर्थसूत्रादेतत्पक्षार्थलाभस्तु भाष्ये प्रदर्शितः। तत्र हि - यदा तावदेकार्थीभावः सामर्थ्यं, तदैवं विग्रहः करिष्यते। सङ्गतार्थः समर्थः। संसृष्टार्थः समर्थः। तद्यथा - सङ्गतं घृतं, सङ्गतं तैलमित्युच्यते, एकीभूतमिति गम्यते। संसृष्टार्थः समर्थ इति। तद्यथा संसृष्टोऽग्निरित्युच्यते। एकीभूत इति गम्यते इत्युक्तम्। सङ्गतः संसृष्ट इति पर्यायोपादानं तदर्थदार्ढ्याय। परस्परसंसृष्टार्थोपस्थितिरेव, न पृथगुपस्थितिरिति एकार्थीभावपदार्थः स्पष्टमेवानेनोक्तः। एवं च समुदाय एव विशिष्टार्थबोधकः, अवयवास्तु अर्थरहिता एव। त्वादिभावप्रत्ययार्थविचारस्तु शास्त्रान्तरीयैः सह तद्रीत्यैव। आरोपितप्रकृतिप्रत्ययार्थमादाय वेति मूल एव वक्ष्यते। अत एव महाबाहुरित्यादावात्वादिसिद्धिः। परार्थाभिधानं वृत्तिरित्यस्य त्वयमर्थः - परो = विशिष्टः, अर्थः = परार्थस्तस्याभिधानं यत्र शक्त्या सा वृत्तिरिति। तदनुमापकं च "समर्थः पदविधिः" इति सूत्रमिति ग्रन्थकर्तुराशयः।

उपसर्जनपदमेवार्थरहितं, विशेष्यपदं तु अर्थवदेव। वस्तुत उपसर्जनपदेऽपि विशेष्यत्वांशस्य त्यागमात्रेण जहत्स्वार्थतेति पक्ष एव युक्त इति तु मञ्जूषाकाराशय इत्यलम्।

यत्तु समासशक्तिनिर्णयप्रारम्भे दर्पणकाराः - "अवयवशक्त्या समुदायशक्तिसहकृतया जायमाना पदार्थोपस्थितिरेव विशेष्यविशेषणभावापन्नविशिष्टार्थमवगाहते। जहत्स्वार्थावृत्तिः पदानामानर्थक्यमिति तु न सम्यक्। महाबाहुरित्यादावात्वाद्यनापत्तेः। भूतपूर्वगत्याश्रयणं तु सत्यां गतावयुक्तम्। तदुक्तम् -

'जहत्स्वार्था तु तत्रैव यत्र रूढिर्विरोधिनी' इति।

अवयवार्थविरुद्धो यत्र समुदायार्थस्तत्रैव सा। यथा कृष्णसर्पादाविति तदर्थः। अयमेव पक्षः "समासे खलु भिन्नैव शक्तिः पङ्कज शब्दवत्" इति वदतो मूलकृतः सम्मतः। तथा सति पङ्कजशब्दादौ

परैर्योगरूढ्यभ्युपगमेन तद्दृष्टान्तोपन्याससार्थक्यात्। जहत्स्वार्थावृत्तिपक्षस्य तत्सम्मतत्वे स्वमते तस्य पक्षतया तत्र तदनभ्युपगमेन तदुपन्यासानुपपत्तेः स्पष्टत्वात् - इति वदन्ति।

तदयुक्तम्। प्रकृतग्रन्थकर्तुरनभिमतत्वात्। वृत्तिघटकानां सर्वेषामप्यवयवानामानर्थक्यमिति पक्षस्यैव ग्रन्थकर्तुरभिमतत्वात्। अत एव "जहति पदानि स्वर्थं यस्यां सा जहत्स्वार्था, पदे वर्णवद्वृत्तौ पदानामानर्थक्यम्" इति प्रकृतग्रन्थसङ्गतिः। वृत्तौ पदानामानर्थक्ये राजपुरुष इत्यादौ नलोपानापत्तिशङ्का अर्थवद्ग्रहणपरिभाषानाश्रयणेन तत्समाधानपरभूषणग्रन्थसङ्गतिश्च। "वृत्तौ पदानामानर्थक्यम्" इति कौस्तुभसङ्गतिश्च। किञ्च "पङ्कजपदेऽपि समासशक्तिवादिभिश्चित्रगू राजपुरुष इत्यादाविव योगार्थमन्तर्भाव्यैव सा अभ्युपेयत इति न योगार्थबोधानुपपत्तिः, योगरूढ्युच्छेदो वा" इति भूषणोक्तरीत्या 'पदानां सर्वेषामप्यानर्थक्यं समास' इति मतेऽपि पङ्कजपदस्य योगरूढत्वे बाधकाभावेन "पङ्कजशब्दवत्" इति दृष्टान्तोपन्यास उपपद्यत एवेति स्वोक्तार्थे उपष्टम्भकतया "समासे खलु भिन्नैव" इति मूलग्रन्थप्रदर्शनमसङ्गतमेव। किञ्च स्वोपवर्णिताशयस्य मूलकाराभिमतत्वप्रदर्शनमप्यसङ्गतम्। 'जहत्स्वार्थाजहत्स्वार्थे' इति ग्रन्थेन अजहत्स्वार्थावृत्तिपक्षे पूर्वोत्तरपदयोरर्थवत्त्वात्पूर्वपदार्थप्रधानोऽव्ययीभाव इत्यादिलक्षणकथनं युज्यत इति पूर्वपक्षे समासे समुदायशक्तेरभ्युपगमेन पदानामानर्थक्यान्न तदुक्तिः सम्भवतीत्याशयेन तत्समाधानाय "समासे खलु" इति ग्रन्थस्य प्रवृत्तत्वात्। तदुपदर्शिताशयकत्वे अत्रापि पक्षे पूर्वोत्तरपदयोरर्थवत्त्वात्त"वस्थायाः सूपपादतया पूर्वपक्षस्यैव सिद्ध्यापत्त्या अस्यानुत्तरत्वापत्तिः स्पष्टैव। किञ्च "जहत्स्वार्था तु तत्रैव" इत्यादिवृद्धोक्तौ तुशब्दैवशब्दौ भिन्नक्रमौ। यत्र तु समुदायशक्तिः अवयवार्थविरोधिनी तत्र जहत्स्वार्थैव। अन्यत्र तु उभयमपीति तदर्थः। सूचितश्चायमर्थो वृद्धोक्तेः "अक्षौहिणीरथन्तरादिपदे तु जहत्स्वार्थैव" इति समर्थसूत्रस्थोद्योतग्रन्थेन। "रूढिः समुदायशक्तिः यत्रावयवार्थविरोधिनी तत्रैव सा, यथा रथन्तरशालिपर्णीगौरखरादाविति समर्थसूत्रस्थशेखरग्रन्थः वृत्तिविचार प्रकरणस्थमञ्जूषा च भूषणकारमतनिराकारणप्रसङ्गेन यथाश्रुताभिप्रायेण। अत एव राजपुरुषादिवृत्तावपि जहत्स्वार्थाविचारपरसमर्थसूत्रस्थभाष्यसङ्गतिः। अन्यथा तत्र समुदायशक्तेरवयवशक्त्यविरुद्धतया तत्र तदुक्तरीत्या तदप्रसक्त्या तदसङ्गतिः स्पष्टैव। किञ्च अवयवानामनर्थकत्वमिति पक्षस्य मूलकाराभिमतत्वादेव "पर्यवस्यच्छाब्दबोध" इत्यादिना वृत्तिघटकपदघटितवाक्यदृष्टार्थविषयकशक्तिग्रहीयलाघवगौरवमादाय तत्पुरुषकर्मधारयबहुव्रीहीणां बलाबलविचारकरणं मूलकृतः सङ्गच्छते। अन्यथा पदानामर्थवत्त्वे तावत्पर्यन्तानुधावनस्य वैफल्यापत्तिरेव। एतेन निरुक्तव्यपेक्षैव सामर्थ्ये मूलकृदभिमतमित्यर्थे इदमपि

प्रमाणम्। अन्यथा जहत्स्वार्थावृत्तिपक्षे पदानामानर्थक्या त्प्रत्येकपदवृत्त्या अर्थोपस्थितेरसम्भवेन क्व तन्मूलकशक्तिग्रह इति तस्यान्तरङ्गत्वकथनमसङ्गतमेव स्यादिति - पर्यवस्यच्छाब्दबोधेति कारिकाग्रन्थव्याख्यानावसरे तदुक्तिरपि वक्ष्यमाणा परास्ता। वृत्तिघटकपदार्थविषयक-शक्तिग्रहस्यानवेक्षणाच्चेति दिक्।

वृत्तावेकार्थीभावस्वीकारे फलमाह [अन्यथेति] वृत्तावेकार्थीभावानभ्युपगम इत्यर्थः। विग्रहवाक्य इव = विग्रहवाक्यसदृशवाक्य इव। राज्ञः पुरुष इति स्वतन्त्रवाक्य इवेत्यर्थः।

अजहदिति। न जहति पदानि स्वार्थं यस्यां साऽजहत्स्वार्था। अयमभिप्रायः - राजपुरुषादिसमासादौ नातिरिक्ता शक्तिः, कल्पकाभावात् क्लृप्तराजादिपदादेवार्थोप-स्थितिसम्भवे तत्कल्पनस्य गौरवपराहतत्वाच्च। क्लृप्तशक्तित्यागोऽप्यप्रामाणिकः कल्प्येत। तथा चाऽऽकाङ्क्षादिवशात्क्लृप्तशक्त्यैव विशिष्टार्थबोधः। अयमेव व्यपेक्षा पक्षो मतान्तरत्वेन भाष्यकारैरुक्तः। न चात्र मते समासे ऋद्धस्येति विशेषणान्वयापत्तिः। "सविशेषणानां वृत्तिर्न, वृत्तस्य वा विशेषणयोगो न" इति वार्त्तिकात्। तथा चैतन्मतवादिनां पूर्वोत्तरपदार्थसत्त्वात्पूर्वपदार्थप्रधान इत्यादि व्यवस्था सूपपादेति भावः।

प्रसङ्गाद्वृत्तिभेदमपि निरूपयति - ते पुनरिति। द्वे अपि वृत्ती त्रिविधे वाच्यत्रैविध्यात्। वाच्यमेवाऽऽह - भेद इत्यादि। भेदोऽन्योऽन्यभावः। तथा च राजपुरुष इत्यादावराजकीयभिन्न इति बोधः। अस्यावाच्यत्वे च राजपुरुषः सुन्दर इतिवद्राजपुरषो देवदत्तस्य चेत्यपि स्यात्। वाच्यत्वे तद्विरोधान्नैवं प्रयोग इति भावः।

राजसम्बन्धवानित्येव शाब्दभानं, भेदस्तूत्तरकालमुपतिष्ठत इत्याशयेनाऽऽह - संसर्ग इति।

विनिगमनाविरहमस्वामिकेऽपि राजपुरुष इत्यादि प्रयोगापत्तिं च मनसि कृत्वोभयं वाच्यमित्याह - उभयं वेति। तथा चाराजकीयभिन्नो राजसम्बन्धवांश्चायमिति बोधः।। ३ १/२।। (३० १/२)

इदानीमजहत्स्वार्थावृत्तिपक्षमुपपादयति [न जहतीति] - पूर्ववद्बहुवचनमिदम्। यत्तु जहत्स्वार्थावृत्तिपक्षस्य भाष्यानुसारेणान्यर्थे वोपपादनात् "परस्परव्यपेक्षां सामर्थ्यमेके" इत्येकीय-मताश्रिता ननु सृत्याह - "अयं भाव इति" इति दर्पणकाराः। तन्न। जहत्स्वार्थावृत्तेर्व्यपेक्षापक्षो न

पृथग्भूतः किन्तु तद्रूप एवेति मूलाशयस्यानुपदमेव निरूपतितत्वात्। एवमेवोत्तरत्रापि बोध्यम्। अतिरिक्ता = अवयवशक्त्यतिरिक्ता। [कल्पकाभावादिति]। समर्थसूत्रे व्यपेक्षारूपमेव सामर्थ्यमाश्रीयत इति न तस्याप्यतिरिक्तशक्तिकल्पकत्वमिति भावः। राजपुरुषपदादर्थोपस्थितिरेव तत्कल्पिकेत्यत आह [क्लृप्तेति]। तत्कल्पनस्य = समुदायशक्तिक्लृपनस्य। ननु समुदायशक्तिपक्षे प्रत्येकपदशक्तिकल्पनाया एवाभावात्क गौरवमत आह [क्लृप्तशक्तीति]। वृत्तेः प्राक् वाक्ये क्लृप्ता या पदशक्तिस्तत्त्यागः। अपिना अक्लृप्तसमुदायशक्तिस्वीकारस्य ग्रहणम्। ननु राजपुरुष इत्यादाववयवशक्त्या पदार्थोपस्थितावपि अन्वयः कस्यार्थ इत्यत आह [तथाचेति]। अयं भावः - राज्ञः पुरुष इत्यादौ परस्परसाकाङ्क्षयो राजपुरुषयोः सम्बन्धस्य राजादिपदोत्तरविभक्तिर्वाचिका। राजपुरुषादिवृत्तौ तु अवयवशक्त्योपस्थितयो राजपुरुषयोः परस्पराकाङ्क्षयो : सम्बन्धः राजा सुन्दर इत्यादौ विशेष्यविशेषणभाववत्समुदायशक्यः, परन्त्वयं न विशिष्टैकोपस्थितिनियामकः। उपस्थितयोरर्थयोराकाङ्क्षानन्तरमेव तत्प्रतीतेरिति पूर्वमताद्वैलक्षण्यम्। तत्रहि परस्परसंसृष्टार्थोपस्थितिरेव, न पृथगुपस्थितिः। अजहत्स्वार्थापक्षे "उपस्थितयोरवयवार्थयोः संसर्गे इदं शक्तमित्याकारकः शक्तिग्रहः। सम्बन्धस्य समुदायशक्यत्वादेव तस्य प्रातिपदिकत्वसिद्धिः। उक्तं च "सह सुपा" इति सूत्रे कौस्तुभे "अजहत्स्वार्थतायां तूभयोरपि विशिष्टार्थता" इति। नच विभक्त्यर्थमद्वारीकृत्य नामार्थयोर्भेदेनान्वयस्याव्युत्पन्नतया कथं समासे राजपुरुषपदार्थयोरन्वय इति वाच्यम्। व्युत्पत्तीनां सामासातिरिक्तविषयकत्वाभ्युपगमात्। समासे अन्यथैव व्युत्पत्तिस्वीकाराच्चेति। मतान्तरत्वेन = परस्परव्यपेक्षां सामर्थ्यमेके इत्यनेन। भाष्यकारैर्मतान्तरत्वेन = परस्परव्यपेक्षां सामर्थ्यमेके इत्यनेन। भाष्यकारैर्मतान्तरत्वेनोक्तः व्यपेक्षापक्षः, अयमेव = अजहत्स्वार्थापक्ष एव, नातिरिक्त इत्यक्षरार्थः। समर्थसूत्रादेतत्पक्षलाभप्रकारऽपि भाष्ये प्रदर्शितः। तत्र हि "संप्रेक्षितार्थः समर्थः। सम्बद्धार्थः समर्थः, कः पुनरिह सम्बध्नातीत्यर्थः? व्यतिषङ्गः। सम्बद्ध इत्युच्यते। यो रज्ज्वा अयसा वा कीलेन वा व्यतिषक्तो भवति। नावश्यं बध्नातिर्व्यतिषङ्ग एव वर्तते। किं तर्हि ? अहानावपि वर्तते। तद्यथा - सम्बद्धाविमौ दम्यावित्युच्यते। यावन्योन्यं न जहीतः। अथवा भवति चैवंजातीयकेषु बध्नातिर्वर्तते। तद्यथा - अस्ति नो गर्गैः सम्बन्धः, अस्ति नो वत्सैः सम्बन्ध इति" इत्युक्तम्। भाष्ये - अहानिः = परस्परं विना शाब्दबोधाजनकत्वम्।

[विशेषणान्वयापत्तिरिति]। नच जहत्स्वार्थायामिव अजहत्स्वार्थायामपि भेदसंसर्गयोर्वाच्यत्वस्य वक्ष्यमाणत्वात् तद्विरोधादेव अत्रापि पक्षे विशेषणान्वयाप्रसक्त्या नेयमापत्तिर्युक्तेति वाच्यम्। अजहत्स्वार्थायां

पदार्थयोः पृथगुपस्थित्यन्तरमेवाकाङ्क्षावशेन विशिष्टबोधोत्पत्त्या, विशिष्टबोधाविदूरप्राक्क्षणस्थित-पदार्थोपरिस्थितिमादाय विशेषणान्वयापत्तिरित्याशयात्। नच सम्बन्धिनि लक्षणायां राज्ञः पदार्थैकदेशत्वान्न विशेषणान्वय इति वक्ष्यमाणत्वान्नेयमपात्तिर्युक्तेति वाच्यम्। तद्ग्रन्थस्य उत्तरपदे लक्षणयाऽभीष्टार्थ-बोधोपपत्त्या न विशिष्टे शक्तिरिति नैयायिकमतानुसारेण प्रवृत्ततया, अस्य ग्रन्थस्य अवयवशक्त्या पदार्थानामुपस्थितावाकाङ्क्षावशेन विशिष्टार्थबोधोऽपपत्तिरिति भाष्योदाहृतव्यपेक्षावादिनां मतानुसारेण प्रवृत्ततया च वैयाकारणमते लक्षणाया अभावेन च निरुक्तरीत्या राज्ञः पदर्थैकदेशत्वाभावेन आपत्तेः सुदृढत्वात्। अत एवात्र पक्षे "सविशेषणानाम्" इति भाष्योक्तमेव समाधानमाह। नैयायिकमतोपपादनावसर एव पदार्थैकदेशत्वान्न विशेषणान्वय इति वक्ष्यति। एतेन - "अन्वयापत्तिरिति - यथाश्रुताभिप्रायेण। सम्बन्धिलक्षणायामापत्तेरभावस्य वक्ष्यमाणत्वात्" इति दर्पणोक्तमपास्तम्।

[सविशेषणानामिति]। विकल्पसमासविषयकमिदम्। नित्यसविषयकमाह - [वृत्तस्य वा विशेषणयोगो नेति] [वार्त्तिकादिति]। नचैवं राजपुरुषः सुन्दर इत्यत्रापि वृत्त्यनापत्तिरिति वाच्यम्। "उपमितं व्याघ्रादिभिः" इति सूत्रे सामान्याप्रयोगग्रहणेन प्रधानस्य सापेक्षस्यापि समास इति ज्ञापनेनादोषात्। स्पष्टं चेदम् "उपमितं व्याघ्रादिभिः सामान्याप्रयोगे" इति सूत्रे भाष्ये। उपात्तविशेषणविजातीयविशेषणयोगः प्रधानस्येति तदाशयः। अत एव राज्ञः पुरुषो भार्यायाश्चेतिवत्, राजपुरुषो भार्यायाश्चेति न प्रयोगः। वस्तुतस्तु साधारणधर्मवत्त्वेन परिच्छेद्यमेवोपमेयत्वमित्युपमेयस्य नित्यसापेक्षत्वेन, नित्यसापेक्षे देवदत्तस्य गुरुकुलमित्यादाविव प्राप्तवृत्तिवारणाय सामान्याप्रयोगग्रहणं चरितार्थं, ज्ञापकपरं भाष्यं त्वेकदेश्युक्तिः। स्पष्टं चेदं तत्रैवोद्द्योते। प्रधानस्य सापेक्षस्य वृत्तिस्तु प्रधान्यादेव अनेकेनोपकारकेणोपकार्यत्वाविरोधात्सिद्धा। स्पष्टं चेदं प्रकृतसूत्रे समर्थसूत्रे च कैयट इति बोध्यम्।

नन्वत्र पक्षद्वयेऽपि राजपुरुष इत्यादौ पुरुषांशस्य प्रधान्यसत्त्वाद्राजपुरुषः सुन्दर इतिवद्राजपुरुषो भार्यायाश्चेत्यपि स्यादित्याशङ्कापनोदनाय "ते पुनः" इति मूलमवतारयति - [प्रसङ्गादिति]। [द्वे अपि वृत्ती इति]। ननु "सामर्थ्यं नाम भेदः संसर्गो वा - अपर आह - भेदसंसर्गौ सामर्थ्यम्" इति जहत्स्वार्थावृत्तिमुपक्रम्य भेदादीनां वाच्यत्वोक्त्या अजहस्त्वार्थावृत्युपपादनावसरे तदनुक्त्या च भेदादीनां वाच्यत्वोक्त्याऽजहत्स्वार्थावृत्त्युपपादनावसरे तदनुक्त्या च भेदादीनां वाच्यत्वं जहत्स्वार्थायामेवेति भाष्यतो लाभेन अजहत्स्वार्थाया भेदादिवाच्यत्रैविध्यात्तिविधत्वप्रतिपादनमसङ्गतमिति चेदत्राहुः, "जहदप्यसौ स्वार्थं नात्यन्ताय जहाति" - "अन्वयाद्विशेषणं भवति" - इति ग्रन्थभागावेव

जहत्स्वार्थावृत्त्युपपादनपरौ, नतु "सामर्थ्यं नाम भेदः संसर्गो वा" इत्ययमपि। किन्तु स सामर्थ्यस्वरूपप्रतिपादनपरः। अत एव "समर्थाधिकारोऽयं वृत्तौ क्रियते" इति भाष्यप्रतीकमुपादाय "यदि च वृत्तौ भदेसंसर्गौ न स्यातां तदा सामर्थ्यमेव न स्यात्। तदात्मकत्वात्सामर्थ्यस्य" इति कैयटेनोक्तम्। अत एव व्यपेक्षा सामर्थ्यमिति भाष्यकारीयव्यहारः सङ्गच्छते। जहत्स्वार्थायामेव भेदादीनां वाच्यत्वमित्युपगमे तदसङ्गतिः स्पष्टैव। "अथवा समर्थाधिकरोऽयं क्रियते" इति भाष्यस्याशय एवमेव भूषणेऽपि प्रतिपादितः। किञ्च भूषणे वाक्यमात्रे भेदादित्रितयसद्भावात् भेदः संसर्ग इति मूलमसङ्गतमिति आक्षिप्य वृत्तौ समर्थाधिकारोऽयं क्रियत इति आहत्य वृत्तावेव भेदादीनां प्रतिपादनान्न दोष इत्युक्तम्। "कः पुनर्भेदः संसर्गो वा। इह राज्ञ इत्युक्ते सर्वं स्वं प्रसक्तम्। पुरुष इत्युक्ते सर्वः स्वामी प्रसक्तः। इहेदानीं राजपुरुषमानयेत्युक्ते राजा पुरुषं निवर्तयति अन्येभ्यः स्वामिभ्यः। पुरुषोऽपि राजानमन्येभ्यः स्वेभ्यः। एवमुभयस्मिन्नुभयतो व्यवच्छिन्ने यदि स्वार्थं जहाति कामं जहातु। न जातुचित्पुरुषमात्रस्यानयनं भविष्यति" इति तदुत्तरभाष्यं तु जहत्स्वार्थायां भेदादीनां समन्वयप्रतिपादन-परमिति न तद्विरोधः। अथवेति पदप्रयोगेऽपि राजपुरुषादितिः पुरुषादिमात्रस्याऽऽनयनापत्ति-वारणोपायान्तरप्रतिपादनायेति सुधियो विभावयन्तु। भेदशब्दस्य विशेषेऽपि प्रयोगदर्शनादाह [भेदोऽन्योन्याभाव इति]। तथा च = भेदस्य वाच्यत्वे च। [इति बोध इति]। इत्यर्थको बोधस्य राजसम्बन्धिभेदप्रकारकतया राजसम्बन्धिभिन्न इत्याकारकबोधं प्रत्येव प्रतिबन्धकतया इतरसम्बन्ध-बोधं प्रत्यप्रतिबन्धकतया राजपुरुषो देवदत्तस्य चेत्यादिप्रयोगापत्तिस्तदवस्थैवेति शङ्का परास्ता। अस्य = भेदस्य, अवाच्यत्वे च = अवाच्यत्वे तु। [विरोधादिति] पुरषे राजभिन्नसम्बन्धित्व सत्त्वादिति भावः। प्रयोगः = राजपुरुषो देवदत्तस्य चेति प्रयोगः। [इत्यपि स्यादिति]। पुरषांशस्य प्राधान्यसत्त्वादिति भावः।

भेदः सामर्थ्यमिति पक्षं व्याख्याय संसर्गः सामर्थ्यमिति पक्षमाह। [राजसम्बन्धवानित्येवेति]। एवेन भेदस्य शाब्दत्वव्यवच्छेदः। नन्वेवं पुर्वोक्तदोषापत्तिरत आह [भेदस्त्विति] [उपतिष्ठत इति]। स्वत्वसमानाधिकरणो राजभिन्नस्वामिकभेदः संसर्गव्याप्यतया अनुमीयत इति भावः। एवं पूर्वमते वृत्त्युपस्थाप्यराजसम्बन्धवद्व्यक्तिगतराजसम्बन्धो राजभिन्नस्वामिकभेदव्याप्यतया अनुमीयत इति बोध्यम्। [विनिगमनाविरहमिति]। उक्तरीत्योभयोः समनियतत्वेन विनिगमनाविरह इति भावः। [प्रयोगापत्तिं चेति]। अस्वामिकेऽपि राजभिन्नस्वामिकभेदस्य सत्त्वात्तदापत्तिरिति भावः। उभयं = भेदः संसर्गश्च।। ३०।। ३१।।

व्यपेक्षावादस्यैवं युक्तिभाष्यविरुद्धत्वात्तन्मूलकः पूर्वपदार्थप्रधान इत्याद्युत्सर्गोऽप्ययुक्तः। किं तु रेखागवयन्यायेनोत्सर्गोऽपि परम्परयैव बोधक इत्याशयेन समाधत्ते -

समासे खलु भिन्नैव शक्तिः पङ्कजशब्दवत्।।४।। (३१)

बहूनां वृत्तिधर्माणां वचनैरेव साधने।

स्यान्महद्गौरवं तस्मादेकार्थीभाव आश्रितः।।५।। (३२)

समास इति वृत्तिमात्रोपलक्षणम्। "समर्थः पदविधिः" इत्यत्र पदमुद्दिश्य यो विधीयते समासादिः स समर्थः, विग्रहवाक्याभिधाने शक्तः सन् साधुरिति सूत्रार्थस्य भाष्याल्लाभात्। पदोद्देश्यकविधित्वं च कृत्तद्धितसमासैकशेषनाद्यन्तधातुरूपासु पञ्चस्वपि वृत्तिष्वस्त्येव।

एवं पक्षद्वयस्यापि सूत्रतो लाभसम्भवेऽपि एकार्थीभावपक्षस्यैव मुनितात्पर्यविषयत्वेन उक्तव्यवस्था असम्भविन्येवेत्याशयेन "समासे खलु" इति मूलमवतारयति। [व्यपेक्षावादस्येति]। यत्तु "अव्यवहितोक्तविधया वर्णितस्येति शेषः। उक्ताजहत्स्वार्थापक्षस्य तु निर्दुष्टत्वमेवेति भावः" इति दर्पणकाराः। तत्तु अजहत्स्वार्थाव्यपेक्षयोर्भेदमभिप्रेत्य। वस्तुतः प्रकृतग्रन्थकर्तृमते तयोर्भेदो नास्त्येव। किन्त्वेकरूपत्वमेवेति चिन्त्यमिदम्। [एवं युक्तीति] उक्त - वक्ष्यमाणेत्यर्थः। [भाष्येति] - "अथैतस्मिन् व्यपेक्षायां सामर्थ्ये योऽसावेकार्थीभाव कृतो विशेषः स वक्तव्योः" इति भाष्यदूषितत्वादित्यर्थः। वृत्तावेकार्थीभावानभ्युपगमे वाक्य इव वृत्तावुपसर्जनपदार्थे विशेषणान्वयादीनां प्रसङ्गात्तदभावो वचनेन प्रतिपाद्यः। एकार्थीभावे तु न किंचिद्वचनेन प्रतिपाद्यम्। एवं च तत्तद्वचनकरणरूपगौरवग्रस्तत्वाद्व्यपेक्षापक्षो नाश्रयणीय इति तद्भाष्यार्थः।

दर्पणकारास्तु - "तत्र नानाकारकान्निघातयुष्मदस्मदादेशप्रतिषैधः - इति भाष्यदूषितत्वादित्यर्थ इति व्याचख्युः। तन्न। तद्भाष्यस्य पक्षद्वयेऽपि दूषणप्रदर्शनपरत्वात्, पूर्वपक्ष्युक्तेश्च। तथाहि - ननु एकार्थीभावकृतविशेषस्य व्यपेक्षावादे वक्तव्यत्ववत्, एकार्थीभाववादेऽपि निघातयुष्मदस्मदाद्यादेश-विषयैकार्थीभावानभ्युपगमेन समर्थपरिभाषाया अनुपस्थित्या "अयं दण्डो हरानेन" इत्यादिभिन्नवाक्येऽपि "तिङतिङः" ८-१-२८ इति निघातापत्तिरिति तत्प्रतिषेधो वाच्यः। व्यपेक्षावादे तु न दोषः। वाक्येऽपि

समर्थपरिभाषोपस्थित्या भिन्नवाक्ये सामर्थ्याभावान्निघाताप्राप्तेः। एवम् "ओदनं पच तव भविष्यति" इत्यादावपि युष्मदस्मादाद्यादेशापत्तिरेकार्थीभाववाद इति तत्प्रतिषेधो वक्तव्यस्तत्पक्षे। व्यपेक्षावादे तु असामर्थ्यात्तत्प्राप्तिरेव नेति न तत्प्रतिषेधो वक्तव्यः। एवं "राज्ञो गौश्चाश्वश्च पुरुषश्च" इत्यर्थे राज्ञो गवाश्वपुरुषा इत्यादौ राज्ञो गवा, गोश्चाश्वपुरुषभ्यामेकार्थीभावस्य वक्तुं शक्यतया युगपत् षष्ठीतत्पुरुषद्वन्द्वसमासौ प्राप्नुतः। तथा च स्वरद्वयप्रसङ्गः। अतस्तत्प्रतिषेधो वक्तव्य एकार्थीभाववादे। व्यपेक्षावादे तु राज्ञस्त्रिभिरेव व्यपेक्षा न गवेति वक्तुं शक्यत्वान्न दोषः। तथा च तत्तद्वचनकरणरूपगौरवस्य पक्षद्वयसाधारणतया व्यपेक्षा वादपरित्यागेन एकार्थीभावस्वीकारे किं विनिगमकमिति पूर्वपक्षे, व्यपेक्षावादेऽपि 'अयं दण्डो हरानेन' इत्यत्र अनेनेति पदेन दण्डस्य हरणे करणत्वेन निर्देशात् दण्डस्य हरतेश्च व्यपेक्षासत्त्वान्निघातापत्तिः। अत एव 'इदं सर्पिः' पिबानेन घृतमित्यादौ "इसुसोस्सामर्थ्ये" ८-३-४४ इति षत्वसिद्धिः। ओदनं पच तव भविष्यतीत्यत्रापि भाविनः स्वस्वामिभावस्य प्रतिपादनात् व्यपेक्षासद्भावाद्युष्मदस्मदाद्यादेशापत्तिः। गवाश्वपुरुषा इत्यादावपि समुदायेन व्यपेक्षायामवयवातिरिक्तस्यावयवानालिङ्गितस्य निरूपयितुमशक्यतया अवयवैरपि व्यपेक्षासत्त्वात्स्वरद्वयापत्तिः। अतो व्यपेक्षावादेऽपि तत्तत्प्रतिषेधवचनमावश्यकमेव। अत एव द्वेषपरिहाराय उभयैरपि "समर्थतराणां वा" "समानवाक्ये निघातयुष्मदस्मदादेशाः" "एक तिङ् वाक्यम्" इत्याश्रयणीयमेव। पंर तु विशेषणाद्यन्वयवारणाय व्यपेक्षावादे तत्तद्वचनकरणप्रयुक्तं गौरवमतिरिच्यते। एकार्थीभावे तु न कश्चिद्दोषलेश इति स एव युक्त इति तद्भाष्यप्रघट्टकार्थः। वार्त्तिके तत्रेत्यस्य पक्षद्वयेऽपीत्यर्थः। तत्र चेति पाठे तत्र = एकार्थीभावे, चाद्व्यपेक्षायामित्यर्थः। तत्रैतस्मिन् व्यपेक्षासामर्थ्ये चेत्यर्थः। अत एव "एवं व्यपेक्षापक्षे दूषणमभिधाय इदानीं सर्वथा ये दोषास्तानाह" इति "तत्र नानाकारकादिति" भाष्यमवतारितं कैयटेन। सर्वथेत्यस्य पक्षद्वयेऽपीत्यर्थः। स्पष्टं चैतत्सर्वमुद्द्योते। एवं च पक्षद्वयेऽपि दूषणप्रदर्शनपरपूर्वपक्षभाष्यस्य सिद्धान्ते व्यपेक्षावादमात्रदूषणपरतया प्रदर्शनं दर्पणकाराणामनुचितमाकरग्रन्थानवलोकनमूलकं चेति सुधियो विभावयन्तु।

न्यूनतां परिहरति [समास इति]। ननु "व्यपेक्षायां सामर्थ्ये परिभाषायां च सत्यां यावान् व्याकरणे पदगन्धः स सर्वः सङ्गृहीतः। समासस्त्वेकोऽसङ्गृहीतः। एकार्थीभावसामर्थ्ये अधिकारे च सति समास एकः सङ्गृहीतः। अन्योऽसङ्गृहीतः" इति समर्थसूत्रस्थभाष्यात्समास एव एकार्थीभावलाभात्

समासे खल्विति मूलं यथा श्रुतमेवास्तु। किमुपलक्षणपरतया व्याख्यानेनेत्यत आह [समर्थः पदविधिरिति]। सूत्रे पदविधिरित्यत्र विपूर्वाद्धाञः कर्मणि किप्रत्ययः। पदानां विधिरित शेषषष्ठ्यन्तेन समासः। पदानां सतां यत्कार्यं विधीयत इत्यर्थः। यदि तु भावसाधनो विधिशब्द आश्रीयेत विधानं विधिरिति, तदा पदानां विधिरिति कृद्योगलक्षणकर्मषष्ठ्यन्तेन समासा त्पदानामसतां निष्पादनं पदविधिरित्यर्थलाभेन सामासतद्धितसुब्धातुवृत्तयो न सङ्गृह्येरन्। तत्र हि पदानां सतां समासादिकार्यं विधीयते, नतु पदत्वम्। तदेतदभिप्रेत्याह [पदमद्दिश्य यो विधीयते समासादिरिति] समर्थशब्दार्थमाह [विग्रहवाक्यार्थाभिधाने शक्त इति]। विशेषेण गृह्यते = ज्ञायतेऽतेन वृत्त्यर्थ इति विग्रहः, तादृशं च तद्वाक्यं चेति विशेषणसमासः। यद्वा विशेषेण ग्रहणं विग्रहः, तदर्थं वाक्यं विग्रहवाक्यमित्यश्वघासादिवत्षष्ठीसमासः। समर्थशब्दः शक्तपरः। तत्रैव समर्थशब्दस्य रूढत्वात्। स्वकार्यनिष्पादनक्षमो हि लोके समर्थ इत्युच्यते। शब्दानां स्वकार्यं चार्थप्रतिपादनरूपम्। तेषां यत्किञ्चिदर्थप्रतिपादकत्वस्याव्यभिचरिततया सूत्रे समर्थग्रहणं प्रत्यासत्त्या विग्रहवाक्यार्थाभिधानशक्तपरमिति भावः। इदं च "समर्थः शक्तः विग्रहवाक्यार्थाभिधाने यः शक्तः स समर्थो वेदितव्यः" इति वृत्तिकारोपदर्शिताद्यव्याख्यानमाश्रित्य। वस्तुतस्त्विदमयुक्तम्। तादृशसामर्थ्यस्य प्रयोगतोऽनुसर्तव्यत्वात्। लक्षणैकचक्षुष्काणां तस्याशक्यत्वात्। "इयं वृत्तिरस्य वाक्यस्यार्थाभिधानसमर्था। नान्यस्य" इत्यस्य सूत्राक्षरैरलाभाच्च। अतः समर्थशब्दो निरुक्तरीत्या न रूढः। किन्तु सङ्गतश्चासावर्थश्च समर्थ इति योगेन एकीभूतार्थबोधकशब्दाश्रितपरः। किञ्च तदुपदर्शितार्थो न भाष्यारूढः। अत एवारुचेर्वृत्तिकारोऽपि "यद्वा समर्थानां पदानां (सम्बद्धार्थानां) संसृष्टार्थानाम्" इति पक्षान्तरमनुससार। स्पष्टञ्चेदं हरदत्तग्रन्थे। समासमात्रे एकार्थीभावाभ्युपगमे समर्थः समास इत्येव सिद्धे पदविधिग्रहणवैयर्थ्यापत्त्या तत्सामर्थ्याद्वृत्तिमात्रे एकार्थीभाव आश्रीयते। समास एकः सङ्गृहीत इति भाष्ये समासपदं वृत्तिमात्रोपलक्षणमिति कैयटादौ स्पष्टतया न तद्विरोधः।

तदेतदभिप्रेत्याह [पदोद्देश्यकविधित्वं चेति]। [कृदिति]। कृदन्तेत्यर्थः। समुदायस्यैव वृत्त्याश्रयत्वात्। यथा कुम्भकारः, पाचकः, पाकः, लिडित्यादौ। अत्र समर्थपरिभाषोपस्थित्या समर्थादेव अणादीनां विधानेन महान्तं कुम्भं करोतीत्यादौ न वृत्तिः। यद्यपि साक्षात्पदोद्देश्यके समासतद्धितादावेव समर्थपरिभाषा प्रवर्तते। नतु कर्मण्यणित्यादौ। अत्रहि यः साक्षादुद्देश्यो धातुः न स पदम्। किञ्च धातोरण् भवति कर्म चोपपदसंज्ञमिति कर्मण्यणिति सूत्रस्यार्थासन्नियोगशिष्टन्यायेन तत्र सति प्रत्यय इति न तदुद्देश्यकः प्रत्ययविधिः। उपपदसंज्ञायाः पदोद्देश्यकत्वेऽपि तत्रैकार्थीभावयोग्यस्य द्वितीयस्याभावान्न तत्प्रवृत्तिः।

तथापि उपपदमिति महासंज्ञाकरणमुपपदसंज्ञासूत्रे 'तत्र' ग्रहणं च प्रत्ययस्य पदाश्रयत्वे सति समर्थपरिभाषाप्रवृत्त्यर्थमेवेति यथाकथंचित्पदसम्बन्धिविधेस्तत्र ग्रहणान्न दोषः। एवं रीत्या कर्मण्यणित्यादिना विहितानां पदविधित्वात्तसूत्रानुवृत्तधातुपदसम्बन्धस्य "ण्वुल्तृचौ" "भावे, क्विप्च" इत्यादीनामपि सत्त्वात्समर्थसूत्रे पदविधिशब्देन पदविधिसहचरितस्यापि ग्रहणात्तत्रापि समर्थसूत्रप्रवृत्तिर्निराबाधा। पाचक इत्यादावेकार्थीभावाङ्गीकारे च भाष्ये पाचक इत्यादीनां क्रियाकारकभावसम्बन्धप्रवृत्तिनिमित्तक-व्यवहार एव मानम्। न च तत्र तदभ्युपगमे फलाभावः, व्यापारान्वयविवक्षायाम् "आदिः पचति" इतिवत्, "आदिः पाचकः" इति वृत्त्यभावस्यैव फलत्वात्। फलविशेषणानां तु एकदेशेऽपि फलेऽन्वयो भवत्येव। "पूजनात्पूजितमनुदात्तम्" इति सूत्रे भाष्ये दारुणाध्यापक इत्यत्र समस्ताध्यापकपदार्थैकदेशे अध्यापनरूपे फले दारुणपदार्थान्वयस्वीकारात्। लिडित्यादौ क्विबन्ते तु अलौकिकप्रक्रियावाक्ये कल्पितैकार्थीभावस्य लुप्तप्रत्यये आरोपान्न दोषः। स्पष्टं चेदमर्थवत्सूत्रे शब्दरत्ने इति दिक्।

[तद्धितेति] तद्धितशब्दस्तद्घटितसमुदायपरः। तेन बह्वकचोर्नदोषः। "कुत्सिते" इति सूत्रभाष्योक्तन्यायेन सुबन्तात्तद्धितोत्पत्त्या तस्य पदविधित्वं स्पष्टमेव। अत एव सुन्दरस्योपगोरपत्यमुपगोरपत्यं देवदत्तस्य चेत्यादौ न तद्धितवृत्तिः। वङ्गा इत्यादौ तु लिडित्यादाविव एकार्थीभावारोपो बोध्यः।

अत्रेदं बोध्यम् - पृथगर्थानामेकोपस्थितिजनकत्वमेकार्थीभावः। स च 'राजपुरुषः' 'पीताम्बरः' इत्यादिषु समासेषु सुयोज एव। औपगवः, पाचकः, पुत्रकाम्यति, इत्यादिषु पृथगर्थानां पदानाभावात् एकार्थीभावः समन्वेतुमशक्यः। किञ्च औपगवादौ समुदाय एव एकार्थीभावव्यवहारः प्रामाणिकानाम्। स च तद्धितादिप्रत्ययः समर्थादुत्पाद्य इति भाष्यकारः। अतः तस्यापत्यम्, ण्वुल्तृचौ, "सुप आत्मनः क्यच्" इत्यादिशास्त्रबलात् वृत्तिविषयेषु 'उपगु + अस्' 'पच्' 'पुत्र + अम्' इत्यादिषु भाविप्रत्ययार्थान्तर्भावेण एकार्थीभाव आरोप्यते। ततस्समर्थात् प्रत्ययोत्पत्त्यनन्तरं प्रकृतिनिष्ठैकार्थीभावः प्रकृतिप्रत्ययसमुदाये विश्राम्यति। तेन विशिष्टस्य अर्थवत्त्वं सिद्ध्यति। नच 'उपगु + अस्' इत्यस्याद्वितीयतया समर्थपरिभाषाप्रवृत्तिः कथम्? इति वाच्यम्। लक्ष्ये द्वितीयस्याभावेप्येकार्थीभावयोग्ययोः षष्ठीसमर्थ - प्रत्ययोः "तस्यापत्यम्" "अत इञ्" इत्यादिसूत्रेषूपात्तत्वेन समर्थपरिभाषा-प्रवृत्तेर्निष्प्रत्यूहत्वात्। एकार्थीभावयोग्ये सर्वत्रापि प्रत्ययविधावेष एवार्थो ग्राह्यः। स्पष्टं चेदमष्टमे भाष्यप्रदीपोद्द्योते।

[समासेति] अस्य पदविधित्वं स्पष्टमेव। अब्राह्मण इत्यादौ नञ् स्वविशिष्टस्य आरोपितब्राह्मणत्वविशिष्टार्थकत्वतात्पर्यनिर्णायकः। इदमेव नञो द्योतकत्वं नाम। एतावतैवात्रैकार्थीभावव्यवहारोऽपि। विशिष्टानुपूर्व्या द्योत्यार्थान्तर्भावेण शक्तावच्छेदकत्वाद्विशिष्टस्यार्थवत्त्वम्। समासविधायकशास्त्रबलादत्र एवमेव कल्पनोचिता। स्पष्टं चेदं नञ्सूत्रे शब्दरत्ने।

[एकशेषेति] एकशेषे 'द्वन्द्व' इत्यनुवृत्त्या तद्विषये एकशेषविधानात्तत्राप्येकार्थीभाव आवश्यकः। चार्थान्तर्भावेण बोधस्तत्फलं बोध्यम्। [सनाद्यन्तधात्विति] यथा चिकीर्षति, पुत्रीयति, पुत्रकाम्यति, विद्वायते, कृष्णति, गमयति माणवकं, मुण्डयति इत्यादौ। "सुप आत्मनः क्यच्" इत्यनेन सुबन्तात्प्रत्ययविधानात्तस्य पदविधित्वं स्पष्टमेव। अत एव 'महान्तं' पुत्रमात्मन इच्छति' इत्यादौ न वृत्तिः। एतदर्थमेव सूत्रे सुब्ग्रहणं कृतम्। नच विनापि सुब्ग्रहणं "कर्मण" इत्यनेनैव पदविधित्वं लभ्यतामिति वाच्यम्। यत्र हि पदस्यासाधारणं रूपमाश्रीयते तस्यैव पदविधित्वात्। कर्मत्वस्य "धातोः कर्मणि" इत्यादावपदेऽपि दर्शनात्। "कर्मण्यण्" इत्यादौ तु महांसज्ञाकरणान्न दोष इत्युक्तमेव। स्पष्टं चेदं प्रकृतसूत्रे कौस्तुभे। एवं चास्य पदविधित्वात् "धातोः कर्मणः समानकर्तृकादिच्छायां वा" इति सूत्रस्थेच्छापदसम्बन्धस्य "सुप आत्मनः क्यच्" इति सूत्रे सत्त्वात्पदविधिसहचरितत्वात्सनोऽपि पदविधित्वात्समर्थपरिभाषाप्रवृत्तिः सिद्धा। अत एव गन्तुं पिपठिषतीत्यादयो न प्रयोगाः। सन्नन्ते एकार्थीभावसत्त्वे सन्सूत्रस्थं भाष्यं मानम्। तत्र हि "वावचनानर्थक्यं नित्यत्वात्सनः। इह द्वौ पक्षौ वृत्तिपक्षः अवृत्तिपक्षश्च" इत्युक्तम्। "वृत्तेरेकार्थीभावविषयत्वात्, व्यपेक्षाविषयत्वाच्च वाक्यस्य, भिन्नार्थत्वाद्बाध्यबाधकभावाप्रसङ्गादिति भावः" इति कैयटः।

एवं णिजन्तेऽप्येकार्थीभावसत्त्वे "हेतुमतिच" इति सूत्रस्थं भाष्यं मानम्। तत्र हि इह व्याकरणस्य सूत्रं करोतीति वाक्ये षष्ठी, व्याकरणं सूत्रयतीत्यत्र द्वितीया। केनैतदेवं भवति? योऽसौ सूत्रव्याकरणयोरभिसम्बन्धः, स उत्पन्ने प्रत्यये निवर्तते। अस्ति च करोतेर्व्याकरणेन सामर्थ्यम्" इत्युक्तम्। "मुण्डमिश्र" इति सूत्रे "केषांचिद्ग्रहणं सापेक्षेभ्योऽपि णिजर्थम्" इत्याकरोऽप्यत्र मानम्। एवं प्रातिपदिकप्रकृतिकणिचोऽपि समर्थादेवोत्पत्तिः। अत एव महान्तं पटयतीत्यादयो न प्रयोगाः। एवं प्रातिपदिकप्रकृतिकक्विबन्तेऽप्येकार्थीभावोऽभ्युपेयः। "कर्तुः क्यङ् सलोपश्च" इति क्यङः पदविधित्वात्, "सर्वप्रातिपदिकेभ्यः" इत्यस्य तत्सूत्रे उपसङ्ख्यातत्वेन पदविधिसहचरितत्वेन, तस्य पदविधित्वे न समर्थपरिभाषा प्रवर्तत एव। अत एव सुन्दरः कृष्णतीत्यादयो न प्रयोगा इति बोध्यम्।

शक्त्यस्वीकर्तृणां व्यपेक्षावादिनां मते दूषणं शक्तिसाधकमेवेत्याशयेनाऽऽह - पङ्कजशब्दवदिति। पङ्कजनिकर्तुरपि योगादेवोपस्थितौ तत्रापि समुदायशक्तिर्न सिद्ध्येत्। न च पद्मत्वरूपेणोपस्थितये सा कल्प्यत इति वाच्यम्। चित्रग्वादिपदेऽपि स्वामित्वेनोपस्थितये तत्कल्पनावश्यकत्वात्। लक्षणयैव तथोपस्थितिरिति चेत्पङ्कजपदेऽपि सा सुवचा। एवं रथकारपदेऽपि। तथा च "वर्षासु रथकारोऽग्निमादधीत" इत्यत्रापि विना लक्षणां क्लृप्त योगेन ब्राह्मणादिविषयतयैवोपत्तौ तत्कल्पनां कृत्वा जातिविशेषस्याधिकारित्वं प्रकल्प्यापूर्वविद्याकल्पनमप्ययुक्तं स्यादिति भावः।

साधकान्तरमाह - बहूनामिति। वृत्तेर्धर्मो विशेषणलिङ्गसङ्ख्याद्ययोगादस्तेषां वचनैः साधने गौरवमित्यर्थः। अयं भावः - विशिष्टशक्त्यस्वीकारे 'राज्ञः पुरुषः' इत्यत्रेव 'राजपुरुष' इत्यत्रापि स्याद्विशेषणाद्यन्वयः, राज पदेन स्वतन्त्रोपस्थितिसत्त्वात्। विभाषावचनं च समासनियमवारणाय कार्यम्।

ननु "सविशेषणानाम्" इति वचनान्न विशेषणाद्यन्वयः। विभाषावचनं च कृतमेवेत्याशङ्कां समाधत्ते - वचनैरेवेति। न्यायसिद्धमेव सूत्रम्। व्यपेक्षाविवक्षायां वाक्यस्यैकार्थीभावे समासस्येति स्वभावत एव प्रयोगनियमसम्भवात्। सविशेषणेत्यपि विशिष्टशक्तौ राज्ञः पादर्थैकदेशतयान्वयासम्भवान्न्यायसिद्धमिति भावः। अत एव व्यपेक्षापक्षमु'ाव्य "अथैतस्मिन् व्यपेक्षायां सामर्थ्ये योऽसावेकार्थीभावकृतो विशेषः स वक्तव्यः" इति भाष्यकारेण दूषणमप्युक्तम्।। ।।५।। (३२)

ननु पङ्कजशब्दस्यापि समासतया तत्रापि परमते समुदायशक्तिर्नेष्यत एवेति दृष्टान्ततया शक्तिरहिततदुपादानमसङ्गतमित्याशङ्कायामाह [शक्त्यस्वीकर्तृणामिति]। अस्य वृत्तावित्यादिः। एवं चेदं वक्ष्यमाणविधया समुदायशक्तिसाधकमेव। समासे विशिष्टशक्त्यस्वीकारे पङ्कजपदेऽपि समुदायशक्तिर्न सिद्ध्येत्। इष्टापत्तिस्तु कर्तुमशक्या। सकलतान्त्रिकसिद्धान्तविरोधात्। तत्परिपालनलोभेन तत्र तत्स्वीकारे सर्वत्रापि वृत्तौ सा सेत्स्यति। अर्धजरतीयत्वस्यान्याय्यत्वादिति भावः। यत्तु "जहत्स्वार्थावृत्तिपक्षे पङ्कजशब्दस्य पूर्वोक्तरीत्या दृष्टान्तत्वासम्भवेन अन्यथा मूलमवतारयति - विशिष्टशक्त्य-स्वीकर्तृणामितीति दर्पणकाराः। तन्न। निरुक्तास्मद्रीत्या जहत्स्वर्थावृत्तावपि पङ्कजशब्दस्य दृष्टान्तत्वसम्भवात्। योगादेव = अवयवशक्तेरेव। पङ्कजमित्यत्र नामार्थस्यापि पङ्कस्य

जनिधात्वर्थोत्पत्तावधिकरणता-निरूपकत्वेन, तथाविधोत्पत्तेर्डप्रत्ययार्थकर्तर्याश्रयतया चान्वयः। एवं च पङ्काधिकरणकोत्पत्त्याश्रय इति बोधोपपत्तौ तत्रापि समुदायशक्ति र्व्यर्थेति भावः। [पद्मत्वरूपेणोपस्थितय इति] अवयवशक्त्या पङ्कजनिकर्तृत्वेन रूपेणोपस्थितावपि पद्मत्वेन रूपेणोपस्थितये समुदायशक्तिरावश्यकी। पद्मत्वावच्छिन्ने शक्तिं विना तेन रूपेणोपस्थितिर्न सम्भवति तद्धर्मप्रकारकोपस्थितिं प्रति तद्धर्मावच्छिन्नवृत्तिशक्तिज्ञानस्य हेतुत्वादिति भावः। सा = समुदायशक्तिः। तदितिपाठे एकार्थीभावरूपसामर्थ्यमित्यर्थः। [स्वामित्वेनोपस्थितय इति] चित्रगुरित्यादितश्चित्राभिन्नगोसम्बन्धीत्यवयवशक्त्योपस्थितावपि स्वमित्वेन रूपेणान्यपदार्थस्योपस्थितये समुदायशक्तिरावश्यकीति भावः।

एवं लक्षणां विनोपपादितं भाष्योदाहृतानां व्यपेक्षावादिनां मतं दूषयित्वा, लक्षणयैव अभीष्टार्थबोधोपपत्तौ न समुदायशक्तिः कल्प्येति वादिनां नैयायिकानां मतं दूषयति [लक्षणयैवेति] तथोपस्थितिः = स्वामित्वेनोपस्थितिः। [सेति] पद्मत्वेन पद्मे लक्षणेत्यर्थः। ननु पङ्कजपदे रूढिः पद्मत्वभानाय वा, कुमुदाद्यभानाय वा? आद्येऽपि भानं स्मृतिः? अनुभूतिर्वा? नाद्यः। पद्मत्वस्य पङ्कजपदाशक्यत्वेऽपि अदृष्टादिना पद्मत्वाधिकरण एव नियतप्रयोगरूपसम्बन्धयुक्तेन अशक्तेनैव पदेन वा उद्बुद्धसंस्कारादेव तत्स्मृतेः। नान्त्यः। उक्तरीत्या स्मृतं पद्ममादाय व्यक्तिवचनन्यायेन पङ्कजनिधातुडप्रत्ययरूपैरवयवैः पङ्कजनिकर्तृपद्ममित्याद्यनुभवसम्भवात्। नचैवं गामानयैत्यादौ गोशब्दस्य गवि शक्तिर्न स्यादिति वाच्यम्। तथात्वे गोशब्दप्रयोगवैयर्थ्यात्। इह तु पङ्कजपदमुक्तकर्तृत्वस्योपस्थित्यर्थम्। नचैवमदृष्टादिनेति पक्षे पङ्कजपदप्रयोगकाले कदाचिददृष्टादिना कुमुदस्यापि स्मृतौ तदादाय अवयवैः पङ्कजनिकर्तृकुमुदमित्यनुभूयेतेति वाच्यम्। तत्काले पद्मत्वस्यैव नियतस्मृतिदर्शनेन फलबलेन पद्मसंस्कारस्यैवोद्बोधकल्पनात्। न च प्रयोगसम्बन्धपक्षे पङ्कजपदेन प्रयोगविषये पद्मत्ववत्त"पकस्य कुसुमत्वादेस्त"प्यस्य पुण्डरीकत्वादेश्च सत्त्वात्तयोरपि स्मृतिः स्यादिति वाच्यम्। तयोः प्रयोगेण सह समनियमाभावात्। नापि कुमुदाद्यभानार्थमिति द्वितीयः पक्षः। पङ्कजं कुमुदमानयेत्यादौ कुमुदादेरपि भानात्। किञ्च पद्मप्रतीत्यर्थं तत्प्रत्यायकयोग एव कल्प्यः, नतु पद्मत्वे रूढिः। एवं च पङ्कजपदं पद्मत्वे यौगिकमेवेति प्राभाकररीत्या पङ्कजशब्दवदिति दृष्टान्तासिद्धिरत आह [एवं रथकारपदेऽपीति] तत्रापि रूढ्यस्वीकारे रथकाराधिकरणसिद्धान्तासिद्ध्या तद्विरोधापत्तिरित्याह - [तथाचेति] [अयुक्तं स्यादिति] अयमभिप्रायः - रथकाराधिकरणे हि "वर्षासु रथकारोऽग्रिमादधीत" इति श्रुतौ रथकारपदेन

"योगाद्रूढिर्बलीयसी" इति न्यायेन "रथकारस्तु माहिष्यात्करण्यां यस्य सम्भवः" इति लक्षितप्रतिलोमजातिविशेषस्य ग्रहणं, नतु रथनिर्माणकर्तृद्विजस्य यौगिकार्थस्य रथकारस्य च श्रुत्यन्यथानुपपत्त्या वेदाध्ययनाभावेऽपि आधानमात्रोपयोगिवेदाध्ययनं कल्प्यत इति सिद्धान्तितम्। तदस्मिन् पक्षेऽसङ्गतं स्यात्। विनैव शास्त्रसंकोचं विधेश्चारितार्थ्यात् - इति। [इति भाव इति] एवं च अवयवशक्त्यैवोपपत्तौ न समुदाये शक्तिरिति प्राचीनवैयाकरणोक्तरीत्या न निर्वाहः, नवा नैयायिकरीत्या लक्षणयेति सर्वत्र समासादौ समुदायशक्तिः स्वीकार्येति भावः।

ननु पङ्कजपदे अवयवज्ञानशून्यस्य बोधादवयवशक्तिज्ञानशून्यस्यापि बोधाच्च न लक्षणया निर्वाहः। नह्येवं चित्रग्वादिपदे। अतस्तत्रावयवशक्तिज्ञानादेव बोधाल्लक्षणा सुवचा। नापि रथकाराधिकरणस्थसिद्धान्तविरोधः। यौगिकार्थरथकरणनिमित्ते वर्षासु यागविधानस्य सङ्करस्य विशिष्टाधानापेक्षया लघुत्वेऽपि "ऋभूणां त्वा देवानाम्" इति मन्त्रवर्णादृभसौधन्वनपर्याय-प्रतिलोमजातरथकारस्यैव तादृशयागाधिकारावगत्या लाघवानादरेण रूढ्यर्थे तत्र विशिष्टाधानकल्पनात्। अपूर्वविद्याकल्पनारूपं गौरवं तु फलमुखत्वान्न दोषाय। राजपुरुषादौ समुदायशक्तिकल्पकं प्रमाणं नोपलभ्यत इत्यतो बहूनामिति मूलमवतारयति [साधकान्तरमिति]। [विशेषणेति] राजपुरुष इत्यादौ राज्ञि ऋद्धस्येत्यादिविशेषणायोगः, तत्रैव राज्ञः राज्ञोः राज्ञामिति सङ्ख्याविशेषाप्रतीतिः, कुक्कुटाण्डं, मृगक्षीरमित्यादौ पूर्वपदार्थे स्त्रीत्वस्याप्रतीतिश्च। आदिपदेन पदानां यथेष्टमभिसम्बन्धाभावादयो भाष्योक्ता ग्राह्याः। एनमेवार्थं प्रकटयति [अयं भाव इति] विशेषणान्वये हेतुमाह [राजपदेनेति]। [स्वतन्त्रेति] स्वातन्त्र्यञ्च पदार्थान्तरान्वययोग्यत्वम्। [समासनियमवारणायेति] वाक्यप्रयोगस्यावश्यकप्राप्तावारभ्यमाणः समासो "येन नाप्राप्ति" न्यायेन तं बाधते। अतस्तन्मते वाक्यसमासयोरुभयोरपि साधुत्वबोधनस्य विभाषावचनमपूर्वं कर्तव्यं स्यादिति भावः। [प्रयोगनियमसम्भावादिति] विशिष्टशक्तिवादे एकार्थीभावे समासः, व्यपेक्षायां वाक्यमिति भिन्नविषयत्वाद्वाक्यसमासयोर्बाध्यबाधकभावाभावेनेति रीत्या सिद्धार्थानुवादकमेव विभाषावचनं, नापूर्वमिति लाघवमिति भावः।

सविशेषणानामित्यपि नापूर्वमस्माकं मते इत्याह [सविशेषणेत्यपीति] [पदार्थैकदेशतयेति] 'गमनं न स्पन्दः' इत्यादेः प्रामाण्यवारणाय पदार्थान्तरनिष्ठप्रकारतानिरूपितपदार्थनिष्ठविशेष्यताशालि-शाब्दबुद्धित्वावच्छिन्नं प्रति विशेष्यतया पदजन्यपदार्थोपस्थितेः कारणत्वमिति कार्यकारणभावस्यावश्यस्वीकार्यतया तन्मूलिकायाः "पदार्थः पदार्थेन" इति व्युत्पत्तेर्जागरूकतया

विशिष्टशक्तिवादे राज्ञः पदार्थैकदेशतया न तत्र शोभनाद्यन्वय इति भावः। यत्तु "अन्वयासम्भवादिति। वृत्तौ ह्युपसर्जनपदेन प्रधानार्थाभिधायिना भाव्यम्। स्वस्वविशेषणाकाङ्क्षायां च प्राधान्यमिति कथमेकदा प्राधान्यमेकार्थीभावश्च स्यात्, युगपद्गुणप्रधानभावविरोधादिति भाव इति दर्पणकाराः। तत्तु वृत्तौ पदानामर्थवत्त्वम्। विशेषणपदेऽर्थस्य त्यागो नाम पदार्थान्तरस्य विशेषणतयाऽन्वययोग्य-स्वनिष्ठविशेष्यत्वांशत्यागरूप एवति मञ्जूषाकृन्मते शोभते। वृत्तौ सर्वेषामपि पदानामनर्थकत्वमेवेति प्रकृतग्रन्थकृन्मते नैव युज्यत इति बोध्यम्। सविशेषणेत्यपि न्यायसिद्धमेवेति योजना। [अत एवेति] व्यपेक्षावादस्य मुन्यसम्मतत्वादेवेत्यर्थः। वक्तव्यः = तत्तद्वचनेन प्रतिपाद्यः। तथा च तत्तद्वचनकरणप्रयुक्तगौरवग्रस्तत्वाद्व्यपेक्षावादो न युक्त इति भाष्याशयः। यत्तु दूषणमप्ययुक्तमिति - "अस्य नानाकारकान्निघातयुष्मदस्मदादेशप्रतिषेध इत्यादिनेति शेषः" इति दर्पणकाराः। तन्न। "अथैतस्मिन् व्यपेक्षायां सामर्थ्ये" इति भाष्यमेव व्यपेक्षावाददूषकं, नानाकारकादिति भाष्यं तु पक्षद्वयेऽपि दूषणप्रदर्शकं पूर्वपक्षेणेति कैयटादावुक्ततया तद्विरोधात्।

लक्षणां विनोपपादितभाष्योदाहृतव्यपेक्षावाददूषणपरतया "वचनैः" इत्यादिमूलयोजना प्रदर्शिता। व्यपेक्षावादिनैयायिकमतदूषणपरतया तु मूलयोजना "समासे विशिष्टशक्त्यभावे प्रातिपदिकत्वं न स्यात्" इत्यादिना मूल एव प्रदर्शयिष्यते।। ।।३२।।

तथा धवखदिरौ, निष्कौशाम्बिः, गोरथो, घृतघटो, गुडधानाः, केशचूडः, सुवर्णालङ्कारो, द्विदशः, सप्तपर्ण इत्यादावितरेतरयोग - अतिक्रान्त - युक्त - पूर्ण - मिश्र - सङ्गत - विकार - सुच्प्रत्ययलोपो वीप्सा द्यर्थो वाचनिको वाच्य इत्यतिगौरवं स्यादिति दूषणा न्तरमाह -

चकारादिनिषेधोऽथ बहुव्युत्पत्तिभञ्जनम्।
कर्तव्यं ते न्यायसिद्धं त्वस्माकं तदिति स्थितिः।।६।। (३३)

आदिना घनश्यामः, हंसगमनः इत्यादाविवादीनां च सङ्ग्रहः। दूषणान्तरमाह - बहुव्युत्पत्तिभञ्जनमिति। अयमाशयः - चित्रगुरित्यत्र स्वाम्यादिप्रतीतिरनुभवसिद्धा। न च तत्र लक्षणा। प्राप्तोदको ग्राम इत्यादौ तादसम्भवात्। प्राप्तिकर्त्रभिन्नमुदकमित्यादिबोधोत्तरं तत्सम्बन्धिग्रामलक्षणायामप्युदककर्तृकप्राप्तिकर्म ग्राम इत्यर्थालाभात्। प्राप्तेतिक्तप्रत्ययस्यैव कर्त्रर्थकस्य कर्मणि लक्षणेति चेत्? तर्हि

समानाधिकरणप्रातिपदिकार्थयोरभेदान्वयव्युत्पत्तेरुदकाभिन्नप्राप्तिकर्मेति स्यात्। अन्यथा समानाधिकरणप्रातिपदिकार्थयोरभेदान्वयव्युत्पत्तिभङ्गापत्तेः. प्राप्तेर्धात्वर्थतया कर्तृतासम्बन्धे भेदेनोदकस्य तत्रान्वयासम्भवाच्च। अन्यथा 'देवदत्तः पच्यते' इत्यतः कर्तृतासम्बन्धेन देवदत्तस्यान्वयसम्भवेनान्वयानापत्तेः। अथोदकाभिन्नकर्तृका प्राप्तिरिति बोधोत्तरं तत्सम्बन्धिग्रामो लक्ष्यत इति चेन्न। प्राप्तेर्धात्वर्थतया क्तार्थकर्तरि विशेष्यताया असम्भवात्। "प्रकृतिप्रत्यययोः प्रत्ययार्थप्राधान्यम्" इति व्युत्पत्तेः। प्राप्तपदे प्राप्तेर्विशेष्यत्वे तस्या एव नामार्थत्वेनोदकेन सममभेदान्वयापत्तेश्च। एवमूढरथः, उपहृतपशुः, उद्धृतौदना, बहुपाचिकेत्यादावपि द्रष्टव्यम्। अत्र हि रथकर्मकवहनकर्ता, पशुकर्मकोपहरणोद्देश्यः, ओदनकर्मकोद्धरणावधिः, बहुपाककर्त्रधिकरणमिति बोधाभ्युपगमात्। अतिरिक्तवृत्तिपक्षे च घटत्वविशिष्टे घटपदस्येवोदककर्तृकप्राप्तिकर्मत्वविशिष्टे प्राप्तोदक इत्यादिसमुदायशक्त्यैव निर्वाह इति भावः।। ।।६।। (३३)

मूले चकारादिनिषेध इत्येकं वाक्यम्। आदिशब्दो भिन्नक्रमः, निषेधो नाम लोपः। चकारलोपादिर्वक्तव्य इति तदर्थः। अयं भावः = धवखदिरावित्यादिद्वन्द्वस्य विग्रहभूते धवश्च खदिरश्चेति वाक्ये चकारदर्शनाद्वृत्तावपि चार्थस्य भानमस्तीत्यवश्यमभ्युपेयम्। अन्यथा तस्य विग्रहत्वं न स्यात्। सामाससमानार्थकवाक्यस्यैव विग्रहत्वात्। एवं च चार्थभानाय वृत्तावपि चशब्दप्रयोगे धवखदिराविति रूपं न सिद्ध्यतीति तदर्थं "द्वन्द्वे चलोपः" इति वचनमपूर्वं कर्तव्यं व्यपेक्षावादे। विशिष्टशक्तिवादे तु विशिष्टस्य विशिष्टे शक्तिरिति न तत्प्रयोगापत्तिरिति न दोषः। एवमन्यत्राप्यूह्यम् - इति।

[दूषणान्तरमिति]। अस्य लक्षणावादिमते इति शेषः। लक्षणशङ्कां सूचयन्नाह मूले [अथेति]। समासे लक्षणयैव निर्वाह इति चेदित्यर्थः। अस्य तर्हीति शेषः। ते = लक्षणावादिनस्तव। बहुव्युत्पत्तिभञ्जनं = "समानाधिकरणप्रातिपदिकार्थयोरभेदेनान्वयः" "नामार्थधात्वर्थयोर्भेदेन साक्षादन्वयोऽव्युत्पन्नः"। "प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थस्य प्राधान्य् इत्यादिव्युत्पत्तिभञ्जनं कर्तव्यम्। अस्माकं + तु = विशिष्टशक्तिवादिनां तु, तत् = व्युत्पत्तिरक्षणम्। न्यायसिद्धम् = अर्थसिद्धम्। इति स्थितिः = इति वस्तुस्थितिः। व्युत्पत्तिभङ्गमाविष्कर्तुमाह [अयं भाव इति]। [अनुभवसिद्धेति]। सर्वानुभवसिद्धेत्यर्थः। अस्य "सा च विशिष्टशक्तिमन्तरा न सिद्ध्यति" इति शेषः। तत्र = स्वामिनि। लक्षणा = उत्तरपदे लक्षणा। [तदसम्भवादिति] = अभीष्टार्थनिर्वाहलक्षणाऽसम्भवादित्यर्थः। तमेवासम्भवं विशदयति

[प्राप्तिकर्त्रिति] प्रपूर्णकाप्लृधात्वर्थः प्राप्तिः। क्तप्रत्ययार्थः कर्ता। तस्योदके अभेदेनान्वयः। तदुत्तरं तत्सम्बन्धिनि लक्षणास्वीकारेऽपि प्राप्तिकर्त्रभिनोनदकसम्बन्धीत्येव बोधः स्यात्। न तु उदककर्तृक-प्राप्तिकर्म ग्राम इत्यभीष्टार्थबोधः इति भावः। ननु उदकस्य प्राप्तौ धात्वर्थे कर्तृत्वेनान्वये, क्तप्रत्ययस्य कर्मणि लक्षणास्वीकारे चोदककर्तृकप्राप्तिकर्मेति अभीष्टार्थबोधोपपत्त्या न विशिष्टे शक्तिरित्याशयेन शङ्कते [प्राप्तेति]। [कर्त्रर्थकस्येति] "गत्यर्थाकर्मक" इत्यादिना कर्तरि तद्विधानादिति भावः। [प्राप्तिकर्मेति स्यादिति]। न त्वभीष्टार्थलाभ इति भावः। अन्यथा = कर्मलाक्षणिक-क्तान्तार्थोदकपदार्थयोरभेदान्वयानभ्युपगमे। ननु समान विभक्तिकत्वं सामानाधिकरण्यं नाभेदान्वयबोधे नियामकं, राज्ञः सुतस्य धनमित्यादौ व्यभिचारात्। किञ्च तद्व्युत्पत्तौ सामानाधिकरण्यस्यैकार्था-भिधायित्वस्यैव निवेशेन नेदं तद्विषयः। किञ्चोदके प्राप्तिकर्माभेदस्य बाधितत्वान्न तदापत्तिः। अतो निरुक्तरीत्योदकस्य प्राप्तावन्वयोपगमान्न दोष इत्यत आह [प्राप्तेरिति]। तत्र = धात्वर्थे प्राप्तौ। [अन्वयासम्भवाच्चेति]। नामार्थधात्वर्थयोर्भेदेन साक्षादन्वयस्याव्युत्पन्नत्वादिति भावः। नामार्थ-धात्वर्थयोरिति व्युत्पत्तेरावश्यकतां दर्शयति [अन्यथेति]। तद्व्युत्पत्यनभ्युपगम इत्यर्थः। [देवदत्तः पच्यत इति] तण्डुलाभिन्नकर्मवृत्तिविक्लित्त्यनुकूलो देवदत्तकर्तृको व्यापार इति बोधे देवदत्तेन पच्यते तण्डुल इत्यस्य साधुत्वम्। निरुक्तव्युत्पत्त्यनङ्गीकारे देवदत्तस्य नामार्थस्य धात्वर्थे पाके कर्तृतासम्बन्धेनान्वयात् "देवदत्तः पच्यते तण्डुलः" इति प्रयोगस्यापि साधुत्वापत्तिर्दोषः। तथाच तादृशबोधे "देवदत्तः पच्यते" इत्यनन्वितार्थकमित्यभियुक्ता अभिप्रयन्ति। तच्च निरुक्तव्युत्पत्तिस्वीकार उपपद्यते। तदेतदाह [अनन्वयात्तेरिति] [अथेति] उदकस्य प्रत्ययार्थे कर्तरि, तस्य च धात्वर्थे प्राप्तावाधेयतया अन्वयानन्तरं तत्सम्बन्धिनि लणक्षाश्रयणादष्टार्थलाभ इति भावः। ननु "प्रकृत्यर्थ-प्रत्ययार्थयोः प्रत्ययार्थस्य प्राधान्यम्" इति व्युत्पत्तेः पचतीत्यादौ परित्यक्ततया वृत्तावपि अतिरिक्तशक्त्यकल्पनालाघवानुरोधेन तत्त्यागात्प्राप्तेर्विशेष्यत्वे न किंचिद्बाधकमत आह [प्राप्तपद इति] - प्राप्तपदजन्यबोधे इत्यर्थः। तस्या एव = प्राप्तेरेव। नामार्थत्वेन = नामपदजन्यरतीतिविशेष्यत्वेन। ननु प्राप्त्यभेदस्योदके बाधितत्वान्नाभेदान्वयापत्तिरत आह [चेति]। तस्य उदकशब्दाप्रकृतिकतया तस्य उदकपदार्थान्वितस्वार्थबोधकत्वानुपपत्तिः। प्रत्ययानां स्वप्रकृत्यर्थान्वितस्वर्थबोधकत्व-व्युत्पत्तेरिति तदर्थः। विशिष्टशक्त्यभ्युपगमे तु न कस्या अपि व्युत्पत्तेर्विरोध इत्याह [अतिरिक्तेति]। भिन्नोस्थितिविषयाणां व्युत्पत्तीनामेकोपस्थितिनियामकसमुदायशक्त्याश्रयसमासादिवृत्तावप्रवृत्तेर्नास्माकं मते तत्तद्व्युत्पत्तिभङ्ग इति भावः।।।।३३।।

साधकान्तरमाह -

अषष्ठ्यर्थबहुव्रीहौ व्युत्पत्त्यन्तरकल्पना।
क्लृप्तत्यागश्चास्ति तव तत्किं शक्तिं न कल्पयेः।।७।। (३४)

अयं भावः - चित्रगुरित्यादिषु चित्रगोस्वाम्यादिप्रतीतिर्न विनाशक्तिमुपपद्यते। न च तत्र लक्षणा। सा हि न चित्रपदे। चित्रस्वामी गौरिति बोधापत्तेः। नापि गोपदे। गोः स्वामी चित्र इत्यन्वयबोधापत्तेः। चित्रादिमात्रस्य लक्ष्यैकदेशत्वेन तत्र गवादेरन्वयायोगात्। नच चित्राभिन्ना गौरिति शक्त्युपस्थाप्ययोरन्वयबोधोत्तरं तादृशगोस्वामी गोपदेन लक्ष्यत इति वाच्यम्। गोपदस्य चित्रपदस्य वा विनिगमनाविरहेण लक्षकत्वासम्भवात्। न च गोपदे साक्षात्सम्बन्ध एव विनिगमक इति वाच्यम्। एवमपि प्राप्तोदकः, कृतविश्व इत्याद्यषष्ठ्यर्थबहुव्रीहौ विनिगमकाप्राप्तेः। यौगिकानां कर्त्रर्थकतया साक्षात्सम्बन्धाविशेषात्।

न च पदद्वये लक्षणेति नैयायिकोक्तं युक्तम्। बोधावृत्तिप्रसङ्गात्। न च परस्परं तात्पर्यग्राहकत्वादेकस्यैवैकदा लक्षणा न द्वयोरिति न बोधावृत्तिरिति वाच्यम्। एवमपि विनिगमनाविरहतादवस्थ्येन लक्षणाया असम्भवात्। न च चरमपद एव सा, प्रत्ययार्थान्वयानुरोधात्, प्रत्ययानां सन्निहितपदार्थगतस्वार्थबोधकत्वव्युत्पत्तेरिति वाच्यम्। एवं हि बहुव्रीह्यसम्भवापत्तेः। "अनेकमन्यपदार्थे" इत्यनेनानेकसुबन्तानामन्यपदार्थ-प्रतिपादकत्वे तद्विधानात्।

किं चैवं सति घटादिपदेष्वपि चरमवर्ण एव वाचकताकल्पना स्यात्। पूर्वपूर्ववर्णानां तात्पर्यग्राहकत्वेनोपयोगसम्भवात्। एवं सति चरमवर्णमात्रश्रवणेऽर्थबोधापत्तिरिति चेदत्राप्युदकपदमात्रश्रवणादर्थप्रत्ययापत्तिस्तुल्येत्यन्यत्र विस्तरः। एवं चाषष्ठ्यर्थबहुव्रीहौ व्युत्पत्त्यन्तरकल्पना, उक्तयुक्तेः, अगत्या शक्त्यन्तरकल्पना। क्लृप्तत्यागः, क्लृप्तशक्त्योपपत्तिरिति व्युत्पत्तित्यागश्च तवास्ति, तत्किं सर्वत्र समासे शक्तिं न कल्पयेरिति वाक्यार्थः।

एवं लक्षणावादे बहुव्युत्पत्तिभङ्गप्रदर्शनाय प्राप्तोदक इत्यादौ लक्षणा दिक् प्रदर्शिता। वस्तुतः सा न युज्यत एवेति वक्तुम् "अषष्ठ्यर्थबहुव्रीहौ" इति मूलमवतारयति [साधकान्तरमिति]।

लक्षणाऽसम्भवरूपं साधकान्तरमित्यर्थः। मूले [अषष्ठ्यर्थेति]। इदं च क्रियाशब्दघटितबहुव्रीहेरुपलक्षणम्। अन्यथा कर्मादेः सम्बन्धत्वेन विवक्षायां प्राप्तमुदकं यस्येति विग्रहस्यापि सम्भवेन षष्ठ्यर्थबहुव्रीहावपि विनिगमनाविरहात्पर्युदासानर्थक्याद्यथाश्रुतेऽसङ्गत्या"ौः। तद्ध्वनयन् वक्ष्यति - "यौगिकानां कर्त्रर्थकतया साक्षात्सम्बन्धस्याविशेषात्" इति। एवं च वीरपुरुषको ग्राम इत्यादिसप्तम्यर्थबहुव्रीहौ विनिगमनाविरहेऽपि न क्षतिः। उक्तं च भूषणे "षष्ठ्यर्थबहुव्रीहौ दामोदर इत्यादौ रूढेरपि स्वीकारात्। केवलं यौगिकत्वसूचनायेदम्" इति। भूषणे अषष्ठ्यन्तेति पाठमाश्रित्यापि कारिकेयं व्याख्याता। उपरिष्टादिममंशं प्रदर्शयिष्यामः। षष्ठ्यर्थबहुव्रीहिपर्युदासे बीजं दर्शयति [अयं भाव इति]। [शक्तिमिति] समुदायशक्तिमित्यर्थः। तत्र = स्वाम्यादौ। लक्षणा किं पूर्वपदे, उतोत्तरपदे इति विकल्प्य नाद्य इत्याह [सा हि न चित्रपदे इति]। नान्त्य इत्याह [नापि गोपद इति]। ननु आद्ये चित्रापदलक्ष्य-चित्रस्वामिरूपार्थैकदेशचित्रादिना गवादेरभेदान्वयेन गवाभिन्नचित्रस्वामीति बोधलाभेन, द्वितीये गोपदलक्ष्यगोस्वामिरूपार्थैकदेशगवादिना चित्रादेरभेदेनाऽन्वयेन चित्राभिन्नगोस्वामीति बोधलाभेन च नोक्ताकारबोधापत्तिरत आह [चित्रादिमात्रस्येति]। आदिशब्देन गवादेर्ग्रहणम्। मात्रशब्देन स्वामिनो व्यवच्छेदः। [लक्ष्यैकदेशत्वेनेति]। चित्रादिपदलक्ष्यचित्रस्वाम्यादिरूपार्थैकदेशत्वेनेत्यर्थः। गवादेरित्यादिपदेन चित्रादेर्ग्रहणम्। [अन्वयायोगादिति]। "पदार्थः पदार्थेनान्वेति नतु पदार्थैकदेशेन" इति व्युत्पत्तिविरोधादिति भावः। ननु चित्रगोपदार्थयोः प्रथमतः परस्परमन्वयबोधोत्तरं गोपदे तत्स्वामिनि लक्षणायां न कश्चिद्दोष इत्याशयेन शङ्कते [न चेति]। [शक्त्युपस्थाप्ययोरन्वयबोधोत्तरमिति]। अत एव चित्रगुरित्यादौ "गोस्त्रियोः" इति ह्रस्वसिद्धिः। पूर्वपदार्थासम्बद्धार्थकगोपदस्य चित्राभिन्नगोस्वामिलक्षकतायां स न स्यात्। पूर्व पदार्थान्वितस्वार्थस्योपसर्जनतायामेव तेन ह्रस्वविधानात्। अन्यथा गौरस्तीत्यत्रापि गोपदे चित्राभिन्नगोस्वामिलक्षणायां तदापत्तेर्दुर्वारत्वात्। स्पष्टं चेदं समासप्रकरणे शब्दशक्तिप्रकाशे। गोपदे = गोपदे लक्षणास्वीकारे। [साक्षत्सम्बन्ध इति] गोपदे लक्षणास्वीकारे गोपदार्थस्य द्रव्यतया लक्ष्येण स्वामिना सम्बन्धः स्वत्वनिरूपितस्वामित्वरूपः साक्षात्सम्बन्धः। चित्रपदे तत्स्वीकारे तु तच्छक्यार्थस्य गुणरूपतया लक्ष्येण स्वामिना द्रव्यद्वारकः स्वशक्यसमवायिनिष्ठस्वत्वनिरूपितस्वामित्वरूपः सम्बन्धः परम्परासम्बन्धः। तथाच साक्षात्सम्बन्धे सम्भवति परम्परासम्बन्धस्य ग्रहीतुमशक्यतया गोपदे एव लक्षणा, न चित्रपदे इति भावः। [यौगिकानामिति] अनेन अषष्ठ्यर्थग्रहणं केवलयौगिकशब्दोपलक्षणं, दामोदर इत्यादौ षष्ठ्यर्थबहुव्रीहौ रूढेरपि स्वीकारादिति सूचयति। नैयायिकोक्तं = प्राचीननैयायिकोक्तम्। [विनिगमनाविरहेति]। प्राप्तपदं तात्पर्यग्राहकम्? उत उदकपदम्? इत्यत्र विनिगमनाविरहादित्यर्थः।

सा = लक्षणा। [पदार्थेति]। पूर्वपदार्थेत्यर्थः। तेन राज्ञः पुरुष इत्यादौ षष्ठ्यर्थस्य पुरुषे नान्वय इति बोध्यम्। [तद्विधानादिति]। प्रकृते उत्तरपदमात्रस्यैव अन्यार्थप्रतिपादकतया अन्यपदार्थे वर्तमानानेकसुबन्ताभावाद्बहुव्रीह्यनापत्तिरिति भावः। ननु एकस्य पदस्य वृत्त्या, अन्यस्य तात्पर्यग्राहकतया चान्यपदार्थप्रतीत्यनुकूलत्वेन, समुदायस्यान्यार्थप्रतिपादकत्वमविकलमिति न बहुव्रीह्यनुपपत्तिरत आह [किञ्चेति]। [घटादीति] आदिना गोस्तम्भादीनां परिग्रहः। [चरमवर्ण इति]। घट चेष्टायां, गाम्लृ गतौ, स्तम्भु रोधन इत्यादिधातुभ्यः पचाद्यजादिभिर्व्युत्पादनसत्त्वेन तदन्तर्गतप्रत्यये जातिविशेषे लक्षणया नियतबोधसम्भवेन विशिष्टशक्त्युच्छेदप्रसङ्ग इति भावः। नन्वेवं घकारादीनां पूर्वपूर्ववर्णानामनुपयोग एव। चरमवर्णादेवार्थोपस्थितिसम्भवादित्यत आह [पूर्वपूर्वेति]। एवं सति = चरमवर्णस्य वाचकत्वाभ्युपगमे सति। [अर्थबोधापत्तिरिति]। चरमवर्णमात्रस्य वाचकत्वं पूर्वपूर्ववर्णानां तात्पर्यग्राहकत्वमित्यभ्युपगमे लिट्। अहन् इत्यादौ द्योतकसुप्तिङ्समभिव्याहाराभावेऽपि वाचकात्प्रातिपदिकात् धातोश्चार्थबोधदर्शनात्प्रकृतेऽपि तात्पर्यग्राहकपूर्वपूर्ववर्णाश्रवणेऽपि वाचकचर वर्णमात्रादप्यर्थबोधापत्तिरिति भावः। अत्रापि = प्राप्तोदकादिसमासेऽपि। [तुल्येति]। किञ्चावयवानां शक्तिं लक्षणां वाऽजानतामपि बालानां समुदायव्युत्पादने बोधः सर्वानुभवसिद्धः। अत एव तेषां समुदायादर्थबोधेऽपि विना व्याकरणादिव्युत्पत्तिं पदविभागसामर्थ्याभावोऽपीत्यनुभवसिद्धम्। किञ्च "समर्थः पदविधिः" इति सूत्रतद्भाष्यादिसामान्यरूपात् "अनेकमन्यपदार्थे" "चार्थे द्वन्द्वः" इत्यादिविशेषरूपाच्च प्रमाणात् समासे समुदायशक्तिर्दुर्वारा। उक्तं च पराशरोपपुराणे -

"पाणिनीयं महाशास्त्रं पदसाधुत्वलक्षणम्।
सर्वोपकारकं ग्राह्यं कृत्स्नं, त्याज्यं न किञ्चन"।। इति।

नच साधुत्वपरिच्छेदकत्वमुक्तं शास्त्रस्य, नतु शक्तिनिर्णायकत्वमिति वाच्यम्। भवद्रीत्या शक्तत्वस्यैव साधुत्वपर्यवसानात्। तदाह [अन्यत्रेति]। भूषण इत्यर्थः। यत्तु "अन्यत्र - भूषणे इत्यर्थः। विस्तर इति। उत्तरपदलक्ष्यार्थे प्रकृत्यर्थत्वाभावेन तत्र प्रत्ययार्थानन्वयापत्तिरित्यादि" इति दर्पणकारादयः, तत्तु तदुक्ताशयस्य प्रकृतसन्दर्भे भूषणेऽदर्शनात्तद्ग्रन्थानवलोकनमूलकमेवेति बोध्यम्। मूलं योजयति [एवं चेति]। लक्षणाया वक्तुमशक्यत्वे चेत्यर्थः। व्युत्पत्त्यन्तरकल्पना = अवयवशक्त्यतिरिक्त-समुदायशक्तिकल्पना। एवं चाषष्ठ्यर्थबहुव्रीहावगत्या समुदायशक्तिस्वीकारे सर्वत्रापि वृत्तावतिरिक्तशक्तिकल्पनमेवोचितमर्धजरतीत्वस्यानुचितत्वादित्याशयेन शेषपूरणेन व्याचष्टे [सर्वत्र समास इति]। समासग्रहणं वृत्तिमात्रोपलक्षणम्।

यत्तु व्यपेक्षावादिनो नैयायिकमीमांसकादयः - न समासे शक्तिः। राजपुरुष इत्यादौ राजपदादेः सम्बन्धिलक्षणयैव राजसम्बन्ध्यभिन्नः पुरुष इति बोधोपपत्तेः।

अत एव राज्ञः पदार्थैकदेशतया न तत्र शोभनस्येत्यादिविशेषणान्वयः। न वा घनश्यामो निष्कौशाम्बिगोरथ इत्यादाविवादिप्रयोगापत्तिः, उक्तार्थतयैव क्रान्तादिपदप्रयोगासम्भवात्। न वा "विभाषा" इति सूत्रावश्यकत्वम्। लक्षणया राजसम्बन्ध्यभिन्न इति बुबोधयिषायां समासस्य, राजसम्बन्धवानिति बुबोधयिषायां विग्रहस्येत्यादिप्रयोगानियमसम्भवात्। नापि पङ्कजपदप्रतिबन्दी शक्तिसाधिका। तत्रावयशक्तिमजानतोऽपि बोधात्। न च शक्त्यग्रहे लक्षणया तेभ्यो विशिष्टार्थप्रत्ययः सम्भवति। अत एव राजादिपदशक्त्यग्रहे राजपुरुषः" "चित्रगुः" इत्यादौ न बोधः। न च चित्रगुरित्यादौ लक्षणासम्भवेऽप्यषष्ठ्यर्थबहुव्रीहौ लक्षणाया असम्भवो, बहुव्युत्पत्तिभङ्गनापत्तेरिति वाच्यम्। प्राप्तोदक इत्यादावुदकपद एव लक्षणास्वीकारात्। पूर्वपदस्य यौगिकत्वेन तल्लक्षणाया धातुप्रत्ययतदर्थज्ञानसाध्यतया विलम्बितत्वात्। प्रत्ययानां सन्निहितपदार्थगतस्वार्थबोधकत्वव्युत्पत्त्यनुरोधाच्च। घटादिपदे चातिरिक्तशक्तिः कल्प्यमाना विशिष्टे कल्प्यते, विशिष्टस्यैव सङ्केतितत्वात्। बोधकत्वस्यापि प्रत्येकं वर्णेष्वसत्त्वात्। प्रकृते चात्यन्तसन्निधानेन प्रत्ययार्थान्वयसौलभ्यायोत्तरपद एव सा कल्प्यत इति विशेषः। स्वीकृतं च घटादिपदेष्वपि चरमवर्णस्यैव वाचकत्वं मीमांसकंमन्यैरित्याहुः।

ननु समुदायशक्तिस्वीकारे उपसर्जने विशेषणान्वयाभावादीनि यानि प्रयोजनानि प्रतिपादितानि तानि सर्वाण्यपि त्वन्मत इव मन्मतेऽपि लक्षणावादे तत्तद्वचनाकरणेऽपि सिद्ध्यन्त्येव। परंतु तव विशिष्टशक्तिकल्पनागौरवमेवावशिष्यत इत्यभिप्रयतां परेषामाशयं निराकर्तुमनुवदति [यत्त्विति]। [नैयायिकेति]। पदशक्त्यैवोपपत्तौ विशिष्टशक्तिरनावश्यकी। राजपुरुष इत्यादितोऽभीष्टार्थलाभस्तु गङ्गायां घोष इत्यादावसमासेप्यवश्यस्वीकार्यया लक्षणयैव। तयैव च विशेषणाभावादिसर्वेष्टसिद्धिरिति तेषामाशयः। समर्थसूत्रे भाष्योदाहृतानां व्यपेक्षावादिनामाशयस्तु "जहत्स्वार्थाजहत्स्वार्थे" इति कारिकाव्याख्यानावसरे सविस्तरं निरूपित एव। पदैः पदार्थानामुपस्थितावाकाङ्क्षादिवशात्सम्बन्धो विशिष्टशक्य इति तन्निष्कर्षः। [शक्तिरिति]। समुदायशक्तिरित्यर्थः। ननु विशिष्टे शक्त्यस्वीकारे

राजपुरुष इत्यादितो राजपुरुषादिरूपार्थोपस्थितावपि राजसम्बन्ध्यभिन्नः पुरुष इत्यभीष्टार्थबोधालाभोऽत आह [राजपुरुष इत्यादाविति]। नचानुपपत्तिं विना कथं लक्षणेति वाच्यम्। राजाभिन्नः पुरुष इति अभेदान्वयापत्तेरेव, राजसम्बन्ध्यभिन्नः पुरुष इति बोधानुपपत्तेरेव वा तत्कल्पकत्वात्। [सम्बन्धीति]। नच सम्बन्ध एव लक्षणाऽस्त्विति वाच्यम्। समानाधिकरणनामार्थयोरभेदान्वयव्युत्पत्त्या राजसम्बन्धरूपः पुरुष इत्यन्वयबोधापत्तेः। नच राजपदलक्ष्यार्थस्य सम्बन्धस्याऽऽश्रयतासम्बन्धेन पुरुषेऽन्वयोऽस्त्विति वाच्यम्। विभक्त्यर्थमद्वारीकृत्य नामार्थयोर्भेदेनान्वयस्याव्युत्पन्नत्वात्। अत एव राजा पुरुष इत्यादौ राजपदार्थस्य तेन सम्बन्धेन पुरुषे नान्वयः। नच राजपुरुष इत्यादौ लुप्तविभक्तेः स्मरणकल्पनेन तादृशविभक्त्यर्थद्वारैवान्वयान्नोक्तव्युत्पत्तिविरोध इति वाच्यम्। अस्मृतविभक्तेरपि ततो बोधोदयात्। परे तु राजपुरुष इत्यादितत्पुरुषे न लक्षणा। पुरुषविशेष्यकस्वत्वसंसर्गकराजप्रकारकशाब्दबुद्धित्वावच्छिन्नं प्रति राजपदाव्यवहितोत्तरवर्तिपुरुषपदत्वरूपानुपूर्वीज्ञानस्य कारणताकल्पनेन राजा पुरुष इत्यादितस्तादृशान्वयबोधवारणसम्भवेन स्वत्वादिसंसर्गेण राज्ञः पुरुषादावन्वयबोधोपपत्तेः। युक्तं चैतत्। अन्यथा "दशैते राजमातङ्गास्तस्यैवैते तुरङ्गमाः" इत्यादौ तच्छब्देन राज्ञः परामर्शो न स्यात्, तत्पदेन पूर्ववाक्यस्य पदार्थस्यैव परामर्शः, नतु तादृशपदार्थतवाच्छेदकस्यापीति नियमात्। राज्ञश्च पदार्थैकदेशत्वात्। अन्यथा "अत्र शुक्लो घटोऽस्ति स न द्रव्यम्" इति स्वारसिकप्रयोगापत्तेः। तथाच लक्षणया राजपदस्य राजसम्बन्ध्यर्थकत्वे तत्पदेन राज्ञः परामर्शासिद्धिः स्पष्टैवेति वदन्ति।

वस्तुतस्तु एवं सति राजपदार्थे शोभनस्येत्यादिविशेषणान्वयापत्तिः। किञ्च राज्ञः पुरुष इत्यादावपि स्वत्वसंसर्गकबोध एवोचितः। षष्ठ्यन्तराजपदसमभिव्याहारज्ञानस्य तादृशशाब्दबोधनियामकत्वोपगमेनैव राजा पुरुष इत्यादितस्तादृशशाब्दबोधवारणसम्भवात्। नचैवं व्यास - समासवाक्यज्ञानयोः परस्परजन्यशाब्दबोधे व्यभिचारेण कारणतैवानुपपन्नेति वाच्यम्। तादृशानुपूर्वीज्ञानाव्यवहितोत्तरत्वस्यापि कार्यतावच्छेदककोटौ निवेशेन व्यभिचाराभावात्। अन्यथा त्वन्मतेऽपि राजस्वत्वं पुरुष इत्यतस्तादृशशाब्दबोधवारणाय षष्ठ्यन्तराजपदसमभिव्याहारज्ञानस्य राजस्वत्वप्रकारकशाब्दबोधहेतुतायाः कल्पनीयतया पर्यायानन्तरघटितवाक्यादपि तादृशशाब्दबोधहेतुतायाः कल्पनीयतया पर्यायानन्तरघटितवाक्यादपि तादृशशाब्दबोधोत्पत्त्या व्यभिचारस्य दुर्वारत्वादित्याद्यन्यत्र विस्तरेण प्रपञ्चितम्। अतो राजपदस्य तत्सम्बन्धिनि लक्षणास्वीकार एवोचितः। "दशैते राजमातङ्गाः" इत्यादौ तच्छब्देन शक्यार्थमात्रपरामर्श इति न दोष इत्यलम्।

[अत एवेति] राजपदस्य तत्सम्बन्धिनि लाक्षणिकत्वादेवेत्यर्थः। [विशेषणान्वय इति] "पदार्थः पदार्थेनान्वेति न पदार्थैकदेशेन" इति व्युत्पत्तेरिति भावः। एवं च सविशेषणानामिति वार्त्तिकमस्माकं मतेऽपि नापूर्वमित्याशयः। नाप्यस्माकमिवादिशब्दलोपविधानमप्यावश्यकमित्याह [नवा घनेति]। [उक्तार्थतयेति]। घनश्याम इत्यादौ घनादिशब्दे घनसदृशे लक्षणास्वीकारेण घनशब्देनैव सादृश्यस्योक्ततया "उक्तार्थानामप्रयोगः" इति न्यायेनेवादीनां प्रयोग एव न सम्भवतीति भावः। अर्धपिप्पल्यादितत्पुरुषे पूर्वपदार्थप्रधाने उत्तरपदे लक्षणा। द्वन्द्वे तु धवखदिरावित्यादौ खदिरपदस्य धवखदिरसाहित्याश्रये लक्षणेति मीमांसकाः। नैयायिकास्तु "सहवृत्तित्वरूपं साहित्यं लक्ष्यम्? उतैकक्रियान्वयित्वरूपम्। नाद्यः। गोत्वाश्वत्वे पश्येत्यादौ साहित्यशून्ययोरपि द्वन्द्वदर्शनात्। न द्वितीयः। धवे दर्शनस्य, खदिरे च्छेदनस्यान्वयतात्पर्येणापि धवखदिरौ पश्य, छिन्धीति द्वन्द्वसमासदर्शनात्। अतो न तत्र लक्षणा। नापि शक्तिः। अहिनकुलमित्यादिसमाहारद्वन्द्वेऽपि न लक्षणा। तत्राहिर्नकुलश्च बुध्यते। प्रत्येकमेकत्वान्वयः। अतो न तत्र द्विवचनादिकम्। तत्रैकवचनं साधुत्वार्थमित्यपि केचित्। नच विग्रहे चशब्दस्य प्रयोगेण वृत्तिविग्रहयोः समानार्थत्वानुरोधेन समासस्यापि तदर्थबोधकत्वस्यावश्यकतया तत्प्रतिपादनाय समासेऽपि चशब्दप्रयोगस्यावश्यंप्राप्ततया "द्वन्द्वे चलोपः" इति वचनस्यापूर्वस्य करणे गौरवमिति वाच्यम्। यत्र समस्यमानपदार्थयोस्तत्वावच्छेदकयोर्वा भेदस्तत्रैव द्वन्द्वः साधुरिति सूचनायैव विग्रहे चशब्दप्रयोगेण समासवाक्ये चशब्दप्रयोगस्यानावश्यकतया निरुक्तगौरवाभावात्। "चार्थे द्वन्द्वः" इति सूत्रमपि चार्थस्य भेदव्याप्यत्वात् भेदे द्वन्द्व इत्यभिप्रायकमेव। अत एव द्वन्द्वकर्मधारयोर्भेदसिद्धिः। कर्मधारयेऽपि नीलोत्पलमित्यादावभेदसम्बन्धेन नीलपदार्थ उत्पलपदार्थे प्रकारः। अतस्तत्र न शक्तिर्नवा लक्षणा। उपकुम्भाद्यव्ययीभावेऽपि कुम्भपदे कुम्भसम्बन्धिनि लक्षणा। तस्य चोपपदार्थसमीपेऽभेदेनान्वयः। कुम्भसम्बन्ध्यभिन्नसमीपमिति बोधः।

केचित्तु उपपदार्थः सामीप्यं, नतु समीपम्। उपशब्दस्य समीपे लक्षणास्वीकारे तु पदद्वयलक्षणापेक्षया, कुम्भपदस्यैव कुम्भसमीपे लक्षणा, उपशब्दस्तादृशलक्षणास्वीकारे तात्पर्यग्राहकः। कुम्भसमीपमिति चान्वयबोध इति वदन्ति। वस्तुतस्तु समासातिरिक्तस्थेल उपशब्दस्य क्वापि प्रयोगाभावेन तस्य समीप्यार्थकताया निश्चेतुमशक्यतया, अस्वपदविग्रहस्थलेऽपि समानार्थकपदान्तरेणैव विग्रहवाक्यस्वीकाराच्च कुम्भस्य समीपमिति समीपघटितवाक्यस्य विग्रहतया समीपपदस्य सामीप्यविशिष्टार्थकतया उपशब्दस्यापि तदर्थकताया औचित्येन कुम्भसम्बन्धिनि लक्षणास्वीकार एवोचित इति बोध्यम्। इत्थं च समासे न क्वापि शक्तिः, पदशक्त्यैव निर्वाहादिति दिक्।

विभाषासूत्रमप्यर्थसिद्धमेव। नापूर्वमित्याह [नवा विभाषेति]। [विग्रहस्येति]। विग्रहतुल्यस्येत्यर्थः। [प्रतिबन्दीति] पङ्कजपदे पद्मत्वादिविशिष्टशक्त्यभ्युपगमरूपेत्यर्थः। [शक्तिसाधिकेति] समासमात्रे समुदायशक्तिसाधिकेत्यर्थः। तत्र = पङ्कजपदे। [अवयवशक्तिमिति]। इदमुपलक्षणमवयवस्यापि। एवंच तत्रावयवज्ञानरहितस्यावयवशक्तिज्ञानरहितस्य च बोधात्तत्र लक्षणाया वक्तुमशक्यतया समुदायशक्तिराश्रीयते। न चैषा रीतिरन्यत्रेति भावः। [नचेति] नहीत्यर्थः। [शक्त्यग्रहे इति] अवयवशक्तिग्रहाभावे इत्यर्थः। [विशिष्टार्थप्रत्यय इति]। लक्षणायाः शक्तिघटकत्वादिति भावः। [अत एवेति]। तत्पदीयलक्षणाग्रहे तत्पदशक्तिज्ञानस्य कारणत्वादेवेत्यर्थः। [लक्षणासम्भवेऽपीति]। शक्यार्थस्य लक्ष्यार्थेन विद्यमानस्य साक्षात्सम्बन्धस्य उत्तरपद एव लक्षणास्वीकारे विनिगमकसत्वेन तत्र लक्षणासम्भवेऽपीति भावः। [तल्लक्षणाया इति]। पूर्वपदलक्षणाया इत्यर्थः। ननु धातुप्रत्ययतदर्थज्ञानाभावे तात्पर्यनिर्णयासम्भवेनोदकपदेऽपि तस्या असम्भव एवेत्यतो हेत्वन्तरमाह। [प्रत्ययानामिति]। पूर्वोक्तदूषणान्तरमुद्धरति [घटादिपदे चेति]। [विशेष इति]। चरमवर्णस्यात्यन्त-प्रत्ययसन्निधानेऽपि तस्य बोधकत्वाननुभवात्समुदायस्यैव वाचकत्वं कल्प्यत इति भावः। [स्वीकृतं चेति]। तथाच घटादिपदे चरमवर्णस्यैव वाचकत्वे इष्टापत्तिरित भावः। [मीमांसकम्मन्यैरिति]। मीमासकमात्मानो मन्यमानैरित्यर्थः। अनेनारुचिः सूचिता। तन्मूलंतु कोशादिविरोध इति।

अत्रोच्यते - समासे शक्त्यस्वीकारे तस्य प्रातिपदिकसंज्ञादिकं न स्यात्, अर्थवत्त्वालाभेन "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" इत्यस्याप्रवृत्तेः। न च "कृत्तद्धितसमासाश्च" इत्यत्र समासग्रहणात्सा, तस्य नियमार्थताया भाष्यसिद्धाया वैयाकरणभूषणे स्पष्टं प्रतिपादितत्वात्। समासवाक्ये शक्त्यभावेन शक्यसम्बन्धरूप-लक्षणाया अप्यसम्भवेन लाक्षणिकार्थवत्त्वस्याप्यसम्भवात्।

अथ "तिप्तस्" इत्यारभ्य "ङ्योस्सुप्" इति तिप्प्रत्याहारो भाष्यसिद्धः। तमादाय "अतिप्प्रातिपदिकम्" इत्येव सूत्र्यताम्, कृतमर्थवदादिसूत्रद्वयेन, समासग्रहणं च नियमार्थमस्तु, तथाच अतिप् - तिबन्तभिन्नं प्रातिपदिकमित्यर्थात्समासस्यापि सा स्यादिति चेत्तथाऽपि प्रत्येकं वर्णेषु संज्ञावारणायार्थवत्त्वावश्यकत्वेन समासाव्याप्तितादवस्थ्यमेव। तथा च प्रातिपदिकसंज्ञारूपं कार्यमेवार्थवत्त्वमनुमापयति धूम इव वह्निम्।

"बहूनां वृत्तिधर्माणाम्" इति मूलमवलम्ब्य समाधत्ते [अत्रोच्यत इति]। वृत्तेर्धर्माः - प्रातिपदकत्वादयः। तदनापत्तिर्लक्षणामङ्गीकुर्वतां मत इति तदर्थः। तदाह [प्रातिपदिकसंज्ञादिकमिति]। आदिना सुब्लुक्, समुदायादपरसुबुत्पत्तिः, "अनुदात्तं पद" मिति स्वरप्रवृत्तिश्च गृह्यते। [अर्थवत्त्वाभावादिति] नच स्व - स्वावयवान्यतरवृत्त्याऽर्थबोधजनकत्वरूपार्थवत्त्वमेवार्थवत्पदेन गृह्यत इति समासस्यापि तत्सिद्धिरिति वाच्यम्। गौरश्वः पुरुष इत्यादिवाक्यस्यापि स्वावयववृत्त्याऽर्थबोधजनकत्वरूपार्थवत्त्वेन प्रातिपदिकत्वापत्तेः। ननु अर्थवत्सूत्रे अर्थवत्पदेन अर्थप्रतीतिजनकज्ञानविषयशब्दत्वं गृह्यते। तच्चैकस्य पदस्य लक्षणया, अपरस्य तात्पर्यग्राहकत्वेनेति समुदायस्य निर्बाधम्। तत्र प्रत्येकं विभक्त्युत्पत्तिस्तु न, एकाज्द्विर्वचनन्यायात्। "सङ्घातस्यैकार्थ्यात्सुबभावो वर्णात्" इति वार्त्तिकाद्वेति चेत्, अत्राहुः। अवयवानां द्वित्वे समुदायो नानुगृहीतः। समुदायद्वित्वेऽवयवोऽनुगृहीत इति हि स न्यायः। नह्यत्र तन्न्यायस्य प्रवृत्तिः। समुदायात्सुबुत्पत्तौ तस्य पदत्वेऽपि तेन सुपा अवयवानां सुबन्तत्वासिद्धेः। एवं च प्रत्येकं सुबुत्पत्तिरनिवार्यैव। सङ्घातस्यैकार्थ्यादिति वार्त्तिकस्वीकारे तु सिद्धा समुदायशक्तिः। सङ्घतार्थ एवैकत्वान्वयात्सङ्घाते विभक्तिरिति तदर्थात्। समासस्याप्राप्तसंज्ञाविधायकं समासग्रहणमित्याशयेन शङ्कते। [न चेति]। सा = प्रातिपदिकसंज्ञा। नच समासग्रहणादपि समासस्य संज्ञानापत्तिस्तत्रापि अर्थवद्ग्रहणानुवृत्तेरिति वाच्यम्। न्यायनये कृत्सूत्रेऽर्थवद्ग्रहणासम्बन्धात्। तस्य = समासग्रहणस्य। [नियमार्थताया इति]। समासे शक्त्यनभ्युपगमे तु तस्य वृत्त्यार्थबोधकत्वरूपार्थवत्त्वाभावेनाप्राप्तसंज्ञाविधानाय समासग्रहणस्यावश्यकतया नियमार्थत्वव्याघातः स्पष्ट एव। ननु विधिनियमसम्भवे विधेरेव ज्यायस्त्वेन समासग्रहणं विध्यर्थमेवास्तु। मास्तु नियमार्थता तस्य। वाक्यस्यार्थवत्त्वाभावादेव नातिव्याप्तिरत आह [भाष्यसिद्धाया इति]। सूत्रतात्पर्यनिर्णायैव भाष्यकृतः प्रवृत्त्या तत्र च वाक्येऽर्थवत्त्वात् प्राप्तिपदिकत्वापत्तिमाशङ्क्य समासग्रहणस्य नियमार्थत्वमाश्रित्य परिहृतत्वेन समासग्रहणस्य नियमार्थत्व एव मुनितात्पर्यावधारणेन तद्विरुद्धकल्पना न कार्येति भावः। किञ्च कृत्सूत्रे कृत्तद्धितविषये तदन्तग्रहणार्थमर्थवद्ग्रहणानुवृत्तिरावश्यकी। नचानुवृत्तस्यार्थवद्ग्रहणस्य तदन्तत्वसिद्ध्यर्थं कृत्तद्धितयोरेवान्वयोऽस्तु। न समासेऽपि, फलाभावादिति वाच्यम्। निराकाङ्क्षतया कृतद्धितयोरेवान्वयासम्भवात्, एकपदार्थतावच्छेदकावच्छिन्न एवापरपदार्थान्वयस्य साकाङ्क्षक्षत्वात्। अन्यथा अन्यतरस्मिन्नपण्डिते एतौ देवदत्तयज्ञदत्तौ पण्डितावित्यस्य, पलाशे च्छेदनानन्वये धवखदिरपलाशांश्छिन्धीत्यादेश्च निराकाङ्क्षत्वानापत्तेः। इष्टापत्तिस्तु पतञ्जलिवचनविरुद्धा।

नचार्थवद्ग्रहणस्य समासांशेऽपि सम्बन्धे असूर्यम्पश्या इत्यादावसमर्थसमासेऽव्याप्तिस्तस्यार्थवत्त्वाभावादिति वाच्यम्। असमर्थसमासेऽपि क्रियायामुभयोः सन्निपातादेकार्थीभावस्तद्वारकोऽस्त्येवेति कैयटेनैव समाधानात्। शशश्रृङ्गादिपदे तु विशकलितप्रसिद्धं शशश्रृङ्गादिकमारोपितसम्बन्धे शक्यमतो न दोषः। किञ्च कृत्तद्धितपदयोः समासग्रहणस्य च विध्यर्थत्वे मूलकेनोपदंशमित्यादौ प्रातिपदिकत्वापत्तिः। विशिष्टस्य कृद्ग्रहणपरिभाषया कृदन्तत्वात्, अस्मन्मते तु परत्वात् सामासग्रहणकृतनियमेन वारणान्न दोषः। अतः समासग्रहणादपि न समासस्य प्रातिपदिकत्वम्। तदेतदभिप्रेत्याह। [भूषणे स्पष्टं प्रतिपादितत्वादिति]। ननु समासस्य शक्त्यार्थबोधकत्वरूपार्थवत्त्वाभावेऽपि लक्षणयार्थबोधकत्वरूपार्थवत्त्वस्य सम्बन्धरूपलक्षणायास्तत्राश्रयणेऽपि विशिष्टे शक्त्यभावेन शक्यसम्बन्धरूपलक्षणाया अपि विशिष्टे स्वीकर्तुमशक्यतया विशिष्टस्य लाक्षणिकार्थवत्त्वस्याप्यभावात्प्रातिपदिकत्वासिद्धितादवस्थ्यमेवेति भावः। नच शक्यसम्बन्धरूपलक्षणाया असम्भवेऽपि "गभीरायां नद्यां घोषः" इत्याद्यर्थमावश्यक्या मीमांसकसम्मतया ज्ञाप्यसम्बन्धरूपलक्षणया समासस्यार्थवत्त्वात्प्रातिपदिकत्वसिद्धिरिति वाच्यम्। तद्रीत्या अपभ्रंशेऽपि लणक्षापत्तेः, तद्ज्ञाप्यस्य सत्त्वात्। किञ्चैवं पदैर्विनिगमकाभावात्पदेषु भिन्ना लक्षणा। वाक्ये चापरेति गौरवम्। किञ्चैवं सति पदघटितपदानामानुपूर्व्याः शक्ततावच्छेदकत्वस्य वाच्यतयाऽतिगौरवम्। शक्यसम्बन्धलक्षणापक्षे तु वाक्ये लक्षणाभावात्पदानां सा नावच्छेदिकेति लाघवम्। किञ्च ज्ञाप्यसम्बन्ध इत्यत्र वृत्त्या ज्ञापकत्वम्? उत अर्थबोधजनकज्ञानविषयत्वमात्रं प्रविष्टम्? आद्ये न वाक्यलक्षणा, शक्त्यभावात्। अन्त्ये प्रत्येकं वर्णानामप्यर्थवत्त्वापत्तौ विभक्त्यापत्तिः। अपिचैवमेतज्ज्ञाप्यसम्बन्धि इदमिति ज्ञानजन्योपस्थितिरेव लक्षणाजन्येति पर्यवसितम्। तथा च समवायादिना घटपदज्ञाप्याकाशसम्बन्धिनोऽप्युपस्थितस्य शाब्दबोधविषयतापत्तिः। स्पष्टं चेदं भूषणे।

[भाष्यसिद्ध इति]। अर्थवत्सूत्रे "अप्रत्ययः" इति पर्युदास इति पक्षे - अप्रत्यय इति चेत्तिबेकादेशे प्रतिषेधोऽन्तवत्त्वात्। अप्रत्यय इति चेत्तिबेकादेशे प्रतिषेधो वक्तव्यः। काण्डे, कुड्ये। किं कारणम्? अन्तवत्त्वात्। तिबतिपो रेकादेशः। अतिपोऽन्तवत्त्वात्। अस्त्यन्यत्तिप इति कृत्वा प्रातिपदिकसंज्ञा प्राप्नोति" इत्यर्थवत्सूत्रस्थ भाष्यसिद्ध इत्यर्थः। तिपस्तिशब्दादारभ्य सुपः पकारेण प्रत्याहार इति कैयटः। कृतम् = अलम्। गुरुभूतार्थवदादिसूत्रद्वयं नारम्भणीयं, किन्तु "अतिप्रातिपदिकं, समासश्च" इति सूत्रद्वयं कार्यमित्यर्थः। [नियमार्थमिति]। समासस्यापि पूर्वसूत्रेणैव संज्ञासिद्ध्या समासग्रहणं नियमार्थम्। तेन मूलकेनोपदंशमित्यादौ नातिव्याप्तिरिति भावः। सा = प्रातिपदिकसंज्ञा।

[वर्णेष्विति]। इदमुपलक्षणं केवलकृत्तद्धितधातूनामपि। [अर्थवत्त्वावश्यकत्वेनेति]। अर्थवद्ग्रहणस्यावश्यकत्वेनेत्यर्थः। [अव्याप्तितादवस्थ्यमेवेति]। समासस्यार्थवत्त्वाभावात् पूर्वसूत्रस्याऽप्रवृत्त्या तत्तादवस्थ्यमित्यर्थः। समासग्रहणस्य विध्यर्थत्वे तु पूर्वोक्त दूषणप्रसङ्गः। तद्वारणाय "न वाक्यस्यय" इति वचनारम्भे तु गौरवमिति भावः। उपसंहरति। [तथा चेति]। [धूम इवेति]। धूमो यथा वह्निमनुमापयति, तथा प्रातिपदिकसंज्ञारूपं कार्यं समासेऽर्थवत्त्वमनुमापयतीति भावः। तथाहिसमास एकार्थीभावरूपशक्तिमान्। प्रातिपदिकसंज्ञाकत्वात्, पङ्कजशब्दवत्, यन्नैवं तन्नैवं - यथा 'दशदाडिमानि' इत्याद्यनर्थकसमुदायः।

किञ्चैवं चित्रगुमानयेत्यादौ कर्मत्वाद्यनन्वयापत्तिः, प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थ-बोधकत्वव्युत्पत्तेः। विशिष्टोत्तरमेव प्रत्ययोत्पत्तेर्विशिष्टस्यैव प्रकृतित्वात्।

यत्तु सन्निहितपदार्थगतस्वार्थबोधकत्वव्युत्पत्तिरेव कल्प्यत इति, तन्न, उपकुम्भम्, अर्थपिप्पली इत्यादौ पूर्वपदार्थे विभक्त्यर्थान्वयेन व्यभिचारात्। न च तत्रापि सन्निधानमेव, अनुशासनिकसन्निधेर्विवक्षितत्वात्। तथा च यत्पदोत्तरं याऽनुशिष्टा सा तदर्थगतं स्वार्थं बोधयति। समासे च समस्यमानपदोत्तरमेवानुशासनमिति वाच्यम्, अर्थवत्सूत्रेण विशिष्टस्यैव प्रातिपदिकत्वेन विशिष्टोत्तरमेव विभक्त्यनुशासनात्।

अथ प्रकृतित्वाश्रये विभक्त्यर्थान्वय इत्येव कल्प्यत इति चेत्तर्हि "पङ्कजमानय" "दण्डिनं पश्य" "शूलिनं पूजय" इत्यादौ पङ्कदण्डशूलेष्वानयनदर्शनपूजनादेरन्वय प्रसङ्गः। "अघटानानय" इत्यत्र घटेऽप्यानयनान्वयापत्तिश्च। न च दण्डादीनां विशेषणतया न तत्रानयनाद्यन्वयः। 'पाकान्नीलः' 'धर्मात्सुखी' इत्यादौ पाकधर्मादिजन्यताया रूपसुखादावनन्वयप्रसङ्गात्। यच्चा प्रकृत्यर्थत्वं तज्जन्यज्ञानविषयत्वमात्रं तच्चात्राविरुद्धमिति, तन्न, घटं पश्येत्यत्र घटपदात्समवायेनोपस्थिताकाशवारणाय वृत्त्या प्रकृत्यर्थत्वस्याऽऽवश्यकत्वात्। अथ प्रत्ययप्रावर्तिपदजन्योपस्थितिविशेष्यत्वं प्रकृत्यर्थत्वमिति चेन्न। "गामानयति कृष्णो दण्डेन" इत्यत्र कृष्णे तृतीयार्थान्वयप्रसङ्गात्। अथ समस्यमानपदार्थगतस्वार्थबोधकत्वं समासोत्तर विभक्तेः कल्प्यत इति चेन्न। अक्लृप्तकल्पनां क्लृप्तव्युत्पत्ति। त्यागं चापेक्ष्य समुदायशक्तिकल्पनस्यैव युक्तत्वादिति दिक्।

किञ्च समुदाये शक्त्यस्वीकारे "प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वम्" इति व्युत्पत्तिभङ्गो दोष इति "बहुव्युत्पत्तिभञ्जनम्" इति मूललभ्यार्थमाह [किञ्चेति]। एवं = समुदायशक्त्यस्वीकारे। यत्तु समासस्यार्थवत्त्वाभावेऽपि कृत्सूत्रे समासग्रहणात्प्रातिपदिकत्वसिद्धिः। समासग्रहणंच विध्यर्थमेव। नतु नियमार्थम्। वाक्ये तु अर्थवत्त्वाभावादेव न प्रातिपदिकत्वम्। भाष्ये तस्य नियमपरतया वर्णनं तु संसर्गस्य शक्यत्वमित्येकदेशिमतमनुसृत्यैव। अतः समासे विशिष्टशक्त्यभ्युपगमो निष्प्रामाणिक इत्यरुचेराह - किञ्चेतीति दर्पणकाराः। तन्न। तद्भाष्यस्य सिद्धान्तग्रन्थतयैव कैयटादिभिर्व्याख्यातत्वात्। किञ्च तद्भाष्यस्यैकदेशिमतानुवादकत्वे वैयाकरणसिद्धान्तसिद्धस्य वाक्यस्फोटस्यैव विलयापत्तेः। एतद्भाष्यमादायैव मञ्जूषादौ वाक्यशक्तेर्व्यवस्थापितत्त्वात्। नच नैयायिकमताश्रयेण समासग्रहणं विध्यर्थमित्येवाभ्युपेयतामिति वाच्यम्। तन्मतायुक्तत्वप्रतिपादनायैव ग्रन्थकृतः प्रवृत्तेः। एतद्विषये मुनिवचनस्यैव व्यवस्थापकत्वाच्च। सर्वत्र पूर्वग्रन्थे अरुचेरुद्भावनेनैव उत्तरग्रन्थप्रवृत्तिरिति नियमाभावाच्चेति दिक्।

अनन्वये हेतुमाह [प्रत्ययानामिति]। तथाच "सार्वधातुके यक्" इति सूत्रे भाष्ये "पच्यमान इत्यत्र कर्तरि शानच्, कर्मणि यगस्तु" इत्याशङ्क्य "प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतः। न चास्ति सम्भवो, यदेकस्याः प्रकृतेर्द्वयोर्नानार्थयोर्युगपत्सहायीभावः स्यात्" इत्युक्तम्। शास्त्रवासनया तत्तच्छक्यत्वेन प्रतीयमानमर्थं तौ सह ब्रूतो न भेदेनेति तदर्थः। एवं चैकस्य धातोर्युगपद्विरुद्धार्थप्रत्ययाभ्यामर्थबोधने सहायत्वासम्भवेनैतद्व्युत्पत्तिविरोधान्न कर्तरि शानच्, कर्मणि यगिति युक्तमिति तद्भावः। सह ब्रूत इत्यनेन परस्परापरित्यागेनार्थबोधकत्वलाभात्प्रकृतव्युत्पत्तिसिद्धिरिति बोध्यम्। [प्रकृतित्वादिति] प्रत्ययविधानावधित्वरूपप्रकृतित्वस्य समास एव सत्त्वेनोत्तरपदे तदसत्त्वेन तत्र लक्षणायां प्रत्ययार्थनन्वयापत्तिरिति भावः।

[सन्निहितेति]। व्युत्पत्तीनामनुभवानुरोधितया समासव्याससाधारण्येन प्रकृतिपदपरित्यागेन सन्निहितपादार्थगतस्वार्थबोधकर्तैव कल्प्यते। विशिष्टे शक्तिकल्पनापेक्षया व्युत्पत्तिविपर्ययकल्पनैव ज्यायसीति भावः। यत्तु "सन्निहितत्वं चाव्यवहितपूर्वत्वेनानुसन्धीयमानत्वम्" इति दर्पणकाराः। तन्न। तां पश्य, आचार्यकल्पं पूजयेत्यादौ टाबादिव्यवहिते विभक्त्यर्थानन्वयप्रसङ्गात्। प्रत्ययातिरिक्ता-व्यवधानग्रहणे तु दण्डिनमानयेत्यादौ विभक्त्यर्थानन्वयप्रसङ्गः। व्यवहिताव्यवहितसाधारणसन्निधाग्रहणे तु उपकुंभादौ न दोषः, किन्तु दण्डिनमित्यादौ दोषस्तदवस्थ एव। "दधि पश्यति" इत्यादौ दध्नि

तिङर्थान्वयापत्तिश्च। किञ्च दधि बहुपटुर्ददातीत्यादौ दध्नि बहुजर्थान्वयापत्तिः, पटावनन्वयापत्तिश्च। अत इयं व्युत्पत्तिर्विसंष्ठुला क्षोदाक्षमा चेति बोध्यम्। इत्यादावित्यादिपदेन घटपटावित्यादीनां सङ्ग्रहः। [व्यभिचारादिति]। यदि तु उपकुम्भादावपि उत्तरपद एव कुम्भसमीपे लक्षणा उपशब्दस्तात्पर्यग्राहक एवेत्युच्यते। तदा पृथिवी इतरभिन्ना, समवायसम्बन्धावच्छिन्नागन्धत्वावच्छिन्नगन्धनिष्ठाधेयतानिरूपिताधिकरणतावत्त्वादित्यादौ लक्षणादिना इतरभेदसाधने विशिष्टार्थ एव विभक्त्यर्थान्वयस्यानुभवसिद्धत्वान्निरुक्तव्युत्पत्तेस्तत्र व्यभिचारो द्रष्टव्यः।

[तत्रापीति]। उपकुम्भादावपीत्यर्थः। [आनुशासनिकसन्निधेरिति]। अत एव न पूर्वोक्तदोषावकाशः। व्यवहिताव्यवहितसाधारणं सन्निधेर्ग्रहणेऽपि न दोष इति भावः। आनुशासनिकसन्निधानमेव दर्शयति [तथाचेति]। या = प्रत्ययव्यक्तिः। [यत्पदोत्तरमिति]। तथाच दधि पश्यतीत्यादौ वाक्ये दधिपदोत्तरं तिङोऽनुशासनाभावान्न तत्र तदर्थान्वयः। उत्तरग्रहणं पूर्वमध्ययोरप्युपलक्षणं, तेन बहुपटुर्ददाति, सर्वक इत्यादौ न दोष इति बोध्यम्। [बोधयतीति]। तत्र च पूर्वोत्तरपदयोर्विभक्त्यर्थान्वये योग्यतादिकमेव नियामकम्। तेनोपकुम्भं, सूपप्रति, राजपुरुष इत्यादौ तत्तत्पदार्थान्वितस्वार्थबोधकत्वं प्रत्ययानां सिद्ध्यतीति ज्ञेयम्। [समस्यमानपदोत्तरमिति]। यथा समभिव्याहृतपदानामेव वाक्यत्वं, नतु पदसमभिव्याहारस्य। तथा समभिव्याहृतपदानामेव समासत्वं, नतु पदसमभिव्याहारस्येति समसात्प्रत्ययानुशासनस्य समस्यमानपदेभ्य एवानुशासने पर्यवसन्नतया समासघटकपदानामानुशासनिकप्रत्ययसांनिध्यस्यानपायादुपकुम्भादावुपपदार्थान्वितस्वार्थबोधकत्वं प्रत्ययस्याक्षतमेवेति भावः।

यत्तु समासस्यानेकपदसमुदायात्मकतया समुदायस्य प्रत्येकानतिरिक्ततया समासरूपप्रातिपदिकाद्विहितविभक्तेस्तत्तत्पदसन्निहितत्वादिति भावः - इति दर्पणकाराः। तन्न। समुदायस्य समासत्वे तस्य प्रत्येकानतिरिक्तत्वेऽपि विभक्तेः समुदायसन्निहितत्वस्य चरमपदसन्निहितत्वस्य वा लाभेऽपि पूर्वपूर्वपदसन्निहितत्वस्य दुर्लभत्वात्। तदुक्तरीत्याश्रयणे आनुशासनिकसान्निध्याश्रयणस्यानुपयोगश्च। तदनाश्रयणेऽपि तदुक्तरीत्योपपत्तिरिति मन्तुं शक्यत्वात्। समस्यमानपदोत्तरमेवेति मूलाक्षरास्वारस्याच्च। तद्रीत्या समुदायादपि विभक्तेरनुशासनसत्त्वेन मूले 'एव' शब्दस्य प्रयोगानर्हत्वाच्च। अर्थवत्सूत्रेण समासग्रहणेन वा प्रातिपदिकत्वेऽपि तदुपदर्शितरीत्या समुदायस्य प्रत्येकानतिरिक्ततया समासरूपप्रातिपदिकाद्विहितविभक्तेस्तत्तत्पदसन्निहितत्वस्यानपायेन

"अर्थवत्सूत्रेण विशिष्टस्यैव प्रातिपदिकत्वेन" इत्यादेर्ग्रन्थस्यानुत्तरतया असंलग्नकतापत्तेश्च। तत्र प्रातिपदिकत्वप्रवृत्तिमात्रेण समासत्वस्यानपायादित्यलम्। [विशिष्टोत्तरमेव विभक्त्यनुशासनादिति]। समभिव्याहृतपदानामेव समासत्वमित्यभ्युपगमेऽपि प्रातिपदिकसंज्ञाया विशिष्ट एव प्रवृत्त्या प्रातिपदिकाधिकाराद्विशिष्टोत्तरमेव विभक्तेरनुशिष्टतया विशिष्टस्यैव विभक्तिसांनिध्यमिति "उपकुम्भम्" इत्यादावुपादीनामानुशासनिकविभक्तिसांनिध्याभावादुक्तव्युत्पत्तेर्व्यभिचार एवेति भावः। समस्यमानपदानामपि प्रातिपदिकत्वे तु प्रत्येकं सुबापत्तिर्दोषः। अस्य सुपः प्रातिपदिकानवयवत्वान्न सुब्लुगपि। एकाज्द्विर्वचनन्यायस्य तु नात्र विषय इत्युक्तमेव। वस्तुतस्तु समभिव्याहृतपदानां न वाक्यत्वं, किन्तु पदसमभिव्याहारस्यैवेति स्फोटनिर्णये वक्ष्यते। किञ्च समभिव्याहृतपदानामेव समासत्वे बहुजायाप्रिय इत्यादौ जायाशब्दस्यापि बहुव्रीहित्वेन तिङापत्तिरिति तदसङ्गतिरेवेति बोध्यम्। कृत्सूत्रे समासग्रहणस्य वाक्येऽतिव्याप्तिवारणाया नियमफलकतया समासस्यार्थवत्सूत्रेणैव प्रातिपदिकत्वमित्याशयेन "अर्थवत्सूत्रेण" इत्युक्तम्।

[प्रकृतित्वाश्रय इति]। प्रकृतित्वाश्रयार्थ इत्यर्थः। प्रयाि"सम्बन्धेन प्रकृतित्वाश्रयार्थत्वं न प्रकृत्यर्थत्वं, किन्तु स्वरूपसम्बन्धेन। तत्त्वं च अवयवार्थस्याप्यक्षतमिति तदन्वितस्वार्थबोधकत्वं प्रत्ययानां निराबाधमिति भावः। [कल्प्यत इति]। प्रत्ययानां प्रकृत्यर्थेत्यादि व्युत्पत्तेरीदृशोऽर्थः कल्प्यत इत्यर्थः। [पङ्कजमिति] पङ्कजशब्दस्य योगरूढत्वेऽपि स्वरूपसम्बन्धेन प्रकृतित्वस्य पङ्कजशब्देऽपि सत्त्वेन तदर्थान्वितस्वार्थबोधकत्वस्याऽम्प्रत्ययस्याऽऽपत्तौ तस्यैवानयनक्रियायामन्वयापत्तिः। तथाचाऽसत्यपि तात्पर्ये पङ्कजमानयेत्यतः पङ्कजकर्मकमानयनमिति बोधापत्तिरिति भावः। [पङ्कदण्डशूलेष्विति]। तदभिन्नप्रत्ययार्थकर्मस्वित्यर्थः। [अघटमानयेति]। पूर्वोक्तस्थले दण्डादिविशिष्टे क्रियान्वये विशेषणीभूतदण्डदावप्यन्वये कदाचिदिष्टापत्तिः स्यादत्र तु न कस्याप्यभावे आनयनक्रमत्वान्वयोऽनुभवसिद्ध इति भावः। प्रकृतिजन्यबोधविशेष्ये एव विभक्त्यर्थान्वय इति व्युत्पत्तिमाश्रित्य शङ्कते [न चेति]। [विशेषणतयेति]। दण्डिपदजन्यबोधे विशेषणतयेत्यर्थः। जन्यतायाः = पञ्चम्यर्थभूतायाः। [रूपसुखादावनन्वयेति]। नील शब्दस्य नीलारूपविशिष्टपरतया सुखिशब्दस्य सुखविशिष्टपरतया च नीलरूपसुखयोः प्रकृतिजन्यबोधे विशेष्यत्वाभावात्तत्र पञ्चम्यर्थजन्यताया अनन्वयप्रसङ्ग इति भावः। यदितु प्रत्ययानां स्वप्रकृतिजन्यबोधे विशेष्यभूतार्थान्वितस्वार्थबोधकत्वाभ्युपगमेन दण्डिनामानयेत्यादौ दण्डादौ न विभक्त्यर्थान्वयः। पाकान्नील इत्यादौ तु पञ्चम्या

नीलपदप्रकृतिकत्वाभावात्तदर्थैकदेशे रूपेऽन्यविभक्त्यर्थान्वयेऽपि न क्षतिः। अत एव वह्निमान् धूमादित्यादौ पञ्चम्यर्थस्य वह्निमत्पदार्थैकदेशे वह्नावन्वयसम्भव इत्युच्यते, तदा लक्षणादिना इतरभेदसाधनस्थले गुणकर्मान्यत्वविशिष्टसत्तावत्त्वादित्यादौ च पञ्चम्यर्थस्य स्वप्रकृत्यर्थैकदेशेऽनन्वयापत्तिर्दोषो बोध्यः। एवं च प्रकृतिजन्यबोधे विशेष्यभूतार्थबोधकत्वे प्रत्ययस्य, तदर्थस्य पदार्थान्तरे प्रकारभूतेऽपि अन्वये न व्युत्पत्तिविरोधः। तथापि निरुक्तस्थले दोषो दुर्वार एवेति दिक्।

[ज्ञानविषयत्वमात्रमिति]। ननु प्रकृतिवृत्त्या तज्जन्यज्ञानविषयत्वमित्यर्थः। एवं च उपकुम्भं, चित्रगुमित्यादौ प्रकृतित्वस्य समुदायनिष्ठत्वेऽपि समीपादीनां प्रकृतिजन्यज्ञानविषयत्वेन तदर्थान्वित स्वार्थबोधकत्वं प्रत्ययानां सिद्धमिति भावः। [समवायेनेति] एकसम्बन्धिज्ञानविधया घटशब्दश्रवणे समवायेनोपस्थिते आकाशे घटपदोत्तरविभक्त्यर्थकर्मत्वान्वयवारणाय वृत्त्या प्रकृतिजन्यज्ञान-विषयत्वावश्यकत्वेन उपकुम्भादौ कुम्भसमीपाद्यर्थस्य त्वन्मते तत्त्वाभावात्तदर्थान्वितस्वार्थबोधकत्वं प्रत्ययानामसिद्धमेवेति भावः।

प्रकारान्तरेण व्युत्पत्त्यविरोधमाशङ्कते [अथेति]। [विशेष्यत्वमिति]। तेन दण्डिनमानयेत्यादौ दण्डादौ न विभक्त्यर्थान्वयः। [तृतीयार्थान्वयप्रसङ्गादिति] अव्यवधानांशनिवेशे तूपकुम्भमित्यादौ दोषतादवस्थ्यमिति बोध्यम्।

विशिष्टे शक्तिकल्पनापेक्षया व्युत्पत्त्यन्तरकल्पनैव ज्यायसीत्याशयेन चित्रगुमानयेत्यादौ विभक्त्यर्थान्वयमुपपादयितुं शङ्कते [अथेति]। [पदार्थगतेति]। तत्र च योग्यतादिकमेव नियामकं ग्राह्यम्। अक्लृप्तकल्पनां = अक्लृप्तव्युत्पत्तिकल्पनाम्। [क्लृप्तव्युत्पत्तीति]। सार्वधातुके यगिति सूत्रस्थभाष्यसम्मततया "प्रत्ययानां कृप्रत्यर्थेत्यादिव्युत्पत्तेः क्लृप्तत्वम्। व्युत्पत्त्यन्तरस्वीकारेऽपि पङ्कजं पश्येत्यादौ पङ्कादौ कर्मत्वाद्यन्वयापत्तितादवस्थ्यमित्यपि बोध्यम्।

[युक्तत्वादिति]। ननु प्रकृत्यर्थप्रकारकबोधं प्रति प्रत्ययजन्योपस्थितिर्हेतुरित्यस्य सामान्यतो हेतुहेतुमद्भावस्य स्वीकारो न युक्तः। मानाभावात्। अत एव घटः कर्मत्वमानयनं कृतिरित्यादितो विपरीतव्युत्पन्नस्य बोध उत्पन्नः सङ्गच्छते। सद्व्युत्पन्नस्य बोधस्तु घटप्रकारककर्मत्वविशेष्यक-शाब्दबुद्धिं प्रति घटार्थकपदोत्तरकर्मत्ववाचकविभक्तिजन्योपस्थितिर्हेतुरिति विशिष्यैव कार्यकारणभावाभ्युपगमाद्वारणीयः। प्रविष्टस्याननुगतत्त्वाच्च समान्यतः कार्यकारणभावासम्भवश्च।

अनुगतत्वेऽपि दण्डेन गामानयेत्यादौ दण्डे कर्मत्वस्य, गविकरणत्वस्य चान्वयो दुर्वारः। तद्वारणाय स्वप्रकृत्यर्थेति स्वपदघटितत्वे तु स्वत्वस्याननुगतत्वात्तदसम्भव एव। पुरुषमानयेत्यादौ पुरुषपदस्य राजविशिष्टपुरुषे सति तात्पर्ये विशिष्टकर्मत्वबोधेन तादृशबोधे पुरुषपदोत्तरकर्मत्वबोधक-विभक्त्युपस्थितेर्हेतुत्वस्य क्लृप्ततया एतादृशक्लृप्तकार्यकारणभावानुरोधेन राजपुरुषादावपि तथैव विशेषरूपेण कार्यकारणभावो वाच्यः, नतु सामान्यरूपेण। किञ्च सामान्यरूपेण हेतुहेतुमद्भावाभ्युपगमे स्तोकं पचति, शोभनं पचतीत्यादौ धात्वर्थस्य पाकादेरप्रत्ययार्थतया तत्र स्तोकादेर्नामार्थस्य साक्षादन्वयानुपपत्तिः। एवं च सामान्यतो हेतुहेतुमद्भावासम्भवाद्विशेषरूपेणैव तस्य वाच्यतया समासे विशिष्टशक्त्यनभ्युपगमेऽपि न चित्रगुमानयेत्यादौ विभक्त्यर्थान्वयानुपपत्तिरिति चेत्। अत्राहुः। सामान्यतः कार्यकारणभावानभ्युपगमे "चक्रिणमहं पूजयामि" इत्यादौ चक्रस्य इनिप्रत्ययार्थ इवान्यत्रापि आकाङ्क्षासत्त्वादन्वयापत्तिः। नच आसत्त्यभावान्नान्यत्रान्वय इति वाच्यम्। गिरिरग्निमान्, भक्तं देवदत्तेनेति तात्पर्यग्रहवतो गिरिर्भुक्तमग्निमान्देवदत्तेनेत्यत्राऽन्वयबोधदर्शनेन पदाव्यवधानरूपासत्तेराश्रयितुमशक्यतया पदजन्यपदार्थोपस्थितिमात्ररूपासत्तेरत्रापि सत्त्वादन्वयबोधानिवारणात्। किञ्च निरुक्तरीत्या हेतुहेतुमद्भावानुपगमे काष्ठं तण्डुलः पचति, रामो बाणो हतो वालीत्यादौ करणत्वकर्मत्वकर्तृत्वादिसम्बन्धेन काष्ठ, बाण, तण्डुल, रामादेः पाकहननादावन्वयप्रसङ्गः। कर्मत्वादिविशेष्यकबोध एव द्वितीयादिजन्योपस्थितेर्हेतुत्वात्। अत्र तु कर्मत्वादेरविशेष्यतया द्वितीयादेरभावेऽप्यक्षतेः। अत एव स्तोकं पचतीत्यादौ तव स्तोकादेः पाके धात्वर्थेऽन्वय उपपद्यते। मन्मते तु अभेदे कर्मण्येवेयं द्वितीयेति न दोषः। नचाभेदातिरिक्तसंसर्गेण नामार्थप्रकारकबोधं प्रति तदुत्तरसार्थकविभक्तिजन्योपस्थितिर्हेतुः" इति कार्यकारणभावादेव नात्रान्वयापत्तिरिति वाच्यम्। दण्डिनं चक्रिणं पश्येत्यादौ व्यभिचारात्। इन्यादेरविभक्तित्वात्। प्रत्ययजन्योपस्थितेरेव हेतुत्वाभ्युपगमे दधीयती ददातीत्यादौ दध्नो वतुबर्थेऽन्वयापत्तिः। विहितत्वेन प्रत्ययो विशेषणीय इति चेत्तर्हि समासेऽपि प्रत्येकपदोत्तरं प्रत्ययानामविधानात्तल्लक्षणायामपि विभक्त्यर्थानन्वयापत्तिरेव। नच प्रकृतित्वादेरननुगतत्वात्सामान्यरूपेण कार्यकारणभावग्रहासम्भव इति वाच्यम्। पितृत्वपुत्रत्वादेरननुगतत्वेऽपि स्वपितृभ्यः पुत्रो दद्यादित्यादितश्चैत्रपितृभ्यश्चैत्रो दद्यन्मैत्रपितृभ्यो मैत्रो दद्यादित्यादिसर्वोपसंहारेणान्वयबोधवत् तत्तत्प्रत्ययनिरूपितप्रकृतित्वस्याननुगमेऽपि प्रकृत्यर्थप्रकारकबोधं प्रतीत्यादिशब्दात्सर्वोपसंहारेण कार्यकारणभावग्रहसम्भवात्। स्वत्वत्वपितृत्वत्वादीनामनुगमनेन तदेव स्वरूपसदुपलक्षणीकृत्य तदादिवच्छक्तिग्रहादाकाङ्क्षावशाच्च

विशिष्य पदार्थबोध इत्यपि तुल्यम्। प्रकृतित्वं स्वरूपसदनुगमकमादाय शक्तिग्रहः। आकाङ्क्षावशात्कार्यकारणभावबोधकवाक्याद्विशिष्य तद्ग्रह इत्यस्य सुवचत्वात्। यदपि "पुरुषपदमात्रस्य विशिष्टलक्षणास्थले विशेषरूपेण कार्यकारणभावः क्लृप्त" इति, तदपि न। समासे शक्तिग्रहाद्बोधस्थलेऽन्वयानुरोधेन सामान्यतः कार्यकारणभावस्यापि क्लृप्तत्वात्। तस्मादुत्तरपदादि-मात्रस्याऽप्रकृतित्वात्तत्तल्लक्षणास्वीकारेऽपि तदुत्तरविभक्त्यर्थस्यानन्वयापत्तिर्दुर्वारैव। स्पष्टं चेदं भूषणे। तदेतत्सर्वं मनसिकृत्याह [दिगिति]। एवं च "प्रत्ययानां प्रकृत्यर्थान्वितेत्यादिव्युत्पत्तेः प्रत्ययप्रकृतिघटिततयाऽनुगतयोः प्रकृतित्वप्रत्ययत्वयोर्दुर्वचत्वेन तत्त"क्तिभेदेन कार्यकारणभावो वाच्यः। तथा च समासस्थले समस्यमानपदार्थस्य प्रत्ययार्थान्वयाभ्युपगमे बाधकाभावोऽत आह - अपि चेतीति" इति दर्पणकाराणामव्यवहितग्रन्थावतरणमप्ययुक्तमेवेति बोध्यम्।

अपि च समासे विशिष्टशक्त्यस्वीकारे "राज पुरुषः" 'चित्रगुः' 'नीलोत्पलम्' इत्यादौ सर्वत्रानन्वयप्रसङ्गः, राजपदादेः सम्बन्धिनि लक्षणायामपि 'तण्डुलः पचती' इत्यादौ कर्मत्वादिसंसर्गेण तण्डुलादेः पाकादावन्वयवारणाय प्रातिपदिकार्थप्रकारकबोधं प्रति विभक्तिजन्योस्थितेर्हेतुताया आवश्यकत्वात् पुरुषादेस्तथात्वा भावात्। 'तण्डुलः शुभ्रः' इत्यादौ च प्रातिपदिकार्थकप्रथामार्थे तण्डुलादेस्तस्य च शुक्लेऽभेदेनैवान्वयः। "शुभ्रेण तण्डुलेन" इत्यादौ च विशेषणविभक्तिरभेदार्था, पार्ष्णिको वाऽन्वय इति नातिप्रसङ्गः। तथा च समासे परस्परमन्वयासम्भवादावश्यिकैव समुदायस्य तादृशे विशिष्टार्थे शक्तिः।

यद्वा व्युत्पत्तिः = "नामार्थप्रकारबोधे विशेष्यतया विभक्तिजन्योपस्थितिर्हेतुः" इति व्युत्पत्तिः। तद्भङ्गो लक्षणावाद इति "बहुव्युत्पत्तिभञ्जनम्" इति मूललभ्यार्थ माह [अपि चेति]। राजपुरुष इत्यादौ राजादिपदे तत्सम्बन्ध्यादौ लक्षणास्वीकारेऽपि नामार्थप्रकारकेति व्युत्पत्तेः पुरुषादेर्विभक्तिजन्योपस्थितिविषयत्वाभावाद्राजसम्बन्धिरूपनामार्थस्य पुरुषेऽनन्वय एवेति भावः। चित्रगुरित्यत्र दोषोद्भावनं शक्त्युपस्थाप्ययोः पूर्वोत्तरपदार्थयो रन्वयबोधोत्तरं गोशब्देन तत्स्वामी लक्ष्यत इति कल्पमभिप्रेत्य। चित्रपदेन गोपदेन वा चित्राभिन्नगोस्वामी लक्ष्यत इति कल्पे तु पदार्थयोः पृथगनुपस्थित्याऽन्वयप्रसक्तिरेव नास्ति। नीलोत्पलमित्यत्र दोषोद्भावनं कर्मधारये न शक्तिर्नवा लक्षणा, पदाभ्यां पदार्थयोरभेदस्य च संसर्गतया लाभेन नीलाभिन्नमुत्पलमिति बोधनिर्वाहादिति मतमाश्रित्य।

तत्रापि उत्तरपदे लक्षणेति मते त्वन्वयप्रसक्तिरेव नास्ति। अनन्वयमेवाह [तण्डुलः पचतीत्यादाविति]। [विभक्तिजन्योपस्थितेरिति]। विशेष्यतयेति शेषः। [तथात्वाभावादिति]। विभक्तिजन्योपस्थिति-विषयत्वाभावादित्यर्थः। ननु शुभ्रस्तण्डुल इत्यादौ शुभ्रादिरूपनामार्थप्रकारकबोधो विशेष्यतया तण्डुले जायते। नहि तत्र विशेष्यतया विभक्तिजन्योपस्थितिरस्तीति व्यभिचारान्नोक्तकार्यकारणभावस्सम्भवति। तण्डुलः पचतीत्यत्र कर्मतासंसर्गेण तण्डुलादेः पाकादावन्वयस्तु धातुजन्योपस्थितेः प्रतिबन्धकत्वाभ्युपगमेन धातुभिन्नजन्योपस्थितेः कारणत्वकल्पनेन वा वारणीय इत्यत आह [शुभ्रस्तण्डुल इत्यादौ चेति]। [तस्य च शुक्ल इति]। एवं च शुभ्रस्तण्डुल इत्यादौ शुभ्रपदार्थप्रकारकतण्डुलपदार्थविशेष्यक-शाब्दबोधानङ्गीकारान्न निरुक्तव्युत्पत्तिव्यभिचार इति भावः। ननु प्रथमान्तस्थले निरुक्तरकार्यकारणभाव-व्यभिचारवारणेऽपि शुभ्रेण तण्डुलेनेत्यादौ प्रातिपदिकार्थे तृतीयादेरविधानात्तत्र शुभ्रपदार्थस्य तण्डल एवान्वयस्योपगन्तव्यतया तस्याव्यभिचारो दुर्वार एवेत्याशङ्क्य "कट एव कर्म तत्सामानाधिकरण्याद्भीष्मादिभ्योऽपि द्वितीया" इति अनभिहितसूत्रभाष्योक्तन्यायमनुसृत्य समाधत्ते [शुभ्रेण तण्डुलेनेत्यादाविति]। [अभेदार्थेति] एवं चात्रापि नामार्थस्य साक्षात् नामार्थान्तरेऽनन्वयेन विभक्त्यर्थस्यैव तण्डुलादावन्वयेन न तद्व्युत्पत्तिव्यभिचार इति भावः। "कटोऽपि कर्म। भीष्मादयोपि" इति भाष्योक्तपक्षान्तराभिप्रायेणाह। [पार्ष्णिक इति]। अयं भावः - उभयोरपि कर्मत्वाद्विशेष्यवाचक-पदोत्तरद्वितीयया तद्गतकर्मत्वस्योक्तावपि विशेषणगतकर्मत्वस्यानभिधानात्तदभिधानाय विशेषणादपि द्वितीयोत्पत्तिरावश्यकी। तत्रोभयोरपि कारकत्वात्कारकाणां परस्परमनन्वयात्प्रत्येकं शुभ्रेण पचति तण्डुलेन पचतीति क्रियायामेवान्वयाच्छुभ्रतण्डुलपदार्थयोः परस्परान्वयस्यैवाभावान्न तद्व्युत्पत्तिव्यभिचारः। शुभ्रगुणस्तण्डुलवृत्तिरेव, तण्डुलः शुभ्रगुणक एवेति परिच्छेद्यपरिच्छेदकभावप्रतीतिस्तु पार्ष्णिकी मानसिक्येव शाब्दी वा - इति। [अन्वय इति]। शुभ्रतण्डुलयोः परस्परं परिच्छेद्यपरिच्छेदकभाव-निर्वाहकोऽन्वय इत्यर्थः। [अन्वयासम्भवादिति]। लक्षणावादिमत इति भावः। [तादृशे विशिष्टार्थे शक्तिरिति]। तथाच पृथगुपस्थितिविषयकाणां व्युत्पत्तीनामेकोपस्थितिनियामकशक्त्याधारभूत-वृत्तावप्रवृत्त्या न तद्भङ्गोऽस्माकं मत इति भावः।

किं च "राजपुरुषः" इत्यादौ सम्बन्धिनि सम्बन्धे वा लक्षणा? नाऽऽद्यः, "राज्ञः पुरुषः" इति विवरणविरोधात्समाससमानार्थकवाक्यस्यैव विग्रहत्वात्। अन्यथा तस्माच्छक्तिनिर्णयो न स्यात्। नान्त्यः, "राजसम्बन्धरूपः पुरुषः" इति बोधप्रसङ्गात्। विरुद्धविभक्तिरहितप्रातिपदिकार्थयोरभेदान्वयव्युत्पत्तेरित्यादि प्रपञ्चितं वैयाकरणभूषणे।

ननु निरुक्तव्युत्पत्तिर्भेदसम्बन्धेन जायमानशाब्दबोधविषयिकैवेति न लक्षणावादेऽप्यनन्वयापत्तिः। किञ्च विशिष्टशक्तिकल्पनापेक्षया निरुक्तव्युत्पत्तेः समासातिरिक्तविषयकत्वकल्पनमेव ज्याय इति चेत्तर्हि व्युत्पत्तिः = अन्वयनियामकं, तद्भङ्गो लक्षणावादे इति बहु व्युत्पत्तिभञ्जनमिति मूललभ्यार्थमादायाह [किञ्चेति]। [विवरणविरोधादिति]। वृत्तौ सम्बन्धिनि लक्षणाभ्युपगमे राजसम्बन्ध्यभिन्नः पुरुष इति बोधेन विग्रहे राजसम्बन्धवानिति बोधेन च भिन्नार्थतापत्त्या तद्विरोधापत्तिरित्यर्थः। [अन्यथेति] समानार्थकत्वाभाव इत्यर्थः। तस्मात् = विवरणात्। [न स्यादिति] नचेष्टापत्तिः। शक्तिग्राहकेषु विवरणस्य गणनस्यासङ्गत्यापत्तेः।

यत्तु दर्पणकाराः - "विग्रहस्य विव्रियमाणसमानार्थकत्वं न विव्रियमाणजन्यबोधे यद्यद्विशेष्यकत्वे सति यद्यत्प्रकारकत्वं तत्तद्विशेष्यकतत्तत्प्रकारकबोधजनकत्वं, प्राप्तमुदकं यमित्यादेः प्राप्तोदकादिसमासविग्रहत्वानुपपत्तेः। पचति व्याकरणमधीते इत्यादीनां पाचको वैयाकरण इत्यादिकृत्तद्धितान्तविग्रहत्वानुपपत्तेश्च। वृत्तिविग्रहवाक्यार्थयोर्विशेष्यविशेषणभाववैपरीत्यसत्त्वात्। किंतु विव्रियमाणजयावदर्थबोधजनकत्वं तद्वाच्यम्। प्राप्तमुदकं यमित्यादेः प्राप्तोदकादिसमासजबोधविषयाः परस्परसम्बन्धतात्पर्यविषयीभूताश्च यावन्तः पदार्था उदकादयः, तद्विषयबोधजनकत्वान्न दोषः। घटीया कर्मतेत्येतावन्मात्रस्य घटकर्मकानयनकृतिरिति समासविग्रहत्ववारणाय यावदिति। राज्ञः पुरुषः सुन्दर इत्यधिकावगाहिनो राजपुरुष इति समासविग्रहत्वमिष्टमेव। प्रकृते च राजपुरुष इत्यादिकस्य समासस्य राज्ञः पुरुष इति वाक्यस्य विग्रहत्वानुपपत्तिर्न" इति वदन्ति। तदविचारिताभिधानम्। सम्बन्धिलक्षणायां वृत्तिविग्रहयोः सम्बन्धसम्बन्धिरूपविभिन्नार्थावगाहिबोधजनकतया तदुक्तरीत्यापि विवरणस्य विव्रियमाणजयावदर्थबोधजनकत्वाभावात्। विव्रियमाणजबोधे सम्बन्धिनोऽधिकस्य भानात्। अधिकावगाहिनो विग्रहत्वे इष्टापत्तिं स्वीकुर्वता त्वया यावत्पदेन न्यूनार्थावबोधकस्य विग्रहत्वव्यवच्छेदाभ्युपगमात्। किञ्च अधिकावगाहिनो विग्रहत्वाभ्युपगमोऽप्ययुक्तः। समसनमेकीभाव इत्यर्थसमासपदप्रतिद्वन्द्विविग्रहपदस्य समासघटकपदानां विभिन्नत्वेन ग्रह इत्यर्थकस्य त्वदुक्ते प्रयोगासम्भवात्। अनेन हि वृत्तिघटकपदानां भेदेन स्वरूपज्ञापकस्य विग्रहत्वं लभ्यते। नहि त्वदुक्ते तदस्ति। किञ्च न केवलमर्थबोधनायैव विग्रहवाक्यप्रयोगः। किंतु समासादेर्वैकल्पिकत्वप्रदर्शनायापि। तद्दर्शकं च राज्ञः पुरुष इत्याद्येव। नतु राज्ञः पुरुषः सुन्दर इतीति स्पष्टमेव। अत एव "अविग्रहो नित्यसमासः" इति वृद्धाः। अन्यथा कुम्भकार इत्येतत्समानार्थकस्य कुम्भस्य कर्तेत्यस्य सम्भवेन

तस्य नित्यसमासत्वं भज्येत। एतेन विग्रियमाणजयावदर्थबोधजनकत्वं विग्रहत्वमिति त्वदीयोक्तिः परास्ता। एवं च वृत्त्यर्थवृत्तिवैकल्पिकत्ववृत्तिघटकपदस्वरूपबोधनोद्देशेन प्रवृत्तं वाक्यं विग्रहः। वृत्तिविग्रहयोः समानार्थकत्वस्य विशेषणविशेष्यभावातिरिक्तार्थविषयकत्वमित्यनुपदमेव ग्रन्थकृता वक्ष्यमाणतया प्राप्तमुदकं यमित्यादेः प्राप्तोदकादिसमासविग्रहत्वे न किञ्चिद्बाधकम्। घटीया कर्मतेत्येतावन्मात्रस्य घटकर्मकानयनकृतिरिति समासविग्रहत्वमाशङ्कितुमशक्यमेव। एवं च सम्बन्धिलक्षणायां तस्य विग्रहत्वानुपपत्तितादवस्थ्यमेवेति विभावयन्तु विवेचनचतुरा इत्यलम्।

सम्बन्धे लक्षणेति द्वितीयविकल्पं दूषयति [नान्त्य इति]। नन्वभेदबोधे समानविभक्तिकत्वं तन्त्रं, तच्चात्र नास्तीत्यत आह [विरुद्धद्वितीयादिविभक्तिरहितेति] - प्रकृते पुरुषपदोत्तर-श्रूयमाणप्रथमाविभक्ति- विरुद्धद्वितीयादिविभक्तिराहित्यस्य राजपदे सत्त्वादभेदबोधो दुर्वार एव। एवं च विशिष्टे शक्तिमनङ्गीकृत्य राजपदे सम्बन्धे लक्षणास्वीकारेऽनिष्टबोधापत्तिरिष्टार्थानिर्वाहश्चेति महदनिष्टम्। नचैवं राज्ञः सुतस्य धनमित्यादावपि राजसम्बन्धिनः सुतस्य धनमित्यर्थकेऽभेदान्वयापत्तिरिति वाच्यम्। विरुद्धविभक्तीत्यनेन विरुद्धार्थकविभक्तिराहित्यस्य विवक्षणात्। निरुक्तस्थले एकत्र जन्यजनकभावस्य, अपरत्र स्वस्वामिभावस्य च षष्ठ्यर्थतया नाभेदान्वयधीः। नच लक्षितस्य राजसम्बन्धस्याश्रयतासम्बन्धेन पुरुषेऽन्वयान्न दोष इति वाच्यम्। ओदनकर्मकः पाक इति बोधतात्पर्येण ओदनः पचतीत्यादेस्साधुत्ववारणाय भेदसंसर्गकनामार्थप्रकारकबोधे विभक्तिजन्योपस्थितेर्हेतुत्वस्यावश्यकतया प्रकृते तथाऽन्वयासम्भवात्। किञ्च सम्बन्धिनि लक्षणायां राजपुरुष इत्यादेः कर्मधारयत्वापत्तिः, समनाधिकरणतत्पुरुषस्यैव तत्त्वात्। तदेतदभिप्रेत्याह [इत्यादि भूषणे प्रपञ्चितमिति]।

अत एव "वषट्कर्तुः प्रथमभक्षः" इत्यत्र न भक्षमुद्दिश्य प्राथम्यविधानं युक्तमेकप्रसरत्वभङ्गापत्तेरिति तृतीये, "त्र्यङ्गैः स्विष्टकृतं यजति" इत्यत्राङ्गानुवादेन त्रित्वविधानं न युक्तम्, एकप्रसरताभङ्गापत्तेरिति दशमे च निरूपतिं सङ्गच्छते। सङ्गच्छते चारुणाधिकरणारम्भः। अन्यथा "अरुणायैकहायन्या पिङ्गाक्ष्या सोमं क्रीणाति" इत्यत्रारुणपदवदितरयोरप्येकाब्दत्वादिगुणमात्रवाचकतयाऽमूर्तत्वात्क्रीणातौ करणत्वासम्भवस्य तुल्यत्वादारुण्यस्यैव वाक्याद्धेदशङ्काया असम्भवादिति प्रपञ्चितं भूषणे। तस्मात्समासशक्तिपक्षो जैमिनीयैरवश्याभ्युपेय इत्यास्तां विस्तरः।।।।७।।(३४)

एवं समासे विशिष्टशक्त्यनङ्गीकारे नैयायिकमते दोषं प्रदर्श्य तन्मते विशिष्टशक्तिं च व्यवस्थाप्य, मीमांसकमतेऽपि तां व्यवस्थापयति [अत एवेति]। समासे विशिष्टशक्यङ्गीकारादेवेत्यर्थः। एतेन "यत्तु व्यपेक्षावादिनो नैयायिकमीमांसकादयः" इत्युट्टङ्क्य नैयायिकमतस्य निराकरणेऽपि मीमांसकमतस्याऽनिराकरणान्न्यूनतेत्याशङ्कापि समाहिता। [वषट्कर्तुरिति] - वषट् = देवतोद्देशेन हविस्त्याग सम्बन्धी मन्त्रविशेषः, तं करोतीति वषट्कर्ता। वषण्णामकमन्त्रोच्चारयिता होतृविशेषः। सोमयागप्रकरणे "वषट्कर्तुः प्रथमभक्ष" इति श्रूयते। तत्र भक्षान्तरविधानम्? उत होतृचमस इति समाख्या प्राप्तभक्षानुवादेन प्राथम्यविधानम्? इति संशये लाघवात्समाख्या प्राप्तभक्षानुवादेन प्राथम्यविधिः। ततश्च समाख्यया यत्र वषट्कर्तुर्भक्षणं प्राप्तं, तत् प्रथमं कर्तव्यम्। ततोऽन्यस्य भक्षणं कर्तव्यमिति तद्वाक्यार्थः। यत्र तु ग्रहेषु चमसान्तरेषु वा न समाख्यया भक्षणप्राप्तिस्तत्र सत्यपि वषट्कारे होत्रादेर्नास्ति भक्षणं, यथा - ग्रावस्तुतः - इति पूर्वपक्षे, "वषट्काराच्च भक्षयेत्" ३-५-३१ इति जैमिनेः सिद्धान्तसूत्रम्। अयमर्थः - भक्षानुवादेन प्राथम्यविधाने उद्देश्यस्य प्रथमप्रतीत्यवश्यंभावा'क्षशब्देन प्रथमं तदर्थः प्रतिपाद्यः। पश्चाच्च प्रथमशब्देन तदर्थः प्रतिपाद्यः। नचैतत्सम्भवति, पदद्वयस्यापि युगपदेव विशिष्टैकार्थप्रतिपादकत्वाभावे एकार्थीभावलक्षणसामर्थ्याभावेन समासस्यैवानुपपत्तेः। तथाच प्रकृते प्राथम्यस्य पूर्वकर्मण्यनिवेशेन वषट्कर्तृप्राथम्योभयविशिष्टं भक्षान्तरमेव सोम संस्कारार्थं विधीयते। तत्र च यागार्थत्वेन वषट्कारस्य क्लृप्तत्वात्कर्तुरुपलक्षणमात्रत्वेनार्थान्निमित्तत्वावगतेर्वषट्कारनिमित्तकमिदं भक्षणं ग्रहेषु चमसेषु वाऽविशेषात्सिद्ध्यति। एवं च ग्रावस्तुतोऽपि भक्षणमस्त्येव - इति। [भक्षमिति] "होतृचमसः" इति समाख्यया प्राप्तं भक्षमित्यर्थः। [एकप्रसरताभङ्गापत्तेरिति] विशिष्टैकोपस्थिति-जनकत्वरूपैकार्थीभावभङ्गापत्तेरित्यर्थः। [तृतीय इति] पूर्वमीमांसायां तृतीयाध्याये पञ्चमे पादे दशमाधिकरण इत्यर्थः। अस्य "निरूपितम्" इत्यत्रान्वयः। उद्देश्यविधेयभावेनान्वये पदार्थानां पृथगुपस्थितिस्तन्त्रम्। समासे पदार्थानां पृथगनुपस्थित्या न तत्रोद्देश्यविधेयभावेनान्वयः सम्भवति। एवं चायमप्यर्थः "बहुव्युत्पत्तिभञ्जनम्" इति मूललभ्य एव। व्युत्पत्तिः = पदार्थयोरुद्देश्यविधेयभावेनान्वये पृथगुपस्थितिस्तन्त्रम्" इति व्युत्पत्तिः, तद्भङ्गो मीमांसकमते विशिष्टशक्त्यनङ्गीकारे। व्यपेक्षावादिनोऽपि मीमांसका निरुक्तरीत्या प्रथमभक्ष इत्यत्रैकप्रसरताभङ्गभियोद्देश्यविधेयभावेनान्वयं नेच्छन्ति। एतेन ज्ञायते - कण्ठरवेण व्यपेक्षामुद्घोषयन्तोऽपि वयं समासे कार्यमुखे एकार्थीभावमेव प्रवेशयामः" इति। महदिदं प्रमोदस्थानम्।

स्थलान्तरं दर्शयति [त्र्यङ्गैरिति] अय मर्थः - पशौ चोदकप्राप्तः स्विष्टकृद्यागः प्रधानहविर्भ्यो हृदयादिभ्य उत्तरार्थं गृहीत्वा कर्तव्यः? उत अङ्गान्तरेभ्य इति संशये, प्रधानशेषप्रतिपत्त्यर्थत्वात्प्रकृतौ पशावपि प्रधानशेषेभ्यः कर्तव्यः। त्र्यङ्गैरिति वचनं तु त्रित्वविशिष्टाङ्गानामेव विधायकम्। तत्र चेज्याशेषाणामङ्गानां प्राप्तत्वात्प्राप्ताप्राप्तविवेकेन त्रित्वविधौ पर्यवसानं स्यात्। तेन तेषामेवाङ्गानां मध्ये त्रिभिरङ्गैः स्विष्टकृदिज्येतेति पूर्वपक्षे, प्रथमभक्ष इत्यत्रेव त्र्यङ्गैरिति समासानुपपत्त्याऽङ्गानुवादेन त्रित्वं न विधीयते, किन्तु त्रित्वविशिष्टाङ्गान्तरविधानम्। तथा चेज्याशेषभूतहृदयातिरिक्तैस्त्रिभिरङ्गैः स्विष्टकृदिज्येतेति सिद्धान्तितम्। यदाहुः -

"त्रित्वं नाङ्गानुवादेन विधातुं शक्यते तथा।
तस्य प्रसरभेदेन सामर्थ्यं हि विहन्यते।।" इति।

कल्पसूत्रोक्तानि हृदयाद्येकादशाङ्गानि तु - (१) हृदयं, (२) जिह्वा, (३) वक्षः, (४) यकृत्, (५) (६) वृक्णौ, (७) सव्यं दोः, (८) (९) उभे पार्श्वे, (१०) दक्षिणा श्रोणिः, (११) गुदम्।। इति।

तत्र त्रीण्यङ्गानि - दक्षिणोंऽसः, सव्या श्रोणिः, गुदं तृतीयमिति - यद्यपि गुदस्येज्याशेषत्वमस्ति, तथापि न तन्मध्यभागस्य स्विष्टकृदतिदेशः प्राप्यते। अपितु गुदतृतीयोत्तरार्धस्यैवेति तत्रापि संस्कारान्तरता। तथाच स्विष्टकृद्धोमाधिकरणे जैमिनेः सूत्रे "इज्या शेषात्स्विष्टकृदिज्येत प्रकृतिवत्, त्र्यङ्गैर्वा शरवद्विकारः स्यात्" इति। [एकप्रसरतेति] प्रथममुद्देश्यप्रतीतौ हि पश्चात्तत्र विधेयान्वयः। एवं चाङ्गानुवादेन त्रित्वविधौ समास एकदेशस्याङ्गशब्दस्य प्रथमं स्वार्थप्रत्यायकत्वं, पश्चाच्चैकदेशान्तरस्य त्रिशब्दस्येत्यवयवशो व्यापारद्वयप्रसङ्गात्पदद्वयस्यापि सम्भूयैकव्यापारत्वाभावेन एकार्थीभावलक्षणसामर्थ्याभावात्समासो न स्यादिति भावः। [दशम इति] दशमाध्याये सप्तमे पादे द्वितीयाधिकरण इत्यर्थः। [सङ्गच्छत इति] विशिष्टशक्त्यनभ्युपगम उद्देश्यविधेयभावेनान्वयप्रयोजिकायाः पदार्थानां पृथगुपस्थितेः सत्त्वेन प्रथमो भक्षः, त्रिभिरङ्गैरित्यादाविव उद्देश्यविधेयभावेनान्वये बाधकाभावात्तदसङ्गतिरेव। एकार्थीभावाभ्युपगमे तु घटपदाद् घटघटत्वयोरिव विशिष्टशक्त्यैव त्रित्वविशिष्टार्थोपस्थित्या न वाक्यार्थरूप उद्देश्यविधेयभावेनान्वय इति तत्सङ्गतिः स्पष्टैव।

यत्तु "प्रथमभक्ष इति समासरूप एकस्मिन् पदे एकांशेनोद्देश्यत्वे, अन्यांशेन विधेयत्वे चाङ्गीक्रियमाणे एकप्रसरताभङ्गापत्तेः कर्मान्तरमेवेदम्। नच तत्र दूषकताबीजाभावः। सामर्थ्यभङ्गस्यैव तद्बीजत्वात्। तथाहि - सर्वत्रोद्देश्यविधेयभावस्थल उद्देश्ये विधेयान्वयात्पूर्वमुद्देश्यस्योद्देश्यत्वेन

क्रियान्वयोऽवश्यं वाच्यः। अत एव "यद्वृत्तयोगः प्राथम्यमित्याद्युद्देश्यलक्षणम्" इत्यपि सङ्गच्छते प्राथम्यं = तत्त्वेन प्रथमं क्रियान्वयः। एवं च यत्र भिन्नपदस्थले योगेन स्वर्गं भावयेदित्यादौ तत्तत्पदात्पदार्थोपस्थित्यनन्तरं स्वर्गस्योद्देश्यत्वेन यागस्य विधेयत्वेन च क्रियान्वये प्रथमावगते पश्चादेव यागस्य विधेयस्य उद्देश्यस्वर्गेऽन्वय इति स्थितिः। तद्वच्चेहापि एकपदस्थले भक्षे प्राथम्यान्वयात्पूर्वं भक्षस्य क्रियान्वयोऽभ्युपगन्तव्यः। ततश्च क्रियान्वयात्पूर्वं भक्षप्राथम्ययोर्विशेष्यविशेषण-भावानवगमादेकार्थीभावलक्षणसामर्थ्याभङ्गादपरिपूर्णस्य समासपदस्य पदान्तरेणाख्यातेनाप्यन्वयायोगात्, क्रियान्वयात्पूर्वं विशिष्टार्थबोधकत्वमेव एकार्थीभावसामर्थ्यम्। एवं च समासे विशिष्टशक्त्यस्वीकारेऽपि निरुक्ताधिकरणसिद्धान्तार्थसिद्धौ कथमुक्तार्थोपष्टम्भकतया तदुपन्याससङ्गतिः" इति। तन्न। निरक्तैकार्थीभावस्य निर्मूलत्वात्। तथा सति तत्तत्प्रत्ययविधायकशास्त्रीयप्रत्यासत्तिन्यायमूलिकया "प्रकृतिप्रत्ययौ सहार्थं ब्रूत" इति यग्विधायकसूत्रस्थभाष्यसम्मतव्युत्पत्त्यैव प्रकृतिप्रत्ययोस्तल्लाभेन तद्धितविधौ समर्थपरिभाषोपस्थितेर्भाष्योक्ताया वैयर्थ्यापत्तेः। "संसृष्टार्थं समर्थम्" इति समर्थसूत्रस्थभाष्यपर्यालोचनया एकोपस्थितिजनकत्वस्यैव समर्थपदार्थत्वलाभाच्च। किं चोद्देश्यत्वविधेयत्वाभ्यां क्रियान्वय इत्यप्यसङ्गतं, तयोः परस्परनिरूपकत्वेनोद्देश्यविधयेयोरेव तद्रूपेणान्वयात्। किञ्च नीलमुत्पलमस्तीत्यादौ सत्तायामुत्पलस्योद्देश्यत्वेनान्वये तस्या विधेयत्वं वाच्यम्। नीलस्य विधेयतयान्वये च तस्या उद्देश्यत्वं वाच्यम्। न चेदमावृत्तिं विना सम्भवति, वैरूप्यात्। वाक्यभेदश्च नैवंविधे विषयेऽनुभवसिद्धिः। किञ्च "इको यणचि" इत्यादाविक इति षष्ठ्यन्तस्यादौ क्रियान्वयासम्भवेन तस्योद्देश्यत्वानुपपत्तिः। तत्र स्थान्यादेशभावसम्बन्धस्य षष्ठ्यर्थत्वेन तस्य क्रियान्वयायोगात्। किञ्च "पूर्वोच्चारितः संज्ञी परोच्चारिता संज्ञा" इत्यादिवृद्दिसंज्ञासूत्रस्थभाष्यग्रन्थेन पूर्वोच्चारितत्वमेव प्राथम्यमिति लभ्यते। एवं च निरुक्तरीत्या सामर्थ्याश्रयणायोगेन तदवलम्बनेनाधिकरणसिद्धान्तार्थासिद्ध्या विशिष्टशक्तिपक्षमाश्रित्यैव तत्समर्थनं कार्यमिति स्वोक्तार्थोपष्टम्भकतया तत्प्रदर्शनं कौण्डभट्टस्य युक्तमेवेति सुधियो विभावयन्तु।

एवं मीमांसकमते कर्मधारये विशिष्टशक्तिं व्यवस्थाप्य बहुव्रीहावपि तां व्यवस्थापयति [सङ्गच्छत इति] अयमर्थः। "अरुणया पिङ्गाक्ष्यैकहायन्या सोमं क्रीणाति" इति ज्योतिष्टोमप्रकरणे श्रूयते। तत्र किमरुणिमा वाक्यात्त्वा प्रकरणे सर्वद्रव्येषु निविशते? उत क्रीणातिना सम्बध्य तदङ्गमेकहायन्यां निविशते? इति संशये गुणस्यामूर्तत्वात्क्रयरूपक्रियासाधनत्वासम्भवेन

पृथग्भूतोऽविशेषात्प्राकरणिकद्रव्यमात्रे निविशत इति पूर्वपक्षे, अरुणापदस्य गुणितादात्म्येन गुणबोधकत्वम्। गुणिद्रव्यं च वाक्ये श्रुतत्वेन सन्निहितत्वादेकहायन्येवेति विशिष्टविधिरयमिति सिद्धान्तितमरुणाधिकरणे। तथा च तृतीये जैमिनेः सिद्धान्तसूत्रम् "अर्थैकत्वे द्रव्यगुणयोरैककर्म्यान्नियमः स्यात्" इति। (३-१-१२) अत्र एकहायनीपिङ्गाक्षीपदयोर्द्रव्यवाचकत्वं सिद्धवत्कृत्य, आरुण्यांश एव पार्थक्येन पूर्वपक्षः कृतः। समासशक्त्यस्वीकारे पिङ्गाक्ष्यैकहायनीशब्दयोरपि पिङ्गाक्षित्वैकहायनत्वादिगुणमात्रस्यावाच्यतया तेषामप्यमूर्तत्वात्क्रीणातौ करणत्वासम्भवेन क्रीणातिकरणस्यैतद्वाक्यादलाभादारुण्यस्य वाक्यभेदशङ्काया एवासम्भवात्तदसङ्गतिः स्पष्टैवेति। तदेतदाह [अरुण्यपदवदिति]। [इतरयोरपीति] एकहायनी पिङ्गाक्षीपदयोरपीत्यर्थः। [गुणमात्रवाचकतयेति] एकं हायनं यस्या इति षष्ठ्यर्थे समासविधानेन, षष्ठ्यर्थस्य सम्बन्धरूपत्वेन तस्यैव प्रधानतया च एकहायन्यादिसमासस्यापि सम्बन्धादिगुणमात्रवाचकत्वेनेत्यर्थः। एकाब्दत्वेत्यस्य एकाब्दसम्बन्ध इत्यर्थः। मात्रशब्देन द्रव्यस्य व्यवच्छेदः। अन्यथेत्यस्य विशिष्टशक्त्यनभ्युपगम इत्यर्थः। [क्रीणाताविति] तदर्थक्रयण इत्यर्थः। धात्वर्थनिर्देशेऽपि "ईक्षतेर्नाशब्दम्" "यजतिषु येयजामहं करोति" इत्यादाविव श्तिप्। एकहायनीपिङ्गाक्षीपदयोः समुदायशक्त्यभावेऽपि लक्षणया द्रव्यबोधकत्वाभ्युपगमे त्वरुणापदेऽप्यनुपपत्तिप्रतिसन्धानेन लक्षणया द्रव्यबोधकतया त्रिष्वपि लक्षितद्रव्यविध्युपपत्तौ वाक्यभेदशङ्काया एवासम्भवः। बहुव्रीह्योररुणापदस्य च लक्षितद्रव्याभिधायकताया अविशिष्टत्वेन बहुव्रीह्योरेव द्रव्यविधायकत्वं, नारुणापदस्येत्यत्र विनिगमकाभावात्। तस्मादरुणाधिकरणारम्भाय मीमांसकैर्बहुव्रीहौ शक्तिरवश्यं स्वीकार्या।

बहुव्रीहौ लक्षणायाः समस्यमानानेकपद - तत्समानाधिकरण्यालोचनापेक्षाधिक्येन विलम्बितत्वान्न तेन द्रव्यविधिः स्यात्। किन्तु गुणशब्देनैवेति क्रयसाधनद्रव्यनिवेशस्य पूर्वोत्तरपक्षयोः साम्यात्तदाक्षेप-पूर्वपक्षस्य वाक्यीयद्रव्यनिवेशसिद्धान्तस्य चायोगाद्बहुव्रीहौ शक्त्यस्वीकारेऽरुणाधिकरणारम्भासम्भव इत्यपि वदन्ति। तदेतदाह [इति भूषणे प्रपञ्चितमिति]। उपसंहरति [तस्मादिति]। [जैमिनीयैरिति] जैमिनेः सूत्राण्यस्मन्मतस्यानुकूलान्येव। तद्व्याख्यातारस्तु मतमस्माकं दूषयन्ति, तत्त्वसङ्गतमिति "जैमिनीयैरवश्याभ्युपेयः" इत्यनेन द्योत्यते।

"जैमिनीयैरिति वदता नैयायिकमतस्य सयुक्तिकत्वं ध्वन्यते" इति वदतां दर्पणकाराणां नैयायिकमतपक्षपात एव ध्वननहेतुर्नान्यः। नैयायिकास्तु समूलघातं घातिता एवेति समनन्तरपूर्वग्रन्थावलोकनेन सुव्यक्तमेव प्राज्ञानाम्।

[आस्तां विस्तर इति] यत्तु "द्वन्द्वे कर्मधारये चावयवार्थातिरिक्तार्थाभावन्न शक्तिः" इति। तन्न। "चार्थे द्वन्द्व" इति सूत्रस्थभाष्याप्रामाण्येन साहित्यस्य समुदायशक्यत्वात्। तत्र हि चार्थे विधीयमानस्य समासस्य तद्वदेवालिङ्गसङ्ख्यतामाशङ्क्य शब्दशक्तिस्वभावेन गुणवाचनानामिवाश्रयतो लिङ्गवचनसिद्ध्या वा न दोष इति समाहितम्। बहुव्रीहावयपदार्थस्येवात्रापि चार्थस्यैव प्राधान्यमिति तद्भाष्याशयः। अत एव "गोस्त्रियोः" इति सूत्रे भाष्ये कुक्कुटमयूर्यावित्यत्र ह्रस्वमाशङ्क्य "द्वन्द्वे प्रतिषेधः" इत्युक्तम्। समासार्थेऽवयवार्थस्योपसर्जनत्वमिति कैयटः। द्वन्द्वसूत्रे भाष्ये आश्रयगतलिङ्गसङ्ख्याग्राहित्वोक्त्या समुदायस्यावयवतादात्म्येन भानं स्पष्टमेवोक्तम्। एतावतैव "उभयपदार्थप्रधानो द्वन्द्वः" इति व्यवहारः। समूहस्यावयवेभ्यो भेदेनाप्रतीतेः। अत एव "द्वन्द्वः समासिकस्य च" १०-३३ इति गीतावचनं सङ्गच्छते। "सामासिकस्य = समाससमूहस्य" इति श्रीशङ्करगीताभाष्यम्। "अचित्तहस्तिधेनोष्ठक्" ४-२-४७ इति समूहार्थे 'क्। समाससमूहस्य मध्येऽहं द्वन्द्व इति तदर्थः। कर्मधारयेऽपि वाक्य इववृत्तौ चशब्दाप्रयोगाय एकार्थीभाव आवश्यकः। किञ्च नीलोत्पलादौ वाक्ये चकारप्रयोगेण प्रवृत्तिनिमित्तोत्पलत्व - नीलत्वयोर्नीलोत्पलयोर्वा साहित्यं भासते। अत एव नीलोत्पलादौ द्वन्द्वमाशङ्क्य अनवकाशेन कर्मधारयेण बाधान्नेति भाष्य उक्तम्। अवयवातिरिक्तार्थशक्तिस्वीकारादेव निरुक्तमीमांसकसिद्धान्तसङ्गतिरपि। एतेन "साहित्याप्रतीतेर्द्वन्द्वे न शक्तिर्नवा लक्षणा। युक्तं चैतत्। द्वन्द्वावच्छिन्नस्य प्रधानीभूतार्थद्वयप्रतिपादकत्व एव "द्वन्द्वः सामासि कस्य च" इत्यनेन समाससमूहमध्ये द्वन्द्वस्य विभूतितया परिगणनस्य भगवत्कृतस्य सङ्गतिः। विशिष्टशक्त्या लक्षणया वा तस्य प्रधानीभूतसाहित्यप्रतिपादकत्वे तु समासान्तराद् द्वन्द्वस्याविशेषात्तदसङ्गतिः स्पष्टैव। किञ्च वृत्तित्वावच्छेदेनैकार्थीभाववादिमते स्वावयवार्थातिरिक्तार्थाभिधायकत्वरूपवृत्तिरूप-लक्षणस्य कर्मधारयेऽव्याप्तिः। तत्रावयवार्थातिरिक्तार्थाभावात्" इति नैयायिकोक्तमपास्तम्।। ।।३४।।

'राजुपरुषः' इत्यादौ राजा चासौ पुरुषश्चेत्येव विग्रहः। 'चित्रगुः' इत्यादौ च चित्राणां गवामयमित्येव, समानार्थत्वानुरोधात्। यद्यपि प्रथमान्तानामेव बहुव्रीहिरिति 'शेषो बहुवीहिः' इति सूत्राल्लभ्यत इति प्रथमान्तं पक्षे वाक्यं 'चित्रा गावो यस्य' इत्येवं सम्भवत्येव, 'षष्ठी' इति समासविधानात् 'राज्ञः पुरुष' इति पक्षे वाक्यं, तथापि तस्य न विग्रहत्वं भिन्नार्थत्वात्, किंतूक्तस्यैवेति मीमांसकाः। तान्प्रसङ्गान्निरस्यति -

आख्यातं तद्धितकृतोर्यत्किंचिदुपदर्शकम्।
गुणप्रधानभावादौ तत्र दृष्टो विपर्ययः।।८।। (३५)

तद्धितकृतोर्यत्किंचिर्थबोधकं विवरण् आख्यातं, तत्र विपर्ययो दृष्टः। तथा हि - 'आक्षिकः' 'कुम्भकारः' इत्यत्राक्षकरणकव्यापाराश्रयः, कुम्भोत्पत्यनुकूलव्यापाराश्रय इति बोधः। 'अक्षैर्दीव्यति' 'कुम्भं करोति' इत्यत्र अक्षकरणिका देवनानुकूला भावना, कुम्भोत्पत्त्यनुकूला भावनेति बोधः। कृत्प्रत्यये कारकाणामाख्याते भावनायाः प्राधान्यं वदतो मीमांसकस्यापीति गुणप्रधानभावांशव्यत्यासो न विवरणत्वबाधक इति नात्र पाक्षिकस्य 'चित्रा गावो यस्य' इत्यादेर्विग्रहत्वे बाधकमस्तीति भावः।।८।। (३५)

एवं समासे विशिष्टशक्तिं व्यवस्थाप्य समासार्थनिर्णायकविग्रहप्रदर्शने विप्रतिपन्नानां मीमांसकानां मतं निराकरिष्णुः "आख्यातं तद्धितकृतोः" इति कारिकामवतारयति [राजपुरुष इत्यादाविति]। [इत्येवेति] एवशब्देन राज्ञः पुरुष इत्यादेर्व्यावृत्तिः। [समानार्थत्वानुरोधादिति] अन्यथा तस्य शक्तिग्राहकत्वानुपपत्तिरित्यर्थः। [बहुव्रीहिरितीति] बहुव्रीहिरित्ययमर्थ इत्यर्थः। [सूत्रादिति] तथाच तत्रैव सूत्रे भाष्यम् "त्रिकतस्तर्हि शेषग्रहणम्। यस्य त्रिकस्यानुक्तः समासः, स शेषः। कस्य चानुक्तः? प्रथमायाः" इति। द्वितीयादीनां प्रतिपदं समासविधानात्प्रथमायाः शेषत्वात्प्रथमान्तानां पदानां बहुव्रीहिः" इति कैयटः। एवं च "विशेषणं विशेष्येण बहुलम्" इत्यादौ प्रथमाया उपयुक्तत्वेऽपि न दोषः। "प्रादयो गताद्यर्थे प्रथमया" इत्यादि तु व्याख्यानरूपं, नतु स्वतन्त्रविधायकम्। अतो न दोषः। यद्वा शेष इत्यस्य प्रथमान्तत्वात्प्रथमान्तगृहीतत्रिकस्य प्रतिपदसमुच्चारितस्यैव ग्रहणादेतदर्थलाभ इति बोध्यम्। [प्रथमान्तमिति] प्रथमान्तपदघटितमित्यर्थः। [तस्येति] चित्रा गावो यस्येत्यादेरित्यर्थः। [भिन्नार्थत्वादिति] राजपुरुष इति समासाद्राजसम्बन्ध्यभिन्नः पुरुष इति राजसम्बधिप्रकारकाभेदसंसर्गकबोधोत्पत्त्या राज्ञः पुरुष इति वाक्याद्राजसम्बन्धवानिति राजसम्बन्धप्रकारकाश्रयतासंसर्गकबोधोत्पत्त्या च तयोर्भिन्नार्थत्वं स्पष्टमेव। एवं चित्रगुरित्यादितश्चित्राभिन्नगोस्वामीति बोधोपत्त्या, चित्रा गावो यस्येति वाक्यात्तत्स्वामिकाश्चित्रा गाव इति बोधोत्पत्त्या च तयोर्भिन्नार्थत्वं स्पष्टमेव। अतो न तस्य विग्रहत्वमिति भावः। [मीमांसका इति] तथाचारुणाधिकरणे वार्त्तिककाराः - यदि ह्यन्यपदार्थः षष्ठ्यर्थः स्यात्ततो यथा राज्ञः पुरुष इत्यत्र षष्ठ्यन्तत्वाद्राजा पुरुषे विशेषणं भवति। प्रथमान्तत्वाच्च पुरुषः प्रधानरूपेण समासार्थो भवति, एवमेव चित्रग्वादिपदैर्देवदत्तादिविशिष्टा गाव एव प्रतीयेरन्, नतु चित्रगोविशिष्टदेवदत्तादिः। तस्माच्चित्राणां गवामयमितीदृशेऽर्थे बहुव्रीहि र्वर्तते" इति। एवं च "शेषो बहुव्रीहिः" "षष्ठी" इत्यादिशास्त्रबलाच्चित्रा गावो यस्य, राज्ञः पुरुषः इति समासाभावपक्षे वाक्यमस्तु। समासार्थनिर्णायकं वाक्यं तु मदुक्तमेवेति मीमांसकानामाशयः।

इदं च (मीमांसकदूषणविधानं) न स्वकपोलकल्पितं, किन्तु वृद्धसम्मतमेवेति सूचयितुं हरिकारिकां दीक्षितः स्वग्रन्थे उपनिबध्नाति - [आख्यातमिति] (वाक्यपदीये द्वितीयाकण्डे ३० कारिका)। यद्यपि

"आख्यातं तद्धितार्थस्य यत्किंचिदुपदर्शकम्।
गुणप्रधानभावस्य तत्र दृष्टो विपर्ययः"

इति वाक्यपदीये पाठः, तथापि तत्र तद्धितग्रहणं कृतोऽप्युपलक्षणं न्यायसाम्यादित्याशयेन "आख्यातं तद्धितकृतोः" इति दीक्षितेन किंचि"त्यासेन पठिता।

यद्यपि मीमांसकोक्तमयुक्तं, फलद्वयार्थं युगपद्वाक्यद्वयस्य प्रयोगापत्तेः। तत्प्रदर्शितविग्रहस्य "मत्वर्थे बहुव्रीहिः" "कर्तृकर्मवचनेनाप्रथमायाः" "अप्रथमाविभक्त्यर्थे बहुव्रीहिः" इत्यादिमुनिवचनविरुद्धत्वाच्च। नचालौकिके प्रथमान्तनामेव प्रवेशेन न तद्विरोध इति वाच्यम्। अलौकिके प्रविष्टानामेव पक्षान्तरे समासाभावे परिनिष्ठितानां तदर्थबोधनाय प्रयोगसम्भवे उपस्थितपरित्यागेनानुपस्थितपदघटितलौकिकविग्रहवाक्यकल्पनाया अनौचित्यात्। किञ्च न केवलमर्थबोधनायैव विग्रहवाक्यप्रयोगः, किन्तु समासा वैंकल्पिकत्वबोधनायापि। तद्दर्शकं चोक्तरीत्या चित्रा गाव इत्याद्येव, न मीमांसकोक्तम्" इत्यादिना मीमांसकमतं दूषयितुं सुशकमेव। अत्र च "अषष्ठ्यर्थ बहुव्रीहौ" इति कारिकाग्रन्थोऽपि सहकारी भवितुमर्हति। तथाहि - "अषष्ठ्यन्तबहुव्रीहौ" इति पाठान्तरम्। अषष्ठ्यन्तेति स्वरूपसदुपलक्षणं मतान्तरनिराकरणाय। मीमांसकैः "चित्राणां गवामयम्" इत्यषष्ठ्यन्तेन बहुव्रीहिराश्रीयते। तादृशे तत्कल्पिते अषष्ठ्यन्तबहुव्रीहौ, व्युत्पत्त्यन्तरकल्पना = "शेषो बहुव्रीहिः" "अप्रथमा विभक्त्यर्थे बहुव्रीहिः" इत्यादिमुनिवचनविरुद्धव्युत्पत्त्यन्तरकल्पना कार्या। प्रथमान्तेन बहुव्रीहिविग्रहः, घटकपदानि तु षष्ठ्यन्तानीति व्युत्पत्तिर्मीमांसकैः कल्प्या, क्लृप्तत्यागश्च = चित्रा गावो यस्येति षष्ठ्यन्तत्वेन मुनिसम्मतत्वेन क्लृप्तस्य षष्ठ्यन्तस्य त्यागोऽपि। तव = चित्राणां गवामयमिति अषष्ठ्यन्तेन [प्रथमान्तेन] विगृह्णतो मीमांसकस्य तव, अस्ति, तत् = तस्मात्। शक्तिं = षष्ठ्यन्तविग्रहप्रदर्शनेन समासे विशिष्टशक्तिम्, किं न कल्पयेरिति कारिकार्थः, तथापि स्फुटत्वादेतदुपेक्ष्य मीमांसकमते दूषणान्तरं दीक्षितैरुक्तम् "आख्यातं तद्धितकृतोः" इति। स्पष्टं चेदं भूषणे।

कारिकायां [तद्धितकृतोरिति] तदर्थयोरित्यर्थः। [यत्किञ्चिदुपदर्शकमिति] यत्किञ्चिदर्थबोधकं नतु साकल्येनेत्यर्थः। कारिकाघटकमाख्यातपदं विवरणघटकाख्यातपरमित्याह [विवरणमाख्यातमिति]

तद्घटकमाख्यातमित्यर्थः। तत्र हेतुः - गुणप्रधानभावादावित्यादिः। तत्रेत्यस्य कृत्तद्धितयोरित्यर्थः। [विपर्ययो दृष्ट इति] भावप्रधानतिङन्तार्थविहितस्यापि सत्त्वप्रधानार्थबोधकत्वरूपो विपर्ययो दृष्ट इत्यर्थः। यत्तु "तत्रेत्यस्य तिङन्तघटितविवरण इत्यर्थ" इति दर्पणकाराः, तन्न। तथा सति भावनाप्रधानकतिङन्तस्य सत्त्वप्रधानकबोधजनकत्वरूपो विपर्यय इत्यर्थापत्त्या अक्षैर्दीव्यतीति विवरणे अक्षकरणिका देवनानुकूला भावना" इति भावनाविशेष्यकबोधप्रदर्शनपरप्रकृतग्रन्थविरोधात्। "मीमांसकस्यापि" इति वदतो ग्रन्थकर्तुरपि तादृशबोधस्यापीष्टत्वात्। "विवरणे तेन दीव्यतीत्यादिसूत्रे च तिङन्ते गुणप्रधानभावो विपरीत इत्यर्थ" इति तु वैयाकरणनागेशः। दीक्षित - भूषणकृदादीनामाशयापेक्षया प्रकृते नागेशाशयो युक्तो भाष्यानुगृहीतश्चेति त्वन्यदेतत्, प्रकृतग्रन्थस्य दीक्षितभूषणकृदाशयानुरोधेनैव व्याख्येयत्वादित्यलम्।

[आक्षिक इति] "तेन दीव्यति खनति जयति जितम्" ४-२-२ इत्यनेन दीव्यतीत्यर्थे 'क्'। [अक्षकरणकेति] अक्षाभिन्नकरणकेत्यर्थः। [कुम्भोत्पत्तीति] कुम्भकर्मकोत्पत्तीत्यर्थः। [प्राधान्यमिति] "सत्त्वप्रधानानि नामानि" "भावप्रधानमाख्यातम्" इति निरुक्तात्कृदन्ते कारकाणां, तिङन्ते भावनायाश्च प्राधान्यमित्यर्थः। [मीमांसकस्यापि] अस्य सम्मत इति शेषः। निरुक्तो बोधः कृदन्ते कारकाणां तिङन्ते च भावनायाः प्राधान्यं वदतो मीमांसकस्यापि सम्मत इति योजना। इति शब्दो हेतौ। [न विवरणत्वबाधक इति] वृत्तिविग्रहयोः समानार्थत्वानुरोधेन चित्राणां गवामयमिति रीत्या विगृह्यद्धिर्मीमांसकैः कुम्भं करोतीत्यादौ निरुक्तरीत्या विशेषणविशेष्यभावव्यत्यासस्य स्वीकृतत्वान्न तस्य विवरणबाधकत्वम्। तथाच विशेषणविशेष्यभावव्यत्यासस्य स्वीकृतत्वान्न तस्य विवरणबाधकत्वम्। तथा च विशेषणविशेष्यभावांशे समानार्थत्वविरहेऽप्यन्यांशे विवरणत्वं शक्तिनिर्णायकत्वं च समानार्थत्वात् स्यादिति भावः। एवं च वृत्तिविग्रहयोस्समानार्थकत्वनियमो विशेषणविशेष्यभावातिरिक्तविषयक एवेति बोध्यम्।। ।।३५।।

नन्वस्तूक्तरीत्या सर्वत्र समासे शक्तिः, अस्तु च तथा विग्रहस्तथाऽपि षष्ठीतत्पुरुषकर्मधारययोः शक्तिमत्त्वाविशेषात् निषादस्थपत्यधिकरणसिद्धान्तसिद्धिर्न स्यादित्यत आह -

पर्यवस्यच्छाब्दबोधाविदूरप्राक्क्षणस्थिते।
शक्तिग्रहेऽन्तरङ्गत्वबहिरङ्गत्वचिन्तम्।।९।। (३६)

पर्यवस्यंश्चासौ शाब्दबोधश्च तस्मादविदूरश्चासौ प्राक्षणश्च तदानींतनलाघवमादायाधिकरणाविरोध इत्यर्थः। अयं भावः - निषादस्थपतिपदं समासशक्तिपक्षे निषादरूपे निषादानां च स्थपतौ निषादस्वामिके पुरुषान्तरे चेत्येवं सर्वत्र शक्तत्वान्नानार्थकम्। तथा च "नानार्थे तात्पर्याद्विशेषावगतिः" इति न्यायेन तत्कल्पनायां पदद्वये पूर्वोपस्थितार्थ एवोपस्थित्यादिलघावात् तत् कल्प्यत इति। परेषामपि सति तात्पर्ये 'यष्टीः प्रवेशय' इति वल्लक्षणाया दुर्वारत्वात्तात्पर्यमेव कल्प्यकोटाववशिष्यत इति दिक्।।९।। (३६)

इति कौण्डभट्टविरचिते वैयाकरणभूषणसारे

समासशक्तिनिर्णयः समाप्तः।।

एवं मुनिसम्मतं विशिष्टशक्तिपक्षं विग्रहं च प्रदर्श्य, स्वसिद्धांते प्रसक्तं मीमांसकसिद्धांतासिद्धिरूपं विरोधं परिहर्तुं 'पर्यवस्यत्' इत्यादिकारिकामवतारयति [नन्विति]। [सर्वत्रेति] अन्यपदार्थप्रतिपादके बहुव्रीहौ तदप्रतिपादके तत्पुरुषादौ स्वार्थमात्रोपस्थापके कर्मधारये चेत्यर्थः। [शक्तिरिति] समुदायशक्तिरित्यर्थः। [तथा विग्रह इति] राज्ञ पुरुषः, चित्रा गावो यस्येत्यादिविग्रह इत्यर्थः। [निषादस्थपत्यधिकरणेति] "ऐन्द्रं वास्तुमयं चरुं निर्वपेत्" इत्युपक्रम्य श्रूयते - "एतया निषादस्थपतिं याजयेत्" इति। तत्र संशयः - निषादानां स्थपतिः = प्रभु रिति षष्ठीसमासाश्रयणेन निषादः स्थपतिर्यस्येति बहुव्रीह्याश्रयणेन वा त्रैवर्णिकोऽत्राधिकारी? उत निषादश्चासौ स्थपतिश्चेति कर्मधारयाश्रयणेन प्रभुर्निषादोऽधिकारी? इति। तत्र कर्मधारयाश्रयणेनाविदुषो वेदानधिकारिणोऽत्रैवर्णिकस्याधिकारित्वकल्पनापेक्षया षष्ठीबहुव्रीहिसमासयोरन्यतस्याश्रयणेन विदुषो वेदाधिकारिणो अग्निहोत्रिणस्त्रैवर्णिकस्यैवाधिकारित्वकल्पनं कार्यमिति पूर्वपक्षे, बहुव्रीहेः षष्ठीतत्पुरुषः प्रबलः, अन्तरङ्गत्वात्। ततोऽपि कर्मधारयोऽन्तरङ्गत्वात्प्रबलः। एवं च प्रबलस्य कर्मधारयस्याश्रयणेन निषादस्यैव स्थपतेरधिकारः कल्प्यः। वचनप्रामाण्याच्च निषादस्य तद्यज्ञोपयोगिवेदाधिकारः कल्प्यत इति निषादस्थपत्यधिकरणे सिद्धान्तितम्। तदुक्तं जैमिनिना "स्थपतिर्निषादः स्याच्छब्दसामर्थ्यात्" ६-१-५१ इति।

[षष्ठीकर्मधारययोरिति] इदमुपलक्षणं बहुव्रीहेरपि। [सिद्धान्तसिद्धिर्नस्यादिति] अयं भावः - बहिर्भूतपदार्थविषयकबोधजनकबुहुव्रीह्यपेक्षया स्वघटकपदार्थविषयकबोधजनकस्तत्पुरुषोऽन्तरङ्गः,

षष्ठ्याद्यर्थरूपाधिकार्थावगाहिबोधजनकतत्पुरुषापेक्षया स्वघटकपदार्थमात्रविषयकबोधजनकः कर्मधारयोऽन्तरङ्ग इति रीत्या तेषामन्तरङ्गबहिरङ्गभावो वक्तव्यः। स च एकार्थीभावरूपविशिष्टशक्तिवादे नोपपद्यते। अन्यपदार्थे षष्ठ्याद्यर्थेऽपि च प्रत्येकातिरिक्तविशिष्टशक्यत्वसत्त्वेन स्वपदार्थत्वस्यैव सत्त्वात्। एवं च षष्ठीतत्पुरुषकर्मधारयबहुव्रीहीणां त्रयाणामपि शक्यार्थबोधने वैषम्याभावात्कर्मधारयस्यैवाश्रयणे विनिगमकाभावात्कर्मधारयप्राबल्येन मीमांसकैः प्रदर्शिता निषदस्थपत्यधिकरणसिद्धान्तसिद्धिर्नस्यादिति।

कारिकायां [शक्तिग्रह इति] इदमुपलक्षणमुपस्थितेरपि। [चिन्तनमिति] अस्य "नासङ्गतिः" इति शेषः। [तदानींतनलाघवमिति] अयं भावः - स्वघटकपदघटितवाक्यदृष्टार्थमात्रविषयक-तत्पुरुषसमासीयशक्तिग्रहापेक्षया बहुव्रीहिसंज्ञकपदसमुदायीयशक्तिग्रहस्य स्वघटकपदघटितवाक्य-दृष्टार्थातिरिक्तार्थविषयकतया बहिरङ्गत्वम्। एवं तत्पुरुषसमासघटकपदघटितवाक्यदृष्टषष्ठ्याद्यर्थ-विषयकतदीयशक्तिग्रहापेक्षया षष्ठ्याद्यर्थासंवलितस्वार्थमात्रविषयककर्मधारयसमासघटकपदघटितवाक्यदृष्ट-कर्मधारयीयशक्तिग्रहस्यान्तरङ्गत्वम्। एवं शक्तिज्ञानजन्यपदार्थोपस्थितावप्यन्तरङ्गबरिरङ्गभावो द्रष्टव्यः। एवं च तत्पुरषादीनां त्रयाणामपि शक्यार्थप्रतिपादकत्वाविशेषेऽपि निरुक्तरीत्या शक्तिग्रहादिकालिकमन्तरङ्ग-बहिरङ्गभावमादायाधिकरणविरोधः परिहरणीयः। निषादस्थपतिशब्दस्यान्तरङ्गत्वेन निषादरूपस्थपतौ शीघ्रोपस्थितिजनकत्वानुकूलात्सामर्थ्याच्छक्तिरिति जैमिनिसूत्रस्यार्थः। कारिकायामन्तरङ्गबहिरङ्गशब्दौ लाघवगौरवपरौ - इति।

ननु लाघवमात्रेण नार्थनिर्णयसिद्धिः, अन्यथा बहुव्रीहित्वाभिव्यञ्जकसमासान्तादीनामाभावे सर्वत्रापि कर्मधारयत्वापत्तेः। लाघवमात्रेण सर्वेषामपि धर्ममात्रवाचकतापत्तौ विशिष्टशक्त्युच्छेदप्रसङ्गाच्चेत्यत आह - [अयं भाव इति] निषादस्थपतिशब्दस्य नानार्थत्वे किमायातमत आह [तथा चेति] क्व तात्पर्यमिति संदेह इति शेषः। तत्कल्पनायां = तात्पर्यकल्पनायाम्। उपस्थित्यादीत्यादिपदेन शक्तिग्रहस्य सङ्ग्रहः। तत् = तात्पर्यम्। एवं च लाघवमात्रेण न प्रकृतार्थसिद्धिः, किन्तु लाघवं तात्पर्यकल्पनायामुपयुज्यते, तेन च प्रकृतार्थसिद्धिः। निषादस्थपतिशब्दस्य नानार्थतया ततो नानार्थोपस्थितौ "नानार्थे तात्पर्याद्विशेषावगतिः" इति न्यायेन तात्पर्यविषयीभूतार्थस्यैव बोधो, नान्यस्य तात्पर्यकल्पकं तु लाघवादिकमिति निषादस्थपतिपदेन निषादरूपस्य स्थपतिरूपार्थस्यैवोपस्थितिर्नान्यस्येति तदधिकरणसिद्धान्तोपपत्तिरिति बोध्यम्।

ननु विशिष्टशक्त्यस्वीकारेऽपि बहुव्रीहिवन्यपदार्थे लक्षणाकल्पनाक्लेशेन षष्ठीसमासे पूर्वपदे लक्षणास्वीकारापत्तिभिया च कर्मधारये तदभावेन च लाघवात्कर्मधारय एव स्वीकार्यः - इत्यक्लेशेन परमतरीत्या निषादस्थत्यधिकरणसिद्धान्तोपपत्तौ क्लिष्टा निरुक्तरीतिरयुक्तेत्यत आह [परेषामपीति] [सति तात्पर्य इति] कर्मधारयस्वीकारे लाघवसद्भावेऽपि अन्यपदार्थे पूर्वपदस्य सम्बन्ध्यर्थे वा तात्पर्ये सतीत्यर्थः।

[यष्टीः प्रवेशयेति] यष्टिकर्मकानयनरूपार्थस्य निराबाधेन सिद्धावपि यष्टिधरकर्मकतात्पर्यसत्त्वे यष्टिपदस्य यष्टिधरेषु लक्षणा स्वक्रियते, प्रकृतेऽपि तद्वदेवेत्यर्थः। [लक्षणाया इति] अन्यपदार्थे, सम्बन्ध्यर्थे चेत्यर्थः। [दूर्वारत्वेनेति] सति तात्पर्ये तदर्थं तत्कल्पनाया दुर्वारत्वेनेत्यर्थः। [तात्पर्यमेवेति] तथाच समासान्तरजन्यबोधस्य तात्पर्याभावेनैव वारणीयतया तदर्थं तात्पर्यकल्पनस्यावश्यकतया, न लाघवमात्रेण परेषां मतेऽपि निषादस्थपत्यधिकरणसिद्धान्तसिद्धिः। किन्तु निरुक्तरीत्यैवेति भावः। किञ्च परेषां मतमसङ्गतमेव, मीमांसावार्त्तिककारैर्बहुव्रीहौ विशिष्टशक्त्यभ्युपगमेन तत्र लक्षणाया अभवात्तस्य बहुव्रीहितुल्यतया, तद्रीत्या बहुव्रीहिवारणोपायाभावेनाधिकरणसिद्धान्तार्थासिद्धेः। बहुव्रीहौ न शक्तिर्नवा लक्षणेत्यरुणाधिकरणस्थनव्यमतरीत्यापि शक्ति - लक्षणयोरभावेन तस्य कर्मधारयतौल्यापत्तावधिकरणसिद्धान्तार्थासिद्धिः स्पष्टैव। विस्तरस्त्वन्यतोऽवसेयः, तदाह [दिगिति] उक्त एव दिगर्थः।। ।।३६।।

इति वैयाकरणभूषणसारतत्त्वदर्शिन्यां

समासशक्तिनिर्णयः।।५।।

अथ शक्तिनिर्णयः

शक्तिप्रसङ्गात्तस्याः स्वरूपमाह -

इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा।
अनादिरर्थैः शब्दानां सम्बन्धो योग्यता तथा।।१।।(३७)

इन्द्रियाणां - चक्षुरादीनां, स्वविषयेषु - चाक्षुषेषु घटादिषु यथाऽनादिर्योग्यता तदीयचाक्षुषादिकारणता, तथा शब्दानामप्यर्थैः सह तद्बोधकारणतैव योग्यता, सैव शक्तिरित्यर्थः।

ननु न बोधकारणत्वमनादिभूतं शक्तिः, आधुनिकदेवदत्तादिपदे तदभावात्, अन्यथा पित्रादिसङ्केताज्ञाने ऽप्यन्वयबोधप्रसङ्गः, लाक्षणिकातिव्याप्तेश्चेति सङ्केतज्ञानमपि हेतुर्वाच्यम्। तथाचावश्यकत्वात् स एव शक्तिरस्तु, स चाऽऽधुनिके पित्रादेर्गवादौ चेश्वरस्येति चेत्?

अत्रोच्यते - सङ्केतो न स्वरूपेण हेतुः, अगृहीतशक्तिकादर्थबोधप्रसङ्गात्। नापि सामान्यतो ज्ञातः, प्रमेयत्वादिना तज्ज्ञानेऽपि बोधप्रसङ्गात्। नापि सङ्केतत्वेन तज्ज्ञानं हेतुः, गवादिपदेष्वीश्वरादेः सङ्केतत्वेन तज्ज्ञानशून्यानां लौकिकमीमांसकादीनां तत्तदर्थबोधजनकत्वग्रहवतामेव बोधेन व्यभिचारात्।

नचार्थधीजनकतावच्छेदकत्वेन तज्ज्ञानं हेतुः, ततोऽपि लाघवेनार्थधीजनकत्वेनैव हेतुतायामस्मत्पक्षसिद्धेः। न चाऽऽधुनिकदेवदत्तादौ सङ्केतज्ञानादेव बोधेनास्य व्यभिचारः, तत्रापि "इदं पदमेनमर्थं बोधयतु" इतीच्छाग्रहे पदे तदर्थबोधकत्वस्यावगाहनेन व्यभिचाराभावात्। न च स्वातन्त्र्येणार्थबोधकताज्ञानं कारणं वाच्यम्। अन्यथा नेदं तद्धीजनकमिति जानतोऽस्माच्छाब्दादयमर्थो बुद्धोऽनेनेति जानतस्तद्ग्रहापत्तेरिति वाच्यम्, नेदं तद्धीजनकमिति ग्रहवतो बोधेन पदे परग्रहं जानतोऽपि तद्ग्रहासम्भावात्। अन्यथा भ्रान्तिज्ञस्यापि भ्रान्तत्वापत्तेरिति।

इदं चार्थधीजनकत्वं पित्रादिसङ्केतज्ञानाद्ह्यते। अतस्तज्ज्ञानात्पूर्वं न बोधः।

अथ शाक्तिनिर्णयः

सङ्गतिं दर्शयति - [शक्तिप्रसङ्गादिति] - "समासे खलु भिन्नैव शक्तिः पङ्कजशब्दवत्" इति कारिकाभागे "शक्तिग्रहेऽन्तरङ्गत्वबहिरङ्गत्वचिन्तनम्" इति कारिकाभागे च शक्तिपदोपादानेन स्मृतायाः शक्तेरनुपेक्षणीयत्वादिति भावः। [तस्याः स्वरूपमिति] शक्तेः स्वरूपमित्यर्थः। तत्स्वरूपे विप्रतिपत्तीर्निराकर्तुमादौ तत्स्वरूपप्रदर्शनमित्याशयः। अत एव मतान्तरनिराकरणेन स्वीकृतः "बोधजनकत्वं शक्ति" रिति स्वसिद्धान्तो भर्तृहरेरपि सम्मत इत्याशयं स्फुटीकर्तुं सम्बन्धसमुद्देशे स्थितां (२९) हरिकारिकामुदाहरति वैयाकरण मतोन्मज्जननामककारिकाग्रन्थकर्ता दीक्षितः - [इन्द्रियाणामिति]। स्पष्टं चेदं भूषणे। एतदादशयेनैव "असाधुरनुमानेन" "सम्बन्धशब्दे सम्बन्धः" इत्यादिकारिकाद्वयमपि वाक्यपदीयादेवोद्धृत्य स्वग्रन्थे उपनिबबन्ध दीक्षितः।

कारिकां व्याचष्टे - [इन्द्रियाणामिति]। इन्द्रियशब्दो ज्ञानेन्द्रियपर इत्याह [चक्षुरादीनामिति]- ननु निर्विषयाणां तेषां कथं घटादिर्विषयोऽत आह [चाक्षुषेष्विति] - संयोगादिना सन्निकर्षेणेन्द्रियविषयेष्वित्यर्थः। इदं त्वाचादिप्रत्यक्षस्याप्युपलक्षण्। [अनादिरिति] - न विद्यते आदिर्यस्याः सा अनादिः। अनेनास्याः स्वाभाविकत्वं सिद्ध्यतीत्याशयः। [शब्दानामपीति] - अयमर्थः - यथा चक्षुरादीनां रूपादिविषये पुरुषप्रयत्नानपेक्षा ग्राहकता। न हि यत्नेनापि रूपे रसननिवेशः शक्यक्रियः, तथा घटादिशब्दानामपि घटाद्यर्थविषये तादृशी बोधकता। गवार्थे घटशब्दनिवेशो नैव शक्यः। तथा सत्यसाधुरेव स्यात्। तथाच भाष्यम् "यो हि गामश्व इति ब्रूयात्, न जातुचित्सम्प्रत्ययः स्यात्" इति। यथारुचि सङ्केते हि न वाचकशक्तिपुरस्कारेणान्यविषये शब्दाः प्रवर्तन्ते। यद्यपीन्द्रियाणां कारकत्वादज्ञातानामेव ज्ञानजनकत्वं, शब्दस्य तु ज्ञापकत्वात्स्वज्ञानेनान्यधीहेतुत्वमिति वैषम्यं, तथापि शक्तेः पुरुषप्रत्यत्नानपेक्षायाः साधारण्यमात्रे साम्यम् - इति।

शक्तिः पदार्थान्तरमिति केचित्। ईश्वरेच्छा शक्तिरिति परे। ईश्वरज्ञानं सेत्यन्ये। शब्दार्थयोः स्वाभाविक एव सम्बन्धः शक्तिरिति माध्वाः। ईश्वरसङ्केतः शक्तिरिति नैयायिकाः। एवं विप्रतिपत्तीनां सत्त्वात्तन्निराकरणेन बोधकता शक्तिरिति स्वसिद्धान्तं व्यवस्थापयितुं शङ्कते [नन्विति]। अनादिभूतं = स्वाभाविकम्। [आधुनिकेति] आधुनिकैः संकेतिते देवदत्तादिपदे इत्यर्थः। [तदभावादिति] अनादिभूतबोधकारणत्वस्याभावादित्यर्थः। ननु तत्र शक्त्यभावे मानाभावोऽत आह [अन्यथेति] तत्र शक्तिसत्त्वे इत्यर्थः। [पित्रादिसङ्केताज्ञानेऽपीति] तत्रापि यदि शक्तिः स्यात् तर्हि पित्रादिसङ्केतज्ञानस्य

तद्ग्राहकतया तज्ज्ञानशून्यसमयेऽपि तद्बोधप्रसङ्ग इत्यर्थः। दोषान्तरमाह [लाक्षणिकेति]। लाक्षणिकपदस्यापि बोधजनकतया तत्राप्यनादिशक्तिप्रसङ्ग इत्यर्थः। [इतीति] इति हेतोरित्यर्थः। अनादिभूतस्य बोधकारणत्वस्य शक्तित्वे निरुक्तदोषद्वयापत्तेरिति यावत्। ततः किमायातम्? अत आह [तथाचेति]। सङ्केतस्यापि हेतुत्वे इत्यर्थः। [आवश्यकत्वादिति] "तद्धेतोरेव तत्त्वे किं तेन" इति न्यायादिति भावः। स एव = सङ्केत एव। एवशब्देनानादिभूतबोधजनकत्वस्य व्यवच्छेदः। उद्भावितदोषद्वयस्य नात्र प्रसक्तिरित्याह [स चेति]। सङ्केतश्चेत्यर्थः। [आधुनिके इति] आधुनिकसंकेतिते देवदत्तादावित्यर्थः। तत्र पित्रादेः सङ्केतो विद्यते। अतो नोक्तदोष इति भावः। द्वितीयदोषं वारयति [गवादाविति]। [ईश्वरस्येति] तथाचेश्वरसङ्केतो गोशब्दस्य गव्येव, न वाहीकादाविति न तत्रातिव्याप्तिरिति भावः।

आदौ सङ्केतः शक्तिरिति मतं निरस्यति [सङ्केत इति]। [स्वरूपेण हेतुरिति] स्वरूपस्सन् हेतुरित्यर्थः। सङ्केतत्वेन रूपेण हेतुरिति यावत्। [अगृहीतवृत्तिकादिति] अज्ञातसङ्केतकात्पदादित्यर्थः। [अर्थबोधप्रसङ्गादिति] सङ्केतस्य तत्र विद्यमानत्वादिति भावः।

सामान्येन ज्ञानं निराकरोति [नापीति] अस्य ज्ञातमित्यत्रान्वयः। [सामान्यत इति] सामान्यरूपेण सङ्केतत्वव्यापकधर्मेण प्रमेयत्वादिनेति यावत्। इदं पदमत्रार्थे प्रमेयवदित्यादिरूपेणेत्यर्थः। [प्रमेयत्वादिनेति] प्रमेयत्वस्य सर्वान्वयितया सङ्केतस्यापि तेन रूपेण ज्ञानसम्भवादिति भावः।

सङ्केतत्वेन ज्ञानं हेतुरिति पक्षं निराकरोति [नापीति] [सङ्केतत्वेनेति] सङ्केतत्वव्याप्यधर्मेण सङ्केतवृत्तिविशेषधर्मेण ईश्वरीयसङ्केतत्वादिनेत्यर्थः। तज्ज्ञानं = सङ्केतज्ञानम्। तज्ज्ञानशून्यानाम् = ईश्वरज्ञानरहितानाम्। [लौकिकमीमांसकादीनामिति] लौकिकाश्च मीमांसकादयश्चेति द्वन्द्वः। लौकिकाः पामराः। मीमांसकाः = निरीश्वरवादिनः कर्ममीमांसका जैमिनीयाः। आदिना बौद्धादेर्ग्रहणम्। ननु तेषामीश्वरसङ्केतत्वेन ज्ञानासम्भवेऽपि सङ्केतत्वेन तज्ज्ञानसम्भवान्न दोषोऽत आह [तत्तदर्थबोधजनकत्वग्रहवतामेवेति] एवशब्देन सङ्केतत्वप्रकारकज्ञानस्य निरासः। एवं च सङ्केतत्वज्ञानाभावेऽपि उक्तज्ञानाच्छाब्दबोधोत्पत्त्या व्यभिचारात्सङ्केतत्वेन ज्ञानमपि न हेतुरिति भावः।

[न चेति] अस्य "तज्ज्ञानं हेतुः" इत्यत्रान्वयः। [अर्थधीजनकतावच्छेदकत्वेनेति] अयमर्थः - त्वदुक्तरीत्या बोधजनकत्वं शक्तिरस्तु। परं तु बोधजनकत्वं बोधजनकयोग्यता। सा च तदवच्छेदकधर्मवत्त्वम्। स च धर्मः क्लृप्तत्वादीश्वरसङ्केत एव। अक्लृप्तकल्पनायां गौरवात्। तस्य

सङ्केतत्वेन ज्ञानस्य व्यभिचाराद्धेतुत्वासम्भवेऽपि बोधजनकतावच्छेदकत्वेन ज्ञानस्य हेतुत्वं सम्भवत्येवाव्यभिचारात्। स्पष्टं चेदं भूषणे - इति। तज्ज्ञानं = सङ्केतज्ञानम्। हेतुरिति पाठः। तथेति पाठमाश्रित्य तथा = हेतुरिति हरिवल्लभ - पञ्चोलिभिर्व्याख्यातम्। समाधत्ते [ततोऽपीति] अर्थधीजनकतावच्छेदकधर्मादपीत्यर्थः। [लाघवेनेति] अर्थधीजनकतावच्छेदककोटावर्थधीजनकतावच्छेदकत्वस्यानिवेशेन लाघवमित्यर्थः। तत्पदविशेष्यकतत्तदर्थविषयक बोधजनकत्वप्रकारकज्ञानत्वेन हेतुतायां लाघवमिति यावत्। [न चेति] अस्य 'व्यभिचारः' इत्यत्रान्वयः। [सङ्केतज्ञानादेवेति] एवशब्देन तदर्थबोधजनकत्वग्रहस्य व्यवच्छेदः। अस्य = तदर्थबोधजनकत्वग्रहस्य। व्यभिचारः = व्यतिरेकव्यभिचारः। समाधत्ते [तत्रापीति] तादृश सङ्केतज्ञानेऽपीत्यर्थः। [अनवगाहनेनेति] विषयीकरणेनेत्यर्थः। स्वविषय केच्छादिज्ञानस्य स्वविषयेच्छादेर्यदंशे यत्प्रकारकत्वं तदंशे तत्प्रकारकत्वमिति नियमेन तादृशेच्छाज्ञानस्य पदेऽर्थबोधजनकत्वप्रकारकत्वमव्याहृतमिति भावः। तथाच सङ्केतस्थलेऽप्यर्थ धीजनकत्वज्ञानमक्षतमिति भावः।

[न चेति] अस्य द्वितीयेन 'वाच्यम्' इत्यनेनान्वयः। [स्वातन्त्र्येणेति] इतराविशेषणत्वेनेत्यर्थः। प्रकृते तु प्रकारत्वांशे तस्य विशेषणत्वं, बोधजनकत्वप्रकारकत्वस्येच्छायां प्रकारत्वादिति भावः। [अन्यथेति] स्वतन्त्रास्वतन्त्रसाधारणबोधजनकताज्ञानस्य कारणत्वाङ्गीकारे इत्यर्थः। जानतः = निश्चयवतः। जानतः = अयं विपरीतज्ञानवानिति परकीयभ्रमं जानतः। [तद्ग्रहापत्तेरिति] तस्यापि घटपदात्पटरूपार्थोपस्थितिरापद्येत, तत्रापि नञर्थाभावे विशेषणतया बोधजनकत्वस्यावगाहनात्। अस्मन्मते तु तस्य स्वातन्त्र्येणानुपस्थित्या न दोष इति भावः। पदे = घटादिपदे। परग्रहं = पटविषयकान्यपुरुषीयज्ञानम्। [अन्यथेति] तदभावनिश्चयसत्त्वेऽपि तद्वत्तावगाहिज्ञानोत्पत्तिस्वीकारे इत्यर्थः। [भ्रन्तत्वापत्तेरिति] रजतत्वाभाववती शुक्तिः 'अनेन रजतत्वेन गृहीता' इति ज्ञानवतो भ्रान्तिज्ञस्य रजतत्वाभाववच्छुक्तिविशेष्यकरजतत्वप्रकारकज्ञानसम्भवेन रजतत्वभ्रमापत्तिरिति भावः। इति शब्दः "आधुनिकदेवदत्तादिपदे तदभावात्" इति प्रथमदोषसमाधानसमाप्त्यर्थकः।

ननु शब्दश्रवणमात्रेणोक्तार्थधीजनकत्वस्यग्रहणे सङ्केतज्ञानाभावदशायामपि देवदत्तादिपदाच्छाब्दबोधप्रसङ्गोऽत आह [इदं चेति]

नापि लाक्षणिकोच्छेदापत्तिः, इष्टत्वात्। शक्तिग्राहकव्यवहारस्य मुख्य-लक्ष्यसाधारण्यात्।

किं च प्रत्यक्षादिजन्योपस्थितेः शाब्दबोधानङ्गत्वात् शाब्दबोधं प्रति शक्तिजन्योपस्थितेर्लक्षणाजन्योपस्थितेश्च कारणत्वं वाच्यम्। तथा च कार्यकारणभावद्वयकल्पने गौरवं स्यात्। अस्माकं पुनः शक्तिजन्योपस्थितित्वेनैव हेतुतेति लाघवम्।

अपि च लक्षणावृत्तिस्वीकारे कार्यकारणभावस्य प्रत्येकं व्यभिचारः, शक्तिजन्योपस्थितिं विनापि लक्षणाजन्योपस्थितितः शाब्दबोधात्। न च अव्यवहितोत्तरत्वसम्बन्धेन तत्तदुपस्थितिमत्त्वं कार्यतावच्छेदकं, तत्तदुपस्थितित्वं च कारणतावच्छेदकम्, अनन्तकार्यकारणभावप्रसङ्गात्। किं च पदार्थोपस्थितिं प्रत्यपि शक्तिज्ञानत्वेन लक्षणाज्ञानत्वेन च हेतुतेति व्यभिचारो गौरवं च प्राग्वदेव द्रष्टव्यम्।

न च "इदं पदमेतदर्थबोधकम्" इति शक्तिज्ञानकार्यकारणभावकल्पनेऽपि पदतदर्थभेदेनानेककार्यकारणभावकल्पने गौरवं तवापि समानम्, परस्परव्यभिचार-वारणायाव्यवहितोत्तरत्वघटितत्वे च सुतरामिति वाच्यम्, शक्तिभ्रमानुरोधेन तत्तत्पदतत्तदर्थभेदेन कार्यकारणभावानन्त्यस्य तवापि साम्यात्। लक्षणाकार्यकारणभाव-कल्पना गौरवं परं तवातिरिच्यते।

अर्थबोधजनकत्वं शक्तिरिति सिद्धान्ते उद्भावितं लाक्षणिकातिव्याप्तिरूपं द्वितीयं दोषमिष्टापत्त्या परिहर्तु माह [नापीति]। [लाक्षणिकोच्छेदापत्तिरिति] गङ्गायां घोष इत्यादौ गङ्गादिपदात् तीरबोधोत्पत्त्या तीरेऽपि गङ्गादिपदस्य त्वद्रीत्या बोधकत्वरूपशक्तिसत्त्वे बाधकाभावेन शक्त्यैव तीरबोधसम्भवेन लाक्षणिकशब्दानामुच्छेद एवेति भावः। व्यवहारस्य = नयनानयनादिरूपस्य। [मुख्यलक्ष्येति] - गामानय, गां बधानेत्यादौ यष्टीः प्रवेशय, काकेभ्यो दधि रक्ष्यतामित्यादौ च शक्तिग्राहकशिरोमणेर्व्यवहारस्य तुल्यत्वादित्यर्थः। तथा च तत्रापि शक्तिरेव स्वीकार्येति भावः।

ननु तीरादौ गङ्गादिपदवाच्यत्वव्यवहाराभावेन तत्र शक्तिस्वीकारस्यानुचितत्वाल्लक्षणावृत्त्यन्तरस्वीकार एवोचितोऽत आह [किञ्चेति]। लक्षणावादिमते शाब्दबोधं प्रत्युपस्थितिद्वयस्य कारणताकल्पनाद्गौरवमित्यर्थप्रदर्शनाय प्रथमतः शक्तिजन्योपस्थितेरावश्यकतां दर्शयति [प्रत्यक्षादीति]। शब्देतरचक्षुरादिप्रमाणजन्यघटाद्युपस्थितेरित्यर्थः। [शाब्दबोधानङ्गत्वादिति] तथाविधोपस्थितिसत्त्वेऽपि अगृहीतशक्तिकस्य पुंसस्तेन शब्देन शाब्दबोधस्यानुत्पत्त्या तस्यास्तदनङ्गत्वमिति भावः। [शक्तिजन्येति]

तथा च तत्र व्यभिचारवारणाय शक्तिजन्योपस्थितेः शाब्दकारणत्वं वाच्यमिति भावः। ततः किम्? अत आह [लक्षणाजन्येति]। तथा च शक्तिजन्योपस्थितेः कारणत्वस्वीकारे गङ्गायां घोष इत्यादौ लक्षणावादिमते तीरादेरतथात्वेन तत्र बोधनिर्वाहाय लक्षणाजन्योपस्थितेरपि कारणत्वं स्वीकार्यमिति भावः। नन्विदमस्माकमिष्टमेवात आह [तथा चेति]। उपस्थितिद्वयस्य कारणत्वस्वीकारे चेत्यर्थः। [गौरवमिति] अगृहीतशक्तिकस्य घटादिकं पश्यतोऽपि पुरुषस्य घटादिपदैः शाब्दबोधादर्शनाद्व्यभिचार-वारणाय निरुक्तरीत्या कार्यकारणभावद्वयकल्पने गौरवं स्यादिति भावः। स्वमते लाघवं दर्शयति [अस्माकं पुनरिति]। अस्माकं त्वित्यर्थः।

लक्षणावादिमते कार्यकारणभावकल्पनायां दोषान्तरमाह [अपि चेति]। [कार्यकारणभावस्येति] शक्य - लक्ष्यान्यतरार्थविषयकोपस्थितिप्रयोज्यशाब्दबोधीयकार्यकारणभावस्येत्यर्थः। व्यभिचारः = व्यतिरेकव्यभिचारः। तमेवोपपादयति [शक्तिजन्येति]। गङ्गायां घोष इत्यादौ तीरपदनिष्ठशक्तिज्ञान-जन्योपस्थितिं विनापि गङ्गापदनिष्ठलक्षणाज्ञानजन्यतीरोपस्थिततस्तीरविषयकशाब्दबोधोदयाद्व्यतिरेक-व्यभिचारः। एवं तीरे घोष इत्यादौ तीरपदनिष्ठलक्षणाज्ञानजन्योपस्थित्यभावेऽपि तन्निष्ठशक्तिज्ञानजन्य-तीरोपस्थितितस्तीरविषयकबोधोदयाद्व्यतिरेकव्यभिचार इति भावः। [अव्यवहितेति] शक्तिज्ञानजन्योपस्थितेस्तदव्यवहितोत्तरजायमानशाब्दबुद्धित्वावच्छिन्नं प्रति कारणत्वं स्वीक्रियते। तेन लक्षणाजन्यशाब्दबोधस्यैतत्कार्यतानवच्छेदकत्वान्न व्यभिचारः। एवं लक्षणास्थलेऽपीति भावः। समाधत्ते [अन्तेति]। उपस्थितीनामानन्त्येन तद्भेदेनानन्तकार्यकारणभावापत्तेरिति भावः।

लक्षणास्वीकारे पदार्थोपस्थिति - शाब्दबोधयोः कार्यकारणभावकल्पने गौरवव्यभिचारौ प्रदर्श्य तत्र शक्तज्ञानपदार्थोपस्थित्योरपि कार्यकारणभावकल्पने तावपिदर्शयति [किञ्चेति]। [व्यभिचार इति] गङ्गायां घोष इत्यादौ शक्तिज्ञानं विनापि लक्षणाज्ञानमात्रेण तीरोपस्थितेः शक्तिज्ञानकार्यकारणभावस्य, तीरे घोष इत्यादौ लक्षणाज्ञानं विनापि शक्तिज्ञानमात्रेण तीरोपस्थितेर्लक्षणाकार्यकारणभावस्य च प्रत्येकं व्यभिचारः। अव्यवहितोत्तरत्वसम्बन्धनिवेशेन तद्वारणे त्वनन्तकार्यकारणभावकल्पनाप्रसङ्गः शक्तीनामानन्त्यादिति भावः।

लक्षणावादी पर्यनुयुङ्क्ते [न चेति] [कल्पनेऽपीति] लक्षणाज्ञानकार्यकारणभावाकल्पनालाघवलोभेन निरुक्तकार्यकारणभावकल्पनेऽपीत्यर्थः। [पदतदर्थभेदेनेति] पदं च तदर्थश्च पदतदर्थौ, तयोर्भेदेनेत्यर्थः। गङ्गायां घोष इत्यादौ गङ्गादिपदजन्यप्रवाहादिविषयकबोधं प्रति तद्विषयकोपस्थितिः कारणम्। तत्रैव

तीरविषयबोधं प्रति गङ्गादिपदनिष्ठशक्तिज्ञानजन्योपस्थितिः कारणमित्यर्थभेदेनानन्तकार्यकारणभावाः कल्प्याः, लक्ष्यार्थानामनन्तत्वात्। एवं गङ्गाप्रवाहादिविषयकोपस्थितिं प्रति गङ्गाजाह्नवी-भागीरथ्यादिपदनिष्ठानन्तशक्तिज्ञानत्वेन कार्यकारणभावः कल्पनीयः इति भावः। तवापि = लक्षणामनङ्गीकर्तुश्शाब्दिकस्य तवापि। [समानमिति] तथाच "नचोभयाश्रयदोषमेकश्चेद्योऽविचारयन्" इति न्यायापात इति भावः। प्राग्वदेवाह [परस्परेति] सर्वशब्दानां सर्वार्थवाचकत्वमनङ्गीकुर्वतापि 'घटपदं पटे शक्तम्' इति शक्तिभ्रमेणापि तद्बोधानुभवेन तत्तदर्थनिरूपितशक्तिग्रहस्य तज्जन्योपस्थितेश्च तत्र शाब्दकारणताया अवश्यकल्पनीयतया तदानन्त्यस्योभयोः समानत्वेऽपि लक्षणाकार्यकारणभाव-कल्पनागौरवं तव मतेऽधिकमेवेत्यत आह [शक्तिभ्रमानुरोधेनेति]।

अथ वृत्तिजन्योपस्थितित्वेनैव शाब्दबोधहेतुता, वृत्तिज्ञानत्वेन च पदार्थोपस्थितिकारणतेत्येवं मया वाच्यमिति चेन्न, शक्तिलक्षणान्यतरत्वस्य शाब्दबोधहेतुपदार्थोपस्थित्यनुकूलपदपदार्थसम्बन्धत्वस्य वा वृत्तित्वस्य कारणतावच्छेदकत्वात् शक्तित्वमपेक्ष्य गौरवाच्छाब्दबोधहेतुतावच्छेदकस्य पदार्थोपस्थितिवृत्तेरज्ञाने तद्घटितकार्यकारणभावग्रहस्यासम्भवात्।

अथ ममापि शक्तिज्ञानत्वेनैव हेतुता, शक्यसम्बन्धरूपलक्षणायां शक्तेरपि प्रवेशादिति चेन्न, शक्तिज्ञान पदार्थोपस्थित्योः कार्यकारणभावे समान-विषयत्वस्याऽऽवश्यकत्वात्। अन्यथा गङ्गातीरयोः सम्बन्धाग्रहवतो गङ्गापदशक्तिं जानतोऽपि 'गङ्गायां घोषः' इति वाक्यात्तीरबोधप्रसङ्गः शक्तिज्ञानस्य हेतोः सत्त्वात्।

अपि च 'घटमानय' इति वाक्यं हस्तिनं च स्मरतो घटपदादिभ्यो घटादेर्गजाद्धस्तिपकस्य च समूहा लम्बनस्मरणवतो घटानयनवद्धस्तिपकस्यापि शाब्दबोधापत्तिः, समूहालम्बनरूपायां पदार्थोपस्थितौ वृत्तिजन्यत्वसत्त्वात्। तथा च विषयतया शाब्दबोधं प्रति तदंशविषयकवृत्तिजन्योपस्थितिर्हेतुरिति वाच्यम्। एवं च लक्षणाया अपि शक्तिज्ञानत्वेन हेतुत्वमसम्भवदुक्तिकमिति। एतेन शक्तिप्रयोज्यैवोपस्थिति-र्हेतुरिति न लक्षणाज्ञानकार्यकारणभावान्तरं ममापीति परास्तम्। प्रयोज्यत्वस्यानति-प्रसक्तस्य दुर्वचत्वाच्चेत्यादिकं विस्तरेण प्रपञ्चितं भूषणे।।१।। (३७)

लक्षणावादी पुनरपि पर्यनुयुङ्क्ते [अथेति]। [वृत्तिजन्योपस्थितीति] नतु शक्तिज्ञानजन्योपस्थितित्वेन, नापि लक्षणाज्ञानजन्योपस्थितित्वेनेत्यर्थः। तथाच लक्षणाया अपि वृत्तित्वेन ममापि मते एकस्यैव

कार्यकारणभावस्य सत्त्वेन न प्रत्येकं व्यभिचारो, नापि गौरवमिति भावः। पदार्थोपस्थितिकारणतायामपि न गौरवमित्याह [वृत्तिज्ञानत्वेन चेति]। [शक्तिलक्षणान्यतरत्वस्येति] शक्तिभिन्नं सत् लक्षणाभिन्नं यत् तद्भिन्नत्वरूपस्येत्यर्थः। एतादृशस्य शाब्दबोधहेत्वित्यादिरूपस्य वा वृत्तित्वस्य शक्तित्वापेक्षया गुरुत्वमतो नेदं युक्तमिति भावः। [शाब्दबोधहेत्विति] शाब्दबोधहेतुश्चासौ पदार्थोपस्थितिश्चेति कर्मधारयः। तदनुकूलो यः पदपदार्थयोः सम्बन्धः = शक्तिरूपो लक्षणारूपो वा, तत्त्वं वृत्तित्वम्। गमनपदस्य तदर्थेनाकाशेन सह यः सम्बन्धः समावायस्तस्याप्याश्रयतयाऽऽकाशोपस्थापकत्वात्समवायेऽतिव्याप्तिः। अतस्तद्वारणाय पदार्थोपस्थितौ शाब्दबोधहेत्विति विशेषणम्। उभयसाधारणं दूषणमाह [गोरवादिति]। द्वितीये दूषणान्तरमाह [शाब्दबोधहेतुतावच्छेदकस्येति]। [पदार्थोपस्थितिवृत्तेरिति] पदार्थोपस्थितिनिष्ठस्येत्यर्थः। तथाच शाब्दहेतुतावच्छेदकस्य वृत्तिज्ञानजन्योपस्थितित्वस्येति भावः।

लक्षणावादी प्रकारान्तरेण प्रत्यवतिष्ठते [अथेति]। [ममापीति] अस्य 'मते' इति शेषः। गौरवाभावायाह [शक्तिज्ञानत्वेनैवेति]। शक्तिज्ञानत्वेन लक्षणाज्ञानत्वेन च कार्यकारणभावद्वयं न स्वीक्रियते, नापि वृत्तिजन्योपस्थितित्वेनेति भावः। [हेतुतेति] शाब्दबोधं प्रति तदनुकूलपदार्थोपस्थितिं प्रति च हेतुतेत्यर्थः। नन्विदमयुक्तं, "शक्यादशक्योपस्थितिर्लक्षणा" इति स्वीकारादत आह [शक्यसम्बन्धेति]। [शक्तेरपि प्रवेशादिति] तथाचैकैक एव कार्यकारणभाव इति लाघवं ममापीति भावः। [समानविषयत्वस्येति] कार्यकारणभावे समानविषयत्वप्रवेशस्याऽऽवश्यकत्वादित्यर्थः। तद्विषयकोपस्थितिं प्रति तद्विषयकशक्तिज्ञानत्वेन कार्यकारणभावो वक्तव्य इति यावत्। प्रकृते "गङ्गापदशक्यसम्बन्धि तीरम्" इति लक्षणाज्ञानस्य तीरविषयकत्वे सति शक्तिविषयकत्वेऽपि तीरांशे शक्तिविषयकत्वानवागाहितया उपस्थितेश्च तीरविषयकत्वावगाहनेन समानविषयकत्वाभावान्न तादृशकार्यकारणभावेन निर्वाह इति भावः। [अन्यथेति] शक्तिज्ञानपदार्थोपस्थित्योः समानविषयकत्वाभावेऽपि कार्यकारणभावस्वीकार इत्यर्थः। [सम्बन्धाग्रहवत इति] तयोः सम्बन्धज्ञानरहितस्येत्यर्थः। "प्रवाहो गङ्गापदशक्यः" इति ज्ञानवतः "गङ्गापदशक्यप्रवाहसम्बन्धितीरम्" इति ज्ञानाभाववतः पुरुषस्य गङ्गापदात्तीरबोधो न जायते। असमानविषयकस्यापि शक्तिज्ञानस्य हेतुत्वे तु गङ्गापदात्तीरोपस्थितेस्तद्द्वारा शाब्दबोधस्य चापत्तिरिति भावः। तदाह [शक्तिज्ञानस्य हेतोः सत्त्वादिति]।

ननु तद्विषयकशाब्दबोधं प्रति शक्तिज्ञानजन्यतद्विषयकोपस्थितिः कारणमिति कार्यकारणभावे समानविषयकत्वनिवेशेऽपि गङ्गातीरयोः सम्बन्धाग्रहवतः "प्रवाहो गङ्गापदशक्यः" इति जानतोऽपि

तीरोपस्थितेरभावान्न शाब्दबोधापत्तिरत आह [अपि चेति]। हस्तिपकस्य = हस्तिनियन्तुः। [शाब्दबोधापत्तिरिति] प्रकृते घटकर्मकमानयनमिति शाब्दबोधो जायते, हस्तिकर्मकमानयनमिति शाब्दबोधस्तु न जायते। एवं चोक्तस्थले हस्तिपकस्य शाब्दबोधवारणाय शक्तिज्ञानपदार्थोपस्थिति-शाब्दबोधानां समानविषयकत्वस्यावश्यकतया गङ्गायां घोष इत्यादिस्थले तीरादिविषयकोपस्थिति-शाब्दबोधं प्रति प्रवाहविषयकशक्तिज्ञानत्वेन कारणत्व मसम्भवदुक्तिकमेवेति भावः।

यादृशकार्यकारणभाव आवश्यकस्तं दर्शयति [तथा चेति]। निरुक्तस्थले त्वदुक्तरीत्या हस्तिपकस्य शाब्दबोधस्य निवारयितुमशक्यत्वे चेत्यर्थः। [विषयतयेति] तथाच प्रकृते हस्तिपकनिष्ठविषयतया हस्तिपकांशविषयकशक्तिज्ञानजन्योपस्थितेर्हेतुत्वात्तादृशोपस्थितेरभावान्न शाब्दबोध इति भावः। प्रकृतोपयोगिनमर्थमाह [एवञ्चेति]। शक्तिज्ञानत्वेनैव हेतुतायां निरुक्तदोषध्रौव्ये चेत्यर्थः। इतिशब्दो लक्षणोच्छेदापत्ताविष्टापत्तिपरिसमाप्त्यर्थकः। [एतेनेति] द्विविधवृत्तिज्ञानस्यैकरूप्येण हेतुत्वासम्भवेनेत्यर्थः। [शक्तिप्रयोज्यैवेति] प्रयोज्यत्वं साक्षात्परम्परासाधारणमिति न दोष इति तदाशयः। तत्र दोषान्तरमाह [अनतिप्रसक्तस्येति]। "घटपदं घटे शक्तम्" इति शक्तिग्रहवतः पुंसो घटपदाद् घटरूपार्थोपस्थितौ तेन स्वसमवाय्युपस्थिताकाशस्य घटपदजन्यशाब्दबोधविषयतापत्तिः। तत्रापि घटपदनिष्ठशक्तिप्रयोज्यतावच्छेदकविषयतासम्बन्धेन तादृशोपस्थितेः सत्त्वादिति भावः। तथाच भवतैव लक्षणा निरस्तेति सिद्धं नः समीहितम्। न हि शक्यसम्बन्धमेव लक्षणाखण्डकः खण्डयति, नवा तस्य सम्बन्धत्वम्। किन्तु पदपदार्थसम्बन्धत्वं, तज्ज्ञानकार्यकारणभावं चेति बोध्यम्।

ननु लक्षणाया अकल्पने सर्वेषां पदानां नानार्थत्वादक्षादिपदवदर्थसंदेहः स्यात्। किञ्चैवं हि लक्षणायां सर्वसिद्धानुपपत्तिज्ञानवैयर्थ्यम्। "अन्यायश्चानेकार्थत्वम्" इति न्यायविरोधश्चेति चेत्।

अत्राहुः - यस्य नानार्थत्वज्ञानं नास्ति, तस्य संदेहो नास्ति। अपरस्य तु संशय इष्ट एव। अत एव अक्षादिपदस्थले एकत्रैव शक्तिग्रहवतो न संदेहः। अन्वयानुपपत्तेस्तात्पर्यज्ञाने एवोपयोगः, सर्वेषां नानार्थत्वाच्च तदावश्यकत्वात् "अन्यायश्चानेकार्थत्वम्" इति लाघवमूलकम्। स्पष्टमधिकं भूषणे। तदेतदाह [इत्यादिकं विस्तरेण प्रपञ्चितं भूषणे इति]। तस्माद्बोधकत्वं शक्तिरिति मते न कश्चिद्दोषः। अपभ्रंशानां वाचकत्वविचारे शब्दकौस्तुभेऽपि "घटबोधजननसामर्थ्यमेव घटादिपदानां शक्तिरित्युक्तं दीक्षितेन। दर्पणकृतस्तु बोधकत्वं शक्तिरिति प्रकृतग्रन्थकृन्मतं नागेशमतं निराचक्रुः, तत्त्वसङ्गतमिति मदीयनागेशभावप्रकाशे मञ्जूषाव्याख्याने प्रपञ्चितम्। तत्तु तत एवावगन्तव्यमित्यलम्। ।।३७।।

नन्वेवं भाषादितो बोधदर्शनाद् बोधकतारूपा शक्तिस्तत्रापि स्यात्। तथा च साधुताऽपि स्यात्। शक्तत्वस्यैव साधुताया व्याकरणाधिकरणे प्रतिपादनादि त्याशङ्कां द्विधा समाधत्ते -

असाधुरनुमानेन वाचकः कैश्चिदिष्यते।
वाचकत्वाविशेषे च नियमः पुण्यपापयोः।।२।। (३८)

असाधुर्गाव्यादिः अनुमानेन साधुशब्दमनुमाय वाचको बोधकः कैश्चिदिष्यते। तथा च लिपिवत्तेषां साधुस्मरण एवोपयोगो न तु साक्षात्तद्वाचकत्वमतो न साधुत्वमिति भावः। उक्तं हि वाक्यपदीये - (प्रथमकाण्डे)

ते साधुष्वनुमानेन प्रत्ययोत्पत्तिहेतवः।
तादात्म्यमुपगम्येव शब्दार्थस्य प्रकाशकाः।।१५१

न शिष्टैरनुगम्यन्ते पर्याया इव साधवः।
न यतः स्मृतिशास्त्रेण, तस्मात्साक्षादवाचकाः।।१५२

अम्बाम्बेति यदा बालः शिक्ष्यमाणः प्रभाषते।
अव्यक्तं, तद्विदां तेन व्यक्ते भवति निर्णयः।।१५३

एवं साधौ प्रयोक्तव्ये योऽपभ्रंशः प्रयुज्यते।
तेन साधुव्यवहितः कश्चिदर्थोऽभिधीयते।। इति। १५४

नन्वपभ्रंशानां साक्षादवाचकत्वे किं मानं, शक्ति कल्पकव्यवहारादेस्तुल्यत्वादिति चेत्? सत्यम्, तत्तद्देश भेदभिन्नेषु तेषु शक्तिकल्पने गौरवात्। न च पर्याय तुल्यता शङ्क्या। तेषां सर्वदेशेष्वेकत्वाद्विनिगमनाविरहेण सर्वत्र शक्तिकल्पना, न ह्यपभ्रंशे तथा। अन्यथा भाषाणां पर्यायतया गणनापत्तेश्च। एवं शक्तत्वमेवास्तु साधुत्वमिति नैयायिकमीमांसकादीनां मतेनैव द्रष्टव्यम्।

बोधजनकत्वस्य शक्तित्वे प्रसक्तामापत्तिं समाधातुमुपक्रमते [नन्विति] एवं = बोधजनकत्वस्य शक्तित्वाङ्गीकारे। [भाषादित इति] अत्र भाषाशब्दोऽपभ्रष्टशब्दपरः। [व्याकरणाधिकरणे इति] प्रथमाध्याये तृतीयपादे नवमे साधुपदयुक्त्यधिकरणे इत्यर्थः। [द्विधेति] प्रकारद्वयेनेत्यर्थः। अयमत्र विवेकः -

अपभ्रंशानां साक्षादवाचकत्वेन न साधुत्वमिति नैयायिकरीत्या एकं समाधानम्। तेषां साक्षाद्वाचकत्वमिष्टमेव। परं तु तेषां व्याकणेनाव्युत्पादनादसाधुत्वमिति स्वमतरीत्या द्वितीयं समाधानम् - इति। कारिकायामसाधुरिति - गाव्यादिरसाधुः, साधुशब्दस्मरणेन बोधकः, कैश्चित् = नैयायिकैरिष्यते। नातः साधुरिति शेषः। एतदाशयेनैव पूर्वार्धं व्याचष्टे [असाधुर्गाव्यादिरिति] अनुमाय = स्मृत्वा। नन्वेवं तस्य वाचकत्वमनुपपन्नं, साक्षाद्बोधकत्वस्यैव वाचकत्वरूपत्वादत आह - [वाचको = बोधक इति] फलितार्थमाह [तथाचेति] तस्य साक्षाद्वाचकत्वाभावे चेत्यर्थः। तेषाम् = असाधुशब्दानाम्। [साधुस्मरण एवेति] "शब्दप्रकृतिरपभ्रंशः" इति सङ्ग्रहकारोक्तेरपभ्रंशानां साधुशब्दः प्रकृतिः। नह्यपभ्रंशो नाम कश्चित् स्वतन्त्रः शब्दोऽस्ति। सर्वस्य ह्यपभ्रंशस्य साधुरेव प्रकृतिः। अतोऽपभ्रंशात्साधुशब्दस्मरणं युज्यत इति भावः। [न साधुत्वमिति] वाचकत्वमेव साधुत्वमिति मत इति भावः। तथाच साधुशब्दं जानतां व्युत्पन्नानामसाधुभ्यः साधुस्मरणाद्बोधः। अव्युत्पन्नानां तु शक्तिभ्रमाद्बोध इति बोध्यम्। वाक्यपदीये [ते इति] असाधवो गाव्यादय इत्यर्थः। साधुष्विात्यत्र सप्तम्या विषयत्वमर्थः। साधुशब्दविषयकानुमानेनेत्यर्थः। प्रत्ययोत्पत्तिहेतवः = अर्थबोधोत्पत्तिकारणानि। साध्वनुमानेन प्रत्ययोत्पत्तौ बीजमाह [तादात्म्यमुपगम्येवेति] अर्थतादात्म्यं गगर्यादिशब्दे गृहीत्वैवेत्यर्थः। ग्रहस्य भ्रमत्वसूचनाय इवशब्दः। तेन तेषामवाचकत्वं ध्वनितमिति काशिकाकाराः। अपभ्रंशाः साधुशब्दैरभेदमिवापन्ना इति कृष्णमित्राः। असाधोः साधुप्रकृतिकत्वात्तत्त्वमिति तद्भावः।

यत्तु - "पक्षान्तरमाह - तादात्म्यमिति - साधुगवादितादाम्यप्रकारकज्ञानविषयतामापद्य वा इत्यर्थः। एवशब्दो वाऽर्थे" इति दर्पणकाराः, तन्न। इवशब्दघटितपाठस्यैव हरिसम्मतत्वात्, सर्वव्याख्यातृसम्मतत्वाच्च। कारिकोत्तरभागस्य पूर्वभागोक्तार्थोपष्टम्भकत्वेन पक्षान्तरत्वयोगाच्च।

अत्र कारिकायां तादात्म्यमित्यनेन तादात्म्यं शक्तिरिति सूच्यत इति मञ्जूषाकाराः। तेषामयुक्तत्वं प्रतिपादयतां दर्पणकाराणामुक्तिरेवायुक्तेति प्रतिपादितमस्मदीयभावप्रकाशे मञ्जूषाव्याख्याने।

नन्वपभ्रंशास्साक्षादेव वाचकास्सन्तु, गाव्यादयश्च गोशब्दस्य पर्यायाः सन्तु, अत आह - वाक्यपदीये - [न शिष्टैरिति] अत्र 'ते साधुषु' इत्यतः 'ते' इति सम्बध्यते। 'इव' शब्दो भिन्नक्रमः। साधव इत्यनन्तरं योज्यः। यतः, ते = अपभ्रंशाः, शिष्टैः = शब्दतत्त्वविर्‌ः, साधव इव = धेन्वादय इव, पर्यायाः सन्त गोशब्दस्य पर्यायभूताः, नानुगम्यन्ते = न प्रयुज्यन्ते, न = स्मृतिशास्त्रेण = लक्षणेन व्याकरणेन पाणिनीयेन, अनुगम्यन्ते = अनुगतप्रकृतिप्रत्ययादिरूपेण बोध्यन्ते,

तस्मात्साक्षादवाचकाः, नापि पर्याया इत्यर्थ। अयं भावः - अपभ्रंशा यदि पर्यायाः स्युस्तर्हि स्मृतिशास्त्रेणानुगम्येरन्, शिष्टैश्च गवादितुल्यतया प्रयुज्येरन्। नैवं दृश्यते। तस्मान्न पर्यायास्ते। अत एव ते साक्षादवाचका इति। स्पष्टश्चायमर्थो वाक्यपीदयव्याख्याने प्रकाशे। एतदाशयेनैव "नच पर्यायतुल्यताशङ्क्य" इत्यादिनाऽऽक्षिप्य प्रतिसमाधीयते। भूषणसारव्याख्यातारो हरिवल्लभादयो विभिन्नं वाक्यपदीयपाठमाश्रित्य व्याचचक्षिरे - ते यत इति पाठमाश्रित्य = 'यतस्तेऽपभ्रंशाः साधवः पर्याया इव शिष्टैः स्मृत्यादिना न प्रतिपाद्यन्तेऽतो न वाचका इति हरिवल्लभः, पञ्चोलिनश्च। अत्र पाठे 'ते' इति पदं व्यर्थम्, पूर्वकारिकातः 'ते' इत्यस्य सम्बन्धादेव सिद्धेः। 'स्मरणमात्रेण' इति पाठमाश्रित्य 'यतः = यस्माद्धेतोः (असाधुशब्दानां) स्मरणमात्रेण नार्थबोधोपपत्तिः, तस्माद्धेतोरिति नेने गोपालशास्त्रिणः। काशिकाकारास्तु नयत इति नीधातोश्शत्रन्तस्य रूपम्। स्मृतिमात्रेणेति पाठ इत्यभिप्रयन्ति। "न शिष्टैरिति - शिष्टैः साधवः पर्याया इव नानुगम्यन्त इति योजना। पर्यायसमुदाये न सङ्गृह्यन्त इत्यर्थः। नयत इति अर्थं बोधयतः साधुशब्दस्य स्मृतिमात्रेण, अस्य अर्थबोधोपपत्तिरिति शेषः" इति च व्याचक्षते। सर्वास्वपि व्याख्यासु "पर्याया इव साधवः" इति पदद्वयोपादानस्य प्रयोजनं न प्रदर्शितमेवेत्यलम्। एतेन "१ न २ ३ ४ ५ ७ अस्य पाठस्य बहुत्र कोशेषूपलभ्यः नास्त साधुत्वे मानम्। एवं पाठे समुच्चायकश्चकारोऽपेक्ष्यते। किञ्च स्मृतिशास्त्रस्य कर्तृत्वेनोपादानं नाभिमतं भगव'र्तृहरेः इत्यपरिष्टात् "शिष्टैर्लक्षणैरनुगम्येरन्" इति ग्रन्थात्प्रतीयते" इति लवपुरीयश्रीदयानन्दकालेजी साहित्याध्यापकानां एम्. ए. एम्. ओ. एल् इति बिरुदभाजां श्री चारुदेवशास्त्रिणां परिशोधनमप्यपास्तम्। शिष्टैः प्रयुज्येरन्, लक्षणैरनुगम्येरन्निति योजयितुं शक्यत्वाच्च।

साध्वनुमानेनैव बोधकत्वं सदृष्टान्तमुपपादयति [अम्बाम्बेतीति] - यथा बालः करणशक्तिवैकल्यादव्यक्तं शब्दं प्रयुङ्क्ते, प्रतिपत्तारश्च तत्प्रकृतिं व्यक्तं शब्दमवधारयन्ति, तमेव चार्थबोधकं मन्यन्ते, न बालप्रयुक्तमव्यक्तमेवं साधौ प्रयोक्तव्ये इत्यादि रर्थः। 'अम्बाम्बेति यथा बालः' इत्येव वाक्यपदीयपाठः। नेने गोपालशास्त्रिणस्तु यदेति पाठमाश्रित्य यदा = यस्मिन् काले इति व्याचक्षते। तत्त्वसङ्गतमेव।

काशिकाकारास्तु "अत्र बंबबेति पाठ एव युक्तः, नत्वम्बाम्बेति, तस्य साधुत्वात्" इति व्याचक्षते, तत्तु न युक्तम्। मञ्जूषादिप्रामाणिकग्रन्थेषु अम्बाम्बेत्येव पाठस्योपलभ्भात्। शिक्ष्यमाणो बालोऽव्यक्तं भाषते, तेन = अव्यक्तेन अम्बा इत्याकारके व्यक्ते ज्ञाते सति निर्णयो भवतीति वाक्यपदीयस्य सुयोजत्वाच्च।

उक्तमेवार्थं द्रढयितुमाशङ्कते [नन्विति]। [शक्तिकल्पकेति] शक्तिग्राहकेषु व्यवहार एव मुख्यः। सचापभ्रंशेष्वपि तुल्य एवेति भावः। [तेषु तेष्विति] अनन्तेष्वपभ्रंशेष्वित्यर्थः। तथाचापभ्रंशानां नानात्वेन संस्कृतस्य च सर्वत्रैकानुपूर्वीकत्वेन बोधकतया लाघवात्तत्रैव शक्तिरिति भावः। तेषां = साधुपर्यायाणाम्। तथा = सर्वदेशेष्वेकरूपता। अन्यथा = अपभ्रंशेष्वपि शक्तिकल्पनायाम्। [एवमिति] प्रदर्शितरीत्येत्यर्थः। इति = इत्येतत्। [मतेनैवेति] तेषां मतेनैव, नतु शाब्दिकमतेन, तत्तु समनन्तरमेव प्रतिपाद्यत इति भावः।

भैरव - हरिवल्लभ - पञ्चोलिनस्तु - "एवञ्च शक्तत्वमेवास्तु साधुत्वमिति नैयायिकमीमांसकादीनां मतं तन्मतेनैव द्रष्टव्यम्" इति पाठमाश्रयन्ति। "एवञ्च = अपभ्रंशानामशक्तत्वे च। तन्मतेनैवेति असाधुरनुमानेन, ते साधुष्वनुमानेनेति हर्युक्तमताभिप्रायेणैव नैयायिकादीनां मतमित्यर्थः" इति च व्याचक्षते। परं त्वसङ्गतत्वाच्चिन्त्यमिदम्। तत्पाठाश्रयणेऽपीत्थं व्याख्येयम् - एवं च = अपभ्रंशानामशक्तत्वे च, इति = इत्येतत् नैयायिकमीमांसकादीनां मतम्, न वैयकरणानामिति यावत। तन्मतेनैव = तादृशनैयायिकमीमासंकमतेनैव, द्रष्टव्यम् = "असाधुरनुमानेन वाचकः कैश्चिदिष्यते" इति कारिकापूर्वार्धं द्रष्टव्यम्। स्वाशयस्तु समनन्तरमेवोच्यत इति - इत्यलम्।

इदानीं स्वमतमाह - वाचकत्वाविशेषे चेति। यं भावः - अपभ्रंशानामशक्तत्वे ततो बोध एव न स्यात्। न च साधुस्मरणात्ततो बोधः, तानविदुषां पामराणामपि बोधात्, तेषां साधोरबोधाच्च। न च शक्तिभ्रमात्तेभ्यो बोधो, बोधकत्वस्याबाधेन तद्ग्रहस्याभ्रमत्वात्। ईश्वरेच्छा शक्तिरिति मतेऽपि सन्मात्रविषयिण्यास्तस्या बाधाभावात्। शक्तैः पदपदार्थविशेषघटितया भ्रमासम्भवाच्चेति।

उक्तं च वाक्यपदीये - (प्रथमकाण्डे)

पारम्पर्यादपभ्रंशा विगुणेष्वभिधातृषु।
प्रसिद्धिमागता येतु तेषां साधुरवाचकः।। १५५

दैवी वाग् व्यवकीर्णेयशक्तैरभिधातृभिः।
अनित्यदर्शिनां त्वस्मिन् वादे बुद्धिविपर्ययः।। इति। १५६

अवाचकोऽबोधकः। बुद्धिविपर्ययः - एत एव वाचका नान्ये इति विपर्यय इत्यर्थः। किं च विनिगमनाविरहाद्भाषायामपि शक्तिः। न च तासां नानात्वं दोषः।

संस्कृतवन्महाराष्ट्रभाषायाः सर्वत्रैकत्वेन प्रत्येकं विनिगमनाविरहतादवस्थ्यात्। किं चानुपूर्वी पदेऽवच्छेदिका। सा च पर्यायेष्विव भाषायामप्यन्याऽन्यैवेति कस्तयोर्विशेष इति विभाव्यं सूरिभिः। तथा च संस्कृतवद्भाषाशब्दाः शक्ता एव। न च पर्यायतया भाषाणां गणनापत्तिः। साधूनामेव कोशादौ विभागाभिधानात्।

नन्वेवं साधुता तेषां स्यादित्यत आह - नियम इति। पुण्यजननबोधनाय साधूनां साधुभिर्भाषितव्यमिति विधिः। पापजननबोधनाय "नासाधुभि" रिति निषेधः। तथाच पुण्यजननयोग्यत्वं साधुत्वम्। पापजननयोग्यत्वमसाधुत्वम्। तत्र जनकताऽवच्छेदिका च जातिः। तज्ज्ञापकं च कोशादि व्याकरणादि च। एवमेव च राजसूयादेर्ब्राह्मणे फलाजनकत्ववद्गवादिशब्दानां नाश्वादौ साधुत्वमिति सङ्गच्छते। आधुनिकदेवदत्तादिनाम्नामपि ""क्षरम्" इत्यादिभाष्येण व्युत्पादितत्वात् साधुत्वम्। एवं च यः शब्दो यत्रार्थे व्याकरणे व्युत्पादितः स तत्रैव साधुरिति पर्यवसितम्। गौणानां गुणे व्युत्पादनात्तत्पुरस्कारेण प्रवृत्तौ साधुत्वमेव। आधुनिकलाक्षणिकानां त्वसाधुत्वमिष्टमेव। अत एव ब्राह्मणाय देहीत्यर्थे "ब्राह्मणं देहि" इत्यादिकं लक्षणयाऽप्यसाध्वित्यादि विस्तरेण प्रपञ्चितं भूषणे। ।।२।। (३८)

"वाचकत्वाविशेषे वा" इति कारिकाभागमवतारयति [इदानीमिति] स्वमतं = वैयाकरणमतम्। नन्वपभ्रंशानां साक्षादवाचकत्वमुपपादितमेवेति कुतोऽयं तत्पक्षपरिपालनक्लेशोऽत आह [अयं भाव इति]। [न चेति] उपपादितं चैतत्प्राक्। तान् = साधु शब्दान्। तेषां = पामराणाम्। [अबोधाच्चेति] अत एव स्त्रीशूद्रबालानां प्रयुक्ते साधौ अर्थसंशये तदपभ्रंशेन निर्णयोऽप्युपपद्यते। किं बोधकत्वरूपशक्तेर्भ्रमोऽभिमतः? उत ईश्वरेच्छारूपशक्तेरिति विकल्प्य नाद्य इत्याह [बोधकत्वस्येति] नान्त्य इत्याह [ईश्वरेच्छेति] उभयसाधारण्येनाह [शक्तेरिति] हरिकारिकायां - पारम्पर्यादिति। परम्पराशब्दोऽव्युत्पन्नं प्रातिपदिकं स्त्रीलिङ्गम्। ततः स्वार्थे ष्यञ्। परम्परात इत्यर्थः। ये तु शब्दा अभिधातृषु विगुणेषु सत्सु अपभ्रंशाः सन्तः परम्परया प्रसिद्धिं गताः, तेषां शब्दानां साधुरवाचक इति योजना। अभ्यासात् स्त्रीशूद्रबालादिभिरपभ्रंशाः प्रयुज्यन्ते प्रमादवद्भिश्च वक्तृभिः। तेषां च तैरेव प्रसिद्धतरो व्यवहारः। अत एव प्रयुक्ते साधौ संशये यस्तस्यापभ्रंशस्तेन सम्प्रति निर्णयः क्रियते। ते तमेवासाधुं प्रत्यक्षेण वाचकं मन्यन्ते। साधुं त्वसाध्वनुमानेनेति प्रथमकारिकाशयः। पुराकल्पे विशिष्टानां

मनुष्याणां वाग् यथाऽनृतादिभिरसंकीर्णा, तथाऽपभ्रंशैरप्यसंकीर्णाऽऽसीत्। अद्यत्वे तु अशक्तैरभिधातृभिरियं संस्कृतमयी वाक् विशेषेणापभ्रंशैः संकीर्णाभूत्। तथाच व्यक्तशक्तेः कालवशाद्धि प्रकृतिरेव प्रयोक्तृणां तथा रूढिमुपगतेति 'दैवी वाक्' इत्यादेरर्धकारिकाशयः। ननु पक्षद्वयस्यापि हरिणैव प्रतिपादनात्कथं "पारम्पर्या" दित्याद्येव वैयाकरणमतमिति निर्णय इति शङ्कानिवारणायोत्तरकारिका भागमपि दर्शयति [अनित्यदर्शिनामिति] शब्दानित्यत्ववादिनां नित्यस्पोटशब्दमनिच्छतामिति यावत्। अनित्यत्ववादी तु सः, यः साधूनां धर्महेतुत्वं न प्रतिपाद्यते। स हि सर्वशब्दानां समूहं स्वाभाविकमाचष्टे इति कारिकाभागाशयः। [अबोधक इति] तथाच पूर्वस्मिन् मते असाधुः साधुशब्दस्मरणद्वाराऽर्थबोधकः, अस्मिन् मते तु न तथा, साधुरेवासाधुस्मरणद्वाराऽर्थबोधकः, अस्मिन् मते तु न तथा, साधुरेवासाधुस्मरणेनेति विवेक इति भावः। युक्त्यन्तरमाह [किञ्चेति] पूर्वोक्तं दोषमुद्धरति [नचेति] [तयोरिति] साध्वपभ्रंशयोरित्यर्थः। उपसंहरति [तथाचेति]

'नियमः पुण्यपापयोः' इति कारिकाभागमवतारयति [नन्विति] एवम् = अपभ्रंशानामपि शक्तत्वे। [विधिरिति] तथाच पस्पशायां भाष्यम् - "समानायामर्थावगतौ शब्देन चापशब्देन च धर्मनियमः क्रियते, शब्देनैवार्थोऽभिधेयो नापशब्देन" इति। यद्यपि 'साधूनेव भाषेत' इति न श्रूयते, तथापि "एकः शब्दः सम्यग् ज्ञातः सुष्ठु प्रयुक्तः स्वर्गे लोके कामधुग्भवति" इति फलवाक्ये तन्निर्देशादेवेदृशविधिः कल्प्यते। तत्र के साधव इत्याकाङ्क्षायामेत एव साधव इति व्याकरणेन प्रतिपादनद्वारा शास्त्रेण धर्मनियमो विधीयत इति बोध्यम्। [निषेध इति] अत्रापि तदेव भाष्यं मानम्। तथा "न म्लेच्छित वै = नापभाषित वै" इति भाष्यं मानम्। योग्यत्वं = जनकतावच्छेदकधर्मवत्त्वम्। तत्र = साधुशब्दे। नन्वेवं गवादिपदानां निरुक्तरीत्या साधुत्वे विप्रतिपत्तेरभावात्तेषामश्वादितात्पर्येण प्रयोगेऽपि साधुत्वापत्तिरत आह [एवमेवेति] तत्तदर्थपुरस्कारेण तत्तच्छब्दनां साधुत्वपर्यवसानलाभेनैवेत्यर्थः। [फलाजनकत्ववदिति] अध्ययनविधिसिद्धविद्याधानसिद्धाग्निमत्त्वरूपाधिकारवतोऽपि ब्राह्मणस्य राजसूययागकरणे न फलजनकत्वम्। तद्विधौ राजपदाश्रयणेन क्षत्रियस्यैवाधिकारित्वलाभात्, तद्वदित्यर्थः। [सङ्गच्छत इति] एवमेव गोणीशब्दस्य गवि अपभ्रष्टत्वेऽपि आवपनेर्थे साधुशब्दत्वमेवेत्याद्यपि बोध्यम्। नन्वाधुनिकदेवदत्ताद्यर्थपुरस्कारेण देवदत्तादिशब्दानां शास्त्रेऽव्युत्पादनात्तेषां देवदत्तादौ साधुत्वं न सिद्ध्यतीत्यत आह [आधुनिकेति] [भाष्येणेति] "घोषवदाद्यन्तरन्तस्थं "क्षरं चतुरक्षरं वा नाम कुर्यात्" इत्यादिपस्पशास्थभाष्येणेत्यर्थः। फलितार्थमाह [एवं चेति] निरुक्तार्थस्य प्रमाणसिद्धत्वे

चेत्यर्थः। नन्वेवं गौर्वाहीकः अग्निर्माणवक इत्यादौ गवादीनां साधुत्वानापत्तिरत आह - [गौणानामिति] गुणादागता गौणाः, मान्द्यादिगुणयोगान्माणवकादौ प्रयुक्तास्तादृशानामित्यर्थः। आधुनिकलाक्षणिकानेव दर्शयति [अत एवेति] यः शब्दो यत्रार्थे इत्याद्यर्थस्वीकारादेवेत्यर्थः। [इत्यादिकमिति] आदिपदेन 'न गृहीतम्' इत्यर्थे 'गृहीतम्' इत्यादेर्ग्रहणम्। अन्यथा तस्य कूटसाक्ष्यत्वानापत्तेः। नन्वपभ्रंशानामर्थवत्त्वे तन्निबन्धनप्रातिपदिकत्वापत्तौ ततः सुबुत्पत्त्या व्याकरणव्युत्पाद्यत्वात्साधुत्वप्रसङ्ग इति चेत् न। "सिद्धे शब्दार्थसम्बन्धे लोकतोर्थऽप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमो यथा लौकिकवैदिकेषु" इति प्रथमवार्त्तिकेनैव निरस्तत्वात्। लोकतोऽर्थबोधार्थं प्रयुक्ते शब्दे इति व्याख्यानात्। नहि प्रकृतिप्रत्ययसमूहरूपेण वचन्तीत्यादिवद्भाषाशब्दानां प्रयोगः। एतन्मूलकमेव "अनभिधानान्न भवति" इत्यादिकम्। किञ्च भाषाशब्दानां तत्तदर्थे व्युत्पादनविरहान्न साधुत्वम्। तदाह [इत्यादि विस्तरेण प्रपञ्चितं भूषणे इति] ।।३८।।

अतिरिक्तशक्तेर्ग्रहोपायमाह -

सम्बन्धशब्दे सम्बन्धो योग्यतां प्रति योग्यता।
समयाद् योग्यतासंविन्मातापित्रादियोगवत्।।३।। (३९)

सम्बन्धो विषयः। योग्यतां प्रति योग्यता सम्बन्धि शब्दं प्रति योग्यता विषय इति। समयाद् = व्यवहारात्। योग्यतासंवित् = शक्तिग्रहः। घटपदमत्र योग्य मेतत्सम्बन्धीति व्यवहारात्सा ग्राह्येत्यर्थः।।।३।।(३९)

इति कौण्डभट्टविरचिते वैयाकरणभूषणसारे
शक्तिनिर्णयः समाप्तः।।

[अतिरिक्तशक्तिग्रहोपायमिति] प्राथमिकशक्तिग्रहोपायमित्यर्थः। अयमर्थः - गौ र्गोपदसम्बन्धी, गोपदं गोरूपार्थबोधनयोग्यमिति व्यवहाराद्गवादिपदानां शक्तिग्रहः सिद्ध्यति। स च शक्तिग्रहः प्राथमिकशक्तिग्रहाधीनः। अतस्तदुपायः प्रथमतो दर्शनीय - इति। तथाच अतिरिक्तः = अस्मदादिभिर्गृहीताद्गवादिपदविषयकाच्छक्तिग्रहादतिरिक्तः यः प्राथमिकः शक्तिग्रहः सम्बन्ध - योग्यतादिपदविषयकस्तमुपायमिति प्रकृतग्रन्थार्थः। स्पष्टश्चायमर्थो भूषणपरिशीलकानाम्। एतेन "अतिरिक्तेति - कोशव्याकरणाभ्यामतिरिक्तो यः शक्तिग्रहोपाय - स्तमित्यर्थः। तथाचानधीतव्याकरणानां तेन शक्तिग्रहासम्भवात्तदर्थं व्यवहाररूपमप्युपायमाहेति पर्यवसानान् वैयर्थ्य मिति भाव" इति

दर्पणाद्युक्तमपास्तम्। [सबन्धो विषय इति] - तज्जन्यप्रतीतिविषय इत्यर्थः। तथाच 'सम्बन्धशब्दे सम्बन्ध' इत्यस्य सम्बन्धशब्दवाच्यः सम्बन्ध इत्यर्थः। एवं योग्यतां प्रति योग्यतेत्यस्यापि योग्यताशब्दवाच्या योग्यतेत्यर्थः। इति शब्दश्चाध्याहार्यः। तथाच सम्बन्धशब्दवाच्यः सम्बन्धः योग्यताशब्दवाच्या योग्यता च इत्येद्रूपात् समयात् = प्राथमिकव्यवहारात्, योग्यतासंवित् = गवादिपदशक्तिग्रह इति कारिकार्थः। तदेवाह [इति समयाद् = व्यवहारादिति] इत्येतद्रूपात्प्राथमिकाद्व्यवहारादित्यर्थः। तद्बलेन गवादिपदशक्तिग्रहसिद्धिरित्याह [योग्यतासंविद् = शक्तिग्रह इति] अस्मदादिभिर्गृह्यमाणो गवादिपदविषयकश्शक्तिग्रह इत्यर्थः। तदेवोपपादयति [घटपदमिति] [सा ग्राह्येति] सा शक्तिरयं शब्द एतदर्थसम्बन्धी एतद्बोधनयोग्य इत्यादिव्यवहाराद् ग्राह्या। प्राथमिकशक्तिग्रहस्य व्यवहाराधीनत्वात्। प्राथमिकसम्बन्धयोग्यतादिशब्दानां तद्ग्रहे सति गवादिपदे स्थलान्तरेऽनेन प्रकारेण सा ग्राह्येति भावः। तत्र दृष्टान्तमाह कारिकायां - [मातापित्रादियोगवदिति] इयमस्य माता, अयमस्य पितेति व्यवहाराद्यथा तत्सम्बन्धग्रहस्तद्वदत्रापीति भावः। मातापुत्रादीति क्वचित्पाठः। इयमस्य माता, अयमस्याः पुत्र इति व्यवहारवदिति तदर्थो बोध्यः।। ।।३९।।

इति वैयाकरणभूषणसारतत्त्वदर्शिन्यां

शक्तिनिर्णयः।।६।।

अथ नञर्थनिर्णयः

अथ नञर्थमाह -

नञ्समासे चापरस्य प्राधान्यात्सर्वनामता।
आरोपितत्वं नञ्द्योत्यं न ह्यसोऽप्यतिसर्ववत्।।१।।(४०)

नञ्समासेऽपरस्योत्तरपदार्थस्य प्राधान्यात्सर्वनामता सिद्ध्यतीति शेषः। अत एवाऽऽरोपितत्वमेव नञ्द्योत्यमिति। 'अभ्युपेयम्' इति शेषः। अयं भावः - 'असर्वः' इत्यादौ आरोपितः सर्व इत्यर्थे सर्वशब्दस्य प्राधान्याबाधात्सर्वनमता सिद्ध्यति। अन्यथाऽतिसर्व इत्यत्रेव सा न स्यात्। घटो नास्तीत्यादावभावविषयकबोधे तस्य विशेष्यताया एव दर्शनात्। अस्मद्रीत्या च स आर्थो बोधो मानसः। तथा च असर्वस्मै इत्याद्यसिद्धिप्रसङ्गो न - इति। अत्र चाऽऽरोपितत्वमारोपविषयत्वम्। आरोपमात्रमर्थो विषयत्वं तु संसर्ग इति निष्कर्षः। द्योत्यत्वोक्तिर्निपातानां द्योतकत्वमभिप्रेत्य।।१।। (४०)

अथ नञर्थनिर्णयः

"अभावो नञर्थः" इति नैयायिकाद्युक्तमयुक्तमिति सूचयन् नञर्थनिरूपणायोपक्रमते [नञर्थमिति] यत्तु "समासे खलु भिन्नैव" इत्यत्र "पङ्कजशब्दवत्" इति वदता समासे तद्घटकप्रत्येकपदशक्तिसहकृतसमुदायशक्तेर्व्यपेक्षात्वमङ्गीकृतम्। तच्चानुपपन्नम्। यत्र समासघटकप्रत्येकपदस्यानर्थकत्वं, तत्र प्रत्येकपदशक्तिसाचिव्यासम्भवात्। यथा नञ्समासघटकनञः। "द्वयोरर्थाभिधाने हि व्यापारो नैव विद्यते" इत्यभियुक्तोक्तेः। एवं च जहत्स्वार्थावाद इवेदृशस्थल उत्तरपदार्थादिप्राधान्यस्य स्वरसतोऽनुपपत्तिरितीमामाशङ्कां परिहर्तुं नञर्थनिरूपणमित्याह - नञर्थमिति" इति दर्पणकाराः। तन्न। पङ्कजशब्दवदिति वदता मूलकृता व्यपेक्षावादो न निरूपितः, किन्तु जहत्स्वार्थवाद एवेति समासशक्तिनिर्णये सविस्तरं सप्रमाणमस्माभिः प्रतिपादितत्वात्, नञ्समासघटकनञोऽनर्थकत्वाभावाच्च। यत्र प्रकृत्यर्थानुवादिका विभक्तिः - यथा एको, द्वौ, त्रयः, भूयते, तद्विषयकत्वाच्च वृद्धोक्तेः। द्वयोरेकार्थाभिधाने शक्ति रूपः पृथग्व्यापारो नैव विद्यते, किंतु समुदायवाच्य एव सोऽर्थ इति तदर्थात्। एतत्समानार्थकमेव पठ्यते - "सभेदे नान्यतरवैयर्थ्यम्" इति। किञ्च तदुक्तरीत्या समासे नञोऽनर्थकत्वे, तत्र व्यपेक्षावादस्य निर्वक्तुमशक्यतया तत्र जहत्स्वार्थताया एवाभ्युपेयतया सर्वत्रापि समासे तत्स्वीकारस्यैव युक्तत्वाच्च। तत्प्रदर्शितशङ्का-समाधानयोर्मूले लेशतोऽप्यनुपलभ्भाच्चेति दिक्।

नन्वब्राह्मण इत्यादौ ब्राह्मणादिशब्दानां जातिमात्रपरत्वे अविद्यमानं ब्राह्मण्यं यस्येति व्युत्पत्त्या क्षत्रियादेरभिधानान्नञ्समासोऽन्यपदार्थप्रधानः स्यात्। नञो भेदवदर्थकत्वे भेदे ब्राह्मणादेः प्रति योगितयाऽन्वये ब्राह्मणभिन्न इति बोधोत्पत्त्या नञ्समासः पूर्वपदार्थप्रधानः स्यात्। एवं च कारिकायाम् "अपरस्य = अन्यपादार्थस्य, पूर्वपदार्थस्य प्राधान्याभावेन सर्वनामत्वस्याऽलाभेन "सर्वनामत" इत्युत्तरवाक्यस्याऽसङ्गत्यापत्तेरित्यतः "अपर" पदार्थमाह [उत्तरपदार्थस्येति] नञ्समासस्यान्यपदार्थ-प्राधान्ये ("अवर्षा हेमन्तः") नञ्समासस्यापि पुंलिङ्गैकवचनयोरापत्तिः, पूर्वपदार्थप्राधान्ये "अनेकम्" इत्यादौ प्रधाने भिन्ने एकत्वानवगमेनैकवचनानुपपत्तिः। अन्यपदार्थप्राधान्यपक्षेऽप्येष दोषः प्रसज्यते। अतस्तत्पक्षयोरयुक्तत्वेन वक्ष्यमाणरीत्या नञो द्योतकत्वाश्रयणेन नञ्समास उत्तरपदार्थप्राधान्यमास्थेयम्। स्पष्टं चेदं नञ्सूत्रे भाष्ये। एवंच मूले "अपरस्य" इत्यस्य अन्यपदार्थस्येति पूर्वपदार्थस्येति वा नार्थः। किन्तु उत्तरपदार्थस्येत्येवेति भावः। तदेतत् सूचयन् शेषपूरणेन व्याचष्टे [सिद्ध्यतीति शेष इति] - अन्यथा "न भवति" इति शेषवाक्यार्थः स्यात्। अत एव = नञ्समास उत्तरपदार्थस्यैव प्राधान्यस्वीकारादेव। [आरोपितत्वमेवेति] - एवशब्देन भेदादेर्व्यावृत्तिः। आकरस्वारस्येन सर्वत्राप्यारोपितत्वस्य नञ्द्योत्यत्वलाभेन मूलमवधारणपरतया व्याख्यातम्। एतेन "घटो न पटः, घटो नास्तीत्यादावभावशाब्दबोधस्य सार्वजनीनप्रसिद्धिसिद्धतया नञोऽभावार्थकत्वमावश्यकम्। तथा चोत्तरपदार्थप्राधान्यादिव्यवस्था सुलभा। यद्यपि घटो नेत्यादावभावविशेष्यकभावबोधस्तथापि 'असर्व' इत्याद्यनुरोधेन आरोपितत्वार्थकत्वमपि नञोऽङ्गीकरणीयम्" इति "नञ्समासे" इति प्रतीके दर्पणकारोक्तमपास्तम्। "घटो नास्ति - अब्राह्मण इत्यादावारोपबोधस्य सर्वानुभवविरुद्धत्वात्पक्षान्तरमाह" इत्युत्तरकारिकावतरणग्रन्थस्वारस्येनास्य ग्रन्थस्य सर्वत्राप्यारोपितत्वार्थकत्वप्रतिपादकत्वलाभाच्च। असर्व इत्याद्यनुरोधेनाऽऽरोपितत्वार्थकत्वस्वीकारे घटो न पट इत्यत्रापि नञस्तदर्थकत्वस्वीकारे बाधकाभावाच्च। असमस्ते नञोऽभावार्थकत्वं, समस्त आरोपितत्वार्थकत्वमित्यत्र नियामकाभावाच्चेति दिक्।

[नञ्द्योत्यमिति] - अत्र च "नञ्" २-२-६ सूत्रस्थं भाष्यं प्रमाणम्। तत्र हि नञः समभिव्याहृतपदार्थनिवर्तकता स्वाभाविकी? उत वाचनिकी? इति विकल्प्य "स्वाभाविकी नञ्निमित्ता तूपलब्धिः, तद्यथा, समन्धकारे द्रव्याणां समवस्थितानां प्रदीपनिमित्तं दर्शनम्। न च तेषां प्रदीपो निर्वर्तको भवति" इत्युक्तम्। अयं भावः - ब्राह्मणादिशब्दाः प्रसिद्ध्या अनारोपितब्राह्मणत्वविशिष्टार्थकाः,

आरोपितब्रह्मणत्वविशिष्टार्थकाश्च। ते च शब्दाः परस्परं भिन्नाः। नञ् तु स्वविशिष्टब्राह्मणादिपदाना मारोपितब्राह्मणत्वविशिष्टार्थकत्वे तात्पर्य ग्राहकः। एतदेव नञो द्योतकत्वं नाम। उत्तरपदार्थ-प्राधान्यमप्येतदेव। नञसमभिव्याहृताः केवलब्राह्मणादिशब्दास्तु प्रसिद्धिवशा न्मुख्यब्राह्मणत्वविशिष्टार्थका इति। अत्र प्रदीपदृष्टान्तेन नञो द्योतकत्वं स्पष्ट मेव लभ्यते इति।

ननु नञोऽभावार्थकत्वे सकलतन्त्राणि प्रमाणं भवितु मर्हन्ति। नञ आरोपितत्वार्थकत्वे न किञ्चित्प्रमाणं पश्याम इति चेत्, "नञ्" २-२-६ सूत्रस्थं भगवतः पतञ्जलेर्महाभाष्यं नञ आरोपितत्वार्थकत्वे प्रमाणं भवितुमर्हति। तत्रहि - नञ्समासस्योत्तरपदार्थप्राधान्यपक्षे, अब्राह्मण इत्यादितो ब्राह्मणमात्रस्याऽऽनयनं प्राप्नोतीत्यशङ्क्य, राजपुरुष इत्यादौ राजसम्बन्धात्तद्विशिष्टस्येव नञ्सम्बन्धान्निञ्विशिष्टस्यानयनं भविष्यतीत्युक्त्वा "कः पुनरसौ?" इति प्रश्ने "निवृत्तपदार्थकः" इति समाहितम्। "निवृत्तपदार्थक" इति कप्प्रत्ययसूचितबहुव्रीहिसमासेऽन्यपदार्थश्च "कः पुनरसौ?" इति पूर्ववावयोपात्तादश्शाब्दार्थ इत्यर्थः। सर्वथा निवृत्तपदार्थत्वे विशेषणमेव न युज्येत। तथाच निवृत्तमुख्यब्राह्मणत्वादिरारोपितब्राह्मणत्ववानिति भाष्याक्षरार्थः। नञ्समभिव्याहारे निवृत्तमुख्यब्राह्मणत्वको ब्राह्मणशब्दार्थ इति बुद्धे आरोपितब्राह्मणत्वार्थकत्वं फलति। सा च मुख्यब्राह्मण्यनिवृत्तिः स्वाभाविकी, सा च नञा द्योत्यते। तत्रैतद्भाष्यं प्रमाणं भवत्येव।

प्रकारान्तरेणापि नञ आरोपितत्वार्थद्योतकत्वं भाष्ये व्युत्पादितम्। तत्र हि - "अथवा सर्व एते शब्दा गुणसमुदायेषु वर्तन्ते। ब्राह्मणः, क्षत्रियो, वैश्यः, शूद्र इति।

'तपः श्रुतं च योनिश्चेत्येतद् ब्राह्मणकारकम्।
तपःश्रुताभ्यां यो हीनो जातिब्राह्मण एव सः।।'

समुदायेषु च वृत्ताश्शब्दा अवयवेष्वपि वर्तन्ते। तद्यथा - पूर्वे पञ्चालाः, तैलं भुक्तम्। एवमयं ब्राह्मणशब्दो गुणसमुदाये प्रवृत्तोऽवयवेष्वपि वर्तते। जातिहीने गुणहीने च। सन्देहातावद्गौरं शुच्याचारं पिङ्गलं कपिलकेशं दृष्ट्वाऽध्यवस्यति "ब्राह्मणोऽयम्" इति। तत उपलभते नायं ब्राह्मणः = अब्राह्मणोऽयमिति" इत्याद्युक्तम्। तपश्श्रुतादिगुणसमुदायो ब्राह्मणशब्दार्थः। तत्र तपश्श्रुताभ्यां रहिते जात्या ब्राह्मणे अब्राह्मणशब्दः प्रयुज्यते। तथा तपश्श्रुताभ्यां सहिते ब्राह्मणत्वरहिते क्षत्रियादावब्राह्मणशब्दः प्रयुज्यते। गुणसमुदायवति शक्तस्य ब्राह्मणशब्दस्यार्थे कतिपयगुणाभावप्रतिपादनाय नञः प्रयोगः।

तत्र चावयवे जात्यादिमात्रे समुदायरूपारोपाच्छब्दप्रयोगः। ब्राह्मणत्वादिगुणसत्ताप्रतिपादनाय ब्राह्मणशब्दप्रयोगः। निवृत्तगुणानां निवृत्तिप्रतिपादनाय नञः प्रयोग इति तद्भाष्यार्थः। एवं चारोपस्यैव शब्दप्रयोगकारणत्वाद् बोद्धुरपि तदारोपविषयस्यैव प्रतीतेरत्रापि पक्ष आरोपितत्वार्थद्योतकत्वमेव नञो लभ्यते।

एवं च निरुक्तनञ्सूत्रस्थभाष्योक्तपक्षद्वयादपि नञ आरोपितत्वद्योतकत्वं स्पष्टं प्रतीयते। एतद्भाष्यार्थं मनसि निधायैव दीक्षितमहाशयः "आरोपितत्वं नञ्द्योत्यम्" इत्याह।

"आरोपितत्वं नञ्द्योत्यम्" इत्यस्य "नहि" इत्यत्रान्वयभ्रमवारणाय शेषपूरणेन व्याचष्टे - [इत्यभ्युपेयमिति] नहीत्येतदुत्तरान्विय। एवं च नञ्समासेऽन्यपदार्थस्य पूर्वपदार्थस्य वा प्राधान्यात्सर्वनामता नहि भवति, आरोपितत्वं नञ्द्योत्यं नहि, असश्शब्दोऽप्यतिसर्ववदेवेति विपरीतार्थबोधवारणाय "अपरस्य" इति उत्तरपदार्थस्येत्यनेन, "सर्वनामता" इति सिद्ध्यतीति शेषपूरणेन, "आरोपितत्वं नञद्योत्यम्" इति "इत्यभ्युपेयम्" इति शेषपूरणेन च व्याख्यातम्। तदेतदाह - [अयं भाव इत्यादिना] - सर्वनामता = सर्वनामसंज्ञा। [सिद्ध्यतीति] - "एतत्तदोः सुलोपोऽकोरनञ्समासे हलि" ६-१-१३२ इति सूत्रेऽनञ्समासग्रहणमिह लिङ्गम्। अन्यथा 'असः' इत्यादावुपसर्जनत्वेन त्यदाद्यत्वस्याप्राप्त्या हल्ङ्यादिलोपस्य दुर्वारत्वेन तद्वैयर्थ्यं स्पष्टमेव। नच वचनसामर्थ्यादुपसर्जनत्वेऽप्यत्वमिति वाच्यम्। लाघवेनोत्तरपदार्थप्राधान्यस्यैव ज्ञापयितुं युक्तत्वात्। अन्यथा = उत्तरपदार्थप्राधान्याभावे। [अतिसर्व इत्यत्रेवेति] - अतिक्रान्तः सर्वमित्यर्थे इति भावः। अतिशयितः सर्व इत्यर्थस्वीकारे तु सर्वनामता भवत्येव। सा = सर्वनामता।

ननु नञोऽभावार्थकत्वेऽपि तस्य प्रतियोगितसम्बन्धेन प्रतियोगिनि विशेषणत्वेनान्वये उत्तरपदार्थस्य प्राधान्यं सिद्ध्यत्येवेत्याशङ्क्याह [घटो नास्तीत्यादाविति] अत्र घटाभावोऽस्तित्वाश्रय इत्याकारको घटकर्तृकसत्ताभाव इत्याकारको वा बोधोऽनुभवसिद्धः, नत्वभावप्रकारकः। तथाचाभावार्थकत्वे नञस्तत्र प्रतियोगिनो विशेषणत्वमेव स्यादिति प्रकृते सर्वनामता न सिद्ध्यतीति भावः। तस्य = नञर्थाभावस्य। नन्वेवमघटः पट इत्यादितो घटभिन्नः पट इति सर्वानुभवसिद्धप्रतीतेरपलापापत्तिरत आह [अस्मद्रीत्या चेति] - नञ आरोपितत्वद्योतकत्वं भाष्यप्रामाण्येनाभ्युपगच्छतां वैयाकरणानां रीत्यात्वित्यर्थः। सः = भेदबोधः। [आर्थ इति] - घटभिन्न एव घटत्वारोपादारोपितघटत्वस्य घटभेदस्य च

सामानाधिकरण्यात्तुल्यवित्तिवेद्यतया घटभिन्नः पट इति बोधः फलतीति भावः। अत्र च मते एतादृशाभावज्ञानमादाय नञर्थविशेष्यको बोध इति व्यवहारः प्रतियोगिज्ञानप्रतिबन्धादिकं च सङ्गमनीयमिति स्पष्टं भूषणे। शब्दादनुपस्थितेराह [मानस इति] [तथाचेति] असर्व इत्यादेः सर्वनामसंज्ञासिद्धौ चेत्यर्थः। अत्र "असर्वस्मै इत्याद्यसिद्धिप्रसङ्गो न" इति नञ्घटितः पाठः। तथाचेत्युपक्रमानुरोधात्।

दर्पणकारास्तु नञ्रहितपाठमाश्रित्य "ननु अतिसर्वशब्दस्य सर्वनामसंज्ञाया अभावे का क्षतिरित्यत आह तथाचेति" इति व्याचख्युः। तत्तु न समीचीनम्। तद्रीत्या "तथाच" इत्यस्य सर्वनामसंज्ञाया असिद्धौ चेत्यर्थो वाच्यः। स च संदर्भविरुद्धः। पूर्वग्रन्थेन तत्र संज्ञासिद्धेः सुदृढीकृतत्वात्। अन्यथाशब्दादिवत् "तथा च" इत्यतः तदर्थालाभश्च। सर्वनामसंज्ञाभावसिद्धौ चेत्यर्थकथनमपि संदर्भविरुद्धमेव। तथाचेत्युपक्रमात्। संदर्भशुद्धेश्च नञ्सहितपाठ एव युक्तः। श्रीमत्पञ्चोलिभिरादृते ग्रन्थेऽपि नञ्सहितपाठ एवोपलभ्यत इत्यलम्। इति शब्दो भावसमाप्त्यर्थकः।

[अत्र चेति] नञ आरोपितत्वद्योतकत्वकल्पे चेत्यर्थः। [आरोपविषयत्वमिति] तथाचात्र पक्षे आरोपविषयब्राह्मणत्ववानिति बोध इति ज्ञेयम्।

नञो वाचकत्वे आह - [आरोपमात्रमिति] [अर्थ इति] नञो वाच्योऽर्थ इत्यर्थः। मात्रशब्देन विषयत्वव्यवच्छेदः। ननु आरोपमात्रस्य वाच्यत्वे विषयत्वस्य भानं कथम्? अत आह [विषयत्वं त्विति] 'तु' शब्दघटितः पाठः सार्वत्रिकः। नञ् सूत्रस्थमनोरमासम्मतश्च। लाघवादारोपमात्रमेव वाच्योऽर्थः। तस्य चोत्तरपदार्थे ब्राह्मणादौ विषयतासम्बन्धेन विशेषणत्वम्। तादात्म्यारोपश्चात्र। नामार्थयोरभेदान्वयव्युत्पत्तिस्तु निपातातिरिक्तविषयैवेति भावः।[निष्कर्ष इति] वाचकतावादिनामिति शेषः। अत्र पक्षे आरोपितो ब्राह्मण इति बोधः।

नचात्रापि पक्षे नञो द्योतकत्वमेवेति ग्रन्थकर्तुराशय इति वाच्यम्। समभिव्याहृतपदनिष्ठ-शक्त्युद्बोधकत्वस्यैव द्योतकत्वेन विशिष्टस्यैवोत्तरपदनिष्ठशक्तिविषयतया आरोपब्राह्मणयोः पृथगुपस्थित्यभावेन "विषयत्वं तु संसर्गः" इति मूलग्रन्थस्यासङ्गत्यापत्तेः। पृथगुपस्थित योर्हि संसर्गो भवति। अत "आरोपमात्रमर्थः" इति ग्रन्थो नञो वाचकत्वाश्रयणेन प्रवृत्त इति बोध्यम्।

"विषयत्वं तु" इति तुनाऽरुचिर्बोध्यते। सा चेत्थम् - नञो द्योतकत्वमेव युक्तम्। नतु वाचकत्वम्। आरोपस्य नञ्वाच्यत्वेऽपि ब्राह्मणादिपदानां मुख्यसम्बन्धेन ब्राह्मणत्वादिमति शक्तिग्रहात्तत्रारोपित्वान्वयस्य दुर्घटत्वात्। विशिष्टस्य नञ्वाच्यत्वेऽप्येतद्दोषतादवस्थ्यात्। न च

नञ्समभिव्याहारात्तदर्थत्यागेनादोष इति वाच्यम्। तस्याशक्यत्वात्। शब्दार्थसम्बन्धस्यानित्यतापत्तेश्च। द्योतकतापक्षे त्वनारोपितब्राह्मणत्ववत इवाऽऽरोपितब्राह्मणत्ववतोऽपि ब्राह्मणपदार्थत्वं, नञ्समभिव्याहार आरोपितब्राह्मणत्ववद्वाचकत्वतात्पर्यग्राहक इत्युक्तरीत्याऽदोषात्। न ह्येवं वाचकतापक्षे तात्पर्यग्राहकोऽस्ति। नञस्तात्पर्यग्राहकत्वकल्पनायां तु द्योतकत्वपक्ष एव पर्यवसानं स्यात् - इति। तदेतद् ध्वनयन्नाह - [द्योत्यत्वोक्तिर्निपातानां द्योतकत्वमभिप्रेत्येति] निपातानां वाचकतावादिभिरपि अब्राह्मण इत्यादावुपदर्शितदोषवारणाय नञो द्योतकत्वस्यावश्याश्रयणीयतयाऽर्धजरतीयस्याऽन्याय्यतया तेषां द्योतकत्वमेव युक्तमिति सिद्धान्तभूतद्योतकत्वपक्षाश्रयणेनेयमुक्तिरिति भावः।

एतेन "आरोपमात्रमिति - नञो वाच्यो द्योत्यो वाऽर्थः। ननूक्तार्थवाचकत्वस्वीकारेऽपि न क्षतिः। आरोपविषयत्वरूपारोपितत्वस्य आरोपस्य वा विषयतासंसर्गेणोत्तरपदार्थे विशेषणत्वसम्भवेनाऽभिमतोत्तरपदार्थप्राधान्यसिद्धेरत आह - द्योत्यत्वोक्तिरिति - निपातमात्रस्य द्योतकत्वमिति सिद्धान्तानुरोधात्तथोक्तिः। नतु प्रकृते वाचकत्वस्वीकारे काचित्क्षतिरिति भावः" इति काशिकाकारास्तदनुसारिणः पञ्चोलिप्रभृतयश्च परास्ताः।

हरिवल्लभस्तु "अत्र चेति - आरोपितत्वं नञ्वाच्यमिति कल्पे चेत्यर्थः। निष्कर्ष इति। विषयत्वस्य संसर्गमर्यादयैव लाभादनन्यलभ्यारोपमात्रस्यैव नञर्थत्वं, नत्वारोपविषयत्वस्य, गौरवादिति भावः। नन्वारोपमात्रस्य वाच्यत्वाभ्युपगमे द्योतकताप्रतिपादकमूलविरोधोऽत आह - द्योत्यत्वोक्तिरिति - वाच्यस्यापि तस्य विशेषणतैव, नाभाववद्विशेष्यतेति सूचयितुमेव तथोक्तिः" इति व्याचख्यौ। अत्रेदं चिन्त्यम् - "आरोपितत्वं नञ्द्योत्यम्" इति मूले "आरोपितत्वमेव नञ्द्योत्यमित्यभ्युपेयम्" इति तद्व्याख्यानग्रन्थे च जागरूके नञो वाचकत्वाभ्युपगमपरतया व्याख्याने मूलं मृग्यम्। आरोपितत्वस्य नञ्द्योत्यताप्रतिपादककारिकाग्रन्थेन आरोपमात्रस्य नञ्वाच्यताप्रतिपादकसारग्रन्थस्य विरोधोद्भावनमप्यसङ्गतम्। "वाच्यस्यापि विशेषणतैवेति सूचयितुमेव तथोक्तिः" इत्यप्यसङ्गतम्। द्योत्यस्यैव विशेषणत्वमिति नियमाभावात्। वाच्यस्यापि घटत्वादेर्विशेषणाताया दृष्टत्वात्। प्रत्यय स्थल एव वाच्यस्य विशेष्यत्वमेवेति नियमस्तिङर्थवादमञ्जूषायां दर्शितो नान्यत्र विषये। किं चारोपितत्वस्य नञ्वाच्यत्वाभ्युपगमे अब्राह्मण इत्यादावुपदर्शितदोषो दुरुद्धर एव। एवं च सारग्रन्थस्य सर्वस्यापि नञो वाचकत्वपक्षाश्रयणेन योजनं दर्पणकाराणामनुचितमेव।

अतः "अत्र चारोपितत्वमारोपविषयत्वम्" इत्यन्तो ग्रन्थो नञो द्योतकतापक्षाश्रयणेन प्रवृत्तः। आरोपमात्रमर्थो, विषयत्वं तु संसर्गः" इति ग्रन्थस्तु नञो वाचकत्वपक्षाश्रयणेन प्रवृत्त इत्येव व्यवस्था न्याय्या। स्पष्टा चेयं रीतिः" "नञ्" सूत्रे मनोरमाशब्दरत्नयोः। "द्योत्यत्वोक्तिर्निपातानां द्योतकत्वमभिप्रेत्यय" इति ग्रन्थ स्त्वस्माभिर्व्याख्यातपूर्व एवेति दिक्।। ।।४०।।

घटो नास्ति, अब्राह्मण इत्यादावारोपबोधस्य सर्वानुभवविरुद्धत्वात्पक्षान्तरमाह-

अभावो वा तदर्थोऽस्तु भाष्यस्य हि तदाशयात्।
विशेषणं विशेष्यो वा न्यायतस्त्ववधार्यताम्।।२।। (४१)

तदर्थो नञर्थः। अर्थपदं द्योत्यत्ववाच्यत्वपक्षयोः साधारण्येन कीर्तनाय। भाष्यस्येति। तथा च नञ्सत्रे महाभाष्यम् - "निवृत्तपदार्थकः" इति। निवृत्तं पदार्थो यस्य "नपुंसके भावे क्तः" इति क्तः। अभावार्थक इत्यर्थः। यत्तु निवृत्तः पदार्थो यस्मिन्नित्यर्थः। सादृश्यादिनाऽध्यारोपितब्राह्मण्याः क्षत्रियादयोऽर्था यस्येत्यर्थ इति कैयटः, तन्न, आरोपितब्राह्मण्यस्य क्षत्रियादेर्नञवाच्यत्वात्। अन्यथा सादृश्यादेरपि वाच्यतापत्तेः।

यत्तु -

"तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः"।।

इति पठित्वा अब्राह्मणः, अपापम्, अनश्वः, अनुदरा कन्या, अपशवो वा अन्ये गोऽश्वेभ्यः, अधर्म इत्युदाहरन्ति, तत्तु आर्थिकार्थमभिप्रेत्येति स्पष्टमन्यत्र।

विशेषणमिति। प्रतियोगिनीति शेषः। तथा चासर्वपदे सर्वनामसंज्ञा, "अनेकमन्यपदार्थे" "सेव्यतेऽनेकया संनतापाङ्गया" इत्यादावेकशब्दार्थ-प्राधान्यादेकवचननियमः, अब्राह्मण इत्यादावुत्तरपदार्थप्राधान्यात्तत्पुरुषत्वम्, अत्वं भवसि, अनहं भवामीत्यादौ पुरुषवचनादिव्यस्था चोपपद्यते। अन्यथा त्वदभावो मदभाव इतिवदभावांशे युष्मदस्मदोरन्वयेन युष्मत्सामानाधिकरण्यस्य तिङ्क्ष्वसत्त्वात्पुरुष-व्यवस्था न स्यात्। अस्मन्मते च भेदप्रतियोगित्वदभिन्नाश्रयिका भवनक्रियेत्यन्वयात् सामानाधिकरण्यं नानुपपन्नमिति भावः।

"अभावो वा" इत्यादिमूलमवतारयति [घटो नास्तीति] यत्तु "यद्यपि समासयोग्यनञ एवारोपार्थकत्वं मुल उक्तं, तथापि घटो नास्तीत्युक्तिरत्रेव तत्रापि आरोपाननुभव इति दृष्टान्तप्रदानार्था" इति दर्पणकाराः, तन्न। समासयोग्यनञ एव आरोपार्थकत्वमिति मूलकृताऽनभिधानात्। अत एव "वायौ रूपं नास्ति" इत्यत्र रूपाश्रिता आरोपिता सत्ता वायाविति बोधः, पीतश्शङ्खो नास्तीत्यत्र चारोपिता पीतशङ्खसत्तेति आरोपबोधवर्णनं भूषणे कौस्तुभे च सङ्गच्छते। असमस्तनञोऽप्यारोपार्थकत्वं स्पष्टं प्रतिपादितं निपातार्थवादे मञ्जूषायामिति दिक्।

"नञ्द्योत्य" इति नञो विशेषणतया व्यवधानेन चोपस्थितावपि तदादिपदानां बुद्धिस्थपरामर्शकतया तच्छब्देन नञः परामर्शो नानुपपन्न इत्याशयेनाह [तदर्थो नञर्थ इति] [साधारण्येन कीर्तनायेति] पक्षद्वयस्यापि समूलत्वादिति भावः। एवं चात्रार्थपदं नञ्पदजन्यबोधविषयपरमित्याशयः। मूले [तदाशयादिति] तस्मिन् = अभावस्य नञर्थत्वे, आशयादिति सप्तमीसमासः। तत्तदनुभवानुरोधेन नञर्थाभावस्य विशेषणत्वं विशेष्यत्वं वेत्याशयेनाह [विशेषणं विशेष्यो वेति] अत्र द्योत्यस्यापि नञर्थस्य विशेष्यत्वमङ्गी क्रियते, अनुभवानुरोधात्। द्योत्यार्थस्य विशेषणत्वमेवेति "हेतु मतिच" ३-१-२६ इति सूत्रस्थभाष्यसिद्धनियमस्तु नञर्थातिरिक्तविषयक एव।

यत्तु "उभयपक्षत्वावच्छेदेन विशेषणत्वं विशेष्यत्वं च स्वीक्रियते। नतु प्रत्येकपक्षत्वावच्छेदेन। तेन वाचकत्वपक्षे विशेष्यत्वं, द्योतकत्वपक्षे विशेषणत्वमेवेति न "हेतुमति च" इति सूत्रस्थभाष्यविरोधः इति काशिकाकाराः। तन्न। नञर्थस्य विशेष्यत्वमिति पक्षनिरूपणावसरे "अत्वं भवसि" इत्यादौयुष्मदस्मदो स्तद्धिन्ने लक्षणा। "नञ् द्योतक" इत्युक्त्वा द्योत्यस्यापि विशेष्यत्वमङ्गीकुर्वतो मूलकारस्य मते तद्भाष्यविरोधस्यापरिहृतत्वात्। तस्माद्यथोक्तमेव युक्तम्।

नञोऽभावार्थकत्वे मूले प्रमाणतयोपन्यस्तं भाष्यं नञ्सूत्रस्थं दर्शयति - [निवृत्तपदार्थक इति] भाष्ये पदार्थशब्दोऽभिधेयपरः। निवृत्त इति कर्तृक्तान्त इति कैयटं निराकुर्वन्नाह [नपुंसके भाव इति] तथा च निवृत्तं = निवत्तिः = अभावः। पदार्थः = अभिधेयो यस्येति भाष्याक्षरार्थः। तत्फलितमाह - [अभावार्थक इति] "कः पुनरसौ?" इति प्रश्नस्योत्तरभाष्यं "निवृत्तपदार्थकः" इति। असौ = नञ्, कः पुनः? = किंपदार्थकः? इति प्रश्नभाष्यार्थः। एवं चानेन भाष्येण नञोऽभावार्थकत्वं स्पष्टमेव सिद्ध्यतीत्याशयः। अस्मादेव भाष्यान्नञ आरोपितत्वार्थकत्वलाभ इति कैयटोक्तिं खण्डयति [यत्त्विति] भाष्ये निवृत्तशब्दे कर्तरि क्त इति कैयटाशयः। इत्थं हि तत्र कैयटग्रन्थः - "निवृत्तः पदार्थः मुख्यं ब्राह्मण्यं यस्मिन् सः, क्षत्रित्यादिरर्थः। सादृश्यादिनाध्यारोपितब्राह्मण्यो नञ्द्योतिततदवस्थ इत्यर्थः"

इति। [नञ वाच्यत्वादिति] लाघवान्नञोऽभावार्थकत्वस्वीकारेणैवोपपत्तौ तादृशक्षत्रियादेस्तद्वाच्यत्वा-सम्भवादित्यर्थः। लोके तथाप्रतीत्यभावस्तत्र कारणं, सर्वे दार्शनिका अपि अभावार्थकत्वमेव स्वीकुर्वते नञः। अतस्तदनुरोधेन भाष्यमपि नञोऽभावार्थबोधकत्वेव व्याख्येयामित्यभिप्रैति कौण्डभट्टः।

अन्यथा = लाघवानादरेण आरोपितत्वस्य नञर्थत्वाभ्युपगमे। "सादृश्यादेरपि" इत्यपिशब्देनान्यत्वादेः परिग्रहः। [वाच्यत्वापत्तेरिति] अब्राह्मण इत्यादितः सादृश्यादेरपि प्रतीत्या तस्यापि नञ्वाच्यत्वापत्तेरित्यर्थः। ननु "तत्सादृश्यमभावश्च" इत्याद्यभियुक्तोक्तितः सादृश्यादेरपि नञ्वाच्यत्वलाभात्तत्रेष्टापत्तिरेवेत्यत आह - [यत्त्विति] [अब्राह्मण इति] ब्राह्मणसदृश इति बोधः। [अपापमिति] पापात्यान्ताभाव इति बोधः। [अनश्व इति] अश्वभिन्न इति बोधः। अब्राह्मण इत्यत्र सादृश्यघटकतयाऽन्यत्वबोधः, नतु केवलान्यत्वबोधः। अनश्व इत्यत्र तु केवलान्यत्वबोध इति विशेषः। सादृश्यं पदार्थान्तरमिति मते तु भेदस्य तत्राभावाच्चेति काशिकाकाराः। "अब्राह्मणानश्वयोर्विशेषश्चिन्त्यः" इति तु "नञ्" सूत्रे शब्दरत्नकाराः।

[आर्थिकार्थमभिप्रेत्येति] भेदप्रतियोगित्वप्रकारकब्राह्मणादिबोधानन्तरभावि-मानसबोधमभिप्रेत्येत्यर्थः। अन्यत्र = शब्दकौस्तुभादौ।

ननु नञर्थाभावस्य प्रतियोग्यतिरिक्ते विशेषणत्वाभ्युपगमेऽब्राह्मण इत्यादावसामर्थ्यात्समासानापत्तिः, ब्राह्मणादेरन्योन्याभावप्रत्ययानापत्तिश्चेत्यत आह [प्रतियोगिनीति] [शेष इति] अब्राह्मण इत्यादौ भेदप्रतियोगी ब्राह्मण इति बोधः। ब्राह्मणप्रतियोगिकोऽभाव इति बोधस्त्वार्थिक इति भावः। [तथाचेति] नञर्थाभावस्य प्रतियोगिनि विशेषणत्वे चेत्यर्थः। "सर्वनामसंज्ञा" इत्यादिप्रथमान्तचतुष्टयस्य "उपपद्यते" इत्यत्रान्वयः। [सेव्यतेऽनेकयेति] शिशुपालवधे चतुर्थे सर्गे रैवतकवर्णने पद्यपादोऽयम्। [एकवचननियम इति] अनेक शब्दादेकवचनमेवेति नियम इत्यर्थः। अनेकशब्दान्नियमेनैकवचनसिद्धिरिति यावत्। अनेकमित्यत्र एकभिन्नमिति बोधाङ्गीकारे एकप्रतियोगिकभेदवति द्वित्वस्य बहुत्वस्य वाऽवश्यंभावाद् द्विवचनबहुवचनयोरापत्त्या एकवचनासिद्धिरेव। यत्तु "द्व्येकयोरिति सूत्रं नियमार्थमित्यभिप्रेत्य नियम इत्युक्तम्। नतु पदान्नियमेनैकवचनमित्यर्थौ बोद्धव्यः। तथा सति पक्षान्तरे तदनियमः प्रतीयेत। तच्चायुक्तम्। पूर्वपदार्थप्राधान्ये अन्यपदार्थप्राधान्ये चैकवचनसिद्धेः" इति काशिकाकाराः। तन्न। पक्षान्तरे तदनियमस्येष्टत्वात्। तत्र विशेष्यानुरोधेन वचनप्रवृत्त्यभ्युपगमात्। किञ्च "एवचननियमः" इत्यस्य द्व्येकयोरिति नियम इत्यर्थकथनमप्यसङ्गतम्। उत्तरपदार्थप्राधान्यस्य द्व्येकयोरिति नियमोपपत्तेश्च हेतुहेतुममद्भावाभावादिति दिक्।

[तत्पुरुषत्वमिति] सति सम्भवे प्रायिकस्याप्युत्तरपदार्थप्रधान्यस्य तत्पुरुष औचित्यादिति भावः। [अन्यथेति] नञर्थाभावस्य प्रतियोगिन्यविशेषणत्वे इत्यर्थः। अभावस्य विशेष्यत्व इति यावत्। स्वमते तद्व्यवस्थामुपपादयति [अस्मन्मत इति] अस्मन्तमते त्वित्यर्थः। [सामानाधिकरण्यमिति] युष्मदादिसामानाधिकरण्यमित्यर्थः। तच्च तिङर्थाभिन्नार्थत्वरूपम्।

विशेष्यो वेति। प्रतियोगिनीति शेषः। अयं भावः। गौणत्वेऽपि नञ्समासे "एतत्तदोः सुलोपोऽकोरनञ्समासे हलि" इति ज्ञापकात्सर्वनामसंज्ञा नानुपपन्ना। असः शिव इत्यत्र सुलोपवारणायानञ् समास इति हि विशेषणम्। न च तत्र तच्छब्दस्य सर्वनामताऽस्ति गौणत्वात्। अकोरित्यकच्सहितव्यावृत्त्या सर्वनाम्नोरेव तत्र ग्रहणलाभात्। तथा चानञ्समास इति ज्ञापकं सुवचम्। "अनेकमन्यपदार्थे" इत्यादावेकवचनं विशेष्यानुरोधात्। "सुबामन्त्रिते पराङ्गवत्स्वरे" इत्यतोऽनुवर्तमानं सुब्ग्रहणं विशेष्यमेकवचनान्तमेव। किं चानेकशब्दाद् द्विवचनोपादाने बहूनां, बहुवचनोपादाने द्वयोर्बहुव्रीहिर्न सिद्ध्येदित्युभयसङ्ग्रहायैकवचनं जात्यभिप्रायमौत्सर्गिकं वा। सेव्यतेऽनेकयेत्यत्रापि योषयेति विशेष्यानुरोधात्प्रत्येकं सेवनान्वयबोधनाय चैकवचनं, न तूत्तरपदार्थप्राधान्यप्रयुक्तम्। अत एव "पतन्त्यनेके जलधेरिवोर्मयः" इत्यादिकमपि सूपपादम्।

अत्वं भवसीत्यादौ युष्मदस्मदोस्तद्भिन्ने लक्षणा। नञ् द्योतकः। तथा च भिन्नेन युष्मदर्थेन तिङः सामानाधिकण्यात्पुरुषव्यवस्था। त्वद्भिन्नाभिन्नाश्रयिका भवनक्रियेति शाब्दबोधः। एवं न त्वं पचसीत्यत्र त्वदभिन्नाश्रयकपाकानुकूलभावनाऽभावः। घटो नास्तीत्यत्र घटाभिन्नाश्रयकास्तित्वाभाव इति रीत्या बोधः। असमस्तनञः क्रियायामेवान्वयबोधात्। स चाभावोऽत्यन्ताभावत्वान्योन्याभावत्वादिरूपेण शक्यस्तत्तद्रूपेण बोधादित्यन्यत्र विस्तरः। ।।२।। (४१)

इति कौण्डभट्टविरचिते वैयाकरणभूषणसारे

नञर्थनिर्णयः समाप्तः।।

ननु नञर्थस्योत्तरपदार्थे प्रतियोगितासम्बन्धेनान्वयस्वीकारे अघटमानयेत्यत्र स्वभेदप्रतियोगित्वस्य घटे सत्त्वात्तद्वाक्यजन्यबोधानन्तरं घटानयमनापत्तिरत आह [विशेष्यो वेतीति] ननु नञर्थस्य विशेष्यत्वाभ्युपगमे असर्व इत्यादौ सर्वनामत्वाद्यसिद्धिरत आह [अयं भाव इति] [ज्ञापकादिति] तत्सूत्रघटकानञ्समासग्रहणा ज्ज्ञापकादित्यर्थः। तस्य ज्ञापकत्वं समर्थयितुं प्रथमतस्तत्प्रयोजनं दर्शयति [असः शिव इत्यत्रेति] तस्य वैयर्थ्यं प्रतिपादयति [नचेति] - नहीत्यर्थः। तत्र = नञ्समासे। [गौणत्वादिति] उपसर्जनत्वादित्यर्थः। तत्र सर्वनाम्नोरेव ग्रहणे प्रमाणमाह [अकोरितीति] [ग्रहणलाभादिति] असः शिव इत्यत्र निरुक्तरीत्या सुलोपस्य प्राप्तिरेव नेति तत्र लोपवारणाय कृतमनञ्समासग्रहणं प्रकृतार्थे ज्ञापकं भवतीत्याशयः।

यत्तु "पूर्वपदार्थप्राधान्येऽपि उत्तरपदार्यप्राधान्यप्रयुक्तकार्यप्रवृत्तौ ज्ञापकमित्यर्थः। तेन पुरुषवचनव्यवस्थापि सिद्ध्यति" इति काशिकाकाराः। तन्न। गौरवात्। अनेनैव पुरुषवचनव्यवस्थाया अपि सूपपादतया तदर्थं युष्मदस्मदोस्तद्भिन्ने लक्षणाश्रणप्रयासस्य मूलोक्तस्य वैयर्थ्यापत्तेश्च। "पतन्त्यनेके जलधेरिवोर्मयः" इत्यस्य साधुत्वसम्पादनाय प्रकारान्तरस्यावश्याश्रयणीयत्वाच्चेति दिक्।

नन्वनेकमिति सूत्रे विशेष्यवाचकपदाभावादिदमयुक्तमत आह [सुबामन्त्रित इति] ननु "प्रत्ययः" ३-१-१ इति सूत्रे प्रत्यय इत्यस्यैकवचनान्तस्यापि "नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः" ३-१-१३४ इति सूत्रे यथा प्रत्यया इति वचनविपरिणामेनान्वयस्तथा प्रकृतेऽपि "अनेक" इत्युक्तेपि अनुवृत्तस्य सुबित्यस्य वचनविपरिणामेनान्वयो युज्यत एवेत्यत आह [किञ्चेति] [बहूनामिति] बहूनां बहुव्रीहिर्नस्यादिति योजना। [योषयेति] स्त्रियेत्यर्थः। 'स्त्री योषिदबला योषा नारी सीमन्तिनी वधूः' इत्यमरः। "योषयेति जातावेकवचनम्" इति तच्छ्लोकव्याख्याने सर्वंकषायां मल्लिनाथः। [सेवनान्वयेति] सेवने कर्तृतयान्वयेत्यर्थः।

"वर्जयन्त्या जनैस्सङ्गमेकान्तत
स्तर्कयन्त्या सुखं सङ्गमेकान्ततः।
योषायैष स्मरासन्नतापाङ्ग्या,

इति तत्पद्यशेषो बोध्यः। अत एव = पूर्वपदार्थप्रधान्यादेव। नन्वेवमपि पुरुषव्यवस्थानुपपत्तिरेवात आह [अत्वं भवसीत्यादाविति] [नञ्द्योतक इति] लक्षणा तात्पर्यग्राहक इत्यर्थः। प्रसज्यप्रतिषेधार्थकनञ्स्थले व्यवस्थामाह - [एवमिति] [भावना भाव इति] अस्य "इति रीत्या बोध"

इत्यत्रान्वयः। [क्रियायामिति] अत्र क्रियाग्रहणं गुणस्याप्युपलक्षणम्। अत एव "प्रसज्य क्रियागुणौ ततः पश्चान्निवृत्तिं करोति" इति नञ्सूत्रे भाष्य उक्तम्। प्रसज्य = विधाय। तेन गुणाभावबोधेऽपि प्रसज्यप्रतिषेध इति लभ्यते। गुणोदाहरणं "न न एकं प्रियम्" इति भाष्य उदाहृतम्। नः = अस्माकम्, एकं न प्रियमिति तदर्थः। [अन्वयादिति] अत एव प्रसज्यप्रतिषेधे "असमर्थसमास" इति तत्र भाष्यकृतः।

एवमारोपितत्वं नञर्थ इति पक्षस्य सर्वानुभवविरुद्धतया त्याग एवेत्याशयेन अभावो नञर्थ इति पक्षः कौण्डभट्टेन स्वीकृतः। तत्र नञ्सूत्रस्थं "निवृत्तपदार्थक" इति भाष्यं प्रमाणतयोपन्यस्तम्। अभावस्य विशेषणत्वे विशेष्यत्वे वा असर्व इत्यादौ सर्वनामतादिसिद्धिः प्रदर्शिता चेति बोध्यम्।

इदानीमभावस्य नञर्थत्वं केन रूपेणेति विचार्यते - तत्राभावस्याभावत्वेन रूपेण शक्यत्वे चैत्रो न पचतीत्यादौ भेदबोधापत्तिः। घटः पटो नेत्यादावत्यन्ताभावबोधापत्तिश्च। अत्यन्ताभावत्वादिना तत्तद्रूपेण शक्यत्वे गौरवमित्याशङ्कायामाह [स चेति] [अन्योन्याभावत्वेति] तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकत्वमन्योन्याभावत्वम्। अन्योन्याभावभिन्नत्वे सत्यभावत्वमत्यन्ताभाववत्वम्। आदिपदेन ध्वंसप्रागभावयोर्ग्रहणम्। जन्यत्वे सत्यविनाशित्वं ध्वंसत्वम्। अजन्यत्वे सति विनाशत्वं प्रागभावत्वम्। "घटो ध्वस्तः" "इह घटो भविष्यति" इत्यनुभवसाक्षिणौ ध्वंसप्रागभावौ। यत्रानुयोगिवाचकपदस्य सप्तम्यन्तत्वं तत्राल्ताभावो, यत्रानुयोगिपदस्य प्रथमान्तत्वं, तत्रान्योन्याभावश्च नञा बोध्यत इति नातिप्रसङ्ग इति बोध्यम्। नन्वेवं गौरवं स्यादत आह [तत्तद्रूपेण बोधादिति] अत्यन्ताभावश्च द्विविधः, एकधर्मिमात्रपर्याप्तधर्मावच्छिन्नप्रतियोगिताकः, अनेकधर्मिपर्याप्तधर्मावच्छिन्नप्रतियोगिताकश्चेति। घटत्वादि प्रत्येकपर्याप्तमेकस्मिन्नपि घट इति प्रतीतेस्तदवच्छिन्न आद्यः। द्वित्वादिकमनेकपर्याप्तं घटौ द्वावितिवदेको द्वावित्यप्रतीतेः। तदवच्छिन्न एकघटवति भूतले घटौ न स्त इति प्रतीतिसाक्षिकोऽन्त्यः। नच घटवति "घटाभावो नास्ति, घटो न घटभिन्न इति प्रतीतेरभावाभावोऽपि सिद्ध्येत् एवं "सोऽपि नास्ति" इति प्रतीत्या तदभावोऽपि सिद्ध्येदित्यनवस्थापत्तिरिति वाच्यम्। अत्यन्ताभावाभावः प्रतियोगिस्वरूपः। अन्योन्याभावाभावः प्रतियोगितावच्छेदकरूपः। ततोऽतिरिक्ते न प्रमाणमित्यदोषादिति प्राञ्चः। नव्यास्तु अभावत्वेन प्रतीतेर्घटादिप्रतियोगितदवच्छेदकयोः समानवृत्तिरेकोऽतिरिक्त एवात्यन्ताभावभेदयोरभावः। तदभावस्तु घटाभाव एवेति नानवस्था। एवं ध्वंसस्य प्रागभावः प्रागभावस्य अन्यत्र = स्वकृतपदार्थदीपिकायाम्।

अत्र केचित् - "आरोपितत्वं नञ्द्योत्यम्" इति प्रथमपक्ष एव भाष्यसम्मतः। तत्रैव 'असः' 'अनेकम्' इत्यादीनां साधुत्वम्। "अभावो नञर्थः" इति पक्षो मीमांसकादिसम्मतः। सोऽपि यताकथञ्चित्समर्थयितुं शक्य इत्याशयेनात्र प्रदर्शितः। मूलोक्तरीत्या तत्समर्थनेपि तत्रार्थे 'अस' इत्यादीनामसाधुत्वं तु स्यादेव। मुनित्रयसम्मतेऽर्थे एव शब्दानां साधुत्वस्य सर्वसम्मतत्वात्। मीमांसकादिभिरादृते पक्षेऽपि "नञ्" सूत्रस्थं भाष्यं मानं स्यादिति सम्भावनया तत्प्रदर्शितम्। तत्पक्षनिर्वहणाभिनिवेशेनैव नञ्सूत्रस्थकैयटग्रन्थोऽपि कौण्डभट्टेन निराकृतः। वस्तुतस्तद्भाष्यं नञ आरोपितत्वार्थकतामेव बोधयति। "नञ्" सूत्रे हरदत्तोऽपि "निवृत्तपदार्थकोऽत्र ब्राह्मणशब्दः। सा च स्वाभाविकी निवृत्तिर्नञा द्योत्यते। कोऽर्थः? केवलो ब्राह्मणशब्दः प्रयुज्यमानः प्रसिद्धिवशान्मुख्यमेव ब्राह्मणमाचष्टे। नञ्प्रयोगेण तु सादृश्यादिना निमित्तेनाध्यारोपितं ब्राह्मण्यं, न तात्त्विकमिति द्योत्यते। तदेवं मुख्यो ब्राह्मणशब्दस्यार्थो निवृत्तः। जातिश्चामुख्यः क्षत्रियादिः। ब्राह्मणमात्रस्यानयनं, नापि यस्य कस्यचिदानयनम्" इत्याह।

किञ्च नञर्थाभावस्य विशेष्यत्वे 'अस' इत्यादेः सर्वनामतानापत्तिरेव। "अनञ्समासे" इत्यस्य ज्ञापकत्वं तु न भाष्यारूढम्। अभावस्य विशेषणत्वे तु यत्किञ्चिन्निष्ठभेदप्रतियोगिनो यत्किञ्चित्प्रतियोगिकभेदवतो वा ब्राह्मणस्यानयनापत्तिः। अतः सर्वथा नञोऽभावार्थकत्वकल्पनमसङ्गतमेव। "पतन्त्यनेके जलधेरिवार्मयः" इति प्रयोगे बहुवचनं तु आरोपितैकत्वानां प्रकृत्यर्थतया तत्र वास्तवबहुत्वमादायोपपन्नम्। यदि तु बहुत्वे एकत्वारोपे तस्योत्तरसङ्ख्यात्वेन, उत्तरसङ्ख्यायाश्च पूर्वसङ्ख्याव्यवहारप्रतिबन्धकत्वान्न बहुवचनम्। शब्देनैकत्वस्यैवोपस्थितेश्च। अन्यथा "अनेकमन्यपदार्थे" इत्यत्रापि वास्तवबहुत्वसत्त्वाद्बहुवचनापत्तिरिति विभाव्यते, तदा समुदायबहुत्वे बहुवचनम्। रथः, अश्वः, गजः, सायकसमूहश्चानेकः। ततश्च अनेकश्च अनेकश्च अनेकश्च = अनेक इत्येकशेषः। स्पष्टं चेदं नञ्सूत्रे मनोरमायां कौस्तुभे च। तदेतदभिप्रेत्याह- इत्यन्यत्र विस्तर - इति वदन्ति।

तत्त्वदर्शिनस्तु - दीक्षितेन "फणिभाषितभाष्याब्धेः शब्दकौस्तुभ उद्धृतः। तत्र निर्णीत एवार्थः संक्षेपेणेह कथ्यते" इति कारिकाग्रन्थे वैयाकरणमतोन्मज्जने प्रतिज्ञातम्। नञ्सूत्रे कौस्तुभे भाष्योक्तपक्षद्वयमुपपाद्य तत्फलतया आरोपितत्वं नञ्द्योत्यमिति प्रतिपादितम्। नञोऽभावार्थकत्वं नैव प्रतिपादितम्। नापि नञ्सूत्रस्थकैयटाशयो निराकृतः। अतः "आरोपितत्वं नञ्द्योत्यम्" इति

प्रथमपक्ष एव दीक्षितामतः, नतु "अभावो वा" इत्यादि द्वितीयपक्ष इति निश्चीयते। अत एव नञ्सूत्रे मनोरमायां नञ आरोपितत्वद्योतकत्वमुपपाद्य, अब्राह्मण इत्यादावभावबोध आर्थ इत्युक्त्वा "दर्शनान्तरीत्यास्तु अभाव एव नञर्थ इति वदन्ति। तत्त्वसङ्गतम्। अस इत्यादौ सर्वनामकार्यासिद्धेः" इत्युक्त्वा "यदितु स्वातन्त्र्यमेवावलम्ब्यते, तर्हि यथाकथञ्चित्समर्थयितुं शक्यम्। तथाहि - अनञ्समासग्रहणादप्राधान्येऽपि सर्वनामादिकमिति ज्ञाप्यते। उपेयप्रतिपत्त्यर्था उपाया अव्यवस्थिताः" इत्युक्तम्। "यथाकथञ्चित्समर्थनेऽपि 'अस' इत्यादीनामसाधुत्वं स्यादेव। मुनित्रयसम्मतेऽर्थ एव शब्दानां साधुत्वस्य सर्वसम्मतत्वात्" इति च तत्रैव सूत्रे शब्दरत्न उक्तम्। अनेन 'अभावो नञर्थ' इति परेषां मतं, न दीक्षितस्येति स्पष्टमेव लभ्येत।

किञ्च नञ्सूत्रस्थभाष्यमपि नञोऽभावार्थकत्वे नैव प्रमाणं भवितुमर्हति, किं त्वारोपितत्वद्योतकत्व एव। तथाहि - नञ्समासस्योत्तरपदार्थप्राधान्यपक्षे अब्राह्मण इत्यादितो ब्राह्मणमात्रस्यानयनं प्राप्नोतीत्याशङ्क्य राजपुरुष इत्यादौ राजसम्बन्धात्तद्विशिष्टस्येव नञ्सम्बन्धान्नञ्विशिष्टस्यानयनं भविष्यतीत्युक्त्वा "कः पुन रसौ" इत्याक्षेपे "निवृत्तपदार्थकः" इत्युक्तं भाष्ये। भाष्येऽदश्शब्दार्थो नञ्विशिष्ट एव, नतु नञ्मात्रम्। अनन्तरमपि "यदि स्वाभाविकी निवृत्तिः किं नञ्प्रयुज्यमानः करोति" इति भाष्ये समभिव्याहृतपदार्थवृत्तिरेवाभिहिता। एवं पूर्वोत्तरसंदर्शपर्यालोचने भाष्यान्नञोऽभावार्थकत्वं नैव लभ्यते, किन्तु कैयटोक्तरीत्या समभिव्याहृतपदार्थनिवर्तकत्वमेव नञर्थ इति लभ्यते।

अतोऽत्रत्यः घटो नास्ति, अब्राह्मण इत्यादावारोपबोधस्य सर्वानुभवविरुद्धत्वात्पक्षान्तरमाहेत्यादिः कौण्डभट्टग्रन्थः "अभावो वा" त्यादिदीक्षितग्रन्थाननुगुण एव। कौण्डभट्टो हि नञर्थविषये नैयायिकमतमेव साधु मन्यते। नञ आरोपितत्वार्थकत्वं नानुमनुते। अत एवासमस्तनञ्समभिव्याहारे नञर्थाभावविशेष्यकमेव शाब्दबोधं धात्वर्थनिर्णये वर्णयामास। अत एव कौण्डभट्टः स्वीयपदार्थदीपिकायां नैयायिकमतात्स्वमतस्य केषुचिदंशेषु वैलक्षण्यं प्रदर्शयन्नपि अभावपदार्थनिर्णयावसरे नैयायिकैरेकमत्यमवाललम्बे, नतु तद्व्यतिरेकेण नञ आरोपितत्वार्थकत्वं प्रत्यपीपदत्। कौण्डभट्टः शब्दप्रमाणनिरूपणावसरे नैयायिकरीतिमाश्रित्य लक्षणां प्रदर्श्य "वैयाकरणास्तु गङ्गादिपदानां तीरादौ शक्तिरेव। सर्वेषां पदानां प्रायः सर्वत्रैव शक्तिः। लक्षणा च स्वतन्त्रवृत्तिर्नाभ्युपेयेत्याहुः" इति पदार्थदीपिकामुक्त्वा तमेव सिद्धान्तं भूषणे सारे च प्रपञ्चयामास। तथा गुणनिरूपणावरे नैयायिकमतरीत्या शब्दस्य जन्यत्वमभिधाय तन्निराकरणपूर्वकं शब्दस्य नित्यत्वं प्रतिज्ञाय भूषणे तामेव प्रतिज्ञां निर्वाहयामास।

एवं च दीक्षितो नञ आरोपितत्वार्थकत्वं कौण्डभट्टस्तस्या भावार्थकत्वं चाभिप्रैतीति स्पष्टमेव। अत एव कौण्डभट्टेन 'अभावो नञर्थः' इति स्वसिद्धान्तप्रदर्शनावसरे "अत एवारोपितरजतत्वायामेव शुक्तौ नेदं रजतमिति रजतत्वाभावः प्रतीयत इति लीलावत्युपायोक्तमपास्तम्" इति नञ आरोपितार्थकत्वं निराकृतं भूषणे। विद्यते चाशयभेदः क्वचिदन्यत्रापि दीक्षितकौण्डभट्टयोः। प्रधानधात्वर्थाश्रयत्वं कर्तृत्वमिति दीक्षितः। धात्वर्थव्यापाराश्रयत्वं तत्त्वमिति कौण्डभट्टः। वर्णातिरिक्त एव स्फोट इति दीक्षितः, तदनतिरिक्त एव स इति कौण्डभट्टः।

अतः "अभावो वा" इत्यादि दीक्षितकारिकाग्रन्थ एवं व्याख्येयः - एवं भाष्याभिमतं वैयाकरणसिद्धांतमुपपाद्य 'अभावो नञर्थः' इति परेषां मतमाह [अभावो वेति] वाशब्दोऽनास्थायाम्। तदर्थः = नञर्थः। 'अस्तु' इत्यनन्तरं 'वस्ततस्त्विदमयुक्तम्' इति शेषो बोध्यः। तत्र हेतुः - [भाष्यस्य हि तदाशयादिति] हि शब्दः प्रसिद्धौ। भाष्यस्य = "निवृत्तपदार्थकः" इति नञ्सूत्रस्थभाष्यस्य। तदाशयात् = आरोपितत्वं नञ्द्योत्यमित्याशयकत्वात्। भाष्यादिविरुद्धमपि परेषां मतं स्वातन्त्र्यावलम्बने यथाकथञ्चित्समर्थयितुं शक्यमित्याह [विशेषणं विशेष्यो वेति] अभावस्य विशेष्यत्वेऽपि अनञ्समासग्रहणात्सर्वनामकार्यसिद्धिरिति भावः। अनञ्समासग्रहणस्य निरुक्तार्थज्ञापकत्वं न भाष्यारूढमतः परमतं स्वातन्त्र्यावलम्बनेन समर्थ्यते। स्वाशयमुपसंहरति [न्यायतस्त्ववधार्यतामिति] न्यायत इत्यत्र सार्वविभक्तिकस्तसिः। न्याय इत्यर्थः। शब्दानां साधुत्वनिर्णायक इति यावत्। तुशब्द एवार्थकः। तथाच शब्दानां साधुत्वनिर्णायको भाष्यसिद्धान्तरूपो न्याय एव, अवधार्यतां = गृह्यतां सुधीभिरिति तात्पर्यम्। एवं योजने यद्यपि क्लिष्टता, तथापि कारकाग्रन्थस्य निरुक्तकौस्तुभमनोरमाभ्यामेकवाक्यता लभ्यते। अन्यथा ताभ्यामस्य विरोधः स्पष्ट एव। अतो निरुक्तव्याख्यैव दीक्षितग्रन्थानुगुणा। तदेतत्सर्वमभिसन्धायैव "यत्तु निवृत्तेति भावे क्तः। निवृत्तम् = अभावः, पदार्थो यस्येति एतद्भाष्यार्थः' इति, तद् भ्रान्त्यैवेति स्पष्टं भाष्यविदाम्" इति मञ्जूषायां नञर्थवादे नागेशपण्डितेन कौण्डभट्टाशयः प्रदर्श्य दूषितः। दीक्षिताशयस्तु युक्त एव, भाष्यसम्मतत्वादिति नागेशाशयः। अधिकं मञ्जूषाव्याख्याने नागेशभावप्राकाशे द्रष्टव्यम् - इत्याहुः।। ।।४१।।

इति वैयाकरणभूषणसारतत्त्वदर्शिन्यां

नञर्थनिर्णयः।।७।।

अथ निपातार्थनिर्णयः

अथ प्रादयो द्योतकाः चादयो वाचका इति नैयायिकमतमयुक्तं, वैषम्ये बीजाभावादिति ध्वनयन्निपातानां द्योतक्त्वं समर्थयते -

द्योतकाः प्रादयो येन निपाताश्चायस्तथा।
उपास्येते हरिहरौ लकारो दृश्यते तथा।।१।। (४२)

येन हेतुना प्रादयो द्योतकास्तेनैव हेतुना चादयो निपातास्तथा द्योतका इत्यर्थः। अयं भावः - ईश्वरमनुभवतीत्यादावनुभवादिः प्रतीयमानो न धात्वर्थः, भवतीत्यत्राप्यापत्तेः। प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तेः, अनुगच्छतीत्यादावनुभवादिप्रत्यया पत्तेश्च। न विशिष्टार्थो गौरवात्। तथा च धातोरेव विद्यमानत्वादिवाचकस्यास्तु लक्षणा। उपसर्गस्तात्पर्यग्राहक इत्यस्तु। तथा च तात्पर्यग्राहकत्वमेव द्योतकत्वमिति।

एतच्चादिष्वपि तुल्यम्। चैत्रमिव पश्यतीत्यादौ सादृश्यविशिष्टं चैत्रपदलक्ष्यम्, इवशब्दस्तात्पर्यग्राहक इत्यस्य सुवचत्वात् इति। स्वयं युक्त्यन्तरमाह - उपास्येते इति। अत्र ह्युपासना किमुपसर्गार्थो विशिष्टस्य धातुमात्रस्य वा? नाऽऽद्यः। तथ सति स्वार्थफलव्यधिकरणव्यापारवाचकत्वरूपसकर्मकत्वस्याऽऽस् धातोरुपासनरूप-फलवाचकत्वरूपसकर्मकत्वस्याऽऽस् धातोरुपासनरूपफलवाचकत्वाभावादनापत्तेस्ततः कर्मणि लकारो न स्यात्। न द्वितीयो गौरवात्। तृतीयेत्वागतं द्योतकत्वं तात्पर्यग्राहकत्व-लाभादिति भावः। दृश्यत इति। अत्र कर्मणीति शेषः। ।।१।।(४२)

अथ निपातार्थनिर्णयः

ननु "द्योतकाः प्रादयो येन" इत्यादिना निपातानां द्योतकत्वसमर्थनं "निपातानां वाचकत्वम्" इत्यादिना तेषां वाचकत्वसमर्थनं च परस्परविरुद्धम्। किञ्च प्रादीनां द्योतकत्वमसमर्थयित्वा "द्योतकाः प्रादयो येन" इति तद्दृष्टान्तप्रदर्शनमसङ्गतमित्याशङ्क्य निपातानां वाचकत्वं द्योतकत्वं वास्तु। पक्षद्वयेऽपि युक्तिसाम्यात्। परन्तु प्रादीनां द्योतकत्वं चादीनां वाचकत्वं चाङ्गीकर्तॄणां परेषां मतमयुक्तं, वैषम्ये बीजाभावात्। प्रादीनां परैर्द्योतकत्वसमर्थनात्तद्दृष्टान्तोपन्यासोऽपि युज्यत एवेति सूचयन्

निपातार्थनिर्णयमारभते मूले [द्योतकाः प्रादयो येनेति] तमेवाशयमाविष्करोति - [प्रादयो द्योतका इत्यादिना] [ध्वनयन्निति]। द्योतकाः प्रादयो येनेति प्रादिदृष्टान्तप्रदर्शनेन, "निपातानां वाचकत्वं, नतु तद्युक्तं परेषां मतमेव न" इत्युत्तरग्रन्थेन च ध्वनयन्नित्यर्थः। [समर्थयत इति] प्रथमतो निपातानां द्योतकत्वं समर्थयत इत्यर्थः। परेणोपसर्गाणां द्योतकत्वस्वीकारात्तत्सम्मतं दृष्टान्त माह - [येन हेतुनेति] मूले हेतोरप्रदर्शनादाह [अयं भाव इति] [आपत्तेरिति] तदर्थोपस्थापकधातोः सत्त्वादिति भावः। तथा सति = अनुभवस्योपसर्गार्थत्वे। [अप्रकृत्यर्थतयेति] प्रत्ययविधानावधित्वरूप-प्रकृतित्वस्योपसर्गेऽभावादिति भावः। तत्र = उपसर्गार्थे। ननु प्रत्ययानां प्रकृतित्वाश्रयार्थबोधकत्वमिति नियमस्वीकारान्नोपसर्गार्थे आख्यातार्थान्वयानुपपत्तिरित्यतो दोषान्तरमाह - [अनुगच्छतीत्यादाविति] [गौरवादिति] प्रत्येकातिरिक्तविशिष्टाभावादुभयोर्वाचकत्वकल्पने गौरवमित्यर्थः। उपसर्गेण तत्तदर्थबोधने तत्तद्धातुसमभिव्याहारस्य कारणत्वकल्पनं तु न युक्तम्। सत्ताद्यर्थबोधकधातोरेवानुभवादिबोधकत्वमुपसर्गाणां द्योतकत्वमित्यस्यैव युक्तत्वात्। तद्धेतुन्यायेन धातोरेव तदर्थवाचकत्वकल्पनात्। [तथा चेति] उक्तरीत्या धातोरुपसर्गस्य विशिष्टस्य वा जयाद्यर्थवाचकत्वासम्भवे चेत्यर्थः। [तात्पर्यग्राहक इति] धातोस्तत्तदर्थलक्षकत्वे उपसर्गस्तात्पर्यग्राहक इत्यर्थः। ननूपसर्गाणां तात्पर्यग्राहकत्वमेवायातं, नतु द्योतकत्वमत आह [तात्पर्यग्राहकत्वमेवेति]। नैयायिकमते तु शक्तावच्छेदकत्वं द्योतकत्वमिति बोध्यम्। एवं नैयायिकमतावलम्बेनोपसर्गाणां द्योतकत्वं प्रसाध्य तन्निपातेष्वतिदिशति [तच्चादिष्वपि तुल्यमिति] तत् = द्योतकत्वम्। [चैत्रपदलक्ष्यमिति] चैत्रमिव पश्यतीत्यादौ चैत्रसादृश्यस्य चैत्रपदार्थत्वे चैत्रं पश्यतीत्यादावपि तत्प्रत्ययापत्तिः। तस्येवशब्दार्थत्वे मैत्रमिव पश्यतीत्यत्रापि चैत्रसादृश्यप्रतीत्यापत्तिः। विशिष्टार्थत्वे गौरवम्। नच चैत्रपदार्थश्चैत्रः, इवार्थः सादृश्यम्। तत्र च चैत्रपदार्थे निरूपितत्वसम्बन्धेनान्वयान्न दोष इति वाच्यम्। व्यधिकरणनामार्थयोर्नामार्थधात्वर्थयोश्च साक्षा'देनान्वयस्याव्युत्पन्नत्वात्। अतश्चैत्रपदमेव चैत्रसादृश्यलक्षक, मिवशब्दस्तत्र तात्पर्यग्राहक इत्येव युक्तमिति भावः। एवं नैयायिकोक्तमर्थमेव दृष्टान्तीकृत्य निपातानां चादीनां द्योतकत्वं व्यवस्थापितम्। तेन "प्रादयो द्योतकाः, चादयो वाचकाः" इति नैयायिकानां विषमोक्तिर्व्याहतेति सिद्धम्। उत्तरग्रन्थमवतारयति [तत्रेति] प्रादिचाद्योर्वैषम्याभाव इत्यर्थः। स्वयं = "वैयाकरणमतोन्मज्जन" नामककारिकाग्रन्थनिर्माता दीक्षितमहोदयः। पूर्ववदेव विकल्प्य दूषयति [अत्र हीति] तथा सति = उपासनाया उपसर्गार्थत्वे। [सकर्मकत्वस्येति] अस्य

"अनापत्तेः" इत्यत्रान्वयः। तत्र हेतु ["उपासनारूपफलवाचकत्वाभावात्" इति] आस्धातोरुपासनारूप-फलवाचकत्वाभावात् स्वार्थफलेत्यादिसकर्मकत्वाभावात्ततः कर्मणि लकारो न स्यादिति योजना। नच फलावच्छिन्नव्यापारवाचित्वरूपसकर्मकत्वस्य सत्त्वान्नानुपपत्तिरिति वाच्यम्। फलावच्छिन्नत्वं यदि फलविशिष्टत्वं, तदा उपासनाया धातुवाच्यत्वमायातमेव। यदितु फलावच्छिन्नत्वं फलवैयधिकरण्यं, तदापि सर्वेषां व्यापाराणां यत्किञ्चित्फलवैयधिकरण्याद्दोषवारणाय स्वार्थफलवैयधिकरण्यपर्यन्तं तद्वाच्यम्। तथाच स्वार्थफलव्यधिकरणव्यापारवाचकत्वं पर्यवसितं भवति फलस्य धात्वर्थत्वसाधकमित्याशयात्। [गौरवादिति] विशिष्टस्य गणे पाठाभावेनाधातुत्वात्ततो लाद्यनुत्पत्त्यापत्तिरपि दोषो बोध्यः। गणपाठो दिङ्मात्रमिति चेत्तर्हि विशिष्टस्य धातुत्वापत्तौ लिडादावुपसर्गावयवस्य द्विर्वचनापत्तिः, लङादावुपसर्गविशिष्टस्याडाद्यापत्तिश्च। उक्तं च हरिणा -

अडादीनां व्यवस्थार्थं पृथक्त्वेन प्रकल्पनम्।
धातूपसर्गयोः शास्त्रे धातुरेव तु तादृशः। इति।।

ननु क्रियावाचकत्वं पच्यादेरेवास्तु, तावता तस्यैव धातुत्वादडादिव्यवस्था सेत्स्यति। फलवाचकत्वं तु विशिष्टस्येति न सकर्मकत्वहानिरिति चेदेवमपि निपातानां शक्तितावच्छेदकतया द्योतकत्व एव पर्यवसाना दस्मदभीष्टसिद्धेरिति दिक्। [तृतीयेत्विति] - उपासनाया धात्वर्थत्वपक्षे त्वित्यर्थः। [शेष इति] भावे लकारे "हरि हरावुपास्येते" इति प्रयोगानुपपत्तिरिति तदर्थं कर्मण्येव लकारो वाच्य इत्याशयः। ।।४२।।

तङ्चादिष्वपि तुल्यमित्याह -

तथाऽन्यत्र निपातेऽपि लकारः कर्मवाचकः।
विशेषणाद्ययोगोऽपि प्रादिवाङ्चादिके समः।।२।। (४३)

अन्यत्र साक्षात्क्रियते, अलङ्क्रियते ऊरीक्रियते शिव इत्यादौ। अत्रापि धातोस्तदर्थे कर्मणि लकारसिद्ध्यर्थं तत्तदर्थवाचकत्वं वाच्यमित्युपसर्गवदेव द्योतकत्वममीषामपीत्यर्थः। यद्यपि कृधातोः सकर्मकत्वमस्त्येव तथाऽप्येष्वर्थेषु सकर्मकता न स्यात्। अन्यथा वायुर्विकुरुते, सैन्धवा विकुर्वत इत्यत्रापि स्यादिति भावः। अथोपासनासाक्षात्कारादि-र्निपातार्थोऽस्तु "साक्षात्प्रत्यक्षतुल्ययोः" इति कोशस्वरसात्। तदनुकूलो व्यापार एव

धात्वर्थोऽस्तु। स्वस्वयुक्तनिपातान्यतरार्थफलव्यधिकरण व्यापारवाचित्वं सकर्मकत्वमपि सुवचमिति दृष्टान्तदार्ष्टान्तिकावयुक्तविति नेदं साधकमिति चेत्? न, नामार्थधात्वर्थयोर्भेदेन साक्षादन्वयासम्भवान्निपातार्थधात्वर्थयोरन्वयस्यैवासम्भवात्। अन्यथा तण्डुलः पचतीत्यत्रापि कर्मतया तण्डुलानां धात्वर्थेऽन्वयापत्तेरिति।

किञ्च प्रादीनां वाचकत्वे भूयान्प्रकर्षः, कीदृशो निश्चय इतिवद्भूयान्प्र, कीदृशो निरित्यपि स्यात्। अस्मन्मते प्रादेरनर्थकत्वान्न तदन्वय इति। अत एव द्योतकता तेषां स्यादिति। साधकान्तरमभिप्रेत्याऽऽह - विशेषणेति। शोभनः समुच्चयो द्रष्टव्य इतिवच्छोभनश्च द्रष्टव्य इत्यस्याऽऽपत्तेस्तुल्यसमाधेयत्वादिति भावः। अपि च निपातानां वाचकत्वे प्रातिपदिकार्थयोर्विना षष्ठ्यादिकं भेदेनान्वयासम्भवः। अन्यथा राजा पुरुष इत्यस्य राजसम्बन्धिपुरुष इत्यर्थापत्तेरित्यभिप्रेत्याऽऽह - आदीति। धवखदिरयोः समुच्चय इतिवद्धवस्य च खदिरस्य चेत्येव स्यादिति भावः।।२।। (४३)

तत् = तात्पर्यग्राहकत्वरूपं द्योतकत्वम्। [तुल्यमिति]। तथाच प्रादयो द्योतकाः, चादयो वाचका इति परोक्तमयुक्तमिति भावः। [अस्त्येवेति] घटं करोति चैत्रः, क्रियेत घटश्चैत्रेणेत्यादौ। [अन्यथेति] यत्र क्वचिदर्थे धातोः सकर्मकत्वमस्तीति कृत्वा तस्य सर्वत्रापि तत्त्वाङ्गीकार इत्यर्थः। साक्षात्कारादेर्निपातार्थत्वे कोशं प्रमाणयति [साक्षात्प्रत्यक्षतुल्ययोरिति] ननूपासनादेरधात्वर्थत्वे निरुक्तरीत्या धातोः सकर्मकत्वानापत्तिः। किञ्च तस्यातथात्वे तत्कर्मत्वेन गुर्वादेरभिधानं न स्यात्। धात्वर्थफलाश्रयरूपकर्मण एव धातूत्तरप्रत्ययेनाभिधानात्। किञ्च गुर्वादेः कर्मत्वानापत्तिः, धात्वर्थफलाश्रयस्यैव कर्मत्वादत आह [स्वस्वयुक्तेति]। [सकर्मकत्वमिति] तादृशफलाश्रयत्वमेव कर्मत्वमिति न तदसम्भवोऽपि। साक्षात्क्रियते गुरुरित्यादौ गुर्वभिन्नाश्रयनिष्ठो विषयतासम्बन्धेन यः साक्षात्कारस्तदुत्पत्त्यनुकूलो व्यापार इति बोधः। इदम् = उपास्येते हरिहराविवित्यादिना प्रतिपादितम्। साधकं = निपातानां द्योतकत्वे साधकम्। [नामार्थेति] भेदसम्बन्धावच्छिन्ननामार्थप्रकारक-धात्वर्थविशेष्यकबोधे विशेष्यतासम्बन्धेन सुब्विभक्तिजन्योपस्थितेः कारणत्वमिति व्युत्पत्तिविरोधात्तयोस्तथान्वयासम्भवादित्यर्थः। स्तोकं पचतीत्यादौ स्तोकादेरभेदेन पाकेऽन्वयदर्शनादुक्तं भेदेनेति। तण्डुलं पचतीत्यादौ नामार्थस्य विभक्त्यर्थद्वारा धात्वर्थे भेदेनान्वयदर्शना दुक्तं - साक्षादिति।

अन्यथा = नामार्थधात्वर्थयोरिति व्युत्पत्त्यनङ्गीकारे। [अन्वयापत्तेरिति] तथा सति तण्डुलकर्मकः पाक इत्यर्थे तण्डुलः पचतीत्यस्य साधुत्वापत्तिरिति भावः। ननु "नामार्थधात्वर्थयोः" इति व्युत्पत्तेर्निपातातिरिक्तविषयकतया नायं दोष इत्यत आह [किञ्चेति] इत्यतोऽपीत्यर्थः। विशेषणाद्ययोगोऽपीति मूलमवतारयति [साधकान्तरमिति]। [तुल्यसमाधेयत्वादिति] तुल्येन = प्रादितुल्येन निरर्थकत्वहेतुना प्रादेरनर्थकत्वान्न तदन्वय इत्युक्तरीत्या समाधातुं शक्यत्वादित्यर्थः।

यत्तु "इत्यपि स्यादिति - अभ्युच्चयवादोऽयम्। चाद्युपस्थाप्यसमुच्चयस्य नित्यं समुच्चेयसाकाङ्क्षतया समुच्चेयार्थकपदप्रयोगं विना चादिशब्दप्रयोगासम्भवात्। शब्दशक्ति-स्वाभाव्येन नित्यं धातपरतन्त्रोपसर्गैः स्वार्थस्य धात्वर्थविशेषणतयैव बोधेन तदसमभिव्याहारे तत्प्रयोगस्याप्यसम्भवात्। अत एव वक्ष्यति - तुल्यसमाधेयत्वादिति" इति दर्पणकाराः प्रभाकाराश्च। तन्न। तद्रीत्या तुल्यसमाधेयत्वादित्यस्य उपसर्गाणां निपातानां च नित्यपरतन्त्रत्वान्न तदर्थे विशेषणान्वय इत्यर्थ पर्यवसानात्तद्बलेन निपातानां द्योतकत्वासिद्धेः। "अस्मन्मते प्रादेरनर्थकत्वान्न तदन्वयः" इति मूलाननुगुणत्वाच्च। "उपसर्गाणां निपातानां च नित्यपारतन्त्र्यम्" इत्यर्थस्य तेषां द्योतकतया, द्योतकानां वाचक पदसमभिव्याहारनैयत्यमूलकत्वाच्चेत्यलम्।

नच चादीनां समुच्चिताभिधायकत्वमेवास्तु, तत्र समुच्चयस्य पदार्थैकदेशत्वान्न विशेषणान्वय इति वाच्यम्। धर्म्यंशेऽन्यलभ्ये चकारस्य शक्तिकल्पनायोगात्।

आदिशब्दग्राह्यमाह [अपि च निपातानामिति] राज्ञः पुरुष इत्यादौ विभक्त्यर्थद्वारा नामार्थे भेदेनान्वयदर्शनादाह [विना षष्ठ्यादिकमिति] आदिपदेन द्वितीयादेः सङ्ग्रहः। [भेदेनान्वयासम्भव इति] - समानविभक्तित्वेनाभेदान्वयापत्तिरित्यपि बोध्यम्। अन्यथा = षष्ठ्यादिकं विनापि नामार्थयोर्भेदेनान्वयाभ्युपगमे। [आपत्तेरिति] राजसम्बन्धवान्पुरुष इति भेदान्वयापत्तेरित्यर्थः। [इत्येव स्यादिति] ननु धवश्च खदिरश्चेतीति भावः।।४३।।

ननु प्रातिपदिकार्थयोर्भेदेनान्वयबोधे विरुद्धविभक्तिजन्योपस्थितिर्हेतुरिति कार्यकारणभावो निपातातिरिक्तविषय एवेति नोक्तदोष इत्याशङ्क्याऽऽह -

पदार्थः सदृशाऽन्वेति विभागेन कदाऽपि न।
निपातेतरसंकोचे प्रमाणं किं विभावय।।३।। (४४)

सदृशा सदृशेन समानाधिकरणेनेति यावत्। अन्वेति अभेदेनेति शेषः। विभागेन असदृशेन, असमानाधिकरणेनेति यावत्। अयमर्थः - समानाधिकरण-प्रातिपदिकार्थयोरभेदान्वयव्युत्पत्तिर्निपातातिरिक्तविषयेति कल्पने मानाभावो गौरवं च। अस्माकं निपातानां द्योतकत्वादन्वय एव नास्तीति नायं दोषः। अत एव घटो नास्तीत्यादौ घटपदं तत्प्रतियोगिकलाक्षणिकमिति नैयायिकाः।।३।। (४४)

[इति कार्याकारणभाव इति] इदमुपलक्षणं समानाधिकरणनामार्थयोरभेदान्वय इति कार्यकारणभावस्यापि। कार्यकारणभावद्वयेऽपि निपातातिरिक्तत्वं निवेशनीयमित्याशयः। अन्यथा घटश्च पटश्चेत्यादौ भेदेनान्वयोऽभेदान्वयाभावश्च न सिद्ध्यत इति स्पष्टमेव। अतो व्युत्पत्तिद्वयमपि निपातातिरिक्तत्वेन संकोच्य, भेदान्वयः संपादनीयोऽभेदान्वयश्च वारणीयः। अत एव "पदार्थः सदृशान्वेति" इति भागेन समानाधिकरणनामार्थयो रिति व्युत्पत्तिः, "विभागेन कदापि न" इति भागेन विरुद्धविभक्तिकनामार्थयोर्भेदेनान्वय इति व्युत्पत्तिश्च निर्दिश्यत इति स्पष्टमेवावगम्यते। अत एव निपातानां वाचकत्वसमर्थनावसरे "धात्वर्थप्रातिपदिकार्थयोर्भेदेनान्वयनोधो न व्युत्पन्न इति निपातातिरिक्तविषयः, समानाधिकरणप्रातिपदिकार्थयोरभेदान्वय इत्यपि अगत्या कल्पनीयम्" इति व्युत्पत्तिद्वयेऽपि निपातातिरिक्तत्वविशेषणदानं वक्ष्यमाणं प्रकृतग्रन्थकृतः सङ्गच्छते। [निपातातिरिक्त इति] तथाच भेदान्वयः सुलभः, चाद्युपस्थाप्यस्य निपातार्थत्वात्। नाप्यभेदान्वयः, अत एव। [नोक्तदोष इति] षष्ठ्यादिकमन्तरेण भेदान्वयानापत्तिरिति, समानाधिकरणनामार्थत्वादभेदान्वयापत्तिश्चेति दोषो नेत्यर्थः। नच समानाधिकरणनामार्थत्वादभेदान्वयापत्तिश्चेति दोषो नेत्यर्थः। नच समानाधिकरणनामार्थत्वादभेदान्वयापत्तिश्चेति दोषो नेत्यर्थः। नच समानाधिकरणनामार्थत्वादभेदान्वयापत्तिश्चेति दोषो नेत्यर्थः। नच समानाधिकरणनामार्थयोरिति व्युत्पत्त्या अभेदान्वयापत्तिरिति मूलेऽकथनादिदमयुक्तमिति वाच्यम्। विशेषणाद्ययोगोपीत्यादिपदेनैव षष्ठ्यादिकमन्तरेण भेदान्वयासम्भवं प्रतिपादयता समानविभक्तिकत्वेन धवश्चेत्यादावभेदान्वयस्यापि कुक्षीकृतत्वात्।

ननु सदृशेत्याबन्तस्यात्रानन्वय इत्यत आह [सदृशेनेति] तथाच हलन्तात्तृतीयैकवचनमिति नान्वय इति भावः। ननु विरुद्धविभक्तिकार्यस्यापि नामार्थत्वादिना तुल्यत्वात्तेन सहाभेदान्वयापत्तिरेवेत्यत आह - [समानाधिकरणेनेति यावदिति] समानविभक्तिकपदोपस्थाप्यत्वेन सादृश्यस्य विवक्षणान्नोक्तदोष

इति भावः। विभागपदेन तार्किकपरिपठितगुणस्य ग्रहणमिति भ्रमनिरासायाह [असदृशेनेति] विभज्यतेऽनेनेति करणे घञिति भावः। स्वाशयं प्रकटयति [अयमर्थ इत्यादिना नैयायिका इत्यन्तेन] [अभेदान्वयव्युत्पत्तिरिति] - इदमुपलक्षणं भेदान्वयव्युत्पत्तेरपि। इदं च कारकावतरणे भेदान्वयव्युत्पत्तौ, व्याख्यानग्रन्थे अभेदान्वयव्युत्पत्तौ च निपातातिरिक्तत्वं विशेषणं देयमिति वदतो ग्रन्थकृत इष्टमेवेति प्रतिभाति। एतेन "वाचकतावादिना उक्तव्युत्पत्तिर्निपातातिरिक्तत्वेन संकोचनीयेत्युक्त्यैवाक्षेपभ्रौव्ये मूले समानाधिकरणेत्यादिव्युत्पत्तिकथनेऽर्थान्तरमत आह - अयमर्थ इति - स चेत्थम्। विभागेन कदापि नेत्यनेन व्यधिकरणयोरभेदान्वयं व्यवच्छिन्दता नामार्थयोर्भेदेनान्वय इति व्युत्पत्तिरेव प्राधान्येन प्रदर्श्यते। नतु समानाधिकरणयोरिति व्युत्पत्त्यन्तरं तथा। किन्तु दृष्टान्तविधया तदुपादानमिति नोक्तदोषः। तथाच प्रधानभूतव्युत्पत्तावेव निपातेतरेति संकोचोत्कीर्तनमिति सर्वं सुस्थम्। ननु नामार्थयोरभेदान्वयबोधे समानविभक्तिकपदजन्योपस्थितिहेतुतायां पदांशे निपातातिरिक्तत्वं निवेशनीयमतो नोक्तदोष इत्यवतरणं तु सध्रीचीनम्। नच तादृशव्युत्पत्तेरप्रक्रान्तत्वात्कथमेतदिति वाच्यम्। मूलोक्तादिपदेनैव षष्ठ्यादिकमन्तरेण भेदान्वयासम्भवं प्रतिपादयता समानविभक्तिकत्वेन धवश्चेत्यादावभेदान्वयापादनस्यापि कुक्षीकृतत्वात्। तदेव च समानाधिकरण्यं व्युत्पत्तौ निविष्टमिति यथाकृतमूलसङ्गमनात्" इति दर्पणोक्तमपास्तम्। तद्रीत्याश्रयणे व्युत्पत्तिद्वयप्रदर्शनस्य मूलकृतो निर्दलत्वापत्तेः। तदभिमतावतरणेनाभेदान्वयवारणेऽपि भेदान्वयस्य दौर्लभ्यापत्तेश्च। दृष्टान्तविधयोपादानस्य प्रकृतानुपयोगाच्चेत्यलम्।

ननु तदन्वयानुपपत्तिरेव मानमत आह [गौरवं चेति]। ननु तवापीदं दूषणं समानमत आह - [अस्माकमिति] निपातानां द्योतकत्वं स्वीकर्तृणामस्माकमित्यर्थः। [अन्वय एव नास्तीति] - समभव्याहृतपदनिष्ठशक्त्युद्बोधकत्वस्य द्योतकत्वेन, धवश्चेत्यादौ धवपदेनैव विशिष्टार्थोपस्थित्याऽन्वय एव नास्ति। पृथगुपस्थितयोरेव हि संसर्गः। [नायं दोष इति] व्युत्पत्तीनां पृथगुपस्थितिविषयकत्वादत्र तादप्रवृत्त्याऽन्वयासम्भवरूपो दोषो नेत्यर्थः। अत एव = निरुक्तव्युत्पत्तेर्निपातातिरिक्ततयाऽसंकोचनादेवेत्यर्थः। [लाक्षणिकमिति] - घटो नेत्यत्र समानविभक्तिकत्वेऽपि घटाभेदस्याभावे बाधाद् घटपदस्य घटप्रतियोगिके लक्षणया घटप्रतियोगिकाभिन्नोऽभाव इत्यभेदान्वय उपपद्यते। संकोचे तु उक्तव्युत्पत्तेरविषयतया घटस्य प्रतियोगितानिरूपकत्वरूपभेदसम्बन्धेनापि नञर्थाभावेऽन्वयसम्भवाल्लक्षणाप्रयासो नैयायिकानां व्यर्थ एव स्यादिति भावः।।४४।।

अपि च निपातानां वाचकत्वे काव्यादावन्वयो न स्यादिति साधकान्तरमाह।

शरैरुस्त्रैरिवोदीच्यानुद्धरिष्यन् रसानिव।

इत्यादावन्वयो न स्यात्सुपां च श्रवणं ततः।।४।। (४५)

अत्रोस्त्रसदृशैः शरैरससदृशानुदीच्यानुद्धरिष्यन्नित्यर्थः। अयं चोस्त्रादिशब्दानां तत्सदृशपरत्व इव शब्दस्य च द्योतकत्वे सङ्गच्छते। अन्यथा प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तिविरोधः। तथाहि - उस्त्रैरिति करणे तृतीया। न चोस्त्रोऽत्र करणमिवार्थसदृशस्य करणत्वेऽपि तस्य करणत्वं नानेन बोधयितुं शक्यमप्रकृत्यर्थत्वात्। इवशब्दस्य चासत्त्वार्थकतया तदुत्तरं तृतीयाया असम्भवात्, सम्भवे वा श्रवणप्रसङ्गात्, उस्त्रपदोत्तरतृतीयानन्वयप्रसङ्गाच्चेत्याह - सुपां चेति। सुपां श्रवणं चेत्यर्थः। चकारादुस्त्रपदोत्तरतृतीयान्वयः समुच्चीयते। इत्यादावित्यादिपदात् "वागर्थाविव संपृक्तौ" "पार्वतीपरमेश्वरौ वन्दे" इत्यत्र वागर्थयोर्वदिकर्मत्वाभावात्तदुत्तर-द्वितीयाया अनन्वय इवार्थस्य कर्मत्वान्वयबोधासम्भवश्च सङ्गृह्यते। यदि च विशेषणविभक्तिरभेदार्थिका साधुत्वमात्रार्था वा तदापीवशब्दस्य वाचकत्वेऽनन्वय एव। उस्त्रसदृशां शराणां समानाधिकरणपदोपस्थाप्यतया भेदेनान्वयायोगात्। बाधादभेदेनापि न सः। नह्युस्त्राभिन्नसदृशाभिन्नः शर इत्यर्थो द्रष्टव्यः।।४।। (४५)

युक्त्यन्तरेण निपातानां द्योतकत्वं समर्थयति [अपिचेति] [इति साधकान्तरमिति] इत्याकारकं साधकान्तरमित्यर्थः। [शरैरुस्त्रैरिति] - "ततः प्रतस्थे कौबेरीं भास्वानिव रघुर्दिशम्" इति तत्पूर्वभागो बोध्यः। अत्र = उदाहृतकालिदासकाव्यपद्ये। उस्त्रसदृशैः = किरणसदृशैः। "किरणोस्त्रमयूखांशुगभस्तिघृणिधृष्णा" इत्यमरः। [उद्धरिष्यन्निति] उद्धरिष्यन् कौबेरीं दिश भास्वानिव रघुः प्रतस्थ इति तच्छेषार्थो बोध्यः। अयं च = निरुक्तार्थश्च। [सङ्गच्छत इति] उस्त्रशब्दस्य उस्त्रसदृशार्थकत्वे समानाधिकरणानामार्थयोरिति व्युत्पत्त्या उस्त्रसदृशाभिन्नशरैरित्यर्थः सङ्गच्छत इत्यर्थः। अन्यथा = निपातानां द्योतकत्वानङ्गीकारे। व्युत्पत्तिविरोधमेव विवृणोति [तथाहीति] [न चेति] नहीत्यर्थः। अत्र = उद्धरणक्रियायाम्। ननूस्त्रस्याकरणत्वेऽपि इवार्थसदृशस्य करणत्वमस्त्येवेत्यत आह [इवार्थसदृशस्येति] [करणत्वेऽपीति] सदृशाभिन्नशराणां करणत्वात् "कटोऽपि कर्म भीष्मादयोऽपि"

इति भाष्यात्सदृशस्यापि करणत्वमिति भावः। तस्य = इवार्थसदृशस्य। अनेन = उस्रपदोत्तर-तृतीयाप्रत्ययेन। [अप्रकृत्यर्थत्वादिति] - प्रत्ययविधानावधित्वरूपप्रकृतित्वस्येवशब्देऽभवादित्यर्थः। तादृशप्रकृतित्वस्योस्रशब्दे सत्त्वेपि न तदर्थस्य करणत्वमिति बोध्यम्। ननूस्रपदोत्तरतृतीयापक्षेप्रकृतत्वस्येव-शब्देऽभावेऽपि पञ्चेत्यादाविव इवशब्दोत्तरलुप्तप्रत्ययापेक्षप्रकृतित्वस्य तत्र निष्प्रत्यूहतया न प्रत्ययानामिति व्युत्पत्तिविरोध इत्यत आह [इवशब्दस्येति]। असत्त्वार्थकतया = अद्रव्यार्थकतया। तदुत्तरम् = इवशब्दोत्तरम्। [असभवादिति] उत्पत्त्यसम्भवादित्यर्थः। "कर्तृकरणयोस्तृतीया" "स्वौजसमौट्" "द्व्येकयोः" इत्यादीनामेकवाक्यतया विधायकत्वमिति मुख्यपक्षे प्रातिपदिकात्करण एकत्वादौ प्रत्यय इत्यर्थलाभेनाद्रव्यार्थकादिवशब्दात्तादृशप्रत्ययोत्पत्तेरसम्भव इति भावः। ननु इवार्थस्य करणत्वेनान्वयः स्वीक्रियताम्। ततः करणार्थकतृतीया सम्भवत्येवात आह [सम्भवे वेति] [श्रवणप्रसङ्गादिति] इवार्थस्य करणत्वे सत्त्वार्थकत्वात् "चादयोऽसत्त्वे" १-४-५७ इति निपातत्वाभावे "स्वरादिनिपातमव्ययम्" १-१-३७ इत्यव्ययसंज्ञाया अप्राप्त्या "अव्ययादाप्सुपः" २-४-८१ इत्यस्याप्रवृत्त्या तदुत्तरतृतीयायाः श्रवणप्रसङ्ग इति भावः। [अनन्वयप्रसङ्गादिति] प्रकृत उस्राणामकरणत्वात्तदुत्तरतृतीयार्थस्यानन्वयप्रसङ्ग इत्यर्थः। कारिकायां "सुपां च श्रवणं ततः" इत्यत्र सुपां, चकारेणान्येषां च श्रवणापत्तिरित्यर्थभ्रमवारणायाह [सुपां श्रवणं चेत्यर्थ इति] चो भिन्नक्रम इत्याशयः। [वागर्थाविवेति] "वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये। जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ" इति संपूर्णं कालिदासीयं पद्यम्।

एवं "कटोऽपि कर्म भीष्मादयोपि" इति पक्षे निपातानां द्योतकत्वानभ्युपगमे "शरैरुस्रैरिव" इत्यादावनन्वयमुपपाद्य, "कट एव कर्म तत्सामानाधिकरण्याद्भीष्मादिभ्योऽपि द्वितीया" इति पक्षे विशेषणविभक्तिः साधुत्वमात्रार्थेति पक्षे च निपातानां द्योतकत्वाभावेऽनन्वयमुपपादयति [यदि चेति] - [विशेषणविभक्तिरिति] - समानाधिकरणविशेषणविभक्तिरित्यर्थः। [साधुत्वमात्रार्था वेति] - "न केवला प्रकृतिः प्रयोक्तव्या, नापि केवलः प्रत्ययः" इति नियमपरिपालनाय जायमाना विभक्तिर्विशेष्यवाचकप्रकृतिकविभक्तिसजातीयैवोत्पद्यते, नान्या। अन्यथाऽभेदान्वयो न सिद्ध्येत्। विरुद्धविभक्तिरहितत्वादेस्तादृशबोधे तन्त्रत्वादिति भावः। [उस्रसदृशशराणामिति] त्रिपदद्वन्द्वोऽयम्। तेषां भेदेनान्वये बाधकमाह [समानाधिकरणपदोपस्थाप्यतयेति] [भेदेनेति] उस्रनिरूपितं यत्सादृश्यं निरूपकतया तद्वान् यश्शर इति भेदेनेत्यर्थः। अभेदेनान्वयस्तु न युज्यत एवेत्याह [बाधादिति] तमेव बाधं दर्शयति [नहीति] [उस्राभिन्नेति] - उस्राभिन्नः सदृश उस्र एवेति तस्य शरे, शर उस्रो नेति

भेदसत्त्वादभेदान्वयोऽपि बाधित एवेति भावः। इवशब्दस्य द्योतकत्वे तु उस्रप्रतियोगिकसादृश्यविशिष्टाभिन्नः शर इति बोधनिर्वाहः स्पष्ट एव। अत्र पक्षे "सुपां च श्रवणं ततः" इति मूलमित्थं योजनीयम्। ननु इवार्थः सदृश एवास्तु। तस्य चाभेदेनान्वयो नानुपपन्न इत्यत आह [सुपां चेति] चकारो भिन्नक्रमः। सुपां श्रवणं चेत्यर्थः। इवशब्दस्य सदृशार्थकतया सत्त्वार्थकत्वा दनिपातत्वादनव्ययत्वे "अव्ययादाप्सुपः" इति लुकोऽप्रवृत्त्या विभक्तेः श्रवणापत्ति रित्यर्थः। ननु धर्मिवाचकत्वेपि लिङ्गाद्यनन्वयित्वरूपासत्त्वरूपत्वं नानुपपन्नम्। किञ्चेवशब्दस्य स्वरादौ पाठादव्ययत्वं सूपपादमिति विभक्तिलुक्सिद्धिः। अत एव "पृथिव्यामेव ग्रन्ध इत्यत्र पृथिवीमात्रवृत्तिः, पृथिव्यन्यावृत्तिरिति बोधनिर्वाहः। तच्छ्रवणमपि लुका लुप्तत्वान्न" इति नैयायिका मन्यन्त इत्यत आह [चेति] समानविभक्तिकत्वादभेदान्वयापत्तिश्चकारेण समुच्चीयते। विभक्तिरहितस्य साधुत्वलाभेऽपि समानविभक्तिकत्वादभेदान्वयो वाच्यः। स तु बाधितः। द्योतकतानये तूस्रसदृशार्थक मुस्रपदम्। तत्र च समानाधिकरणनामार्थयोरभेदान्वय इति व्युत्पत्त्या उस्रसदृशाभिन्नशरकरणकमुद्धरणमित्यन्वयो निराबाध इति भावः।।४५।।

ननु त्वन्मतेऽब्राह्मण इत्यादौ तत्पुरुषलक्षणाव्याप्त्यापत्तिः पूर्वपदस्यानर्थकत्वेनोत्तरक्रियापदार्थप्राधान्याभावात्। उपसर्गस्यार्थवत्त्वाभावेन प्रातिपदिकत्वाभावाद्विभक्तिश्च ततो न स्यादित्यत आह -

नञ्समासे चापरस्य द्योत्यं प्रत्येव मुख्यता।
द्योत्यमेवार्थमादाय जायन्ते नामतः सुपः।।५।। (४६)

नञ्समासादौ योत्तरपदार्थप्रधानता सा द्योत्यमर्थमादायैव। तमेवार्थमादायार्थवत्त्वात् प्रातिपदिकत्वमित्यर्थः। वस्तुतस्तु "अव्ययादाप्सुपः" इति ज्ञापकात्सुबुत्पत्तिः। "निपातस्यानर्थकस्य" इति वार्तिकाद्वा प्रातिपदिकत्वम्। "कृत्तद्धितसमासाश्च" इत्यनुक्तसमुच्चयार्थकचकारेण निपातानां सङ्ग्रह इति बोध्यम्। तस्माद्युक्तं निपातानां द्योतकत्वम्।

उक्तं चाऽऽकृत्यधिकरणवार्तिके -

चतुर्विधे पदे चात्र द्विविधस्यार्थनिर्णयः।
क्रियते संशयोत्पत्तेर्नोपसर्गनिपातयोः।।

तयोरर्थाभिधाने हि व्यापारो नैव विद्यते।
यदर्थद्योतकौ तौ तु वाचकः स विचार्यते।। इति।
उपसर्गेण धात्वर्थो बलादन्यत्र नीयते।
प्रहाराहारसंहारविहारपरिहारवत्।।

इति वृद्धोक्तावुपसर्गपदं निपातोपलक्षणम्। धातुपदं पदान्तरस्येति बोध्यम्।। ।।५।। (४६)

एवं निपातानां द्योतकत्वं व्यवस्थाप्य तत्र प्रसक्तामनुपपत्तिमाशङ्क्य परिहरति [नन्विति] त्वन्मते = निपातानां द्योतकत्वमङ्गीकुर्वतस्तव मते। [तत्पुरुषलक्षणेति] उत्तरपदार्थप्रधानस्तत्पुरुष इत्यौत्सर्गिकतत्पुरुषलक्षणेत्यर्थः। [प्राधान्याभावादिति] प्राधान्यस्य इतरपदार्थनिष्ठविशेषणतानिरूपितत्वेन पूर्वपदस्य निरर्थकत्वे तदसम्भवादित्यर्थः। [उपसर्गस्येति] उपलक्षणमिदं निपातसामान्यस्य। सर्वेषामपि निपातानां द्योतकतासमर्थनात्। ततः = निपातात्। [द्योत्यर्थमादायैवेति] पूर्वपदार्थनिष्ठविशेषणतानिरूपितविशेष्यताशालिबोधजनकत्वमुत्तरपदार्थप्रधानत्वम्। तत्र पूर्वपदार्थशब्देन वाच्यलक्ष्य - द्योत्यरूपस्त्रिविधोऽप्यर्थो गृह्यत इति न तत्पुरुषस्योत्तरपदार्थप्राधान्यहानिरिति भावः। द्वितीयमाक्षेपं परिहरति [तमेवार्थमिति] द्योत्यार्थमेवेत्यर्थ। [अर्थवत्त्वादिति] अर्थप्रतीतिजनकज्ञान-विषयत्वमेव ह्यर्थवत्त्वमर्थवत्सूत्रे निविष्टं, नतु शक्तिलक्षणान्यतरसम्बन्धेनार्थवत्त्वम्। तादृशार्थवत्त्वस्य प्रतिष्ठते घटश्चेत्यादौ निपातानामबाधा'वति प्रातिपदिकत्वमिति भावः।

ननु राम इत्यादौ समुदायार्थबोधने रा इत्याद्यवयवानां साहाय्यकरणरूपार्थवत्त्वात्प्रातिपदिकत्वापत्त्या ततोऽपि सुबापत्तिर्दोषः। नच "स्वौजसमौट्" "द्व्येकयोः" इत्यादीनामेकवाक्यतया विधायकत्वाद् रा इत्यादितः सङ्ख्याद्यप्रतीत्या न विभक्त्यापत्तिरिति वाच्यम्। निपातेभ्योऽपि विभक्त्युत्पत्त्यनापत्तेः। औत्सर्गिकमेकवचनं तूभयत्राप्युत्पद्यत एव। नच प्रत्येकं राम इत्यादाववयवेभ्यो विभक्तिर्नोत्पद्यते। किन्तु समुदायादेव। एकाज्द्विर्वचनन्यायादिति वाच्यम्। एतादृशेषु तन्न्यायप्रवृत्तेर्भूषणे समासार्थनिर्णये विस्तरेण प्रतिपादितत्वात्। नच प्रत्येकं विभक्त्युत्पत्तावपि न दोषः, तत्र लोपप्रवृत्त्या तदश्रवणादिति वाच्यम्। धनं वनमित्यादौ "नलोपः प्रातिपदिकान्तस्य" इति नलोपाद्यापत्तेरित्यत आह [वस्तुतस्त्विति]। [ज्ञापकादिति] निपातानां द्योतकत्व अर्थवत्त्वाभावात्प्रातिपदिकत्वानापत्तौ ततः सुबनुत्पत्त्या लुगारम्भोऽप्रातिपदिकत्वेपि सुबुत्पत्तिं ज्ञापयतीति भावः। ननु "अव्ययादाप्सुपः" इति लुग्विधानान्निपातानां

वाचकत्वेमेव ज्ञाप्यते, लाघवादत आह [निपातस्येति] वार्त्तिकप्रत्याख्यानप्रकारमाश्रित्याह [कृत्तद्धितेति] उपसंहरति [तस्मादिति] स्वोक्तार्थे मीमांसकसम्मतिं दर्शयति [उक्तं चेति] चतुर्विधे = नामाख्यातोपसर्गनिपातभेदेन चतुर्विधे। द्विविधस्य = नामाख्यातरूपस्य। क्रियत इत्यन्तमेकं वाक्यम्। तत्र हेतुः - [संशयेत्पत्तेरिति] नामार्थें - एकं द्विकं त्रिकं चतुष्कं पञ्चकं वा प्रातिपदिकार्थः, आख्यातार्थे फलव्यापारौ धात्वर्थः, फलमात्रं व्यापारमात्रं वा। सङ्ख्या कालकारकमपि धात्वर्थः, तिङर्थः कर्ता, कृतिर्वेत्यादिः संशयो जायते इत्याशयः। नोपसर्गनिपातयोः = तयोरर्थनिर्णयो न क्रियते। तत्र संशयानुत्पत्तिरेव हेतुः। तयोः = उपसर्गनिपातयोः। व्यापारः = शक्तिलक्षणान्यतररूपः। ततः किमायातमित्याशङ्कायां प्रकृतार्थसंपादकं वार्त्तिकग्रन्थं दर्शयति [यदर्थेति] तौ = उपसर्गनिपातौ। हरिग्रन्थं दर्शयति [उपसर्गेणेति] ननु "उपसर्गेण धात्वर्थः" इत्यादिवाक्यपदीयादुपसर्गस्यैव द्योतकत्वं लभ्यते। न निपातसामान्यस्येत्यत आह [उपसर्गपदमिति] निपातसामान्यस्य द्योतकताया न्यायसिद्धत्वादुपसर्गपदं निपातस्याप्युपलक्षणमित्याशयः।।४६।।

नन्वन्वयव्यतिरेकाभ्यां निपातानां तदर्थवाचकत्वमेव युक्तं बोधकतारूप-शक्तेरबाधाच्च। किञ्चोक्तरीत्या पचतीत्यादौ धातोरेव कर्तृविशिष्टभावनायां लक्षणाऽस्तु, तात्पर्यग्राहकत्वमात्रं तिङादेः स्यादित्यरुचेः पक्षान्तरमाह-

निपातानां वाचकत्वमन्वयव्यतिरेकयोः।
युक्तं वा न तु तद्युक्तं परेषां मतमेव नः।।६।। (४७)

एवं च धात्वर्थप्रातिपदिकार्थयोर्भेदेनान्वयबोधो न व्युत्पन्न इति निपातातिरिक्तविषयं, समानाधिकरणप्रातिपदिकार्थयोरभेदेनान्वय इत्यपि तथेत्यगत्या कल्पनीयमिति भावः। न त्विति। नैयायिकोक्तं प्रादिचादिवैषम्यमित्यर्थः। यत्तु सर्वेषां निपातानां वाचकत्वेऽर्थवत्सूत्रेणैव तेषां प्रातिपदिकत्वसम्भवात् "निपातस्यानर्थकस्य" इति विधिवैयर्थ्यं, सर्वेषां द्योतकत्वे चानर्थकस्येति व्यर्थम्, तथा च केचिद् द्योतकाः केचिद्वाचका इत्यभ्युपेयमिति। तन्न, एवं हि चादयो द्योतकाः प्रादयो वाचका इति वैपरीत्यावारणात्। सर्वथाऽनर्थकानां पादपूरणमात्रार्थ मुपात्तानां सङ्ग्रहाय वार्त्तिकारम्भस्य कैयटादौ स्पष्टत्वाच्च, तस्य प्रत्याख्यातत्वाच्च। परेषामिति बहुवचनं मीमांसकसङ्ग्रहाय। केवलवृक्षशब्दात्समुच्चयाबोधाकारश्रवणे तद्बोधाच्चकार एव

तद्वाचको न द्योतकः। किं च द्योतकत्वे पदान्तराणां तत्र शक्तिः कल्प्या चकारादेर्द्योतकत्वशक्तिश्च कल्प्येति गौरवं स्यादिति हि समुच्चयाधिकरणे स्थितं, तदपि न युक्तमिति भावः। तथाहि - अन्वयव्यतिरेकौ तात्पर्यग्राहकत्वेनाप्युपयुक्तौ घटादिपदानामेव समुज्झिते लक्षणा तात्पर्यग्राहकः प्रकरणादिवज्झादिरिति स्वीकारान्न शक्तिद्वयकल्पनाऽपि। अस्माकं लक्षणाग्रहदशायां बोधात्तत्कार्यकारणभाव आवश्यकः, एवं शक्तिग्रहस्यापीति पक्षद्वयेऽपि कल्प्यान्तराभावेन गौरवाभावादुभयमपि युक्तमित्यभिमतम्। अत एव -

स वाचको विशेषाणां सम्भवाद् द्योतकोऽपि वा

इति वाक्यपदीयं सङ्गच्छते। दर्शनान्तररीत्या वाचकत्वमेव द्योतकत्वमेवेति नियमस्तु न युक्त इति ध्वनयन्नाह मतमेवेति।।६।। (४७)

इदानीं निपातनां वाचकतावादं समर्थयितुमुत्तरग्रन्थमवतारयति [नन्विति] - [अन्वयव्यतिरेकाभ्यामिति] आभ्यामेव हि शब्दादर्थावगतिरिति भूवादिसूत्रे भाष्ये स्पष्टम्। प्रकृते अनुभवतीत्यादावनोः सत्त्वेऽनुभवार्थप्रतीतेस्तदप्रयोगे तदप्रतीतेश्च अन्वित्युपसर्गस्यैवानुभवार्थकत्वस्वीकारो युक्त इति भावः। नन्वन्वयव्यतिरेकयोस्तात्पर्यग्रहे उपयोगसम्भवान्न तयोर्वाचकताप्रयोजकत्वमत आह [किञ्चेति] [उक्तरीत्येति] अनुभवतीत्यादावनोर्द्योतकतासमर्थनायोक्तरीत्येत्यर्थः। [तिङादेरिति] अत्रादिपदेन सुपां परिग्रहः। यत्तु "अत्रादिपदेन कृत्सनादेः परिग्रहः" इति काशिकाकाराः, प्रभाकाराश्च। तन्न। ण्वुल्तृजादीनां द्योतकतायाः कदाप्यसिद्धत्वेन तत्त्वापादनासम्भवात्।

[स्यादिति] - तिङां द्योतकत्वं वाचकत्वं वेति पक्षद्वयमप्याकरे प्रतिपादितम्। उक्तरीत्याश्रयणे तु तेषां द्योतकत्वमेव स्यादिति वाचकत्वपक्षविलोपापत्तिरेवेति तात्पर्यम्। निष्कर्षे तु तिङां द्योतकत्वमेव मूलकृतोऽभितम्। अत्र एवमभिधानं तु "पक्षद्वयस्याप्याकरप्रतिपादितत्वेन द्वयोरपि मध्ये यस्य कस्यापि पक्षस्य परिग्रहेऽपि न क्षतिः। परन्तु नैयायिकाद्युक्तं प्रादिचाद्योर्वैषम्यमयुक्तम्" इत्याशयेन। अत एव "न तु तद्युक्तं परेषां मतमेव न" इति उपसंहृतम्। अत एव "विधिनिमन्त्रण" ३-३-१६१ इत्यादिसूत्रे तिङां द्योतकत्वं वाचकत्वं वेति विकल्प्य पक्षद्वयेऽपि युक्तिसाम्यं प्रतिपाद्य अन्ततो द्योतकत्वमेव सिद्धान्तितं कौस्तुभे मनोरमायां च। भाष्यकृतोऽपि द्योतकत्व एव निर्भरः। अत एव पच अजर्घा इत्यादौ धातुमात्रात्सर्वबोधः सङ्गच्छते। नच व्यतिसे इत्यत्र धात्वभावेऽपि

प्रत्ययमात्रात्सर्वबोधाद्वाचकत्वपक्ष एव युक्त इति वाच्यम्। व्यतिसे इत्यादीनामसाधुत्वेनादोषात्। स्पष्टं चेदं तिङर्थवादे मञ्जूषाव्याख्याने कलायाम्। नच तुल्ययुक्त्या सुपामपि द्योतकत्वमेव स्यादिति वाच्यम्। इष्टापत्तेः। पञ्चकं प्रातिपदिकार्थ इति पक्षस्यैव भाष्यकृता सिद्धान्तितत्वात्। अत एव गवा क्रीतेत्यत्र "क्रीतात्करणपूर्वात्" ४-१-५१ इति ङीषमाशङ्क्य "विभक्त्या व्यवधानान्न" इति परिहृतं भाष्ये। अन्यथा विभक्त्यन्तस्यैव करणवाचकत्वेन तद्भाष्यासङ्गतिः स्पष्टैव। नच पचेत्यादौ लुप्तप्रत्ययस्मरणाद्बोध इति वाच्यम्। लोपमजानतोऽपि बोधात्। एकशेषसूत्रे प्रत्ययलक्षणकार्यं लोपफलं वदता भाष्यकारेण लुप्तस्मरणाद्बोध इत्यनभ्युपगमाच्च। अन्यथा प्रधानप्रयोजनभूतार्थबोधस्यैव प्रत्ययलक्षणफलतया प्रदर्शयितव्येऽप्रधानकार्यनिर्वाहप्रदर्शनस्य भाष्यकाराणामसङ्गत्यापत्तेः। नच धातोर्द्विवचनाद्यनुपपत्तिरिति वाच्यम्। आरोपितद्वित्वादिविशिष्टभावनाबोधकाद्धातोर्द्विवचनादि-सिद्धेर्निष्प्रत्यूहत्वात्। नच तिङां द्योतकत्वं समर्थयतो मञ्जूषाकारस्य "स्वोत्तरतिङ्वाच्यकारक-गतिद्वित्वाद्यारोपेण द्विवचनादि" इति सङ्ख्याप्रकरणस्थस्वग्रन्थविरोध इति वाच्यम्। तद्ग्रन्थस्य तिङां वाचकत्वपक्षाश्रयणेन प्रवृत्तेः। तिङां वाचकत्वपक्ष एव सङ्ख्यान्वयनिरूपणस्यावश्यकत्वात्। द्योतकतापक्षे धातोरेव सङ्ख्याकालकारकविशिष्टार्थवाचकतया सङ्ख्यादीनां पार्थक्येनानुपस्थित्याऽन्वयस्यैवा-भावात्तन्निरूपणस्यानावश्यकत्वात्। नच 'द्व्येकयः' इत्यादीनां नियमत्वं मञ्जूषोक्तं न युक्तम्। तदुत्तरीत्या कर्तृविशिष्टभावनाबोधकात् कर्मविशिष्टभावनाबोधकात् केवलाभावनाबोधकाच्च धातो र्लकारा भवन्तीति "लः कर्मणि" इत्यादेरर्थस्य पर्यवसानेन "अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे" इति नियमेनापि तत्तत्कारकादिविशिष्टभावनार्थकानां तिङां सर्वत्र सिद्ध्यभावात्, नियमस्यान्यथैव सङ्गमनीयत्वादिति वाच्यम्। यद्यपि निरुक्तरीत्या तिङां सिद्धिर्नास्ति, किन्तु लकाराणामेव, तथापि वाचकत्वं द्योतकत्वं वा न लकाराणां सम्भवति, तेषां लोकेऽप्रयुज्यमानत्वात्। किंतु तिबादिनिष्ठं वाचकत्वं द्योतकत्वं वा प्रक्रियालाघवाय तत्स्थानितया कल्पिते लकारे आरोप्य लकारा विधीयन्त इति तत्तत्कारक-विशिष्टभावनाबोधकाद्धातोर्लकारसिद्धौ तिङां सिद्धिरपि तच्च 'रनिलीनैवेति मञ्जूषोक्तदिशा "द्व्येकयोः" इत्यादीनां नियमत्वसिद्धौबाधकाभावात्। यदितु कर्तृविशिष्टभवनाबोधकाद्धातोः कर्तरि प्रत्ययसिद्धावपि कर्मणि भावे च प्रत्ययो न सिद्ध्यति। एवं कर्मविशिष्टभावनाबोधकाद्धातोः कर्मणि प्रत्ययोत्पत्तावपि तदा कर्तृभावनयोः प्रत्ययो नोत्पद्यते। एवं केवलभावबोधकाद्धातोर्भावे प्रत्यये सिद्धेऽपि तदा कर्तृकर्मणोः प्रत्ययो न सिद्ध्यति। अतस्तत्तदर्थे प्रत्ययविधानाय "द्व्येकयोः" इत्यादीनां विधायकत्वमेव स्यात्। अतो मञ्जूषाकारोक्तं नियमत्वं नोपपद्यत एवेति विभाव्यते, तदपि विभावनमसङ्गतमेव।

"तिप्तस्झि" इत्यादिसामान्यसूत्रे कस्याप्यर्थस्यानिर्देशात्सर्वस्मिन्नप्यर्थे प्रत्ययस्य विहितत्वेन "द्व्येकयोः" इत्यादीनां नियमत्वे बाधकाभावात्। सर्वेषां वाक्यैकवाक्यतया विधानमिति पक्षेऽपि "द्व्येकयोः" इत्यादीनां फलतो नियम एव। तेन विनापि तत्र तत्सिद्धेः। पञ्चकं धात्वर्थ इति सिद्धान्तात्। अत एव तत्र पक्षे "अनुदात्तङित" इत्यादीनां परिभाषात्वेन व्यवहारो भाष्ये। किञ्च नैकदा कर्तृकर्मविशिष्ट-स्वार्थबोधको धातुः सम्भवतीति नियमानुपपत्तिरित्यपि न सम्यक्। लोके सिद्धानां पदानां शास्त्रं व्युत्पादकं, नतु निष्पादकम्। कर्तृप्रत्ययघटितपदस्य साधुत्वान्वाख्याने तत्र कर्तृविशिष्टभावनाबोधक एव धातुर्भवति। एवमन्यत्रापि। अतो भैरवहरिवल्लभपञ्चोलिनां मञ्जूषाखण्डनप्रवृत्तिर्दुराग्रहमूलिकैव, न वस्तुतत्त्वनिबन्धना। नच तिङां वाचकत्वमेव युक्तम्। व्यतिसे इत्याद्यनुरोधात्। पच, अजर्घा इत्यादौ तु न दोषः। प्रविश, पिण्डीमित्यत्र यथा प्रविशेत्यस्य श्रूयमाणस्य गृहं प्रविशेत्यर्थे शक्तिः तथा अजर्घा इत्यादौ प्रत्ययलोपेऽपि श्रूयमाणस्य प्रकृतिभागस्य विशिष्टार्थे शक्तिरस्तु, वाक्यैकदेशन्यायादिति परीक्षोक्तं पञ्चोल्युक्तं च युक्तम्। अजर्घा इत्यादीनां वाक्यैकदेशन्यायाविषयत्वात्। प्रविश, पिण्डीमित्यादावेकदेशानामेव लोकान् प्रति स्वातन्त्र्येणार्थबोधकताया गृहं प्रविश, पिण्डीं भक्षयेति वाक्यार्थतात्पर्येण प्रविश पिण्डीमिति प्रयुक्तमिति शिष्टलोकानुभवेन तथा कल्पनेऽपि प्रकृतिप्रत्ययसमुदायार्थतात्पर्येण प्रकृतिमात्रं प्रयुक्तमिति लोकानामनुभवाभावेन तथाकल्पनाया अयुक्तत्वात्। एतादृशेषु लोकानुभवस्यैव प्रमाणत्वात्। अत एव सत्यभामेति समुदायस्य प्रत्येकपदयोश्च व्यक्तिविशेषबोधकत्वेऽपि भीमसेन इत्यत्र समुदायस्य भीमेत्यंशस्य च व्यक्तिविशेषबोधकत्वं, न सेनरूपस्यावयवस्यापीति सार्वजनीनो व्यवहारः सङ्गच्छते। अतो नागेशोक्तदिशा सुपां तिङां च द्योतकत्वमेव युक्तं, भाष्यसम्मतं च। दर्पण - परीक्षा - प्रभाकारा भ्रान्ता एव। अत्र युक्तमुत्पश्यन्तु सुधिय इत्यलम्।

कारिकायां - [निपातानामिति] सर्वेषामपि निपातानामित्यर्थः। अन्वयव्यतिरेकयोः सतोः निपातानां सर्वेषामपि, वाचकत्वं वा युक्तम्। निपातसामान्यस्य द्योतकत्वं प्राक् प्रतिपादितमिदानीं वाचकत्वं वा स्वीकार्यमिति प्रतिपादयति। नात्र पक्षयोरस्माकं निर्भरः। द्योतकत्वमेवेति वाचकत्वमेवेति वा न विचारस्थानम्। पक्षद्वयेऽपि युक्तिसाम्यात्। परन्तु केचिद्वाचकाः, केचिद् द्योतका इति द्वैराश्येन निर्देशो नैयायिकादीनामयुक्त इत्यर्थप्रतिपादने संरम्भः। तद्ध्वनयन्नाह "नतु तद्युक्तं परेषां मतमेव नः"

इति। एतमेवाशयं विवृणोति - [नैयायिकोक्तं प्रादिचाद्यौर्वैषम्यमिति]। नः = अस्माकं वैयाकरणानाम्। परेषां = नैयायिकादीनाम्। यन्मतं = वैषम्यसहितं तत्। नतु यक्तं = नैवसम्मतम्, अत्र "न" इत्यन्वेति। नैयायिकादीनां वैषम्ययुक्तं मतमस्मभ्यं न रोचत इति तात्पर्यम्।

[एवं चेति] निपातानां वाचकत्वसिद्धौ चेत्यर्थः। [इतीति] - इत्याकारकः कार्यकारणभाव इत्यर्थः। [इत्यपीति] इति कार्यकारणभावोपीत्यर्थः। तथा = निपातातिरिक्तविषयः। व्युत्पत्तिद्वयेऽपि निपातातिरिक्तत्वविशेषणप्रदर्शनेन "पदार्थः सदृशान्वेति विभागेन कदापि न" इति पूर्वोक्तः कारिकाभागोऽपि व्युत्पत्तिद्वयप्रदर्शनतात्पर्यक इत्यवसीयते निपातानां वाचकत्वकल्पे व्युत्पत्तिद्वयमपि निपातातिरिक्ततया संकोचनीयम्। अन्यथा भेदान्वयो न सिद्ध्येत्, अभेदान्वय आपद्येत। द्योतकत्वकल्पे तु निरुक्तरीत्या न संकोच इति द्योतकत्वकल्प एव युक्त इति "अगत्या" इत्यनेन सूचयति।

ननु "नतु तद्युक्तं परेषां मतमेव न" इत्ययुक्तम्। तादृशवैषम्यस्य कात्यायनमुनिसम्मतत्वादित्याशयं निराकर्तुं दर्शयति - [यत्त्विति]। तेषां = निपातानाम्। [विधिवैयर्थ्यमिति] अर्थवत्सूत्रस्थकात्यायनवचनरूपस्य विधेः "निपातस्यानर्थकस्य प्रातिपदिकत्वम्" इत्यस्य वैयर्थ्यं स्यात्। निपातानां सर्वेषामपि वाचकत्वेऽर्थवत्सूत्रेणैव तेषां प्रातिपदिकत्वसिद्ध्या विधिवैयर्थ्यम्। तत्पक्षेऽनर्थकस्य कस्यापि निपातस्याभावादित्याशयः। अनेन केषांचिन्निपातनामानर्थक्यं कात्यायनसंतमिति लक्ष्यते। तच्चानर्थक्यं तेषां द्योतकत्वे नैवेति पर्यवस्यति। केषां चिद्वाचकत्वे तदेव वार्त्तिकं प्रमाणमित्याह [सर्वेषां द्योतकत्वे चेति] [व्यर्थमिति] निपातस्य प्रातिपदिकत्वमित्येव वक्तव्ये अनर्थकस्येति विशेषणं व्यावर्त्याभावाद्व्यर्थं स्यादित्यर्थः। अनेन केषांचिद्वाचकत्वमिति लभ्यते। एवं च वार्त्तिकारम्भात्केषांचिन्निपातानां द्योतकत्वमिति, तत्र "अनर्थकस्य" इति विशेषणात् केषांचिद्वाचकत्वमित्याशयो भवन्मुनिसम्मत एवेति निर्गलितोर्थः। तदेतदाह [तथाचेति] [एवं हीति] "निपातस्यानर्थकस्य प्रातिपदिकत्वम्" इति कात्यायनवचनबलात्केषांचिद् द्योतकत्वं, केषांचिद्वाचकत्वमित्यर्थस्वीकारस्यावश्यकत्वे हीत्यर्थः। [वैपरीत्यावारणादिति] चादयो द्योतकाः, प्रादयो वाचका इति वैषम्यस्वीकारेऽपि वार्त्तिकस्य चरितार्थतया त्वदुक्तं वैषम्यं निष्प्रमाणमिति भावः। ननु "उपसर्गेण धात्वर्थो बलादन्यत्र नीयते" इति वाक्यपदीयादुपसर्गाणां द्योतकत्वलाभेन पारिशेष्याद् निपातानां वाचकत्वस्याङ्गीकर्तव्यतयाऽस्मदुक्तं वैषम्यं युक्तमेवेत्यत आह [सर्वथेति] -

[कैयटादाविति] - आदिपदेन कौस्तुभादेर्ग्रहणम्। इत्थं हि अर्थवत्सूत्रे कैयटः "निपातानां द्योतकत्वादभिधेयार्थाभावेऽपि द्योत्यार्थसद्भावाद्येषामर्थवत्त्वं, तेषां सिद्ध्यत्येव संज्ञा। यस्य तु द्योत्योऽप्यर्थो नास्ति, तदर्थं वचनम्" इति। [स्पष्टत्वादिति]। तथाच भवदुक्तं वैषम्यं न वार्त्तिकारूढमिति भावः। वस्तुतस्तस्य वार्त्तिकस्य प्रत्याख्यातत्वेन न भवन्मतोपष्टम्भकं तदित्याह [तस्येति] "निपातस्यानर्थकस्य प्रतिपदिकत्वम्" इति वार्त्तिकस्येत्यर्थः। [प्रत्याख्यातत्वादिति] - तथाचार्थवत्सूत्रे भाष्यम् "अथवा आचार्यप्रवृत्तिर्ज्ञापयति - अनर्थकानामप्येषामर्थवत्कृतमिति। यदयम् "अधिपरी अनर्थकौ" इत्यनर्थकयोर्गत्युपसर्गसंज्ञा बाधिकां कर्मप्रवचनीयसंज्ञां शास्ति" इति। "क्रियायोगे गत्यपसर्गसंज्ञयोर्विधानादनर्थकयोः क्रियायोगाभावात्प्राप्तिरेव नास्तीति संज्ञाविधानं यथोक्तार्थस्य ज्ञापकं संपाद्यते" इति कैयटः। कैयटे संज्ञाविधानमित्यस्य गत्युपसर्गसंज्ञाबाधककर्मप्रवचनीयसंज्ञाविधानमित्यर्थः। "अधिपरी अनर्थकौ" १-४-९३ इति सूत्रेऽपि भाष्ये तत्सूत्रस्य प्रयोजनाभावं प्रदर्श्य "एवं तर्हि सिद्धे सति यदनर्थकयोरुपसर्गसंज्ञा बाधिकां कर्मप्रवचनीयसंज्ञां शास्ति। तज्ज्ञापयत्याचार्यः - अनर्थकानामप्येषां भवत्यर्थवत्कृतमिति। किमेतस्य ज्ञापने प्रयोजनम्? निपातस्यानर्थकस्य प्रातिपदिकत्वं चोदितं - तन्न वक्तव्यं भवति" इत्युक्तम्। कारिकायां परस्येति वक्तव्ये परेषामिति बहुवचनोपादानस्य प्रयोजनमाह [बहुवचनमिति] न केवलं नैयायिका एव विप्रतिपन्नाः, किन्तु मीमांसका अपीति तन्निरासाय बहुवचनमिति भावः। "परेषां = मीमांसकानाम्" इति भूषणे उक्तं, तत्र मीमांसकानमित्युक्तिर्नैयायिकानामप्युलक्षणम्। "मीमांसकानां भाष्यकारादिभेदेन नानात्वाद्बहुवचनमिति भावः" इति तु काशिकाकारास्तदनुसारिणः पञ्चोलिनश्च। मीमांसकमतं दर्शयति [केवलवृक्षशब्दादिति] चाद्यसमभिव्याहृतवृक्षशब्दादित्यर्थः। [तद्बोधादिति] समुच्चयबोधादित्यर्थः। एवं चान्वयव्यतिरेकाभ्यां चादीनां समुच्चयादिवाचकत्वं युक्तमिति भावः। शक्तिः = अतिरिक्ता शक्तिः। [गौरवं स्यादिति] घटपदे घटरूपार्थबोधनाय एका शक्तिः, समुच्चये चस्यैका शक्तिरिति वाचकतावादिनो लाघवम्। द्योतकतावादिनां तु घटपदे घटरूपार्थबोधनाय एका। तत्रैव समुच्चयबोधनायान्या। चशब्दे द्योतकताशक्तिश्च कल्प्येति गौरवं स्पष्टमेवेति भावः।

तदपि = मीमांसकमतमपि। अयुक्ततामेव दर्शयति [तथाहीति] [तात्पर्यग्राहकत्वेनापीति] तथाचान्वयव्यतिरेकयोरन्यथासिद्धतया न शक्तिग्राहकतेत्यर्थः। शक्तिद्वयकल्पनापि = अतिरिक्तशक्तिद्वय-कल्पनापि। घटादेर्निपातानां च पृथक्शक्तिद्वयकल्पनेति यावत्। [लक्षणाग्रहदशायामिति] धातोस्तत्तदर्थे

लक्षणाग्रहदशायाम्। बोधात् = प्रजयतीत्यादौ प्रकर्षादितत्तदर्थबोधात्। [कार्यकारणभावः = समुच्चितघटादिविषयकबोधं प्रति घटादिपदनिष्ठलक्षणाज्ञात्वेन कार्यकारणभावः। [शक्तिग्रहस्यापीति] घटादिविषयकशाब्दबोधं प्रति घटादिपदनिष्ठशक्तिज्ञानत्वेन तथा समुच्चितविषयकशाब्दबोधे समुच्चितविषयकशक्तिज्ञानत्वेन कारणत्वमित्यनुभवानुरोधेन सममेवेति भावः। उभयमपि = वाचकत्वद्योतकत्वरूपोभयमपि। [अत एवेति] उभयस्यापि युक्तत्वादेवेत्यर्थः। वाक्यपदीये सः = उपसर्गः, विशेषाणाम् = अर्थविशेषाणाम्। वाचकः, न केवलं द्योतकाः, यावद्वाचका अपि दृश्यन्ते। यथा पतिष्ठत इत्यादौ धातोर्गतिनिवृत्तिवाचकत्वम्। प्र इत्युपसर्गेण तु गतिवाचकत्वं व्यवस्थाप्यते। तथाचोक्तं "धात्वर्थं बाधते कश्चित्" इति। द्वितीयं पक्षं दर्शयति [सम्भवाद् द्योतकोऽपि वेति] वाचकत्वमेव = केषांचित्। द्योतकत्वमेव = केषाञ्चित्।।४७।।

पर्यवसितमुपसंहरन्नाह -

निपातत्वं परेषां यत्तदस्माकमिति स्थितिः।
व्यापकत्वाच्छक्तितायास्त्वच्छेदकमिष्यते।।७।। (४८)

परेषां यन्निपातत्वमसत्त्वार्थकत्वे सति चादिगणपठितत्वं, शक्तिसम्बन्धेन निपातपदवत्त्वं वोपाधिर्जातिर्वा तदेवास्माकमपि, परन्तु सामान्य धर्मे प्रमाणानां पक्षपाताच्छक्तता द्योतकता वा तद्वच्छेदेनैव कल्प्येति नैयायिकोक्तं प्रादिचाद्योर्वैषम्यमयुक्तमित्यर्थः। व्यापकत्वात्। सामान्यत्वात्। शक्तताया इत्युपलक्षणं द्योतकताया वेत्यपि द्रष्टव्यम्।।७।। (४८)

इति कौण्डभट्टविरचिते वैयाकरणभूषणसारे
निपातार्थनिर्णयः समाप्तः।।

एतावता प्रबन्धेन पक्षद्वयप्रदर्शनात्पाठकास्तद्विषये मुह्येयुः। तादृशमोहापनोदनायावतरणव्याजेनाह - [पर्यवसितमिति] ननु प्रादीनां चादीनां च वाचकत्वे उपसर्गत्वनिपातत्वयोः शक्तितावच्छेदकत्वे गौरवमत आह मूले [निपातत्वमिति] परेषां = नैयायिकादीनाम्। यत् = निपातत्वं = निपातलक्षणम्। तत् = तदेव। अस्माकम्। इति = इत्येव। स्थितिः = मर्यादेत्यर्थः। "चादयोऽसत्त्वे" १-४-५७ इति शास्त्रानुसारेणोक्तमाह - [असत्त्वार्थकत्वे सतीत्यादि] सत्त्वं = द्रव्यम्। विशेष्यतया द्रव्यभिन्नार्थकत्वं

तत्त्वम्। पशुरित्यादीनां निपातत्वारणाय सत्यन्तम्। इहतु स्यादेव "लोधं नयन्ति पशुमन्यमानाः" इति पशु इति निपातः सम्यगर्थे। ननु निरुक्ते "लुब्धमृषिं पशुं मन्यमाना" इति पशुमिति सानुस्वारपाठाद्वेदे पश्वति लुप्तवभक्तिकं सत्त्ववाचीति नेदमुदाहरणमिति चेत्, न। "लोधमित्यनवगतम्" इति निरुक्तभाष्योक्त्या तन्मात्रनिर्णायके निरुक्ते पशुशब्दांशेऽन्याथापाठे मानाभावात्। स्पष्टं चेदं "चादयोऽसत्त्वे" इति सत्रे हरदत्तग्रन्थे दृशिधातौ माधवग्रन्थे चेति बोध्यम्। स्वरादिपठितानामसत्त्ववृत्तित्वे निपातत्वे आद्युदात्तत्ववारणाय विशेष्यदलम्। [उपाधिरिति] तत्त्वं च नित्यत्वे सत्यनेकसम्बद्धत्वम्। नास्माकमवच्छेदकगौरवमित्याह [परंत्विति] तदवच्छेदेनैव = निपातत्वावच्छेदेनैव। एवशब्देन उपसर्गत्वादेर्व्यावृत्तिः। न्यूनतां परिहरति [शक्तताया इति]।।४८।।

इति वैयाकरणभूषणसारतत्त्वदर्शिन्यां

निपातार्थनिर्णयः।।८।।

अथ भावप्रत्ययार्थनिर्णयः

भावप्रत्ययार्थमाह -

कृत्तद्धितसमासेभ्यो मतभेदनिबन्धनम्।
त्वतलोरर्थकथनं टीकायां हरिणा कृतम्।।१।।(४९)

"कृत्तद्धितसमासेभ्यः सम्बन्धाभिधानं भावप्रत्यये नान्यत्र रूढ्यभिन्नरूपाव्यभिचरितसम्बन्धेभ्यः" इति वार्त्तिकवचनमिति मीमांसकादीनां भ्रममपाकुर्वन्नाह - टीकायामिति। भर्तृहरिणा महाभाष्यटीकायामित्यर्थः। त्वतलोरिति भावप्रत्ययमात्रोपलक्षणम्। अयमर्थः - समासादौ शक्तिः कल्प्यमाना राजादिसम्बन्धविशिष्टे कल्प्यत इत्युक्तम्। तथाच तदुत्तरभावप्रत्ययः सम्बन्धं वदतीत्यर्थः।

एतदपि भेदः संसर्ग उभयं वेत्युक्तेषु पक्षेषु भेदपक्षे न सम्भवतीत्यत आह - मतभेदेति। पक्षभेदेनेत्यर्थः। एवं च राजपुरुषत्वमौगवत्वं पक्तृत्वमित्यादौ स्वस्वामिभावः, अपत्यापत्यवत्सम्बन्धः, क्रियाकारकभावसम्बन्ध इत्यन्वयबोधः। औपगवादावव्यभिचरितसम्बन्धे त्वर्थान्तरवृत्तिस्तद्धित उदाहार्यः। दामोत्वमिदरत्वं कृष्णसर्पत्वमित्यादौजाति विशेषबोधादाह अन्यत्रेति। रूढेरभिन्नरूपादव्यभिचरितसम्बन्धेभ्यश्चान्यत्रेत्यर्थः। रूढिरुक्ता। द्वितीयं यथा - शुक्लत्वम्। अत्र "तदस्यास्त्यस्मिन्" इति मतुपो "गुणवचनेभ्यो मतुपो लुगिष्टः" इति लुप्तत्वात्तद्धितान्तत्वेऽपि घटः शुक्ल इत्यभेदप्रत्ययाद्गुणस्यैव प्रकारत्वेन भानं जायते। तृतीये - सतो भावः सत्तेति। अत्र जातावेव प्रत्यय इति दिक्।।१।। (४९)

अथ भावप्रत्ययार्थनिर्णयः

[भावप्रत्ययार्थमिति] त्वादिभावप्रत्ययार्थमित्यर्थः। तेनात्र घञादिप्रत्ययार्थानिरूपणेऽपि न क्षतिः। मूले 'टीकायां हरिणा कृतम्' इत्युपादानस्य प्रयोजनमाह - [कृत्तद्धितेति] इति = इत्येतत्। [वार्त्तिकवचनमिति] वार्त्तिकरूपं वचनमित्यर्थः। भ्रममिति - हरिणा श्लोकरूपं भाष्यव्याख्यानं कृतं, प्रकृतवचनं न श्लोकरूपमिति तेषां भ्रमबीजं स्यात्। भर्तृहरिणा स्वकृतवाक्यपदीयस्य स्वेनैव काचिद्व्याख्या निरमायि। तत्रत्यमिदं वचनमिति वैयाकरणानामाशयः। ननु त्वतलोरिति विशिष्योपादानेन

ष्यञादीनामर्थान्तरकत्वशङ्का स्यादत आह [भावप्रत्ययमात्रोपलक्षणमिति] अत एव "कृत्तद्धितसमासेभ्यः" इति हरिवचने भावप्रत्ययेनेति सामान्येनोपादानं सङ्गच्छते। ननु "तस्य भावः" इति सूत्रे भावपदग्रहणात् त्वतलादीनां भावार्थकत्वमेव स्यान्नतु सम्बन्धार्थकत्वमतो हरिग्रन्थाशयं विवृणोति [अयमर्थ इति] उक्तम् = समासशक्तिनिर्णये। तथाच = सम्बन्धविशिष्टे शक्तिस्वीकारे च। [सम्बन्धं वदतीति] प्रकृतिजन्यबोधे प्रकारतया भासमानो धर्मो भावः। स एव त्वाद्यर्थः। समासादौ सम्बन्धविशिष्टे शक्तिस्वीकारात्सम्बन्धस्य प्रकृतिजन्यबोधे प्रकारत्वात्सम्बन्धमेव भावप्रत्ययो बोधयतीत्यर्थः। अर्थः = हरिग्रन्थस्यार्थः। एवं हरिग्रन्थाशयं प्रदर्श्य "मतभेदनिबन्धननम्" इति मूलमवतारयति [एतदपीति] कृत्तद्धितसमासेभ्यो भावप्रत्ययेन सम्बन्धाभिधानमपीत्यर्थः। [उक्तेष्विति] भेदः संसर्ग उभयं वेति वाच्यव्यवस्थितेरिति कारिकाभागेनोक्तेषु त्रिषु पक्षेषु मध्ये इत्यर्थः। भेदपक्षे = भेदो वाच्य इति पक्षे। [न सम्भवतीति] भेदः समासार्थ इति पक्षे सम्बन्धस्य समासादिजन्यबोधे प्रकारतयाऽभानात्तदुत्तरभावप्रत्ययस्य सम्बन्धबोधकत्वं न सम्भवतीत्यर्थः। नन्वेतदंशे मतभेदाभावादिदमयुक्तमत आह [पक्षभेदेनेति] तथा च भेदपक्षे भेद एव त्वाद्यर्थः, इतरपक्षद्वये सम्बन्धस्त्वाद्यर्थ इति भावः।

उक्तमर्थं लक्ष्येषु सङ्गमयति [एवं चेति]। [अन्वयबोध इति] शाब्दबोध इत्यर्थः। यथाश्रुतं तु न युक्तम्। पृथगुपस्थितिविषयार्थयोः संसर्गस्यैवान्वयत्वात्। समासादौ समुदायशक्तिस्वीकारेणार्थानां पृथगनुपस्थितेः। शाब्दत्वं तु शाब्दयामीत्यनुभवबलादस्ति। उपस्थितयोः सम्बन्धोऽन्वय इति मते तु यथाश्रुतमेव युक्तम्। [अव्यभिचरितसम्बन्धेत्विति] व्यक्तेरुत्पत्तिमारभ्य विनाशपर्यन्तं त"क्तिनिष्ठात्यन्ताभावाप्रतिप्रयोगिसम्बन्धरूपत्वे इत्यर्थः। प्रकृते चोपग्वपत्ये जन्यजनकभावो नास्तीत्यस्याभावेन तादृशसम्बन्धेऽत्यन्ताभावाप्रतियोगित्वमक्षतमति भावः। [अर्थान्तरवृत्तिरिति] देवताद्यर्थकतद्धितान्ताद्भावप्रत्यये ऐन्द्रत्वमित्यादिरुदाहर्तव्यः। इन्द्राभिन्नदेवतासम्बन्ध इति बोध इति भावः।

इदमपि प्रायिकमित्याह [दामोदरत्वमिति]। दामोदरशब्दस्य नारायणपरत्वे कल्पभेदेन, यत्किञ्चि"क्तिपरत्वेऽवस्थाभेदेन चानेकव्यक्तिवृत्तित्वाज्ञातित्वं बोध्यम्। [रूढेरिति] शास्त्रकृत्कल्पितावयवार्थाप्रतीतौ यदर्थनिरूपितं प्रकृतिप्रत्ययसमुदायमात्रे बोधकत्वं तत्पदे तदर्थनिरूपिता शक्ती रूढिः। [अभिन्नरूपादिति] समानानुपूर्वीकादित्यर्थः। शुक्लादिभ्यो मतुपि तल्लुकि गुणे गुणिनि च ते शब्दा

उभयत्राप्येकानुपूर्वीकाः। [अन्यत्रेति] अन्यत्र भावप्रत्ययेन सम्बन्धाभिधानमिति भावः। उक्ता = दामोदरत्वं कृष्णसर्पत्वमित्यनेन। [तद्धितान्तत्वेऽपीति] तथाच तदुत्तरभावप्रत्ययस्य कृत्तद्धितेति वचनात्सम्बन्धवाचकता प्रसज्यत इति भावः। [अभेदप्रत्ययादिति] जातिव्यक्त्योरिव गुणगुणिनोरपि सोऽयमित्यभिसम्बन्धेन भेदमूलकसम्बन्धस्य तिरोहितत्वाद्धर्मिणि गुणस्यैव समवायरूपसम्बन्धस्य व्यावृत्तिः। भानं = धर्मिणि। [सत्तेति] नहि सत्सत्तयोः सम्बन्धः कदापि व्यभिचरित इति बोध्यम्। ननु शुक्लत्वं सत्त्वमित्यादाविव राजपुरुषत्वमित्यत्रापि भावप्रत्ययेन सम्बन्धाभिधानं न स्यादिति चेदस्ति वैषम्यम्। नहि गुणगुणिनोरिव सत्सत्तयोरिव राजपुरुषयोः सम्बन्धोऽव्यभिचारी। तयोस्तस्याऽऽपेक्षिकत्वात्। नीलघटत्वमित्यादौ नीलघटादिवृत्तिधर्मो घटत्वादिकमेव त्वाद्यर्थः। नत्वत्र सम्बन्धो भावप्रत्ययार्थः, अभिन्नरूपत्वात्। स्पष्टमधिकमन्यत्र। तदाह [दिगिति]।।४९।।

दण्डीत्यादौ प्रकृत्यर्थविशिष्टद्रव्यमात्रवाचकता तद्धितस्येति वदन्तं मीमांसकंमन्यं प्रत्याह -

अत्रार्धजरतीयं स्याद्दर्शनान्तरगामिनाम्।
सिद्धान्ते तु स्थितं पक्षद्वयं त्वादिषु तच्छृणु।।२।। (५०)

अत्र - भावप्रत्ययविषये। तथा हि - दामोदरत्वं घटत्वमित्यादौ भावप्रत्ययस्य सम्बन्धानभिधायकत्वेन मीमांसकानां दण्डित्वमित्यादिष्वपि तदभिधानं न स्यात्। प्रकृतिजन्यबोधे प्रकारः प्रकृत्यर्थसमवेतो हि तदुत्तरभाव प्रत्ययेनाभिधीयते। अन्यथा घटत्वमित्यादौ द्रव्यत्वादेः दण्डित्वमित्यादौ दण्डादेश्च तदुत्तरभावप्रत्ययवाच्यतापत्तेः। न च तन्मते दण्डीत्यादिबोधे सम्बन्धः प्रकारः। यत्तु -

यदा स्वसमवेतोऽत्र वाच्यो नास्ति गुणोऽपरः।
तदा गत्यन्तराभावात्सम्बन्धो वाच्य आश्रितः।।

इति। तन्न, इनादेः सम्बन्धिवाचकत्वेनोपपत्तावगत्यभावात्। प्रपञ्चितं चैतदादावेव वैयाकरणभूषणे। ननु तवापीदं वैषम्यं कथमित्यत आह - सिद्धान्ते त्विति। 'जायन्त' इति वक्ष्यमाणशेषेणान्वितम्। सिद्धान्ते प्रकृतिजन्यबोधे प्रकारे त्वादयो जायन्त इत्यर्थः। प्रकृतिजन्यबोधे प्रकार इत्यत्र पक्षद्वयं स्थितमिति योजना।।२।। (५०)

अत्र विशेषमाह [दण्डीत्यादाविति]। [द्रव्यमात्रवाचकतेति] अयं भावः - मतुबादीनां सम्बन्ध्येव शक्यः। नतु सम्बन्धस्तस्य संसर्गमर्यादया प्रतीत्युपपत्तेः। यदाहुः -

सम्बन्धिनैव सम्बन्धः प्रत्येतुं यदि शक्यते।
पुनस्तस्याभिधाशक्तिं कः श्रुतेः परिकल्पयेत्।। इति।

अत एव पाचक इत्यादावपि न सम्बन्धो वाच्यः। उक्तं च -

पाकं तु पचिरेवाह कर्तारं प्रत्ययोऽप्यकः।
पाकयुक्तः पुनः कर्ता वाच्यो नैकस्य कस्यचिद्।। इति।

नचानेकद्रव्येषु शक्तिग्रहासम्भवादिदमयुक्तमिति वाच्यम्। एकमुपलक्षणीकृत्य तत्सम्भवात्। नचैवमप्युलक्षणीभूतदण्डादीनां नानात्वादिदमयुक्तमिति वाच्यम्। तद्वृत्तिजात्याऽनुगमात्। यद्यपि जात्यादिकमपि दण्डत्वकुड्यत्वरूपमनेकमेव, तथापि प्रकृत्यर्थत्वेन तदनुगमान्न दोषः। [अर्धजरतीयमिति] यत्तु पञ्चोलिनः "अर्धं जरत्या अर्ध्जरती सेवेतीवार्थे कन्। तस्य लुका सदृशलक्षणया वा अर्धवृद्धातुल्यन्यायो ऽर्धजरती" ति, तदयुक्तम्। कैयटादिप्रामाणिकग्रन्थविरुद्धत्वात्। धात्वर्थनिर्णये एतन्निष्कर्षः प्रतिपादित एवेत्यलम्।

अर्धजरतीयमेवोपपादयति [तथाहीति] [सम्बन्धानभिधायकत्वेनेति] इदं च दृष्टान्तयोपात्तम्। निरुक्तस्थले सम्बन्धस्य प्रकृतिजन्यबोधे ऽप्रकारतया न तत्र भावप्रत्ययेन सम्बन्धोऽभिधीयते, तद्वदिति भावः। तत्रैव दण्डित्वमित्यत्रापि सम्बन्धस्य प्रकृतिजन्य बोधेऽप्रकारतया त्वप्रत्ययस्य सम्बन्धबोधकत्वानापत्तिरिति तात्पर्यम्। तदेवाह [दण्डित्वमित्यादिष्वपीति] घटत्वं दण्डित्वमित्युभयत्रापि सम्बन्धस्य प्रकृतिजन्यबोधे ऽप्रकारत्वस्याविशिष्टतया एकत्र भावप्रत्ययस्य सम्बन्धानभिधायकत्वं, दण्डित्वमित्यत्र तस्य तदभिधायकत्वमित्यर्धजरतीयमिति भावः। तदभिधानं = सम्बन्धाबिधानम्। [न स्यादिति] त्वया दण्ड्यादिपदानां सम्बन्धान्तर्भावेण शक्त्यस्वीकारात्सम्बन्धस्य प्रकृतिजन्यबोधेऽप्रकारत्वत्ततो भावप्रत्ययेन सम्बन्धाभिधानं न स्यादित्यर्थः। नच त्वप्रत्ययवैयर्थ्यापत्त्या तस्य संसर्गबोधकत्वमिति तदुक्तं युक्तम्। घटत्वमित्यादौ कृप्रकृत्यर्थतावच्छेदकबोधनेन तत्सार्थक्योपपत्तेः। ननु दण्डीत्यादौ संसर्गस्य प्रकृत्यर्थाप्रकारत्वेऽपि "कृत्तद्धितसमासेभ्यः सम्बन्धाभिधानं भावप्रत्ययेन" इति वचनात्तदुत्तरभावप्रत्ययस्य संसर्गबोधकत्वमस्त्वत आह - [प्रकृतिजन्यबोध इति] अयं भावः -

कृत्तद्धितसमासेषु सम्बन्धान्तर्भावेणैकार्थीभावाभ्युपगमात्तत्र च सम्बन्धस्य प्रायेण प्रकृतिप्रत्ययार्थयोः पूर्वोत्तरपदार्थयोश्च प्रकारतया (प्रवृत्तिनिमित्ततया) प्रवेशात् "तस्य भाव" इति सूत्रबलेन तदुत्तरभावप्रत्ययस्य सम्बन्धबोधकत्वमिति तत्सूत्रसिद्धार्थानुवादकमेवेदं "कृत्तद्धित" इत्यादि हरिवचनं, नत्वपूर्वं मुनिवचनम्। अत एव मूले हिशब्दप्रयोगः। स्पष्टं चेदं मनोरमायाम्। अतो न तद्बलेन दण्डित्वमित्यादौ भावप्रत्ययस्य त्वन्मते सम्बन्धवाचकत्वसिद्धिः - इति। क्रमेण दलद्वयसार्थक्यं दर्शयति, [अन्यथेति] एकतरदलमात्रोपादान इत्यर्थः। [द्रव्यत्वादेरिति] प्रथमदलानुपादाने द्रव्यत्वस्यापि घटसमवेतत्वात्तस्यापि घटपदोत्तरत्वादिप्रत्ययार्थतापत्तिरित्यर्थः। प्रथमदलोपादाने तु द्रव्यत्वस्य प्रकृत्यर्थघटेऽप्रकारत्वान्न दोषः। घटपदस्य घटत्वविशिष्टे शक्तिः, नतु द्रव्यत्वविशिष्टे इति भावः। द्वितीयदलोपादानस्य प्रयोजनं दर्शयति - [दण्डित्वमित्यादाविति] [दण्डादेश्चेति] द्वितीयदलानुपादाने दण्डीत्यत्र दण्डस्य प्रकृतिजन्यबोधप्रकारत्वात्तस्यापि तदुत्तरभावप्रत्ययार्थतापत्तिरित्यर्थः। तदुपादाने तु दण्डस्य प्रकृत्यर्थसमवेतत्वाभावान्न दोष इति भावः।

अत्रेदं बोध्यम् - 'प्रकृत्यर्थसमवेत' इति द्वितीयदलोपादानं न वैयाकरणमतेन, तन्मते दण्डीत्यादौ सम्बन्धस्यैव प्रकृतिजन्यबोधप्रकारत्वं न दण्डस्येति प्रथमदलेनैव दण्डस्य तदुत्तरभावप्रत्ययवाच्यत्ववारणसम्भवात्। अत एवैतत्स्थलादन्यत्र तद्दलानुपादानं वैयाकरणानां सङ्गच्छते। अत एव भूषणे भावप्रत्ययस्य समवेतगुणबोधकत्वनिराकरणं सङ्गच्छते। किन्तु मीमांसकमतरीत्या तद्दलोपादानम्। तन्मते इन्यादेः केवलसम्बन्धिवाचकतया तत्र दण्डादेः प्रकारतया भानात्तस्य तदुत्तरभावप्रत्ययार्थत्ववारणाय तदुपादानस्यावश्यकत्वात्। एतेन - वस्तुतस्त्वन्त्यदलोपादानं व्यर्थम्, मतुबादीनां सम्बन्ध्यर्थकतया दण्डीत्यादिवाक्यजन्यबोधे सम्बन्धस्यैव प्रकारत्वेन दण्डादीनां प्रकृत्यर्थेऽप्रकारत्वादेवानतिप्रसङ्गात्। मीमांसकैकदेशिमते मत्वर्थीयानां सम्बन्धवाचकत्वेऽपि तदाक्षिप्ताश्रयविशेष्यकबोधस्यैव तैरभ्युपगमेन तन्मतेऽपि प्रकृतिजन्यबोधविशेष्यांशे दण्डादीनामप्रकारत्वेन प्रयोजनविरहादिति विभावनीयम्" इति वदन्तो दर्पणकाराः, "शाब्दिकमते तु दण्डस्य प्रकारत्वेऽपि प्रकृत्यर्थे पुरुषादौ समवायसम्बन्धेन वृत्तित्वाभावान्न तस्य भावत्वमिति न तत्र प्रत्ययः" इति पञ्चोलिनश्च परास्ताः। किञ्च दर्पणकारा मीमांसकमतमपि न सम्यक् प्रतिपादितवन्तः, तन्मते दण्डीत्यादिपदजन्यबोधे दण्डादीनामेव प्रकारत्वात्। यदाहुर्भट्टपादाः -

गोमत्पदेहि गावो मतुबर्थे विशेषणम् - इति। भावप्रत्ययानां प्रकृत्यर्थसमवेतगुणाभिधायकत्वम् - इति च। किञ्च दर्पणकारोक्तरीत्या सम्बन्धस्यैव प्रकारत्वं न दण्डस्येत्यभ्युपगमे मीमांसकमतेऽपि सम्बन्धस्य प्रत्ययवाच्यत्वसिद्ध्या प्रकृतग्रन्थस्यानुत्थितिरेव प्रसज्येत। "यदा स्वसमवेतोऽत्र वाच्यो नास्ति गुणोऽपरः। तदा गत्यन्तराभावात्सम्बन्धो वाच्य आश्रितः" इति मीमांसकानां प्रयासस्य वैयर्थ्यापत्तिश्च। किञ्च मीमांसकैराश्रयस्यैव मतुबर्थत्वाङ्गीकारेण "तदाक्षिप्ताश्रयविशेष्यकबोधस्यैवाभ्युपगमेन" इत्याश्रयस्याक्षिप्तत्वकथनमपि तन्मतविरुद्धम्। किञ्च मीमांसकैः सम्बन्धिनो वाच्यत्वं सम्बन्धस्याक्षेपलभ्यत्वं चाङ्गीकृतम्। स्पष्टं चेदमरुणाधिकरणवार्त्तिके इत्यलम्।

तन्मते तदनुपपत्तिं विशदयति [न चेति] चो हेत्वर्थः। यतस्तन्मते दण्डीत्यादिजन्यबोधे सम्बन्धो न प्रकारतया भासते, अतो दण्डित्वमित्यादिषु तेन तदभिधानं न स्यादिति भावः।

मत्वर्थीयानां सम्बन्धावाचकत्वेऽपि तदुत्तरभावप्रत्ययस्य सम्बन्धाभिधायकत्वे तदुक्तसमाधिं निरस्यते - [यत्त्विति]। [यदा स्वसमवेतेति] अरुणाधिकरणस्थं वार्त्तिकमिदम्। कारिकायां - यदा = यत्र, स्वसमवेतः = स्वप्रकृत्यर्थसमवेतः अपरो गुणो नास्ति, तदा = तत्र गत्यन्तराभावात्, सम्बन्धो वाच्यः = त्वादिभावप्रत्ययवाच्यः, आश्रित इत्यर्थः। अयमाशयः - प्रकृत्यर्थसमवेत-गुणाभिधायकस्त्वादिभावप्रत्ययः। यथा - घटत्वमित्यत्र प्रकृत्यर्थसमवेतजातिबोधकस्त्वप्रत्ययः। यत्र तु भावप्रत्ययप्रकृत्यर्थसमवेतो गुणो नास्ति, तत्र गत्यन्तराभावान्मत्वर्थीयाक्षिप्तसम्बन्धाभिधीयको भावप्रत्ययो भवति। नहि दण्डीत्यादिजन्यबोधे दण्डः पुरुषसमवेतः - इति। [सम्बन्धिवाचकत्वेनेति] सम्ब्धविशिष्टव्यक्तिवाचकत्वेनेत्यर्थः। तथाच सम्बन्धस्य प्रकृत्यर्थप्रकारतया भानात्तस्य तदुत्तरभावप्रत्ययवाच्यत्वं सेत्स्यति। केवलद्रव्यवाचित्वे सम्बन्धस्य प्रकारतया ऽभानाद्दोष एव। अतो मत्वर्थीयस्य सम्बन्धिवाचित्वेनैव भावप्रत्ययस्य सम्बन्धवाचित्वोपपत्तौ "गत्यन्तराभावात्" इत्ययुक्तमिति भावः। सम्बन्धवाचकत्वेनेति पाठेऽपि तद्विशिष्टवाचकत्वे वेत्यर्थात्प्रकृतार्थलाभो बोध्यः। नन्वस्येति प्रधानषष्ठ्यर्थसम्बन्धे विधीयमानानामिन्यादीनां कथं सम्बन्धिवाचकत्वमत आह [प्रपञ्चितमिति] एतत् = इन्यादेः सम्बन्धिवाचित्वम्। [आदावेवेति] तिङां देवदत्तः पचतीत्यादिसामानाधिकरण्यानुरोधात् कर्तृकर्मवाचित्वमित्यर्थसाधनावसरे धात्वर्थनिर्णये इत्यर्थः। अस्येत्यर्थे इन्यादेर्विधानेऽपि दण्डी पुरुष इत्यादिसामानाधिकरण्यानुरोधात्सम्बन्धिवाचकत्वमिति तत्र प्रपञ्चितम्।

सिद्धान्ते त्वित्यादिमूलवतारयति [नन्विति] तवापि = शाब्दिकस्यापि। इदं वैषम्यम् = क्वचित्सम्बन्धवाचकत्वं, क्वचिज्ज्ञात्यादिवाचकत्वमित्येवं रूपं वैषम्यम्। सिद्धान्ते तु पक्षद्वयं त्वादिष्वित्यर्थभ्रमवारणाय मूलं योजयति [जायन्त इति] वक्ष्यमाणशेषेण = "जायन्ते तज्जन्य" इत्यादि ५२ कारिकाघटकेन जायन्ते इत्यनेन। अन्वितं = सिद्धान्ते तु इत्येतत्। सिद्धान्ते = शाब्दिकसिद्धान्ते। [प्रकार इति] - मुख्यविशेष्यतानिरूपितविषयताश्रय इत्यर्थः। तेन राजपुरुष इत्यादौ राजादेः प्रकारत्वेऽपि न क्षतिः। जायन्ते इत्यादिः योजनेऽत्यन्तो ग्रन्थो बहुषु पुस्तकेषु नोपलभ्यते। इत्यत्र = इत्याकारकजिज्ञासायाम्। [पक्षद्वयमिति] 'तस्य भाव' इति शास्त्रेण भाव इत्यर्थे त्वादयो विधीयन्ते। तत्र प्रकृतिजन्यबोधे प्रकारो भावशब्दार्थः। प्रकारस्वरूपविचारे शास्त्रे पक्षद्वयं दर्शितम्। सम्बन्धो जात्यादिर्वेत्येकः पक्षः, शब्द इति द्वितीयः पक्ष इति। तथाच भावशब्दार्थप्रतिपादने पक्षद्वयमिति पर्यवस्यतीति बोध्यम्।।५०।।

तौ पक्षावाह -

प्रयोगोपाधिमाश्रित्य प्रकृत्यर्थप्रकारताम्।
धर्ममात्रं वाच्यमिति यद्वा शब्दपरादमी।।३।। (५१)
जायन्ते तज्जन्यबोधप्रकारे भावसंज्ञिते।

प्रयोग उपाधिर्निमित्तं प्रकृत्यर्थप्रकारतां प्रकारतया भासमानं धर्मवाच्यतयाऽऽश्रित्य त्वादयो जायन्ते। प्रकृतिजन्यबोधे प्रकारस्त्वाद्यर्थ इति यावत्।

ननु घटत्वमित्यत्र प्रकारत्वात्तदुत्तरत्वप्रत्ययेन घटत्वत्वस्यापि वाच्यता स्यादित्यत्रेष्टापत्तिमाह - धर्म मात्रमिति। न त्वत्र लघुगुरुविचार इत्यभिप्रायः। तत्तद्व्यक्तिविशिष्टब्रह्मसत्ताया एव घटत्वघटत्वत्वादि रूपत्वात्।

सम्बन्धिभेदात्सत्तैव भिद्यमाना गवादिषु।
जातिरित्युच्यते, तस्यां सर्वे शब्दा व्यवस्थिताः।।३३
तां प्रातिपदिकार्थं च धात्वर्थं च प्रचक्षते।
सा नित्या सा महानात्मा तामाहुस्त्वतलादयः।। ३४

इति वाक्यपदीयात्। (जातिसमुद्देशे) उक्तं च "तस्य भावस्त्वतलौ" इति सूत्रे वार्त्तिककारैः - "यस्य गुणस्य भावाद् द्रव्ये शब्दनिवेशस्तदभिधाने त्वतलौ" इति। यस्य गुणस्य विशेषणतया भासमानस्य भावादाश्रयत्वात् द्रव्ये विशेष्ये शब्दनिवेशः शब्दप्रवृत्तिस्तस्मिन्वाच्ये त्वतलावित्यर्थः। तथा च रूपादिशब्देभ्यो जातौ, शुक्लाणुदीर्घमहदादिभ्यो गुणे, पाचकादिशब्देभ्यः क्रियायाम्, घटादिशब्देभ्यो जातौ प्रत्ययः, रूपादिशब्दानां जातिप्रकारकबोधजनकत्वात्। पाचकादिशब्दानां क्रियाप्रकारकबोधजनकत्वे तस्यां प्रत्ययः, संसर्गप्रकारकबोधजनकत्वमिति मते च संसर्ग इति व्यवस्था सूपपादेति भावः। तत्र जातिवाचकानां व्यक्तय एव शक्यतावच्छेदिकाः। तथा च घटत्वमित्यत्र घटवृत्तिरसाधारणो धर्म इति बोध इत्यादि द्रष्टव्यम्।

तदेव पक्षद्वयं दर्शयितुमुपक्रमते [तौ पक्षाविति] "भावे चाकर्मकेभ्यः" इत्यादौ भावपदार्थस्यान्यादृशस्य प्रसिद्धेः "तस्य भावः" इति सूत्रे भावशब्दार्थमाह मूले [प्रकृत्यर्थप्रकारतामिति] भवति = अर्थबोधनाय प्रवर्तते अनेनेति भाव इति करणघञन्तो भावशब्द इति भावः। प्रयोगे = प्रयोगे कर्तव्ये शब्दप्रवृत्ताविवत्यर्थः। उपाधिशब्दार्थमाह [निमित्तमिति] कारणमित्यर्थः। "प्रकृत्यर्थप्रकारताम्" इत्यस्य 'आपन्नम्' इति शेष इत्याशयेनाह [प्रकारतया भासमानमिति] तथाच प्रकृत्यर्थे प्रकारतामापन्नं प्रयोगोपाधिं = शब्दप्रवृत्तिनिमित्तं धर्ममात्रं वाच्यमाश्रित्य वाच्यत्वेनाश्रित्य त्वादयो जायन्त इति मूलार्थः। इतिशब्दः प्रथमपक्षसमाप्त्यर्थकः। फलितार्थ माह [प्रकृतिजन्यबोधे प्रकार इति] -

'धर्ममात्रम्' इत्यत्र मात्रपदस्य प्रयोजनं दर्शयितुमुपक्रमते [नन्विति] घटत्वमित्यत्र = घटत्वमिति शब्दजन्यबोधे। प्रकारत्वात् = घटत्वत्वस्य प्रकारतया भानात्। तदुत्तरत्वप्रत्ययेन = घटत्वपदोत्तरभावप्रत्ययेन। [वाच्यता स्यादिति] घटेतरावृत्तित्वे सति निखिलघटसमवेतत्वरूपस्य घटत्वत्वस्य वाच्यत्वे गौरवमिति प्रश्नाशयः। तस्य तद्रूपत्वं नैयायिकैरङ्गीकृतं, नास्माभिरित्याशयेन तस्य वाच्यत्वे इष्टापत्तिरेवेत्याह [अत्रेष्टापत्तिमाहेति] अत्र = घटत्वत्वस्य वाच्यत्वे। [धर्ममात्रमिति] मात्रशब्दः कृत्स्नार्थकः। न त्वन्यव्यावृत्त्यर्थकः। घटत्वरूपो घटत्वत्वरूपो वा यावान् धर्मः स सर्वोऽपि भावप्रत्ययवाच्य इत्यर्थः। तदाह [न त्विति] [लघ्विति] घटत्वरूपो धर्मो लघुः, घटत्वत्वरूपो धर्मस्तु गुरुरिति विचारो न कर्तव्य इत्यर्थः। [इत्यभिप्राय इति] इत्येव ग्रन्थकर्तुराशय इत्यर्थः। एतेन

"धर्मत्वेनैव शक्यं भावप्रत्ययस्य, न तु तत्तद्रूपेण। अन्यथा नानार्थतापत्तेः। इदमेव मात्रग्रहणस्य फलम्" इति केषाञ्चिद्व्याख्यानमपास्तम्। स्पष्टं चेदं भूषणे। एवं च "धर्ममात्रमिति - धर्मत्वेन वाच्यता नतु तत्तद्रूपेण" इति काशिकाव्याख्या च प्रकृतग्रन्थकृदाशयाननुगुणैवेति बोध्यम्। तत्र हेतुमाह [तत्त"क्तीति] असत्या या व्यक्तयस्तद्विशिष्टब्रह्मसत्तारूपा एव घटघटत्वादयो, नतु त"तिरिक्ताः। अतो न लाघवविचारस्यावसर इत भावः। अयमर्थः - अविद्यावृत्तिरूपस्य सर्वपदार्थेष्वागमापायिनोऽसत्यत्वाद्व्यक्तिरिति व्यवहारः। तदेव हि सत्यं, यस्मिंस्तत्त्वं न विहन्यते। इत्यन्वयिरूपं भेदप्रत्ययेष्वबाध्यमानं सत्यं जातिरित्यद्वैतवेदान्तिनोऽभ्युपयन्ति। तद्रीत्या घटादीनामनित्यत्वम्। तदुपाधिकघटत्वघटत्वत्वादीनां नित्यत्वेन ब्रह्मसत्तारूपत्वम् - इति। स्वोक्तार्थे वाक्यपदीयमुपष्टम्भयति [सम्बन्धिभेदादिति] गवादिषु = गवाश्वादिषु सर्वपदार्थेषु अनुस्यूता सत्तैव = परब्रह्मस्वभावा महासत्तारूपा जातिरेव सम्बन्धिभेदात् = गवादीनामाश्रयाणां भेदात्, भिद्यमाना = उपचरितभेदा सती जातिरिति = गोत्वमश्वत्वमित्यादिकाऽपरजातिरपसामान्यमिति उच्यते = शास्त्रज्ञैरभिधीयते, नान्या परमार्थभिन्नापरजातिर्विद्यते। यथा - गोः सत्ता गोत्वम्, नापरमन्वयि तत्र भासते, तथा अश्वस्य सत्ता अश्वत्वमिति। तस्याम् = गवादिभेदभिन्नायां सत्ताख्यायां जातावेव। सर्वे शब्दाः = गवादयो डित्थादय आकाशादयश्च सर्वे शब्दाः, व्यवस्थिताः = वाचकत्वेन व्यवस्थिताः असाङ्कर्येण नियतोपाधिवशाज्ज्ञात्यभिधायिनः सिद्धा इति प्रथमकारिकार्थः।

सत्तायाः सर्वशब्दविषयत्वाभिव्यञ्जिकां प्रकृतार्थोपष्टम्भिकामनन्तरकारिकां दर्शयति [तामिति] प्रचक्षते = शास्त्रविदः। सर्वेष्वपि भावेषु सद्रूपं सामान्यमनुगतमेव। अभावोऽपि बुद्ध्याकारेण निरूप्यते। अनया महासत्तयाऽवियोगात् प्रातिपदिकधातुभेदेन द्विविधाः शब्दाः। तत्र प्रातिपदिकमात्रवाच्या सत्ता। अत एव "प्रातिपदिकार्थः सत्ता" इति वृद्धाः। साधनाधीनलब्धजन्मसु क्रियाव्यक्तिषु समवेता यथोपाध्युपगृहीतनानात्वा सत्तैव धातुभिरप्यभिधीयते। तदुत्तरप्रत्ययेनापि यथायथं सङ्ख्याकारकाद्युपाधिविशिष्टा सत्तैवाभिधीयते। एवं सर्वशब्दविषयत्वं सत्ताया अवगन्तव्यम्। सा = सत्ता, नित्या = उदयव्ययरहितत्वान्नित्या। सा, महान् = बुद्धितत्त्वम्। यत्कापिले सांख्ये बुद्धितत्त्वं महच्छब्दवाच्यमाद्यं जगत्कारणं निर्दिष्टं, तदपि सैव। तस्यानन्तरविकारग्रामस्य कारणानुगमात्सत्तारूपत्वमविरुद्धमित्येवं सत्तारूपं जगदाख्यं भवतीति सत्ताद्वैतवादः सांख्येनाप्युपबृंहितः। ताम् = एवं सर्वशब्दवाच्यां शब्दप्रवृत्तिनिमित्तभूतां सत्ताम्, त्वत्लादयो वदन्ति। नन्वेवं गोत्वमित्यादौ

प्रकृतिप्रत्ययोरेकार्थतापत्तिरिति चेन्न, क्रियाविभेदेन सत्ताया भेदात्, प्रातिपदिकेन गवाश्रया सा सत्ताऽभिधीयते, प्रत्ययेन तु निष्कृष्टाश्रयस्य सामान्यस्याभिधानम्। प्रकृत्यर्थनिमित्तकश्च भावप्रत्ययभेद इति द्वितीयकारिकार्थः। वाक्यपदीयात् = जातिसमुद्देशे स्थितात्।

अस्मिन् प्रथमक्षे ऋषिसम्मतिं दर्शयति [उक्तं चेति] सूत्रस्थभावशब्दार्थविवरणपरं वार्त्तिकमाह - [यस्य गुणस्येति] वार्त्तिके यस्य भावादित्येतावन्मात्रोक्तौ पुत्रस्य भावात्पितरि पितृशब्दप्रवृत्तेः पितृत्वमिति पुत्ररूपार्थे प्रत्ययापत्तिः, एवं पुत्रत्वमिति त्वप्रत्ययः पित्रर्थे स्यात्। अतो गुणग्रहणम्। ननु घटत्वमित्यत्र त्वस्यानापत्तिः, घटत्वस्यागुणत्वादतो गुणशब्दार्थमाह [विशेषणतया भासमानस्येति] नतु नैयायिकादिसम्मतस्यैव गुणस्य ग्रहणमिति भावः। उक्तं च कैयटेन - "गुणशब्देन यावान् कश्चित्पराश्रयो भेदको जात्यादिः स सर्व इह गृह्यते" इति। आश्रयत्वात् = विद्यमानत्वात्। अस्य बुद्धावित्यादिः। नैयायिकाद्यभिमतद्रव्यग्रहणे रूपादिशब्देभ्यो भावप्रत्ययानापत्तिरतो द्रव्यपदं व्याचष्टे [विशेष्ये इति] सत्त्वभावापन्न इत्यपि बोध्यम्। तेन पचतिकल्पं पचतिरूपमित्यादौ क्रियाया विशेष्यत्वेपि न ततो भावप्रत्ययः। इत्यर्थः = इति वार्त्तिकार्थः।

तत्र तत्र शब्दप्रवृत्तिनिमित्तानि स्पष्टप्रतिपत्तये दर्शयति [तथा चेति] [रूपादिशब्देभ्य इति] गुणमात्रवृत्तिभ्यस्तेभ्यो गुणवृत्तिजातावेव प्रत्यय इत्यर्थः। [शुक्लाणुदीर्घेति] अत्रायं विवेकः - शुक्लादयो यदाऽभेदोपचारादिना गुणिपरास्तदा तेभ्यो गुणे प्रत्ययः। यदा गुणपरास्तदा गुणगतजातावेव प्रत्ययः। सर्वदा परिमाणमात्रबोधकेभ्योऽणुमहद्दीर्घादिशब्देभ्यस्तु गुण एव प्रत्ययः - इति। [क्रियायामिति] पाचकादिशब्दानां क्रियाप्रकारकबोधजनकत्वादिति भावः। पाचकादिशब्दे विशेषमाह [पाचकादीति]। [क्रियाप्रकारकेति] पाचक इत्यादौ न समुदाये शक्तिः। धात्यर्थः क्रिया। आश्रयः प्रत्ययार्थः। तत्र प्रकृत्यर्थस्य प्रकारत्वमिति स्वीकर्तृणां व्यपेक्षावादिनां मते पाचकादिपदानां क्रियाप्रकारकबोधजनकत्वादिति भावः। तस्यां = क्रियायाम्। प्रत्ययः = यथा निरुक्ते उदाहरणे। 'बोधजनकत्वे' इत्यनेन सूचितामरुचिं प्रकटयन्नाह [संसर्गेति] वृत्तिमात्रे समुदायशक्तिः स्वीकार्येत्युक्तं प्राक्। पाचक इत्यादौ सम्बन्धान्तर्भावेण समदायशक्तिस्वीकारात् संसर्गस्यैव पाचकशब्दजन्यबोधे प्रकारत्वात्तत्रैव भावप्रत्यय इति भावः। मते = वैयाकरणानां सिद्धान्तमते। संसर्गे = क्रियाकारकभावरूपे।

घटत्वपदजन्यबोधे घटत्वत्वस्य प्रकारतया भानाद् घटत्वपदोत्तरं तत्रैव भावप्रत्ययः। तच्च घटत्वत्वं न परमतरीत्या घटेतरावृत्तित्वे सति निखिलघटसमवेतत्वरूपं, गौरवात्। वैयाकरणमते

तस्य तत्रासम्भवाच्च। किन्तु अविद्या, आविद्यको धर्मविशेषः। ब्रह्मसत्तैव जातिरिति स्वीक्रियते। अतस्तदखण्डमेवेति प्राक् प्रतिपादितम्। यद्वा घटत्वपदाद् घटवृत्तिघटत्वमिति घटप्रकारकबोधोदयेन तदुत्तरत्वप्रत्ययस्य घटव्यक्तिबोधकत्वमिति मतान्तरमाह [तत्रेति] जात्यादिवाचकभावप्रत्ययमध्ये इत्यर्थः। [जातिवाचकानामिति] घटत्वादिपदजन्यबोधे तासामेव प्रकारतया भानादिति भावः। [अवच्छेदिका इति] अनुल्लिख्यमानजात्यखण्डोपाध्यतिरिक्तधर्माणां स्वरूपतोऽभानादत्रावच्छेदकापेक्षेति बोध्यम्। एवं प्रत्ययार्थं निरूप्य बोधप्रकारमाह [तथाचेति] निरुक्तार्थस्वीकारे चेत्यर्थः। धर्मस्य तत्तद्रूपेण वाच्यत्वप्रतिपादनादाह [असाधारणे धर्म इति] गोरवात्तत्तद्रूपेण न वाच्यत्वं, किन्तु सामान्यरूपेणेत्यर्थमङ्गीकृत्य "असाधारणो धर्म" इति ग्रन्थसमन्वयार्थं क्लिश्नन्तः काशिकाकारादय उपेक्ष्या एव। एवंच घटत्वमित्यादौ घटत्वादिजातिः प्रत्ययेनाभिधीयते, घटत्ववत्वमित्यत्र घटत्ववत्वं घटव्यक्तिर्वा प्रत्ययेनाभिधीयते इति प्रथमपक्षाशय इति बोध्यम्।

पक्षान्तरमाह - यद्वेति। "यद्वा सर्वे भावाः स्वेनार्थेन भवन्ति स तेषां भावः" इति वार्त्तिकोक्तो यद्वा शब्दस्तत्सूचनप्रयोजनकोऽपि। भवन्ति वाचकत्वेन प्रवर्तन्त इति भावाः शब्दाः। स्वेन स्वरूपेणार्थेन भवन्ति प्रवर्तन्तेऽतः स तेषां भावः प्रवृत्तिनिमित्तमित्यर्थः। अयं भावः - अर्थवच्छब्दोऽपि द्रव्ये प्रकारः हरिहरनलेक्ष्वाकु-युधिष्ठिरवसिष्ठादिशब्देभ्यस्तत्तद्वाच्यः कश्चिदासीदिति शब्दप्रकारकबोधस्य सर्वसिद्धत्वात्। अन्यथा वनौषधिवर्गादेर्नागरकान्प्रत्यबोधकत्वापत्तेश्च। एवमेवाप्रसिद्धार्थकपदेष्वनुभवः सर्वसिद्धः, न तु घटादिपदेष्विव तत्तज्जात्यादिरूपेण। तथा चोभयमवच्छेदकम्। यस्य तथाशक्तिग्रहस्तस्य जात्यादिरूपेणैवोपस्थितिः। पदप्रकारकः शक्तिग्रहस्तु विशिष्य नापेक्षितः किन्तु इदं पदं क्वचिच्छक्तं साधुपदत्वादित्यादिरूप एवापेक्ष्यत इति विशिष्यागृहीतशक्तिकेभ्यस्तथैव बोधः। तथा च शब्दोऽपि त्वप्रत्ययार्थ इति प्रपञ्चितं भूषणे।।३ १/२।।(५१ १/२)

इति कौण्डभट्टविरचिते वैयाकरणभूषणसारे

भावप्रत्ययार्थनिर्णयः समाप्तः।।

प्रकृतिजन्यबोधे प्रकारो जात्यादिरिति प्रथमपक्षमुक्त्वा तद्बोधप्रकारः शब्द इति स एव त्वादिप्रत्ययार्थ इति द्वितीयपक्षमाह मूले [यद्वा शब्दपरादमी इति] शब्दपरात्प्रातिपदिकादित्यर्थः।

शब्दपरा अमी इति पाठे अमी = प्रत्ययाः, शब्दपराः = शब्दरूपार्थबोधका इत्यर्थो बोध्यः। "यद्वा सर्वे भावाः स्वेन भावेन भवन्ति स तेषां भावः" इति वार्त्तिके द्वितीयो भावशब्दोऽर्थपर इत्याशयेन वार्त्तिकमर्थतो दर्शयति [स्वेनार्थेन भवन्तीति]। [तत्सूचनप्रयोजनकोऽपीति] तस्य = वार्त्तिकस्य सूचनं प्रयोजनं यस्य सः। नायमर्थः स्वक्पोलकल्पितः, किन्तु वार्त्तिककृदुक्त एवेत्यनेन सूचयतीत्यर्थः। अपिना पक्षान्तरत्वसूचनफलकत्वमपीति भावः। वार्त्तिकस्थं प्रथमभावशब्दं व्याचष्टे [भवन्ति वाचकत्वेनेति] "भवतेश्चेति वक्तव्यम्" इति कर्तरि णप्रत्यय इति भावः। वार्त्तिके तृतीयो भावशब्दः करणघञन्तः। प्रवृत्तिनिमित्तमिति तस्यार्थ इति बोध्यम्। अत्र कैयटः - "प्रथमकल्पे गवादयः शब्दा जात्यादिविशिष्टार्थप्रतिपादकाः। तेभ्यः शक्यतावच्छेदके गोत्वादौ भावप्रत्ययः। द्वितीयकल्पे गवादयः शब्दाः शब्दपराः। तेभ्यो जात्यादावेव प्रत्ययः। गोत्वं गोशब्दसम्बन्धी धर्मः गोशब्दप्रवृत्तिनिमित्तमिति बोध्यः। वार्त्तिकस्थः स्वशब्द आत्मीयार्थकः। शब्दस्य वाच्यो योऽर्थो जात्यादिः, तेनार्थेन प्रवर्तन्त इत्यर्थः। अर्थस्य प्रयोगे करणत्वविवक्षया ततस्तृतीया - इत्यभिप्रैति। तदयुक्तमिति ध्वनयन्नाह [स्वेन रूपेणेति] तथा च वार्त्तिके स्वशब्द आत्मार्थको न त्वात्मीयार्थकः। कैयटोक्तं तु न युक्तम्। सूत्रस्थभावशब्दार्थनिरूपणाय वार्त्तिकप्रवृत्त्या तत्प्रदर्शिते पक्षद्वयेऽपि शक्यतावच्छेदकस्यैव भावप्रत्ययार्थत्वे पक्षद्वयैक्यात्तदसङ्गत्यापत्तेः। अस्मन्मते तु पूर्वपक्षे जात्यादिस्त्वाद्यर्थः, द्वितीयमते शब्दस्त्वाद्यर्थ इति पक्षभेद उपपद्यते। अत एव "तस्य भावः" इति सूत्रे मनोरमायाम् "इह गोशब्दोऽर्थपरः स्वरूपपरो वेति पक्षद्वयम्। आद्ये धर्मविशेषः प्रत्ययार्थः। द्वितीये तु जन्यबोधप्रकारः प्रत्ययार्थः" इति पक्षद्वयमुपन्यस्तम्। वृद्धिसंज्ञासूत्रे कौस्तुभेऽपि स्पष्टमेतत्। तदेतत्सर्वमभिप्रेत्याह - अयं भाव इत्यादिना अर्थवत् = अर्थ इव। शब्दोऽपीत्यपिना जात्यादेर्ग्रहणम्।

अत्रेदं बोध्यम् - द्रव्ये शब्दो जात्यादिरर्थश्चेत्युभयमपि प्रकारः। तत्र च घटादिपदेभ्यस्तत्तज्जात्यादिरूपेण शक्यतावच्छेदकानां भानम्। संज्ञाशब्देषु तु जातिविशेषस्य शब्दस्य चावच्छेदकत्वेऽपि तत्तज्जात्याश्रयत्वादिना भानायोगात् शब्दस्यैव प्रकारत्वम्। संज्ञाब्देष्वपि उभयस्यावच्छेदकत्वं नापह्नूयते। अत एव इक्ष्वाकादिपदेषु तत्तत्पिण्डदर्शनाच्छक्तिग्रहशालिनां तत्तज्जात्यादिप्रकारक एव बोधः। तद्रहितानामस्मदादीनां तु न सः। शब्दस्यावच्छेदकत्वादेव 'विष्णुर्नारायणः कृष्णः" इत्यादौ सामानाधिकरण्यमुपपद्यते। अन्यथा घटो घट इत्यत्रेव तन्न स्यात्। परन्त्वत्र पक्षे शब्द एव भावप्रत्ययार्थः। गवादिपदेभ्योऽप्यत्र पक्षे शब्दस्वरूपे भावप्रत्ययः। अत एवात्र पक्षे

गोत्वमित्युदाहृतं मनोरमायाम्। उक्तञ्च भूषणेऽपि "तस्मात्संज्ञाशब्देष्विव शब्द एवावच्छेदकस्त्वप्रत्ययेन कुत्वमित्यत्रेवाभिधीयते" इति। अत एव वार्त्तिके "सर्वे भावाः" इति सर्वपदोपादानं सङ्गच्छते। एवं च 'अनुभवाभावात्संज्ञाशब्देभ्य एव शब्दरूपेऽर्थे भाव प्रत्ययो नान्यत्रेति दर्पणकारादीनामुक्तिरयुक्तैव-इति दिक्।

शब्दस्य प्रकारतया भानेऽसाधारणस्थलमाह [हरिहरेति]। [अन्यथेति] अर्थांशे शब्दस्य प्रकारत्वानभ्युपगम इत्यर्थः। [नागरकान् प्रतीति] ग्रामीणादीनां तु तत्तद्रूपेण तत्तद्वृक्षपरिसंज्ञानसम्भवादेवमुक्तम्। एवमेव = नलादिपदेष्विव। अनुभवः = शब्दस्यार्थांशे प्रकारतया भानानुभवः। [तत्तज्जात्यादिरूपेणेति] घटादिपदेष्विव तत्तज्जात्यादिरूपेणानुभवो न सर्वसिद्ध इत्यर्थः। अत्रापि 'अनुभवः सिद्धः' इत्यनुषज्यते। अत्र न सर्वसिद्ध इत्यनेन इक्ष्वाकादिपदेषु तत्तत्पिण्डदर्शनाच्छक्तिग्रहशालिनां तत्तज्जात्यादिरूपेण बोध उदेत्येवेति गम्यते। [तथा चेति] शब्दस्यार्थे प्रकारत्वोपपादने चेत्यर्थः। उभयम् = जात्यादिरूपं शब्दस्वरूपं चेत्युभयम्। यस्य = पुरुषस्य। तथा शक्तिग्रहः = जात्यादिवैशिष्ट्येन शक्तिग्रहः। नलादौ तत्तत्पिण्ड दर्शनाज्जात्यादिरूपेण शक्तिग्रहो जात इति भावः। उपस्थितिः = नलादिपदेभ्यो ज्ञानम्। ननु नलादिपदात्पिण्डदर्शनाभावदशायां पदप्रकारकशक्तिग्रह एव वाच्यः, स च न सम्भवति। तत्तत्पदस्य तत्तदर्थे सम्बन्धग्रहायोगादत आह [पदप्रकारकस्त्विति] विशिष्य = तत्तज्जात्यादिना रूपेण। नापेक्षितः = असम्भवात्। इत्यादिरूप एव = इत्यादिसामान्यरूप एव। विशिष्यागृहीतशक्तिकेभ्यः = तत्तन्नलादौ तत्तत्पिण्डदर्शनाभावाज्जात्यादिनाऽगृहीतशक्तिकेभ्यः। तथैव = पदप्रकारत्वेनैव। तथाच = द्वितीयपक्षाश्रयणे च। [प्रपञ्चितं भूषणे इति] तत्प्रपञ्चश्च "अत्रेदं बोध्यम्" इत्यादिनोक्तप्राय एव। एवं च पक्षद्वयेऽपि तज्जन्यबोधप्रकारे तैः = त्वादिप्रकृतिभूतैश्शब्दैः, जन्यो यो बोधस्तत्र यः प्रकारस्तत्र त्वादयो जायन्ते। कीदृशे प्रकारे भावसंज्ञिते = "तस्य भावः" इति सूत्रे शब्दस्य प्रवृत्तिनिमित्तं भावः। भावशब्दः करणघञन्त इति मूलग्रन्थार्थो बोध्यः।।५१ १/२।।

इति वैयाकरणभूषणसारतत्त्वदर्शिन्यां

भावप्रत्ययार्थनिर्णयः।।९।।

अथ देवतादिप्रत्ययार्थनिर्णयः

साऽस्य देवतेत्यत्र देवताविशिष्टं देयं प्रत्ययार्थः। ऐन्द्रं वैश्वदेवीत्यादाविन्द्रादेर्देवतात्वोपस्थापकान्तराभावात्तेन रूपेणोपस्थितये शक्तिकल्पनावश्यकत्वात्। अत एव -

आमिक्षां देवतायुक्तां वदत्येवैष तद्धितः।
आमिक्षापदसानिध्यात्तस्यैव विषयार्पणम्।। इति,
केवलाद्देवतावाची तद्धितोऽग्रेः समुच्चरन्।
नान्ययुक्तोग्निदैवत्यं प्रतिपादयितुं क्षमः।।

इति च मीमांसकैरप्युक्तमित्याशयेनाऽऽह -

प्रत्ययार्थस्यैकदेशे प्रकृत्यर्थो विशेषणम्। (५२)
अभेदश्चात्र संसर्ग आग्नेयादाविवं स्थितिः।।१।।
देवतायां प्रदेये च खण्डशः शक्तिरस्तु वा।। (५३)

एकदेशे देवतारूपे। तच्च विशेषणमभेदेनेत्याह - अभेदश्चेति। ननु देवतायाः प्रत्ययार्थैकदेशत्वान्न प्रकृत्यर्थस्य तत्राभेदेनाप्यन्वय इत्याशयेनाऽऽह - देवतायामिति। तथा च पदार्थैकदेशतैव नास्तीति भावः।। १ १/२।।

अथ देवताप्रत्ययार्थनिर्णयः

[देवताविशिष्टमिति] वैशिष्ट्यं च स्वस्वामिभावसम्बन्धेन स्वोद्देश्यकत्यागकर्मत्वसम्बन्धेन वा। [देयं प्रत्ययार्थ इति] "साऽस्य देवता" इत्यनेन प्रथमान्ताद् अस्य देवतेत्यर्थेऽण् विधीयते। अत्र यद्यप्यस्येत्यत्र प्रत्ययार्थत्वात्सम्बन्धस्य प्राधान्यात्तत्रैव प्रत्ययविधानमिति लभ्यते, तथापि ऐन्द्रं हविरिति सामानाधिकरण्यानुरोधाद् द्रव्यवाचित्वमास्थीयत इति भावः। ननु ऐन्द्रं हविरित्यादौ देवताया इन्द्रादिप्रकृत्यैव लाभात् पुनस्तदर्थान्तर्भावेण तद्धितस्य शक्तिस्वीकारो निरर्थक इत्यत आह [ऐन्द्री वैश्वदेवीत्यादाविति] [देवतात्वोपस्थापकेति] इन्द्रादिपदादिन्द्रत्वेन रूपेण देवताया उपस्थानेऽपि देवतात्वेन रूपेण देवताया उपस्थापकपदान्तराभावादित्यर्थः। तेन रूपेण = देवतात्वेन रूपेण। उक्तार्थे परेषां सम्मतिमाह [अत एवेति] प्रत्ययस्य देवताविशिष्टद्रव्यवाचकत्वादेवेत्यर्थः। [आमिक्षामिति] एषः = विश्वदेवपदोत्तरं श्रूयमाणः, तद्धितः = "सास्य देवता" इति विहितोऽण् प्रत्ययः। देवतायुक्तां = विश्वदेवदेवताकाम् आमिक्षां = "त"ौ पयसि दध्यानयति सा वैश्वदेव्यामिक्षा" इति लक्षणलक्षितामामिक्षाम्। वदति =

बोधयति। ननु विश्वदेवपदोत्तरश्रूयमाणतद्धितप्रत्ययेन विश्वदेवदेवताकत्वमेव प्रतिपाद्यते, नत्वामिक्षायास्तथात्वम्। तत्कथं तद्धित आमिक्षां देवतायुक्तां वदतीत्युच्यत इत्यत आह [आमिक्षापदेति] आमिक्षापदस्य सन्निहितत्वादित्यर्थः। तस्यैव = आमिक्षापदस्यैव। विषयार्पणं = विषयसमर्पकत्वम्, स्वार्थस्यामिक्षारूपस्य विश्वदेवदेवताकत्वप्रतिपत्तिविषयतासमर्पकत्वमित्याशयः।

केवलात् = सोमादिपदासमभिव्याहृतात्, अग्नेः = अग्निशब्दात् समुच्चरन् = परत्वेनोच्चार्यमाणो देवतावाचकस्तद्धितः "आग्नेयोष्टाकपालो भवत्यमावास्यायाम्" इत्यादौ। अन्ययुक्ताग्निदैवत्यं बोधयितुं न क्षम इत्याशयः। उक्तम् = आमिक्षाधिकरणे। "देवतायां प्रदेये च" इति मूलमवतारयति [नन्विति]। विशिष्ट एकशक्तिस्वीकारे इत्यर्थः। [एकदेशत्वादिति] "पदार्थः पदार्थेनान्वेति, नतु पदार्थैकदेशेन" इति न्यायादिति भावः।।५२-५३।

नन्वग्न्यादिदेवस्य प्रकृत्यैव लाभान्न तत्र शक्तिः कल्प्या। न च देवतात्वेन रूपेणोपस्थितये सा कल्प्यते प्रकृतेर्लक्षणयैव तथोपस्थितिसम्भवात्। उपसर्गाणां द्योतकत्वनये प्रजयतीत्यत्र प्रकृष्टजयप्रत्ययवदित्यभिप्रेत्याऽऽह -

प्रदेय एव वा शक्तिः प्रकृतेर्वाऽस्तु लक्षणा।।२।।
देवतायां तिरूढेति सर्वे पक्षा अमी स्थिताः। (५४)

न चैन्द्रं दधीत्यादौ द्रव्यस्य पदान्तराल्लाभात्कुतः पुनः प्रत्ययस्य तत्र शक्तिः कल्प्यत इति वाच्यम्। पदान्तराश्रवणेऽपि तत्प्रतीतेरैन्द्रं दधीति सामानाधिकरण्याच्च। अन्यथाऽऽख्यातस्यापि कर्तृकर्मवाचित्वं न स्यात्। मीमांसकानां पुनः प्रत्ययस्य देवतात्वमेवार्थोऽस्तु। द्रव्यं पदान्तराल्लभ्यत एवेत्याख्यातस्य कर्तृवद्वाच्यत्वं माऽस्त्विति कुतो न शक्यते वक्तुमिति दिक्। देवतायां देवतात्वरूपेण। निरूढेति। अनुपपत्तिज्ञानापूर्वकत्वमनादिप्रयोगावच्छिन्नत्वं वा तत्त्वमिमि भावः।।२ १/२।।

तत्र = देवतायाम्। उपसर्गाणां वाचकतानये दृष्टान्तत्वासम्भवादाह [द्योतकत्वनय इति] प्रत्ययवत् = प्रतीतिवत्। तत्प्रतीतेः = द्रव्यप्रतीतेः। ननु प्रत्ययस्य प्रदेयमात्रे प्रदेयत्वेन रूपेण शक्तिस्वीकारे विना विशेषं सामान्यापर्यवसानात् नियमेन विशेषबोधकपदान्तरसत्ताया आवश्यकतया "पदान्तराश्रवणेऽपि" इत्यसङ्गतमत आह [ऐन्द्रं दधीति] अन्यथा = सामानाधिकरण्यानुरोधेन प्रदेये शक्त्यनभ्युपगमे। वैयाकरणमतेनाह [कर्तृकर्मेति] पचति देवदत्त इति सामानाधिकरण्यानुरोधात्

कर्त्रादिवाचित्वं तिङां वैयाकरणैराश्रीयते। मीमांसकानां पुनः = मीमांसकानां मते तु। [आख्यातस्य कर्तृवदिति] आख्यातस्य न कर्तृवाचकत्वं यथा, तथाऽत्रापि द्रव्यवाचित्वं मास्त्वित्यर्थः। आख्यातस्य न कर्ता वाच्यः, आक्षेपादिना तत्प्रतीतिसम्भवादित्यङ्गीक्रियते। तथात्रापि - पदान्तराद् द्रव्यप्रतीतिसम्भवात्तद्धितस्य द्रव्यवाचित्वं मास्त्विति तात्पर्यम्। नचेष्टापत्तिः। "आमिक्षां देवता युक्ताम्" इति सिद्धान्तभङ्गापत्तेः।

वस्तुतस्तु अत्रत्यं मूल मामिक्षाधिकरणस्थन्यायसुधानुरोधेन। चतुर्थ्यादौ प्रकृत्यर्थस्य प्रकृत्यैव लब्धस्य चतुर्थ्योद्देश्यत्वमात्रं यथा उच्यते, तथा तद्धितेऽपि देवतात्वं प्रकृत्यर्थः प्रदेयमात्रं प्रत्ययार्थः। तत्र च निरूपकतासम्बन्धेन देवतात्वस्यान्वयः। अग्निवृत्तिदेवतात्वनिरूपकमिति बोधः। ननु प्रत्ययस्य देवतानभिधायकत्वे "तद्धितेन चतुर्थ्या वा मन्त्रवर्णेन वा पुनः। देवताया विधिस्तत्र दुर्बलं तु परं परम्" इति मीमांसकनिरूपितप्रबलदुर्बलभावासङ्गतिरिति चेन्न। चतुर्थ्या वाक्याद्देवतात्वसम्बन्धलाभः, तद्धिते समानाभिधानश्रुत्येति श्रुतिलिङ्गाधिकरणन्यायमूलकत्वात्तस्य। तथाहि - देवतात्वस्य सम्बन्धिद्वयसापेक्षत्वेन चतुर्थ्या एकस्य सम्बन्धिनः प्रकृत्या लाभेऽपि द्वितीयसम्बन्धिनः पृथक् पदोपात्तत्वेन वाक्याद्देवतात्वलाभः। तद्धिते तु सम्बन्धिद्वयस्याप्येकपदोपस्थाप्यत्वाच्छ्रुत्या देवतात्वलाभः। वाक्याच्छ्रुतेः प्रबलतया चतुर्थ्यपेक्षया तद्धितेन देवतावगतिः शीघ्रतरेति। एवं च "तद्धितस्य देवतानभिधायकत्वे 'तद्धितेन चतुर्थ्या वा" इति मीमांसकसिद्धान्तासङ्गतिः। अतस्तदन्तर्भावेण शक्तिकल्पनमेव युक्तम्" इति दर्पणोक्तमनादेयमेव।

[देवतायां निरूढेति] यत्तु "माणवकादिसंकेतितेभ्योऽग्न्यादिभ्यः प्रत्ययोत्पत्तिवारणाय मूले निरूढेत्युपात्तम्" इति केचिद्व्याचख्युः। तन्न। तादृशाग्न्यादिशब्देभ्यः "अभिव्यक्तपदार्था ये" इति न्यायेनैव तदुत्पत्तिवारणसम्भवात्। युक्तं चैतत्। पुराणप्रसिद्धैर्निरूढार्थकैः शास्त्रस्य निराकाङ्क्षाकरणेनाऽऽधुनिकेष्वप्रवृत्तेः। अत एव क्षत्रियादिभिः स्वपुत्रस्य ब्राह्मण इति नाम्नि कृतेऽपि तद्धननं "न ब्राह्मणं हन्यात्" इति वाक्यविषयो न भवति। स्पष्टं चेदं भूषणे। [तत्त्वमिति] निरूढलक्षणात्वमित्यर्थः। "यया कथायां वादिनो न निग्रहः सा निरूढलक्षणा" इत्याख्यातवाद-शिरोमणिरहस्ये मथुरानाथः।।५४।।

अनयैव रीत्याऽन्यत्राप्यवधेयमित्याह -

क्रीडायां णस्तदस्यास्तीत्यादावेषैव दिक् स्मृता।।३।।
वस्तुतो वृत्तिरेवेति नात्रातीव प्रयत्यते।।(५५)

"तदस्यां प्रहरणमिति क्रीडायां णः" इत्यत्र प्रहरणविशिष्टा क्रीडा प्रहरणक्रीडा, क्रीडमात्रं वार्थः। आदिना "सोऽस्य निवासः" "साऽस्मिन्पौर्णमासीति संज्ञायाम्" "तदस्यास्त्यस्मिन्निति मतुप्" इत्यादिकं सङ्गृह्यते। वृत्तिमात्रेऽतिरिक्तशक्तेः "समर्थः पदविधिः" इति सूत्राल्लाभादुक्तो विचारः शास्त्रान्तरीयैः सह तद्रीत्यैवोक्तः, आरोपितप्रकृतिप्रत्ययार्थमादाय वा, वस्तुतो विशिष्टशक्त्यैवार्थोपस्थितिरित्याह - वस्तुत इति।।

इति कौण्डभट्टविरचिते वैयाकरणभूषणसारे

देवतादिप्रत्ययार्थनिर्णयः समाप्तः।।

'क्रीडायां णः' इत्यादिमूलमवतारयति [अनयैवेति] 'क्रीडायां णः' इत्येकदेशेन तद् घटितं सूत्रमभिप्रेतमित्याह [तदस्यामिति] "वस्तुतः" इत कारिकाभागमवतारयति [वृत्तिमात्र इति] मात्रपदेन निरुपपदकृत्स्वपि एकार्थीभावस्वीकारो लभ्यते। भावप्रत्ययार्थनिर्णये पाचकादिपदानां संसर्गप्रवृत्तिनिमित्तकत्वकथनेनाप्ययमर्थो ध्वन्यत इति बोध्यम्। अतिरिक्तशक्तेः = अवयवशक्त्यतिरिक्तसमुदायशक्तेः। उक्तो विचारः = देवताविशिष्टं देयं प्रत्ययार्थः, देवतायां प्रदेये च खण्डशः शक्तिः, प्रदेयमात्रे शक्तिरित्युक्तो विचारः। [तद्रीत्यैवेति] यैवास्माकं काल्पनिकी अवस्था, सैव परैः पारमार्थिकताय गृह्यत इति तैस्सह विचारस्तद्रीत्यैव, "परभाषया परो वक्तव्यः" इति न्यायादिति भावः। [आरोपितेति] अयं भावः - वाक्यानामानन्त्यात्प्रतिवाक्यं शक्तिग्रहासम्भवात्तत्र कल्पनया पदानि विभज्य पदेषु च प्रकृतिप्रत्ययविभागं तत्तदर्थविभागं चाचार्याः परिकल्पयन्ति स्मेति वैयाकरणरीत्या वर्णस्फोटपक्षाश्रयणेनापि समाधातुं शक्यम् - इति। अत्र = अतिरिक्ततद्धितार्थनिर्णये।।५५।।

इति वैयाकरणभूषणसारतत्त्वदर्शिन्यां

देवतादिप्रत्ययार्थनिर्णयः समाप्तः।।

अथ अभेदैकत्वसङ्ख्यानिर्णयः

वृत्तिप्रसङ्गात्तत्राभेदैकत्वसङ्ख्या प्रतीयत इति सिद्धान्तं दृष्टान्तेन प्रतिपादयति-

अभेदैकत्वसङ्ख्याया वृत्तौ भानमिति स्थितिः।

कपिञ्जलालम्भवाक्ये त्रित्वं न्यायद्यथोच्यते।।१।। (५६)

सङ्ख्याविशेषाणामविभागेन सत्तवमभेदैकत्वसङ्ख्या।

उक्तं च वाक्यपदीये - (वृत्तिसमुद्देशे)

यथौषधिरसाः सर्वे मधुन्याहितशक्तयः।

अविभागेन वर्तन्ते तां सङ्ख्यां तादृशीं विदुः।। इति। १०२

परित्यक्तविशेषं वा सङ्ख्यासामान्यं तत्।

उक्तं च -

भेदानां वा परित्यागात्सङ्ख्यात्मा स तथाविधः।

व्यापाराज्जातिभागस्य भेदापोहेन वर्तते।। १०३

अगृहीतविशेषण यथा रूपेण रूपवान्।

प्रख्यायते न शुक्लादिर्भेदापोहेन वर्तते।। इति। १०४

अस्य वृत्तौ समासादौ भानं न्यायसिद्धमिति शेषः। इति मतस्थितिर्वैयाकरणानाम्। अयं भावः - राजपुरुष इत्यादौ राज्ञः राज्ञोः वाऽयं पुरुष इति जिज्ञासा जायते। विशेषजिज्ञासा च सामान्यज्ञानपूर्विकेति सामान्यरूपेण तत्प्रतीतिः शब्दादावश्यकी। अतस्तस्यां शक्तिरिति।

तस्या एकत्वेन प्रतीतौ न्यायमाह - कपिञ्जलेति। बहुत्वगणनायां त्रित्वस्यैव प्रथमोपस्थितत्वात्तद्रूपेणैव भानवदेकत्वस्य सर्वतः प्रथमोपस्थितत्वमस्तीति भावः। वस्तुतस्तु जिज्ञासैव नानुभवसिद्धा। तथात्वे वा ज्ञानेच्छयोः समानप्रकारकत्वेन हेतुहेतुम‘वात्तत्तद्रूपेणैव वाच्यता स्यादिति ध्येयम्।।१।। (५६)

इति कौण्भट्टविरचिते वैयाकरणभूषणसारे

अभेदैकत्वसङ्ख्याया वृत्तौ भाननिर्णनयः समाप्तः।।

अथ अभेदैकत्वसङ्ख्यानिर्णयः

[वृत्तिप्रसङ्गादिति] "वस्तुतो वृत्तिरेवेति नात्रातीव प्रयत्यते" इति समनन्तरग्रन्थे वृत्तिपदस्योपादानात्तत्प्रसङ्गादित्यर्थः। तत्र = वृत्तौ। [अभेदैकत्वसङ्ख्येति] अयमर्थः - राज्ञः पुरुष इत्यादौ वाक्ये उपसर्जनार्थबोधकानां राज्ञ इत्यादीनां विभक्त्यन्तत्वेन तदर्थसङ्ख्याविशेषणविशिष्टार्थबोधकत्वं सेत्स्यति। वृत्तौ तूपसर्जनपदे विभक्त्यभावेन सङ्ख्याविशेषाणां तत्तद्रूपेणाप्रतीतेस्तत्रोपसर्जनपदार्थानां सत्त्वभूतत्वात्सङ्ख्यायोगावश्यकत्वात्सामान्यसङ्ख्यारूपं सर्वसङ्ख्याविशेषणं सर्वसङ्ख्यासंसर्गरूपं सर्वसङ्ख्याक्रोडीकारकं विद्यत इत्यभ्युपगन्तव्यम्। तदेव चाभेदैकत्वम्। द्वित्वादिप्रतिपक्षं ह्येकत्वं द्वित्वाद्यपावर्तनान्न समस्तसङ्ख्याभेदस्वीकारसमर्थम्। इदं त्वभेदैकत्वं सर्वसङ्ख्यानुयायि। अत एव एकत्वद्वित्वादिसङ्ख्यातोऽस्य वैलक्षण्यम्। एतदेवादायोक्तं हरिणा -

अभेदैकत्वसङ्ख्या वा तत्रान्यैवोपजायते।
संसर्गरूपं सङ्ख्यानामविभक्तं तदुच्यते।। इति।

एवं चौपसर्जनपदार्थो नाऽव्ययवन्निस्सङ्ख्यः, सत्त्वभूतत्वात्। नापि राज्ञः पुरुष इत्यादाविव विशेषसङ्ख्याविशिष्टः, तदुपस्थापकविभक्त्यभावात्। किन्तु सङ्ख्यासामान्यविशिष्टः प्रतीयते इत्येनामुभयीमप्यवस्थामतीत्योपसर्जनपदार्थो वर्तते। अभेदेन = अविभागेन सङ्ख्यात्वसामान्येनेति यावत्। एकत्वसङ्ख्या = एकत्वादिसङ्ख्या। एकत्वपदं सर्वसङ्ख्योपलक्षकं वा। एकत्वद्वित्वादिसङ्ख्याविशेषाणां सङ्ख्यात्वसामान्येन भानमिति तदर्थ इति।

अभेदैकत्वसङ्ख्यापदार्थं मतभेदेन निर्वक्ति - [सङ्ख्याविशेषाणामिति] एकत्वद्वित्वादिसङ्ख्याविशेषाणामित्यर्थः। अविभागेन = सङ्ख्यात्वेन रूपेण। सत्त्वं = स्थितिर्भानम्। हरिसम्मतिमाह [उक्तं चेति] वाक्यपदीये = वृत्तिसमद्देशे। [यथौषधीति] अयं भावः - माक्षिके मधुनि बहुपुष्परसाः समर्पितस्वरूपा विवेकेन न लक्ष्यन्ते, अथ च तत्तद्रूपेण रसा विद्यन्ते नतु स्वरूपनाशं नष्टाः। अत एव मधुनः कारणभूतरसानुगण्येन तत्तद्रोगादिनाशकत्वम्। तथैव मधुस्थानीये उपसर्जनपदार्थे एकत्वादिसङ्ख्याविशेषाविवेकेन न लक्ष्यन्ते, तत्र तु सन्निधाप्यन्ते। अत एव सति निमित्ते तत्तद्रूपेण प्रतीयन्ते। यथा तावकः, शौर्पिरित्यादौ। यथा च मधुनि विद्यमाना अपि तत्तत्पुष्प रसास्तत्तद्रूपेण न प्रतीयन्ते किन्तु रसत्वेन, तथा उपसर्जनपदार्थे एकत्वद्वित्वादिसङ्ख्या न विशेषाकारेण भासन्ते किन्तु

सङ्ख्यात्वेन। अनया चाभेदैकत्वसङ्ख्यया द्वित्वादिकयेव न किञ्चिद्गण्यते, तथापि सङ्ख्याभेदा अभेदैकत्वादेवापोद्ध्रियन्त इति तस्या अपि सङ्ख्यात्वं बोध्यम्। तादृशीम् = ओषधीरिवाविभागेन वर्तमानां, सङ्ख्याम्, ताम् = अभेदैकत्वसङ्ख्यां विदुः। "अभेदैकत्वसङ्ख्या वा तत्रान्यैवोपजायते" १०१ इति कारिकातोऽनन्तरमियं कारिका। तथाच वृत्तावुपसर्जनपदार्थे विभक्त्यभावेन सङ्ख्याविशेषाणां तत्तद्रूपेणाप्रतीतेः सङ्ख्यात्वेन सर्वसङ्ख्यानां भानं मधुनि सर्वरसानां रसत्वेन भानवदिति निर्गलितोऽर्थः- इति।

ननु मधुनि सर्वरसवत्ताजन्यस्य तत्तद्रोगादिनिवृत्तिरूपस्य फलस्यानुभवात्सर्वरससत्ताकल्पनेऽपि अत्र सर्वसङ्ख्याविशेषसत्ताकल्पनेमाना भावः। तावकः शौर्पिरित्यपि न मानमित्यतः पक्षान्तरमाह [परि त्यक्तविशेषमिति] परित्यागश्चात्र तदभानमेव। तत् = अभेदैकत्वम्। अत्र पक्षे सङ्ख्यात्वेन सामान्यं भासते। नतु विशेषत इति पूर्वस्माद्विशेषः। सङ्ख्यावद्राजसम्बन्धीति पक्षद्वयेऽपि बोधः। अत्र च यथा ह्येकत्वं द्वित्वाद्यपावर्तयति दित्वं च त्रित्वादीत्येवमिदमप्यभेदैकत्वं सर्वमभेदैकत्वाद्यपावर्तयतीति तत्रेवात्राप्यस्ति सङ्ख्यात्वमित्यभेदैकत्वसङ्ख्यापदेन व्यवह्रियते। अस्मिन् पक्षेपि हरिं प्रमाणयति [उक्तं चेति] हरि ग्रन्थे - वा = यद्वा। भेदानाम् = एकत्वद्वित्वादिभेदानाम्। परित्यागात् = अभानात्। तथाविधः = अभेदैकत्वसङ्ख्यापदवाच्यः, सः = वृत्ता वनुभूयमानः, सङ्ख्यात्मा = सङ्ख्यासामान्यम्। ननु निर्विशेषसामान्याभावादिदं कथमत उक्तं - व्यापारादिति। जातिभागस्य = सङ्ख्यात्वस्य, व्यापारात् = विशेषणतया भानात्। भेदापोहेन = भेदानामेकत्वद्वित्वादीनां विशेषाणामपोहेन निरासेन, वर्तते = प्रतीयते। सङ्ख्यात्वेनैव प्रतीतेर्विशेषरूपाणां तत्तद्रूपेणाप्रतीतेश्च भेदापोह इति तात्पर्यम्। एतदेव समर्थयति अगृहीतेति - "शुक्लादिरूपभेदस्तु गृह्यते" इति वाक्यपदीये पाठः। अयमर्थः - द्रव्यं गुणैरविनाभावाद् दूरादगृहीतनीलपीतादिविशेषरूपमपि सामान्येन रूपवदिति यथा प्रत्याय्यते, तथा राजपुरुष इत्यादावुपसर्जनपदार्थे विभक्त्यभावात्सङ्ख्याविशेषाभानेऽपि सत्त्वभूतत्वात्सङ्ख्यायोगावश्यकतया सङ्ख्यावानर्थः प्रत्याय्यते। एवं चायमुपसर्जनपदार्थोऽव्ययवन्न निस्सङ्ख्यो, नापि राज्ञः पुरुष इत्यादाविव विशेषसङ्ख्याविशिष्टः। शुक्लादिभेदरूप इति पाठे तु शुक्लादिविशेषरूपोऽर्थो न गृह्यत इत्यर्थः। इयान् परं विशेषः। यत् रूपवान् घट इत्यादौ रूपत्वेन रूपप्रतीतिः सद्वस्तुविषया। राजपुरुषादिवृत्तौ तु सङ्ख्यात्वेन प्रतीतिरसद्वस्तुविषया विकल्पात्मिका - इति। विकल्पलक्षणं तु "शब्दज्ञानानुपाती वस्तूशून्यो विकल्पः" इति योग सूत्रोक्तं बोध्यम् - इति।

मूलं योजयति [अस्या इति] उक्तलक्षणया अभेदैकत्वसङ्ख्याया इत्यर्थः। वृत्तिशब्देन शक्तिलक्षणान्यतरूपार्थस्य ग्रहणमिति भ्रमवारणायाह [समासादाविति] वृत्तिशब्द एकार्थीभावपरः, तदाश्रयत्वात्समासादीनां वृत्तित्वव्यवहार इति भावः। तत्र तद्भाने किं मानमत आह [न्यायसिद्धमिति] सङ्ख्यायाः सङ्ख्यात्वेन भानस्य परानभिमतत्त्वात्परैरेकार्थीभावानभ्युपगमाच्चाह [वैयाकरणानामिति]

न्यायसिद्धत्वमेव दर्शयति [अयं भाव इति] [सामान्यरूपेणेति] विशेषजिज्ञासानिर्वाहक-सामान्यसङ्ख्यात्वरूपेणेत्यर्थः। तत्प्रतीतिः = सङ्ख्याप्रतीतिः। यैव हि सङ्ख्याविशेषजिज्ञासानिर्वाहाय कल्प्यते, सैवाभेदैकत्वसङ्ख्या। एकत्वद्वित्वादीनां सामान्यरूपेण भानमिति तदर्थः। तस्याम् = अभेदैकत्वसङ्ख्यायाम्। [शक्तिरिति] समासादेः शक्तिरित्यर्थः। राजपुरुष इत्यादौ शब्दादेव राज्ञः राज्ञोः राज्ञां वेति विशेषजिज्ञासोदयात्तन्निर्वाहाय शब्दादेव सामान्यसङ्ख्याभानमावश्यकमित्याशयेन 'तत्प्रतीतिः शब्दादावश्यकी' इत्युक्तमिति बोध्यम्।

यद्वा अभेदैकत्वमित्यत्र भेदशब्दस्तत्सहितद्वित्वादिपरः, भेदस्य = तत्सहचरिततद्वित्वादेरभावोऽभेदः। तत्सहितमेकत्वमभेदैकत्वमित्यर्थाश्रयणेन सङ्ख्यात्वेन रूपेण एकत्वमेवोपसर्जनपादार्थे भासत इत्याशयेन "कपिञ्जलालम्भ" इति कारिकाभागमवतारयति [तस्या इति] उपसर्जनपदार्थगतसङ्ख्याया इत्यर्थः। एकत्वेन = एकत्वत्वेन। प्रतीतौ = भाने। [भानवदिति] "कपिञ्जला नालभेत" इत्यत्र बहुवचनेन त्रय एव कपिञ्जला गृह्यन्ते, गणनायां बहुत्वे त्रित्वस्य प्रथमोपस्थितत्वात्, प्रथमातिक्रमणे कारणाभावात्, तद्वदित्यर्थः। [एकत्वस्येति] तथा वृत्तावपि विशेषतः सङ्ख्याबोधकशब्दाभावस्थले प्रथमत उपस्थितैकत्वस्य त्यागे मानाभावात्तेनैव रूपेण सङ्ख्याया भानमित्याशयः। [अस्तीति] तथा च प्रथमातिक्रमणे कारणाभावदेकत्वेनैव रूपेण भानमावश्यकमिति भावः।

[इति भाव इति] वस्तुतस्त्विदमयुक्तम्। एकत्वत्वेन भाननानुभावात्। किन्तु सङ्ख्यात्वसामान्यरूपेणैव भानमभ्युपगन्तव्यम्। अन्यथा राजपुरुष इत्यादौ राजादेरेकत्वसङ्ख्यावैशिष्ट्येन भाने राज्ञोः राज्ञां वेत्यादिजिज्ञासानापत्तिर्विरोधात्। इष्टापत्तौ "वृद्धिमिच्छतो मूलमपि नष्टम्" इति न्यायापातः। किञ्च एकत्वप्रतीतिः कपिञ्जलालम्भनन्यायेन न सम्भवति। उपस्थितानां पदार्थानां प्रथमतः कस्य भानमित्यत्र नियामकः स न्यायो, नतु पदात्पदार्थस्य प्रतीतौ नियामकः। तस्मादुपसर्जपदार्थे भासमानायाः सङ्ख्यायाः सामान्यरूपायाः सर्वसङ्ख्याविशेषणत्वादविरुद्धत्वात्किमिति तस्या

अभेदैकत्वशब्देन व्यवहारः क्रियते? अभेदद्वित्वादिशब्देन व्यवहारः किं न क्रियत इत्याकाङ्क्षायां कपिञ्जलन्याय उदाहृतो मूलकृता। प्रायो बहुत्वगणनायां त्रित्वस्य प्राथम्यात् 'कपिञ्जलानालभेत' इत्यत्र त्रित्वेन भानमङ्गीकृतं, तद्वद्गणनासामान्ये एकत्वस्य प्राथम्यादभेदैकत्वशब्देन व्यवहारः कृत इति तात्पर्यम्। निरूपितं चैतद्विस्तरेण भूषणे।

अभेदैकत्वे समासादेः शक्तिकल्पनमयुक्तमेवेत्याह [वस्तुतस्त्विति]। [जिज्ञासैवेति] राजपुरुष इत्यादौ राज्ञः राज्ञोः राज्ञां वेत्यादि जिज्ञासेत्यर्थः। [नानुभवसिद्धेति] अत एव राजपुरुष इत्यादौ राजत्वेनैव राजपदार्थबोधोऽनुभवसिद्धः। [तथात्वे वेति] तादृशजिज्ञासया अनुभवसिद्धत्वे वेत्यर्थः। वाशब्दोऽनास्थायाम्। [समानप्रकारकत्वेनैवेति] अन्यथा द्रव्यत्वादिना ज्ञाते सुवर्णत्वेनाज्ञाते सुवर्णत्वेन रूपेणेच्छापत्तिः। अधिकं स्फोटनिर्णये भूषणे द्रष्टव्यम्। प्रकृते च त्वद्रीत्या सङ्ख्यासामान्यविषयकत्वाज्ज्ञानस्य जिज्ञासाया द्वित्वादिसङ्ख्याविशेषघटित्वात्कथं तयोः कार्यकारणभावः। अतस्तदुपपत्तये एकत्वद्वित्वादीनां तत्तद्रूपेण वाच्यत्वं स्वीकार्यम्। तच्च तव मते नेष्यत एव। किन्तु सामान्यरूपेण। अतो नेदं युक्तमिति भावः। [वाच्यता स्यादिति] नचेष्टापत्तिः, जिज्ञासोच्छेदापत्त्या मूलोच्छेदात्। अतः समासादेरभेदैकत्वे शक्तिकल्पन मयुक्तमेव। अत एव भाष्ये अभेदैकत्वसङ्ख्येति व्यवहारो भासत इति च नास्ति। अत एव निरुक्तमतद्वयप्रतिपादको हरिग्रन्थो "मतान्तरमाह" इत्यवतारितो हेलाराजेन। एष एवाशयो नागेशोपाध्यायेन विस्तरेण निरूपितो वृत्तिवादे मञ्जूषायाम्।

दर्पणकारास्तु "अत्र वदन्ति" इत्यादिना महता प्रयासेन मञ्जूषाशयो निराकृतः, तत्त्वसङ्गतमिति नागेशभावप्रकाशे मञ्जूषाव्याख्यानेऽस्माभि वृत्तिवादे निरूपितम्। तत्तु तत एवावगन्तव्यम्।।५६।।

इति वैयाकरणभूषणसारतत्त्वदर्शिन्यां

अभेदैकत्वसङ्ख्यानिर्णयः समाप्तः।।११।।

अथ सङ्ख्याविवक्षादिनिर्णयः

सङ्ख्याप्रसङ्गादुद्देश्यविधेययोः सङ्ख्याविवक्षा विवक्षे निरूपयति -

लक्ष्यानुरोधात्सङ्ख्यायास्तन्त्रातन्त्रे मते यतः।
पश्वेकत्वादिहेतूनामाश्रयणमनाकरम्।।१।। (५७)

ग्रहं सम्मार्ष्टीत्यत्रोद्देश्यग्रहगतमेकत्वमविवक्षितमितिवन्नास्माकमुद्देश्यविशेषणा-विवक्षानियमः, धातोरित्येकत्वस्य विवक्षितत्वात्।

उत्पद्येत समस्तेभ्यो धातुभ्यः प्रत्ययो यदि।
तदा सर्वैर्विशिष्येत द्वन्द्वोत्पन्नसुबर्थवत्।।

इति शब्दान्तराधिकरणे भट्टपादैरभिधानाच्च। "आर्धधातुकस्येड्वलादेः" इत्यत्रानुवाद्यार्थधातुकविशेषणस्य वलादित्वस्य विवक्षितत्वाच्च। एवं पशुना यजेतेतिवद्विधेयविशेषणं विवक्षितमित्यपि न। "रदाभ्यां निष्ठातो नः पूर्वस्य च दः" इत्यत्र नकारद्वयवधानानापत्तेः। तथा च भिन्न इत्यत्र नकारद्वयलाभो न स्यात्। "आद्गुणः" इत्यादावेकत्वविवक्षयैवोपपत्तौ "एकः पूर्वपरयोः" इत्यत्रैकग्रहण-वैयर्थ्यापत्तेश्चेति भावः। शब्दार्थस्तु - सङ्ख्याया लक्ष्यानुरोधत्तन्त्रातन्त्रे यतो मते अतः पश्वेकत्वाधिकरणोक्तहेतूनामाश्रयणं नास्मत्सिद्धान्तसिद्धमिति। आदिना ग्रहैकत्वसङ्ग्रहः।।१।। (५७)

अथ सङ्ख्याविवक्षादिनिर्णयः

सङ्गतिं दर्शयति [सङ्ख्याप्रसङ्गादिति] अभेदैकत्वसङ्ख्यानिरूपणावसरे "कपिञ्जलालम्भवाक्ये त्रित्वं न्यायाद्यथोच्यते" इत्यनेन विधेयकपिञ्जलपदार्थविशेषणतया त्रित्वसङ्ख्याया विवक्षाप्रदर्शनात्तत् प्रसङ्गादित्यर्थः। मूले यतः सङ्ख्यायाः = उद्देश्यविधेयगतसङ्ख्यायाः, लक्ष्यानुरोधात्, विवक्षाऽविवक्षे, अतः, पश्वेक्त्वाधिकरणोक्तहेतूनामाश्रयणमनाकरम् = वैयाकरणाकारग्रन्थविरुद्धमित्यर्थः। पश्वेकत्वादीत्यत्रादिपदेन ग्रहैकत्वाधिकरणस्य ग्रहणम्। पश्वेकत्वाधिकरणे विधेयगतसङ्ख्या विवक्ष्यते। तेन "पशुना यजेत" इत्यत्र एकत्वसङ्ख्याविशिष्टपशुकरणको याग इति बोधेन नानेकपशुकरणको याग इति सिद्धान्तितम्। ग्रहैकत्वाधिकरणे चोद्देश्यगतसङ्ख्या न विवक्ष्यते। अत एव "ग्रहं सम्मार्ष्टि" इत्यादिना विहितः सम्मार्गो नवाना मपि ग्रहाणां सिद्ध्यतीति सिद्धान्तितम्। तत्त्वयुक्तम्। तादृशनियमाङ्गीकारे मानाभावात्। किन्तु लक्ष्यानुरोधाद्व्यवस्था। क्वचिद्विधेयगतापि सङ्ख्याऽविवक्षिता भवति। कदाचिदुद्देश्यगतापि सा विवक्षिता भवतीति भावः।

आदिपदग्राह्यमाह [ग्रहं सम्मार्ष्टीति] मूले सङ्ख्याग्रहणं विशेषणपरमित्याशयेनाह [उद्देश्यविशेषणेति]। [एकत्वस्य विवक्षितत्वादिति] धातोरित्यधिकारे धातूद्देश्येन प्रत्यया विधीयन्ते। तत्र धातुविशेषणीभूतैकत्वस्य विवक्षणादित्यर्थः। अत एव भ्वेधस्पर्ध इत्यादि धातुसमुदायान्न प्रत्ययोत्पत्तिः। अत्रार्थे मीमांसकसम्मतिमाह - [उत्पद्येतेति] धातोरित्येकत्वस्याविवक्षणात् समस्तेभ्यः भ्वेधस्पर्ध इत्यादि समुदितेभ्यः, तिङ्प्रत्यय उत्पद्येत यदि, तदा स प्रत्ययार्थः, द्वन्द्वसमासादुत्पन्नसुबर्थः तद्घटकपदार्थैः सर्वैरपि यथा विशिष्यते, तथा सर्वैरपि धात्वर्थैर्विशेष्येतेति कारिकार्थः। नन्विदमयुक्तम्। भ्वादीनां प्रत्येकं क्रियावाचकत्वेऽपि भ्वेधस्पर्धेति समुदायस्य क्रियावाचकत्वाभावेन धातुत्वाभावात्ततः प्रत्ययोत्पत्त्ययोगादत आह [आर्धधातुकस्येति] आर्धधातुकोद्देश्येनेडागमो विधीयते। तद्विशेषणीभूतं वलादित्वं विवक्षितमेव। अन्यथा तदुपादानस्य वैयर्थ्यप्रसङ्गः, प्रपठ्येत्यादाविडापत्तिश्चेति भावः।

विधेयविशेषणं सर्वत्र विवक्षितमेवेति मीमांसकमतं दूषयति [एवमिति] तन्नियमाङ्गीकारे बाधकं दर्शयति [रदाभ्यामिति]। [भिन्न इति] भिदिर् विदारणे इति धातोर्निष्ठयामनेनोभयत्र नत्वे रूपमिदम्। न इत्यत्र विधेयविशेषणैकत्वविक्षणे एकत्वसङ्ख्याविशिष्टो नकारः स्यादित्यर्थः स्यादिति भावः। ननु "रदाभ्यां निष्ठात" इत्यत्र रदाभ्यां परस्य निष्ठातकारस्य नः स्यात्, धातोर्दकारस्य नः स्यादिति वाक्यभेदाश्रयणेन द्वयं लभ्यत एवात आह [आद्गुण इत्यादाविति] [वैयर्थ्यापत्तिश्चेति] गङ्गोदकमित्यादौ स्थानिभेदेनादेशद्वयप्रसक्तौ तद्वारणेनोभयोरपि एकादेशसम्पादनाय सूत्रे एकग्रहणं क्रियते। विधेयविशेषणस्यैकत्वस्य विवक्षणे तु "आद्गुणः" इत्यनेनैव एकादेशलाभेन पुनरेकग्रहणवैयर्थ्यापत्तिरित्यर्थः। ननु पञ्चेकत्वादिहेतूनां जैमिनिसम्मतत्वात् "आश्रयणमनाकरम्" इत्यसङ्गतमतो विवक्षितार्थमाह [शब्दार्थस्त्विति] शेषपूराणेन व्याचष्टे [अत इति] तन्त्रातन्त्रे = विवक्षाऽविवक्षे।।५७।।

ननु विधेयविशेषणविवक्षाऽऽवश्यकी। अन्यथा सुध्युपास्य इत्यत्रानन्तयकाराद्यापत्तेः, भिन्नमित्यत्र नकारद्वयवदन्येषामप्यापत्तेः, "एकः पूर्वपरयोः" इत्यत्रैकग्रहणं च स्थानिभेदादादेशभेदवारणायेत्यभिप्रेत्याऽऽह -

विधेये भेदकं तन्त्रमन्यतो नियमो न हि।
ग्रहैकत्वादिहेतूनामाश्रयणमनाकरम्।।२।। (५८)

भेदकं - विशेषणं, तन्त्रं - विवक्षितम् = विधेयविशेषणं विवक्षितमित्यस्तु, तथाऽप्यन्यतः - अनुवाद्यस्य नियमो न हि। क्वचित्तन्त्रं क्वचिन्नेत्यर्थः। ग्रहैकत्वादौ यो

हेतुर्वाक्यभेदादिस्तस्यात्राऽऽश्रयणमनाकरम्। एकत्वविशिष्टं धातुं वलादित्व-विशिष्टमार्धधातुकं चोद्दिश्य प्रत्ययेडागामादेर्विधिसम्भवादिति भावः।।२।। (५८)

नन्वेवं भिन्न इत्यत्र नकारद्वयलाभो न स्यादित्यत आह -

रदाभ्यां वाक्यभेदेन नकारद्वयलाभतः।
क्षतिर्नैवास्ति तन्त्रत्वे विधेये भेदकस्य तु।।३।। (५९)
चकारसूचितं - 'निष्ठातस्य नः, पूर्वदस्य च नः'
इति वाक्यभेदमादाय नकारद्वयलाभ इत्यर्थः।।३।। (५९)

इति कौण्डभट्टविरचिते वैयाकरणभूषणसारे सङ्ख्याविवक्षादिनिर्णयः समाप्तः।।

"विधेये भेदकम्" इति मूलमवतारयति [नन्विति]। [अनन्तयकारेति] "इको यणचि" इत्यत्र विधेयगतैकत्वाविक्षायां भिन्न इत्यत्र नकारद्वयवदनन्तयकाराद्यापत्तिरित्यर्थः। ननु विधेयविशेषणस्य विवक्षणे "एकः पूर्वपरयोः" इत्यत्रैकग्रहणस्य वैयर्थ्यप्रसङ्गोऽत आह [एक इति] गुण इत्यत्रैकत्वविवक्षणेऽपि एको गुण आदेश इत्यक्तौ एकस्मिन् स्थानिनि प्रवृत्त्या चारितार्थ्येन अपरस्मिन् स्थानिनि आदेशान्तरापत्तेर्दुर्वारतया तद्वारणाय सूत्रे एकग्रहणमिति भावः। [क्वचिदिति] अनुवादवाक्ये उत्पत्तिवाक्यगतधर्मविरुद्धविशेषणासत्त्वे तद्विशेषणं विवक्षितमित्यर्थः। [क्वचिन्नेति] तद्विरुद्धविशेषणसत्त्वे तदविवक्षितमित्यर्थः। [वाक्यभेदादिरिति] ग्रहं सम्मार्ष्टीत्यदावेकत्वविवक्षणे ग्रहं समृज्यात्, तच्चैकमिति वाक्यभेदापत्तिरित्यर्थः। आदिपदेन "प्राजापत्या नव ग्रहाः" इत्युत्पत्तिवाक्यगतनवत्वसङ्ख्यया ग्रहपादर्थस्य परिच्छिन्नत्वात्परिच्छेदकाकाङ्क्षाभावादेर्ग्रहणम्।।५८।।

[नन्वेवमिति] विधेयविशेषणस्य विवक्षणे चेत्यर्थः। [चकारसूचितमिति] "रदाभ्यां तिष्ठातो नः पूर्वस्य च दः" इति सूत्रस्थ चशब्दसूचितमित्यर्थः। [वाक्यभेदमिति] अगत्या वाक्यभेदाश्रयणमिति भावः।।५९।।

इति वैयाकणभूषणसारतत्त्वदर्शिन्यां सङ्ख्याविवक्षादिनिर्णयः समाप्तः।।१२।।

अथ क्त्वाद्यर्थनिर्णयः

क्त्वाप्रत्ययादेरर्थं निरूपयति -

अव्ययकृत इत्युक्तेः प्रकृत्यर्थे तुमादयः।
समानकर्तृकत्वादि द्योत्यमेषामिति स्थितिः।।१।।(६०)

तुमादयस्तुमुन्नादयः। प्रकृत्यर्थे - भावे। आदिना क्त्वादेः सङ्ग्रहः। भावे इत्यत्र मानमाह - अव्ययकृत इति। "अव्ययकृतो भावे" इति वार्त्तिकादित्यर्थः। ननु "समानकर्तृकयोः पूर्वकाले" इत्यादिसूत्राणां का गतिस्तत्राहसमानकर्तृकत्वादिति। अयं भावः - भोक्तुं पचति, भुक्त्वा व्रजतीत्यादावेकवाक्यता सर्वसिद्धा भोजन-पाकक्रिययोर्विशेषणविशेष्यभावमन्तरेणानुपपन्ना। अन्यथा भुङ्क्ते व्रजतीत्यादावप्येक-वाक्यतापत्तेः। तथा च तयोर्विशेषणविशेष्यभावनिरूपकः संसर्गो जन्यत्वं, समानाधिकरण्यं पूर्वोत्तरभावो, व्याप्यत्वं चेत्यादिरनेकविधः। तथा च भोक्तुं पचति, भुक्त्वा तृप्त इत्यादौ भोजनजनिका पाकक्रिया, भोजनजन्या तृप्तिरिति बोधः। अत एव जलपानानन्तर्यस्य तृप्तौ सत्त्वेऽपि पीत्वा तृप्त इति न प्रयोगः। सामानाधिकण्यस्यापि संसर्गत्वेन अर्थात् समानकर्तृकत्वमपि लब्धम्। भुक्त्वा व्रजतीत्यादौ पूर्वोत्तरभावः। सामानाधिकरण्यं च संसर्ग इति भोजनसमानाधिकरणा तदुत्तरकालिकी व्रजनक्रियेति बोधः।

अधीत्य तिष्ठति, मुखं व्यादाय स्वपितीत्यादौ चाध्ययनव्यादानयोरभाव-कालेऽप्रयोगाद्यदा यदाऽस्य स्थितिः, स्वापश्च, तदा तदाऽध्ययनं मुखव्यादानं चेति कालविशेषावच्छिन्नव्याप्यत्वबोधाद्व्याप्यत्वं सामानाधिकरण्यं च संसर्गः। एवं चान्यलभ्यत्वान्न सूत्रात् तेषां वाच्यतालाभ इति युक्तमव्ययकृतो भाव इति। एवं च प्रकृत्यर्थक्रिययोः संसर्गे तात्पर्यग्राहकत्वरूपं द्योतकत्वं क्त्वादीनाम्। अत एव "समानकर्तृकयोः" इति सूत्रे 'स्वशब्देनोपात्तत्वान्न' इति भाष्यप्रतीकमादाय पौर्वापर्यकाले द्योत्ये क्त्वादिर्विधीयते न तु विषय इति भाव इति कैयटः।

अथ क्त्वाद्यर्थनिर्णयः

[क्त्वाप्रत्ययादेरिति] मूले "तुमादय" इत्युक्तावपि क्त्वाप्रत्ययांशे बहुवक्तव्यतया प्राधान्यद्योतनाय क्त्व उपादानम्। 'तुमादय' इत्युक्त्या प्रत्ययस्वरूपं तुमिति मान्तमेवेति सम्भाव्येत। तथाच भोक्तुमित्यादौ "ञिन्नित्यादिर्नित्यम्" ६-१-१९७ इति स्वरानापत्तिरतः प्रत्ययस्वरूपं दर्शयन्नाह [तुमुन्नादय इति] प्रकृत्यर्थत्वस्य फलेऽपि सत्त्वादाह [भावे इति] आदिना = तुमादय इत्यादिपदेन। भावे इत्यत्र = असत्त्वभूते भावे इत्यत्र। [वार्त्तिकादिति] भाष्यकारास्तु "तुमर्थे" इत्यादिसूत्रे तुमर्थो भाव इति व्यवस्थाप्य अग्रे तदनुवृत्तिं स्वीकृत्य वार्त्तिकं प्रत्याचक्षाणाः क्त्वादीन् भाव एवेच्छन्ति।

कारिकाया उत्तरार्धमवतारयति [नन्विति] एवम् = क्त्वादीनां भावार्थकत्वाभ्युपगमे। [का गतिरिति] समानकर्तृकत्वादीनां ततो वाच्यत्वं प्रतीयते। भावार्थकत्वे तु तदनुपपत्तिरेवेति भावः। ननु भुक्त्वा व्रजतीत्यादौ समानकर्तृकता पूर्वकालता च प्रतीयत इति देवताधिकरणे भामत्यामुक्त्वा समानकर्तृकत्वं पूर्वकालत्वं च क्त्वावाच्यमिति केचित् पूर्वकालत्वमेव तद्वाच्यमिति मीमांसकाः। पूर्वकालिकत्वमात्रं न तद्वाच्यमपि त्वव्यवहितत्वमपीति नैयायिकाः। आनन्तर्यमेव शक्यमिति नव्यनैयायिकाः। तत्कालीनप्रागभावप्रतियोगित्वरूपं तदधिकरणसमयध्वंसाधिकरणसमयोत्पत्तिमत्वरूपं वाऽऽनन्तर्यं शक्यमिति ततोऽपि नव्याः। तदभाववदवृत्तित्वरूपं व्याप्यत्वमपि कत्वावाच्यमिति रामकृष्णभट्टाचार्याः। एवं स्थिते "समानकर्तृकत्वादि द्योत्यमेषाम्" इति मूलं कथं सङ्गटते? कथं वा "अव्यक्तो भावे" इत्युक्तिरपि युज्येतेत्याशङ्कायां क्त्वादीनां न समानकर्तृकत्वादिवाचकत्वं, किन्तु प्रकृतिप्रत्ययार्थयोः संसर्गे तात्पर्यग्राहकत्वमेवेत्यदोष इत्याशयेन मूलतात्पर्यमाह [अयं भाव इत्यादिना] एतेन "वस्तुतो न द्योत्यतायामपि निर्भरः, संसर्गमर्यादयैव तद्भानसम्भवादित्याह "अयं भाव इति" इति दर्पणोक्तमपास्तम्। प्रकृते संसर्गतावादस्य द्योतकतापक्षादनतिरिक्तत्वात्। एतच्च मूल एवानुपदं स्फुटीभविष्यति। [एकवाक्यतेति] प्रकृत्यर्थक्रिययोरेकवाक्यतेत्यर्थः। समाकर्तृकयोरित्यादिषु "धातुसम्बन्धे प्रत्ययाः" इति सम्बध्यते। तत्र प्रत्ययग्रहणं भाष्ये प्रत्याख्यातमिति भावः। सर्वसिद्धा = सर्वानुभवसिद्धा। अन्यथा = विशेष्यविशेषणभावं विनाप्येकवाक्यात्वाभ्युपगमे। [एकवाक्यतापत्तेरिति] अत्र एककर्तृका वर्तमानकालिका भुजिक्रिया, तादृशी व्रजिक्रियेति क्रियाविशेष्यकं बोधद्वयं जायते, नतु भुक्त्वा व्रजतीत्यत्रेव एकक्रियाविशेषणक अपरक्रियाविशेष्यक एको बोधः। विशेष्यविशेषणभावाभावेऽपि एकवाक्यताङ्गीकारेऽत्रापि तदापत्तिरिति भावः। [तथाचेति] - भुक्त्वा व्रजतीत्यादौ

सर्वानुभवसिद्धैकवाक्यतानिर्वाहाय तदर्थयोर्विशेषणविशेष्यभावाभ्युपगमे चेत्यर्थः। तयोः = भोक्तुं व्रजतीत्यादौ प्रकृत्यर्थक्रिययोः। [विशेषणविशेष्यभावनिरूपकः संसर्ग इति] भुक्त्वा व्रजतीत्यादितो जायमानबोधस्य विशिष्टबुद्धित्वात्तस्याः सम्बन्धविषयकत्वनियमात्त‘ानमावश्यकम्। स च सम्बन्धः प्रकृते जन्यत्वादिरनेकविधः। सर्वत्रापि विशेष्यविशेषणभावे तन्नियामकः सम्बन्धोऽस्त्येव। यथा - भूतले घट इत्यादौ भूतलघटयोर्विशेष्यविशेषणभावनियामकः संयोगादिस्सबन्धः। एतदनुरोधेनैव नीलो घट इत्यादावभेदस्य संसर्गत्वं स्वीक्रियते। एवं च प्रकृते तन्नियामकः संसर्गः क्त्वाप्रत्ययावच्योऽपि संसर्गविधया भासते। तादृशसंसर्गे तात्पर्यग्राहकत्वं क्त्वादीनामित्येतावतैवोपपत्तौ तद्वाच्यत्वमनावश्यकमेवेति भावः। व्याप्यत्वं = तदभाववदवृत्तित्वम्। अनेकविधसम्बन्धस्वीकारे चेत्यर्थः। ननु आनन्तर्यसमानकर्तृकत्वयोरेव संसर्गतया भानमस्तु, अलं गुरुशरीरकजन्यत्वस्य संसर्गतया भानस्वीकारेणेत्यत आह [अत एवेति] जन्यत्वस्य संसर्गतया भानस्वीकारादेवेत्यर्थः। [न प्रयोग इति] तृप्तौ जलपानानन्तर्यसत्त्वेऽपि तज्जन्यत्वाभावान्न तथा प्रयोग इत्यर्थः। ननु विभिन्नकर्तृकक्रियाद्वयमादाय भुक्त्वा तृप्त इति प्रयोगापत्तिरत आह [सामानाधिकरण्यस्यापीति]। [समान्कर्तृकत्वमपीति] भुक्त्वा व्रजतीत्यादौ व्रजने भोजनाधिकरणवृत्तित्वस्य भाने क्रिययोरेकाधिकरणनिष्ठैक्यस्याप्यर्थ-सिद्धत्वात्सामानाधिकरण्यस्य तदैक्यं विनाऽनुपपद्यमानत्वादिति भावः। एतदभिप्रायेणैव सूत्रे ‘समान कर्तृकयोः’ इत्युपात्तमिति बोध्यम्। [पूर्वोत्तरभाव इति] पूर्वकालावृत्तित्वेऽपि भिन्नकर्तृकत्वेऽपि तादृशप्रयोगवारणायोभयोपादानम्। अत्र पूर्वात्तरभावे आनन्तर्यांशोऽपि निवेश्यः। तेन वर्षान्तरोत्पन्नं श्वशुरादिगृहे भोजनमेतद्वर्षाधिकरणकं व्रजनं चादाय श्वशुरादिगृहे भुक्त्वा व्रजतीत्यादयो न प्रयोगाः।

व्याप्यत्वस्य संसर्गत्वे मानमाह [अधीत्येति] दैशिकनिरासायाह [कालविशेषेति]। [व्याप्यत्वबोधादिति] तदभाववदवृत्तित्वरूपव्याप्यत्वस्य बोधादित्यर्थः। तथाचाध्ययनाभाववदवृत्तित्वं स्थितौ भासते। तदादाय प्रकृतप्रयोगनिर्वाहः। अन्यथा स्थितिकालेऽप्यध्ययनस्य सत्त्वात्तत्राध्ययनस्थित्योः पूर्वोत्तरकालत्वाभावात्तदसङ्गतिरेव। एवं व्यादानस्य स्वापपूर्वकालत्वाभावान्मुखं व्यादाय स्वपितीत्यपि न स्यादिति भावः। न केवलं तत्र व्याप्यत्वस्यैव संसर्गता, किन्तु सामानाधिकरण्यस्यापीत्याह [सामानाधिकरण्यं चेति] अतो भिन्नकर्तृकैककालिकाध्ययनादिकमादाय नोक्तप्रयोग इति भावः। इत्थं च “समानकर्तृकयोः” इति सूत्रविहितक्त्वाप्रत्ययस्थले समानकर्तृकत्वरूपसामानाधिकरण्यसंसर्गस्य विषयता सार्वत्रिकी, जन्यत्वादीनां तु क्वाचित्कीति बोध्यम्।

उक्तमर्थं प्रकृते योजयति [एवं चेति] संसर्गविधया भासमानजन्यत्वादेर्भुक्त्वा व्रजतीत्यादितो जायमानविशिष्टबुद्धिनियामकत्वसम्भवे चेत्यर्थः। अन्यलभ्यत्वात् = संसर्गलभ्यत्वात्। तेषां = जन्यत्वादिसंसर्गाणाम्। जन्यत्वादेः सूत्रतो वाच्यत्वालाभेन संसर्गविधयैव तद्भानस्याभ्युपगन्तव्यतया न्यायसाम्यात् समानकर्तृकत्वपूर्वकालिकत्वयोरपि तथैव भानसम्भवान्न तयोरपि वाच्यत्वमिति भावः। ननूक्तरीत्या समानकर्तृकत्वादीनां संसर्गत्वस्वीकारे "समानकर्तृकत्वादि द्योत्यमेषाम्" इति मूलमयुक्तं स्यादत आह [एवं चेति] भूक्त्वा व्रजतीत्यादौ पूर्वोत्तरक्रिययोर्विशेषणविशेष्यभावनियामकस्य संसर्गस्य सूत्रतोऽलाभे चेत्यर्थः। [संसर्गे इति] प्रकृत्यर्थयोः क्रिययोर्यः संसर्गो विशेष्यविशेषणभावः। तन्निरूपके संसर्गे जन्यत्वसमानकर्तृकत्वव्याप्यत्वादावित्यर्थः। [तात्पर्यग्राहकत्वरूपमिति] प्रकृते एतादृशमेव तात्पर्यग्राहकत्वमतो मूलं युक्तमेवेति भावः। उक्तार्थे आकरं प्रमाणयति [अत एवेति] क्त्वादेः समानकर्तृकत्वादिद्योतकत्वादेवेत्यर्थः। [भाष्यप्रतीकमिति] "इह कस्मान्न भवति पूर्वं भुङ्क्ते पश्चाद् व्रजति" इति प्रश्ने तत्समाधानपरमिदं भाष्यम्। तत्प्रतीतिकमित्यर्थः।

अत्र मञ्जूषाकाराः - "समानकर्तृकयोः पूर्वकाले" इति सूत्रे पूर्वकाल इति कर्मधारय एव, न बहुव्रीहिः। तथा च समानकर्तृकयोरर्थयोर्मध्ये पूर्वकालविशिष्टार्थवृत्तेर्धातोः क्त्वेति सूत्रार्थः। तथाच पूर्वकालः क्त्वाप्रकृत्यर्थे प्रकारः। तद्बलादानन्तर्यसम्बन्धेन तस्य धात्वन्तरार्थेऽन्वयः। पूर्वकालविशिष्टेऽर्थे वर्तमानाद्धातोरित्यर्थस्वीकारादेव "पूर्वं भुङ्क्ते पश्चाद् व्रजति" इत्यत्र क्त्वाप्रत्ययामाशङ्क्य "स्वशब्देनोक्तत्वान्न" इति परिहार उक्तो भगवता। अत्र प्रयोगे पूर्वकालः पूर्वशब्दस्यार्थो, नतु धातोस्तत्र वृत्तिः। अतस्तत्र न क्त्वेति भाष्याशयः। "उक्तार्थानामप्रयोगः" इति न्यायान्न क्त्वेत्यर्थस्तु न भाष्यस्य नापादनीयः, तन्न्यायस्य द्योतकविषयेऽप्रवृत्तेः। किं च तद्भाष्यस्य तदर्थकत्वे "इह कस्मान्न भवति आस्यते भोक्तुम्" इति क्त्वाशङ्कापरोत्तरभाष्यासङ्गतिः। तत्रापि फलार्थकतुमुना पूर्वकालत्वस्याऽऽसिक्रियायां द्योतितत्वेन तत्रापि "स्वशब्देनोक्तत्वान्न" इत्यनेनैव क्त्वो वारणसम्भवात्। पूर्वकालत्वस्य तत्राप्रतीतौ तु तत्र कथं कत्व आपादनम्। एवं च षष्ठ्याः सम्बन्धवाचकत्ववत् क्त्वादीनामपि समानकर्तृकत्वादिरूपसम्बन्धवाचकत्वं वक्तुं शक्यम् - इत्यभिप्रयन्ति।

दर्पणकारास्तु - "अत्रेदं चिन्त्यम्। ननु धातोस्तत्र वृत्तिरित्यर्थे "आस्यते भोक्तुम्" इत्यग्रिमशङ्कानुपपत्तेरुपष्टम्भकत्वेनोपन्यसनं शिथिलम्, यतः कैयटमतेऽपि प्रतीयमानस्याऽऽस्यर्थे पूर्वकालसम्बन्धित्वस्य केनचिदनभिधानेन 'उक्तार्थानामप्रयोगः' इति न्यायानवतारादाशङ्कोत्थानसम्भवात्।

प्रत्ययवाच्यस्य कृप्रत्ययस्थले धात्वर्थविशेष्यताया नव्यानामपि सम्मतत्वेन 'पूर्वकालाः क्त्वार्थो धात्वर्थप्रकार एव' इति पूर्वग्रन्थविरोधाच्च। न च द्योतकत्वाभ्युपगमादुक्तसङ्गतिः, 'षष्ठ्याः सम्बन्धवाचकत्ववदमीषामपि सम्बन्धवाचकत्वम्' इत्युत्तरग्रन्थविरोधात्। न च तदपि सुवचम्, समानकर्तृकत्वादीनां वाच्यतायाः सूत्रादलाभात्। तस्मात्कर्मप्रवचनीयवत् क्रियासम्बन्धविशेषकत्वमेव क्त्वादीनामिति कैयटोक्तमेव सम्यक् - इति वदन्ति।

अत्रेयं चिन्ता - उक्तार्थानामिति न्यायो वाचकविषय एव प्रवर्तते? उत द्योतकविषयेऽपि। आद्ये क्त्वादेर्द्योतकत्वेन तत्र तन्न्यायसंचारपरस्वग्रन्थविरोधः। द्वितीये तुमुन आसिक्रियापूर्वकालात्वद्योतकतया तत्र तन्न्यायप्रवृत्तौ बाधकाभावेन भाष्ये उत्तराशङ्कोत्थानासम्भवः। किञ्च तुमुना आसिक्रियायां पूर्वकालत्वस्योक्ततया "आस्यर्थे पूर्वकालसम्बन्धित्वस्य केनचिदनभिधानेन" इति दर्पणकारोक्तिर्गर्जनिमीलिकयैव। अव्ययकृतां धात्वर्थानुवादकतया द्योतकत्वेन "क्त्वार्थः पूर्वकालो धात्वर्थे प्रकारः" इति नागेशस्य न पूर्वग्रन्थविरोधः। पञ्चकं प्रातिपदिकार्थ इति "कुत्सिते" इति सूत्रस्थभाष्यप्रामाण्येन सुपां द्योतकत्ममङ्गीकर्तृणां शाब्दिकानां मतेऽपि विभक्तेः सम्बन्धवाचित्वस्यावश्याश्रयणीयतया तद्वदत्रापि क्त्वः सम्बन्धवाचित्वेन नागेशस्योत्तरग्रन्थविरोधोऽपि नास्ति। किञ्च "एवं च ष'च्याः सम्बन्धवाचकत्ववत्" इति मञ्जूषाग्रन्थो न स्वमतरीत्या प्रवृत्तः, किंतु प्राचां मतेन, स्पष्टं चेदं कृदर्थवादे कलायाम्। पूर्वकाल इत्यस्य प्रकृत्यर्थविशेषणत्वेन तद्बलाद्धात्वर्थस्यापरत्रानन्तर्यसम्बन्धेनान्वय इत्युक्तरीत्या क्त्वादीनां सम्बन्धवाचकत्वमपि लभ्यत एव। किञ्चेदं सर्वमपि दीक्षितमतखण्डनपरं नागेशवाक्यं न कैयटखण्डनपरम्। किञ्च दीक्षितमते क्त्वादीनां वाक्यार्थस्यानापन्नसम्बन्धार्थकतया कर्मप्रवचनीयेभ्यो वैलक्षण्यमिति स्पष्टं "समानकर्तृकयोः" इति सूत्रे मनोरमायाम्। एवं च "कर्मप्रवचनीयवत् क्रियासम्बन्धविशेषकत्वमेव क्त्वादीनाम्" इति दर्पणोक्तिरयुक्तैवेत्यलम्।

यत्तु - "समानकर्तृकयोरिति सूत्रात्समानकर्तृकत्वं क्त्वावाच्यम्। अन्यथा "ओदनं पक्त्वाऽहं भोक्ष्ये" इत्यत्र मयेति तृतीयाप्रसङ्गाच्च। नचाऽऽख्यातेन कर्तुरभिधानान्न सेति वाच्यम्। भोजनक्रियाकर्तुरभिधानेऽपि पाकक्रियाकर्तुस्तदभावात्। अनभिहिते भवतीति पर्युदासाश्रयणात्। अत एव प्रासादे आस्त इत्यत्र प्रसदनक्रियाधिकरणस्याभिधानेऽप्यासिक्रियाधिकरणस्यानभिधानात् सप्तमीति भाष्ये स्पष्टम्। तस्मात्

क्त्वाप्रत्ययस्य कर्तृवाचित्वमावश्यकम्" इति - तन्न, सूत्रात्तस्य वाच्यत्वालाभात्। समानकर्तृकयोः क्रिययोः पूर्वकाले क्त्वेत्येव तदर्थात्। अन्यथा समानकर्तरीत्येव सूत्रन्यासः स्यात्। तृतीयापादनं त्वाख्यातार्थक्रियायाः प्रधानभूतायाः कर्तुरभिधानात्प्रधानानुरोधेन गुणे कार्यप्रवृत्तेर्न सम्भवति।

उक्तं च वाक्यपदीये -

प्रधानेतरयोर्यत्र द्रव्यस्य क्रिययोः पृथक्।
शक्तिर्गुणाश्र्या तत्र प्रधानमनुरुध्यते।।
प्रधानविषया शक्तिः प्रत्ययेनाभिधीयते।
यदा गुणे तदा तद्वदनुक्ताऽपि प्रतीयते।।इति।

किं चान्यथा कर्मणोऽपि क्त्वार्थतापत्तिः "पक्त्वौदनो मया भुज्यते" इत्यत्र द्वितीयायाः प्रकारान्तरेणावारणादित्यास्तां विस्तरः।।१।। (६०)

इति कौण्डभट्टविरचिते वैयाकरणभूषणसारे

क्त्वाद्यर्थनिर्णयः समाप्तः

"कर्ता क्त्वावाच्यः" इति परिमले अप्पय्यदीक्षितोक्तिं खण्डयति [यत्त्विति]। [सूत्रादिति] सप्तमीनिर्देशात्कर्ता तद्वाच्य इति भावः। [अन्यथेति] क्त्वाप्रत्ययेन कर्तुरनभिधान इत्यर्थः। [तृतीयाप्रसङ्गादिति] - क्त्वाप्रत्ययेन कर्तुरभिधानेन अनभिहिताधिकारीयेण "कर्तृकरणयोस्तृतीया" इत्यनेन कर्तरि तृतीयाप्रसङ्ग इत्यर्थः। [न चेति] अनभिहित इत्यस्य अभिहिते न भवतीत्यर्थकतया प्रकृते तिङ्प्रत्ययेन कर्तुरभिहितत्वात्तृतीया न भवतीत्यर्थः। [भोजनक्रियेति] तत्क्रियानिरूपितकर्तुरित्यर्थः। तदभावात् = अभिधानाभावात्। [पर्युदासाश्रयणादिति] प्रसज्यप्रतिषेधाश्रयणे नञर्थस्य भवनक्रियान्वयितयाऽभिहितपदार्थेनाऽन्वयाभावादसमर्थसमासः स्वीकार्यः। अतः पर्युदास एवाश्रयणीयः। तत्पक्षे अभिहितभिन्ने कर्त्रादौ तृतीयादय इत्यर्थसम्पत्त्या अनभिहितभुजिक्रियाकर्तरि तृतीया दुर्वारेति भावः। अत एव = अनभिहित इत्यत्र पर्युदासाश्रयणादेव। [प्रासादे इति] प्रसीदन्त्यस्मिन्नित्यधिकरणे घञ्। "उपसर्गस्य घञ्यमनुष्ये बहुलम्" इत्युपसर्गस्य दीर्घः। सप्तमी = "सप्तम्यधिकरणे च" इत्यनेन। [भाष्ये इति] "अनभिहिते" इति सूत्रे भाष्य इत्यर्थः। तत्रहि "द्वयोः क्रिययोः कारकेऽन्यतरेणाभिहिते विभक्तिर्न प्राप्नोति। क? प्रासादे आस्ते शयने आस्ते। किं कारणम्। सदिप्रत्ययेनाभिहितमधिकरणमिति

कृत्वा सप्तमी न प्राप्नोति। नञा एष दोषः। अन्यतरेणानभिधानात्। सदिप्रत्ययेनाभिधानमासि-प्रत्ययेनानभिधानम्। यतोऽनभिधानात्। सदिप्रत्ययेनाभिधानमासिप्रत्ययेनानभिधानम्। यतोऽनभिधानं तदाश्रया सप्तमी भविष्यति। कुतो नु खल्वेतत्, अभिधाने चानभिधाने च अनभिहिताश्रया विभक्तिर्भविष्यति। न पुनरभिहिताश्रयः प्रतिषेध इति। अनभिहिते हि विधानम्। अनभिहिते हि सप्तमी विधीयते। नचाभिहिते प्रतिषेधः" इत्युक्तम्। उपसंहरति [तस्मादिति] सूत्रात् = "समानकर्तृकयोः पूर्वकाले" इति सूत्रात्। तस्य = कर्तुः। ननु समानकर्तृकयोरिति सप्तमीनिर्देशात्तस्य वाच्यत्वं स्यादत आह [समानकर्तृकयोरिति] नहि सप्तमीनिर्देशमात्रेण वाच्यत्वं कर्तुर्लभ्यते। "उदोऽनूर्ध्वकर्मणि" "कर्तृस्थे चाशरीरे कर्मणि" "प्रथने वावशब्दे" इत्यादौ सहस्रशो व्यभिचारात्। अन्यथा = क्त्वः कर्तृवाचकत्वस्य मुनिसम्मतत्वे। [समानकर्तरीति] क्त्वार्थकर्तुः समभिव्याहृतक्रियाकर्तर्यभेदान्वय इति बोधनाय समानपदोपादानम्। परिमलकारो'ाावितं दोषमुद्धरति [तृतीयापादनं त्विति] एतच्च 'असम्भवि' इत्यनेनान्वेति। [आख्यातार्थेति] आख्यातान्तार्थक्रियानिरूपितस्येत्यर्थः। अभिधानात् = तिङा अभिधानात्। ननु प्रधानक्रियाकर्तुस्तिङाऽभिधानेऽप्यप्रधानक्रियाकर्तुरनभिधानात्तृतीया दुर्वारेत्यत आह [प्रधानानुरोधेनेति] अयमर्थः - कर्त्रादेरेकत्वे प्रधानतिङन्तार्थक्रयानिरूपितशक्त्यभिधाने क्त्वान्ताद्यर्थगुणक्रिया निरूपितशक्तेरप्यभिहितत्वं भाष्यप्रामाण्येन स्वीक्रियते। ओदनं पक्त्वाहं भोक्ष्ये इत्यत्र हि पचिभुजिक्रियानिरूपिते द्वे कर्तृत्वशक्ती। तत्राख्यातान्तपदवाच्या क्रिया विशेष्यत्वात्प्रधानम्। क्त्वाद्यन्तपदवाच्या तु गुणभूतत्वादप्रधानम्। तत्क्रियासाधन्योरपि शक्त्योस्तद्द्वारको गुणप्रधानभावः। तत्र चाख्यातेन प्रधानशक्त्यभिधाने गुणक्रियाशक्तिरनभिहिताऽप्यभिहितवत्प्रकाशते, प्रधानानुरोधेन गुणप्रवृत्तेः। अत ओदनं पक्त्वाहं भोक्ष्ये इत्यादौ न पाककर्तृतामादाय तृतीयापत्तिः - इति।

उक्तार्थे "स्वादुमि णमुल्" ३-४-२६ इति सूत्रस्थभाष्यर्थानुवादिन्यौ द्वे हरिकारिके प्रमाणतयोपन्यस्यति [उक्तं चेति] वाक्यपदीये = साधनसमुद्देशे ८०-८१ कारिकायां - [प्रधानेतरयोरिति] प्रधानं चेतरा चेति द्वन्द्वः। यत्र = प्रयोगे। क्रिययोरित्यत्र षष्ठ्या निरूप्यनिरूपकभावरूपः सम्बन्धोऽर्थः। द्रव्यस्य = एकत्वावच्छिन्नस्य, निष्ठत्वं षष्ठ्यर्थः। शक्तिरित्यस्य अस्तीति शेषः। तत्र = प्रयोगे। गुणाश्रया = गुणनिरूपिता। अत्रापि शक्तिरिति सम्बध्यते। प्रधानमित्यस्य प्रधानक्रियामित्यर्थे तस्यास्तदननुरोधादसङ्गतिरतः प्रधानक्रियानिरूपितां शक्तिमिति तस्यार्थः। तथाच यद्वाक्यप्रयोगघटकपदबोध्यप्रधानक्रियानिरूपिता एकद्रव्यनिष्ठा पृथक् शक्तिस्तत्र गुणक्रियानिरूपिता

शक्तिः प्रधानक्रियानिरूपितशक्तिमनुरुणद्धीति प्रथमकारिकार्थः। अनुरोधमेव विशदयति द्वितीयकारिकया- [प्रधानविषयेति] अत एव न द्वितीयकारिकाया वैयर्थ्यम्। संक्षेपोक्तार्थप्रकाशकत्वात्। प्रधानक्रियानिरूपितेत्यर्थः। प्रत्ययेनेत्यस्य प्रधानक्रियावाचिधातूत्तरप्रत्ययेनेत्यर्थः। यदेति पूर्वान्वयि, निरूपितत्वं सप्तम्यर्थः। अप्रधानक्रयानिरूपिता शक्तिस्तदुत्तरप्रत्ययेन साक्षादनुक्तापि, तद्वत् = उक्तवत् प्रतीयते। तुल्यन्यायाद्गुणक्रियानिरूपितशक्तेरुक्तत्वेऽपि प्रधानक्रियानिरूपितशक्तेरनभिधाने गुणनिरूपिताप्यनुक्तवत्प्रकाशत इत्यपि हरिगन्थाल्लभ्यते। अत एव प्रासादे आस्ते इत्यादौ सदिनिरूपिताधिकरणत्वस्य घञाऽभिहितत्वेऽपि आसिनिरूपिताधिकरणत्वस्यानभिधानात्तन्निमित्तिका सप्तमी सिद्ध्यति। तथाच कर्त्रादेरेकत्वे प्रधानतिङन्तार्थक्रियानिरूपितशक्तेरभिधानेऽनभिधाने च क्त्वान्ताद्यर्थगुणक्रयानिरूपितशक्तेरप्यभिहितत्वस्यानभिहितत्वस्य च भाष्यादिप्रामाण्येनाङ्गीकार इत्यर्थस्य सिद्धत्वादोदनं पक्त्वाहं भोक्ष्ये इत्यादौ न तृतीयापत्तिरिति बोध्यम्।

किञ्चोभयनिरूपितशक्त्यनभिधाने गुणक्रियानिरूपितशक्तेरभिधायिनी विभक्तिर्भवत्येव। यथा- ग्रामाय गन्तुमिच्छति, ग्रामं गन्तुमिच्छतीति। ग्रामपदात् "गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ" इति द्वितीया - चतुर्थ्यौ।

अत्रेदं बोध्यम् - पक्त्वौदनो भुज्यत इत्यादावोदनादेरावृत्त्या गुणप्रधानक्रिययोरुभयत्रापि शाब्दोऽन्वय इष्यते। "ग्रामो गन्तुमिष्यते इत्यत्र गमेर्ग्रामः कर्म, इषेस्तूभे कर्मणी" इति सन्सूत्रस्थभाष्यात्। अत्र प्रयोगे गमिक्रियापेक्षे द्वितीयाचतुर्थ्यौ कदापि न स्त इति तत्रत्यकैयटाच्च। एवं चाप्रधानक्रियान्वयतात्पर्येण ओदनपदाद् द्वितीया न भवत्येव। तथा च "स्वादुमिणमुल्" इति सूत्रे कैयटः - "प्रधानशक्त्यभिधाने गुणक्रियाशक्तिरभिहितत्वत्प्रकाशते। प्रधानानुरोधाद्गुणानां तन्मुखप्रेक्षित्वात् पृथक्त्वाद्विरुद्धस्वकार्यारम्भकत्वाभावात्" इति। भिन्नत्वाद्विरुद्धं यत् स्वं कार्यं तदारम्भकत्वाभावादिति तदर्थः। अत एव "स्वादुमि ण्मुल्" इति सूत्रे भाष्ये क्त्वातुमुन्नादयः स्वान्वयिना समभिव्याहृतेनानुप्रयुज्यमानेन समानाधिकरणे तद्वाच्यकारके वक्तव्याः। तेन पक्त्वौदनो भुज्यत इत्यादावोदने द्वितीया न भवति। अन्यथा कृत्त्वादस्य कर्तर्यापत्तौ पचिक्रियाकर्मत्वस्यानभिधानात्सा स्यादेवेत्युक्त्वा "न वक्तव्यम्, अव्ययकृतां भावे विधानात्" इत्युक्तम्। अनेन भाष्येणोभयत्रापि शाब्दोऽन्वय इति लभ्यते। तत्र वचनारम्भे पक्त्वौदीनां भुज्यते इत्यादि प्रयोगाणामुपपत्त्यभावात्तत्प्रत्याख्यानपक्षेऽपि तदैकरूप्याय हर्युक्तरीत्या सन्सूत्रस्थभाष्यसम्मतया तेषां

प्रयोगाणामभाव एवोचितः। एतद्भाष्यबलात्कर्मशक्त्योरेकनिष्ठतायामेव "प्रधाने तयोः" इति हर्युक्तव्यवस्था बोध्या। अत एव ओदनं पक्त्वा ग्रामो गम्यत इत्यादौ पचिक्रियाकर्मणि द्वितीयासिद्धिः। कर्मशक्त्योरेकनिष्ठत्वाभावात्। एतदाशयक एव "प्रधानेतरयोः" इति हरिग्रन्थे द्रव्यस्येत्येकवचनान्तप्रयोगः। क्रियान्तरसम्बन्धस्य बुद्धिविषियत्व एव क्त्वः साधुत्वम्। एतेन क्त्वान्तार्थमात्रस्य बुद्धिविषयत्वे तस्य कर्तृकर्माकाङ्क्षासत्त्वादन्तरङ्गत्वेन द्वितीयादिकं दुर्वारमित्यपास्तम्।

नन्वेवं "वस्तुतस्तु पक्त्वा ओदनो भुज्यत इत्यादौ कर्मणः पचिभुजिभ्यां न युगपच्छाब्दोऽन्वयः। किन्त्वन्यतरेण शाब्दोऽपरेणार्थः। तथाच प्रथमाद्वितीये व्यवस्थिते एव। तद्यथा पक्त्वा ओदनो भुज्यते। किं पक्त्वा? अर्थादोदनम्। यदातु ओदनं पक्त्वा भुज्यत इति प्रयुज्यते तदा भुज्यत इत्यत्रार्थ ओदन इति गम्यते। एवं च विवक्षाभेदेन पूजयितुं शक्यते हरिः, हरिं वेत्युभयमपि साधु" इति कारकप्रकारणस्थमनोरमाग्रन्थविरोध इति चेत्, न। तद्ग्रन्थस्य "स्वरूपव्यक्रियैव पराक्रिया" इति न्यायेन प्राचीनग्रन्थानुवादमात्रपरत्वात्। व्याख्यातश्च स ग्रन्थस्तथैव शब्दरत्ने। तुल्यन्यायादनभिहितसूत्रस्थो वस्तुतस्त्विवत्यादिकौस्तुभग्रन्थोऽपि प्राचीनग्रन्थानुवादक एवेति बोध्यम्।

एतेन "यदा ओदने पाकक्रियानिरूपितकर्मत्वस्यैव शाब्दविषयत्वमभिप्रेतं, न तु प्रधानक्रियानिरूपितकर्मत्वस्यापि, तदा ओदनं पक्त्वा भुज्यत इति साधु। ओदनस्य भोजनकर्मताया आर्थिकत्वात्। यदातूभयकर्मत्वस्यैव शाब्दविषयत्वमभिप्रेतं तदौदनपदाद् द्वितीयाऽसाधुरेव। उक्तव्यवस्थितेः" इति दर्पणकाराः।

"यदा तु गुणीभूतक्रियानिरूपितकर्मत्वस्यैव विवक्षा प्रधानक्रियानिरूपितकर्मत्वाविवक्षा, तदा पक्त्वा ओदनं भुज्यते इति भवत्येव। प्रधानेतरयोरिति न्याय उभयनिरूपितकर्मत्वस्य युगपद्विवक्षायां द्रष्टव्य" इति परीक्षाकाराः।

"यदा तु गुणक्रियानिरूपितकर्मादेरेव विवक्षा, नतु प्रधानक्रियानिरूपितकर्मत्वादेस्तदा पक्त्वा ओदनं भुज्यते इत्यपि साधु। तथाच 'प्रधानेतरयोः' इति न्याय उभयनिरूपितशक्तेर्युगपद्विवक्षायामेव नियामकः" इति पञ्चोलिनश्च परास्ताः।

एतेन "वयं तु ब्रूमः - सकृच्छ्रुतस्य युगपदुभाभ्यां सम्बन्धाभावादेकेनैव प्रधानेन शाब्दोऽन्वयः। इतरेण तु सन्निधानादार्थ इति गुणनिरूपिता शक्तिस्तत्र नास्त्येव" इति स्वादुमीति सूत्रस्थो हरदत्तोऽपि

परास्तः। ग्रामाय गन्तुमिच्छतीति सन्सूत्रस्थभाष्यप्रयोगविरोधापत्तेश्च। तदुक्तरीत्या ग्रामस्य गमिकर्मत्वाभावेन "गत्यर्थकर्मणि" इति चतुर्थ्यप्राप्तेः। मम तु शाब्दान्वयाभावेऽपि तन्निरूपितकर्मत्वस्य सत्त्वेन परत्वाद् 'गत्यर्थकर्मणि' इत्यस्य प्रवृत्त्या न दोषः। स्पष्टं चेदं स्वादुमीति सूत्रोद्द्योते।

तृतीयापत्तिभिया कर्तुर्वाच्यत्वाङ्गीकारे न्यायसाम्यात् पक्त्वौदनो मया भुज्यत इति प्रयोगे प्रधानभुजिक्रियाकर्मणि आख्यातेनाभिधानेऽपि पचिकर्मणोऽनभिधानादोदनपदाद् द्वितीयावारणाय कर्मणोऽपि क्त्वावाच्यतापत्तिरित्याह [किञ्चेति]। [विस्तर इति] स च स्वादुमीति सूत्रस्थभाष्यार्थरूपोऽस्माभिः प्रदर्शित एवेति बोध्यम्।।६०।।

इति वैयाकरणभूषणसारतत्त्वदर्शिन्यां

क्त्वाद्यर्थनिर्णयः।।१३।।

अथ स्फोटनिर्णयः

सिद्धान्तनिष्कर्षमाह -

वाक्यस्फोटोऽतिनिष्कर्षे तिष्ठतीति मतस्थितिः।
साधुशब्देऽन्तर्गता हि बोधका न तु तत्स्मृताः।।१।। (६१)

यद्यपि वर्णस्फोटः पदस्फोटो वाक्यस्फोटोऽखण्डपदवाक्यस्फोटौ वर्णपदवाक्यभेदेन त्रयो जातिस्फोटा इत्यष्टौ पक्षाः सिद्धान्तसिद्धा इति वाक्यग्रहणमनर्थकं दुरर्थकं च, तथाऽपि वाक्यस्फोटातिरिक्तानामन्येषामवावस्तत्वबोधनाय तदुपादानम्। एतदेव ध्वनयन्नाह - अतिनिष्कर्ष इति। मतस्थितिर्वैयाकरणानां महाभाष्यकारादीनाम्। तत्र क्रमेण सर्वांस्तान्निरूपयन्वर्णस्फोटं प्रथममाह - साधुशब्द इति। साधुशब्दानन्तर्गता वाचका न वेति विप्रतिपत्तिः। विधिकोटिरन्येषां, नेति वैयाकरणानाम्। साधुशब्दे पचति राम इति प्रत्युज्यमानेऽन्तर्गतास्तिब्विसर्गादय एव बोधका वाचकास्तेषामेव शक्तत्वस्य प्राग्व्यवस्थापित्वान्न तु तैः स्मृता लादयः स्वादयश्चेत्यर्थः।।१।। (६२)

पूर्वोक्तविचारस्यावास्तवत्वं ध्वनयन्नाह [सिद्धान्तनिष्कर्षमिति] "अतिनिष्कर्षे" इत्यस्य प्रयोजनं दर्शयितुमाह [यद्यपीति]। [सिद्धान्तसिद्धा इति] यथाचैतत्तथा तत्तत्स्फोटनिरूपणावसरे प्रदर्शयिष्यामः। [अनर्थकमिति] इतरस्पोटानामप्याकरसम्मतत्वेन व्यावर्त्याभावादिति भावः। [दुरर्थकमिति] इतरस्फोटानामग्रहणप्रसङ्गादिति भावः। यद्यपि स्फोट एको विभुरखण्डश्च, तथापि शास्त्रकारा व्यञ्जकनिष्ठतत्तद्धर्मरूपोपाधिभेदेन भेदं पदविभागं प्रकृतिप्रत्ययविभागं तेषामपि कल्पितान्वयव्यतिरेकाभ्यां तत्तदर्थवाचकत्वं च परिकल्प्य शास्त्रप्रक्रियामुपपदयामासुः। तदनुसारेण शास्त्रकृ"वहारसिद्ध एव स्फोटविभाग इति बोध्यम्। [अवास्तवत्वबोधनायेति] वाक्यस्याखण्डत्वादिति भावः। ननु नैयायिकादिभिः स्फोटशब्दस्यानङ्गीकाराद् "वाक्यस्फोटोऽतिनिष्कर्षे" इति मूलमयुक्तमत आह [वैयाकरणानामिति] तत्र = निरुक्तस्फोटानां मध्ये। [वर्णस्फोटमिति] व्यक्तिवर्णस्फोटमित्यर्थः। अत्र वर्णपदं न ककारादिवर्णपरं, तेषामानर्थक्यस्य भाष्यादौ प्रतिपादितत्वेन स्फोटपदाभिधेयत्वासम्भवात्। किन्तु प्रकृतिप्रत्ययपरम्। प्रकृतिप्रत्ययास्तत्तदर्थवाचका इति तदर्थः। अत एव नैयायिकमतनिराकरणावसरे श्रूयमाणानां तिविसर्गादीनामेव ग्रन्थकृता वाचकत्वं व्यवस्थापितं सङ्गच्छते। अत एव "आदेशास्तिविसर्गादयः" इति वक्ष्यमाणं मूलमपि सङ्गच्छते। "वर्णस्फोट इति - प्रकृतिप्रत्यया वाचका इत्यर्थः" इति

कृष्णमित्रोऽपि व्याचख्यौ। मञ्जूषायामपि "प्रकृतिप्रत्ययास्तत्तदर्थवाचका इति तदर्थः, नतु ककारादिपरम्" इति स्पष्टमुक्तम्। एतेन "वर्णपदं ककारादिवर्णमात्र परम्" इति दर्पणोक्तमपास्तम्।

ननु तिविसर्गादीनां वाचकत्वाश्रयणेन वर्णस्फोटसमर्थनमयुक्तं तेषामवाचकत्वात्। "लः कर्मणि" इत्याद्यनुशासनेन लादीनामेव वाचकतालाभात्। तेषां वाचकत्वस्य भवदनभिमतत्वादित्याशङ्क्यापनोदनायाह मूले [साधुशब्देऽन्तर्गता इति] अन्तर्गता इत्यनेन वर्णानां ग्रहणमिति भ्रमवारणायाह [तिविसर्गादय इति] ।।६१।।

ये - तु प्रयोगान्तर्गतास्तिबादयो न वाचकास्तेषां बहुत्वेन शक्त्यानन्त्यापत्तेः। एधाञ्चक्रे ब्रह्मेत्यादावादेशभूतलुगादेरभावरूपस्य बोधकत्वासम्भवाच्च, किन्तु तैः म्मृता लकाराः स्वादयश्च वाचकाः। लत्वस्य जातिरूपतया शक्तावच्छेदकत्वौचित्यात्, अव्यभिचाराच्च। आदेशानां भिन्नतया परस्परव्यभिचारित्वात्। "लः कर्मणि" इत्याद्यनुशासनानुगुण्याच्च। न ह्यादेशेष्वर्थबोधकमनुशासनमुपलभामह इत्याहुः, तान् स्वसाधकयुक्तिभिर्निराचष्टे -

व्यवस्थितेर्व्यवहृतेस्तद्धेतुन्यायतस्तथा।
किञ्चाऽऽख्यातेन शत्राद्यैर्लङेव स्मार्यते यदि।।२।।
कथं कर्तुरवाच्यत्ववाच्यत्वे तद्विभावय।

व्यवस्थानुरोधात्प्रयोगान्तर्गता एव वाचका न तत्स्मृता इत्यर्थः। तथा हि - पचतीत्यादौ लकारमविदुषो बोधान्न तस्य वाचकत्वम्। न च तेषां तिङ्क्षु शक्तिभ्रमाद् बोधः, तस्य भ्रमत्वे मानाभावात् आदेशिनामपि तत्तद्वैयाकरणैः स्वेच्छया भिन्नानामभ्युपगमात्कः शक्तः को नेति व्यवस्थानापत्तेश्च। सर्वेषां शक्तत्वे गौरवं व्यभिचारश्चास्त्येव। आदेशानां प्रयोगान्तर्गततया नियतत्वाद् युक्तं तेषां शक्तत्वात्। तथा चाशिस्मरणकल्पना नेति लाघवम्।

साधकान्तरमाह - व्यवहृतेरिति। व्यवहारस्तावच्छक्तिग्राहकेषु मुख्यः। स च श्रूयमाणतिङादिष्वेवेति त एव वाचका इत्यर्थः। किञ्च तद्धेतुन्यायत इति। लकारस्य बोधकत्वे "भू - ल" इत्यतोऽपि बोधः स्यात्। तादृशे बोधे भवतीति समभिव्याहारोऽपि कारणमिति चेत्तर्ह्यावश्यकत्वादस्तु तादृशसमभिव्याहारस्यैव वाचकत्वशक्तिः। अन्यथा

लकारस्य वाचकत्वं समभिव्याहारस्य कारणत्वं चेत्युभयं कल्प्यमिति गौरवं स्यात्। तथाच तादृश समभिव्याहारः समभिव्याहृता वर्णा वेत्यत्र विनिगमका भावात् प्रयोगामन्तर्गता वर्णा वाचका इति सिद्ध्यतीति भावः।

अपि च लकारस्यैव वाचकत्वे कृत्तिङोः कर्तृभावनावाचकव्यवस्था त्वत्सिद्धान्तसिद्धा न स्यादित्याशयेनाह किञ्चेति। आदेशानां वाचकत्वे तित्वेन भावनायामदानत्वादिना कर्तरि शक्तिरित्युपपद्यते विभाग इति भावः। न च शानजादौ कृतिर्लकारार्थ आश्रयः शानजर्थ इत्यस्तु "कर्तरि कृत्" इत्यनुशासनादिति शङ्क्यम्, स्थान्यर्थेन निराकाङ्क्षतया शानजादौ "कर्तरि" इत्यस्याप्रवृत्तेः। अन्यथा घञादावपि प्रवर्तेत।।२१/२।। (६२ १/२)

देवदत्तः पचमान इत्यादिसामानाधिकण्यानुरोधाच्छानचः कर्ता वाच्यः स्यादित्याशङ्क्याह -

तरबाद्यन्ततिङ्क्ष्वस्ति नामता कृत्स्विव स्फुटा।।३।। (६३)
नामार्थयोरभेदोऽपि तस्मात्तुल्योऽवधार्यताम्।।

पचतितरां मैत्रः, पचतिकल्पं मैत्र इत्यादिषु नामार्थत्वाभेदान्वययोः सम्भव एवेति कर्तृवाचकता स्यादिति भावः। न न पचतिकल्पमित्यत्र सामानाधिकरण्यानुरोधात्कर्तरि लक्षमा। पचमान इत्यत्राप्यापत्तेरिति। लः कर्मणीत्यनुशासनं च लाघवाय कल्पिते लकारे कर्त्रादिवाचित्वं कल्पितमादयेत्युक्तम्।।३ १/२।। (६३ १/२)

स्थानिनामेव वाचकत्वं, नादेशानामिति नैयायिकमतं दूषयति [येत्विति] नैयायिका इत्यर्थः। [बहुत्वेनेति] लकारस्वाद्यपेक्षया बहुत्वेनेत्यर्थः। ननु तिबादिस्मृतस्थानिनां वाचकत्वाङ्गीकारे शक्त्यानन्त्याभावेऽपि स्मृतिजनकानामानन्त्येन ततो जायमानस्मृतीनामानन्त्यापत्तिस्तवाप्यस्त्येवात आह [एधाञ्चक्रे इति] अत्र "इजादेश्च गुरुमतोऽनृच्छः" इत्याम्। "आमः" इति लिटो लुक्। स चाभावरूपः, तस्य वाचकत्वं दूरापास्तमेवेति भावः। नन्वनुप्रयुज्यमानधातूत्तरैधादीनामेव तदर्थबोधोपपत्तेर्न दोषोऽत आह [ब्रह्मेति] अत्र "स्वमोर्नपुंसकात्" इति स्वमोर्लुक्। स्वसिद्धान्तमाह [किन्त्विति] स्वमते लाघवं दर्शयति [लत्वस्येति]। [अव्यभिचाराच्चेति] पचति पचतः पचन्तीत्यादौ सर्वत्रापि

लकारस्य वाचकस्य सत्त्वाद्व्यतरेकव्यभिचारो नास्तीति भावः। परेषां मते स दुर्वार इत्याह [आदेशानामिति]। [परस्परेति] पचतः पचन्तीत्यादौ तिपदशक्तिज्ञानाभावेऽपि कर्तृबोधदर्शनात् कारणाभावेऽपि कार्योत्पत्तिरूपव्यतिरेकव्यभिचार इति भावः। ननु कार्यतावच्छेदककोटावव्यवहितोत्तरत्व-निवेशान्नेयमापत्तिरत आह [लः कर्मणीति] आदिना "स्वौजसमौट्" इत्यादेर्ग्रहणम्। तान् = नैयायिकान्। ये त्वेवमाहुस्तानि त्यन्वयः। [स्वसाधकेति] स्वमतसाधकेत्यर्थः।

मूले 'तथा' इत्यस्य आदेशा वाचका इत्यर्थः। तस्य = लकारस्य। तेषां = लकारमविदुषाम्। समाधत्ते - [तस्येति] तेषां ज्ञानस्येत्यर्थः। मानाभावाभावात् = शक्तेः पदपदार्थघटित्वात्। एवं च बोधापत्तिरेवाव्यवस्थापदार्थ इति भावः। ननु तिविसर्गादयो वाचका इति त्वदीयमतमपि न युक्तम्। लकारमविदुषस्तिप्रत्ययज्ञानस्याप्यभावात्। रामाणां हरीणामित्यादावाम्प्रत्ययज्ञानस्य सुतरामसम्भवाच्च। प्रक्रियाज्ञानवतां तत्सम्भवतीतिचेन्ममापि तत्तुल्यमेवेत्यतोऽव्यवस्था। पदार्थमन्यथा दर्शयति [आदेशिनामिति] स्थानिनामपीत्यर्थः। तत्तद्वैयाकरणैः = शाकटायनशाकल्यपाणिन्यादिभिः। ऋषीणां नियोगपर्यनुयोगानर्हत्वादाह [स्वेच्छयेति] [भिन्नानामिति] पाणिनिना सुः, कालापिभिः सिः, शाकटायनेन रुश्च कल्पित इति भावः। [व्यवस्थानापत्तेरिति] प्रयोगे राम इत्यादौ विसर्ग एव सर्वैरपि स्वीक्रियते, स्वीकार्यश्च। परन्तु तत्स्थानितया कल्पितास्तु भिन्नाः। तथाच विसर्गेण सुः सिः रुश्च स्मर्यत एव, अविशेषात्। ततश्च कः शक्तः को नेति व्यवस्थापयितुं न पार्यतेऽस्माभिरिति भावः। तथाच परमते कः शक्तः को वा नेति नियामकाभाव एवाव्यवस्थेति तात्पर्यम्। ननु ऋष्युक्तत्वात्सर्वेषां वाचकत्वाभ्युपगमान्न दोषोऽत आह [सर्वेषामिति] सुसिरुप्रभृतीनां सर्वेषां सर्वैरपि कल्पितानां स्थानिनामित्यर्थः। तथाच यो दोषो मन्मते उद्भावितः, स एव त्वमतेऽपि प्रसज्यत इति भावः। मन्मते त्वादेशानां नियतत्वान्नायं दोष इत्याह [आदेशानामिति] प्रत्युतास्मन्त एव लाघवमित्याह [तथा चेति]।

व्यवहृतेरिति भागमवतारयति [साधकान्तरमिति]। [त एवेति] तिविसर्गादय एवेत्यर्थः। एवशब्देन लकारादीनां व्यावृत्तिः। "तद्धेतुन्यायतः" इति भागो हेत्वन्तरपर इत्याशयेन व्याचष्टे [किञ्चेति] [तद्धेतुन्यायत इति] "तद्धेतोरेव तत्त्वे किं तेन" इति न्यायाकारः। तं न्यायं प्रकृते योजयति [लकारस्येति] तादृशे बोधे = भवनादिविशिष्टकर्त्रादिबोधे। [समभिव्याहारस्येति] तथाच समभिव्याहारस्य चादेशरूपत्वादादेशानामेव वाचकत्वं फलितमिति भावः। नन्वेवं समभिव्याहारस्यैव वाचकत्वे प्रकृतिप्रत्ययास्तत्तदर्थवाचका इत्याशयकवर्णस्फोटासिद्धिरत आह [तथाचेति] परमत-निराकरणेन समभिव्याहारस्य वाचकत्वसिद्धौ चेत्यर्थः। समभिव्याहारः = भवतीत्यादिसमभिव्याहारः।

समभिव्याहृताः = समभिव्याहारघटकाः। वर्णाः = प्रकृतिप्रत्ययाः। "नच वर्णानां वाचकत्वे प्रत्येकं वर्णाद् बोधापत्तिरिति वाच्यम्। समभिव्याहृतयावद्वर्णेषु वाचकताभ्युपगमेनादोषात्" इति नेने गोपालशास्त्रिणां सरला टीका नात्र सरला। अत्र वर्णपदस्य प्रकृतिप्रत्ययपरत्वात्। [विनिगमनावरहादिति] नच विनिगमनाविरहे वर्णानामेव वाचकत्वमिति कथं निर्णयः? समभिव्याहारस्यैव कुतो न वाचकत्वमिति वाच्यम्। प्रत्येकावृत्तिनः समुदायावृत्तित्वेन समुदायस्य वाचकत्वे वर्णानामपि वाचकत्वकल्पनाया आवश्यकतया तेनैवोपपत्तौ न समदायशक्तिरङ्गीकार्येत्याशयत्। नच द्वित्ववत्प्रत्येकावृत्तेरपि समुदायवृत्तत्वं सम्भवतीति वाच्यम्। द्वित्वस्यापि समवायेन प्रत्येकवृत्तित्वस्वीकारात्। द्वित्वस्य सङ्ख्यात्वेन गुणतया गुणगुणिनोस्समवायात्। "एको न द्वौ" इति व्यवहारस्तु पर्याप्तिसम्बन्धेन द्वित्वाभाववानेक इत्याशयकः। विभक्त्यर्थसङ्ख्यायाः प्रकृत्यर्थे पर्याप्तिसम्बन्धेनान्वयाभ्युपगमादिति दिक्।

अयं च पक्षः स्थानिवत्सूत्रस्थभाष्यग्रन्थाल्लभ्यते। तत्र हि "सर्वे सर्वपदादशा दाक्षीपुत्रस्य पाणिनेः" इत्युक्तम्। तत्र पद्यतेऽर्थोऽनेनेति पदमिति व्युत्पत्त्या पदपदमर्थवत्परम्, नतु सुप्तिङन्तमेव। तथा "एरुः" इति सूत्रस्थः "तेस्तुः" इति वृत्तिग्रन्थोऽप्यत्र पक्षेऽनुकूलः। तथा स्थान्यर्थाभधानसमर्थस्यैवादेशतेति सिद्धान्तात् "तस्थस्थमिपाम्" इत्यादावन्तरतमपरभाषयैव सिद्धे यथासङ्ख्यासूत्रं नारम्भणीयमिति यथासङ्ख्यसूत्रस्थं, "प्रकृतिप्रत्ययानामर्थवत्तादर्शनात्" इति हयवरट्सूत्रस्थं, "नित्येषु नाम शब्देषु कूटस्थैरविचालिभिर्वर्णैर्भवितव्यम्" इत्याद्यन्ताविति सूत्रस्थं च भाष्यं मानम्। अयं पक्षः शास्त्रप्रक्रियामात्रनिर्वाहको न वास्तव इति स्फोटवादे मञ्जूषायां विस्तरेण निरूपितम्।

"किञ्चाख्यातेन" इति मूलमवतारयति [अपि चेति]। [कर्तृभावनेति] कृतः कर्तृवाचकत्वं तिङो भावनावाचकत्वमिति व्यवस्थेत्यर्थः। [न स्यादिति] वाचकस्थस्थानिनो लकारस्योभयत्राप्येकरूपात्वादित्यर्थः। त्वदीयसिद्धान्तोऽपि मद्रीत्याश्रयणेनैवोपपादनीय इत्याह [आदशानामिति]। शानजादौ = शानजादावपि। [कृतिरिति] अतो न वैषम्यमिति भावः। स्वसिद्धान्तं सङ्गमयति [आश्रय इति] अन्यथा = नैराकाङ्क्ष्येऽपि शास्त्रप्रवृत्तौ।।६२ १/२।।

'तरबाद्यन्त' इत्यादिकारिकाग्रन्थमवतारयति [देवदत्त इति सामानाधिकरण्यानुरोधादिति] कृतेर्वाच्यत्वे तदभेदस्य देवदत्तादौ बाधितत्वात्तद्वारणाय कृतां धर्मिवाचकत्वमाश्रीयत इति भावः। प्रतिबन्द्या समाधत्ते [पचतितरां मैत्र इति]। [नामार्थत्वेति] नच तरबन्तं नाम, न तरबेवेति वाच्यम्। पचमान इत्यादावपि शानजन्तं नाम, न शानच्प्रत्ययमात्रमिति तुल्यत्वात्। परो'ावितं "लः कर्मणि" इति सूत्रविरोधं परिहरति [लः कर्मणीत्यनुशासनमिति] - ।।६३ १/२।।

अथादेशा वाचकाश्चेत्पदस्फोटस्ततः स्फुटः।।४।।(६४)

एवमादेशानां वाचकत्वे सिद्धे पदस्फोटोऽपि सिद्ध एवेत्याह - अथेत्यादि। आदशास्तिविसर्गादयः। अयं भावः - समभिव्याहृतवर्णानां वाचकत्वे सिद्धे तादृशवर्णसमभिव्याहाररूपपदस्य वाचकता सिद्ध्यति। प्रतिवर्णमर्थस्मरणस्यानुभव-विरुद्धत्वात्प्रत्येकं वर्णानामर्थवत्त्वेन प्रातिपदिकत्वापत्तौ "नलोपः प्रातिपदिकान्तस्य" इत्यादिभिर्धनं वनमित्यादौ नलोपाद्यापत्तेश्च।

एतच्च चरमवर्ण एव वाचकत्वशक्तिः, शक्तेर्व्यासज्यवृत्तित्वे मानाभावात्, पूर्वपूर्ववर्णानुभवजन्यसंस्काराश्चरमेणार्थधीजनने सहकारिण इति न तन्मात्रोच्चारणादर्थधीरिति वर्णस्फोटवादिनां मतान्तरं दूषितम्। रामोऽस्तीति वक्तव्ये रामित्यनन्तरं घटिकोत्तरमकारोच्चारणेऽर्थबोधापत्त्या तादृशानुपूर्व्या एव शक्तावच्छेदकत्वौचित्यादिति दिक्।।४।। (६४)

"शक्तं पदम्" इति स्वीकुर्वि[1]: नैयायिकैः प्रकृतिप्रत्ययोः शक्त्यभ्युपगमात्तदभिमतः पदस्फोटोऽस्मदभितवर्णस्फोट एवान्तर्भवतीत्याशयेन वर्णस्फोटनिरूपणावसरे नैयायिकाभ्युपगतपदस्फोटं निरूपयित मूले [अथादेशा इति] नैयायिकमतपरिस्फोरणायैव "अथादेशाः" इति विशिष्योपादानम्। आदेशाः = तिविसर्गादयो वाचका यदि तदा पदस्फोटः = प्रकृतिप्रत्ययरूपः पदस्फोटो नैयायिकाभिमतः सिद्धः, स्फुटः = अस्मदभिमतवर्णस्फोटरूपतया स्फुट एवेति कारिकार्थः। एवं च "शक्तं पदम्" इति पराभिमतपदलक्षणाश्रयणेन प्रकृतिप्रत्ययरूपवर्णस्फोटप्रतिपादक एवायं ग्रन्थः। अत एव "सुप्तिङन्तं पदमिति पारिभाषिकपदस्य वाचकत्वं स्वीकर्तृणां मतमाह" इत्युत्तरग्रन्थसङ्गतिः। एतदाशयेनैव मूलं व्याचष्टे [एवमिति] तमेवाशयं स्पष्टयति [अयं भाव इति] वर्णानां = प्रकृतिप्रत्ययानाम्। पदस्य = शक्तं पदमिति लक्षणाक्रान्तस्य। [वाचकता सिद्ध्यतीति] - वाचकता च प्रकृतिप्रत्ययादौ व्यासज्यवृत्तिः, नतु प्रत्येकवर्णपर्याप्तेति तत्तत्प्रकृतिप्रत्ययादिसमुदायस्यैव वाचकता सिद्ध्यतीत्याशयः। शक्तेः प्रत्येकपर्याप्तत्वे दोषमाह [प्रतिवर्णमिति]। [आपत्तेश्चेति] प्रत्येकं सुबुत्पत्तौ तच्छ्रवणापत्तिरपि दोषो बोध्यः।

ननु ककारादिप्रत्येकवर्णानां वाचकतायाः केनाप्यनभ्युपगमात् "प्रतिवर्णमर्थस्मरणस्यानुभव-विरुद्धत्वात्" इत्यादिना दोषोपन्यसनस्याकाशभाषितत्वापत्तिरत आह [एतच्चेति]

"प्रतिवर्णमर्थस्मरणस्यानुभवविरुद्धत्वात्" इत्यादिदोषोपन्यसनमित्यर्थः। [व्यासज्यवृत्तित्वे इति] अनेकवर्णपर्याप्तत्वे इत्यर्थः। [मानाभावादिति] चरमवर्णानुभवोत्तरमेवार्थबोधोदयेन तत्रैव वाचकत्वविश्रान्तिरिति भावः। नन्वेवं चरमवर्णमात्रोच्चारणेऽपि अर्थबोधापत्तिरत आह [पूर्वपूर्वोति] - [इति वर्णस्फोटवादिनामिति] इत्येतादृशवर्णस्फोटवादिनामित्यर्थः। एवं च "वर्णपदेन ककारादिवर्ण एव विवक्षितः, स एव वाचकः। परं तु एकस्मिन् पदेऽनेकवर्णसत्त्वेऽप्यन्त्यवर्ण एव वाचकत्वं, पूर्वेषां तात्पर्यग्राहकतामात्रम्" इति वर्णस्पोटपक्षमुपपादयन्ति, तादृशमतान्तरदूषणायास्माभिरिदमुच्यत इति भावः। [दूषणायाभिहितमिति] तत्रैव दोषान्तरमाह [रामोऽस्तीति] एवशब्देन चरमवर्णमात्रव्यावृत्तिः। वस्तुतस्त्विदमयुक्तमेव, भाष्यानुक्तत्वात्तदाह [इति दिगिति]। ।।६४।।

इति वर्णस्फोटनिरूपणम्।

"सुप्तिङन्तं पदम्" इति परिभाषितपदस्य वाचकत्वस्वीकर्तृणां मतमाह -

घटेनेत्यादिषु न हि प्रकृत्यादिभिदा स्थिता।
वस्त्रसादाविवेहापि संप्रमोहो हि दृश्यते।।५।। (६५)

घटेनेत्यादौ 'घटे' इति प्रकृतिः, 'न' इति प्रत्ययः, 'घट्' इति प्रकृतिः, 'एन' इति प्रत्यय इति विभागस्य "सर्वे सर्वपदादेशाः" इति स्वीकारे विशिष्य प्रकृतिप्रत्ययोर्ज्ञानासम्भवान्न वाचकत्वमित्यर्थः। वैयाकरणैर्विभागः सुज्ञेय इत्यतो दृष्टान्तव्याजेनाह - वस्त्रसादाविति। "बहुवचनस्य वस्त्रसौ" इति समुदायस्यादेश-विधानान्नात्र तद्विभागः सम्भवतीत्यर्थः। ।।५।। (६५)

अन्नमयकोशस्य प्राणमयकोशादिद्वारा मुख्यब्रह्मज्ञानोपयोगितयान्नमयकोशापेक्षया द्वारभूतप्राणमयादिकोशानामिव वर्णस्फोटस्य पदस्फोटद्वारा मुख्यवाक्यस्फोटज्ञानोपयोगितया वर्णस्फोटापेक्षया द्वारभूत पदस्फोटस्यान्तरङ्गतयान्नमयकोशनिरूपणानन्तरं प्राणमयादिकोश-निरूपणवद्वर्णस्फोटनिरूपणानन्तरं पदस्फोटं निरूपयति [सुप्तिङन्तं पदमिति] परिभाषितपदस्य = शास्त्रकारसंकेतितपदस्य। स्वीकर्तृणां = वैयाकरणानाम्।

अयमत्र सङ्ग्रहः - "साधुशब्देऽन्तर्गताः" इत्यादिर्ग्रन्थः प्रकृतिप्रत्यया वाचका इत्यर्थकवर्णस्पोटनिरूपणपरः। "अथादेशाः" इत्यादिर्ग्रन्थः "शक्तं पदम्" इति वदतां नैयायिकानां

मतमाश्रित्य वैयाकरणाभिमतवर्णस्फोटनिरूपणपर एव। "घटेनेत्यादिषु" इत्यादिर्ग्रन्थो वर्णस्फोटोपमर्देन वैयाकरणाभिमतपदस्फोटप्रतिपादनपरः। एष एव विभागो ग्रन्थकृत्सम्मतः। तथैव पूर्वो ग्रन्थो मया व्याख्यातः - इति।

इतरे व्याख्यातारः सर्वेऽपि बभ्रमुरेव। "साधुशब्देऽन्तर्गताः" इत्यनेन प्रकृतिप्रत्ययघटकानां ककारादीनां वाचकत्वं, "अथादेशाः" इत्यनेन प्रकृतिप्रत्ययानां वाचकत्वं, "घटेनेत्यादिषु" इत्यनेन प्रकृतिप्रत्ययसमुदायस्य वाचकत्वं व्यवस्थाप्यत इत्यभिप्रयन्ति दर्पणकाराः। एतेषामयुक्तत्वं प्राङ्न्यवेदिषमेव।

पञ्चोलि बालकृष्णशास्त्रिणस्तु आद्यो ग्रन्थः प्रकृतिप्रत्यययोर्वाचकत्वं, द्वितीयः प्रकृतिप्रत्ययात्मकपदस्फोटस्य वाचकत्वं, तृतीयोऽखण्डपदस्फोटस्य वाचकत्वं च प्रतिपादयतीति व्याचचक्षिरे। एषामपि व्याख्या न समीचीना। "घटेनेत्यादिषु" इत्यनेन सखण्डपदपदस्फोटप्रतिपादनस्यैव ग्रन्थकृत्सम्मतत्वात्। अत एव "इदानीमखण्डपक्षमाह - पदे न वर्णा विद्यन्ते" इत्याद्युत्तरग्रन्थसङ्गतिः। "सखण्डस्फोटनिरूपणानन्तरकाले इत्यर्थः" इति पञ्चोलिनां तत्रत्यस्वोत्तरग्रन्थविरोधाच्च। "सुप्तिङन्तं पदमिति परिभाषितपदस्य वाचकत्वस्वीकर्तृणां मतमाह" इति ग्रन्थस्वारस्येन "अथादेशा वाचकाश्चेत्पदस्फोटस्ततः स्फुटः" इति पूर्वग्रन्थे पदशब्दस्य मदुक्तरीत्यार्थान्तरपरताया एव युक्तत्वाच्च।

भैरवमिश्रास्तु "आद्यग्रन्थेन प्रकृतिप्रत्ययानां, द्वितीयेन प्रकृतिप्रत्ययात्मकपदस्य, तृतीयेन प्रकृतिप्रत्ययविभागशून्यस्य पदस्य च वाचकत्वं बोध्यते" इत्यनुशेरते। तदपि न। तदुक्ताशयस्य "एवं च प्रकृतिप्रत्ययेषु विशिष्याज्ञायमानेष्वपि" इत्यादिना प्रदर्श्य मूल एव निराकरिष्यमाणत्वात्। यथा चायमर्थस्तत्रास्माभि स्समनन्तरमेव प्रदर्शयिष्यते।। "तस्मात्प्रकृतिप्रत्ययादौ तत्तत्समूहे शक्तिर्व्यासज्यवृत्तिर्नतु प्रत्येकं वर्णपर्याप्ता" इति "अथादेशा" इति कारिकाभागीयभूषणग्रन्थपर्यालोचने तत्र पदशब्दस्य प्रकृतिप्रत्ययरूपपदपरताया एव लाभाच्च।

काशिकाकारास्तु पूर्वग्रन्थो वर्णानां वाचकत्वमभिधत्ते, द्वितीयतृतीयावुभावपि पदस्य वाचकत्वं बोधयत इति भावमाविश्चक्रुः। तदत्यन्तमसङ्गतमिति न विविच्य वक्तव्यम्।

पदस्फोट इत्यस्य पदमेव वाचकमित्यर्थः, तं पक्ष मुपपादयति [घटेनेत्यादाविति]। [विभागस्येति] अस्य ज्ञानासम्भवादित्यत्रान्वयः। [प्रकृतिप्रत्यययोरिति] अनेन पूर्वो ग्रन्थः सर्वोऽपि प्रकृतिरूपस्य प्रत्ययरूपस्य च वर्णस्य, मतान्तरे पदस्य वा वाचकत्वसमर्थनपर इति स्पष्टमवगम्यते। अस्य न

वाचकत्वमित्यत्रान्वय। [ज्ञानसम्भवादिति] अतः प्रकृतिप्रत्यययोर्वाचकत्वासम्भवात्तत्परित्यागेन पदस्फोट एवाश्रयणीय इति भावः। "वस्नसादौ" इति मूलमवतारयति [वैयाकरणैरिति] ननु वस्नसादीनामपि पक्षत्वेन तेषां दृष्टान्तत्वासङ्गतिरत आह [दृष्टान्तव्याजेनेति]। [नात्रेति] अयमर्थः - रामस्य, हरिभ्यामित्यादौ प्रकृतिप्रत्ययविभागः स्पष्ट मवगम्यते। घटेनेत्यादौ "टाङसिङसामिनात्स्याः" इति सूत्रार्थज्ञानवतां तद्विभगः सुलभस्तथापि वः नः ते मे इत्यादिषु तद्विभागो दुर्विज्ञेय एव। तथाहि - "बहुवचनस्य वस्नसौ" इत्यत्र "पदस्य" "पदात्" "अनुदात्तं सर्वमपादादौ" इत्यधिक्रियन्ते। पदात्परयोरपादादिस्थयोः षष्ठ्यादिविशिष्टयोर्युष्मदस्मदोर्वस्नसादय आदेशा इति तदर्थः। एवं च युष्मद् + शस् अस्मद् + शस् इत्यादिप्रकृतिप्रत्ययसमुदायस्य वस्नसादय आदेशाः। स्थानिनः सुबन्तत्वेन पदत्वादादेशस्य वस्नसादेरप्यतिदेशेन पदत्वम्। नहि घटेनेत्यादौ प्रकृतिप्रत्ययविभागज्ञानजनकटाङसीतिसूत्रवद्वस्नसादौ तज्जनकं पाणिनीयं सूत्रमस्ति येन तद्विभागः सुज्ञेयः स्यात्। अतस्तत्र समुदायस्यैव वाचकत्वमास्थेयमिति सर्वत्रापि तथैवोचितमन्यथाऽर्धजरतीयतापत्तिरित्याशयेन पदस्फोट आस्थितः। वस्नसादीनादेशान् विदधतः पाणिनेराचार्यस्य चेतसि पदस्पोटपक्ष एव वर्तते - इति।

नच आम् अस् इत्यादेः प्रत्ययत्वस्य दृष्टतया वाम् नः इत्यादावामादेरानुमानिकं प्रत्ययत्वमितरस्य च प्रकृतित्वमिति तत्रापि प्रकृतिप्रत्ययविभागस्य ज्ञातुं शक्यत्वान्नेदं युक्तमिति वाच्यम्। वामित्यादावामादेः प्रत्ययत्वानुमापकपाणिनीयव्यवहारस्याभावात्। अस्मदादिव्यवहारस्य तदनुमापकत्वेऽतिप्रसङ्गात्। असादेर्धातुत्वदर्शनात्सुमनस इत्यादावसादेर्धातुत्वापत्तेः। नच तस्य धातुत्वेऽपि न दोषः, सत्त्वार्थकतया ततस्तिङाद्यनुत्पत्तेरिति वाच्यम्। धातुस्वरस्यापाद्यत्वात्। नचैकदेशस्य अस् इत्यादेरनर्थकतया न धातुत्वापत्तिरिति वाच्यम्। वामित्यादावामादेरप्यनर्थकतया प्रत्ययत्वासम्भवात्। नच घटेनेत्यादावपि समुदायादेशपक्षेऽवयवस्यानर्थकतया न तद्विभागः सुज्ञान इति वाच्यम्। इष्टत्वात्।

एतेन आमादौ प्रत्ययत्वस्य दृष्टतया वामित्यादावामः व इत्यादावसः प्रत्ययत्वमितरस्य प्रकृतित्वमनुमातुं शक्य मित्युक्तरीत्या न प्रकृतिप्रत्ययसमुदायरूपपदस्य वाचकत्वसिद्धिः - इति दर्पणोक्तमपास्तम्।

किञ्च राम इत्यत्र विसर्गे रामादित्यत्र आत् इत्यत्र च प्रत्ययत्वस्य दृष्टतया अजर्घाः अचकात् इत्यादावपि आद्विसर्गयोः प्रत्ययत्वस्य इतरांशस्य प्रकृतित्वस्य च तदुक्तरीत्यानुमातुं शक्यतया "अजर्घाः अचकादित्यादौ त्वगत्या 'शिष्यमाणं लुप्यमानाभिधायि' इति न्यायेन प्रकृतिभागस्य

वाचकत्वम्" इति तदुक्तेरसङ्गत्यापत्तेश्च। "अस्तु वा तत्रापि लुप्तप्रत्ययानुसन्धानाद्बोधकत्वम्" इत्यपि तदुक्तं न युक्तम्। प्रत्ययानुसंधाने नियामकाभावात्। "प्रकृतेः स्वार्थविशिष्टप्रत्ययार्थे लक्षणया वा बोधः" इत्यपि तदुक्तं न युक्तम्। अनुपपत्तिप्रतिसन्धानं विनापि बोधात्। लक्षणास्वीकारापेक्षया समुदायशक्तिस्वीकारस्यैव युक्तत्वाच्चेति दिक्।

तद्विभागः = प्रकृतिप्रत्ययविभागः। [इत्यर्थ इति] अयं च पक्षः "आद्यन्तौ टकितौ" इति सूत्रस्थभाष्यग्रन्थाल्लभ्यते। तत्र हि "कौ पुनष्टकितावाद्यन्तौ भवतः" इत्याशङ्कायाम् "आगमौ" इत्युक्ते नित्यशब्दविषये आगमानुशासनं न युक्तमिति शङ्किते "संज्ञाधिकारोऽयम्" इत्येकदेशयुक्तौ सिद्धान्तिना "अथवा यत्तावदयं सामान्ये नोपदेष्टुं शक्नोति तत्तावदुपदिशति। प्रकृतिं ततो वलाद्यार्धधातुकं, ततः पञ्चादिकारम्। अथवा एतया आनुपूर्व्या शब्दान्तरमुपदिशति प्रकृतिं वलाद्यार्धधातुकं ततः पञ्चादिकारम्" इति द्विधा समाहितम्। "नित्यं पदमनेनोपायेनान्वाख्यायते" इति "अनेनासत्यप्रत्ययोपदेशेन सत्यस्य पदस्य व्युत्पादनं क्रियते। रेखागवयेनेव सत्यगवयस्य" इति च कैयटः। "वाचकस्यैवानया प्रणाल्या व्युत्पादनम्" इति प्रथमपक्षस्य "कल्पितस्यानेन साक्षाद्बोधनं, तेन चाखण्डस्य बोधकस्य बोधनम्" इत्युत्तरपक्षस्य चाशयमुद्द्योतकार आह। तत्र च प्रथमपक्षः प्रकृते साधकः। "नित्येषु शब्देषु कूटस्थैरविचालिभिर्वर्णैर्भवितव्यम्" इति तत्र भाष्ये तस्य सखण्डत्वमप्युक्तमिति दिक्।।६५।।

सुप्तिङन्तचयरूपवाक्यस्यापि तदाह -

हरेऽवेत्यादि दृष्ट्वा च वाक्यस्फोटं विनिश्चिनु।
अर्थे विशिष्य सम्बन्धाग्रहणं चेत्समं पदे।।६।। (६६)
लक्षणादधुना चेत्तत्पदेऽर्थेऽप्यस्तु तत्तथा।

हरेऽव विष्णोऽवेत्यादौ पदयोः "एङः पदान्तादति" इत्येकादेशे सति न तद्विभागः सुज्ञानः। तथा च प्रत्येकपदाज्ञानेऽपि समुदायशक्तिज्ञानाच्छाब्दबोधात्समुदायेऽप्यावश्यिका शक्तिः।

एवं प्रकृतिप्रत्ययेषु विशिष्याज्ञायमानेष्वपि समुदायव्युत्पत्त्या बोधात्तत्राप्यावश्यिकैव शक्तिरिति भावः।

वस्तुतः पदैः पदार्थबोधवद्वाक्येन वाक्यार्थबोध इति पदार्थशक्तिः पदेष्विव वाक्यार्थशक्तिर्वाक्येऽभ्युपेयेति पदस्फोटवाक्यस्फोटौ व्यवस्थितौ। अन्यथा घटः

कर्मत्वमानयनं कृतिरित्यादौ तादृशव्युत्पत्तिरहितस्यापि बोधप्रसङ्गः। घटमानयेत्यत्रैव पदार्थानामुपस्थितौ सत्यपि तात्पर्यज्ञाने बोधाभावाच्च। तत्रैव घटकर्मकमानयनमिति बोधे घटार्थकप्रातिपदिकोत्तरं कर्मत्ववाचकविभक्तेस्ततो धातोस्तत आख्यातस्य समभिव्याहारः कारणमिति कार्यकारणभावज्ञानवतो बोधात्तज्ज्ञानमपि हेतुरिति चेत्तर्हि सिद्धो वाक्यस्फोटः, छटादिपदार्थबोधे बोधकतारूपपदशक्तिज्ञानकार्यकारणभावस्येव विशिष्टवाक्यार्थबोधे पदसमभिव्याहाररूपवाक्यनिष्ठबोध कतारूपवाक्यशक्तिज्ञानस्यापि हेतुत्वकल्पनात्। अर्थोपस्थापकज्ञानविषयशब्दवृत्तिज्ञानकारणत्वस्यैव शक्तित्वात्। युक्तं चैतत्, विषयतासम्बन्धेन शाब्दबोधमात्रे वृत्तिज्ञानस्य लाघवेन हेतुत्वसिद्धेः। विवेचितं चैतद्दूषणे।

पदार्थज्ञानस्य वाक्यार्थज्ञानफलकत्वात्पदस्फोटनिरूपणानन्तरं वाक्यस्फोटनिरूपणमित्याशयेन मूलमवतारयति [सुप्तिङन्तेति] तत् = वाचकत्वम्। [पदयोरिति] वर्णयोरादेशपक्षे पदावयवोरित्यर्थः। "सर्वे सर्वपदादेशाः" इति पक्षे तु यथाश्रुत एवार्थः। [आवश्यिका शक्तिरिति]। अयं च पक्षः पस्पशायां "येनोच्चारितेन" इत्यादिभाष्यार्थतया कैयटेनोपवर्णितः। तथा प्रघट्टकान्तरे "किं पुनः" इति भाष्यप्रतीकमुपादाय "वर्णस्फोटं केचिदाहुः। अपरे पदस्फोटं वाक्यस्फोटं चाहुः" इति कैयटेनोक्तम्।

"समुदायेऽप्यावश्यिका शक्तिः" इत्यत्रापिशब्देन वाक्यावयवपदेऽपि शक्तरिति लभ्यते। समुदाये = पदसमुदाये वाक्ये अपिना = तदवयवपदेषु इति तदर्थात्। "प्रत्येकपदाज्ञानेऽपि" इत्युक्त्या च यत्र पदज्ञानासम्भवस्तद्विषयक एवायं पक्ष इति लभ्यते। तथाच यत्र पदज्ञानासम्भवस्तद्विषयक एव वाक्यस्फोटः। यत्र तु पदज्ञानसम्भवस्तत्र पदस्फोट एवेति प्रकृतग्रन्थाशयः। एवं पदस्फोटविषयेऽपि विषयविभागो ज्ञेय इत्याशयेन पुनरप्यत्र पदस्फोटपक्षं प्रस्तौति [एवमिति] निरुक्तरीत्या वाक्यशक्तिस्वीकारवदित्यर्थः। [तत्रापीति] तत्र = पदे, अपिना तदवयवे प्रकृतिप्रत्ययरूपे वर्णे। एवञ्च यत्र प्रकृतिप्रत्ययज्ञानसम्भवो यथा - रामस्य हरिभ्यामित्यादौ, तत्र वर्णशक्त्यैव निर्वाहः। यत्र तु तदसम्भवो यथा - घटेन वः नः इत्यादौ, तत्रैव पदशक्तिः स्वीकार्येति भावः।

तदेतद्दूषयति [वस्तुतस्त्विति] पदशक्तिस्वीकारे पदस्फोटस्तदुपमर्देन वाक्यशक्तिस्वीकारे वाक्यस्फोट इत्येव युक्तं, नतु निरुक्तरीत्येति तात्पर्यम्। [व्यवस्थितावितिं] अयमर्थः - वाक्ये शक्त्यभ्युपगमे वाक्यस्फोट इति व्यवहारः। तत्र पदविभागज्ञानाज्ञानयोरनुपयोग एव। एवं पदे

शक्त्यभ्युपगमे पदस्फोटव्यवहारः। तत्रापि प्रकृतिप्रत्ययविभागज्ञानाज्ञानयोरनुपयोग एव। ज्ञेयब्रह्मज्ञानोपयोगितया पञ्चकोशकल्पनावदियं वर्णपदकल्पनाखण्डवाक्यस्फोटज्ञानोपयोगितया शास्त्रे स्वीक्रियते। पूर्वपूर्वप्रदर्शिते पक्षे दोषप्रदर्शनेनोत्तरोत्तरः पक्षः परिगृह्यते। अतः पूर्वः पक्षः प्रथमतः समग्रः प्रदर्शनीयः। अन्ततस्तत्रारुचिप्रदर्शनेनोत्तरः परिगृह्यते। एषैव रीतिरन्नमयादिकोशपञ्चके दृश्यते। तद्वदत्रापि वर्णपदवाक्यस्फोटाः प्रतिपाद्यन्ते। तत्तत्पक्षप्रदर्शनं प्रथमतः कर्तव्यम्। तदुपमर्देनोत्तरः पक्षः प्रदर्श्यते। अवयवज्ञानाज्ञानापेक्षया पदे शक्तौ पदस्फोटः, वाक्ये तत्स्वीकारे वाक्यस्फोट इति विविक्ततया तौ पक्षौ व्यवस्थितावेव। मूले "हरेऽवेत्यादि" इत्युपन्यासस्तु पदस्फोटोपमर्देन वाक्यस्फोटपरिग्रहार्थः - इति।

ननु चैत्रः पचतीत्यादौ पदज्ञानसम्भवात्पदशक्त्यैव निर्वाहात्किमतिरिक्तवाक्यशक्तिकल्पनयेति चेन्न, पदैः पदार्थानामुपस्थितावपि वाक्यार्थे वृत्तिं विना शाब्दबोधविषयत्वासम्भवेन तदर्थं समुदायशक्तेरावश्यकत्वात्। नचाकाङ्क्षादिसहकारेण पदान्येव वाक्यार्थबोधकानि भविष्यन्तीत्यलमतिरिक्तशक्तिकल्पनयेति वाच्यम्। समुदायशक्त्यैव निर्वाहे गुरुभूताकाङ्क्षायोग्यतादिज्ञानस्य कारणताकल्पने मानाभावात्। विस्तरस्तु भूषणादितोऽवसेयः।

वाक्यशक्तेरावश्यकतां दर्शयति [अन्यथेत्यादिना पदार्थानामुपस्थितावित्यन्तेन] अन्यथेत्यस्य वाक्यशक्त्यनङ्गीकारे इत्यर्थः। "पदार्थानामुपस्थितौ" इति हेतुगर्भं विशेषणम्। वाक्यशक्तिमनङ्गीकृत्य पदशक्त्यैव निर्वाह इति स्वीकारे घटमानयेत्यत्रेव घटः कर्मत्वमानयनं कृतिरित्यत्रापि पदार्थानामुपस्थितेः सत्त्वाद् घटकर्मकमानयनमिति शाब्दबोधापत्तिरित्यर्थः। ननु घटः कर्मत्वमित्यत्र तादृशबोधो जायतामिति व्युत्पत्तिमतो बोध इष्ट एवेत्यत आह [तादृशव्युत्पत्तिरहितस्येति] घटः कर्मत्वमित्यादिकं तादृशबोधजनकं भवत्विति व्युत्पत्तिशून्यस्येत्यर्थः। विपरीतव्युत्पत्तिरहितस्येति यावत्। एवंच विपरीतव्युत्पन्नस्य घटः कर्मत्वमित्यादितो बोधे उभयेषामपि इष्टापत्तिरेव। परं तु पदशक्तिवादिनां मते विपरीतव्युत्पत्तिरहितस्यापि तत्र कारणभूतायाः पदार्थोपस्थितेः सत्त्वाद्बोधापत्तिर्दुर्वारा। अस्माकं तु विशिष्टे शक्तेरभावान्न ततस्तत्र बोध इत्युपपद्यत इति भावः।

पदस्फोटवादी शङ्कते [सत्यपीति] अस्य नन्वित्यादिः। 'घटमानयेत्यत्रेव पदार्थानामुपस्थितौ' इति मध्यमणिन्यायेनात्रापि सम्बध्यते। 'तादृशव्युत्पत्तिरहितस्य' इत्यत्राप्यनुषज्यते। बोधाभावाच्चेति चकारो भिन्नक्रमः। "कार्यकारणभावज्ञानवतो बोधात्" इत्यत्र बोधादित्यनन्तरं योज्यः। तत्रैवेत्यस्य

तस्मिन्नेवेत्यर्थः। इदं च बोध इत्यस्य विशेषणम्। समभिव्याहाररूपाकाङ्क्षास्वरूपं दर्शयति [घटार्थकेति] [तज्ज्ञानमपीति] आकाङ्क्षाज्ञानमित्यर्थः। अपिना तात्पर्यज्ञानम्। "सत्यपि तात्पर्यज्ञाने बोधाभावात्" इत्यनेन आकाङ्क्षाज्ञानव्यतिरेकः "तत्रैव घटकर्मकः ... ... कार्यकारणभावग्रहवतो बोधाच्च" इत्यनेन आकाङ्क्षाज्ञानान्वयश्च प्रतिपद्यते। अयमर्थः - घटमानयेत्यत्रेव घटः कर्मत्वमानयनं कृतिरित्यत्र पदार्थानामुपस्थितावपि तात्पर्यज्ञाने सत्यपि विपरीतव्युत्पत्तिरहितस्य बोधाभावात्तस्मिन्नेव बोधे घटार्थकघटपदं तदुत्तरं कर्मार्थकविभक्तिस्तदुत्तरं धातुस्तदुत्तरमाख्यातमित्यादिसमभिव्याहारः कारणमिति कार्यकारणभावज्ञानवतो बोधाच्चान्वयव्यतिरेकाभ्यां तादृशबोधे तादृशाकाङ्क्षाज्ञानस्य कारणताया अवश्यवक्तव्यतया घटः कर्मत्वमानयनं कृतिरियत्र तादृशाकाङ्क्षारूपकारणाभावाद्विपरीतव्युत्पत्तिरहितस्य बोधवारणसम्भवात्तत्र तद्वारणाय वाक्यशक्तिस्वीकारो व्यर्थ एव - इति। [हेतुरिति] तथाचैतादृससमभिव्याहाररूपकारणाभावादेव घटः कर्मत्व मित्यत्र विपरीतव्युत्पत्तिरहितस्य न बोध इत्यर्थः। एवं चैतदर्थं वाक्यशक्तिस्वीकारो व्यर्थ एवेति भावः।

समाधत्ते [तर्हीति] समभिव्याहाररूपाकाङ्क्षाज्ञानस्य बोधकारणत्वाभ्युपगमे इत्यर्थः। [सिद्धो वाक्यस्फोट इति] वाक्यस्य तादृशसमभिव्याहाररूपत्वेन तत्र बोधजनकतायास्त्वयाप्यभ्युपगत्वेन बोधजनकतैव शक्तिरिति प्राग्व्यवस्थापितत्वेन वाक्यस्फोटोऽभ्युपगत एव, परन्तु वाक्यशक्तिराकाङ्क्षेति परपरिभाषणमात्रमवशिष्यत इति भावः। तदेतदाह [घटादिपदेति]। [कार्यकारणभावज्ञानस्येवेति] सर्ववादिभिरभ्युपगमादस्य दृष्टान्तत्वेनोपादानम्। पदवाक्यस्फोटयोर्व्यवस्थितत्वबोधनार्थं चेति बोध्यम्। [पदसमभिव्याहारेति] पदसमभिव्याहारः घटपदं ततः कर्मार्थकविभक्तिः, तत आङ्पूर्वकनीधातुस्तत आख्यातमिति निरुक्तपदसमभिव्याहारः, तद्रूपं वाक्यं = तदात्मकं वाक्यम्, तन्निष्ठा या बोधकता = त्वदङ्गीकृता बोधकारणता तद्रूपस्य वाक्यशक्तिज्ञानस्यापीत्यर्थः। अपिशब्दः पददृष्टान्तापेक्षया। ननु शाब्दबोधहेतुभूतार्थोपस्थितिजनकत्वं शक्तित्वं, तच्च पदे एव, न वाक्ये। तन्निष्ठबोधकतायास्तादृशोपस्थित्यजनकत्वात्। एवं च समभिव्याहारस्य बोधकारणत्वाभ्युपगमेऽपि न वाक्यस्फोटसिद्धिरत आह [अर्थोपस्थापकेति] अर्थोपस्थापकं यज्ज्ञानं तस्मिन् विषयो यश्शब्दस्तद्वृत्ति यद्बोधकारणत्वं तस्यैवेत्यर्थः। तादृशज्ञानविषयश्च शब्दो वाक्यरूप इति तन्निष्ठबोधजनकत्वस्यैव शक्तित्वं स्वीकार्यं, नतु तादृशज्ञानविषयपदेति निवेशेन पदवृत्तबोधजनकत्वस्यैव शक्तित्वं स्वीकार्यमिति भावः। ननु शब्दपदनिवेशेऽपि शब्दपदेन पदस्यैव ग्रहणेन तद्वृत्तिबोधजनकत्वस्यैव शक्तित्वं कुतो

न? इत्यत आह [युक्तं चैतदिति] एतत् + च = एतदेव = शब्द इति सामान्यपदोपादानेन वाक्यरूपशब्दस्य ग्रहणेन तन्निष्ठबोधजनकत्वस्यैव शक्तित्वमित्येतदेवेत्यर्थः। युक्तिमेवाह [विषयतासम्बदेनेति] विषयतासम्बन्धेन जायमानशाब्दबोधे विषयतासम्बन्धेन वृत्तिज्ञानस्य हेतुत्वं लाघवात्। अन्यथा पदवृत्तिज्ञानत्वेन कारणत्वमिति विशिष्याभ्युपगमे गौरवम्। तथाहि - परनये घटमानयेत्यत्र घटपदशक्तिमजानतोऽपि तां जानत इव बोधापत्तिवारणाय घटशाब्दबोधे घटार्थकपदवृत्तिज्ञानं कारणमिति कार्यकारणभावोऽवश्यमभ्युपेयः। तथाचार्थभेदेनानन्तकार्यकारणभावकल्पनापत्त्या गौरवम्। मम तु घटे विषयतासम्बन्धेन वृत्तिजन्योपस्थितिरूपकारणाभावान्न शाब्दापत्तिरिति न तत्कल्पनावसर इति भावः। तदेतदाह - [लाघवेनेति] न च पदार्थशाब्दत्वमेव वृत्तिज्ञानकार्यतावच्छेदकमिति वाच्यम्। वाक्यार्थस्यापि पदार्थत्वेन तस्यापि तत्कारणतावच्छेदकतयास्मदभीष्टार्थसिद्धेः, अस्मन्मतेऽनन्यलभ्यस्य संसर्गस्यैव वाक्यार्थत्वेन तस्य 'वाक्यार्थः' 'संसर्गः' इत्यादीनां पदानां वाच्यत्वावश्यकत्वत्। तदेतदाह [प्रपञ्चितं चैतदिति] अत्र इतरे सर्वेऽपि व्याख्यातारः शिष्यबुद्धिव्यामोहिनीं विसंष्ठुलां कौण्डभट्टस्यानभिमतां सरणिमाश्रित्य व्याचचक्षिरे। ते प्रकृतग्रन्थार्थतत्त्वं नाग्रहीषुरेव।

ननु वाक्यार्थस्यापूर्वत्वात्कथं तत्र शक्तिग्रह इत्याशङ्क्याह - अर्थ इति। वाक्यस्येति शेषः। वाक्यस्य वाक्यार्थे विशिष्य शक्त्यग्रहणं चेत्तर्हि पदेऽपि समम्। पद एवान्वयांशे शक्तिरिति पक्षेऽपि तद्ग्रहासम्भवस्तुल्य इत्यर्थः। यदि च पदशक्तिः पदार्थांशे ज्ञाताऽन्वयांशे चाज्ञातोपयुज्यते इति कुब्जशक्तित्वादस्तदा ममापि वाक्यशक्तिरज्ञातैवोपयुज्यत इति वादाभ्युपगमस्तुल्य इति भावः। ननु वृद्धव्यवहारं पश्यतो मनसा पदार्थवदन्वयांशेऽपि तद्ग्रह इति चेत्तुल्यमित्याह - लक्षणादिति। लक्ष्यते तर्क्यतेऽनेनेति लक्षणं मनस्तस्मात्। अपिः पदपदोत्तरं बोध्यः। पदेऽपि लक्षणात्तद्ग्रहश्चेत्तर्ह्यस्तु वाक्येऽपीति शेषः। वस्तुतस्तु समुदितार्थे विशिष्टवाक्यस्यैव प्रथमं तद्ग्रहः। आवापोद्वापाभ्यां परं प्रत्येकं तद्ग्रह इति बोध्यम्।।।६६ १/२।। (६६ १/२)

पदानामन्विते शक्तिः। तादृशपदैरेव वाक्यार्थप्रतीत्युपपत्त्या वाक्ये शक्तिकल्पनं न युक्तं, गौरवादित्यन्विताभिधानवादिनामाशङ्कासमाधानपरतया मूलमवतारयति [नन्विति] [अपूर्वत्वादिति] शाब्दबोधात्पूर्वमनुपस्थित्या तस्य तत्त्वमित्यर्थः। मूले सबन्धपदशक्तिपरमित्याशयेनाह [शक्तिग्रह

इति] ननु पदेऽपि सममित्यनुपपन्नं तत्र कोशव्याकरणादिना शक्तिग्रहस्य सुलभत्वादित्यतः शेषपूरणेन व्याचष्टे [वाक्यस्येति शेष इति]। [पक्षेऽपीति] घटमानयेत्यादौ घटादिपदेन न केवलः स्वार्थः प्रतिपाद्यते। किन्त्वानयनक्रियान्वितघटादिरेव। तथा आनयेत्यपि घटपदार्थान्वितमानयनमेव प्रतिपादयति, न केवलं स्वार्थम्। केवलपदप्रयोगे त्वितरान्वितो घटो बोध्यत इति तेषामाशयः। [तुल्य इति] तन्मतेऽपीतरांशस्य पदार्थबोधात्पूर्वमनुपस्थितत्वात्कथं तत्र शक्तिग्रह इत्यर्थः। "वादाभ्युपगमस्तुल्य एव" इत्यनेनात्रपक्षेऽनादरः सूचितः। अत एव मूले पक्षान्तरमुपात्तम्। तद्बीजं - त्वज्ञाताया वृत्तेरनुपयोग एव - इति। "लक्षणात्" इति मूलमवतारयति [नन्विति] लक्षणात् = अनुशासनात् सूत्रवार्त्तिकभाष्यकाराणामन्यतमादिति केचिद्व्याचख्युः, तदयुक्तमिति ध्वनयन्नाह [लक्ष्यते = तर्क्यते इति] ननु "पदेऽर्थेप्यस्तु तत्तथा" इति मूलेऽपिशब्दो नोपपद्यते। तत्रत्यार्थपदस्य वाक्यर्थपरतया तदुत्तरवर्तिना तेन पदार्थस्य सङ्ग्रहापत्तेः, पदार्थे शक्तिग्रहस्याऽप्रतिक्षेपादत आह [अपिरिति] सच त्वर्थकः। पदानामन्विते शक्तिरिति वादिनां मते पदे तु मनसः शक्तिग्रह इति चेत्सममस्माकं वाक्यशक्तिवादिनामिति भावः। मूले - तत् = सम्बन्धग्रहणम्। ननु मनसैव वाक्यार्थोपस्थित्यभयुपगमे तव शब्दादरस्तन्निष्ठशक्त्यादरश्च व्यर्थ इति चेत्सत्यम्। किन्तु मानसं ज्ञानं प्रायः संशयरूपं दुर्वारमित्याशयेन तदा दरः। शक्तिग्रहे तु लिङ्गादेर्निर्णायकस्य सत्त्वान्न संशय इति बोध्यम्।

इदं च प्रथमतः पदार्थानामुपस्थितावनन्तरं वाक्यार्थोपस्थितिरित्याशयेनोक्तम्। वस्तुतस्तु वाक्यस्य प्रथमतो वाक्यार्थ एव शक्तिग्रहो जायत इति वाक्यस्फोटो दुरपह्नव इत्याह [वस्तुतस्त्विति]। [तद्ग्रह इति] शक्तिग्राहकशिरोमणिना नयनाऽऽनयनाद्यात्मकव्यवहारेण शक्तिग्रह इति भावः। आवापः = पदस्य प्रक्षेपः। उद्वापः = पदस्य त्यागः। परं = तु। प्रत्येकम् = एकैकपदस्य। तद्ग्रहः = शक्तिग्रहः। ।।६६ १/२।।

इयमेव मीमांसकानां वेदान्तैकदेशिनां च गतिरित्याह -

सर्वत्रैव हि वाक्यार्थो लक्ष्य एवेति ये विदुः।।७।। (६७)
भाट्टास्तेऽपीत्थमेवाहुर्लक्षणाया ग्रहे गतिम्।

भाट्टा इति तदनुयायिनां वाचस्पतिकल्पनरुप्रभृतीनामुपलक्षणम्।

ननूक्तपक्षद्वयमनुपपन्नम्, उत्पत्तेरभिव्यक्तेर्वैकदाऽसम्भवेन वर्णसमूहरूप-पदज्ञानासम्भवात्। तथा च सुतरां तत्समूहरूपवाक्यज्ञानासम्भव इति चेन्न,

उत्तरवर्णप्रत्यक्षसमयेऽव्यवहितोत्तरत्वसम्बन्धेनोपस्थितपूर्ववर्णवत्त्वं, तथा तदुत्तरप्रत्यक्षकाले उपस्थितविशिष्टतद्वर्णवत्त्वं तस्मिन्सुग्रहमिति तादृशानुपूर्वीघटितपदत्वस्येव वाक्यत्वस्यापि सुग्रहत्वात्। ।।७ १/२।। (६७ १/२)

वाक्यस्य वाक्यार्थे न शक्तिः, पदैः पदार्थानामुपस्थितौ वाक्यार्थे लक्षणयैव सर्वनिर्वाहादिति भाट्टानामाशङ्कासामाधानपरतया मूलमवतारयति [इयमेवेति] वाक्यशक्तिस्वीकृतिरेवेत्यर्थः। वाक्यस्य वाक्यार्थे शक्त्यनभ्युपगमे शक्यसम्बन्धरूपा लक्षणापि तेषां न युज्यत इत्याशयः। मूले [सर्वत्रैव हीति] हि = यतः। सर्वत्रैव = एकपदप्रयोगेऽपि प्रविशेत्यादावपि। वाक्यार्थो लक्ष्य एवेति ये भाट्टा आहुस्तेऽपि वाक्यस्य वाक्यार्थे लक्षणास्वीकारे गतिं = मार्गं शरणं वदन्तीत्याशयः। तदुक्तं भट्टैः -

"न विमुञ्चेन्ति सामर्थ्यं वाक्यार्थेऽपि पदानि नः।
वाक्यर्थो लक्ष्यमाणो हि सर्वत्रैव च दृश्यते।। इति।

[उक्तपक्षद्वयमिति] पदं वाचकं, वाक्यं वाचकमित्युपन्यस्तं पक्षद्वयमित्यर्थः। अनुपपत्तिमेव दर्शयति [उत्पत्तेरिति] इदं वर्णा जन्या अत एवानित्या इति वादिनां मते। वर्णनित्यतावादिमतेनाह [अभिव्क्तानामिति] [एकदाऽसम्भवेनेति] पूर्ववर्णस्थितकाले न द्वितीयवर्णोत्पत्ति। पूर्ववर्णनाशोत्तरं यत्नान्तरेण द्वितीयवर्ण उत्पद्यते। स्पष्टं चेदं "यावद्गकारे वाग्वर्तते न तावदौकारे" इत्यादिना "संहितायाम्" इति सूत्रे भाष्ये। वर्णनित्यतावादेऽपि एकदाऽभिव्यक्तेरसम्भव एवेति भावः। वाक्यशक्तिमनभ्युपगच्छतामपि पदज्ञानं दुर्लभमेव। तदुपपत्तये पदशक्तिवादिभिर्यैव रीतिरङ्गीक्रियते, सैव वाक्यशक्ति-ज्ञानेऽप्युपयुज्यत इत्याशयेनाह [उत्तरवर्णप्रत्यक्षसमय इति] [उपस्थितविशिष्टेति] उपस्थितो यः पूर्ववर्णविशिष्टस्तद्वत्त्वमित्यर्थः।

इदानीमखण्डपक्षमाह -

पदे न वर्णा विद्यन्ते वर्णेष्ववयवा न च ।।८।। (६८)
वाक्यात्पदानामत्यन्तं प्रविवेको न कश्चन।

पदे = पचतीत्यादौ न वर्णाः। नातो वर्णसमूहः पदमिति शेषः। दृष्टान्तव्याजेनाह - वर्णेष्विति। एकारौकारलृकारऋकारादिवर्णेष्ववयवाः प्रतीयमाना अपि यथा नेत्यर्थः। क्वचिद् 'इव' इत्येव पाठः। एवं वाक्येऽप्याहवाक्यादिति। पदानामपि वाक्यात्प्रावेको भेदो नास्तीत्यर्थः। अंय भावः -वाक्यं पदं चाखण्डमेव, न तु वर्णसमूहः, अनन्तवर्णकल्पने

मानाभावात्। तत्तद्वर्णोत्पादकत्वेनाभिमतवायुसंयोगनिष्ठं तत्तद्वर्णजनकताया व्यञ्जकताया वावछेदकं वैजात्य मादायैव ककारो गकार इत्यादिपतीतिवैलक्षण्यसम्भवात्। स्पष्टं हि भामत्याम् - "तारत्वादि वायुनिष्ठं वर्णेष्वारोप्यते" इत्युक्तं देवताधिकरणे। न चैवं वायुसंयोग एव वाचकः किं न स्यादिति वाच्यम्, प्रत्यक्षोपलभ्यमानककारादेरेव वाचकत्वस्यानुभवसिद्धत्वात्। तथा च वाचकत्वान्यथानुपपत्त्या तदेवेदं पदं तदेवेदं वाक्यं सोऽयं गकार इति प्रतीत्या च स्फोटोऽखण्डः सिद्ध्यति।

एतेन गौरित्यादौ गकारौकारविसर्गादिव्यतिरेकेण स्पोटाननुभवाछ्रूयमाणवर्णानामेव वाचकत्वमस्त्विवत्यपा स्तम्, तेषां स्फोटातिरिक्तत्वाभावात्।

[इदानीमिति] सखण्डस्फोटनिरूपणानन्तरकाल इत्यर्थः। पदवाक्ययोरखण्डत्वे सर्वेषां वादिनां विप्रतिपन्नत्वात्तादृशे महति सङ्कटे वृद्धानां वाक्योदाहरणेनैव समाधानमुचितमित्याशयेन दीक्षितमहाशयो वाक्यपदीयप्रथमकाण्डस्थां त्रिसप्ततितमां कारिकामुदाहरति [पदे न वर्णा इति] अयं च पक्ष आद्यन्ताविति सूत्रस्थपूर्वोक्तभाष्यकैयटाभ्यां प्रतिपादितद्वितीयपक्षात्, येनोच्चारितेत्यादिभाष्यव्याख्यावसरे 'वैयाकारणा वर्णव्यतिरिक्तस्य पदस्य वाक्यस्य वा वाचकत्वमिच्छन्ति' इति कैयटाच्च लभ्यते। 'शक्तं पदम्' इति परकीयव्यवहारवारणायाह [पदे = पचतीत्यादाविति] वर्णाः = प्रकृतिप्रत्ययाः, उत्तरग्रन्थस्वारस्यात्। एवं च वर्णपदेन ककारादीनां ग्रहणमिति वदन्तो दर्पणकारा उपेक्ष्या एवेति बोध्यम्। [यथा नेति] मूले नशब्द इवार्थक इत्याशयः। तस्य तत्त्वमृग्वेदे स्पष्टमेव "मर्यो न योषाम्" इत्यादौ। तैत्तिरीयशाङ्करभाष्यान्तेऽपि "सुवर्णज्योतीः = सुवः = आदित्यः, नकार उपमार्थे, आदित्य इव" इति स्पष्टम्। [इत्येव पाठ इति] तथैव वाक्यपदीये पाठो दृश्यते। स च सुगम इति भावः। पाठान्तरतया 'न च' इति पाठः परिशोधकैः प्रदर्श्यते। प्रविवेकपदार्थमाह [भेद इति]

ननु पदानां तदवयवानां च स्फुटमुपलभ्यमानत्वात्तदसत्यत्वकथनमयुक्तमित्याशङ्कायां स्वाशयमभिव्यनक्ति [अयं भाव इति]। [अखण्डमिति] अपृथगुपस्थितिजनकत्वं च तत्त्वम्। अपृथगुपस्थितिविषयत्वं चार्थेऽखण्डत्वं बोध्यम्। [मानाभावादिति] पदे वर्णाः, वाक्ये पदानि च न सन्त्येव, वाक्यं तु सत्यमेव। पदानि सत्यानीति परेषां मतमयुक्तमिति तात्पर्यम्। ननु ककारो गकार इति विलक्षणप्रतीतिरेव वर्णादिसत्यत्वे मानमत आह [तत्तद्वर्णेति] अवच्छेदकं = कारणतावच्छेदकम्। वैजात्यं = कत्वादि। आदायैव = आरोप्यैव। [देवताधिकरण इति] प्रथमे तृतीयपादेऽष्टमाधिकरणे स्फोटवादिमतोपपादनावसर इत्यर्थः। तद्धेतुन्यायावलम्बेनाह [न चेति] एवम् = वर्णाभिव्यञ्जकतया

वायुसंयोगाभ्युपगमे। तत्तद्वर्णोत्पादकतया वायुसंयोगानां त्वयाभ्युपगमात्तादृशवायुसंयोगाभिव्यक्तवर्णानां वाचकत्वकल्पनापेक्षया तद्धेतुन्यायेन वायुसंयोग एव वाचकः किं न स्यादिति भावः। [प्रत्यक्षेति] श्रावणप्रत्यक्षोपलभ्यमानककारादेरित्यर्थः। [अनुभवसिद्धत्वादिति] - अनुभवस्यापलपितुमशक्यतया वर्णानामेव वाचकत्वमाश्रीयत इत्यर्थः। नच वर्णानां वाचकत्वाभ्युपगमेऽखण्डः स्फोटो वाचक इति त्वत्सिद्धान्त व्याघात इति वाच्यम्। अखण्डस्फोटस्य वायुसंयोगेनाभिव्यक्तिरित्यभ्युपगमेन ककारादेः स्पोटरूपत्वेनास्मत्पक्षे बाधकाभावात्। न्यायरक्षामण्युक्तं स्फोटखण्डनं निराकरोति [एतेनेति] तेषां स्फोटातिरिक्तत्वाभावादिति वक्ष्यमाणहेतुनेत्यर्थः। अयं तेषामाशयः - वर्णनित्यतानित्यतावादिनां चोभयेषामपि मते ध्वनिरावश्यक एव। तथाच ध्वनीनामेव गत्वादिमत्त्वमस्तु 'त एव वर्णाः। तेषामेव च वाचकत्वमित्येव युक्तम्। नतु स्फोटस्य गत्वादिमत्त्वम्' गौरवात् मानाभावाच्च। किञ्च वर्णसमुदायस्तत्तदर्थैर्गृहीतसम्बन्धः स्फोटाभिव्यञ्जकः? उत अगृहीतसम्बन्धो वा? नान्त्यः। काव्यश्रवणे तत्तदर्थैरगृहीतसम्बन्धस्यापि "इदमेकं पदम्" इदमेकं वाक्यम् इति स्फोटस्य तत्सङ्ख्यायाश्च प्रतीत्यापत्तेः। नाद्यः स्फोटानङ्गीकारेऽपि क्षत्यभावात्। नचैकं पदमिति प्रतीतिः स्फोटे मानमिति वाच्यम्। एकार्थाभिव्यञ्जकत्वरूपमेकं धर्ममादायैव तद्व्यवहारोपपत्तेः। नापि तदेवेदं पदं तदेवेदं वाक्यमिति प्रत्यभिज्ञाबलात्तत्सिद्धिरिति वाच्यम्। तदेवेदं नखं, त एव केशाः सोऽयं समुद्र इत्यादिवत्तत्सिद्धेः। नचातिरिक्तकेशादिकमनुभावानारूढमिति कथमेतदिति वाच्यम्। गौरित्यत्रापि गकारौकारविसर्जनीयातिरेकेण कस्यापि स्फोटस्यानुभवानारूढत्वात् - इति। स्फोटशब्दमनङ्गीकुर्वतापि गकारादीनां वर्णानामङ्गीकारादस्मन्मते स्फोटस्य वर्णानतिरिक्तत्वाभ्युपगमादस्मदभीष्टार्थसिद्धिः, परन्तु भवा'र्वर्णानामनित्यत्वमङ्गीक्रियते। अस्माभिस्तु सोऽयं गकार इति प्रत्यभिज्ञाबलात्तेषां नित्यत्वमास्थीयत इत्याशयेन समाधत्ते - [तेषामिति] गकारादिवर्णानामित्यर्थः। [अतिरिक्तत्वाभावादिति] एवं च वर्णानां स्फोटानतिरिक्ततया नास्मन्मते दोष इति भावः।

यत्तु वर्णानां प्रत्येकं वाचकत्वे प्रत्येकादर्थबोधापत्तिः। समुदायस्य तु क्रमवतामाशुतरोत्पन्नानां तथैवाभिव्यक्तानां वा ज्ञानमसम्भवाव्यमेव। पूर्वपूर्ववर्णानुभवसंस्कारेणैकदा समूहालम्बनरूपसकलज्ञानसम्भवस्तु सरोरसोजरारा जनदीदीनादिसाधारण इत्यतिप्रसङ्ग इति कैयटः, तत्तुच्छम्, पदज्ञानसम्भवस्योपपादितत्वाद्वर्णानां प्रत्येकं व्यञ्जकत्वं समुदितानां वेत्यादिविकल्पग्रासाच्च।

ननु त्वन्मतेऽप्येष दोषः। तत्तद्वर्णोत्पादकत्वेनाभिमतवायुसंयोगानां प्रत्येकं व्यञ्जकत्वं समुदितानां वेति विकल्पस्य सम्भवादिति चेत् ? उच्यते। प्रत्येकमेव संयोगा अभिव्यञ्जकाः, परं तु केचिदौत्वेन केचिद्विसर्गत्वेनेत्यनेकैः प्रकारैः। अत एव वर्णानां तदतिरेकास्वीकारोऽप्युपपद्यते। एवं चाव्यवहितोत्तरत्वसम्बन्धेन घवत्त्वं टकारे गृह्यते, एतादृशपदज्ञानकारणताया अविवादात्। परं त्वव्यवहितोत्तरत्वं स्वज्ञानाधिकरण-क्षणोत्पत्तिकज्ञानविषयत्वं वाच्यम्। अत एव घज्ञानानन्तरटज्ञानविषयत्वरूपानुपूर्वीत्यादि-नैयायिकवृद्धानां व्यवहारः। एवं च न कश्चिद् दोषः।

एतेन पर्यायस्थलेष्वेक एव स्फोटः, नाना वा? नाद्यः, घटपदे गृहीतशक्तिकस्य कलशपदाद्बोधप्रसङ्गात्। न च, तत्पर्यायाभिव्यक्ते शक्तिग्रहस्तत्पर्यायश्रवणेऽर्थधीहेतुरिति वाच्यम्। एवं सति प्रतिपर्यायं शक्तिग्रहावश्यंभावेन तत्तत्पर्यायगतशक्तिग्रहहेतुताया उचितत्वात्। तथा सति शक्तग्रहत्वेनैव हेतुत्वे लाघवाच्च। अन्यथा तत्पर्यायाभिव्यक्तगत-शक्तिग्रहत्वेन तत्त्वे गौरवात्। न द्वितीयः, अनन्तपदानां तेषां शक्तिं चापेक्ष्य क्लृप्तवर्णष्वेव शक्तिकल्पनस्य लघुत्वादिति परिमलोक्तमपास्तम्, पर्यायेष्वनेकशक्तिस्वीकारस्य सर्वसिद्धत्वात्तदवच्छेदकानुपूर्व्याः, प्रागुपपादनादिति दिक्।

शब्दकौस्तुभे तु वर्णमालायां पदमिति प्रतीतेर्वर्णातिरिक्त एव स्फोटः। अन्यथा कपालातिरिक्तघटाद्यसिद्धिप्रसङ्गश्चेति प्रतिपादितम्।। ८ १/२।। (६८ १/२)

कैयटादयस्तु वर्णानां तदतिरिक्तध्वनीनां वाऽस्वीकारपक्षेऽपि स्फोटस्य वाचकत्वं समर्थयन्ते। तन्मते न्यायरक्षाद्युक्तो दोषो दुरुद्धर इति ध्वनयंस्तन्मतं दूषयति [यत्त्विति] वर्णव्यतिरिक्तस्य स्फोटस्यानङ्गीकारे एकैकवर्णस्य वाचकत्वमुत वर्णसमुदायस्यति विकल्प्य नाद्य इत्याह [वर्णानामिति]। [अर्थबोधापतिरिति] द्वितीयादिवर्णोच्चारणवैयर्थ्यापत्तिश्चेत्यपि बोध्यम्। नान्त्य इत्याह [समुदायस्येति] अस्य ज्ञानमित्यत्रान्वयः। वर्णानां समुदायस्य ज्ञानमसम्भाव्यमिति योजना। समुदायस्य वाचकत्वमित्यत्र नीतिद्वयम् - १) उत्पद्यमानानां समुदायस्य वाचकत्वमिति, २) अभिव्यज्यमानानां समुदायस्य वाचकत्वमिति च। तत्राद्यं नैयायिका अन्त्यं कर्ममीमांसकाश्चाद्रियन्ते। तत्राद्यं दूषयति [तथैवाभिव्यक्तानामिति] तथैव = क्रमेणैव। ननु पक्षद्वयेऽपि पूर्वपूर्ववर्णानुभवजन्यसंस्कारसहकृतान्त्य-वर्णानुभवहेतुकैकस्मृत्युपारूढानां वाचकत्वमस्त्वत आह [पूर्वपूर्वेति] अनुभवजन्यसंस्कारेत्यर्थः। [सकलज्ञानेति] सकलवर्णज्ञानेत्यर्थः। [अतिप्रसङ्ग इति] सरो रस इत्युभयविधपदघटकवर्णानामेक-

रूपत्वात्तज्जन्यानुभवसंस्कारस्य विशेषाभावात्सरःपदजन्यबोधे रसरूपार्थस्य विषयतापत्तिरिति भावः। ननु स्फोटस्य नित्यत्वात्सर्वदाऽर्थबोधापत्तिरत आह [नादेति] वर्णाभिव्यङ्ग्य इत्यर्थः। [कैयट इति] अयं च कैयटग्रन्थः "येनोच्चारितेन" इत्यादिपस्पशाह्निकभाष्यस्थः। वर्णव्यतिरेकेण स्फोटं साधयतः कैयटस्य मते न्यायरक्षामणिकारो'ावितदोषाणां विद्यमानत्वेऽपि स्फुटत्वात्तान् परित्यज्य दोषान्तर मुद्भाटयति [पदज्ञानेति] कैयटोक्तरत्या तु न स्पोटावश्यकता, निरुक्तरीत्या पदज्ञानसम्भवेन पदैरेवार्थोपस्थितिसम्भवादिति भावः। [प्रत्येकमिति] तथाच द्वितीयादिव्यञ्जकवैयर्थ्यप्रसङ्ग इति भावः। [समुदितानां वेति] समुदायस्य व्यञ्जकत्वं तु तस्य वाचकत्वमिव भवदुक्तरीत्याऽसम्भवीति भावः। चकारान्न्यायरक्षाद्युक्तदूषणसमुच्चयो ग्राह्यः। अतो वर्णातिरिक्त एव स्फोट इति कैयटरीत्या न स्फोटसिद्धिः, किन्तु वर्णानां स्फोटानतिरिक्ततामादायैव तदुपपादनं कार्यमिति हृदयम्।

"नचोभयाश्रयं दोषमेकश्चोद्योऽविचारयन्" इति न्यायमवलम्ब्य शङ्कते [नन्विति] त्वन्मतेऽपि = वर्णानतिरिक्ततया स्फोटं स्वीकुर्वतस्तव मतेऽपि। एष दोषः = विकल्पात्मको दोषः। ननु स्फोट वर्णानतिरिक्ततयाऽङ्गीकुर्वतो मम मते कथं तद्दोषप्रसक्तिरत आह [तत्तद्वर्णेति] तव मते वर्णानां स्फोटानतिरिक्तत्वेऽपि त"ञ्जकतयाभ्युपगतानां वायुसंयोगानां प्रत्येकं त"ञ्जकत्वमुत समुदितानाम्? इति विकल्पप्रसक्तिरिति भावः। [विकल्पस्य सम्भवादिति] वायुसंयोगानां प्रत्येकव्यञ्जकत्वाभ्युपगमे प्रथमवायुसंयोगादेव तत्सम्भवेनार्थावबोधप्रसङ्गः। द्वितीयादिवायुसंयोगवैयर्थ्यापत्तिश्च। समुदितानां तत्त्वं तु निरुक्तरीत्या न सम्भवत्येवेति भावः। [परं त्विति] घट इत्यादावखण्डोऽपि स्फोटो घकारादिवर्णानतिरिक्ति इति स्वीकारेण तादृपवैशिष्ट्येनाभिव्यक्तस्यैव स्फोटस्यार्थबोधकत्वमिति न द्वितीयादिवायुसंयोगानां वैयर्थ्यम्। न ह्येतादृशी रीतिः कैयटमते आश्रयितुं युज्यते। अस्मन्मते तु वायुसंयोगनिष्ठं कत्वगत्वादिकं स्फोटे आरोप्यत इति तदभिन्नत्वं वर्णानां सिद्ध्यति। कैयटमते तु व्यञ्जका वर्णा नतु स्फोटानतिरिक्ता बोध्यम्। अत एव = वायुसंयोगानां स्ववृत्तिगत्वादिना स्फोटाभिव्यञ्जकत्वादेव। नन्वेवमपि पदज्ञानासम्भवेनार्थधीकारणताऽसम्भवेनार्थधीकारणता सम्भवदुक्तिकैव स्यादत आह [एवं चेति] वायुसंयोगगतगत्वादिना रूपेण स्फोटाभिव्यक्तौ चेत्यर्थः। [टकारे गृह्यत इति] तेन सरो रस इत्यादौ विलक्षणबोधोपपत्तिरिति भावः। [अविवादादिति] कैयटमते तु वर्णानामभावात्तन्मते पदस्वरूपं दुरुपपादमेवेति तदयुक्तमेवेति भावः। ननु घत्वटत्वादिना रूपेण भासमानस्फोटस्य नित्यतया स्वाधिकरणक्षणध्वंसाधिकरणक्षणध्वंसानधिकरणविशिष्ट-स्वाधिकरणध्वंसाधिकरणत्ववान् यः क्षणस्तदुत्पत्तिकत्वरूपमव्यवहितोत्तरत्वमसम्भव्येवात आह [परं

त्वव्यवहितेति]। [स्वज्ञानाधिकरणेति] स्वं = घत्वादिना भासमानः स्फोटः, तज्ज्ञानाधिकरणे उत्पत्तिर्यस्य तादृशं ज्ञानं तद्विषयत्वमित्यर्थः। नन्वेवं रीत्या ज्ञानघटितव्यवहितत्वं न दृष्टचरमत आह [अत एवेति] ईदृशाव्यवहितोत्तरत्वस्य स्वीकारादेवेत्यर्थः। उपसंहरति [एवं चेति] स्फोटस्य वर्णाव्यतिरेकेण स्वीकारे चेत्यर्थः।

परिमलोक्तं स्फोटदूषणं निराकरोति [एतेनेति] उक्तवक्ष्यमाणयुक्तिजालेनेत्यर्थः। [घटपदे इति] घटपदाभिव्यक्ते स्फोटे इत्यर्थः। एवशब्देन तत्पर्यायान्तराणां व्युदासः। तेष्वपि शक्तिग्रहवतस्तु बोध इष्ट एव। [बोधप्रसङ्गादिति] तत्पर्यायगतशक्त्यग्रहदशायामिति शेषः। [शक्तिग्रहावश्यंभावेनेति] प्रतिपर्यायं शक्तिग्रहमतिरिक्तस्फोटकल्पनां चापेक्ष्य तत्तत्पर्यायगतशक्तिग्रहस्तत्तदर्थबोधे कारणमित्येव कल्प्यतां लाघवादिति भावः। [लाघवाच्चेति] चो हेतौ। अन्यथा = तत्पर्यायगतशक्तिग्रहत्वेन हेतुत्वानङ्गीकारे। [गौरवादिति] अस्मिन् कल्पे तत्पर्यायाभिव्यक्तागतशक्तिग्रहत्वेन हेतुत्वेऽभिव्यक्तांसप्रवेशे गौरवम्। तत्पर्यायगतेत्यादिकल्पे तु तदप्रवेशेन लाघवमिति भावः। [अनन्तपदानामिति] स्फोटवादिनो मतेऽनन्तानां पदानामनन्तशक्तीनमनन्तस्फोटानां च कल्पने गौरवम्। मन्मतेऽनन्तपदपदार्थानामावश्यकत्वेऽपि स्फोटकल्पना नेति लाघवमिति भावः। [सर्वसिद्धत्वादिति] न वयं कैयटादय इव वर्णातिरेकेण स्फोटं स्वीकुर्मः। किन्तु वर्णानतिरिक्तमेव। भवा‘रपि वर्णानामभ्युपगमादुभयेषामपि लाघवादिकं समानामेव। किन्तु सोऽयं ककार इति प्रत्यभिज्ञाबलाद्वर्णानां नित्यत्वमाश्रीयते। भवा‘स्त्वनित्यत्वमित्येव भेद इति भावः। ननु वर्णानां नित्यत्वे कथमानुपूर्वीज्ञानमत आह [तदवच्छेदकेति] शक्तावच्छेदकेत्यर्थः। यत्तु न्यायरक्षामणावुक्तम् - श्रूयमाणशब्दे किमयं हालाहलशब्दः किं वा हलाहलः, किमयं मरकतशब्दः मकरतशब्दो वा, किमयं कुशशब्दः कुसशब्दो वेति सन्देहे यथातथास्तु। विषरत्नदर्भवाचको भवत्येवेत्यादि निश्चिन्वतो बोधो न स्यात्, स्फोटाभिव्यक्तौ स्पष्टाभिव्यक्त्यापत्तेः। अनभिव्यक्तौ बोधकाभावान्न स्यात्- इति। तदपि न, वर्णसमूहरूपपदज्ञानं कारणमिति स्वीकर्तॄणां दर्शनान्तरीयाणामपि समत्वात्। तदर्थज्ञापकत्वज्ञानं च ममापि समम्। स्पष्टमधिकं भूषणे। तदेतदाह [इति दिगिति]।

कारिकाग्रन्थकृतो दीक्षितस्य तु नेदं सम्मतमित्याह [शब्दकौस्तुभे त्विति] तुनारुचिर्बोध्यते। तद्बीजं तु तत्र पक्षे निरुक्तरीत्या न्यायरक्षामण्याद्युक्तदूषणापातः - इति। अन्यथा = प्रतीतिबलेनातिरिक्तस्फोटानङ्गीकारे। [असिद्धिप्रसङ्ग इति] वस्तुतो घटस्य कपालनातिरिक्ततया कपालद्वयसंयोग इति व्यवहारः स्यात्, नतु घट इति। प्रतीतिबलात्त“वहारे तु प्रकृतेऽपि सममिति भावः। ।।६८ १/२।।

नन्वेवं शास्त्रप्रामाण्यप्रसङ्गः पदस्याखण्डत्वात्, शास्त्रस्य च प्रकृतिप्रत्ययाभ्यां पदव्युत्पादनमात्रार्थत्वात्याशङ्कां समाधत्ते -

पञ्चकोशादिवत्तस्मात्कल्पनैषा समाश्रिता।।९।। (६९)

उपेयप्रतिपत्त्यर्था उपाया अव्यवस्थिताः।

उपेयप्रतिपत्त्यर्था इत्यन्तेनान्वयः। अयं भावः - यथा भृगुवल्ल्यां "भृगुर्वै वारुणिर्वरुणं ब्रह्म पृष्टवान्। स उवाचान्नम्" इति तस्योत्पत्त्यादिकं बुद्ध्वा पृष्टे प्राणमनोविज्ञानानन्दात्मकपञ्चकोशोपदेशोत्तरं "ब्रह्म पुच्छं प्रतिष्ठा" इति ज्ञेयं ब्रह्म प्रतिपादितम्। तत्र कोशपञ्चकव्युत्पादनं शुद्धब्रह्मबोधनाय। यथा वाऽऽनन्दवल्लीस्थ-पञ्चकोशव्युत्पादनं वास्तवशुद्धब्रह्मबोधनाय। एवं प्रकृतिप्रत्ययादिव्युत्पादनं वास्तवस्फोटव्युत्पादनायैवेति। ननु प्रत्यक्षस्य स्फोटस्य श्रवणादितोऽपि बोधसम्भवान्न शास्त्रं तदुपाय इत्यत आह - उपाया इति। उपायस्योपायान्तरादूषकत्वात्। तथाच व्याकरणाभ्यासजन्यज्ञाने वैजात्यं कल्प्यते मन्त्रजन्यमिवार्थस्मरणे वेदान्तजन्यमिव ब्रह्मज्ञाने। तस्य च ज्ञानस्य यज्ञादीनामन्तः करणशुद्धाविव शरीरादिशुद्धावुपयोगः साक्षात्परम्परया वा स्वर्गमोक्षादिहेतुत्वं च।

तदुक्तं वाक्यपदीये - (प्रथमकाण्डे)

तद् द्वारमपवर्गस्य वाङ्मलानां चिकित्सितम्।
पवित्रं सर्वविद्यानामाधिविद्यं प्रकाशते।। १४
इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम्।
इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः।। १६
अत्रातीतविपर्यासः केवलामनुपश्यति।। इति १७

न चालीकया प्रकृतिप्रत्ययकल्पनया कथं वास्तवस्फोटबोधः, तस्यालीकत्वासिद्धेर्वक्ष्यमाणत्वात्। एवं रेकागवयन्याय आदिना गृह्यते।।९ १/२।। (६९ १/२)

एवम् = अखण्डस्फोटस्य वाचकत्वाभ्युपगमे। [शास्त्रप्रामाण्येति] व्याकरणशास्त्रस्याप्रामाण्यापत्तिरित्यर्थः। तमेवोपपादयति [पदस्येति] वाक्यस्याप्युपलक्षणमिदम्।

[अखण्डत्वादिति] निरवयवत्वादित्यर्थः। [पदव्युत्पादनेति] "स्वौजसमौट्" "तिप्तस्झि" इत्यादिशास्त्रस्य प्रकृतिप्रत्ययप्रदर्शनेन सखण्डपदमात्रव्युत्पादकत्वादित्यर्थः। भवन्मते सिद्धान्ते यद्बोधकमखण्डं पदं वाक्यं वा, न तद्व्युत्पादकं शास्त्रम्। शास्त्रव्युत्पाद्यं तु भवन्मते न वाचकमेवेति भावः। मूले उपेयप्रतिपत्त्यर्था इति प्रथमाबहुवचनान्तम् 'उपायाः' इत्यस्य विशेषणम्। तच्च लिङ्गवचनवपरिणामेन "कल्पना" इत्यत्रा प्यन्वेतीत्याशयेनाह [उपेयप्रतिपत्त्यर्था इत्यन्तेनान्वय इति] - उपेयस्य = प्राप्यलक्ष्यस्य, प्रतिपत्तिः = प्राप्तिर्ज्ञानं वा, सा अर्थः = प्रयोजनं यस्या इत्यर्थः। तस्मात् = अखण्डस्य वाक्यस्यैव वाचकत्वात्, तादृशोपेयप्रतिपत्त्यर्था, एषा कल्पना = व्याकरणशास्त्रीयप्रकृतिप्रत्ययकल्पना समाश्रिता। अतो न तस्याप्रामाण्यप्रसङ्ग इत्यर्थः। तत्र दृष्टान्तः - [पञ्चकोशादिवदिति] प्रथमतस्तमेव दृष्टान्तं व्युत्पादयति [अयं भाव इति] वारुणिः = वरुणपुत्रः। वरुणं = पितरम्। अन्नम् = स्थूलशरीरम्। तस्य = अन्नमयस्य स्थूलशरीरस्य। उत्पत्त्यादिकमित्यादिना विनाशादेर्ग्रहणम्। [बुद्ध्वेति] - "न जायते म्रियते वा" इत्यादिश्रुतिभिर्ब्रह्मणोऽजत्वादिश्रवणादिति भावः। [प्राणेति] "एतस्माज्जायते प्राणो मनः सर्वेन्द्रयाणि च" "अशितमन्नं त्रेधा भवति। यत् स्थूलं तत्पुरीषं, यन्मध्यं तन्मनः" इत्यादिश्रुतिभ्यः प्राणमनसोरपि जन्यत्वश्रवणाद्वरुणं पितरं पुनरुपससार। विज्ञानं ब्रह्मेति पित्रोक्ते तस्यापि वृत्त्युपहितत्वेनोत्पत्त्यादिकं बुद्ध्वा पृष्टो वरुणः पिता भृगुं पुत्रमानन्दो ब्रह्मेति प्रोवाच। पञ्चकोशोत्तरं = तद्व्युत्पादनानन्तरम्। तत्र = भृगुवल्ल्याम्। नन्विदमयुक्तम्। भृगुवल्ल्यां पञ्चमस्य ज्ञेयब्रह्मरूपतयाऽनुपायत्वात्। अत एव न तस्य कोशत्वमत आह [यथा वेति]। [आनन्दवल्लीति] तत्र ह्यन्नमयादयः पञ्चापि कोशा एव। "ब्रह्म पुच्छं प्रतिष्ठा" इत्यत्र श्रूयमाणमेव ब्रह्मपदं मुख्यब्रह्मसमर्पकम्। अत एवाधारत्वार्थकः पुच्छशब्दोऽप्युपपद्यते। लाङ्गूलासम्भवेन मुख्यार्थस्य बाधितत्वात्।

नन्वानन्दमयस्यापि कोशत्वे "आनन्दमयोऽभ्यासात्" १-१-१२ इति सूत्रेणाऽऽनन्दमयशब्दस्य मुख्यब्रह्मबोधकत्वसमर्थनं भगवतो द्वैपायनस्यासङ्गतं स्यादिति चेन्न। आनन्दमयशब्दस्य तद्वाक्यशेषे श्रूयमाणब्रह्मपदे तात्पर्यात्। एतच्च शङ्करभगवत्पादैश्शारीरकमीमांसा भाष्ये सविस्तरमुपपादितम्। उक्तमर्थं दार्ष्टान्तिके सङ्गमयति [एवमिति]। [स्फोटव्युत्पदानायैवेति] - अयं भावः - यथा मुख्यमेवात्मानमुपदिदिक्षु शास्त्रं लोकबुद्धिमनुसरदन्नमयशरीरमनात्मानमत्यन्तमूढानामात्मत्वेन प्रसिद्धमनूद्य मूषानिषिक्तद्रुतताम्रादिप्रतिमावत्ततोऽन्तरं प्राणमयं ततोऽन्तरं मनोमयमित्येवं पूर्वेण पूर्वेण समानं

मुत्तरमुत्तरमनात्मानमात्मेति ग्राहयत् प्रतिपत्तिसौकर्याय मुख्यमात्मानमुपदिदेश, तथैव व्याकणशास्त्रमपि मुख्यमखण्डं वाक्यस्फोटमुपदिदिक्षु लोकबुद्धिमनुरुध्य तदुपायतया प्रकृतिप्रत्ययोपदेशेन पदमुपदिदेशेति पञ्चकोशव्युत्पादनपरोपनिषच्छास्त्रस्येव प्रकृतिप्रत्ययोपदेशपरव्याकरणशास्त्रस्यापि नाप्रामाण्यम्। अत एव बहुमुखागमादेशादिविधानमपि व्याकरणेषु सृष्टिप्रकरणमिवोपनिषत्सु न विरुध्यते - इति।

"उपाया अव्यवस्थिताः" इति कारिकाभागमवतारयति [नन्विति] तदुपायः = वाक्यस्फोटज्ञानोपायः। उपाया अव्यवस्थिता इत्यत्रापि उपेयप्रतिपत्त्यर्था इति सम्बध्यते। [उपायस्येति] उक्तं च -

"उपादायापि ये हेयास्तानुपायान् प्रचक्षते।
उपायानां च नियमो नावश्यमवतिष्ठते।। इति।।

उपादायापि ये हेया इति उपायशब्दव्युत्पत्तिः प्रदर्श्यते। उपादाय हेयाः = उपायाः, पृषोदरादित्वात्साधुः। स्पष्टं चेदं "कृत्याः" ३-१-९५ इति सूत्र उद्द्योते। ननु नैतच्छास्त्रं स्फोटज्ञानस्य पञ्चकोशवदुपायः। शास्त्रज्ञानं विनापि गामानयेति वाक्यमात्रव्युत्पन्नस्य पामरादेरपि शाब्दबोधोदयेन व्यभिचारादत आह [तथा चेति] "एकः शब्दः सम्यग् ज्ञातः" इत्यादिश्रुतिबलादाह [व्याकरणाभ्यासेति] तत्र दृष्टान्तमाह [मन्त्रजन्यमिवार्थस्मरण इति] एतदेव मन्त्राणां प्रयोजनम्। मन्त्रैरेव मन्त्रार्थः स्मर्तव्यः। मन्त्रस्मरणं विनापि प्रकारान्तरेणानुष्ठानसम्भवाद्व्यभिचारवारणाय पूर्वमीमांसकैर्मन्त्रजन्यार्थस्मरणे वैजात्यं कल्प्यते। तद्वत्प्रकृतेऽपीति भावः। मन्त्रजन्यमित्यस्य मन्त्रजन्यतावच्छेदकमित्यर्थः। "तं त्वौपनिषदं पुरुषं पृच्छामि" "श्रोतव्यः श्रुतिवाक्येभ्यः" इत्यादिश्रुतिबलादाह - [वेदान्तजन्यमिव ब्रह्मज्ञाने इति] ननु विषमो दृष्टान्तः, मन्त्रस्मरणवेदान्तज्ञानयोरिव व्याकरणज्ञानपूर्वकस्फोटशब्दज्ञानस्य पुरुषार्थासाधकत्वादत आह [तस्य चेति] व्याकरणाभ्यासजन्यस्फोटज्ञानस्येत्यर्थः। वेदान्तिमतेनाह [यज्ञादीनामन्तःकरणशुद्धाविवेति] अन्तः करणमलानामपहारे गुरूपदेशाद् ब्रह्मज्ञानं जायत इति भावः। [साक्षात्परम्परया वेति] साधुशब्दज्ञानेन चित्तशुद्धिद्वारा स्वर्गहेतुत्वमविद्यापनोदनेन मोक्षहेतुत्वं चेत्यर्थः। अद्वैतवेदान्तसिद्धनिर्गुणब्रह्मरूपः स्फोटशब्द इति वैयकणपरमसिद्धान्तः। अत एव "विवर्ततेऽर्थभावेन" इति प्रथमत एवोक्तमिति बोध्यम्। स्वोक्तार्थे हरिग्रन्थं प्रमाणयति [तदुक्तमिति] तद् = व्याकरणशास्त्रम्। अपवर्गस्य = मोक्षस्य। चिकित्सा अस्य संजाता = चिकित्सितम्। अधिविद्यमिति विभक्त्यर्थेऽव्ययीभावः। विद्यास्वित्यर्थः। अतीतः = नष्टः, विपर्यासः = भ्रमो यस्य, केवलाम् = पराख्यां वाचम्। अनेन साक्षान्मोक्षफलकत्वं व्याकरणस्य प्रतिपाद्यते।

[अलीकयेति] प्रकृतिप्रत्ययविभागस्य काल्पिनिकतया शशविषाणतुल्यतया तेन न स्फोटात्मकवस्तुज्ञानसम्भवः। पञ्चकोशादेस्तु सदसद्विलक्षणताया अद्वैतशास्त्रे व्युत्पादनान्न दोष इति भावः। तस्य = प्रकृतिप्रत्ययविभागस्य। [वक्ष्यमाणत्वादिति] - "अनेकव्यक्त्यभिव्यङ्ग्या" इति कारिकाग्रन्थेन पञ्चकोशादेरिव प्रकृतिप्रत्ययविभागस्यापि सदसद्विलक्षणतायाः सूचितत्वादित्यर्थः। "प्रक्रियांशस्त्वविद्याविजृम्भणमात्र" इति च वक्ष्यतीति बोध्यम्। आदिना = पञ्चकोशादिवदित्यत्रादिपदेन।। ६९ १/२।।

ननु स्फोटस्य वर्णजातीनां च नित्यतया ककार उत्पन्न इति न स्यात्। वायुसंयोगनिष्ठजातेः स्फोटे भाने कादिप्रतीतीनां भ्रमत्वापतिश्चेत्यत आह -

कल्पितानामुपाधित्वं स्वीकृतं हि परैरपि।।१०।। (७०)
स्वरदैर्घ्याद्यपि ह्यन्ये वर्णेभ्योऽन्यस्य मन्वते।

स्वीकारस्थलमाह - स्वरदैर्घ्याद्यपीति। आदिनोत्पत्तिविनाशादिसङ्ग्रहः। उदात्तत्वादि न वर्णनिष्ठं तस्यैकत्वान्नित्यत्वाच्च। तच्च स एवायमिति प्रत्यभिज्ञानात्। न च गत्वावच्छिन्नप्रतियोगिताकभेदाभावस्तद्विषयो, व्यक्त्यं शाभेदस्यापि भासमानस्य विना बाधकं त्यागायोगात्। न चोत्पत्तिप्रतीतिर्बाधिका, प्रागसत्त्वे सति सत्त्वरूपाया उत्पत्तेवर्णेष्वनुभवविरुद्धत्वात्। अत एव वर्णमुच्चारयतीति प्रत्ययो, न तूत्पादयतीति प्रत्ययो व्यवहारश्च। उच्चरितत्वं च ताल्वोष्ठसंयोगादिजन्याभिव्यक्तिविशिष्टत्वम्। किञ्च व्यञ्जकध्वनिनिष्ठोत्पत्त्यादेः परम्परया वर्णनिष्ठत्वविषयत्वेनाप्युपपत्तेर्न साऽतिरिक्तवर्णसाधिका। परम्परया वर्णनिष्ठत्वाभ्युपगमाच्च न भ्रमत्वम्।

साक्षात्सम्बन्धांशे भ्रम इत्यवशिष्यते। तदपि सोऽयमित्यत्र व्यक्त्यभेदांशे तव भ्रमत्ववत्तुल्यम्। परं तु ममातिरिक्तवर्णतत्प्रागभावध्वंसकल्पना नेति लाघवमतिरिच्यते। न च वर्णस्थले ध्वनिसत्त्वे मानाभावः, तदुत्पादकशङ्खाद्यभावेन तदसम्भवश्चेति वाच्यम्। ककाराद्युच्चारणस्थले तत्तत्स्थानस्य जिह्वाया ईषदन्तरपाते वर्णानुत्पत्तेर्ध्वन्युत्पत्तेश्च दर्शनाज्जिह्वाभिघातजवायुकण्ठसंयोगादेर्ध्वनिजनकत्वकल्पनात्। तस्य च वर्णोत्पत्तिस्थलेऽपि सत्त्वात् तवैव प्रतिबध्यप्रतिबन्धकभावकल्पना निष्प्रमाणिका

स्यादिति विपरीतं गौरवम्। एवं परस्परविरोधादुदात्तत्वानुदात्तत्वह्रस्वत्वदीर्घत्वादिकमपि न वर्णनिष्ठं युक्तमिति तेषामभिप्रायः। एवं चोत्पत्त्यादिप्रतीतीनां तत्प्रमात्वस्य च निर्वाहः परेषामपि समान इति प्रतिबन्द्यैवोत्तरमिति भावः।

मीमांसकाशङ्कासमाधानपरतया मूलमवतारयति [नन्विति] स्फोटस्य वर्णानां चैकत्वे कत्वगत्वादिकं किं स्फोटनिष्ठमुत वायुसंयोगनिष्ठं वा? इति विकल्प्याद्ये दोषमाह [स्फोटस्येति] अन्त्ये दोषमाह [वायुसंयोगेति]। [भ्रमत्वापत्तिरिति] अन्यधर्मस्यान्यत्र भानादिति भावः। मूले परान्यशब्दाभ्यां मीमांसका बोध्यन्ते। मीमांसकमतमाह [उदात्तत्वादीत्यादिना तेषामभिप्राय इत्यन्तेन] तस्य = वर्णस्य। [एकत्वादिति] वर्णनिष्ठत्वे हि उदात्तत्वादीमनेकत्वाद्वर्णस्यैकत्वभङ्ग इति भावः। ननु वर्णस्यैकत्वमेव कथमत आह [तञ्चेति] एकत्वं चेत्यर्थः। [प्रत्यभिज्ञानादिति] दिनान्तरानुभूते वर्णेऽधुनानुभूयमानस्य "सोऽयम्" इति प्रत्यभिज्ञानादित्यर्थः। अत एव तादृशप्रत्यभिज्ञानात्तावत्कालं स्थिरत्वे सिद्धे "तावत्कालं स्थिरं चैनं कः पश्चान्नाशयिष्यति" इति न्यायेन पराभिमताशुविनाशित्वव्यतिरेकसिद्धौ नित्यत्वे प्रयवसानमिति भावः। सोऽयमिति प्रत्यभिज्ञाया जातिविषयकत्वमेव, न व्यक्तिविषयकत्वमित्याशयेन शङ्कते [नचेति]। [गत्वावच्छिन्नेति] गकाराणां परस्परं भेद एव। पूर्वकालैतत्कालभवगकारयोस्तद्व्यक्तित्वावच्छिन्न-प्रतियोगिताकभेदेऽपि गत्वावच्छिन्ने गत्वावच्छिन्नप्रतियोगिताकभेदो नास्ति। तादृशभेदश्च घत्वाद्यवच्छिन्ने इति भावः। [तद्विषय इति] सोऽयं गकार इति प्रत्यभिज्ञाविषय इत्यर्थः। एवं च जातिविषयक एवायं प्रत्ययो, न व्यक्तिविषयक इति न दोष इति भावः। यद्यप्यत्र पक्षे गकारव्यक्त्यतिरिक्तगत्वादि-रूपजात्यनङ्गीकारान्नेदं युक्तमिति समाधातुं शक्यते, तथापि तदङ्गीकारेऽपि समाधिः सुशक इत्याह [व्यक्त्यंशाभेदस्यापीति]। [त्यागायोगादिति] द्वयोर्घटयोर्घटत्वेन रूपेण भेदाभावात्सोऽयं घट इति प्रत्यभिज्ञापत्तिरित्यपि बोध्यम्। [बाधिकेति] व्यक्त्यभेदांशस्य त्यागे बाधिकेत्यर्थः। अत एव = वर्णेषूत्पत्तिव्यवहारस्य विरुद्धत्वादेव। ननूच्चारितत्वमपि ताल्वोष्ठपुटजन्योत्पत्तिविशिष्टत्वमेवेति भवदुक्तरीत्यैव वर्णानामुत्पत्तिस्सेत्स्यतीत्यत आह [उच्चरितत्वं चेति]। [अभिव्यक्तिविशिष्टत्वमिति] नतूत्पत्तिविशिष्टत्वमिति भावः। उत्पत्त्यादेरित्यादिपदेन नाशादेः परिग्रहः। सा = गकार उत्पन्न इति प्रतीतिः। [अतिरिक्तवर्णेति] अतिरिक्तजन्यवर्णेत्यर्थः। ननु दूषणसाम्ये नित्यत्वमेवेति कथं वा निश्चीयतेऽत आह [परं त्विति] ननु ककार उत्पन्न इत्यादिविलक्षणप्रतीतिरेव तत्र मानं स्यादत आह [तदुत्पादकेति] ध्वन्युत्पादकेत्यर्थः। तस्य = वायुसंयोगस्य। तवैव = ध्वन्यभाववादिनस्तवैव। तेषां = मीमांसकानाम्।

ननु मीमांसकानां वैयाकरणानां च मते वर्णनित्यतायास्समत्वात्किं वैलक्षण्यमिति चेदत्राहुः - मीमांसका ह्येवमभिप्रयन्ति - सर्वेषां ककाराणामेकत्वम्। ककारगकारयोस्त्वनेकत्वमेव। ते च वर्णा नित्याः। त एव वाचकाः। तदतिरिक्तः स्फोटो नास्त्येव। त"ञ्जकाश्च वायुसंयोगाः। तन्निष्ठोत्पत्त्यादिकमादाय ककार उत्पन्न इत्यादिप्रतीतयो निर्वाह्याः। उदात्तत्वादिकमपि वायुनिष्ठमेव - इति। वैखरीरूपा वाक् सर्वथाऽनित्यैव। सा च स्फोटस्याभिव्यञ्जिका। ककारगकारयोरप्यभेद एवेति तु वैयाकरणाः - इति। व्यक्तिस्फोटपक्षमुपसंहरति [इत्थमिति]। [पञ्चेति] वर्णपदवाक्यस्फोटास्त्रयः अखण्डपदवाक्यस्फोटौ द्वौ चेत्याहत्य पञ्चव्यक्तिस्फोटा निरूपिता इति भावः।।७० १/२।।

जातिस्पोटमाह -

शक्यत्व इव शक्तत्वे जातिर्लाघवमीक्ष्यताम्।।११।।(७१)
औपाधिको वा भेदोऽस्तु वर्णानां तारमन्दवत्।

अयं भावः - वर्णास्तावदावश्यकाः। उक्तरीत्या च सोऽयं गकार इतिवद् योऽयं गकारः श्रुतः सोऽयं हकार इत्यपि स्यात्, स्फोटस्यैकत्वात्, गकारोऽयं न हकार इत्यनापत्तेश्च। किञ्च स्फोटे गत्वाद्यभ्युपेयं न वा? आद्ये तदेव गकारोऽस्तु, वर्णनित्यतावादिभिरतिरिक्तगत्वानङ्गीकारात्। तथा चातिरिक्तस्फोटकल्पन एव गौरवम्। अन्त्ये गकारादिप्रतीतिविरोधः। वायुसंयोगवृत्ति ध्वनिवृत्ति वा वैजात्यमारोप्य तथा प्रत्यय इति चेत्? न, प्रतीतेर्विना बाधकं भ्रमत्वासम्भवात्। अस्तु वा वायुसंयोग एव गकारोऽपि, तस्यातीन्द्रियत्वं दोष इति चेद् -

धर्मवदुपपत्तेरिति कृतं स्फोटेन। तस्मात्सन्त्येव वर्णाः, परं तु न वाचकाः, गौरवात्। आकृत्यधिकरणन्यायेन जातेरेव वाच्यत्ववद्वाचकत्वस्यापि युक्तत्वाच्च। "इदं हरिपदम्" इत्यनुगतप्रतीत्या हर्युपस्थितित्वावच्छेदेन हरिपदज्ञानत्वेन हेतुत्वात्। तदवच्छेदकतया च जातिविशेषस्यावश्यकल्प्यत्वात्। न च वर्णानुपूर्व्यैव प्रतीत्यवच्छेदकत्वयोर्निर्वाहः, घटघटत्वादेरपि संयोगविशेषविशिष्टमृदाकारादिभिश्चान्यथा-सिद्ध्यापत्तेः। तस्माज्जातिरेव वाचिका, तादात्म्येन तदवच्छेदिका चेति। ननु सरो रस इत्यादौ तयोर्जात्योः सत्त्वादर्थबोधभेदो न स्यादित्यत आह - औपाधिको वेति। वा

त्वर्थे। उपाधिरानुपूर्वी सैव जातिविशेषाभिव्यञ्जिकेति भेदः कारणीभूतज्ञानस्येति नातिप्रसङ्ग इति भावः। उपाधिप्रयुक्तज्ञानवैलक्षण्ये दृष्टान्तमाह - वर्णाना मिति।। ११ १/२।। (७१ १/२)

जातिस्फोटनिरूपणपरतया मूलमवतारयति [जातिस्फोटमिति] पदवाक्ययोर्वक्ष्यमाणयुक्तिभिः सखण्डत्वमेवोचितमिति वदतां मते तत्तत्पदवाक्यव्यक्तिषु शक्त्यभ्युपगमे व्यक्तिशक्तिवादप्रयुक्तानन्त्य-व्यभिचारयोः प्रसङ्गः, भिन्नकालोच्चारितेषु तत्तत्पदवाक्येषु शक्तेराश्रयणीयतया शक्त्यानन्त्याद्गौरवं चेति दूषणं परिहर्तुं वोपदेवोक्तयुक्त्या जातिस्फोटमाह मूले [शक्यत्व इवेति] ननूक्तरीत्या स्फोटातिरुक्तवर्णानामसत्त्वात्तद्गतजातेर्वाचकत्वकथनमसङ्गतमतः स्वाशयमाह [अंय भाव इति] [उक्तरीत्येति]। स्फोटस्यैकत्वमित्युक्तरीत्येत्यर्थः। [इत्यपि स्यादिति] तदभिन्नाभिन्नस्य तदभिन्नत्वनियमेन हकाराभिन्नस्फोटाभिन्नगकारे तदभेदावगाहिबुद्धेः प्रमात्वापत्त्या सोऽयं गकार इतिवत् योऽयं गकार श्रुतः सोऽयं हकार इत्यभेदप्रत्ययापत्तिरित्यर्थः। तदाह [स्फोटस्यैकत्वादिति]। [अनापत्तेश्चेति] निरुक्तरीत्या गकारहकारयोरभेदसत्त्वेन तादृशभेदावगाहिबुद्धेः प्रमात्वानुपपत्त्या गकारोऽयं न हकार इति भेदप्रतीत्यनापत्तिरिति भावः। ननु वर्णात्मकस्फोटस्यैकत्वेऽपि गत्वादिविरुद्धधर्माध्यासेन भेदप्रतीतेरुपपत्तिरत आह [किञ्चेति]। [गत्वादीति] अनारोपितगत्वादीत्यर्थः। स एव = गत्वादिरूप एव। एवशब्देन स्फोटस्य निरासः। ननु गत्वस्य गकारात्मकत्वं कथमत आह [वायुसंयोगेति] तस्य = वायुसंयोगस्य। [धर्मवदुपपत्तेरिति] वायुनिष्ठस्पर्शवदित्यर्थः। कृतं स्फोटेन = अलं स्फोटेन। नन्वेवं स्फोटासिद्धिप्रसङ्गः, वर्णैरेवार्थबोधोपपत्तिसम्भवादत आह [परं त्विति]। [गौरवादिति] तत्तद्वर्णभेदभिन्नानन्तशक्तिकल्पने गौरवादित्यर्थः। यद्वा वर्णसमूहरूपपदस्य बोधकत्वाङ्गीकारे पदानामानन्त्यात्तदाश्रयशक्त्यानन्त्याद्गौरवमित्यर्थः। अर्थबोधकत्वान्यथानुपपत्त्या गौरवमपि सोढ व्यमेवेत्यत आह [आकृत्यधिकरणेति] यथा गवादिपदानां लाघवाज्ञातेरेव वाचत्वं, तथा वाचकत्वमपि तत्पदगतजातेरेवेति युक्तमित्यर्थः। प्रकृतजातिसिद्धिप्रकारमाह [इदं हरिपदमिति] घटोऽयं घटोऽयमित्यनुगतप्रतीत्या घटत्वादिजातिसिद्धिवत्प्रकृतजातिसिद्धिरपीति भावः। कार्यतावच्छेदकतया तत्सिद्धिं दर्शयति [हर्युपस्थितीति]। [अनुगतप्रतीतीति] अनुगताकारप्रतीत्यवच्छेदकत्वयोरित्यर्थः। [अन्यथासिद्ध्यापत्तेरिति] नचेष्टापत्तिः, प्रत्यक्षादिप्रमाणविरोधात्। [तस्मादिति] उक्तरीत्या जातिस्वीकारस्यावश्यकत्वादित्यर्थः। ननु जातेरेव वाचकत्वाभ्युपगमे घटपदगतजातित्वं शक्तावच्छेदकं

वाच्यम्। ततो वरमानुपूर्व्या एवावच्छेदकताकल्पनमत आह [तादात्म्येनेति] अतो नोक्तगौरवमिति भावः। औपाधिको वेति कारिकाभागमवतारयति [नन्विति] वाशब्दस्य विकल्पार्थकत्वेऽर्थासङ्गतेराह [वा त्वर्थे इति] अतिप्रसङ्गः = अविलक्षणबोधापत्तिरूपातिप्रसङ्गः। [उपाधिप्रयुक्तेति] बलवदुच्चरितत्वादिकं तत्रोपाधिः। तेन यथा तारो मन्द इति प्रतीतिवैलक्षण्यं तद्वदित्यर्थः।। ७१ १/२।।

ननु जातेः प्रत्येकं वर्णेष्वपि सत्त्वात्प्रत्येकादर्थ बोधः स्यादित्यत आह -

अनेकव्यक्त्यभिव्यङ्ग्या जातिः स्फोट इति स्मृता।।१२।।(७२)
कैश्चिद्व्यक्तय एवास्या ध्वनित्वेन प्रकल्पिताः।

अनेकाभिर्वर्णव्यक्तिभिरभिव्यक्तैव जातिः स्फोट इति स्मृता योगार्थतया बोधिकेति यावत्। एतेन स्फोटस्य नित्यत्वात्सर्वदाऽर्थबोधापत्तिरित्यपास्तम्। अंय भावः - यद्यपि वर्णस्फोटपक्षे कथितदोषोऽस्ति, तथाऽपि पदवाक्यपक्षयोर्न, तत्र तस्या व्यासज्यवृत्तित्वस्य धर्मिग्राहकमानसिद्धत्वादिति कैश्चिद्व्यक्तयो ध्वनय एव ध्वनिवर्णयोर्भेदाभावादित्यभ्युपेयन्त इति शेषार्थः। उक्तं हि काव्यप्रकाशे - "बुधैर्वैयाकरणैः प्रधानीभूतस्फोटरूपव्यङ्ग्यव्यञ्जकस्य शब्दस्य ध्वनिरिति व्यवहारः कृतः" इति। ।।१२ १/२।। (७२ १/२)

जातिस्फोटस्वीकारे प्रसक्ताशङ्कासमाधानपरतया मूलमवतारयति [नन्विति]। [अर्थबोधापत्तिरिति] - तथाच वर्णा एव वाचकाः स्युरित्यलं स्फोटकल्पनयेति भावः। अस्याप्यर्थस्य सर्वानुभवदूरतया तत्र विश्वाससञ्जनाय दीक्षितमहोदयो वाक्यपदीयप्रथमकाण्डात् चतुर्नवतितमां कारिकामुद्धृत्य स्वग्रन्थे उपनिबध्नाति [अनेकव्यक्तीति]। [अभिव्यक्तैवेति] भ्रमणत्वादिजातेश्चरमक्रिया प्रत्यक्षव्यङ्ग्यत्ववदेतस्या अपि चरमवर्णप्रत्यक्षव्यङ्ग्यत्वाभ्युपगमान्न दोष इति भावः। [योगार्थतयेति] स्फुटत्यस्मादर्थ इति योगार्थमहिम्नेत्यर्थः। [एतेनेति] व्यञ्जकसहकृतजातेर्वाचकत्वव्यवस्थापनेनेत्यर्थः। स्वाशयं प्रकटयति [अयं भाव इति] उक्तदोषः = प्रत्येकवर्णादपि तस्या जातेरभिव्यक्त्याऽर्थबोधापत्तिरूपो दोषः। तत्र = पदवाक्ययोः। तस्याः = जातेः।

उत्तरार्धं व्याचष्टे [कैश्चिदिति] शेषार्थः - शेषवाक्यार्थः। वर्णेषु ध्वनिरिति व्यवहारे काव्यप्रकाशोक्तिमुदाहरति [उक्तं हीति]। [स्फोटरूपेति] स्फोटरूपो यो व्यङ्ग्यस्तद्व्यञ्जकस्येत्यर्थः।।७२ १/२।।

ननु का सा जातिस्तत्राह -

सत्यासत्यौ तु यौ भागौ प्रतिभावं व्यवस्थितौ।।१३।।(७३)
सत्यं यत्तत्र सा जातिरसत्या व्यक्तयो मताः।

प्रतिभावं प्रतिपदार्थं सत्यांशो जातिः, असत्या व्यक्तयः तत्त"क्तिविशिष्टं ब्रह्मैव जातिरिति भावः। उक्तं च कैयटेन - "असत्योपाध्यवच्छिन्नं ब्रह्मतत्त्वं द्रव्यशब्दवाच्यमित्यर्थः" इति। "ब्रह्मतत्त्वमेव शब्दस्वरूपतया प्रतिभाति" इति च। कथं तर्हि "ब्रह्मदर्शने च गोत्वादिजातेरप्यसत्त्वादनित्यत्वम्, "आत्मैवेदं सर्वम्" इति श्रुतिवचनात्" इति कैयटः सङ्गच्छताम्? अविद्याऽऽविद्यको धर्मविशेषो वेति पक्षान्तरमादायेति द्रष्टव्यम्। ।।१३ १/२।। (७३ १/२)

सा जातिः = वाचकत्वेनाभिमता जातिः। अस्या जातेर्घटत्वपटत्वाद्यपेक्षया विलक्षणत्वात्सर्वानुभवदूरत्वात्तत्र विप्रतिपत्तीनां सत्त्वाच्च तत्समाधानाय हरिग्रन्थे जातिसमुद्देशादेव द्वात्रिंशत्कारिकामुदाहरति दीक्षितमहाशयः [सत्यासत्यौ त्विति] - भावशब्दस्यानेकार्थकत्वात् प्रकृतोपयुक्तमर्थमाह - [प्रतिपदार्थमिति] - सत्यांशः = कालत्रयाबाध्योंऽशः। [कैयटेनेति] "द्रव्यं हि नित्यम्" इति पस्पशास्थभाष्यप्रतीकेऽयं कैयटः। ननु घटादिद्रव्यस्य कथं नित्यतेत्यत आह [कैयटेन] असत्येति स च कम्बुग्रीवादिमदाकारादिरूपः, त"ङ्ग्यजातिरूपो वेति भावः। [ब्रह्मतत्त्वमेवेति] "सोऽयमक्षरसमाम्नायो वाक्समाम्नायः पुष्पितः फलितश्चन्द्रतारकवत्प्रतिमण्डितो वेदितव्यो ब्रह्मराशिः" इति प्रत्याहाराह्निकान्तस्थभाष्ये चन्द्रतारकवदिति प्रतीकेऽयं कैयटः। [प्रतिभातीति] स्पष्टीकृतं चेदम् "अकारः सर्ववर्णाश्रयः प्रकाशः परमेश्वरः" इत्यादिना सर्ववर्णानां मायेश्वररूपता वर्णेभ्य एव च महदादिसृष्टिरित्यर्थपरतया चतुर्दशसूत्रीं योजयता नन्दिकेश्वरेणेति बोध्यम्।

अयं च पक्षः "अइउण्" सूत्रे व्यक्तिस्फोटजातिस्फोटयोर्बलाबलं चिन्तयता, "अक्षरं न क्षरं विद्यात्" इति प्रत्याहाराह्निकान्ते "व्यवहारनित्यता तु वर्णपदवाक्यस्फोटानाम्। नित्यत्वं तु जातिस्फोटस्य" इति वदता च कैयटेन प्रतिपादितः।

कैयटान्तरविरोधं परिहरति [कथमिति] जातेर्ब्रह्मरूपत्वमिति स्वीकारे तस्या अनित्यत्वप्रतिपादनपरकैयटविरोधः स्पष्ट एवेति भावः। [कैयट इति] "आकृतिर्हि नित्या द्रव्यमनित्यम्"

इति पस्पशास्थभाष्यप्रतीकेऽयं कैयटः। [पक्षान्तरमिति] अविद्याया अविद्याकल्पितधर्मविशेषस्य वा जातित्वेन तस्याश्च जगदन्तःपातित्वेन ब्रह्मदर्शने सर्वस्यापि मिथ्यात्वात्तस्या अपि नाश इति न तद्विरोध इति भावः। स्पष्टं चेदं कौस्तुभे। पूर्वमते तु जातिर्ब्रह्मरूपैवेति बोध्यम्।।७३ १/२।।

तमेव सत्यांशं स्पष्टयति -

इत्थं निष्कृष्यमाणं यच्छब्दतत्त्वं निरञ्जनम्।
ब्रह्मैवेत्यक्षरं प्राहुस्तस्मै पूर्णात्मने नमः।।१४।। (७४)

अयं भावः - "नामरूपे व्याकरणवाणि" इति श्रुतिसिद्धा द्वयी सृष्टिस्तत्र रूपस्येव नाम्नोऽपि तदेव तत्त्वम्। प्रक्रियांशस्त्वविद्याविजृम्भणमात्रम्।

उक्तं च वाक्यपदीये - (द्वितीयकाण्डे)

"शास्त्रेषु प्रक्रियाभेदैरविद्यैवोपवर्ण्यते। २३४
समारम्भाच्च भावानामादिमद् ब्रह्म शाश्वतम्" २३९ इति।

ब्रह्मैवेत्यनेन "अत्रायं पुरुषः स्वयंज्योतिः" "तमेव भान्तमनुभाति सर्वम्" "तस्य भासा सर्वमिदं विभाति" इति श्रुतिसिद्धं स्वपरप्रकाशत्वं सूचयन् स्फुटत्यर्थोऽस्मादिति स्फोट इति यौगिकं स्फोटशब्दाभिधेयत्वं सूचयति। निर्विघ्नप्रचयान्ते मङ्गलं स्तुतिनति-रूपमाह - पूर्णात्मन इत्यादिना।

अशेषफलदातारमपि सर्वेश्वरं गुरुम्।
श्रीमद्भूषणसारेण भूषये शेषभूषणम्।।१४।।(७४)

भट्टोजिदीक्षितैः श्रेष्ठैर्निर्मिताः कारिकाः शुभाः।
कौण्डभट्टेन व्याख्याताः कारिकास्ताः सुविस्तरम्।।

इति श्रीमत्पदवाक्यप्रमाणपरावारीणधुरीणरङ्गोजिभट्टात्मज
कौण्डभट्टविरचितो वैयाकरणभूषणसारः समाप्तः।

सङ्गतिं दर्शयति [तमेवेति] ननु वाचकत्वेन प्रकृता जातिरेव नास्ति। पदं पदमित्यनुगतबुद्धेर्वर्णानुपूर्व्यैवोपपत्तेः। तस्या अपि नानात्वे तु परम्परया वर्णस्तज्जातिर्वा नियामकमस्तु। नचैवं घटत्वाद्यपि न सिद्ध्येदिति वाच्यम्। इष्टापत्तेः। तस्य मृद एवावस्थाविशेषरूपत्वात्। अत एव "वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्" इति च्छन्दोगानामुपनिषदि श्रूयते। व्युत्पादितं चैतत् "तदनन्यत्वमारम्भणशब्दादिभ्यः" २-१-१४ "पटवच्च" २-१-१९ इत्यादिना ऋषिपुङ्गवेन भगवता व्यासेन। अत एव कैयटेन जातेरप्यसत्त्वादनित्यत्वं प्रतिपादितम्। तत्रैव कैयटस्य निर्भर इति चे त्सत्यमेव। तदेतदेव मनसि निधायाह - मूले - [इत्थमिति] - तमेव दीक्षितस्य निगूढाशयं दर्शयति [अयं भाव इति]। [तदेव तत्त्वमिति] अर्थस्येव शब्दस्यापि तदेव तत्त्वम्। प्रपञ्चोऽविद्याकल्पित एवेति वेदान्ततत्त्वमस्माकमपीष्टमेव। तथाच हरिः -

"अजन्मनि तथा नित्ये पौर्वापर्यविवर्जिते।
तत्त्वे जन्मादिरूपत्वं विरुद्धमुपलभ्यते" इति।।

अतोऽविद्यादशायां जातिरेव स्फोटः, निष्कर्षे तु ब्रह्मैव स्फोटः। परं त्वविद्यादशायां वर्णानामेव वाचकत्वं स्वीकृत्य परेषां स्फोटखण्डनमयुक्तमिति भावः। नन्वेवं पाणिन्यादिभिः प्रदर्शितप्रक्रियांशस्य निरालम्बनतापत्तिरत आह [प्रक्रियांशस्त्विति] हरिकारकायां - [शास्त्रे ष्विति] - "व्यवहाराय मन्यन्ते शास्त्रार्थप्रक्रिया यतः" इति पूर्वार्धमस्य भागस्य। ननु वस्तुभूताः शास्त्रप्रक्रियाः किमिति नाश्रिता इत्याशङ्कायां "व्यवहाराय" इति पूर्वार्धमुक्तम्। शास्त्रार्थप्रक्रियाः केवलमबुधानां व्युत्पादनाय। अतो न शास्त्राणि तत्त्वं वक्तुं पारयन्तीति तदाशयः। अथाविद्यैवासत्या प्रक्रियाभेदेनोपवर्ण्यत इत्याह [शास्त्रेष्विति] यद्येवं किमविद्योपदरशकशास्त्रप्रक्रियासमाश्रयेण प्रेक्षापूर्वकारिणामित्याशङ्कामनन्तरकारिकयाऽपनुदति - "अनागमविकल्पा तु स्वयं विद्योपवर्तते" इति। अविद्योपमर्देन ह्युत्तरकालमाममविकल्परहिता शास्त्रप्रक्रिया विकल्पशून्या विद्योपावर्तते = प्रकटीभवति। एतदुक्तं भवति। अविद्यैव विद्योपाय इतीति तदाशयः। [समारम्भात्त्विति] - "समारम्भाच्च भावानामादिवद् ब्रह्म शाश्वतम्" इत्येव वाक्यपदीयपाठः। "घटादिदर्शनाल्लोकः परिच्छिन्नोऽवसीयते" इत्येतत्पूर्वार्धम्। घटादीनां दर्शनात् तद्दृष्टान्तेन सर्वोऽपि प्रपञ्चोऽदृष्टोपि परिच्छिन्नत्वेन गृह्यते। लोकः = विश्वप्रपञ्च इति पूर्वार्धाशयः। पदार्थानामुत्पत्तिं दृष्ट्वा अनादिशाश्वतमपि ब्रह्म उत्पत्तिमदिति लोकैर्व्यपदिश्यते। समारम्भः = उत्पत्तिः।

भावाः = पदार्था इति द्वितीयार्धाशयः। काशिकाकारास्तु "समारम्भस्तु भावानामनादिब्रह्म शाश्वतम्" इति वाक्यपदीयविरुद्धं पाठमाश्रित्य व्याचख्युः, तदयुक्तमेव।

अत्रेदं बोध्यम् - व्यवहारानुरोधेन कल्प्यमानजातेर्यावद्व्यवहारस्थायित्वेन व्यावहारिकमेव नित्यत्वम्। पारमार्थिकं तु सत्यत्वमखण्डवाक्यस्फोटव्यक्तेरेव। तस्या एव ब्रह्मरूपत्वात्। अर्थप्रकाशनसामर्थ्यमपि तस्या एव। "तस्य भासा सर्वमिदं विभाति" इति श्रूतेः। एवं चातिनिष्कर्षेऽखण्डव्यक्तिवाक्यस्फोट एवावशिष्यते। जातिस्फोटस्यातिनिष्कर्षत्वोक्तिस्तु जातेस्तस्या याव"वहारस्थायितया वाक्यवाक्यार्थविचारस्य व्यवहारोपयोगितया वर्णपदयोः सत्यत्ववादिनामपि जातिस्फोटोऽवश्यमाश्रयणीयः। सत्सत्त्वस्य व्यावहारिकतया तन्मतेऽर्थप्रकाशकत्वं व्यावहारिकसत्यत्ववज्ञातेरुपपद्यत इत्याशयेन। ध्वनितं चेदम् "अविद्यादशायां जातिरेव स्फोटः, निष्कर्षेतु ब्रह्मैव" इति भूषणग्रन्थेन। परमसिद्धान्तस्य वैयासकदर्शने प्रतिपादितत्वेन पुनरपि तत्प्रतिपादनं वैयाकरणानां नात्यन्तमावश्यकम्। एतेन "स्फोटवादोऽयं वैयासकसिद्धान्तविरुद्धतया तात्सिद्धान्तानुयायिभिर्नादर्तव्यः" इत्यपास्तम्। स्फोटस्याप्युपाधिविनिर्मोके वैयासकसिद्धान्तसिद्धब्रह्मरूपत्वात्। उपाधेरपि व्यावहारिकत्वेन व्यवहारनाशे तद्विनिर्मोकः स्वत एव सिद्ध्यति।

"शब्द इति चेन्नातः प्रभवात्प्रत्यक्षानुमानाभ्याम्" १-३-२८ इति ब्रह्मसूत्रे भाष्ये "किमात्मकं शब्दमभिप्रेत्येदं शब्दप्रभवत्वमुच्यते?" इति प्रश्ने "स्फोटमित्याह" इत्युपक्रम्य स्फोटसिद्धान्तः श्रीमच्छङ्करभगवत्पादैः सविस्तरं प्रतिपादितः। अनन्तरं "वर्णा एव तु शब्द इति भगवानुपवर्षः" इत्यादिना उपवर्षाचार्यमतावलम्बेन स्फोटखण्डनं भगवत्पादैः प्रतिपादितम्। तत्खण्डनमुपवर्षाचार्यमतेनैवेति स्पष्टमेव भाष्यतोऽवगम्यते। उपवर्षश्च पूर्वमीमांसकमतानुयायी। अतः स्फोटवादो न ब्रह्ममीमांसाशास्त्रविरोधी, किन्तु स स्फोटशब्दस्तत्सम्मतनिर्गुणब्रह्मरूप एवेति न तैरस्माकं विरोधाविरोधचिन्ता। प्रत्युत तच्छास्त्रावलम्बनेनैवास्मच्छास्त्रप्रवृत्तिः। अत एव व्याकरणशास्त्रं दर्शनशास्त्रत्वेन परिगण्यतेऽभियुक्तैः। अत एव सर्वदर्शनसङ्ग्रहे माधवाचार्यैः पाणिनीयदर्शनं प्रत्येकदृष्ट्या प्रदर्शितम् - इत्यलम्। तदेतत्सर्वमभिप्रेत्याह [ब्रह्मैवेत्यनेनेति] "मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि शास्त्राणि प्रथन्ते" इति भाष्योक्तेराह [निर्विघ्नप्रचारायान्ते इति] अन्ते = वैयाकरणमतोन्मज्जननामककारिकाग्रन्थान्ते।

[स्तुतिनतिरूपमिति] नम इत्यनेन नतिः, पूर्णात्मने इत्यनेन स्तुतिश्च प्रतिपाद्यत इति भावः। आह = भट्टोजिदीक्षितः। कौण्डभट्टोऽपि शिष्टाचारमनुसरति [अशेषेति] स्वग्रन्थनिर्माणस्य मूलमावेदयति - [भट्टोजिदीक्षितैरिति] [कारिका इति] एतत्तत्त्वं प्रागेव न्यवेदिषमिति शिवम्।।७४।।

यदत्र सौष्ठवं किञ्चित्तद्गुरोरेव मे नहि।
यदत्रासौष्ठवं किञ्चित्तन्ममैव गुरोर्नहि।।
साधारणे (संवत्सरे) जनिमता पुनः साधारणे मया।
प्रियच्छात्रस्य साहाय्यात् शिवरामस्य धीमतः।।
व्याख्या भूषणसारस्य मुद्रिता तत्त्वदर्शिनी।
सतां हृत्कमलेष्वास्तां यावत्फणिफणे धरा।।

इति श्रीगुरुचरणकमलसेवासमासादितबुद्धिवैशद्येन श्रीमदान्ध्रसर्वकार विजयनगरमहाराजसंस्कृतकलाशाला व्याकरणप्रधानोपाध्यायेन श्री पेरि सर्वेश्वरतनूजन्मना पदवाक्यप्रमाणज्ञेन सूर्यनारायणशास्त्रिणा विरचितायां वैयाकरणभूषणसारव्याख्यायां तत्त्वदर्शिन्यां स्फोटनिर्णयः समाप्तः।।१४।।

समाप्तोऽयं ग्रन्थः।

ओं नमः पाणिनिकात्यायनपतञ्जलिभ्यः शब्दविद्यासम्प्रदायकर्तृभ्यः परमर्षिभ्यः।

सर्वेश्वरार्पणमस्तु

ओं तत्सत्